अ

(Continued)

अनेककोटर (aneka-koṭara) *m.* many hollows or cavities (of trees) अनेककोटरार्धनिःसृतभुजङ्गलेलिह्यमानशाखेषु तरुषु ... हस्तिनः ... विचरन्ति Hastyāyur. 195. 23 (2.13)

अनेककोटि (aneka-koṭi) *f.* **1** many crores देवः ... अनेककोटिदैत्येन्द्रगर्वनिर्वापणक्षमः BrahmāṇḍP. iii. 10. 75; iii. 33. 82; iii. 44. 23; अनेककोटिमार्तण्डविलसत्पीतवाससम् ... वासुदेवम् ... अनुध्यायेत् PāraS. 6. 223; रामः ...अनेककोटिवानरनायकसुग्रीवसहायः ... रावणं हत्वा NaraP. 27.10 (72.21); स कर्ता ... निहन्ति पिण्डम्। ... जीवानाम् ... अनेककोटीनाम् TātpaVṛ. 314.8 (*on* 3.30); नागकुमाराः समागच्छन्ति, तान् गरुडो भक्षयति, तेनानेककोटयो भक्षिताः VetāPañ. (Śi.) 41.7; अनेककोटिमातङ्गतुरङ्गरथपत्तिभिः। सेविताम् ... वन्दे संपत्सरस्वतीम् NityoNi. 102. 28; **2A** more than one alternative or side प्रकारस्तु सर्वत्र वर्णनीयवनितास्रष्टृत्वमेकमेवेत्यनेककोटिकत्वाभावात् CitraMī. 62. 12; RasGaṅ. 344.7; **2B** many alternatives or sides संशयस्यानेककोटिकत्वेन क्लृप्तत्वात् SiddhāTa. 24. 22.

अनेककोटि (aneka-koṭi) *adj.* who has many crores सा नगरी ... बभूव ... अनेकाः कोटयो द्रव्यसंख्यायां स्वरूपपरिमाणे वा येषां ते अनेककोटयः तैः कौटुम्बिकैः कुटुम्बिभिश्चाकीर्णा संकुला JñātāDhaṬ. 2A. 10.

अनेककोटिकसंशय (anekakoṭika-saṁśaya) *m.* doubt having many alternatives or sides धर्मिणः ... अनेककोटिकसंशये त्वनेकस्य धर्मस्यैकधर्मनिष्ठत्व इति विशेषः ŚivārkaMaDī. i. 108. 3 (*on* i. 1. 2)

अनेककोटिकार्यकारणभाव (anekakoṭi-kāryakāraṇabhāva) *m.* many crores of cause-and-effect relations अर्थभेदेनानेककोटिकार्यकारणभावकल्पनापत्तावतिगौरवं स्यात् VaiyāBhū. 243. 6 (*on* 65)

अनेककोटिगुणित (anekakoṭi-guṇita) *adj.* multiplied by many crores आकल्पान्तमनेककोटिगुणितैरर्थैरनेकाध्वरैरानन्दं गमयन् ... अस्माकमास्तां भवान् MahāvīC. App.B. 7. 7 (302. 18)

अनेककोटिजन्मन् (anekakoṭi-janman) *n.* many crores of births दर्शनं सहजं न मे। अनेककोटिजन्मोत्थपुण्यपुञ्जं हि लभ्यते DevīBhāP. vi. 8. 65.

अनेककोटिपर (anekakoṭi-para) *adj.* meant to convey many crores (दिव्यौघा मानवौघाश्च) तेनौघा इति बहुवचनमनेककोटिपरम् LalitāSaBh.15.21 (*on* 37)

अनेककोटिब्रह्माण्ड (anekakoṭi-brahmāṇḍa) *n.* many crores of cosmic eggs or universes कंजलोचना। ... कंजानि अनेककोटिब्रह्माण्डानि लोचनयोः लोचनकृतवीक्षणात् यस्याः सा LalitāTriBh. 259. 11 (*on* 4); अनेककोटिब्रह्माण्डं सर्वं मिथ्येति निश्चिनु TejoBiU. 5. 54.

अनेककोटिब्रह्माण्डजननी (anekakoṭibrahmāṇḍa-jananī) *f.* mother of many crores of cosmic eggs or universes आदिशक्तिः ...। अनेककोटिब्रह्माण्डजननी LalitāSa. 175 (Bh. अनेककोटयो ब्रह्माण्डा येषाम् ... तेषां विराडादीनां जननी); अनेककोटिब्रह्माण्डजननीम् ...। समाराधय ParamāKā. 116. 11.

अनेककोटिब्रह्माण्डनायक (anekakoṭibrahmāṇḍa-nāyaka) *m.* leader of many crores of cosmic eggs or universes अनेककोटिब्रह्माण्डनायकम् ... मयूरेशं नमाम्यहम् GaṇeP. ii. 104. 12.

अनेककोटिमन्त्र (anekakoṭi-mantra) *n.* many crores of mystic formulae अनेककोटिमन्त्राणि चित्ताकुलकराणि च KulārT. 15. 19.

अनेककोटिसंख्य (anekakoṭi-saṅkhya) *adj.* numbering many crores धनबुद्धिनामा वणिक् ... तस्यानेककोटिसंख्यं वसु Śāk. 6. 24 (30)

अनेककोटिसार (anekakoṭi-sāra) *adj.* possessing wealth of many crores काञ्ची नाम नगरी। तस्यामनेककोटिसारः श्रेष्ठिपुत्रः शक्तिकुमारो नामासीत् DaśKuC. 109. 21.

अनेककोटिस्फुरण (anekakoṭi-sphuraṇa) *n.* act of flashing of more than one alternative or side एकविषये समानबलतयानेककोटिस्फुरणस्यैव संदेहत्वात् SāhiDa. 546.13.

अनेककोटी (aneka-koṭī) *f.* many crores अनेककोट्यो महर्षयो भरतचक्रवर्त्याद्याः। सिद्धिं साधितवन्तः ViviTīKa. 31. 16.

अनेककोट्यण्ड (anekakoṭy-aṇḍa) *n.* many crores of cosmic eggs or universes ऐक्षन्नारायणम् ... सः। अनेककोट्यण्डमहाधिराजं विश्वैकवन्द्यम् SkandP. ii (9). 17. 14.

अनेककोट्यब्द (anekakoṭy-abda) *m.* many crores of years तद्रोमखण्डं शतशः प्रकल्प्यम्। अनेककोट्यब्दमुहूर्तखण्डम् VarāṅgaC. 27. 23; 27.20; मुहूर्तविषयास्वादोऽनेककोट्यब्ददुःखदः AgniP. 200. 16.

अनेककोट्यर्थ (anekakoṭy-artha) *m.* property worth many crores अस्मिन्पुरे ये वणिजः प्रधाना अनेककोट्यर्थविशेषवन्तः VarāṅgaC. 14. 76.

अनेककोमलकलम् (anekakomalakalam) *adv.* with various soft tones कोकिलपिकशुकाः संसिद्धाः साधनसिद्धा अनेककोमलकलं गायमानाः सन्ति SāmaraU. 253. 15.

अनेककौतुक (aneka-kautuka) *adj.* containing or full of many wonders or surprises अथान्तःपुरम् ...। स राक्षसपतेर्दिव्यं विवेशानेककौतुकम् RāmāMañ. 238. 20.

अनेककौतुक (aneka-kautuka) *n.* many wonders or surprises कालकसूरिणा। अनेककौतुकप्रेक्षाहृतचित्तः कृतोऽथ सः PrabhāC. 23. 18.

अनेककौतुकभर (anekakautuka-bhara) *adj.* full of many wonders or surprises बहुपुष्पफलोपेतैर्वनैर्नानाविधैस्तथा। अनेककौतुकभरैर्मानसं परिराजते PadmP. ii. 89. 5.

अनेककौतुकाकीर्ण (anekakautukākīrṇa) *adj.* full of many wonders or surprises अनेककौतुकाकीर्णमनवद्यमनश्वरम्। पश्यन्नेवात्मनात्मानम् ... देवेशो बभूवानन्दनिर्भरः KathāKau. 1. 53.

अनेकक्रतु (aneka-kratu) *m.* various sacrifices अनेकक्रतुदानौघैरर्जितं मे महत्फलम् MahāBhā. v. 121. 11; v. 121. 13.

अनेकक्रतुकर्तृ (anekakratu-kartṛ) *adj.* performer of various sacrifices अयं हि वंशो भूपालैरनेकक्रतुकर्तृभिः। ... अलंकृतः MārkP. 101. 4.

अनेकक्रतुगामिन् (anekakratu-gāmin) *adj.* dealing with, i.e. referring to various sacrifices मन्त्रब्राह्मणतर्काणां समूहे काठकादिके। वेदत्वं वर्तते नित्यमनेकक्रतुगामिनि TantrVā. 817. 6 (*on* iii. 3. 1)

अनेकक्रतुदीक्षित (anekakratu-dīkṣita) *adj.* initiated in various sacrifices शतक्रतोर्मध्यमचक्रवर्ती क्रमादनेकक्रतुदीक्षितोऽपि। ऐन्द्रात्पदादभ्यधिके पदे यस्तिष्ठन्न शङ्कास्पदतामयासीत् VikraDeC. 1. 97.

अनेकक्रतुयज्वन् (anekakratu-yajvan) *adj.* offerer, i.e. performer of various sacrifices दिष्ट्या यूपध्वजम् ...। अनेकक्रतुयज्वानं निहतं नाद्य पश्यसि MahāBhā. xi. 24. 5.

अनेकक्रतुयाजिन् (anekakratu-yājin) *adj.* offerer, i.e. performer of various sacrifices अहमेकं ददाम्येषां पिण्डदं कीर्तिवर्धनम्। राजर्षिम् ... अनेकक्रतुयाजिनम् MahāBhā. x. 67* (4); सः ...। वैश्यस्य तु गृहे जातो ह्यनेकक्रतुयाजिनः VarāP. 138. 15; वेदोक्तमन्त्रैः स्तुवन्ति स्मानेकक्रतुयाजिनम् PadmP. v. 31. 115.

अनेकक्रतुविधि (aneka-kratuvidhi) *m.* more than one injunction of a sacrifice अनेकक्रतुविधीनामाक्षेपकत्वं यत्त्वया स्वीकृतं तदपेक्षया तरतीत्याद्येकविधेराक्षेपकत्वं लघु LaCandr. 869. 20; वेदार्थविचारस्य चानेकक्रतुविधिप्रयुक्तत्वापत्तेः। न चैकस्वाध्यायविधिप्रयुक्तत्वेऽनेकविधिप्रयुक्तत्वं संभवति SiddhāTa. 21. 26.

अनेकक्रतुसंभार (anekakratu-sambhāra) *m.* preparation for various sacrifices अनेकक्रतुसंभारैः पूर्णमजिरमुत्तमम् PadmP. iv. 67. 61.

अनेकक्रतुसाधारण (anekakratu-sādhāraṇa) *adj.* common to various sacrifices अनेकक्रतुसाधारणस्यापि (द्रव्यस्य) संविभागेनासाधारण्यं संपाद्य संभवत्येवानुष्ठानम् TantrRa. 22. 9.

अनेकक्रत्वपूर्व (anekakratv-apūrva) *n.* unseen or transcendental merit accrued from various sacrifices ताराङ्कं नभसो रूपम् ...। आत्मरूपमिवानेकक्रत्वपूर्वयुतं बभौ HariC. (Pa.) 123.

अनेकक्रमिकवर्ण (aneka-kramikavarṇa) *m.* diverse successive syllables गवादिपदस्यानेकक्रमिकवर्णसमुदायात्मकत्वेन यौगपद्यासंभवात् MīmāKau.

i. 109. 22 (*on* i. 3. 24)

अनेकक्रयसाधनत्व (anekakrayasādhana-tva) *n.* the state of being the means of diverse purchasings गोत्वाजत्वयोर्द्वयोर्मध्ये गोत्वस्यानेकक्रयसाधनत्वेन भूयोऽनुग्रहस्य न्याय्यत्वात् BhāṭṭDī. iii. 262. 14 (*on* x. 3. 16)

अनेकक्रिमिकीटादि (anekakrimikīṭādi) *adj.* various worms and insects etc. अनेकक्रिमिकीटादिजन्तुसंवृतवपुषि पुरुषे एकशब्दप्रयोगः ŚrutaPra. ii. 164. 26 (*on* i. 4. 23)

अनेकक्रिया (aneka-kriyā) *f.* **Ai** more than one action तद्भावभाविता ...। सा चानेकक्रियायामपि समाना HetuBiṬ. 100 . 22; **Aii** many actions अत्रोपकरणाद्यनेकक्रियाकर्तृत्वेन कुतूहलविशिष्टं मनो निर्दिष्टम् AlaṅkāSa. 74.1; **B** more than one rite or ritual नियोगस्तु स्वमहिमाक्षिप्तदृष्टोपकारानेकक्रियाकारककलापोपबृंहितस्वरूपः प्रतीयते NyāyMañ. i. 324. 29; **C** various undertakings or activities अनेकक्रियानेकशक्तिस्वरूपम् ... गणेशं नमामः GaṇeP. i. 13. 11; **D** many grammatical operations, i.e. derivations अनेकक्रियाविषयस्यापि शब्दानुशासनस्य आरभ्यमाणता 'अथ'शब्दसंनिधाने प्रतीयते Pradī. i. 5B. 3 (*on* i. 1.0); **E** many verbal forms अनेकक्रियाव्यवहारे प्रागुक्तं (लेडादि) वा स्यात् PrakriKau. ii. 464.7.

अनेकक्रियाकारण (anekakriyā-kāraṇa) *n.* cause of many actions अनेकक्रियाकारणम् ... मयूरेशमाद्यं नताः स्म GaṇeP. ii. 123.45.

अनेकक्रियाकारित्व (anekakriyākāri-tva) *n.* the state of being that which causes or produces more than one action (करणस्य) तथा संबद्धस्याप्यनेकक्रियाकारित्वं नास्ति NyāyVār. 85. 22 (*on* i. 1. 16)

अनेकक्रियाकारिन् (anekakriyā-kārin) *adj.* which causes more than one action एकमपि चान्तःकरणमनेकक्रियाकारि भविष्यति Bhām. 510. 7 (*on* ii. 4.6)

अनेकक्रियागतत्व (anekakriyāgata-tva) *n.* the state of pertaining to more than one action यथानेककारकगतत्वेनैकक्रियादीपकं तथानेकक्रियागतत्वेनैककारकमपि दीपकम् AlaṅkāSa. 73. 4.

अनेकक्रियाजनकीभूत (anekakriyājanakī-bhūta) *adj.* which has become the producer of more than one action समूहालम्बनवदनेकक्रियाजनकीभूतैकयत्नाङ्गीकारेण तदन्वयोपपत्तेः MīmāKau. ii. 247. 4 (*on* iii. 2. 15)

अनेकक्रियात्मिका (anekakriyātm-ikā) *adj.* (*f.*) having, i.e. assuming the nature or form of various actions सत्तैवानेकक्रियात्मिका साधनसंबन्धादवसीयमानसाध्यरूपा जन्मादिरूपतयावभासते Pradī. ii. 124 A. 7 (*on* i. 3. 1)

अनेकक्रियाध्याहार (anekakriyādhyāhāra) *m.* supplying, i.e. accumulation of many grammatical operations or themes अनेकक्रियाध्याहारः समुच्चयः KāśiVṛ. *on* iii. 4. 3.

अनेकक्रियानिर्वृत्ति (anekakriyā-nirvṛtti) *f.* accomplishment of more than one action न हि करणस्यानेकक्रियानिर्वृत्तिसामर्थ्यमस्ति NyāyVār. 430. 2 (*on* iii. 2. 32-34)

अनेकक्रियाविरोध (anekakriyā-virodha) *m.* contradiction with more than one action एकस्यानेकक्रियाविरोधाभावात् HetuBiṬ. 100. 15.

अनेकक्रियासमुच्चय (anekakriyā-samuccaya) *m.* accumulation of many grammatical operations or themes अनेकक्रियासमुच्चये द्योत्ये प्रागुक्तं वा स्यात् SiddhāKau. 477B. 5 (*on* iii. 4. 3)

अनेकक्रियासंबन्ध (anekakriyā-sambandha) *m.* connection or relation with various actions या तु निष्पन्नस्य शकलस्यान्या विदारणक्रिया तत्प्रतिपादनायानेकक्रियासंबन्धसंभवे क्रियान्तरव्यवच्छेदाय भिन्नशब्दस्याप्यविरुद्धः प्रयोगः Pradī. vii. 128. 15 (*on* viii. 2. 59)

अनेकक्रियासाधारणधर्म (anekakriyāsādhāraṇa-dharma) *m.* property common to many actions तस्यैव च परंपरासंबन्धेनानेकक्रियासाधारणधर्मस्य सकृद्वृत्तिरस्तीति न दोषः RasGaṅ. 436. 1.

अनेकक्रियोपगम (anekakriyopagama) *m.* acceptance of many actions तत्र ... विशिष्टास्वेतरक्षणभावे प्रत्येकं तद्भावाभावानुविधानादनेकक्रियोपगमो न विरुध्यते HetuBiṬ. 100. 21.

अनेकक्रियोपलब्धि (anekakriyopalabdhi) *f.* acquisition or perception of many actions किं पुनः क्रमस्याग्रहणाद् युगपत् क्रियाभिमानः अथ युगपद्भावादेव युगपदनेकक्रियोपलब्धिः NyāyBh. 230. 4 (*on* iii. 2. 58)

अनेकक्रेतृ (aneka-kretṛ) *adj.* many purchasers (पण्यं यच्च प्रसारितम्) अनेकक्रेतृसंस्पर्शाद् भूमौ च लेपनादिरहितायां स्थापनाद्युपघातः ManuBh. i. 483. 6 (*on* 5. 127)

अनेकक्रेतृकर (aneka-kretṛkara) *m.* many hands of the purchasers यद्विक्रेतव्यम् ... सिद्धान्नव्यतिरिक्तं तदनेकक्रेतृकरस्पर्शेऽपि शुद्धमेव ManvaMu. 220. 28 (*on* 5. 129)

अनेकक्लिष्टकल्पना (aneka-kliṣṭakalpanā) *f.* many complicated assumptions 'सान्त' इत्यादावनेकक्लिष्टकल्पनापेक्षयेयं न्याय्या LaŚabdeŚe. i. 341.4.

अनेकक्लेश (aneka-kleśa) *m.* **A** various troubles पश्येत् ...। अध्ययनादनेकक्लेशम् ViṣṇuSm. 96. 35; अनेकक्लेशवित्तव्ययादिनिर्वर्त्यो वैदिकः कर्मकलापः NyāyMañ. i. 214. 26; **B i** many afflictions or sufferings वैष्णवं पदम् ...। अनेकक्लेशकोशेन पुरुषेणास्थितं क्वचित् AhirbuS. 9. 29; **Bii** various afflictions or sufferings रामसेतौ स्नानं कुर्वन् ...। अनेकक्लेशसंयुक्तं गर्भावासं न पश्यति SkandP. iii(1). 52. 28; **C** various tortures साध्यामृतजले स्नाता मनुष्याः पापकर्मिणः। अनेकक्लेशघोराणि नरकाणि न यान्ति SkandP. iii (1). 28. 9; **D** much distress चित्रसेनः ... अनेकक्लेशदुःखेन व्याघ्रं हन्तुं समाहितः PadmP. iii. 13. 73.

अनेकक्लेशसंकुल (anekakleśa-saṅkula) *adj.* filled with various sufferings संसारगर्तपतनादनेकक्लेशसंकुलात्। रक्ष रक्ष जगन्नाथ TriṣaŚaPuC. ii. 6.635.

अनेकक्लेशसंघात (anekakleśa-saṅghāta) *m.* multitude of various tortures अस्मादन्यतमः को वा नरकोऽस्ति नृणामिह। अनेकक्लेशसंघातैर्यन्मुहुः परिपीडनम् SkandP. iii (3). 3. 124.

अनेकक्लेशसंपन्न (anekakleśa-sampanna) *adj.* full of various troubles तत्रैव जागरान्तेऽहं तात पञ्चत्वमागतः। ... अनेकक्लेशसंपन्नान्मार्गान् (?°त्) प्राप्तो यमान्तिकम् BṛNāraP. 21. 63.

अनेकक्लेशसंपूर्ण (anekakleśa-sampūrṇa) *adj.* full of various afflictions or sufferings श्रीरामधनुषः कोट्या रेखां यः पश्यते कृताम्। अनेकक्लेशसंपूर्णं गर्भावासं न पश्यति SkandP. iii (1). 52. 48.

अनेकक्षण (aneka-kṣaṇa) *m.* **A** many moments क्रमेण च वाक्यप्रतिपत्तिर्दृष्टा, सर्ववाक्यव्याहारश्रवणस्मरणकालस्यानेकक्षणनिमेषानुक्रमपरिसमाप्तेः PramāVāSvopVṛ. 86. 4; अविनष्टाच्च तज्ज्ञातावनेकक्षणसंभवात्। क्षणिकत्वं न भावानां व्याहन्येत तदा कथम् TattvSaṁ. 489; पाकक्रिया सलिलावसेक° ... °आस्रावणाद्यनेकक्षणसमुदायस्वभावा NyāyMañ. i. 316. 17; न चानेकक्षणव्यवहितद्वित्वोत्पत्तिप्रक्रियायां प्रमाणमस्ति TarkSaṁ. (Ā.) 3. 18; एकस्यैवानेकक्षणसंबन्धित्वं स्थिरत्वम् NyāySu. (Ja.) 394A. 6 (*on* ii. 2.7); पूर्वघटक्षणादिष्वप्रतिसंख्यानिरोधरूपस्य चानेकक्षणानुयायिनो विनाशस्याप्रामाणिकत्वात् ŚivārkaMaDī. ii. 85. 26 (*on* ii. 2. 21); 'युवा सुवासा' इत्यादिषु यद्यप्यर्थाभिधानं न स्वरसतः कर्मविध्यपेक्षितम्, तथापि यूपपरिव्याणादिक्रियाया अनेकक्षणव्यासक्तत्वेन ...स्मारकापेक्षोपपत्तेः MīmāKau. iii(1). 68. 9 (*on* i. 2. 42); **B** more than one moment विरुद्धधर्मयोगेऽपि यदि चैकत्वमिष्यते। अनेकक्षणयोगेऽपि भाव एकोऽभ्युपेयताम् NyāyMañ. ii. 26. 25; अनेकक्षणसमूहात्मकस्य धातुवाच्यस्य अर्थस्य क्रियारूपस्य युगपदसंनिधानादनुमीयते Pradī. iii. 198A. 18 (*on* iii. 2. 123); iii. 197B. 17 (*on* iii .2. 123); किंचेदं क्षणिकत्वम् ... अनेकक्षणानवस्थायित्वविशेषितं वा TattvPradī. (Ci.) 216. 9.

अनेकक्षणपरंपरा (anekakṣaṇa-paramparā) *f.* succession of many moments वस्तु खलु ... अनेकक्षणपरंपरोह्यमानं परिणामात्मकमनुभूयते TattvVai. 199. 14 (*on* 4. 15)

अनेकक्षणवर्तिन् (anekakṣaṇa-vartin) *adj.* existing for many moments तेषां चाङ्गोपकारमन्तरेणानिष्पत्तेरङ्गानां चानेकक्षणवर्तिनां संघातासंभवादङ्गापूर्वाणि कल्पनीयानि NyāyMāVi. 65. 26 (*on* ii. 1. 2)

अनेकक्षणविनष्ट (anekakṣaṇa-vinaṣṭa) *adj.* destroyed after many moments पूर्वापरीभावापन्नानेकक्षणविनष्टस्यात्मन उत्पत्तेरत्रापि सुलभत्वान्नातिप्रसङ्गः VaiyāBhū. 51. 8 (*on* 12)

अनेकक्षणविलम्ब (anekakṣaṇa-vilamba) *m.* delay of many *moments* घटज्ञानोदयसमये मनसि क्रिया ... इत्यनेकक्षणविलम्बेनोत्पद्यमानस्य ज्ञानस्यापरोक्षतया पूर्वज्ञानग्राहकत्वानुपपत्तेः TattvPradī. (Ci.) 17. 7.

अनेकक्षणव्यवधान (anekakṣaṇa-vyavadhāna) *n.* interruption by many moments नन्वेवमुत्तरसंयोगमपि कुतः करोति अनेकक्षणव्यवधानात् NyāyKa.157.12.

अनेकक्षणव्यापार (anekakṣaṇa-vyāpāra) *m.* operation continuing for many moments अनेकक्षणव्यापारो हि अक्षणिकः। स कथं एकक्षणभाविना अध्यक्षेण ग्रहीतुं शक्यः TarkBhā. (Mo.) 32. 7.

अनेकक्षणानुभव (anekakṣaṇānubhava) *m.* experience (of existence) for many moments तदेवमनेकक्षणानुभवादुत्पन्नमात्रो विभागो ध्वंसत इत्यसिद्धम् NyāyVār. 494. 3 (*on* iv. 1. 50)

अनेकक्षणानुवृत्ति (anekakṣaṇānuvṛtti) *f.* continuation for many moments मातृक्षणिकत्वे तु नार्थस्यानेकक्षणानुवृत्त्यनुभूतिः स्यात् NayaVi. 217. 10 (*on* i. 1. 5)

अनेकक्षणावस्थान (anekakṣaṇāvasthāna) *n.* existence for many moments असिद्धमेतत् अयुगपत्कालप्रत्ययानालम्बनाः प्रदीपादयः तेषामनेकक्षणावस्थानात् NyāyVār. 416. 1 (*on* iii. 2. 14)

अनेकक्षणिकत्व (anekakṣaṇika-tva) *n.* the state of being what exists for many moments आवस्थिकः प्रतीत्यसमुत्पादः ... प्रकर्षयोगात् प्राकर्षिकः अनेकक्षणिकत्वादनेकजन्मिकत्वाद्वा Sphuṭā. iii. 32. 27 (*on* 3. 2-5)

अनेकक्षतसंयुक्त (anekakṣata-saṁyukta) *adj.* full of, i.e. affected by many wounds अनेकक्षतसंयुक्तं स्रवद्रक्तममङ्गलम्। ... गच्छन्तं तादृशं दृष्ट्वा नरा नासानिरोधनम्। कुर्वन्ति GaṇeP. i. 65. 20.

अनेकक्षतसंपन्न (anekakṣata-sampanna) *adj.* full of, i.e. affected by many wounds उत्पन्नोऽहं यदा ब्रह्मन्नन्धो बधिर एव च। अनेकक्षतसंपन्नो माता त्यक्तुं तदोद्यता GaṇeP. i. 20. 22.

अनेकक्षत्रबद्ध (anekakṣatrabaddha) *m.* names of two sons of Raucya Manu, viz. Anekabaddha and Kṣatrabaddha चित्रसेनः ... अनेकक्षत्रबद्धश्च ...। रौच्यस्यैते मनोः पुत्रा ह्यन्तरे तु त्रयोदशे VāyuP. ii. 38. 109.

अनेकक्षिप्तपाषाण (aneka-kṣiptapāṣāṇa) *n.* many stones that are hurled at अनेकक्षिप्तपाषाणचूर्णीकृतमहीरुहाः। पर्वतस्यापि काश्मीरा उन्नतत्वं न सेहिरे RājTa. (Prā.) 800.

अनेकक्षुरिकाघात (aneka-kṣurikāghāta) *m.* many attacks with a dagger अनेकक्षुरिकाघातक्षुण्णकुक्षेः क्षयैषिणः। को नाम गौडयक्षस्य सत्रे याति विपक्षताम् Deśopa. 6. 26.

अनेकक्षेत्र (aneka-kṣetra) *adj.* (applications or uses) pertaining to more than one bodily part स एषोऽवधिज्ञानोपयोगो द्विधा भवति एकक्षेत्रोऽनेकक्षेत्रश्च। ... तदनेकोपकरणोपयोगोऽनेकक्षेत्रः TattvāRāVār. i. 22. 4.

अनेकक्षेत्र (aneka-kṣetra) *n.* many fields स्तोत्रं श्रीरामचन्द्रस्य सीतायाः पठतेऽन्वहम्। स नरः ... अश्नुते ... । अनेकक्षेत्रधान्यानि SkandP. iii (1). 46. 61.

अनेकक्षेत्रव्यवच्छेदिका (anekakṣetra-vyavacchedikā) *adj.* (*f.*) (boundary) separating many fields अनेकक्षेत्रव्यवच्छेदिका साधारणा भूर्मर्यादा Mitā. 259. 21 (*on* 2. 155)

अनेकक्षेत्रावधिज्ञान (anekakṣetrāvadhi-jñāna) *n.* perception extending to more than one bodily part, JainaL.

अनेकक्षोणीधरकुल (anekakṣoṇīdhara-kula) *n.* group of many mountains (मही) इयं च दुर्गमानेकक्षोणीधरकुलाकुला SamarāSū. 1. 15.

अनेकखग (aneka-khaga) *m.* many birds यत्र (उद्याने) ... सखीसखानेकखगप्रेङ्खन्नखमुखावलिख्यमानफलितशिखरैः समीपशाखिभिः स्खलितप्रसंख्यानमखसंमुखीनवैखानसमानसे ... रमन्ते कामिनः YaśasCam. i. 98. 3.

अनेकखगसनाथ (anekakhaga-sanātha) *adj.* crowded with many birds अस्ति ... न्यग्रोधवृक्षः (v.l. तस्य समीपेऽनेकखगसनाथः ... न्यग्रोधपादपस्तिष्ठति) PañcT. 3. 1 (2) (272. 11)

अनेकखुर (aneka-khura) *adj.* having more than one hoof (ग्राम्यपशुसंघेष्वतरुणेषु स्त्री।... अनेकशफेष्विति वाच्यम्) अनेकखुरेष्वित्यर्थः Prasā. i. 644.7.

अनेकखेदभिन्न (anekakheda-bhinna) *adj.* divided into various (types of) sorrows यतिना ... । दुरितस्य फलं समक्षभूतं तदपि प्रोक्तमनेकखेदभिन्नम् VarāṅgaC.8.68.

अनेकगकारोत्पाद (anekagakārotpāda) *m.* origination or production of many *ga*-sounds कर्णेऽनेकगकारोत्पादेऽनेकग्रहणप्रसङ्गः TattvCin. i. 626. 1.

अनेकगगनतलशतह्रद (aneka-gaganatalaśatahrada) *adj.* which has many lightenings on the surface of sky हस्तोदस्तसलिलासारधारासहस्रसंपादितानेकगगनतलशतह्रदे महाह्रदे YaśasCam. ii. 214. 1.

अनेकगङ्गा (aneka-gaṅgā) *adj.* having many Gaṅgā-rivers विपाण्डुभिः केतुशिखांशुकौघैरनेकगङ्गामिव कुर्वती द्याम् (सेना) HarVi. 48. 118.

अनेकगजतुरङ्गशाला (aneka-gajaturaṅgaśālā) *f.* many stalls of elephants and (many) stables of horses अतिक्रान्ते षोडशे वर्षे राजा ... अस्य ... अनेकगजतुरङ्गशालाभिरामं कुमारभवनमकारयत् TilaMañ. 80. 1.

अनेकगजयुद्ध (anekagaja-yuddha) *n.* battle involving many elephants भवांस्तावदनेकगजयुद्धरदनसंनिपातव्रणशबलत्वान्नित्यमित्थं भूतः Tantrākhyā.25.2.

अनेकगण (aneka-gaṇa) *m.* **A** many attendants षण्मुखः ... अनेकगणसंवृतः MahāBhā. xiii. App. I. 4 (43); **Bi** more than one group नैको यागोऽनेकगणं समर्थो ग्रहीतुम् TantrVā. 525. 3 (*on* ii. 2. 20); **Bii** many groups तत्रानेकगणाः पालकाः सायुधाः पापघातकाः BhasmJāU. 566. 7.

अनेकगणभूत (aneka-gaṇabhūta) *m.* many attendants of Śiva (*gaṇa*) and (many) creatures (*bhūta*) पर्वतवरे ...। वसुधारे च ...शंकरो योगिनां वरः अनेकगुण (v.l. °गण° in A.S. Gupta's Ed. 1981) भूतकोटिसहस्रपरीवारोऽनादिपुरुषो व्यवस्थितः VarāP. 81(357. 13)

अनेकगत (aneka-gata) *adj.* pertaining to more than one (entity) विरुद्धत्वमनेकगतं वक्तव्यमिति नियमः ŚivārkaMaDī. i. 106. 12 (*on* i. 1. 2); अनेकगतं सर्वात्मना परस्परप्रतिक्षेपमवगाहमानं ज्ञानं संशय इत्येव लक्षणम् ŚivārkaMaDī. i. 107. 34 (*on* i. 1. 2)

अनेकगति (aneka-gati) *f.* **1** many prefixes (गतिरनन्तरः) अनेकगतिसंनिधौ अप्राप्तस्य गतिस्वरस्यानन्तरग्रहणेन पुनः श्रुत्या प्राप्तिः क्रियते Pradī. v. 193A. 5 (*on* vi. 2. 49); यत्र त्वनेको गतिस्तत्रासौ (स्वरः) न प्राप्नोति, तदनन्तर इत्यनेनानेकगतिसमवधानेऽनन्तरस्य प्राप्यते PadMañ. *on* KāśiVṛ. *on* P. vi. 2. 49 (55.3); **2** diverse migratory states दधाति नटवन्नरः ... वपुः। अनेकगतिचित्रितं विविधजातिभेदाकुलम् SubhāRaSam. 252.

अनेकगन्ध (aneka-gandha) *m.* diverse scents अनेकगन्धप्रवहम् ...। स ददर्शाविदूरस्थं चैत्यप्रासादमूर्जितम् Rāmā. v. 13. 14

अनेकगन्ध (anekagandha) *adj.* variously fragrant अनेकवक्त्रनयनम्। ... अनेकगन्धपुष्पाढ्यम् ... संस्मरेत् JayāS. 21. 231.

अनेकगन्धादि (anekagandhādi) *adj.* diverse scents etc. कार्यारम्भे कारणगता गन्धादयो गुणाः ... कार्यगाः कार्यगतगन्धाद्यारम्भका अपि भवेयुः को दोषः ... अन्यथानेकगन्धाद्यभ्युपगमेऽपि समानो दोषः NyāySu. (Ja.) 350 A. 13 (*on* ii. 2. 6)

अनेकगर्भ (aneka-garbha) *adj.* containing many (blades) inside अनेकगर्भमुच्चं यत्काण्डं काण्डेषु चोत्तमम्।... पुंस्तत्त्वं तेन कल्प्यते PāraS. 12. 541.

अनेकगवाक्षान्तर्गत (anekagavākṣāntargata) *adj.* being in the interior, i.e. seen through more than one window दारकः नयनविषयालोचनानन्तरं रसानुस्मृतिक्रमेण रसनविक्रियादर्शनादनेकगवाक्षान्तर्गतप्रेक्षकवदुभयदर्शी कश्चिदेको विज्ञायते PadārthaSaṁ. 70. 4; Kiraṇā. 135. 18.

अनेकगवाद्यात्मिका (anekagavādyātm-ikā) *adj.* (*f.*) consisting of many cows etc. न च विशेषणवशेन विशेष्ये संख्या भवति यथाग्नीषोमौ देवतेति। तेनानेकगवाद्यात्मिकैका दक्षिणा ŚāstrDī. 691. 1 (*on* x. 3. 14); MīmāNyāPra. 254. 34.

अनेकगा (aneka-gā) *adj.* (*f.*) **1** going to many, i.e. having intercourse with many (men) वीरैर्भोग्यानेकगा भूरसाध्वी जाने बद्धा राघव स्वैर्गुणौघैः ...अनेकगानेकपुरुषगामिनी AlaṅkāMañ. 20. 10; 20. 14; **2** going to many, i.e. being under the reign of many (kings), AlaṅkāMañ. 20. 10; 20.14.

अनेकगामित्व (anekagāmi-tva) *n.* the state of going to many, i.e. being under the custody of many (individuals) उपनिधिं वक्ष्यति। राजधनमनेकगामित्वात् ... यत्रैव स्वामित्वाद् ऋतेऽपि भुक्तिः ... तत्कृतोपभोगो नापहारकारणम् BālaKrī. i. 212. 3 (*on* 2. 25)

अनेकगि (aneka-gi) *adj.* having more than one prefix नानेकगेः। JaineVyā. iv. 4. 91 (Vṛ. अनेको गिर्यस्य तस्य छादेरुडः प्रो न भवति। समुपच्छादः)

अनेकगिरिकूट (aneka-girikūṭa) *n.* many mountain-peaks अहमनेकगिरिकूटतटिनीमहावटैरारोहावरोहविषमम् ... पन्थानमतिक्रम्य गच्छन् ... महावने पतितोऽस्मि UdaySuKa. 60. 3.

अनेकगुण (aneka-guṇa) *adj.* [*f.* -ā] **1** involving manifold (religious) merits विगणय्य कारणमनेकगुणं (तपः) निजयाथवा कथितमल्पतया। असदप्यदः सहितुमर्हसि नः Kirātā. 6. 37 (comm. बहुफलदम्); अद्यानेकगुणा राजन् पुण्या तिथिरिवागता MalliC. 2. 642; **2A** multiplied, manifold पुत्रचिन्तारुजार्तस्य कुर्वाणः शल्यघट्टनम्। नन्वनेकगुणां भर्तुरुत्पादयसि वेदनाम् BṛKathāŚloSaṁ. 4.72; तस्य चानेकगुणगभीराभोगमहनीयस्य मध्ये कविराजचक्रस्य ... मुम्मुणिराजमद्राक्षीत् UdaySuKa. 156. 16; **2B** repeated more than once सोऽयमेकगुणो व्यस्तश्च लाटीयानुप्रासो व्यवहित इत्युच्यते। व्यस्तश्चानेकगुणः SaraKaṇṭhā. 261. 22; **3A** having more than one quality or virtue (हारावली) तया दत्ता मयानीता स्वयमाह्लादिनी त्वया। इत्यनेकगुणाप्येषा कथमेकगुणीकृता NalaCam. 5.13 (comm. गुणाश्चारुतादयः); **3B** having many qualities or virtues शङ्खकूटऋषभयोर्मध्ये पुरुषस्थली रम्यानेकगुणा VarāP. 80 (355.16); तपन्तकेन ... प्राप्ता ... विडम्बना। तामनेकगुणां प्राप्यज्येष्ठाम्बाप्रेषिताश्चराः BṛKathāŚloSaṁ. 15. 26; **4** having more than one strand, NalaCam. 5. 13 (comm. गुणाः ... तन्तुसरिकाः); **5** having diverse purposes or uses, cf. **अनेकगुणता.**

अनेकगुण (aneka-guṇa) *m.* **1A** more than one property भावनैव च वाक्यार्थः सर्वत्राख्यातवत्तया। अनेकगुणजात्यादिकारकार्थानुरञ्जिता। एकयैव तु बुद्ध्यासौ गृह्यते चित्ररूपया ŚlokaVār. 7. 331 (939. 3); **1B** (Nyāya) many qualities

स चार्थोऽनेकगुणक्रियाजातिव्यक्त्यादिरूपसंकुल उपलभ्यते NyāyMañ. i. 190. 11; **2A** many accessories or subsidiary rites प्रवर्तनारूपविध्यन्वयस्य संभवादनेकगुणानां प्राप्तकर्मानुवादेन विधाने को दोषः GuruCandr. i. 479. 24; अनेकगुणफलसंबन्धाङ्गीकारेण वाक्यभेदापत्तेरुपक्रमोपसंहारयोरेकविषयत्वेन गम्यमानैकवाक्यत्वभङ्गापत्तेः MīmāKau. i. 264. 18 (*on* i. 4. 21); **2B** more than one subsidiary rite, cf. **अनेकगुणविधि B; 3** several multiplications, cf. **अनेकगुणपर्यन्तम्; 4A** many virtues इलः किंपुरुषोऽभवत् ...स्त्री च मासमभूत्। ...अजीजनत्पुत्रमेकमनेकगुणसंयुतम् MatsyaP. 12. 13; **4Bi** many attributes सामान्येतरसंयुक्तमनेकगुणसंयुतम् ...विशेष्यं तत्प्रचक्षते TaiUBhāVā. 50. 17 (2); **4Bii** more than one attribute, cf. **अनेकगुणविभूतिविशिष्ट; 5** more than one subordinate factor, cf. **अनेकगुणोपरक्त.**

अनेकगुणता (anekaguṇa-tā) *f.* the state of having diverse purposes or uses अनेकगुणतैव द्रव्याणां न्याय्या ŚābaBh. 1233. 6 (*on* iv. 2. 10)

अनेकगुणत्व (anekaguṇa-tva) *n.* the state of having diverse purposes or uses न हि संभवत्येकं स्तरणाय विधृतिपवित्राय च। ... उपदिष्टवचनमनेकगुणत्वं चोभे अप्यसंभविनी प्रतिज्ञाते स्याताम् ŚābaBh. 1135. 6 (*on* iii. 8. 32)

अनेकगुणनिमित्त (anekaguṇa-nimitta) *adj.* caused by many accessories तत्रानेकगुणनिमित्तो भेदः पौर्णमास्यधिकरणे ... प्रतिपादितः ŚāstrDī. 147. 3 (*on* ii. 2. 9); MayūMāli. 147. 5 (*on* ii. 2. 9)

अनेकगुणपर्यन्तम् (anekaguṇaparyantam) *adv.* up to several multiplications (of time) सदा द्वादश मासान्वै जुह्वानो जातवेदसम् ... अनेकगुणपर्यन्तं विमानवरमास्थितः। रमते देवकन्याभिः MahāBhā. xiii. 110. 95.

अनेकगुणप्रपञ्च (anekaguṇa-prapañca) *adj.* having expansion of many qualities कृत्स्नं त्वयैव गगनामृतधारयैतदाप्याय्यते जगदनेकगुणप्रपञ्चम् HarVi. 47. 58.

अनेकगुणभाव (aneka-guṇabhāva) *m.* **A** many subserviences न चात्रोपदिष्टोपदेश आशङ्क्योऽनेकगुणभावश्च ŚābaBh. 1136. 1 (*on* iii. 8. 33); **B** (aneka-guṇa- bhāva) the state of having diverse purposes or uses अनेकगुणभावश्च कपालवद्भविष्यति। यथा कपालं श्रपणेऽपि तुषोपवपनेऽपि ŚābaBh. 1814. 22 (*on* x. 1. 22); 1233. 4 (*on* iv. 2. 10); न खल्वेकस्यानेकगुणभाव उचितः TantrRa. 130. 11.

अनेकगुणभूत (aneka-guṇabhūta) *adj.* which has become multiplied or manifold पर्वतवरे ...। वसुधारे ... शंकरः ... अनेकगुणभूतकोटिसहस्रपरीवारः ...व्यवस्थितः VarāP. 81 (357. 13)

अनेकगुणरत्नभृता (anekaguṇaratna-bhṛtā) *adj.* (*f.*) possessed of many jewels of virtues यद्यप्यनेकगुणरत्नभृता धरित्री। यो येन रञ्जितमनाः सुखितः स तेन CampaŚreKa. 234.

अनेकगुणवत् (anekaguṇa-va(n)t) *adj.* possessing many excellent qualities खलोऽतिनिपुणो राजन्ननेकगुणवान्कृती। निर्दोषं कुरुते दुष्टं गुण्यं गुणविवर्जितम् AlaṅkāMañ. 111. 2.

अनेकगुणविधान (anekaguṇa-vidhāna) *n.* injunction of many accesories or subsidiary rites (causing the fault of syntactic split) वषट्कर्तुः प्रथमभक्षः ... न मन्तव्यमनेकगुणविधानादविवक्षितं प्राथम्यमिति ŚābaBh. 1011. 4 (*on* iii. 5. 38); 593. 12 (*on* ii. 3. 4); 1312. 9 (*on* v. 2. 5); 1459. 7 (*on* vi. 5. 3); प्रमाणान्तरप्राप्ते कर्मणि अनेकगुणविधानस्य पौर्णमास्यधिकरणे निराकृतत्वात् TantrVā. 530. 9 (*on* ii. 2. 22) ; देवतापरिमाणयोरप्राप्तत्वादनेकगुणविधानात्कर्मान्तरम् ṬupṬ. 135. 4 (*on* vi. 4. 29); 138. 16 (*on* vi. 5. 1); PrakaPañ. 262. 4; Bhām. 594. 5 (*on* iii. 3. 7); ŚivārkaMaDī. i. 41. 11 (*on* i. 1. 1); i. 144. 25 (*on* i. 1. 3); ii. 316. 11 (*on* iii. 3. 19); किं प्राप्तकर्मानुवादेनानेकगुणविधानमेकेन विधिना संभवति उत न ŚāstrDī. 125. 13 (*on* ii. 2. 3); ŚrutaPra. ii. 482. 20 (*on* iii. 3. 19); अनेकगुणविधानं तद्विशिष्टोपासनान्तरविधानादुपपद्यते ŚivārkaMaDī. i. 299. 13 (*on* i. 2. 1); 'वैश्वदेव्यामिक्षा' इत्यत्र ... यागे विहिते तदनुवादेन 'वाजिभ्यो वाजिनम्' इत्यत्र न गुणमात्रविधिः। प्राप्तकर्मानुवादेनानेकगुणविधाने वाक्यभेदापत्तेः BhāṭṭDī. i. 128. 7 (*on* ii. 2. 9); अनेकविध्यन्तरप्रसवसमर्थैकविशिष्टविधिप्रसादेनानेकगुणविधानम् LaCandr. 726. 43; न च क्रियानुवादेनानेकगुणविधाने वाक्यभेदः ViraMi. (Vyavahāra.) 10. 23; पञ्चदशान्याज्यानीतिवदेवोभयोः क्रियासंबन्धाद्वैशिष्ट्यानुपपत्तेः प्राप्तभावनानुवादेनानेकगुणविधाने वाक्यभेदो दुरुद्धर एव MīmāKau. iii (2). 179. 10 (*on* ii. 2. 6); MīmāNyāPra. 202. 18; पौर्णमास्यधिकरणे एव प्राप्तकर्मण्यनेकगुणविधानसंभवेन गुणनिमित्तकभेदो व्युत्पादितः MayūMāli. 147. 2 (*on* ii. 2.9)

अनेकगुणविधि (anekaguṇa-vidhi) *m.* **A** injunction of many accessories or subsidiary rites (causing the fault of syntactic split) यद्यप्यत्र वाजिनं देवता च गुणो विधीयते इति वक्तुं शक्यं तथापि प्राप्ते कर्मण्यनेकगुणविध्यसंभवाद् द्रव्यमात्रविधिरुक्तः VedāntKa. 393. 22 (*on* iii. 3.1) ; 403. 24 (*on* iii. 3.6); 'आग्नेयोऽष्टाकपालः' इत्यादिवाक्यानि तु विहितयागानुवादेन द्रव्यदेवतालक्षणगुणविधायकानि इति चेत्। न, तथा सत्येकेन वाक्येनानेकगुणविध्यसंभवात् NyāyMāVi. 83. 3 (*on* ii. 2. 3) ; **B** injunction of more than one subsidiary rite एकेन वाक्येनानेकगुणविधिनिर्वाहाय ... अनेकगुणविशिष्टस्य प्रयोगस्य विधानमुपपद्यते ŚivārkaMaDī. i. 314. 11 (*on* i. 2. 1); अनेकगुणविधिस्वीकारे सर्वत्र विधेस्तात्पर्यात् सर्वत्र पर्यवसानं वाच्यम् MayūMāli. 130. 5 (*on* ii. 2. 3)

अनेकगुणविधित्व (anekaguṇavidhi-tva) *n.* the state of being an injunction of more than one subsidiary rite यदग्नये च ... सायं जुहोति यत्सूर्याय च प्रजापतये च प्रातरित्यनयोरनेकगुणविधित्वाच्चोदना वा ... इत्येतदापद्यते TantrVā. 500. 11 (*on* ii. 2. 16)

अनेकगुणविभूतिविशिष्ट (anekaguṇavibhūti-viśiṣṭa) *adj.* qualified by the splendour of more than one attribute अथानेकगुणविभूतिविशिष्टस्य ब्रह्मणः एकत्वं, तदभिमतमेव NītiMā. 6. 19.

अनेकगुणविशिष्ट (anekaguṇa-viśiṣṭa) *adj.* **A** qualified by more than one subsidiary rite कर्मान्तरं तत्पूर्वं शक्यमेकेनैव प्रयत्नेनानेकगुणविशिष्टं विधातुमिति निमित्ते कर्मान्तरमेव विधीयते Bhām. 594. 6 (*on* iii. 3. 7); VedāntKa. 393. 24 (*on* iii.3.7); यदा पूर्वकर्मपरो विधिर्भवति तदा तस्यैकस्यानेकगुणविशिष्टस्य विधानात् ... नासकृच्छ्रवणदोषः प्रसज्यते ŚāstrDī. 130. 2 (*on* ii. 2. 3); ŚivārkaMaDī. i. 314. 11 (*on* i. 2. 1); LaCandr. 826. 31; मध्यमादिवाक्यानां द्रव्यदेवताविशिष्टैकप्रयोगविधायकत्वमस्तु तत्र चानेकगुणविशिष्टैककर्मविधाविव वाक्यभेदो न प्रसरति VidhiRa. 40 (205. 3); प्रसक्तं वाक्यभेदमनेकगुणविशिष्टप्रयोगविध्याश्रयणेन परिहरन्ति (मीमांसकाः) ŚivārkaMaDī. i. 315. 6 (*on* i. 2. 1); MayūMāli. 535. 12 (*on* vii. 3. 5); 'पशुना यजेत' ... इतिवद्धा प्राप्तकर्मानुवादेनाप्यनेकगुणविशिष्टैकतृतीयोपात्तकरणकारकविधानेन अवाक्यभेदात् MīmāKau. i. 174. 14 (*on* i. 4. 3); अत्रानेकगुणविशिष्टभावनाविधानम् BhāṭṭCin. ii. 61. 15 (*on* i. 4. 6); **B** accompanied or qualified by more than one attribute सत्यं ज्ञानमनन्तं ब्रह्म इत्यत्र ... अनेकगुणविशिष्टाभिधानेऽप्यनेकार्थत्वमविरुद्धम् BrahmSūBh. (Rā.) 19. 19 (*on* i. 1. 1); विशेष्यैक्येऽपि विशेषणभेदः ... दुरपह्नवः। अन्यथानेकगुणविशिष्टैकवस्तुप्रतिपादकतयाभिमतानां सगुणवाक्यानामनुत्थानप्रसङ्गात् ŚatDū. 165. 13.

अनेकगुणवैशिष्ट्य (anekaguṇa-vaiśiṣṭya) *n.* qualification by more than one subsidiary rite अनेकगुणवैशिष्ट्योपपत्तावपि विधिफलस्यैकविषयत्वस्वाभाव्येनानेकविषयत्वे आवृत्त्यवश्यंभावात् MīmāKau. iii (2). 199. 3 (*on* ii. 2.16)

अनेकगुणश्रवण (anekaguṇa-śravaṇa) *n.* hearing mention of many subsidiary rites गुणविधिस्तावन्न संभवति, अनेकगुणश्रवणादनेकगुणविधाने वाक्यभेदप्रसङ्गात् PrakaPañ. 262. 4; MayūMāli. 814. 9 (*on* xi. 2. 12); अरुणावाक्येऽनेकगुणश्रवणात् तत्रैव क्रयविधिः ŚāstrDī. 254. 3 (*on* iii. 3. 11); अनेकगुणश्रवणेऽपि तस्मिन् होमे गुणमात्रविधानमिति तस्यैवाधिकरणभेदेन चतुश्चतुरभ्यासोऽप्यभ्युपगम्यताम् VidhiRa. 5 (28. 18); यत्रानेकगुणश्रवणेऽपि ... प्रकृतकर्मविषयत्वं वक्तव्यं तत्र वाक्यभेदपरिहारार्थं प्रयोगविध्याश्रयणं दृष्टम् ŚivārkaMaDī. i. 315. 7 (*on* i. 2. 1); i. 298. 15 (*on* i. 2. 1); न चैवमपि अनेकगुणश्रवणात् गुणात् कर्मान्तरत्वापत्तिः MīmāKau. ii. 46. 11 (*on* ii. 3. 12); यदग्नये चेतिवाक्यद्वयेऽनेकगुणश्रवणेन विशिष्टकर्मान्तरविध्यवश्यंभावेन ... मन्त्रविधेरेवाभावात् MayūMāli. 66. 14 (*on* i. 4. 4); सप्तदश प्राजापत्यानित्यत्रानेकगुणश्रवणात् ... उत्पद्यमानस्य कर्मणोऽनेकत्वं बोधयति MayūMāli. 95. 4 (*on* ii. 1. 1); 154. 5 (*on* ii. 2. 12)

अनेकगुणसंयुक्त (anekaguṇa-saṁyukta) *adj.* associated with many subsidiary rites विधानान्तरादपि कर्मान्यत्वावगमः। विधानान्तरं च संनिहितं कर्मण्यनेकगुणसंयुक्तकर्मग्रहणात् PrakaPañ. 262. 3.

अनेकगुणसंस्कृत (anekaguṇa-saṁskṛta) *adj.* cultured or refined with many virtues (ऋतंभराय राज्ञे) गौः प्रसन्ना ददौ पुत्रमनेकगुणसंस्कृतम्। सत्यवान्नामशोभाढ्यम् PadmP. iv. 30. 13.

अनेकगुणसंनिपात (anekaguṇa-sannipāta) *m.* act of coming together or convergence of many virtues 'उत्कर्षः श्रेयान्' इति यायावरीयः। स चानेकगुणसंनिपाते भवति KāvyMī. 13. 10.

अनेकगुणसमूह (anekaguṇa-samūha) *m.* multitude or aggregate of many virtues तत्रानेकगुणसमूहः ... वर्धमाननामा सार्थवाहः प्रतिवसति स्म Pañcā. 3. 8.

अनेकगुणसंपन्न (anekaguṇa-sampanna) *adj.* **i** endowed with many good qualities दारी नाम महारिष्टं सर्वाभीष्टविनाशनम्। अनेकगुणसंपन्नः खड्गो लोकैर्न गृह्यते YuktiKa. 167. 5; गुग्गुलुद्रव्यमनेकगुणसंपन्नम् (हस्तिनाम्) चिकित्सार्थम् उत्पादितम् ... पशुपतिना Hastyāyur. 666. 2 (4. 20); **ii** possessing many virtues दशग्रीव ... अनेकगुणसंपन्नः कथं स्त्रीवधमिच्छसि AdhyāRā. vi. 9.67.

अनेकगुणसंपूर्ण (anekaguṇa-sampūrṇa) *adj.* full of many virtues वृद्धकाल इति ख्यातः ...। अनेकगुणसंपूर्णः ... क्षितिपर्षभः SkandP. iv. 24. 25.

अनेकगुणसंभव (anekaguṇa-sambhava) *m.* possibility of many qualities अनेकगुणसंभवे गुणान्तरव्यवच्छेदाय उपमानिमित्तं प्रतिपादयितुं श्यामेत्यपेक्षणीयम् Pradī. ii. 397A. 18 (*on* ii. 1. 54)

अनेकगुणसाम्यावस्थ (anekaguṇasāmyāvastha) *adj.* possessing equipoise of more than one quality अनेकगुणसाम्यावस्थस्य प्रधानस्य कारणत्वे एकत्वावधारणमनुपपन्नम् ŚrutaPra. iB. 175. 22 (*on* i. 1. 5)

अनेकगुणातिशायिन् (anekaguṇātiśāyin) *adj.* surpassing or excelling in many good qualities मौग्ध्यं तदेव दयितावदने नितान्तं जातं विभूषणमनेकगुणातिशायि Subhāṣi. 1520.

अनेकगुणाधिक (anekaguṇādhika) *adj.* many times more परमेश्वरभक्तिर्नाम ... स्वात्मात्मीयसमस्तवस्तुभ्योऽनेकगुणाधिकः ... निरन्तरप्रेमप्रवाहः NyāySu. (Ja.) 17B. 13 (*on* i.1.1)

अनेकगुणान्वितभावना (anekaguṇānvita-bhāvanā) *f.* activity relating to, i.e. producing many subsidiary rites अनेकगुणान्वितभावनायामप्राप्तायामिव प्राप्तायामपि प्रवर्तनारूपविध्यन्वयस्य संभवात् अनेकगुणानां प्राप्तकर्मानुवादेन विधाने को दोषः GuruCandr. i. 473. 23.

अनेकगुणाभाव (anekaguṇābhāva) *m.* absence of many subsidiary rites मासं दर्शपूर्णमासाभ्यां यजेतेत्यत्रानेकगुणाभावान्नाप्रकृताभिधानं सिध्येत् ŚāstrDī. 174. 2 (*on* ii. 3. 11)

अनेकगुणाभिधान (anekaguṇābhidhāna) *n.* mention of many subsidiary rites (मासं दर्शपूर्णमासाभ्यां यजेत) तत्राप्युपसद्भिश्चरित्वेत्यस्यानुषङ्गात् अनेकगुणाभिधानमस्ति MayūMāli. 174. 1 (*on* ii. 3. 11)

अनेकगुणालम्बना (anekaguṇālambanā) *adj.* (*f.*) dependent on, i.e. referring to more than one quality यदि नामानेकगुणालम्बनैका बुद्धिरुपजाता ततः किमेतावता NyāyKa. 116. 3.

अनेकगुणावृत्ति (anekaguṇāvṛtti) *f.* repetition for many times किंचिद् वच्मि न वच्मि ... ते किं सन्ति ... अत्र वच्मीति सन्तीत्येतयोरनेकगुणावृत्तिः SaraKaṇṭhā. 262. 3.

अनेकगुणित (aneka-guṇita) *adj.* [*f.* - ā] multiplied many times अनेकगुणिता गावो दुर्विज्ञेया महत्तराः। बहुक्षीरतरा गावो बह्व्यः सद्यः सपुत्रकाः (एतानि शिल्पानि मयि स्थितानि) MahāBhā. iv. 228* (1); (देहम्) तं लब्ध्वा सुकृतैरनेकगुणितैर्देहात्मना विस्मितो मत्तः ... दोषान् न तान् पश्यति BhagAjju.7.3.

अनेकगुणोपपादन (anekaguṇopapādana) *n.* stating of many subsidiary rites 'यदग्नये च प्रजापतये च सायं जुहोति ...' इत्यनयोरनेकगुणोपपादनेन विशिष्टकर्मविधित्वात् देवताविधौ वाक्यभेदादसामर्थ्यम् ŚāstrDī. 63. 15 (*on* i. 4.4)

अनेकगुणोपरक्त (anekaguṇoparakta) *adj.* adventitiously qualified by more than one subordinate factor तदिदमनेकगुणोपरक्तमेकं किंचित्प्रधानं स वाक्यार्थः NyāyMañ. i. 333. 28.

अनेकगुणोपादान (anekaguṇopādāna) *n.* **A** mention of many subsidiary rites 'विश्वजित्सर्वपृष्ठोऽतिरात्रो भवति' इत्यादिष्वनेकगुणोपादानेन कर्मणोऽवश्यं विधातव्यम् ŚāstrDī. 57. 3 (*on* i. 4. 2); आग्नेयादिवाक्येषु तावदनेकगुणोपादानेन कर्मणोऽवश्यं विधेयत्वात् ... न विशिष्टविधिगौरवाश्रयणं मत्वर्थलक्षणा वा युक्ता समाश्रयितुम् MīmāKau. i. 245. 23 (*on* i. 4. 13); iii(2). 262. 19 (*on* ii. 2. 22); अत्र भावनान्तरमेव विधीयते अनेकगुणोपादानाच्च BhāṭṭDī. ii. 35. 4 (*on* iii. 6.13); षडहगतानां पृष्ठानां साकल्यं अतिरात्रसंस्था चेत्यनेकगुणोपादानम् MayūMāli. 57. 5 (*on* i. 4. 2); **B** mention of many qualities अप्राप्तत्वेनानेकगुणोपादानेन च विधेयत्वात् भिन्नेऽस्मिन् विवाहे ... 'अपुत्रां गुर्वनुज्ञात' इत्यादि व्याख्यातं व्याख्यात्रा BālamBha. iii. 33. 19 (*on* 3. 16)

अनेकगुदसंनिपात (anekaguda-sannipāta) *m.* convergence of (the mention of) many anuses (as minor oblations) ऐकादशिनेषु पशुष्वनेकगुदसंनिपाते विचारः प्रभवति किमुपयजनगुदानां समुच्चयो वा विकल्पो वा ŚābaBh. 2273. 18 (*on* xii. 4. 8)

अनेकगुप्तार्चित (anekaguptārcita) *adj.* worshipped, i. e. honoured by many kings of the Gupta dynasty बभूव वात्स्यायनवंशसंभवो द्विजः ...। अनेकगुप्तार्चितपादपङ्कजः Kād. 3. 3.

अनेकगुरुसमवाय (anekaguru-samavāya) *m.* assembly of many elders or teachers आचार्यः ... स हि विद्यातस्तं जनयति ... । तेनानेकगुरुसमवाये स एवादौ पूज्यः BālamBha. i. 164. 15 (*on* 1. 35)

अनेकगृह (aneka-gṛha) *n.* many houses अनेकगृहेषु च प्रदीप्तं पावकं प्रत्यक्षेणावलोक्य ... सैनिकाः ... हृदं प्रविष्टाः Hitopa. 3. 135 (4)

अनेकगृहदाहादि (anekagṛhadāhādi) *adj.* burning etc. of many houses भिन्नप्रयोगविधिविधेयत्वेऽपि युगपत्कर्तव्यताप्रसक्तावनेकगृहदाहादिनिमित्तकक्षामवंत्यादिवत्तन्त्रतया युगपत्संकल्प उपपाद्येत TristhaSe. 2. 11; यमलपुत्रजन्मनि जातेष्ट्योर्युगपदनेकगृहदाहादिनिमित्तेषु च क्षामवत्यादीनाम् ... श्रौते तन्त्रं दृष्टमेव TristhaSe. 19. 16; एतेनानेकगृहदाहादिनिमित्तकक्षामवत्यादीष्टेरस्तु तन्त्रता VīraMi. (Tīrtha.) 326. 17; युगपदनेकचण्डालादिस्पर्शादावनेकग्र(?गृ)हदाहादौ च, तत्रापि नैमित्तिकस्य सकृदनुष्ठानम् BhāṭṭDī. ii. 179. 11 (*on* v. 2. 2)

अनेकगृहमृग (aneka-gṛhamṛga) *m.* many domestic animals पुत्रिका। ... अनेकगृहमृगमरालचन्द्रकिक्रीडनैः ... आत्मानं विनोदयन्ती गमयति परावर्तमह्नाम् UdaySuKa. 98. 1.

अनेकगृहशोभित (anekagṛha-śobhita) *adj.* adorned with many houses अङ्गणम् ...वापीकूपतडागाढ्यमनेकगृहशोभितम् PadmP. iv. 110. 19.

अनेकगृहसंबाध (anekagṛha-sambādha) *adj.* jammed with many houses अस्मात्स्थानाद् गतावावां यमस्य पुरमुत्तमम्। ... अनेकगृहसंबाधम् SkandP. v (3). 155. 53.

अनेकगृहसंभवविषय (anekagṛhasambhava-viṣaya) *adj.* referring to the possibility of many houses (श्राद्धे) 'उच्छिष्टं न प्रमृज्यात्तु' ... तदेतदनेकगृहसंभवविषयम् SmṛtiCan. v. 405.7.

अनेकगृह्योक्त (anekagṛhyokta) *adj.* mentioned in many texts relating to domestic rites अनेकगृह्योक्ततत्तदविरुद्धयावत्पदार्थस्य करणेऽसामर्थ्यात् VīraMi. (Saṁskāra.) 886. 20.

अनेकगोकुलनायक (anekagokula-nāyaka) *m.* lord of many herds of kine अशोकः ... अनेकगोकुलनायकः। संतिष्ठतेऽग्रणीस्तत्र BṛKathāK. 21.7.

अनेकगोचर (aneka-gocara) *adj.* [*f.* – ā] **A** referring or relating to more than one भिन्नोपलम्भसंभूतवासनाभेदनिर्मिताः। भवेयुः स्मृतयो भिन्ना न त्वेकानेकगोचरा NyāyMañ. i. 338. 3; मिलितानामप्येक(v. l. °मप्यनेक) गोचरैकविज्ञानजननदर्शनात् TattvBi. 31.5; **B** abiding in more than one entity एकात्मा युगपद्वृत्तिरेकस्यानेकगोचरा KāvyPra. 741. 2; अनाधारमाधेयमेकमनेकगोचरमशक्यवस्त्वन्तरकरणं विशेषः AlaṅkāSa. 136. 2; AlaṅkāRa. 63; नन्वेकमनेकगोचरमिति प्राक्तनेन लक्षणेन विशेषालंकारोऽत्रोक्तः AlaṅkāSa. 150. 3; PratāYaBhū. 420. 6; SāhiDa. 596. 12.

अनेकगोत्रचरण (aneka-gotracaraṇa) *adj.* belonging to various families and subdivisions (of the Vedas) महाखेचरपार्थिवाः। ... दशाननमुपागताः। ... अनेकगोत्रचरणाः ... नानाशब्दा नभश्चराः PadmP. (Ra.) 55. 93.

अनेकगोधन (aneka-godhana) *n.* much wealth (in the form) of cows अनेकगोधनस्वामी भद्रसंज्ञः कृषीवलः। शालिग्रामे पुरासीत्स्वम् MalliC. 2. 342.

अनेकगोपुर (aneka-gopura) *n.* many city-gates एतस्यां विभूतौ ... अनेकगोपुरप्राकारैरावृतं वैकुण्ठं नाम नगरम् YatīndraDī. 55. 9.

अनेकगोयुक्त (anekago-yukta) *adj.* connected with or common to more than one cow प्रतिभावमपोहोऽयमेकोऽनेकोऽपि वा भवेत्। यद्येकोऽनेकगोयुक्तो गोत्वमेव भवेदसौ TattvSaṁ. 995.

अनेकगोसंबन्धिन् (anekago-sambandhin) *adj.* relating to more than one cow एकोऽनेकगोसंबन्धी तदा गोत्वं तत् NyāyVār. 333. 16 (*on* ii. 2. 67)

अनेकग्रन्थचिन्तन (anekagrantha-cintana) *n.* deliberation over many texts अनेकग्रन्थचिन्तनात्। ...न योगः कस्यचिद् भवेत् DakṣaSm. 7. 4.

अनेकग्रन्थिबद्धकपर्दक (anekagranthibaddha-kapardaka) *adj.* **i** having hair (styles) tied with many knots रुद्रैरिवानेकग्रन्थिबद्धकपर्दकैः विपणिवणिग्जनैरधिष्ठितम्। ... कुण्डिनं नाम नगरम् NalaCam. 2. 27 (11); **ii** having cowries tied with many knots, NalaCam. 2. 27 (11)

अनेकग्रह (aneka-graha) *m.* **i** many (Soma) offering-cups अनेकग्रहचमसयागाभ्यासात्मकश्चतुःसंस्थो ज्योतिष्टोमोऽवधारितः TantrVā. 1108. 5 (*on* iii. 6. 41); **ii** more than one (Soma) offering-cup अनेकग्रहवृत्तिकर्मत्वमेकत्वबलेन ...व्यासक्तम् MīmāKau. ii. 180. 1 (*on* iii. 1.14)

अनेकग्रहण (aneka-grahaṇa) *n.* **1** mention of the word '*aneka*' (in *sūtras* etc.) समासो द्वयोर्द्वयोश्चेद् द्वन्द्वेऽनेकग्रहणम् Vār. 25 *on* P. ii. 1. 1; MahāBh. i. 372. 2 (*on* ii. 1. 1); उत्तरार्थं चानेकग्रहणं कर्तव्यम् MahāBh. i. 420. 18 (*on* ii. 2. 24); तद्वानेकग्रहणेन व्यवच्छिन्नमशक्यमनुवर्तयितुम् MahāBh. iii. 269. 3 (*on* vii. 1. 78); अनेकग्रहणं प्रचुरतरार्थं विज्ञायते Nyās. i. 390. 23 (*on* ii. 2. 24); अनेकग्रहणमनेकनिमित्तप्रतिषेधशङ्कानिरासार्थम् TātpaṬ. (Vā.) 216. 25 (*on* i. 1. 10); अनेकग्रहणात् पदत्रयस्यापि बहुव्रीहिर्भवति Pradī. ii. 387A. 18 (*on* ii. 1. 50); Prasā. i. 575. 10; चित्रगुरित्यत्र ...अनेकग्रहणं प्रत्याख्यातम् LaŚabdeŚe. i. 529. 9; ii. 89. 10; **2** grasping, i.e. cognition of many (entities) यदनेकत्र वर्तमानं तदनेकग्रहणं विना न गृह्यते PrakaVi. 438. 17.

अनेकग्रहणप्रसङ्ग (anekagrahaṇa-prasaṅga) *m.* undesired occasion for the cognition of many (entities) कर्णेऽनेकगकारोत्पादेऽनेकग्रहणप्रसङ्गः TattvCin. i. 626.1.

अनेकग्रहणसापेक्ष (anekagrahaṇa-sāpekṣa) *adj.* expectant of the cognition of many (entities) स्वमसाधारणं सर्वतो व्यावृत्तं लक्षणं स्वलक्षणम्, तदपि येभ्यो व्यावृत्तं यद्व्यावृत्तं तदनेकग्रहणसापेक्षमेव PrakaVi. 539. 15.

अनेकग्रहसंमार्ग (anekagraha-sammārga) *m.* cleansing of many (Soma) offering-cups यद्यपि चास्मिन्पक्षे सिद्धान्त्यभिमतः अनेकग्रहसंमार्गः सिध्यत्येव, तथापि ...विवक्षाप्रसङ्गात् अयं पक्षो निरस्तः MīmāKau. ii. 180. 3 (*on* iii. 1. 14)

अनेकग्रहस्वरूप (anekagraha-svarūpa) *n.* nature of many (Soma) offering -cups अनेकग्रहस्वरूपमात्रज्ञानवदिहाप्यनेकघटस्वरूपधीः स्यात् TattvCin. iv (2). 812. 2.

अनेकग्रहाम्नानवत् (anekagrahāmnāna-vat) *adv.* like the mention of many (Soma) offering-cups सर्वत्र विकृतौ ग्रहान्तराम्नानं प्राकृतादधिकं समुच्चयं स्यात् प्रकृतावनेकग्रहाम्नानवत् MayūMāli. 700. 6 (*on* x. 4. 2)

अनेकग्रहीतृक (anekagrahitṛ-ka) *adj.* belonging to more than one knower अनेकग्रहीतृकस्यैकस्य ग्रहणस्याप्रसिद्धेः RasGaṅ. 359. 1; अस्त्यनेकग्रहीतृकवरगतिप्रदात्याद्यनेकप्रकारकग्रहणसमुदायो गङ्गाविषयकरतिभावोपस्कारकः RasGaṅ. 359. 9.

अनेकग्रामपर्यटन (anekagrāma-paryaṭana) *n.* wandering through many villages उञ्छवृत्तयोऽपि दरिद्रा अनेकग्रामपर्यटनेन पात्रमात्रं निर्वर्तयन्ति ManuBh. ii. 189. 6 (*on* 8. 260)

अनेकग्राममध्य (anekagrāma-madhya) *m.* [Loc.] in the middle of many villages अनेकग्राममध्ये क्रोशाद्बहिःप्रदेशे मोषे जाते ... पार्श्वग्रामाः ... अपहृतद्रव्यं दद्युः DaṇḍaVi. 87. 16.

अनेकग्रामयाजक (anekagrāma-yājaka) *m.* priest officiating in many villages ग्रामयाजी अनेकग्रामयाजकः (तस्य) ... अन्नं न भोक्तव्यम् SmṛtiCan. v. 239. 21.

अनेकग्रामसमुदाय (anekagrāma-samudāya) *m.* group of several villages जनपदोऽनेकग्रामसमुदायः ManvaVi. 896. 25 (*on* 8. 41)

अनेकग्राह्यग्राहकशक्ति (aneka-grāhyagrāhakaśakti) *f.* more than one expressible object and expressive power एकस्यैव ज्ञानस्यानेकग्राह्यग्राहकशक्तिकल्पनात् अस्त्येव गौरवम् YuktiSneha. 52. 35 (*on* i. 1. 5)

अनेकघटस्वरूप (anekaghaṭa-svarūpa) *n.* nature of many pots इहाप्यनेकघटस्वरूपधीः स्यात् TattvCin. iv (2).812. 2.

अनेकघटोपलब्धि (anekaghaṭopalabdhi) *f.* obtainment, i.e. perception of many pots चरमसंतनिनो यदि हेतुना विनाशस्तर्हि हेतुं विनेतरेषामपि विनाशायोगात् घटस्थानेऽनेकघटोपलब्धिप्रसङ्गः VedāntKau. 197. 3 (*on* ii. 2. 22)

अनेकचकारप्रयोग (anekacakāra-prayoga) *m.* use of many *ca-* letters or syllables मिलितानाम् ... एकधर्मावच्छिन्नेनान्वयः ... अत एवात्रानेकचकारप्रयोगः LaŚabdeŚe. ii. 127. 5.

अनेकचक्रकृत्त (anekacakra-kṛtta) *adj.* cut by many discuses अनेकचक्रकृत्तारिमण्डलशिराः श्रियमाप योधः HarVi. 44. 38.

अनेकचक्षुरादिकरण (aneka-cakṣurādikaraṇa) *n.* many means or instruments such as eye अनेकचक्षुरादिकरणाधिष्ठानेन ...स्मृतीरारभेत Kiraṇā. 130.15.

अनेकचक्षुस् (aneka-cakṣus) *adj.* possessed of many eyes नमस्तुभ्यं विरूपाक्ष नमस्तेऽनेकचक्षुषे (शंकराय) VāyuP. i. 54. 65; BrahmāṇḍP. i. 25. 70.

अनेकचञ्चन्नखकान्ति (aneka-cañcannakhakānti) *adj.* having much flickering lustre of nails (of fingers) दशास्यः क्षुभिताहिकल्पम् ... अनेकचञ्चन्नखकान्तिजिह्वं प्रसार्य पाणिम् ... बभाषे Bhaṭṭi. 12. 13.

अनेकचण्डांशुबिम्ब (aneka-caṇḍāṁśubimba) *n.* many orbs of the sun (*lit.* orb possessing many hot rays) नेत्रैः कोपोपरक्तैः क्षयसमयमिवानेकचण्डांशुबिम्बप्रादुर्भावं सृजन्तो द्विषदशुभमिवाशेषतस्ते शशंसुः ŚrīKaC. 18. 59.

अनेकचण्डालादि (anekacaṇḍālādi) *adj.* many persons of lowest or mixed castes etc. युगपदनेकचण्डालादिस्पर्शादावनेकगृहदाहादौ च तत्रापि नैमित्तिकस्य सकृदनुष्ठानम् BhāṭṭDī. ii. 179. 11 (*on* v. 2. 2)

अनेकचतुरानन (aneka-caturānana) *m.* many creators (Brahmans) किं नालोक्यन्तेऽनेकचतुराननाः MudriKu. 4. 16 (2)

अनेकचन्द्र (aneka-candra) *m.* **A** more than one moon चन्द्रैकत्वे ज्ञाते सत्येवावष्टम्भादिना अनेकचन्द्र इति मनीषा समुन्मिषति NītiMā. 17. 15; **B** many moons (together) तत्रानन्तं विचिन्तयेत् । अनेकचन्द्रसंकाशशीतलाङ्गो वरद्युतिः । ... वैकुण्ठेशमुखच्छविम् विलोकयति BṛBrahmaS. iii.6.6.

अनेकचन्द्रकान्त (aneka-candrakānta) *m.* **A** many moon- stones (supposed to ooze away under the influence of the moon) इन्द्रदत्तश्रेष्ठी ... अनेकचन्द्रकान्तोपलान्तरालनिलीनमरुणमणिनिधानमिव तं जातमुपलभ्य ...अपत्योत्पत्तिमहोत्सवमकार्षीत् YaśasCam. ii. 340. 9.

अनेकचन्द्रदर्शिन् (anekacandra-darśin) *adj.* who perceives more than one moon इतरे पश्यन्तोऽपि न पश्यन्ति ...अनेकचन्द्रदर्शिवत् GītāBh. (Śaṅ.) 402. 5 (*on* 13. 27)

अनेकचन्द्रप्रपञ्चवत् (anekacandraprapañca-vat) *adv.* like the (false) appearance of more than one moon एकस्मिंश्चन्द्रे तिमिरकृतानेकचन्द्रप्रपञ्चवत् अविद्याकृतो ब्रह्मणि नामरूपप्रपञ्चो विद्यया प्रविलापयितव्यः BrahmSūBh. (Śaṅ.) 593.4 (*on* iii. 2. 21)

अनेकचन्द्रशाल (aneka - candraśāla) *adj.* with many rooms on the top of the house अनेकश्च(?च)न्द्रशालश्च गजः प्रासाद इष्यते MatsyaP. 269.41.

अनेकचन्द्राढ्य (anekacandrāḍhya) *adj.* rich in many moons केलिकेशग्रहव्यग्रगौरीकरनखावृतम् । शिवायानेकचन्द्राढ्यमिव शार्वं शिरोऽस्तु वः KathāSaSāg. vii.1.1.

अनेकचन्द्रोपराग (anekacandroparāga) *m.* eclipse of many moons विकसितसितपुष्पच्छत्रमासाद्य तस्थौ तरुषु यदलिचक्रं प्रोषितप्रेयसीनाम् । पिशुनयितुमसह्यं दुर्निमित्तं दिनेऽपि स्फुटमजनि स एवानेकचन्द्रोपरागः ŚrīKaC. 6.69 (comm. दिनेऽप्यनेकचन्द्रग्रहो जातः)

अनेकचमसप्राप्ति (anekacamasa-prāpti) *f.* occasion for many (Soma) cups वषट्कर्तृणां चानेकचमसप्राप्तौ सत्यामनुवादत्वात् ...चमसशब्दोऽनर्थकः TantrVā. 1069.6 (*on* iii.5.53)

अनेकचम्पक (aneka-campaka) *m.* many Michelia flowers इदमनेकचम्पकाशोकतिलकतालीतमालमालितकूलम् ...सरः TilaMañ. 166.4.

अनेकचरण (aneka-caraṇa) *adj.* **1** of many legs or feet कुमारम्...एनम्... अनेकचरणैः पलायमानं कुक्कुरबालकैर्वा दंशयित्वा संहनिष्याम DaśKuC.7.24; तद् दृष्ट्वानेकशिरसमनेकचरणं तथा। ... अनेकवर्णरूपं च अनेकमुकुटोज्ज्वलम्... रूपं भानोः BhaviP. 227 B.7 (i. 153. 46); **2** of many rays (of light), BhaviP. 227B.7 (i. 153. 46)

अनेकचरण (aneka-caraṇa) *m., n.* many legs or feet तदूर्ध्वे वेदिंका कुर्यादनेकचरणान्विताम् PāraS. 12.68.

अनेकचारणगण (anekacāraṇa - gaṇa) *m.* group of many bards सः ... अनेकचारणगणावबध्यमानमण्डलाम् ... स्नानभूमिमगच्छत् Kād. 15.12.

अनेकचारपुरुष (aneka-cārapuruṣa) *m.* many spies or secret agents यस्यानेकचारपुरुषसहस्रसंचारनिचिते...धरणितले...अविदितमहरहः समुच्छ्वसितमपि राज्ञां नासीत् Kād. 56. 18.

अनेकचारुविग्रह (aneka - cāruvigraha) *adj.* assuming many beautiful forms मानवः ... पूजयेन्नन्दनन्दनम् । ... गोपीबाहुल्यादनेकचारुविग्रहम् BṛDharmaP. i.23.29.

अनेकचारुविज्ञान (aneka-cāruvijñāna) *adj.* possessed of much esteemed skill (in creating different objects) अनेकचारुविज्ञानविश्वकर्मावतारकः । सूत्रधारो गुणाह्वानः (आसीत्) CitraPaC. 64.

अनेकचित्त (aneka -citta) *adj.* [*f.*- ā] **1A** having many minds, i.e. confused लिप्समानः सतां मार्गं प्रमूढो ब्रह्मणः पथि। अनेकचित्तः MahāBhā. vi. 91*(2); **1B** fickle-minded राज्यलक्ष्मीः ... वानरजातिरिवानेकचित्ता (अस्ति) Pañcā. 227.3; **2** having many minds, i.e. indecisive अपहरसि सदा मनांसि पुंसाम्... न च भवसि तथाप्यनेकचित्तः Subhāṣi. 2491.

अनेकचित्त (aneka-citta) *n.* many minds, i.e. fancies राज्यलक्ष्मीः ... वानरपतिरिवानेकचित्तचपला Tantrākhyā. 120.10; PañcT. 3.115 (5) (367.14)

अनेकचित्तता (anekacitta-tā) *f.* the state of having many minds, i.e. fancies एवं कुर्यामेतच्च कुर्यामन्यच्च कुर्यामिति...अनेकचित्ततया विभ्रान्ताः ... नरके पतन्ति GītāBh. (Rā.) 612.4 (*on* 16. 16)

अनेकचित्तत्व (anekacitta - tva) *n.* the state of being many minds अनेकचित्तत्व एकाभिप्रायानुरोधश्च प्रतिसंधानं च न स्याताम् TattvVai. 185.16 (*on* 4.5)

अनेकचित्तपरिकल्पितत्व (anekacittaparikalpita -tva) *n.* the state of being assumed through many minds एतेनानेकचित्तपरिकल्पितत्वमपि निरस्तम् Vṛ. of Nāgeśa 374.24 (*on* 4.1) (BSPS. 1917Ed.)

अनेकचित्तमन्त्र (aneka-cittamantra) *adj.* having various schemes or secret plans in mind अनेकचित्तमन्त्रश्च देवब्राह्मणनिन्दकः। ... विंशतिः पुरुषा अमी। एतैः संधिं न कुर्वीत NītiSā. 9.25; AgniP. 239.11; SūktiRa. 134.2; Hitopa. 4.34; अनेकचित्तमन्त्रस्तु द्वेष्यो भवति मन्त्रिणाम् Hitopa. 4.44.

अनेकचित्तविभ्रान्त (anekacitta-vibhrānta) *adj.* bewildered by many minds, i.e. fancies अनेकचित्तविभ्रान्ता मोहजालसमावृताः। ... पतन्ति नरकेऽशुचौ MahāBhā. vi.38.16 = BhagGī. 16. 16 (Śaṅ. अनेकैः चित्तैः विविधं भ्रान्ताः)

अनेकचित्र (aneka-citra) *n.* variegated colours एकं चित्रमित्यनभ्युपगता-नेकचित्रमिति हेयम् NyāyVār. 511.9 (*on* iv. 2. 12)

अनेकचित्रत्व (anekacitra-tva) *n.* the state of being variegated colours प्राप्तकर्मानुवादेन अनेकचित्रत्वस्त्रीत्वरूपगुणविधानात् वाक्यभेदः MīmāKau. i. 174.12 (*on* i. 4. 3)

अनेकचिह्न (aneka-cihna) *n.* many signs श्रुत्वा च तमनेकचिह्नोत्पादितप्रत्ययम् ...युवराजवैशम्पायनयोर्वृत्तान्तम् Kād. 336.16.

अनेकचूडा (aneka-cūḍā) *adj.* *(f.)* having many locks of hair तारको भद्रकाल्या... । बध्यतेऽनेकचूडा(?ड)या दार्यते परमायुधैः VāmaP. 58.69.

अनेकचेतन (aneka-cetana) *m.* many conscious or sentient beings प्रत्येकं परमाणौ चेच्चैतन्येऽनेकचेतनाः। घटादयः प्रसज्यन्ते ŚivDṛ. 5.20.

अनेकचेतन (aneka-cetana) *adj.* having many conscious or sentient beings शरीरे चेतनां ब्रुवतो दोषोऽनेकचेतनत्वप्रसङ्गः NyāyVār. 440.6 (*on* iii. 2.56)

अनेकचेतनप्रवर्त्य (anekacetana-pravartya) *adj.* to be carried out (i.e. accomplished) by many sentient beings (अनेकचेतनसाध्येषु ...व्यभिचारः) अनेक-चेतनसाध्येषु अनेकचेतनप्रवर्त्येषु Śruta Pra. iB. 122. 15 (*on* i.1.3)

अनेकचेतनभोग (anekacetana-bhoga) *m.* enjoyment of many sentient beings सा च सत्त्वरजस्तमसां साम्यरूपा प्रकृतिः ...अनेकचेतनभोगापवर्गार्था BrahmSūBh. (Rā.) 466.3 (*on* ii.2.1); प्रकृतिः ... अनेकचेतनभोगापवर्गहेतुः Govi-Bh. 114.3 (*on* ii .2.1)

अनेकचेतनसाध्य (anekacetana-sādhya) *adj.* to be accomplished by many sentient beings तदायत्तप्रवृत्तित्वं तदधीनत्वमिति चेत्। अनेकचेतनसाध्येषु गुरुतररथशिलामहीधरादिषु व्यभिचारः BrahmSūBh. (Rā.) 138.8 (*on* i.1.3)

अनेकचेतना (aneka-cetanā) *f.* more than one sentient being or conciousness तार्किकसमयविरोध इति चेत् देहे एकस्मिन्ननेकचेतनावत्त्वे, न ईश्वरस्य निमित्तकारणत्वाभ्युपगमात् ChāndoUBh. 266.14 (*on* v.1.15)

अनेकचेतनाधिष्टान (anekacetanādhiṣṭhāna) *n.* substratum of many sentient beings देहादीनामप्यनेकचेतनाधिष्ठानानुमानात् नैश्वरैक्यं सिध्येत् NyāyRa. 662.10 (*on* 5 (15). 80)

अनेकचेतनापात (anekacetanāpāta) *m.* undesired contingency of more than one sentient being न च शरीरावयवेषु प्रत्येकं चैतन्यगुणः प्रज्ञायते प्रतिज्ञायते वा तदुपगमे च एकशरीर एवानेकचेतनापातात् ĀtmaSi. 11.17.

अनेकचेष्टा (aneka - ceṣṭā) *f.* many efforts or activities अनेकचेष्टापुरःसरम् ...नारीभिरालोक्यमानः ...राजकुले संचचार (राजा) UdaySuKa. 147.8.

अनेकचैतन्य (aneka-caitanya) *adj.* having more than one sentient being अनेकचैतन्ये एकस्मिन् शरीरे नैकमित्यनियमो भवेत् TātpaṬ. (Vā.) 513.5 (*on* iii.1.15)

अनेकचैतन्यगुण (aneka - caitanyaguṇa) *m.* many qualities of sentient beings अनेकचैतन्यगुणकल्पनायां गौरवेण लाघवादेक एव चित्प्रकाशरूपः पुरुषः सर्वसंहतेभ्यः परः कल्पयितुं युज्यते SāṁkhyaPraBh. 36. 5 (*on* 1.66)

अनेकचैतन्यशक्ति (aneka-caitanyaśakti) *f.* many powers of sentient beings चैतन्यदर्शनेन प्रत्येकभूते सूक्ष्मचैतन्यशक्तिरनुमेयेति चेन्न, अनेकभूतेष्वनेक-चैतन्यशक्तिकल्पनायां गौरवेण लाघवादेकस्यैव नित्यचित्स्वरूपस्य कल्पनौचित्यात् SāṁkhyaPraBh. 93.32 (*on* 3.22)

अनेकच्छन्दस्क (anekacchandas - ka) *adj.* which involves (use of) many metres अनेकच्छन्दस्केऽपि च प्रातःसवने गायत्रच्छन्दस इति प्रयोगः MīmāKau. ii.10.2 (*on* ii.3.2)

अनेकच्छन्नकिंकर (aneka- cchannakiṅkara) *m.* many servants in disguise चन्द्रपालितः ... अनेकच्छन्नकिंकरैश्च गूढपुरुषैः परिवृतोऽभ्येत्य ... विहारमात्मसादकरोत् DaśKuC. 135.7.

अनेकच्छिद्र (aneka-cchidra) *adj.* having many holes आत्मप्रमेय-मिन्द्रियद्वारोपाधिनिर्गमाविषयेषु वर्तते अनेकच्छिद्रघटमध्यस्थप्रदीपप्रभावत् BrahmSū-Bh. (Bhā.) 7.15 (*on* i.1.1)

अनेकच्छिद्र (aneka-cchidra) *n.* many holes आसीन्मे शीर्णपतितमनेक-च्छिद्रजर्जरम् ...गृहम् PadmP. (Ra.) 35.182.

अनेकज (aneka-ja) *adj.* **A** arising, i.e. emerging from many (pores) अत्यन्तकुटिले रूक्षैः स्फुटिताग्रैर्गुडप्रभैः। अनेकजैस्तथा रोमैः केशैश्चापि तथाविधैः अत्यन्तपिङ्गला नारी विषतुल्या BhaviP. 21A. 16 (i.5.25); **B** produced from many (sources) (तद्योगिजन्यत्वमवह्निकस्यापि धूमस्य सह्यं नाम) सह्यं नाम इति। अनेकजत्वादिति भावः Bhāsk. ii. 179.10 (*on* ii.4.11)

अनेकज (aneka-ja) *m.* twice-born, i.e. bird पक्षी तु नाडीचरणः स्याच्चञ्चुभृद-नेकजः TrikāŚe. ii.5.36.

अनेकजट (aneka-jaṭa) *adj.* having many matted branches त्रिजटाश्रयम-नेकजटाः ...समुपहसन्ति लङ्केश्वरं तरवः NalaCam. 2.3.(27)

अनेकजटाजाति (aneka-jaṭājāti) *f.* various types of roots कार्मणानेक-जटाजातिजटितकण्ठिकावगुण्ठनजठरकण्ठनालः ... शङ्खनकनामा प्रणिधिः YaśasCam. i.398.1.

अनेकजनन (aneka-janana) *adj.* **A** having birth from many mothers अनेकजननो यत्र कार्त्तिकेयस्य संभवः ...सर्वश्रुतिसमूहोऽयं श्रोतव्यः MahāBhā. i. 495* (2) (JñānDī. अनेकाभ्यः कृत्तिकादिभ्यः जननमुत्पादः); **B** continuing for many lives अनेकजननं सख्यं ययोः पुरुषसिंहयोः। तयोस्त्वं न समो राजन् भवितासि कदाचन MahāBhā. v. 94.12 (BhārArthaPra. अनेकजन्मानुवृत्तम्)

अनेकजनवासा (anekajana - vāsā) *adj.* *(f.)* having the dwellings of many people सर्वजनयुक्ता। ... अभ्यन्तरतोऽनेकजनवासा। या नृपवेश्मसमेता सा कथिता राजधानी MayaMa.10.24.

अनेकजनसंयुत (anekajana - saṁyuta) *adj.* accompanied by many people मत्वास्य वृत्तान्तमनेकजनसंयुतः। ब्रह्मदत्तः पिता तस्य वशारूढः समागमत् SamarāSaṁ. 3.193.

अनेकजनसंकीर्ण (anekajana - saṅkīrṇa) *adj.* teaming or crowded with many people (सः) उद्धृत्य सलिलादुर्वीमेवमादिवराहवत्। अनेकजनसंकीर्णान् ग्रामान् ... व्यधात् RājTa. (Ka.) 5.105.

अनेकजनसाक्षिकम् (anekajanasākṣikam) *adv.* before the very eyes of or as witnessed by many people अनेकजनसाक्षिकम् ... पूर्वसीमान्तं कुम्भं नीत्वा ... आचार्यस्तत्रस्थानि भूतान्यन्यत्र निवासायानेन प्रस्थापयेत ĪśānŚiPa. ii.26.72(14)

अनेकजनाकुल (anekajanākula) *adj.* crowded with many people आभान्ति प्रभवो नृणामितरवत्तेऽप्यागताः सेवया। यस्यानेकजनाकुले निजवपुर्मात्राः सभामण्डपे TilaMañ. 7.2.

अनेकजनापेक्षा (anekajanāpekṣā) *f.* [Inst.] with respect to many people गङ्गा चैव लक्षणमिति। अनेकदेशव्याप्त्या गङ्गाया आयामवत्त्वेनानेकजनापेक्षया प्रसिद्धत्वात् तस्या एव लक्षणत्वम् Pradī. ii. 364 A.36 (*on* ii.1.15)

अनेकजनामध्र (anekajanāma-dhra) *m.* chariot (*lit.* which bears the (partial) name of *cakra(vāka)* bird) पङ्क्त्यनेकजनामध्रतुका जित उलूकजित्। ... अनेकजनामेत्यनेन चक्रम्, तद्ध्र इत्यनेन रथः SaraKaṇṭhā. 11.10; cf. **अनेकजनामन्**.

अनेकजनामन् (anekaja-nāman) *n.* (partial) name of a *cakra(vāka)* bird, i.e. wheel अनेकजनामेत्यनेन चक्रम् SaraKaṇṭhā. 11.11.

अनेकजनित (aneka-janita) *adj.* born of many (mothers) अनेकजनितस्येह कार्त्तिकेयस्य सुव्रत। माहात्म्यं सुमहद्विप्र कथमेतद्विभाव्यते BhaviP. i. 78A.15 (i.40.2)

अनेकजनुस् (aneka-janus) *n.* many births or existences भाग्यैर्मेऽधिगता ह्यनेकजनुषां सर्वाघविध्वंसिनी। ... शिवपुरी PadmP. vi.23.41.

अनेकजन्तुजङ्घा (anekajantu-jaṅghā) *f.* legs of diverse animals भूपालः ... स्कन्धावारम् ... अन्यैरनेकजन्तुजङ्घान्तरालनिःसरणकुशलिभिः ... बलात्कृतकलकलम्... वीक्ष्यमाणः कटकं जगाम HarṣaC. 286.15.

अनेकजन्तुवध (anekajantu-vadha) *m.* act of killing of many beings सः ... पिशितलोलुपोऽभूत्। तन्निमित्तमनुदिनमनेकजन्तुवधाद्विविधानि पललानि संस्क्रियन्ते स्म MohaRāPa. 3.58 (34)

अनेकजन्तुसंघात (anekajantu-saṅghāta) *m.* collection or group of many beings अनेकजन्तुसंघातनिघातनसमुद्भवम्। जुगुप्सनीयं लालावत् कः स्वादयति माक्षिकम् YogŚā.3.36.

अनेकजन्मकर्मन् (anekajanma-karman) *n.* actions (committed) through several births अनेकजन्मकर्मोत्थं पापं नश्यतु मे VāmaP. 86.92.

अनेकजन्मकृत (anekajanma-kṛta) *adj.* **A** acquired through many births योगी ... अनेकेषु जन्मसु किंचित् किंचित् संस्कारजातमुपचित्य तेन उपचितेन अनेकजन्मकृतेन संसिद्धः ... सन् याति परां प्रकृष्टां गतिम् GītāBh. (Śaṅ.) 209.11 (*on* 6.45); कर्तृशिल्प्यचलं चित्तं कारयेत् ... न कुर्यात् चेत्स्थाननाशं धनक्षयम्। अनेकजन्मकृतं पुण्यं क्षिप्रमेव विनश्यति MānaSā. 68.28; **B** committed through many births इमामुपनिषदम् ... सायं प्रातः प्रयुञ्जानोऽनेकजन्मकृतं पापं नाशयति RudraJābāU. 569.27 (3); **C** performed during many births अनेकजन्मकृतैः कर्मविशेषैर्विद्यानुग्रहः VedāntKau. 373.24 (*on* iii.4.38)

अनेकजन्मगुणित (anekajanma-guṇita) *adj.* multiplied, i.e. accumulated through many births ईशानः ...। अनेकजन्मगुणितकर्मसूत्रच्छिदाक्षुरम्। ...प्रविश्य क्षेत्रमेतत् SkandP. iv. 33.8.

अनेकजन्मचरित (anekajanma-carita) *n.* deeds performed during many births अनेकजन्मचरितं खण्डव्रतकदम्बकम्। संपूर्णमभवद्देवि लिङ्गस्यास्य प्रभावतः SkandP. v(2). 31.29.

अनेकजन्मज (anekajanma-ja) *adj.* arisen from, i.e. accumulated through many births स्तुत्वेत्थं गरुडं पापान्मुच्यतेऽनेकजन्मजात् SkandP. ii(2).30.31; अग्निष्टोमस्य यज्ञस्य सकलं लप्स्यते फलम्। अनेकजन्मजं पापं नाशमेष्यति SkandP. vi.90.67.

अनेकजन्मजनन (anekajanmajanana) *m.* name of one of the sons of Vasu Anala अनेकजन्मजननः कुमारस्त्वनलस्य तु MatsyaP. 203.6.

अनेकजन्मजनित (anekajanma-janita) *adj.* **Ai** produced, i.e. performed during many births अनेकजन्मजनितकर्मसूत्रनियन्त्रणम्। उन्मुच्य यत्र मुक्ताः स्युः सैषा श्रीमणिकर्णिका SkandP. iv. 33.112, iv.52.75; **Aii** produced, i.e. acquired through many births अत्रामृतस्रवा गङ्गा... अनेकजन्मजनितजाड्यध्वंसविधायिनी SkandP. iv. 77.51; **B** committed through many births अविमुक्ते महाक्षेत्रे। ...अनेकजन्मजनितमहापापाद्रिवज्रिणि ...प्रत्यक्षं मम यद्वृत्तं तद् ब्रवीमि SkandP. iv. 74.33.

अनेकजन्मतपस् (anekajanma-tapas) *n.* austerities (observed) during many births अनेकजन्मतपसा लब्ध्वा जन्म च भारते। ये हरिं तं न सेवन्ते ते मूढाः कृतपापिनः BrahmVaiP. iv. 96.39; iv. 97.10.

अनेकजन्मन् (aneka-janman) *n.* many births (शिशुपालः) अच्युतनाम्नाम् ...अनेकजन्मसु...विनिन्दनसंतर्जनादिषूच्चारणमकरोत् ViṣṇuP. iv. 15. 12; (पुरुषः) अनेकजन्मसु शुद्धधर्मसंचितनिमित्ततः केनचित् परमकारुणिकेन दर्शितयोगमार्गः MuṇḍUBh.345.4 (*on* iii.1.2); ज्ञानिनो हि भगवन्तमात्मत्वेनेवोपासते। तस्या (उपासनायाः) नैरन्तर्येऽनेकजन्मभिः... तेषां हृदि भगवान् स्फुरति AṇuBh.304.27 (*on* iv.1.3); 286.22 (*on* iii.4.25); अहम् ...। भ्रमन्ननेकजन्मानि न सौख्यं लब्धवान् क्वचित् BṛBrahmaS. iii.6.38.

अनेकजन्मन् (aneka-janman) *adj.* **1** which has many (causes for its) originations तच्चैतत् प्रधाननिर्देशे सति स्यात्, अनेकजन्मनां दोषाणामेकोत्पत्तिविरोधात् PramāVāSvopVṛ. 74.18; **2** who assumes many incarnations (विष्णुः) अनेकजन्मा च ... निर्गुणः SkandP. iv. 59.9.

अनेकजन्मन् (anekajanman) *m.* name of one of the sons of Vasu Anala (अष्टौ च वसवः) अनलानिलौ ...। अनेकजन्मा जनवः कुमारश्चानलस्य ViṣṇuDhaP. i.119.6.

अनेकजन्मनिमित्तत्व (anekajanmanimitta-tva) *n.* the state of being the cause of more than one birth ब्रह्महत्यादीनां च एकैकस्य कर्मणोऽनेकजन्मनिमित्तत्वं स्मर्यमाणमुपरुध्येत BrahmSūBh. (Śaṅ.) 543.5 (*on* iii.1.8)

अनेकजन्मनियुत (anekajanmaniyuta) *n.* many millions of births अनेकजन्मनियुतैर्यत् कृतं जन्तुभिस्त्वघम्। तत् सर्वं विलयत्याशु कालभैरवदर्शनात् SkandP. iv. 31.145; ŚivaP. iii.9.66 (306 A. 16)

अनेकजन्मनियुतम् (anekajanmaniyutam) *adv.* for many millions of births अनेकजन्मनियुतं भ्राम्यमाणः ...। निर्वृतिं प्राप्नुयात्कोऽत्र जाह्नवीभजनं विना SkandP. iv. 28.29.

अनेकजन्मपरंपरा (anekajanma-paramparā) *f.* continuous cycle of many births यावत्कालावधिका च भावनानेकजन्मपरंपरानुयाता, यच्च निबन्धनं भावनायाः करुणा बोधिसत्त्वानाम्, तदन्येषां संसारोद्वेगस्तदपि सर्वं यथा ...निर्णीतं तथेहाप्यनुगन्तव्यम् DharmoPra.68.7; अनेकजन्मपरंपरायाससंपादनीयाद् विवेकज्ञानादीपत्करत्वात् पुनरपि व्यर्था जिज्ञासा SāṁkhyaTaKau. 30.3 (*on* 2); न हि पण्डितरूपाणामप्यनेकजन्मपरंपराभ्यासपरिश्रमसाध्या विवेकख्यातिप्रतिष्ठा TattvVai. 216.13 (*on* 4.33)

अनेकजन्मपाप (anekajanma-pāpa) *n.* sin accumulated through many births प्रभो मया दुःखमनेकजन्मपापार्जितं भुक्तमनेकभावम् SkandP. ii (2). 20.5; गोवत्समिति ... अनेकजन्मपापघ्नं मार्कण्डेयेन भाषितम् SkandP. iii (2). 27.41; सौरं व्रतम् ... अनेकजन्मपापानां शमनम् GaṇeP. ii.73.40; अनेकजन्मपापनाशप्रतिपादकवचनैर्विरोधापातात्तत्तीर्थस्नानादिना ...अखिलपापनाश एव TristhaSe. 99.1.

अनेकजन्मपुण्य (anekajanma-puṇya) *n.* merit acquired through many births (अहम्) अनेकजन्मपुण्येन चागतः स्वर्गमीप्सितम् BrahmVaiP. iv. 59.91; अनेकजन्मपुण्येन जायते भारते भुवि BrahmVaiP. iv. 85.159; अनेकजन्मपुण्यैस्तु मोक्षेच्छा जायते DevīBhāP. vii. 37.41; अनेकजन्मपुण्येन साधूनां जन्म भारते PañcaRā. (Nā.) ii.2.64.

अनेकजन्मप्राप्य (anekajanma-prāpya) *adj.* to be acquired through many births क्रमश इति वदन्नेकेनैव निमित्तेनानेकविधानेकजन्मप्राप्यं क्लेशसंबन्धं दर्शयति BālaKrī. ii.74.5 (*on* 3.198-199 (?208 - 209))

अनेकजन्मभजन (anekajanma-bhajana) *n.* worship (in the form of offerings) performed during many births अनेकजन्मभजनात् स्वविचारं चिकीर्षति PañcDa. 10.3.

अनेकजन्मभवा (anekajanma-bhavā) *adj.* (*f.*) produced, i.e. acquired through many births द्विविधाः कर्मवासनाः ... एकानेकजन्मभवाः RājMār. 68.4.

अनेकजन्ममरणश्रेणी (anekajanmamaraṇa - śreṇī) *f.* series, i.e. cycle of many births and deaths शृङ्गारादिरनेकजन्ममरणश्रेणीसमासादितैरेणीदृक्प्रमुखैः ...अर्जितः। ...शान्तो रसः BhartṛNi.1.2.

अनेकजन्मयोग (anekajanma-yoga) *m.* association with many births अनेकजन्मयोगेन तपसानशनेन च। तदा लभेन्मुक्तिमार्गम् BrahmVaiP. ii.36.59.

अनेकजन्मरचित (anekajanma - racita) *adj.* performed during many births दृष्ट्वा राममनेकजन्मरचितैर्दृश्यं शुभैः कर्मभिः ...निषादाधिपः ... संपृक्तवक्त्रोऽभवत् RāmāCam.2.48.

अनेकजन्मरमणी (anekajanma-ramaṇī) *f.* beloved during many births तामनेकजन्मरमणीमसकृदाश्लिष्य ... अहर्निशमिन्द्रदुर्लभान्भोगानन्वभूवम् DaśKuC. 83.11.

अनेकजन्मविषय (anekajanma-viṣaya) *m.* materials or worldly objects (enjoyed during) many births अनेकजन्मविषयसेवाभ्यासजनिता विषयविषया तृष्णा न सहसा निवर्तयितुं शक्यते ChāndoUBh. 471.12 (*on* viii.1.1)

अनेकजन्मवृत्तान्त (anekajanma-vṛttānta) *m.* events (taken place) during many births वस्तुना तथाभूतेन भगवन्नाम्नोऽनेकजन्मवृत्तान्ताध्यक्षीकरणकारणयोगसिद्धिविशेषतादात्म्याध्यवसायरूपातिशयोक्तिर्व्यज्यते RasGaṅ. 167.3.

अनेकजन्मव्यवहित (anekajanma-vyavahita) *adj.* intervened or separated by many births सर्गाद्यकालवृत्तान्तस्यानेकजन्मव्यवहितस्य विस्मरणयोग्यतया बाधावताराभावात् ŚivārkaMaDī. i.197.19 (*on* i.1.7)

अनेकजन्मव्यसन (anekajanma-vyasana) *n.* difficulty or trouble of many births अनेकजन्मव्यसनप्रबन्धतो बिभेति नो यस्तपसो बिभेति सः SubhāRaSaṁ. 905.

अनेकजन्मशुद्धधर्म (anekajanma-śuddhadharma) *m.* pure merit (acquired) through many births दुःखमापन्नः कदाचिदनेकजन्मशुद्धधर्मसंचयननिमित्तम् ... सन् ... वीतशोको भवति ŚvetāUBh. 181.7 (*on* 4.7)

अनेकजन्मसंवृद्ध (anekajanma-saṁvṛddha) *adj.* increased through many births बालौ मनोज्ञरूपौ ... अनेकजन्मसंवृद्धस्नेहान्योन्यवशानुगौ PadmP. (Ra.) 25. 30.

अनेकजन्मसंशुद्ध (anekajanma - saṁśuddha) *adj.* purified through many births योगी ...अनेकजन्मसंसिद्ध(v.l.°संशुद्ध)स्ततो याति परां गतिम् MahāBhā. vi.28.45; अनेकजन्मसंशुद्धा योगिनो मदनुग्रहात्। ...मुक्ताः संसारबन्धनैः SkandP. v(2). 59. 50.

अनेकजन्मसंसार (anekajanma-saṁsāra) *m.* succession or cycle of many births अनेकजन्मसंसारचिते पापसमुच्चये। नाक्षीणे जायते पुंसां मार्तण्डाभिमुखी मतिः BhaviP. 112A.12 (i.63.9) = 177 B.3 (i.120.22); एकजन्मना मुक्तिर्युष्मत्करतले स्थिता। अनेकजन्मसंसारबन्धनिर्मोक्षकारिणी ŚivaP. vii (1).3.52 (505 B.3)

अनेकजन्मसंसिद्ध (anekajanma-saṁsiddha) *adj.* **A** perfected through many births प्रयत्नाद्यतमानस्तु योगी संशुद्धकिल्बिषः। अनेकजन्मसंसिद्धस्ततो याति परां गतिम् MahāBhā. vi. 28. 45 = BhagGī. 6.45 (Śaṅ. उपचितेन अनेकजन्मकृतेन संसिद्धः); अनेकजन्मसंसिद्धः स यः कश्चिद्धवेदिह। ...तदुत्क्रान्तेर्भवेद्धेतुः TaiUBhāVā. 151.10 (2); ते ह्यनेकजन्मसंसिद्धा जीवन्मुक्तावस्थया स्थिता जनकादयः BhartṛNi. 5.6(3); **B** accomplished or accumulated through many births अनेकजन्मसंसिद्धपुण्यपापपरिक्षये। ... त्रैगुण्योपरमे तत्तु (परब्रह्म) स्वेनानुभवितुं क्षमम् AhirbuS. 2.41; काशीसंस्थोऽमृतो भवेत्। अनेकजन्मसंसिद्धैर्बद्धोऽपि प्राकृतैर्गुणैः SkandP. iv. 30.14.

अनेकजन्मसंस्कार (anekajanma-saṁskāra) *m.* (mental) impression acquired through many births अनेकजन्मसंस्कारगुरुदेवप्रसादतः योगादभ्यासात्ततो वेधो जायते तस्य योगिनः VarāU. 5.66.

अनेकजन्मसंचित (anekajanma-sañcita) *adj.* accumulated or accrued through many births सर्वे...पाप्मानः धर्माधर्माख्याः अनेकजन्मसंचिताः इह च प्राग्ज्ञानोत्पत्तेः ज्ञानसहभाविनश्च प्रदूयन्ते ChāndoUBh. 331.8 (*on* v. 24.3); अनेकजन्मसंचितानां कर्मणामारब्धानारब्धफलानां कथं तन्निवृत्तिर्ज्ञानविरोधाभावात् BrahmSūBh.

(Bhā.) 21.7 (*on* i.1.4); अनेकजन्मसंचितपुण्यकर्मभिः शुद्धचित्तानामेव काशीमरणसंभवात् TristhaSe. 295.32.

अनेकजन्मसंजात (anekajanma-sañjāta) *adj.* arising from, i.e. accumulated through many births अनेकजन्मसंजातं प्राक्तनं संचितं स्मृतम् DevīBhāP. vi.10.9.

अनेकजन्मसंतति (anekajanma-santati) *f.* succession of many births अनेकजन्मसंततेर्यावदद्याक्षयः पुमान्। यद्यसौ मुक्त्यवस्थायां कुतः क्षीयेत हेतुतः YaśasCam. ii. 272.17.

अनेकजन्मसंतान (anekajanma - santāna) *n.* succession or cycle of many births तयोर्नौ (लक्ष्मीनारायणयोः) ...पदमुत्तमम्। ...अनेकजन्मसंताननिःशेषितकषायकैः। ...अवाप्यते LakṣmīT. 17.10.

अनेकजन्मसंभव (anekajanma - sambhava) *adj.* arising from many births दुष्कृतकारिणः। ते विमुक्ताश्च कलुषैरनेकजन्मसंभवैः। पश्यन्ति निर्मलं देवम् VāmaP. 33.14.

अनेकजन्मसंभूति (anekajanma - sambhūti) *f.* origination of many births अनेकजन्मसंभूतिः संसृतिः परिकीर्तिता। संसृतिं प्राप्नुवन्त्येते ये तु मां गणयन्ति न GaṇeP. ii.144.5.

अनेकजन्मसहस्र (aneka-janmasahasra) *n.* many thousands of births ज्ञानं यदि न क्षिणोति कर्माणि अनेकजन्मसहस्रसंचितानां कर्मणां कुतः परिक्षयः NyāyKa. 285.3; अनेकजन्मसहस्रभोग्यदुष्कृतसुकृतफलराशितादात्म्याध्यवसिततया ...चिन्ताह्लादयोः प्रत्यायनमित्यतिशयोक्तिद्वयप्रतीतिः SāhiDa. 227.3.

अनेकजन्मसाहस्री (anekajanma - sāhasrī) *adj.* (*f.*) involving many thousands of births अनेकजन्मसाहस्रीं संसारपदवीं व्रजन्। ... मोहश्रमं प्रयातोऽसौ वासनारेणुकुण्ठितः ViṣṇuP. vi.7.19.

अनेकजन्मसिद्ध (anekajanma-siddha) *adj.* (used as noun) (one) who is perfected through many births अनेकजन्मसिद्धानां श्रौतस्मार्तानुवर्तिनाम्। विरक्तानां प्रबुद्धानां प्रसीदति महेश्वरः ŚivaP. vii (2). 7.29 (552 A.14)

अनेकजन्मसेवा (anekajanma-sevā) *f.* service rendered during many births सोमो यत्रातिरिच्यतेऽनेकजन्मसेवया तत्र विशुद्धान्तःकरणे संजायते परिपूर्णानन्दाद्वितीयब्रह्माकारं मनः समुत्पद्यते ŚvetāUBh. 132.17 (*on* 2.6)

अनेकजन्माचरित (anekajanmācarita) *adj.* committed through many births अनेकजन्माचरितमहापातकसंहतिम्। निरस्य दिवि मोदन्ते तत्र स्नानरता जनाः Skand P. ii (1). 34.12.

अनेकजन्माघ (anekajanmāgha) *n.* sins (committed) through many births कथा त्वदीया भवपाशमोचनी...। अनेकजन्माघचयापहारिणी तनोति भक्तिं वयुनं तवाञ्जसा SkandP. ii (9). 15.5.

अनेकजन्मानुभव (anekajanmānubhava) *m.* experience (acquired) through many births ऊर्जस्वि रूढाहंकारमित्यनेन ...अनेकजन्मानुभवसंस्काराहितप्रढिम्नः संग्रामे ...रसस्य...परां कोटिमुपवर्णयति SaraKaṇṭhā. 704.17.

अनेकजन्मानुयायित्व (anekajanmānuyāyi - tva) *n.* the state of continuing through many births परिदृश्यमानसंसारनिमित्तशेषस्यानेकजन्मानुयायित्वमवगच्छतो यदाकदाचिदनर्थनिवृत्तिः स्यात् PrakaVi. 994.20.

अनेकजन्मान्तर (aneka - janmāntara) *n.* many other, i.e. former births अद्य फलितमनेकजन्मान्तरोपात्तमवदातं कर्म Kād. 96.2; भवादृशाः फलमस्यानेकजन्मान्तरसहस्रोपार्जितस्याकलुषस्य कर्मणः करतलगतमिव कथयन्ति HarṣaC. 220.17; अनेकजन्मान्तरभावनापरिपाकवशात् एषां देवानाम् ... जनिमानि... अन्ववेदम् AitUBh. 283.11 (*on* 4.5); स्मृतिलम्भे सति ... अनेकजन्मान्तरानुभवभावनाकठिनीकृतानां हृदयाश्रयाणां ग्रन्थीनां विप्रमोक्षः ... विनाशो भवति ChāndoUBh. 467.15 (*on* vii. 26.2); अनेकानि हि आरब्धफलानि अनारब्धफलानि च अनेकजन्मान्तरकृतानि विरुद्धफलानि कर्माणि संभवन्ति TaiUBh. 188.13 (*on* 1.1); अनेकजन्मान्तरसंचितैः नरो विमुच्यतेऽज्ञाननिमित्तपातकैः UpadeSā. 301.71; अनेकजन्मान्तरसंचितानि नश्यन्ति पापानि नरस्य भक्त्या VarāP. 40.10; दृष्टं च भवत्यनुभूतं चिरादनेकजन्मान्तरसहस्रसंचितस्य सुकृतराशेरेककालमवाप्तपरमपरिपाकं फलम् TilaMañ. 249.13; 252.23.

अनेकजन्माभ्यस्त (anekajanmābhyasta) *adj.* [*f.*- ā] practised repeatedly during many births अनेकजन्माभ्यस्ता क्वापि जन्मन्यपवर्गं प्रापयिष्यति...विद्या BrahmSūBh. (Bhā.) 217.7 (*on* iii.4.49); अनेकजन्माभ्यस्तादनन्तरं ब्रह्मप्राप्तिलक्षणं सुखम् ManuBh. i. 381.21 (*on* 4.149)

अनेकजन्माभ्यास (anekajanmābhyāsa) *m.* repeated practice during many births यदि हि जन्मान्तरसंभवस्तदानेकजन्माभ्यासोपचयात् समीहितसमाप्तिः PramāVāBh. 53.10; PrakaPañ. 318.6; अनेकजन्माभ्यासेन वामदेवेन वै पथा। सोऽपि मुक्तिं समाप्नोति VarāU. 4.41.

अनेकजन्मारम्भकत्व (anekajanmārambhaka-tva) *n.* the state of being what commences, i.e. produces many births न च एकस्मिन् जन्मनि सर्वकर्मणां क्षय उपपद्यते, ब्रह्महत्यादेश्च एकैकस्य क्रमेण अनेकजन्मारम्भकत्वस्मरणात् ChāndoUBh. 300.15 (*on* v.10.5)

अनेकजन्मार्जित (anekajanmārjita) *adj.* **A** committed through many births ब्राह्मणो देवलो नाम ... अनेकजन्मार्जितपापी सर्वधर्मबहिष्कृतः SkandP.v(1). 53.33; अनेकजन्मार्जितसंयुतानि नश्यन्ति पापानि नरस्य भक्त्या BhaviP. 723A. 29 (iv. 83.51); अनेकजन्मार्जितपातकावली विलीयते माधव मज्जनेन PadmP. iv. 86.32; **B** acquired or secured through many births परिपूर्णपराकाशमग्नमनाः ...संन्यस्तसर्वेन्द्रियवर्गोऽनेकजन्मार्जितपुण्य-पुञ्जपक्वकैवल्यफलः ... ब्रह्माहमस्मीति कृतकृत्यो भवति MaṇḍBrU. 3.2 (351.21); अनेकजन्मार्जितपुण्यसंचयैः संशुद्धकिल्बिषः ... योगी ...परां गतिं यात्येव GītāBh. (Rā.) 358.7 (*on* 6.45); येषां तु ... अनेकजन्मार्जितेनोत्कृष्टपुण्यसंचयेन ... पापमन्तगतम् GītāBh. (Rā.) 404.1 (*on* 7.28); अनेकजन्मार्जितपुण्यतो ये मज्जन्ति तोये मणिकर्णिकायाः। ...ते वै मयापीह भवन्ति वन्द्याः PadmP. iv. 92.49; अन्यानेकजन्मार्जितसुकृतसंक्रमणस्य महापातकादिफलप्राप्तेश्चानृतवचनमात्रेणानुपपत्तेः साक्षिसंत्रासार्थमिदमुच्यते Mitā. 184.3 (*on* 2.75); अनेकजन्मार्जितपुण्योपचयवतामपि नरेन्द्राणां यतो ग्रहाधीना उच्छ्रायाः ...तस्मात्पूज्यतमाः ग्रहाः Aparā. 576.3 (*on* 1.306); Subodhi. 35.17 (*on* 2.73-75); अनेकजन्मार्जितसुकृतशुद्धान्तःकरणानामेवात्र मरणमिति न नियमः TristhaSe. 296.6; किं चानेकजन्मार्जितसुकृतराशेरेव शुद्धचित्तानां काशीमरणसंभवात् न शोधकान्तरापेक्षा TristhaSe. 306.9; अनेकजन्मार्जितपुण्यपाकैः परं निधानं भगवन्तमाप्य। न जातु हातुं वलते मनो मे स्वर्गापवर्गादिषु वीतरागम् KaṁVa.5.35; अपत्यभावेन ... अजायत ...। अनेकजन्मार्जितभाग्यराशिराकारवानच्युतभूमिपालः Raghunā. 6.12; **C** accumulated through many births इदमात्मज्ञानमुत्पन्नमात्रमेवानेकजन्मार्जितकर्मराशिं विनाशयति SiddhāTa.51.15.

अनेकजन्मिकत्व (anekajanmika - tva) *n.* the state of pertaining to many births (प्रतीत्यसमुत्पादः) स एवावस्थिकः प्रकर्षयोगात् प्राकर्षिकः अनेकक्षणिकत्वादनेकजन्मिकत्वाद्वा Sphuṭā. iii. 32.27 (*on* 3.14)

अनेकजन्मीय (anekajanmīya) *adj.* [*f.*- ā] pertaining to many births अनेकजन्मीयपापनाशे लिङ्गम् ...दृष्ट्वा ...दशजन्मार्जितैः पापैस्त्यज्यते TristhaSe.98.23; तीर्थस्नानादिना पापादिशब्दलक्षिता पापवासनानेकजन्मीया नश्यति TristhaSe. 99.2.

अनेकजन्मोत्थ (anekajanmottha) *adj.* produced, i.e. accumulated through many births अनेकजन्मोत्थसंचितानां च कर्मणाम्। मध्ये वेगः समायाति DevīBhāP. vi. 10.19.

अनेकजन्मोपभोग्य (anekajanmopabhogya) *adj.* to be experienced during many births 'तदप्राप्तिमहादुःख-' इत्यत्र ...गुणीभूतव्यङ्ग्यत्वं वा युक्तम्। अनेकजन्मोपभोग्यदुःखसुखराशिभ्याम्... अनिगरणेऽशेषपापपुण्यपुञ्जनाशकताया अनुपपत्तेः RasGaṅ. 167.9.

अनेकजन्मोपात्त (anekajanmopātta) *adj.* **A** committed through many births स्मृतम्। (यागम्) अघनिर्मोचनं नाम द्वितीयं यस्य दर्शनात्। अनेकजन्मोपात्तं तु कल्मषं क्षयमेति च PauṣkS. 5.3; **B** accumulated through many births अनेकजन्मोपात्तस्य पुण्यापुण्यस्य कर्मणः। अनन्तदेहहेतोश्च विप्रघातस्य संभवात् BṛĀraUBhVā. (Sambandha.) 94.

अनेकजन्मोपार्जित (anekajanmopārjita) *adj.* acquired through many births चिन्तयन्ती च तत् ... अनेकजन्मोपार्जितैः सुकृतकर्मभिरपि दुरापम् ... सहसैव विह्वलतामगच्छम् TilaMañ. 312.18; अनेकजन्मोपार्जितपुण्यप्राप्तं राजपदं कः परित्यजति BhartṛNi. 4.8 (1)

अनेकजन्य (aneka-janya) *m., n.* **1** many battles अनेकजन्यशोभी त्वं भर्तालंकृतविग्रहः HarVi. 32.80; (सिन्धुरमेकमुदयगिरिनामकम्) भविष्यदनेकजन्यजयादेशरेखाभिरिव कतिभिश्चिद्वलिभिरलंकृतेन ... करेण ... दिशन्तम् YaśasCam. i.294.6; *2* many royal companions, HarVi. 32.80; **3** several bride's maids अथ कालेन संप्राप्ते तस्या लग्नदिनोत्सवे। श्रुतो मयानेकजन्यजनकोलाहलः BṛKathāMañ.11.29.

अनेकजपाकुसुम (aneka-japākusuma) *m.* many red China roses सहस्रदीपाभिव्यक्तपटस्येव अनेकजपाकुसुमाभिव्यक्तस्फटिकस्येव च नानात्वाभावात् VaiyāSiMañ. 182.4.

अनेकजयिन् (aneka-jayin) *adj.* conquering many अनेकजननं (v.l. ॰जयिनौ) सख्यं ययोः पुरुषसिंहयोः। तयोस्त्वं न समो राजन्भवितासि MahāBhā. v. 94.12.

अनेकजलक्रीडोपकरणा (aneka -jalakrīḍopakaraṇā) *adj.* (*f.*) having instruments for many (types of) water-sports नवमी श्रेणिर्जलेन सिच्यमाना अनेकजलक्रीडोपकरणा संयोक्ष्यमाणा भवति SāmaraU. 267.19.

अनेकजलचरपतंग (aneka-jalacarapataṅga) *m.* many aquatic birds अनेकजलचरपतंगशतसंचलनचञ्चलितवाचालवीचिमालम् ... पम्पाभिधानं पद्मसरः Kād. 22.15.

अनेकजलयन्त्र (aneka-jalayantra) *n.* many (artificial) fountains चतुर्दिक्षु विराजन्ते ... रत्नौघकीर्णतीर्थानि महापुण्यजलानि च। अनेकजलयन्त्रैश्च नादितानि ... सरांसि VarāP. 78.6.

अनेकजलरङ्कु (aneka-jalaraṅku) *m.* many gallinae or water-fowls (हरिवाहनः) अनेकजलरङ्कुकुररकारण्डवाकुलसरित्सरोवरप्रेक्षणीयां स दक्षिणश्रेणिमागमत् TilaMañ. 425.3.

अनेकजाति (aneka-jāti) *f.* **A** many generic properties एकयैव बुद्ध्या अनेकजातिगुणद्रव्यक्रियाद्यङ्कलापकल्माषिततनुरवगम्यते NyāyMañ. i.316.8; अनेकजातिगुणद्रव्यक्रियावभासं विज्ञानमेव वाक्यार्थः NyāyRaMā. 73.6; NyāyRa. 879.14 (*on* 7.118); **B** different classes or species of beings जात्यन्तरजन्तुष्वनेकजातिसंभवा महर्षयो बहवः सन्ति। ऋष्यशृङ्गो मृग्याः कौशिकः कुशात् ... जातः VajraSūU. 12; **C** various sorts of creatures प्रत्येकानन्त (v.l. °कानेक)-जातिप्रतिवपुः° ... °महापौरुषस्यापि शास्तुः। केऽप्युत्कर्षं स्तुवन्ति SubhāRaK. 1.10; **D** many descriptions अनेकजातिसंश्रयात् विचित्रम्, इह जातयो वर्णनीयवस्तुस्वरूपवर्णनानि AupaSūṬ. 41.7; **E** many castes, cf. **अनेकजातिमत्**.

अनेकजाति (aneka-jāti) *adj.* of many kinds or types भूमीश्वरः अनेकजातिभिः पुण्यवादित्रकैर्मुखरितदिगन्तरः ... नगरं विवेशUdaySuKa. 145.30.

अनेकजातित्व (anekajāti-tva) *n.* the state of belonging to many kinds or types यथा कारणे तृणादौ सामग्रीवैजात्यं, तथा कार्येऽपि वह्नावनेकजातित्वमस्ति SarvaDaKau. 15.21.

अनेकजातिमत् (anekajāti-ma (n) t) *adj.* possessing or belonging to many castes ब्रह्मैकजात्यवच्छिन्नं यस्मादग्रे व्यवर्तत। नानेकजातिमद्धेतुकर्मणेऽलं ततो भवेत् BṛĀraUBhVā. i.4.1599.

अनेकजातिव्यक्त्यात्मक (anekajātivyaktyātma-ka) *adj.* of the nature of many classes and individuals नन्वनेकजातिव्यक्त्यात्मकमेव लोको गोशब्दाद्यर्थं मन्यते NyāyRa. 504.11 (*on* 5 (10). 25)

अनेकजातिसंवीत (anekajāti - saṁvīta) *adj.* adorned with many species अनेकजातिसंवीता नानावर्णाश्च पद्मिनः। ... बहवो नागाः SkandP. i(1). 34.37.

अनेकजातीय (anekajātīya) *adj.* **A** of many regions सैन्यमनेकजातीयस्थमुक्तमनुक्तं वा विलोपार्थं यदुत्तिष्ठति, तदौत्साहिकम् ArthŚā. iii.54.4 (9.2) (comm. नानाप्रकारदेशावस्थायि); **B** of many species or kinds शक्नुयात् ... अनेकजातीयगोभूहिरण्यादिदेयद्रव्यसंख्यापरिमाणकल्पनस्य शक्तिमात्रपरिच्छेद्यतां वक्तुम् CaturCin. iii (1). 1043.13; **C** of various castes 'सवर्णेषु च तत्पासु पत्नीष्वक्षतयोनिषु। आनुलोम्येन संभूता जात्या ज्ञेयास्तथैव ते'। अनेकजातीया भवन्तीत्यर्थः DīpKa. 13.6 (*on* 1.90)

अनेकजातीयकन्या (anekajātīya - kanyā) *f.* daughters belonging to various castes स्वात्स्वादिति वीप्सानेकजातीयकन्याभिप्राया Aparā. 731.1 (*on* 2.124)

अनेकजात्यन्तर (aneka-jātyantara) *n.* **A.** many other, i.e. different classes अनेकजात्यन्तरसंकटत्वादज्ञानतः ...। संसर्गतो दुःश्रुतिदुर्जनानां न लभ्यते मानुषजातिराशु VarāṅgaC. 8.5; **Bi** many other, i.e. different births राजा सुविशुद्धभावनः। अनेकजात्यन्तरदुःखकारकान्कषायदोषान् ... विसृज्य जग्राह महाव्रतादिकम् VarāṅgaC. 13.8; न तावत्प्रायणकालविप्रकर्षो सर्वसंस्कारोच्छेदकौ, पूर्वाभ्यस्तस्मृत्यनुसंधानात् ... हर्षभयशोकसंप्रतिपत्तेः। मनुजजन्मवासनानां चानेकजात्यन्तरसहस्रव्यवहितानां पुनर्मनुष्यजातिसंवर्तकेन कर्मणाभिव्यक्त्यभावप्रसङ्गात् Bhām. 249.3 (*on* i.3.30); **Bii** many other (former) births अनेकजात्यन्तरसंचितं यत्पापम् ... मर्त्या जिनपूजनेषु ... निर्धुनन्ति VarāṅgaC. 22.40.

अनेकजानि (aneka-jāni) *adj.* having many wives (नायकः) अनेकजातिः (?निः) साधारणः SaraKaṇṭhā. 681.11.

अनेकजित् (aneka-jit) *adj.* conquering many स हि तेषां महेष्वासो गतिरासीदनी (v.l. °ने)कजित् MahāBhā. iii.79.2.

अनेकजिनेश्वरमूर्ति (aneka-jineśvaramūrti) *adj.* having many images of Jineśvara अनेकजिनेश्वरमूर्ति स्फूर्तिमदभ्रचकास्ति जिनौकः ViviTīKa. 84.11.

अनेकजिह्व (aneka-jihva) *adj.* **1** having more than one tongue वक्त्रस्यानेकजिह्वस्य ... कस्य नोद्वेगजननी सखे तव भुजंगता RāmāMañ. 194.1; सर्वोद्वेगकरी चेष्टा भुजंगस्य विलासिनः। विटस्यानेकजिह्वस्य Deśopa. 5.2; **2** changing one's words or speaking variously, RāmāMañ. 194.1; Deśopa.5.2.

अनेकजिह्वत्व (anekajihva-tva) *n.* **A** the state of having more than one tongue तवापि दुष्टसंपर्कात्संक्रान्तं सर्वमेव हि। व्यालेभ्योऽनेकजिह्वत्वं भस्मनः स्नेहवन्ध्यता SkandP. i(2). 27.82; v(2). 18.28; PadmP. v.41.23; **B** the state of speaking variously, SkandP. i(2). 27.82; v(2).18.28; PadmP. v.41.23.

अनेकजीवघात (anekajīva-ghāta) *m.* killing of many individuals or beings अनेकजीवघातोत्थं म्लेच्छोच्छिष्टं मलाविलम्। मलाक्तपात्रं निक्षिप्तम् SubhāRaSaṁ. 553.

अनेकजीवमत (anekajīva-mata) *n.* doctrine of (admitting) more than one individual soul केनापि मार्गेणेति ब्रह्मविद्यापक्षेण वा जीवविद्यापक्षेण वा एकजीवमतेन वा अनेकजीवमतेन वा ... अविचारितम् NyāySu. (Ja.) 227 A.11 (*on* i.4.6)

अनेकजीववाद (anekajīva-vāda) *m.* theory or doctrine of (admitting) more than one individual soul जीवादिनामनादित्वमस्तु, एकजीववाद इवानेकजीववादेऽपि तदविरोधात् ŚatDū. 172.5; इतरे ... अन्तःकरणानां जीवोपाधित्वाभ्युपगमेनानेकजीववादमाश्रित्य बन्धमुक्तिव्यवस्थां प्रतिपद्यन्ते SiddhāLeSaṁ. 109.3; 447.9; अन्तःकरणावच्छिन्नानेकजीववादपक्ष इत्येवमादयो विरुद्धपक्षा निरस्ताः YatīndraMaDī. 75.1; अनेकजीववादेऽपि प्रतिबिम्बेशवादिनाम्। मुक्तस्य बिम्बचिद्भावाच्छुद्धे तत् पर्यवस्यति VedāntSiSūMañ. 129.1 (4.15)

अनेकजीवसद्भाव (anekajīva-sadbhāva) *m.* existence of more than one individual soul अनेकजीवसद्भावमेकजीवादिनिर्णयम्। यद् यद् ध्यायति चित्तेन ... बुद्ध्या निश्चीयते TejoBiU. 5.84.

अनेकजीवसंमूर्च्छन (anekajīva-sammūrcchana) *n.* infatuation or delusion of many living beings चतस्रो विकृतयः मद्यमांसमधुनवनीतरूपाः सद्य 'एव तत्रानेकजीवसंमूर्च्छनात् KumāPraPra. 74.26.

अनेकजीवार्णव (anekajīvārṇava) *m.* ocean of many individuals ततं विश्वमिदं समस्तमनेकजीवार्णवदुर्विगाह्यम्। विवेश रुद्रस्य मुखं विशालम् SkandP.v(3). 17.10.

अनेकज्ञातृ (aneka-jñātṛ) *adj.* (used as noun) more than one knower एकैव संवित् अनेक-ज्ञातृज्ञेयतदवच्छिन्नज्ञप्तिरूपेण विवर्तते ŚatDū. 141.10.

अनेकज्ञान (aneka-jñāna) *n.* **A** different sciences संज्ञा नाम महाभागा तस्यां भानुरजीजनत्। मनुं प्रख्यातयशसमनेकज्ञानपारगम् MārkP. 77.2; **B** more than one knowledge अनेकज्ञानाद्यजन्यत्वे सति ज्ञानादिजन्यत्वरूपस्य तस्य साधन एव गौरवमित्येतदपि दूषणमत्रापि तुल्यम् ŚivārkaMaDī. i.148.8 (*on* i.1.3); **C** many knowledges सामान्यलक्षणमपि विधिरूपमन्यापोहरूपं वानेकज्ञानगम्यम् Bhām. 447.10 (*on* ii. 2. 28); **D** knowledge of many, cf. **अनेकज्ञानहेतु.**

अनेकज्ञानप्रकाश्य (anekajñāna-prakāśya) *adj.* to be illuminated through more than one knowledge अनेकज्ञानप्रकाश्यानेकरूपत्वाच्छुक्तेरेकेनैव ज्ञानेन कार्त्स्न्येन अप्रकाशितत्वात् तदज्ञानस्यापि कार्त्स्न्येनानिवृत्तिर्युज्यते IṣṭaSi. 70.20.

अनेकज्ञानशक्तिभेद (anekajñānaśakti-bheda) *m.* variety of faculties of different knowledges (such as *smṛti, saṅkalpa*) अनेकज्ञानशक्तिभेदवत् संकल्पाद्यात्मकं मनोऽप्यविद्यमानं यस्मिन् सोऽयममनाः MuṇḍUBh. 326.5 (*on* ii.1.2)

अनेकज्ञानसमवाय (anekajñāna-samavāya) *m.* inherence, i.e. collection of many knowledges अवस्थितशरीरस्य (जीवस्य) चानेकज्ञानसमवायादेकप्रदेशे युगपदनेकार्थस्मरणं स्यात् NyāyBh. 212.8 (*on* iii.2.33)

अनेकज्ञानसाधारण (anekajñāna-sādhāraṇa) *adj.* common to many knowledges तदवच्छिन्नः कालोऽपि वर्तमानः। स च तथाविधोऽनेकज्ञानसाधारण एव NyāyVārPari. 174.4.

अनेकज्ञानसाध्य (anekajñāna-sādhya) *adj.* to be accomplished through many knowledges वास्यवासकभावोऽनेकज्ञानसाध्यः Bhām. 447.11 (*on* ii.2.28)

अनेकज्ञानहेतु (anekajñāna- hetu) *m.* cause of the knowledge of many ये (वृक्षाः) व्यस्तविज्ञाता अनेकज्ञानहेतवो नाप्येकस्मिन् देशे काले वा अवस्थिताः ते वनमिति नोच्यन्ते NyāyRa. 631.9 (*on* 5(14). 70)

अनेकज्ञानोत्पत्ति (anekajñānotpatti) *f.* origination of more than one knowledge यद्यपि सांख्यीयराद्धान्ते दीर्घा शष्कुलीं भक्षयतो युगपदनेकज्ञानोत्पत्तिरभिमता तथापि क्वचित् क्रमोऽपि दृश्यते TātpaṬ. (Vā.) 522.17 (*on* iii. 1.34); ज्ञानं त्रिक्षणावस्थायि भवद्भिः स्वीक्रियते। ततश्च युगपदनेकज्ञानोत्पत्त्यभावात् SarvaDaKau. 117.4; युगपदनेकज्ञानोत्पत्तेर्विरुद्धत्वेऽपि दीपसहस्र इव समूहालम्बनैकज्ञानाविरोधात् Nyāyāmṛ. 561B.3.

अनेकज्ञानोत्पाद (anekajñānotpāda) *m.* origination of more than one knowledge अभ्यासो ह्येकविषयोऽनेकज्ञानोत्पाद एकाकारविषयो वा NyāyVār. 303.14 (*on* ii.2.30)

अनेकज्ञेयाकार (aneka-jñeyākāra) *m.* more than one knowable form ज्ञानस्यैकस्यानेकज्ञेयाकारसंबन्धे कृत्स्नैकदेशविकल्पस्तदवस्थ एव NyāySiA. 192.17.

अनेकढगादिप्रत्यय (aneka-ḍhagādipratyaya) *m.* various (secondary) affixes such as *eya (ḍhak)* etc. देवताधिकारे अग्नेर्ढक् इत्यादिभिः सूत्रैरनेकढगादिप्रत्ययविधानात् BhāṭṭCin. i.102.31 (*on* i.1.4)

अनेकणिनिमित्तक (anekaṇinimitta-ka) *adj.* caused by various affixes having (the common indicatory term) *ṇi*, i.e. *ṇiṅ, ṇic* etc. णित्वजात्याश्रयानेकनिमित्तकेत्यर्थे 'अचकथत्' इत्यादौ दोषः। ... अनेकणिनिमित्तकाग्लोपस्याप्रसिद्धत्वात् LaŚabde- Śe. ii.618.1.

अनेकतकार (aneka-takāra) *m.* many *t-* letters अनेकतकारादीनां झल्त्वादिसिद्धिः LaŚabdeŚe. i.40.1.

अनेकतत्कल्पन (anekatat-kalpana) *n.* assumption of many things (expressed meanings) केचित्तु धर्ममात्रं धर्मत्वेनैव शक्यम् ... अनेकतत्कल्पने गौरवादस्तु धर्मत्वेन तेषां वाच्यता VaiyāBhū. 220.10 (*on* 50)

अनेकतत्त्वात्मक (anekatattvātma-ka) *adj.* of the nature of many principles or elements एवं सिद्धमनेकतत्त्वात्मकं ब्रह्माण्डादिव्यष्टिविश्वम् NyāySiA. 207.30.

अनेकतत्सिद्धि (anekatat-siddhi) *f.* establishment of more than one of them (atoms) तन्नाणुरूपोऽर्थः सर्वथा घटते। ... एकपरमाण्वसिद्धौ कथमनेकतत्सिद्धिः SyādvāMañ. 16 (207)

अनेकतद्विशिष्टत्व (anekatadviśiṣṭa-tva) *n.* the state of being qualified, i.e. marked by more than one of them एकतपनप्रचारविशिष्टत्वं यौगपद्यम्। अनेकतद्विशिष्टत्वमयौगपद्यम् NyāySu. (Ja.) 215A.7 (*on* i.4.6) = Vādā. 116.5.

अनेकतद्वृत्तवश (anekatadvṛtta-vaśa) *n.* [Abl.] on account of many circles of them (परिधिः) अनेकोत्क्रमज्ययाप्यत्र य एव बोध्यः। अनेकतद्वृत्तवशाद् बुधेन्द्रैस्तदेकघातोत्थपदप्रसिद्ध्या SiddhāTaVi. 30.7.

अनेकतनूज (aneka-tanūja) *adj.* having many sons (आनकदुन्दुभेः) अने(क)तनूजस्याप्यासाते तनयावुभौ। गोत्रस्य मण्डनम् PāṇḍaC. 12.47.

अनेकतन्तुसंयोग (anekatantu-saṁyoga) *m.* combination, i.e. weaving together of many threads अनेकतन्तुसंयोगैः पटबन्धः ...कला स्मृता ŚukraNī. 4(3).88.

अनेकतन्त्रीका (aneka-tantrīkā) *adj.* (*f.*) having more than one string व्याधोऽपि तत्रालमनेकतन्त्रीकामेकतन्त्रीं ध्वनयन् विपञ्चीम्। ... मृगान् कर्षति न स्म हन्तुम् DvyāśraKā. 20.28.

अनेकतन्त्वारब्ध (anekatantv-ārabdha) *adj.* begun, i.e. woven with many threads कस्याविद्यया प्रपञ्चः कृतोऽस्त्विति चेत् विनिगमकाभावात् सर्वाविद्याकृतोऽनेकतन्त्वारब्धपटतुल्यः SiddhāLeSaṁ. 113.4.

अनेकतपनसृष्टि (anekatapana-sṛṣṭi) *f.* creation of several suns युगपदनेकतपनसृष्टिप्रसङ्गो दुर्वारः ŚivārkaMaDī. ii.71.29 (*on* ii. 2.11)

अनेकतपस् (aneka-tapas) *n.* many austerities नदी जाम्बुवतीसंज्ञा ...। तस्यां मुनयोऽप्सरोभिः क्रीडन्ते ... अनेकतपसा पुण्याः PadmP. iv.47.50.

अनेकतपोधन (aneka-tapodhana) *m.* many great ascetics जनकजानुगतो रघुनन्दनः। परिगृहीतमनेकतपोधनैरभिससाद गिरीन्द्रशिरस्पदम् Rāgh. 6.25.

अनेकतमादान (anekatamādāna) *adj.* having various points of origins कमनेकतमादानं सुरतनरजतु च्छलं तदासीनम्।... नरं जेतुम् Kāvyālaṅ. (Ru.) 4.13 (comm. अनेकतमान्यादानानि उत्पत्तिस्थानानि यस्य)

अनेकतर (an-ekatara) *adj.* [*f.*-ā] **1** other than the word *ekatara* डतरादिभ्यः पञ्चभ्योऽनेकतरात् तः CāndraVyā. ii.1.25; पञ्चतोऽनेकतरस्यान्यादेर्दक् स्वमोः ŚākaṭāVyā. i.2.2; पञ्चतोऽन्यादेरनेकतरस्य दः SiddhaHe. i.4.58; तोऽन्यादेर्मोऽनेकतरात् MugdhaBo. 3.88 (23.20); **2** (aneka - tara) various (वाहिनीभिः) अनेकतराभिरुपशोभितम् ... वासवदत्ताभवनं ददर्श VāsaDa. 220.2.

अनेकतरङ्ग (aneka-taraṅga) *adj.* having many waves, i.e. ups and downs अनेकतरङ्गस्य जगतः क्षणभङ्गिनः। किं विषङ्गेण मनसि प्लवगेश मनागपि RāmC. 31.145.

अनेकतरुफल (anekataru-phala) *n.* fruits of various trees (हरिवाहनः) तैः प्रत्यहमनुगम्यमानः ... अनेकतरुफलरसास्वादजनितनानाशकुनिकुलसौहित्येषु लोहित्योपकण्ठकाननेषु विचचार TilaMañ. 182.21.

अनेकतरुमूल (anekataru-mūla) *n.* roots of various trees तस्य भवनम् ... अनेकतरुमूलकल्पितापाश्रयवृक्षवाटिकम् ... सदोलाप्रेङ्खं च स्यात् KāvyMī.49.23.

अनेकतरुलताङ्कुर (anekatarulataṅkura) *m.* sprouts of various trees and creepers अनेकतरुलताङ्कुरविराजितां मृगयाटवीमवाप (राजा) UdaySuKa. 43.8.

अनेकतरुशकुन्त (anekataru-śakunta) *m.* birds on various trees (राजा) सहसैव परमनेकतरुशकुन्तकूजितारावतुमुलैरुद्धो(?द्वो)धितेन मनसा दत्तदृष्टिरकस्मादात्मानमेकत्र ... व्रजन्तमद्राक्षीत् UdaySuKa. 128.4.

अनेकतल (aneka-tala) *adj.* having more than one storey, multi-storeyed एकानेकतलं वैतद् ब्रह्मविष्णवीशमन्दिरम् ĪśānŚiPa. ii.28.73.

अनेकतल (aneka-tala) *n.* more than one storey मण्डपोपरि रङ्गं स्यादेकानेकतलान्वितम् ĪśānŚiPa. ii.29.116.

अनेकतस् (aneka-tas) *adv.* **A** from more than one पटस्तन्तुगणाद् दृष्टः सर्वमेकमनेकतः MṛgendraT. i.9.7; यदि शेषपरावृत्तेरेकज्ञानमनेकतः। अन्वर्थमन्यथाभासमनंशानां न राशयः NyāyVi. 2.119; **B** on account of many पर एव प्रविष्टश्चेत्प्रविष्टानामनेकतः। तदनन्यत्वतः प्राप्नमहेशस्याप्यनेकता BṛĀraUBhVā. i.4.550; **C** variously नमो नमः सुरवर तिग्मतेजसे ...। तवैव तद्रूपमनेकतः स्थितम् BhaviP. 182A.21 (i.123.45)

अनेकता (aneka-tā) *f.* **A** the state of being different, various or manifold, diversity, variety विभागस्तु विभक्तिः स्यात् ... पृथक्त्वं स्यादसंयोगो वैलक्षण्यमनेकता CaraS. i.26.31 (1922 Ed.); अनेकपरिणतेरनेकरूपत्वात् कार्यस्यानेकता स्यात् HetuBiṬ. 93.11; 101.27; स्वदेश एव गृह्णाति सवितारमनेकधा। भिन्नमूर्ति यथा पात्रं तदास्यानेकता कुतः ŚlokaVār. 6.182 (775.7); यद्वत् सुखदुःखानाम् अवयवभेदादनेकता देहे। तद्वदिह सत्यभेदेऽप्यनुभववैचित्र्यमात्मनामेषाम् SvātmNi. 92; समष्टिदृष्ट्या त्वेकत्वं व्यष्टिदृष्ट्या त्वनेकता SarvaSiSaṁ. 12.79; नानेकस्यैकता न्याय्या तथैकस्याप्यनेकता BṛĀraUBhVā. (Sambandha.) 171; i.4.550; भूयो भवनमेतत्स्यान्मायिनोऽनेकता यथा TaiUBhāVā. 116.24 (2); (वस्तु) अनेकधर्ममवगम्यमानं तेनात्मना अनेकतामपि भजते NyāyRa. 331.17 (*on* 5(3).220); राक्षसास्तं (रघुनन्दनम्) प्राप्तमेकमनेकताम्। ददृशुर्विश्वसंहारविश्वरूपमिवान्तकम् RāmāMañ. 126.1; प्रभिन्नोऽनेकतां प्राप्ते AnekāK.479; न ह्येकतानेकते स्वरूपेण विरुद्धे एकस्यैव घटस्यान्यापेक्षयाने-कत्वदर्शनात् NyāySu. (Ja.) 381B.2 (*on* ii.2.6); चिदणोः प्रतिभा सा स्यादेकस्यानेकतोदिता YogVā. iii. 80.8; विशिष्य वस्तूनि विरिञ्चिना पुरा कृतानि तेषामपि बुद्धिगौरवात्। अनेकता पद्ममुखीभिराहिता Raghunā. 11.83; प्रभिन्नोऽनेकतां प्राप्ते गजे जातमदे तथा AnekāK. 479; **B** the state of being more than one एकोऽप्यनेकतामाप यस्मादुदरगोऽप्यलम् MatsyaP. 7.61; एकात्मकत्वे हि अप्रतियोगित्वात् शिवताप्रतियोगिसंभवे शाक्तत्वम् अनेकतायां भेद एव नरात्मभावः ParāTri. 79.6; क्रिया ...सैषा द्विरूपापि पुनर्भेदैरनेकताम्। ...याति MālinīT. 3.8; विस्मयं चक्रिरे दैत्या इदानीमयमेकतः। अनेकतां कथं यातः GaṇeP. ii . 101.30; जितशत्रुर्महीपतिः। ... स सर्वनरदेवानां हृदयेषु पदं दधत्। एकोऽप्यनेकतां प्राप जलेष्विव निशाकरः TriṣaŚaPuC. ii.2.7; कर्णोत्तंसीभवत्पाणिपाणिजद्युतिकन्दलैः। कोदण्डमण्डनं प्रापदिषुरेकोऽप्यनेकताम् PāṇḍaC. 13.707 रणाजिरे वैरभृतां भटानामेकोऽपि योऽनेकतया (हरिराजः) चकासे HammīMaKā. 1.83; एको राहुरनेकतां गत इति त्रासादिव प्रेक्ष्य ताश्चन्द्रः सान्द्रजटाटवीसुरसरिद्दुर्गाश्रितः पातु वः EI. vi. 200.1; **C** the state of being many, i.e. manyness, plurality न जात्वभावो निरुपाख्योऽनेकतयाशेषतया शक्यः प्रतिज्ञातुम् NyāyBh. 262.7 (*on* iv.1.37); एकत्र वस्त्वभ्यनुज्ञाय कम्बलयोगमभ्युपगम्य कम्बलस्यानेकता धर्मः प्रतिषिध्यते NyāyVār. 180.12 (*on* i.2.56); वनस्य व्यष्ट्यभिप्रायाद्भूरुहा इत्यनेकता SarvaVeSāSaṁ. 317; न विधेयस्य वस्तुनः कम्बलस्य सद्भावः प्रतिषिध्यते। किं तु तदेकदेशस्यानेकताया इति महान् भेदः TātpaṬ. (Vā.) 353.15 (*on* i.2.16); अवश्याश्रयणीयं चैतद् अन्यथाकाशादेरपि तत्संबन्धाधारत्वाद-नेकताया दुष्परिहरत्वात् NyāyMa. 22.7.

अनेकताचित्रत्व (anekatā-citratva) *n.* strikingness or charm of variety of expressions एकभाषाचित्रत्वादनेकताचित्रत्वम् ... संधानसाजात्यम् ... तदुक्तम् AbhinBhā. ii.342.25 (*on* 16.110)

अनेकतात्पर्य (aneka-tātparya) *adj.* intended to convey many things, i.e. meanings समस्तमपि वाक्यं भविष्यद्विप्रलम्भविषयमिति न क्वचिदनेकतात्पर्यम् Kāvyānu. (He.) 143.21.

अनेकतादृशकारणता (aneka-tādṛśakāraṇatā) *f.* many such causalities अनेकतादृशकारणतादिव्यक्तिकल्पनागौरवं तु ... पर्यवसन्नम् LaCandr. 354.19.

अनेकताद्याप्ति (anekatādy-āpti) *f.* undesired contingency of (the soul) being many etc. स्कन्धेभ्यः पुद्गलो नान्यस्तीर्थदृष्टिप्रसङ्गतः। नानन्योऽनेकताद्याप्तेः साध्वी तस्मादवाच्यता TattvSaṁ. 337.

अनेकतापत्ति (anekatāpatti) *f.* undesired contingency of being more than one गुणतन्त्रं यदा द्रव्यं प्रसिद्धेर्बाधनं तदा। एकस्यानेकतापत्तिर्द्रव्यस्यापि प्रसज्यते BṛĀraUBhVā. i.6.79.

अनेकताभाव (anekatābhāva) *m.* absence of plurality अद्रव्यनिष्ठे सामान्ये ... अद्रव्येऽनेकताभावान्न स्वरूपभिदा ततः TarkSaṁ. (Ā.) 121.7.

अनेकतार (aneka-tāra) *adj.* (shield) having many stars सौभद्रः ... तेनानेकतारेण चर्मणा कृतहस्तवत्। ... भ्रान्तासिरचरत् MahāBhā. vii.13.51.

अनेकतारक (anekatāra-ka) *adj.* having many stars विष्णुवक्षःस्थितो भाति नितरां कौस्तुभो मणिः। अङ्गारक इवानेकतारके गगनाङ्गणे RasGaṅ. 256.16.

अनेकताल (aneka-tāla) *adj.* having (the height of) many palm trees सालेनानेकतालेन सर्वतः संवृतं पुरम् MahāBhā. i. App. I.103 (63)

अनेकताल (aneka-tāla) *m.* **1** many palm trees स तमनेकतालतुङ्गम् ... पादपमारुह्य ... शुकशावकानग्रहीत् Kād. 33.8; (राजा) गीतविद्यामिव ... अनेकतालभेदाम् ... विन्ध्याटवीमवगाहमानः ... प्रयाणविच्छेदमकरोत् NalaCam. 6.11 (18); **2** musical notes or rhythms, NalaCam. 6.11 (18)

अनेकतालदघ्न (anekatāla-daghna) *adj.* as deep as more than one palm tree एकस्मिन्ननेकतालदघ्ने गिरिनदीमहाह्रदपयसि तत्क्षणकृतावगाहः ... करी तमुद्देशमागच्छत् TilaMañ. 386.18.

अनेकतिर्यग्योनि (aneka-tiryagyoni) *f.* several births of animals मांसभक्षणात्त्वनेकतिर्यग्योनिगमनम् ManvaVi. 607.21 (*on* 5.31)

अनेकतिलकश्री (anekatilaka-śrī) *f.* beauty or glory of many marks (made with sandal wood paste etc.) अनेकतिलकश्रीभिः शोभिताङ्गो महातपाः। दर्भशोभी समित्पाणिर्दम्भो मूर्तिधरः किमु PadmP. iv.67.63.

अनेकतीर्थ (aneka-tīrtha) *n.* **A** many paths, i.e. modes (such as *vaikharī* etc.) वैखर्या मध्यमायाश्च ...। अनेकतीर्थभेदायास्त्रय्या वाचः परं पदम् VākyaPa. 1.144; **B** water from various holy places तापसकुमारकः ... अनेकतीर्थाभिषेकपूतानाम् ... जटानां निकरेणोपेतः ... सिस्नासुरुपागमत् Kād. 36.15; यशसः शुद्धावनेकतीर्थशालिभूपरिक्रमो न हेतुः AlaṅkāMañ. 43.10 (13); **Ci** many descents into rivers राज्यं हि नाम ... अनेकतीर्थकल्पनयैव दुरवतारम् Kād. 297.12; **Cii** various ways or devices, Kād. 297.12; **D** many holy places or places of pilgrimages राजा ... विप्रं ददर्श ... अनेकतीर्थसेवाभिः कृतपुण्यकलेवरम् PadmP. iv. 17.58; महाराजः ... अनेकतीर्थविरजमात्मानं भव्यतां गतम्। कुर्वन्ययौ PadmP. iv. 20.6; iv. 20.9.

अनेकतीर्थयात्रा (aneka-tīrthayātrā) *f.* many pilgrimages अनेकतीर्थयात्रार्थं नराधीश नभस्तले। पल्यङ्केन यथाकामगामिना गम्यतेऽभितः CitraPaC. 465.

अनेकतीर्थागम (anekatīrthāgama) *m.* act of frequenting many holy places कालविशेषेऽनेकतीर्थागमः TristhaSe. 138.6.

अनेकतीर्थाटन (anekatīrthāṭana) *n.* act of wandering through or visiting many holy places or many pilgrimages अनेकतीर्थाटनवैभवेन समापतन्तीं सशरीरबन्धाम्। कांचित् तपःसिद्धिमिवैष कन्यामन्यां महीयानथ पर्यणैषीत् YātrāPra. 5.131.

अनेकतीव्रव्यसन (aneka-tīvravyasana) *n.* many severe calamities or distresses अनेकतीव्रव्यसनातुरेषु सत्त्वेषु बन्धुष्विव जातहार्दः। ... नासौ विसस्मार परार्थचर्याम् JātaMā. 100.16 (17.2)

अनेकतुरग (aneka-turaga) *m.* many horses द्वे अश्वे ... आस्तामत्यद्भुते याभ्यामनेकतुरगक्षये RājTa. (Ka.) 8.1016.

अनेकतुरंगसहस्र (aneka-turaṅgasahasra) *n.* many thousands of horses (चन्द्रापीडः) अनेकतुरंगसहस्रसंबाधम् ... शुकनासगृहद्वारमासाद्य ... तुरंगादवततार Kād. 94.20.

अनेकतुष (aneka-tuṣa) *adj.* having much chaff अनेकतुषकोद्रववितुषीकरणेनेव तण्डुलान् प्रस्तौति TaiUBh. 241.19 (*on* 2.2)

अनेकतूर्यस्वन (anekatūrya-svana) *n.* sound of many musical instruments अनेकतूर्यस्वनपूर्णकूजमानन्दनृत्तानयवृत्तभावम्। ... बभार रम्यां पुरमुत्सवश्रियम् JātaMā. 225.10 (32.1)

अनेकतेजोमयादित्य (aneka-tejomayāditya) *m.* many suns full of brilliance अनेकतेजोमयादित्यमण्डलवद् अनेकात्ममयमपि चिदादित्यमण्डलम् एकरसम् अविभक्तम् SāṁkhyaPraBh. 71.16 (*on* 1. 154)

अनेकतोद (aneka-toda) *adj.* giving much stinging pain प्रदुष्टवातः ...। सशूलमाध्मानमनेकतोदं महोदरं कृष्णशिरां करोति KalyāKā. 11.128.

अनेकतोपलम्भ (anekatopalambha) *m.* cognition of the state of being more than one पञ्चमस्त्वनुकूल एव। अनेकत्वाभिमते वस्तुन्येकताप्रतिक्षेपस्यानेकतोपलम्भोपष्टम्भकत्वात् ĀtmaTaVi. 559.11.

अनेकतोमुख (anekato-mukha) *adj.* having openings from more than one side नाडीयन्त्राणि सुषिराणि ... अनेकतोमुखान्येकतोमुखानि च AṣṭāSaṁ. i.168.10 (1.34)

अनेकतोरण (aneka-toraṇa) *adj.* having many arch-ways (सेनापतिः) अभिषेकमण्डपमनेकतोरणमङ्गवेदिकावासविभक्तकक्षान्तरं संनिकायं विरचय्य ... सेनाङ्गे देवस्य विज्ञापनीये इत्याचरत् YaśasCam. i.289.6.

अनेकत्य (aneka-tya) Gr. plural suffix, suffix indicative of plural number एकत्वात् स्त्रीत्वस्य अनेकत्योत्पत्तिश्च न स्यात् JaineVyā. 150.11 (*on* iii.1.3)

अनेकत्र (anekatra) *adv.* [AltGr. III. 582; III. 590] **Ai** in more than one place (स्वधर्मः) परिव्राजकस्य संयतेन्द्रियत्वमनारम्भः ... भैक्षमनेकत्र ArthŚā. i.30.6 (1.3); ii. 259.3 (7.4); क्वचिच्चैकोऽपि विग्रहवाननेकत्र युगपदङ्गभावं गच्छति यथा बहुभिर्नमस्कुर्वाणैरेको ब्राह्मणो युगपन्नमस्क्रियते BrahmSūBh. (Śaṅ.) 189.3 (*on* i.3.27); 321.14 (ii.1.18); यथैको विप्रो युगपदनेकत्र भोजयितुं न शक्यते स एव स्वस्थानस्थितो युगपदनेकैर्नमस्क्रियते। तथात्र स्वस्थानस्थितां देवतामुद्दिश्य स्वं स्वं द्रव्यमुत्सृजन्ति BrahmSūBh. (Bhā.) 61.19 (*on* i.3.27); एकं चक्षुरनेकत्र सा ViddhaŚā. 1.36(5); विग्रहादिमत्त्व एकस्यानेकत्र युगपत्सांनिध्यायोगात् कर्मणि विरोध इति चेत् न VedāntSā. (Rā.) 100.6 (*on* i.3.26); **Aii** in more than one entity या समानां बुद्धिं प्रसूते भिन्नेष्वधिकरणेषु यया बहूनीतरेतरतो न व्यावर्तन्ते, योऽर्थोऽनेकत्र प्रत्ययानुवृत्तिनिमित्तं तत् सामान्यम् NyāyBh. 156.9 (*on* ii.2.69); यत् सामान्यं संशयहेतुस्तदनेकत्र दृष्टं संशायकम् Upask. 122.12 (*on* ii. 2.18); एकत्रानेकधर्मप्रकारकसंशयवत् अनेकत्रैकधर्मप्रकारकोऽप्यस्ति संशयः सकलजनसिद्धः ŚivārkaMaDī. i. 106.4 (*on* i.1.2); i.115.3 (*on* i.1.2); **Aiii** in more than one case शङ्क्यते। यस्मिन्नेकमनेकत्र सोऽनेकविषयः स्मृतः SaraKaṇṭhā. 444.25; एकस्यानेकत्रानेकस्य चैकत्र क्रमेण वृत्तिः पर्यायः Kāvyānu. (He.) 338.13; पर्यायश्चेदनेकत्र स्यादेकस्य समन्वयः। पद्मं मुक्त्वा गता चन्द्रं कामिनीवदनोपमा Candrā. 5.93; क्रमेणैकमनेकत्रान्यथा वा पर्यायः AlaṅkāRa. 91; अनेकत्र प्रोक्तमप्युपासनं एकमेव चोदनाद्यविशेषात् VedāntPāSau. 298.18 (*on* iii.3.1); एकस्यानेकत्र प्राप्तावेकत्र यो भवेन्नियमः। ख्याता सा परिसंख्या Ekāva. 8.53 (307.14); 8.41 (293.4); विशेषः सोऽपि यद्येकं वस्त्वनेकत्र वर्ण्यते। अन्तर्बहिः पुरः पश्चात्सर्वदिक्ष्वपि सैव मे Kuval. 100; 'एकस्त्वं दानशीलोऽसि प्रत्यर्थिषु तथार्थिषु' इत्यादावपि दानशीलरूपैकान्वयाल्लक्षणप्रवृत्तिः, यथाकथंचिदनेकत्रैकान्वयस्य चमत्कारिणोऽपेक्षितत्वात् RasGaṅ. 426.5; **Bi** in many (senses or contexts) कथमनेकत्रार्थे वृत्तिः JaineVyā. 22.12 (*on* i.1.100); अनेकत्र ब्रह्मशब्दादिश्रवणकृतोऽपरः स शारीराद्यधिकरणे निवर्तनीयः। ... शिव एव ब्रह्मेति सिद्धवदनुवादः ŚivārkaMaDī. i.95.22 (*on* i.1.1); **Bii** at many times (births) परस्परमनेकत्र भवेऽन्योन्यवधः कृतः। श्रीकान्तवसुदत्ताभ्यां महावैरानुबन्धतः PadmP. (Ra.) 106.202; **Biii** in many cases, i.e. languages राजासनम्। तस्य चोत्तरतः संस्कृताः कवयो निविशेरन्। ... यस्त्वनेकत्र प्रवीणः स संक्रम्य तत्र तत्रोपविशेत् KāvyMī. 54.25; **Biv** in many cases, i.e. instances रशनायाः सत्यां गतौ अनेकत्र गुणभावो न युक्तः SaṅkarKāBh. 49.9 (*on* i.4.34); अनेकत्र योषितो रागाभासत्वम् RasāSu. 204.15 (2.263½); तुल्योऽनेकत्र दक्षिणः (नायकः) PratāYaBhū. 24.11.

अनेकत्रस्थ (anekatra-stha) *adj.* staying at more than one place ऋषयोऽनेकत्रस्थाः समीरवत् PariPar. 12.270.

अनेकत्रिदशविशेष (aneka-tridaśaviśeṣa) *m.* many distinguished gods अनेकत्रिदशविशेषनिर्मापितभूमिकासु सुकृतिचेतःप्रासादपरंपरासु कृतक्रीडाविहारम् ... अमरेश्वरम् ... आमनन्ति मनीषिणः YaśasCam. ii. 376.17.

अनेकत्रिदशसंयुत (anekatridaśa-saṁyuta) *adj.* accompanied by many gods अनेकत्रिदशसंयुतम्। ... अर्हतोऽजितदेवस्य धर्मचक्रमदृश्यत SamarāSaṁ. 3.49.

अनेकत्व (aneka-tva) *n.* **1A** the state of being many, plurality (द्विगोरेकवचनविधानम्) न वान्यस्यानेकत्वात् Vār.5 *on* P. ii.4.1; न वा वक्तव्यः। ... अन्यस्यानेकत्वात्। नैतद् द्विगोरनेकत्वम् MahāBh.i.472.22 (*on* ii.4.1); आत्मनोऽनेकत्वकर्तृत्वभोक्तृत्वादि ... उपादाय ... कर्माणि विहितानि ĪśopaBh. 5.9 (*on* 1); क्षीणकर्मणामनेकत्वात् बहुवचननिर्देशः ChāndoUBh. 303.6 (*on* v.10.6); न चेश्वराणामनेकत्वम् RājMār. 12.8; अनेकत्वं बहुत्वसंख्या Kiraṇā. 34.14; TarkSaṁ. (Ā.) 2.10; जगदुपादानत्वस्य च मूर्तत्वाचेतनत्वानेकत्वप्रेर्यत्वादिव्याप्तस्य विभौ चेतने एकस्मिन्नित्यस्वतन्त्रेऽनुपपत्तिः NyāyKu. 87.16; परमाणव एवालम्बनमिति चेन्न। तेषामनेकत्वादतीन्द्रियत्वाच्च TattvPrakā. 101 B.8 (*on* ii.2.22); 34 B.10 (*on* i.2.13); 207 A.1 (*on* iv.2.1); रूपरसादिव्यक्तीनामनेकत्वात् Upask. 54.7 (*on* i.2.3); चन्द्रादीनां संदेहधर्मिणामेवानेकत्वम् CitraMī. 62.11; अक्षपादस्य ... प्रमातॄणामनेकत्वनित्यत्वविभुत्वज्ञानादिगुणत्वकल्पना SarvaMaSaṁ. 26.12; MīmāKau. i.235.8 (*on* i.4.10); अनेकत्वं चोद्देश्यतावच्छेदकसमानाधिकरणभेदप्रतियोगित्वम् ŚaktiVā. 140.8; पीठानामनेकत्वेऽपि चतुर्णामेव प्राधान्यात्पार्थक्येन निर्देशः SetuBa. 19.25; AlaṅkāMañ. 203.11; यदा मेये द्रोणादीनां वृत्तिस्तदा तस्यानेकत्वेन परिमाणमात्रपरत्वे तदबोधेन च व्यभिचारात् LaŚabdeŚe. i. 429.9; **1B** the state of being more than one मनसः न चानेकत्वं, न ह्येकं ह्येककालमनेकेषु प्रवर्तते CaraS. i.8.5; एकत्वानेकत्वयोरनुपपत्तेस्तृतीयप्रकारासंभवाच्च वस्तुनो निःस्वभावत्वप्रसङ्गः BrahmSi. 48.3; एकावयव्यनुगता नैव तन्तुकरादयः। अनेकत्वाद्यथासिद्धाः कटकुट्यकुटादयः TattvSaṁ.

अनेकप्रहत (aneka-prahata) *adj.* struck, i.e. played by many उदपादि च ... अनेकप्रहतपटुपटहझल्लरीमृदङ्गवेणुवीणागीतनिनादानुगम्यमानः स्नानशङ्खानाम् ... ध्वनिः Kād. 16. 10; अनेकप्रहतातोद्यवेणुवीणालयानुगम्। पुरः संगीतमातेनुस्तयोर्विद्याधराङ्गनाः PāṇḍaC. 5. 164.

अनेकप्रहितदूत (anekaprahita-dūta) *m.* messenger(s) sent by various (kings) अनेकप्रहितदूतहस्तविन्यस्तवस्तुविरचितरङ्गार्चनम् (राजसदनम्) YaśasCam. i. 344. 7 (*but* comm. अनेके बहवः ... दूताः)

अनेकप्राकार (aneka-prākāra) *m.* several ramparts आः कुतोऽस्यानेकप्राकाररक्षकरक्षिते ... कन्यान्तःपुरे प्रवेशः NalaCam. 7. 35 (16)

अनेकप्राकारिक (aneka-prākārika) *adj.* having many ramparts अनेकप्राकारिकपुण्यक्षेत्रे प्रचलनशीलोऽपि दुःशीलः सुशीलनामा परमप्रियान् कश्चित्सदाशिवगणः ... पीडयति स्म ParamāKā. 153. 49 (16)

अनेकप्राणिन् (aneka-prāṇin) *m.* **A** various living beings or animals अनेकप्राणिकर्मफलोपभोगयोग्यानेकाधिष्ठानवल्लोकदेहनिर्माणेन लिङ्गेन ... आत्मा अवगम्यते AitUBh. 272. 14 (*on* 4. 0); सूना अनेकप्राणिप्राणवियोजनस्थानम् ManvaVi. 594. 22 (*on* 5. 13); **B** more than one animal एतेनैकपशुहिंसयानेकप्राणिनिस्तारात्ताद्दशदोषाभावः ManvaVi. 611. 27 (*on* 5. 39)

अनेकप्राणिरूप (anekaprāṇi-rūpa) *adj.* of the forms of various animals एते गणेशाः क्रीडन्ते ...। व्याघ्रेभवदनाः केचित् ... अनेकप्राणिरूपाश्च ज्वालास्याः MatsyaP. 154. 531.

अनेकप्राणिवध (anekaprāṇi-vadha) *n.* killing of more than one animal पश्चैकादशिन्यामप्येकेन पशुना सह विकल्पेनोपदिष्टायामनेकप्राणिवधे दोषोत्पत्तिः प्रसज्येत BālaKrī. ii. 110. 23 (*on* 3. 244 (? 250))

अनेकप्राणिशत (aneka-prāṇiśata) *n.* several hundreds of animals ते वेदविहितमनेकप्राणिशतवधारम्भभीषणं यज्ञविधिं सुवृष्टिहेतुं मन्यमानास्तस्मै संवर्णयामासुः JātaMā. 68. 13 (10.3(9))

अनेकप्राणिसंभवा (anekaprāṇi-sambhavā) *adj.* (*f.*) arising or originating from, i.e. pertaining to various animals तदा तस्मिन्महायज्ञे वाजिमेधे महायशाः। तथापि न गता हत्या ह्यनेकप्राणिसंभवा SkandP. v(2). 29. 18.

अनेकप्राणिहत्या (anekaprāṇi-hatyā) *f.* killing of various animals नरः शबरसंज्ञितः। नित्यं जन्तुवधोद्युक्तः ...। अनेकप्राणिहत्याकृत्परस्वनिरतः सदा PadmP. iv. 20. 47.

अनेकप्राण्युपघात (anekaprāṇy-upaghāta) *m.* destruction of various living beings प्रमादादुत्थितेऽग्नौ च दग्धमिति नाशः प्रकाश्यः। न तु स्वयमादीप्यः।

अनेकप्राण्युपघातदोषात् JayaMa. 326. 6 (*on* 6. 3)

अनेकप्राण्युपद्रव (anekapráņy-upadrava) *m.* harm or trouble to various living beings शूलप्रोतोऽपि गङ्गान्तः सूरिरेवमचिन्तयत्। अहो वपुर्ममानेकप्राण्युपद्रवकारणम् PariPar. 6. 166.

अनेकप्राण्युपभोग (anekapráņy-upabhoga) *m.* enjoyment for various living beings अग्नेः पृथिव्येव समित् पृथिव्या हि अयं लोकः अनेकप्राण्युपभोगसंपन्नया समिध्यते BṛĀraUBh. 772. 16 (*on* vi. 2. 11)

अनेकप्रातिपदिक (aneka-prātipadika) *n.* **A** more than one nominal stem एकैकप्रातिपदिकार्थनिरूपणमाकृत्यधिकरणे, अत्र त्वनेकप्रातिपदिकस्थसमानविभक्त्यर्थनिरूपणमिति भेदः ŚrutaPra. iB. 212. 18 (*on* i. 1. 13); **B** many nominal stems अनेकप्रातिपदिकस्थसमानविभक्तेर्विशेष्यैक्यपरत्वप्रतिपादकमरुणाधिकरणम् ŚrutaPra. iB. 214. 17 (*on* i. 1. 13)

अनेकप्रातिपदिकार्थ (anekaprātipadikārtha) *m.* meanings of many nominal stems शीतोष्णस्पर्शवन्तौ पयःपावकावित्यादौ त्वद्रीत्या संसर्गाप्रतिपादकेऽनेकप्रातिपदिकार्थमात्रपरेऽतिव्याप्तिः Nyāyāmṛ. 434A. 10; AdvaiSi. 662. 11.

अनेकप्राप्ति (aneka-prāpti) *f.* **1A** possibility of more than one (word) अनेकप्राप्तावेकस्य नियमोऽनियमः शेषेषु Vār. 2 *on* P. ii. 2. 34; KāśiVr. *on* ii. 2. 32; PrakriKau. i. 624. 1; **1B** contingency of more than one option एकस्यानेक-प्राप्तावेकत्र नियमनं परिसंख्या AlaṅkāSa. 153. 5; **2** obtainment of different (worlds) पाशुपतानां रुद्रलोकप्राप्तिः ... गाणपत्यानां तल्लोकप्राप्तिः, एवमनेकप्राप्तिरिति कृत्वा भेदस्यैव पारमार्थिकत्वं संभवति ŚaṅkaVi. (Ā.) 252.3.

अनेकप्राश्निकादिसमाज (anekapraśnikādi - samāja) *m.* assembly of many judges etc. अनेकप्राश्निकादिसमाजे कथितमवश्यं केनाप्यवगम्यते NyāyMañ. ii. 199. 4.

अनेकप्रियनखपद (aneka-priyanakhapada) *n.* many nail-marks of a lover यत्रानेकप्रियनखपदव्याजतो वारवामाः ...शशधरकलाचिह्नमङ्गे वहन्ति PavaDū. (Dh.) 29.

अनेकप्रिया (aneka-priyā) *adj. (f.)* (unchaste woman) loved by many उष्णाहाररतातितीव्रसुरतानेकप्रिया श्यामला। ... सा हस्तिनीति श्रुता ŚṛṅgāDī.2.6.

अनेकप्रेयसी (aneka-preyasī) *f.* beloved of more than one एक एव पतिर्लोके योषितामुपगीयते। अनेकप्रेयसीयं तु बन्धक्येव न संशयः PāṇḍaC. 6. 984.

अनेकफण (aneka-phaṇa) *adj.* having many hoods (तालद्रुमैः) प्रतिबिम्बितैश्च अनेकफणैर्भुजंगमैरिव भ्राजमानम् ... तडागमद्राक्षीत् (राजा) UdaySuKa. 129. 23.

अनेकफल (aneka-phala) *adj.* **A** having many fruits, i.e. results सर्वत्रगैरनुशयैः सहभुवो येऽप्यन्ये धर्मास्तेऽपि सर्वत्रगाः प्राप्तयस्तु नैवम्। अनेकफलत्वात् AbhidhKoBh. 287. 21 (*on* 5.13); **B** yielding various fruits i.e. results 'ओमित्येतदक्षरम्' इत्यादिना सामावयवविषयमुपासनमनेकफलमुपदिष्टम् ChāndoUBh. 83. 2 (*on* ii. 1. 0); **Ci** having more than one fruit, i.e. result नोपासनस्य निःश्रेयससाधनत्वमिति। नैतदेवम्, सकृत्प्रयुक्तस्यैकस्यैवानेकफलत्वोपपत्तेः NītiMā. 67. 1; **Cii** conveying more than one fruit, i.e. result प्रथमं संबन्धस्तेनैव विधेर्नैराकाङ्क्ष्यान्नानेकफलत्वकल्पना MayūMāli. 382. 21 (*on* iv. 3. 6)

अनेकफल (aneka-phala) *n.* **1Ai** many fruits, i.e. results (मन्त्रम्) अनेकदीप्तनयनमनेकफलभूषितम् ... अनेकमन्त्रकोटीभिस्संस्मरेत्सेवितं सदा JayāS. 21. 231; **1Aii** more than one fruit, i.e. result 'ऋद्धिकामास्सत्रमासीरन्' इत्यादौ ... एकसत्रप्रयोगादनेकफलनिष्पत्तौ ... एकमेव फलं सर्वैरवयवशो भुज्यते BhāṭṭDī. ii. 238. 4 (*on* vi. 2. 1); **1B** many fruits नास्ति मम शुद्धिर्महेश्वर। अनेकफलभक्तत्वाद्वानरस्तु शुचिः कथम् PadmP. iv. 110. 222; **2A** various fruits पूर्वेण मन्दरमनेकफलावलीभिर्युक्तं यवैः कनकमद्रकदम्बचिह्नैः। ... आकारयेत् MatsyaP. 83. 20; **2Bi** various fruits, i.e. advantages or profits आत्मनीनमुपतिष्ठते गुणाः संभवन्ति विरमन्ति चापदः। इत्यनेकफलभाजि मा स्म भूदर्थिता कथमिवार्यसंगमे Kirātā. 13. 69 (comm. नानाफलोत्पादके); **2Bii** various fruits, i.e. results कर्मन्। ... त्वं नित्यनैमित्तिककाम्यभेदात् स्थित्वा त्रिधानेकफलानि दत्से Jīvān. 296. 2; **2C** various objectives or purposes पुरमुच्यते शरीरम् ... इन्द्रियमनोबुद्धिविषयैः अनेकफलविज्ञानस्य उत्पादकैः पौरैरिव अधिष्ठितम् GītāBh. (Śaṅ.) 164. 16 (*on* 5. 13)

अनेकफलकुसुमसमृद्ध (anekaphalakusuma-samṛddha) *adj.* rich in various fruits and flowers हरिवाहनः ... सांप्रतमस्यैव दिव्यकाननस्यानेकफलकुसुमसमृद्धमुत्तरं भूभागमध्यास्ते TilaMañ. 225. 19;

अनेकफलजनक (anekaphala-janaka) *adj.* which produces various fruits, i.e. results न च काम्ययोस्तन्त्रानुष्ठानादनेकफलजनकत्वे योगसिद्धिन्यायनिरोधः TristhaSe. 20. 19.

अनेकफलजनन (anekaphala-janana) *n.* production of various fruits, i.e. results राजसूयाधिकारविधिना स्वाराज्यफलकत्वावगमेऽपि ... योगसिध्य(?द्ध्य)धिकरणन्यायेन अनेकफलजननायोगात् ... अनुष्ठानं वेदितव्यम् MīmāKau. ii. 20. 2 (*on* ii. 3. 3)

अनेकफलतात्पर्यक (anekaphalatātparya-ka) *adj.* intended to convey various fruits, i.e. results सर्वेष्वेव वाक्येषु विषयभेदेन विषयैक्येन वा क्रमेण यौगपद्येन वा अनेकफलतात्पर्यकत्वेऽपि क्वचित्केनचिद्व्यवहारो मूले नानुपपन्नः MīmāKau. iii (1). 91. 3 (*on* i. 2. 44)

अनेकफलदायक (anekaphala-dāyaka) *adj.* bestowing various fruits, i.e. results (शूलः) ददर्श तत्र तल्लिङ्गमनेकफलदायकम् SkandP. v(2). 51. 27.

अनेकफलपुष्पाढ्य (anekaphalapuṣpāḍhya) *adj.* full of, i.e. rich in various fruits and flowers हरोऽपश्यत् ...। अनेकफलपुष्पाढ्यं कामकाननम् GaṇeP. i. 84. 6.

अनेकफलमूलिनी (aneka-phalamūlinī) *adj. (f.)* possessing various fruits and roots वसिष्ठः ... जीवयामास वै प्रजाः। अनेकफलमूलिन्यः (F. N.॰नीः) औषधीश्च प्रवर्तयन् BrahmāṇḍP. ii. 8. 90.

अनेकफलविषयक (anekaphalaviṣaya-ka) *adj.* referring to various fruits, i.e. results न चानेकफलविषयकसमूहालम्बनात्मककामनावतः सर्वप्रयोगेष्वधिकारात् तेन कः प्रयोगः प्रथमतोऽनुष्ठेय इत्यत्र विनिगमनाविरह इति वाच्यम् LalitāSaBh. 201. 21 (*on* 237)

अनेकफलसंकर (anekaphala-saṅkara) *m.* intermixture or cross-connection of more than one fruit, i.e. result न ह्येकस्य वाक्यस्य प्रातिनियमपरिसंख्यास्वेकमेव फलमिति नियमः, अनेकफलसंकरस्य तत्र तत्र वाक्ये बहुशः प्रागुदाहृतत्वात् VidhiRa. 37 (191. 13)

अनेकफलसाधन (anekaphala-sādhana) *n.* means of various fruits, i.e. results अनेकफलसाधनानि च वैदिकानि कर्माणि ... बहुफलानि कृष्यादिवत् BṛĀraUBh. 677.9 (*on* iv. 5. 15); अनेकफलसाधनस्यापि ज्योतिष्टोमादेरभिसंधिविशेषेण फलं प्रति नियमस्य सर्वैरभ्युपगन्तव्यत्वात् ŚatDū. 64. 10.

अनेकफलसिद्धि (anekaphala-siddhi) *f.* accomplishment of more than one fruit, i.e. result प्रयोगविधिना प्रत्येकफलोद्देशेन प्रयोगविधानान्नैकस्मिन्प्रयोगेऽनेकफलसिद्धिः MayūMāli. 386. 23 (*on* iv. 3. 11)

अनेकफलहेतुत्व (anekaphalahetu-tva) *m.* the state of being the means of various fruits, i.e. results (सृङ्कां चेमामनेकरूपां गृहाण) गतिं कर्ममयीं गृहाण। अन्यदपि कर्मविज्ञानमनेकफलहेतुत्वात्स्वीकुरु KāṭhUBh. 111.14 (*on* 1. 16)

अनेकफलार्थिन् (anekaphalārth-in) *adj.* (used as noun) (one) desirous of various fruits, i.e. results येषु तूपासनेषु भिन्नानि भिन्नानि फलान्युच्यन्ते तत्र त्वनेकफलार्थिनस्तत्तत्फलकोपासनानि समुच्चीयेरन् AṇuBh. 266. 1 (*on* iii. 3. 60)

अनेकफलोत्पत्ति (anekaphalotpatti) *f.* origination of various fruits, i.e. results न च काम्यदर्शादिः सकृत्प्रयोगादेव स्वर्गादिफलपापक्षयादिहानेकफलोत्पत्तिरस्तु इति वाच्यम् MayūMāli. 386. 24 (*on* iv. 3. 11)

अनेकफेन (aneka-phena) *adj.* having much foam कमलिनीपलाशमनेकफेनहिरण्मणिहरितमम्बरतलमाचेमे AvantiKa. 68. 23.

अनेकबन्ध (aneka-bandha) *adj.* having various bonds, i.e. means or weapons ज्वलत्यमुष्मिन्कुपिते महीपतावनेकबन्धानि विभावसाविव। प्रिये जनानां ननृतू रणे तथा वने कबन्धानि विभावसाविव RāghPāṇ. (Dha.) 6.33 (comm. नानाविधकरणानि)

अनेकबलवर्ग (aneka-balavarga) *adj.* possessed of various regiments of army राजा ... बाह्यकोपशङ्कायां वा पुत्रदारमेषामभ्यन्तरावग्रहं कृत्वा शून्यपालमनेकबलवर्गमनेकमुख्यं च स्थापयित्वा यायात् ArthŚā. iii. 61. 1 (9. 3) (comm. मौलभृतादिनानाजातीयसैन्यवर्गयुक्तम्)

अनेकबलसंघात (aneka-balasaṅghāta) *m.* many aggregates, i.e. regiments of army सेनापतिषु यं कंचिदग्रे प्रस्थापयाधुना। अनेकबलसंघातसहितं घोरदर्शनम् BrahmāṇḍP. iii. 21. 98.

अनेकबलसमावेश (anekabala-samāveśa) *m.* incorporation of many (figures of) regiments दृष्टश्च चित्रादावनेकबलसमावेशः NyāyMañ. ii. 112. 23.

अनेकबहुलोहविशेषक (aneka-bahulohaviśeṣaka) *m., n.* much quantity of special kind of metal which is variously used सिंहासनम् ...। रत्नैरनेकबहुलोहविशेषकैश्च कुर्यान्मनोहरतरम् MānaSā. 47. 16.

अनेकबाणनिर्भिन्न (anekabāṇa-nirbhinna) *adj.* pierced with many arrows (लवः) अनेकबाणनिर्भिन्नस्रवद्रक्तकलेवरः। शुशुभे रणमध्यस्थः किंशुकश्चेव पुष्पितः PadmP. iv. 62. 25.

अनेकबाणव्यथित (anekabāṇa-vyathita) *adj.* pained or troubled by

many arrows अनेकबाणव्यथितः सुग्रीवः समराङ्गणे। जग्राह पर्वतं घोरम् PadmP. iv. 64. 25.

अनेकबाणसंविग्न (anekabāṇa-saṁvigna) *adj.* terrified by many arrows अनेकबाणसंविग्नान् कुर्वन् वीरान् सहस्रशः। ... ययौ रुक्माङ्गदो बली PadmP. iv. 41.6.

अनेकबाणसाहस्र (aneka-bāṇasāhasra) *n.* many thousands of arrows अनेकबाणसाहस्रैर्निजघान नृपं बली PadmP. iv. 52. 39.

अनेकबाध (aneka-bādha) *m.* **A** contradiction to more than one, i.e. both (the views) ननूभयत्रापि निषेधः प्रवर्ततां, न, अनेकबाधस्यान्याय्यत्वात्। तस्मात् मघाश्राद्धमपि सपिण्डमाचरणीयम् CaturCin. iii (2). 563. 14; **B** contradiction to many (statements) उक्तं नारायणाधिष्ठितमिति च तमोऽनेकबाधोऽन्यथा स्यात् TattvMu. 3. 6 (comm. अनभ्युपगमे बहुश्रुतिस्मृतीतिहासादिबाधः स्यात्)

अनेकबान्धव (aneka-bāndhava) *m.* many relatives, i.e. forefathers आप्यायिता वत्स तेन चानेकबान्धवाः। श्राद्धं कर्तुमशक्तिश्चेच्छाकैरपि हि जायते SkandP. iii (2). 7. 96.

अनेकबालक्रीडा (aneka-bālakrīḍā) *f.* **A** various sports of children हरिवंशकथेवानेकबालक्रीडारमणीया ... उज्जयिनी नाम नगरी Kād. 52. 7; रामकृष्णौ व्यवर्धेतां गोकुले बालकौ तदा। अनेकबालक्रीडाभिश्चिक्रीडतुररिंदमौ SkandP. iii (1). 27. 66; **B** (description of) various juvenile sports (of Kṛṣṇa), Kād. 52. 7.

अनेकबालचरितचापल (aneka-bālacaritacāpala) *n.* various follies or rash acts of youth अतिदक्षिणः खलु देवो हर्षो यदेवमनेकबालचरितचापलोपचित-कौलीनकोपितोऽपि मनसा स्निह्यत्येव मयि HarṣaC. 126. 11.

अनेकबाहु (aneka-bāhu) *adj.* having many arms अपश्यत्पुरुषं योगयुक्तं पीताम्बरं लुब्धकोऽनेकबाहुम् MahāBhā. xvi. 5. 20; दुष्टौ ... युद्धाभिलाषिणौ। ततो मायात्मकेनैव वपुषानेकबाहुना। ... योधितौ तौ तदा मया JayāS. 2. 69.

अनेकबाहूदरवक्त्रनेत्र (aneka-bāhūdaravaktranetra) *adj.* having many arms, bellies, mouths and eyes अनेकबाहूदरवक्त्रनेत्रं पश्यामि त्वा सर्वतोऽनन्तरूपम् MahāBhā. vi. 33. 16=BhagGī. 11. 16; GītāBh. (Śaṅ.) 308. 18 (*on* 11. 16); अनेकबाहूदरवक्र(?क्त्र)नेत्रः ...। उवाच ... सुरेशः VarāP. 10. 5.

अनेकबाहूरुधर (anekabāhūru-dhara) *adj.* possessing more than one arm and thigh अनेकबाहूरुधरं नैकवक्त्रम् ...। प्रपश्याम्यहमीशानं सुप्तमेकार्णवे प्रभुम् SkandP. v (3). 19. 26.

अनेकबिन्दुसमाहार (anekabindu-samāhāra) *m.* collection of many drops (of water) यत् स्थूलं तदवयवोपचयपूर्वकं यथानेकबिन्दुसमाहाररूपो जलसंघातः PramāVāBh. 41. 19.

अनेकबीज (aneka-bīja) *adj.* having many seeds बहुबीजमबीजं च विकारि च विवर्जयेत्। (शाकम्) बहुबीजमित्यनेकबीजम् NirṇaSi. 82. 17.

अनेकबीज (aneka-bīja) *n.* various seeds or grains मृण्मयेष्वथवा वैणवेषु पात्रेषु पूरयेत्। अनेकबीजसंयुक्तं तोयं पुष्पोपशोभितम् NāraS. 23. 4; VīraMi. (Saṁskāra.) 264. 9.

अनेकबुद्धि (aneka-buddhi) *f.* cognition of more than one एकानेकबुद्धी भिन्नविषये विशेषवत्त्वाद्रूपादिविषयबुद्धिवत् NyāyVār. 243. 8 (*on* ii. 1. 33); कथमेकस्मिन्नात्मन्यनेकबुद्धिः DīpKa. 88. 2 (*on* 3. 144)

अनेकबुद्धिविषयता (anekabuddiviṣaya-tā) *f.* the state of being what is the object of cognition of more than one (person) अत्रापि चतुर्विधस्थूलशरीरं एकानेकबुद्धिविषयतया वनवज्जलाशयवद्वा समष्टिः वृक्षवज्जलवद्वा व्यष्टिरपि भवति VedāntSā. (Sa.) 15. 17.

अनेकबुद्धिव्यतिक्रम (anekabuddhi-vyatikrama) *m.* violation, i.e. disappearance of the cognition of more than one एकवर्णग्रहणकाले चानेकबुद्धिव्यति-क्रमात् क्षणिकत्वाद् बुद्धीनां क्षणस्यैकपरमाणुव्यतिक्रमकालत्वात् PramāVāSvopVṛ. 80. 2.

अनेकबुद्ध्यादिमयत्व (anekabuddhyādimaya-tva) *n.* the state of being made of more than one intellect etc. शास्त्रम् ... ब्रह्मण एवाविकृतस्य सतोऽस्यैकस्यानेकबुद्ध्यादिमयत्वं दर्शयति BrahmSūBh. (Śaṅ.) 449. 11 (*on* ii. 3. 17)

अनेकबोधविषयत्व (anekabodhaviṣaya-tva) *n.* the state of referring to more than one congnition सत्यपि कर्मत्वैक्ये तद्बोधैक्ये वा कर्मत्वपर्याप्त्यधि-करणानामनेकबोधविषयत्वेन तद्भङ्गावश्यंभावात् MīmāKau. ii. 181. 8 (*on* iii. 1. 14)

अनेकब्रह्माण्डकोटिघटना (anekabrahmāṇḍakoṭi-ghaṭanā) *f.* creation of many crores of universes यस्य ... गुणाः ... अनेकब्रह्माण्डकोटिघटनामभ्य-र्थयमाना इव भगवतो विश्वसृजः ... कर्णलग्नाः स्वर्गलोकमधिवसन्ति स्म NalaCam. 1. 33 (18)

अनेकब्रह्माण्डनायक (anekabrahmāṇḍa-nāyaka) *m.* leader of many universes सर्वव्यापी पूर्णकामोऽनेकब्रह्माण्डनायकः। ... त्वम् GaṇeP. ii. 8. 34.

अनेकब्रह्माण्डहेतु (anekabrahmāṇḍa-hetu) *m.* cause of many universes त्वम् ... अनेकब्रह्माण्डहेतुः परमप्रकाशः GaṇeP. ii. 48. 11.

अनेकब्राह्मणजनसहस्र (aneka-brāhmaṇajanasahasra) *n.* many thousands of Brahmin-folks अयं खलु तावत् संवेशनोत्थापनयोरनेकब्राह्मणजन-सहस्रप्रयुक्तपुण्याहशब्दरवो रघुः Prati. 3. 7 (6)

अनेकब्राह्मणनिमन्त्रण (anekabrāhmaṇa-nimantraṇa) *n.* invitation to more than one Brahmin पित्रादीनां त्रयाणामेकैकस्यानेकब्राह्मणनिमन्त्रणेऽपि त्रीण्ये-वार्घ्यपात्राणि न तु ब्राह्मणसंख्यया BālamBha. i. 514. 31 (*on* 1. 234-235)

अनेकब्राह्मणवत् (anekabrāhmaṇa-va(n)t) *adj.* having, i.e. inhabited by many Brahmins सत्स्वप्यन्येषु ब्राह्मणवत्सु ग्रामेषु योऽनेकब्राह्मणवान् सोऽभिधीयते ब्राह्मणवानिति SaṅkarKāBh. 109. 18 (*on* ii. 4. 30)

अनेकब्राह्मणवध (anekabrāhmaṇa-vadha) *m.* killing of many Brahmins युगपत्कामतो वाकामतो वानेकब्राह्मणवधे विशेष उक्तो भविष्यत्पुराणे Aparā. 1056. 25 (*on* 3. 243); BālamBha. iii. 144. 1 (*on* 3. 252)

अनेकब्राह्मणहनन (anekabrāhmaṇa-hanana) *n.* killing of many Brahmins गृहदाहादिना युगपदनेकब्राह्मणहनने तु भविष्यपुराणीयो विशेषः ManvaMu. 468. 4 (*on* 11. 86)

अनेकब्राह्मणाद्यलाभ (anekabrāhmaṇādy-alābha) *m.* non-availability of more the one Brahmin etc. भोजयेदथवाप्येकं ब्राह्मणं पङ्क्तिपावनम्। इति तदेतदनेकब्राह्मणाद्यलाभविषयम् SmṛtiCan. v. 194. 13.

अनेकब्राह्मणाधिष्ठान (anekabrāhmaṇādhiṣṭhāna) *adj.* existing or present in many Brahmins सकृदावाहनेनैवानेकब्राह्मणाधिष्ठानदेवताध्याससंभवात् SmṛtiCan. v. 289. 17.

अनेकब्राह्मणाधिष्ठान (anekabrāhmaṇādhiṣṭhāna) *n.* location, i.e. presence of many Brahmins सकृदावाहनेनैवानेकब्राह्मणाधिष्ठाने देवताध्याससंभवात् VīraMi. (Śrāddha.) 204. 2.

अनेकभक्तजन (aneka-bhaktajana) *m.* several devoted people तत्सेवार्थं ब्राह्मणादीन् अनेकभक्तजनान् संपाद्य ... परमगुरुः सुखमास ŚaṅkaVi. (Ā.) 251. 12.

अनेकभक्ताभयद (anekabhaktābhaya-da) *adj.* bestowing security or protection to many devotees नमामि ते नाथ करारविन्दम् ...। अनेकभक्ताभयदम् GaṇeP. ii. 53. 30.

अनेकभक्ति (aneka-bhakti) *f.* various decorations (राक्षसाधिपः) सर्वर्तुकुसुमव्याप्तराजमार्गविराजिताम्। अनेकभक्तिभिः पञ्चवर्णैश्चूर्णैरलंकृताम्।... प्रविष्टः ... लङ्काम् PadmP. (Ra.) 12. 367; कन्दुकमनेकभक्त्या चित्रं कालैश्च सान्तरं दृग्भिः (बहुभिः)। ... दृष्ट्वाध्वनि योजयेदस्याः KandaCū. iii. 3. 7 (Add. 12)

अनेकभक्तिका (aneka-bhaktikā) *f.* various decorations वंशादिशिखरे रम्ये ... । सर्जिता परमा भूमिः ...। दशार्धवर्णरजसा कल्पितानेकभक्तिका PadmP. (Ra.) 40. 7.

अनेकभक्तिचित्र (anekabhakti-citra) *adj.* possessing pictures with various decorations कन्दुकमनेकभक्तिचित्रम् ... संदर्शयेत् KāmSū. 210. 14 (3. 3)

अनेकभगण (aneka-bhagaṇa) *m.* many groups of stars or asterisms दृढकुदिनानां चक्रविकलाधिकत्वे तु स एव विकलात्मको ग्रहः अनेकभगणशेष-विकलावशेषाभ्यामपि संभवति SiddhāTaVi. (ŚeṣaVā.) 48. 23.

अनेकभङ्ग (aneka-bhaṅga) *m.* **1** various bends राजा ... कामिनीकुचकुम्भ-भित्तिष्वनेकभङ्गकुटिलाः पत्राङ्गुलीरकल्पयत् TilaMañ. 18. 3; **2** many waves संसार इवातिदूरपारेऽस्मिन्महाकान्तारे सारभूतं धर्मतत्त्वमिवानेकभङ्गगम्भीरं सरो दृष्टम् TilaMañ. 220. 2; **3** various views, TilaMañ. 220. 2.

अनेकभङ्गरचित (anekabhaṅga-racita) *adj.* constructed with various bends (भूमिपतिः) अनेकभङ्गरचितरङ्गावलीतरङ्गितमसृणमणिकुट्टिमोत्सङ्गम् ... आस्थानमण्डप-मगच्छत् TilaMañ. 70. 10.

अनेकभङ्गिन् (aneka-bhaṅgin) *adj.* **1** having various circumlocutory or round-about ways (of speaking) अनेकभङ्गिभिः ... क्षुद्रप्रव्रजिताभिरभिलषित-वस्त्वनुगुणैर्वचोभिराश्वास्यमानपरिजनम् ... राजकुलमव्रजत् (पार्थिवः) TilaMañ. 64. 5; **2** having various models or types तालैः शिञ्जद्वलयसुभगैर्नर्तितः कान्तया मे ... नीलकण्ठः ... अत्र तालैरिति बहुवचनमनेकभङ्गिवैदग्ध्यं ख्यापयद् विप्रलम्भमुद्दीपयति Kāvyānu. (He.) 65. 4.

अनेकभङ्गिविकारपूर्णा (anekabhaṅgivikāra-pūrṇā) *adj.* (*f.*) full of various outbursts of feelings अनेकभङ्गिविकारपूर्णे दुःखमकारणायासितहृदया जीवसि Kād. 85. 2.

अनेकभजन (aneka-bhajana) *n.* worship of or devotion to many (deities) असम्यक्त्वं तु मन्त्राणाम् ... अज्ञानादनेकभजनादपि TantrRā. 35. 72.

अनेकभटपाणितल (anekabhaṭa-pāṇitala) *n.* palms of many warriors or soldiers असियष्टिष्वनेकभटपाणितलस्थितासु। ... कालमुसलः ...। वाक्यं निरर्गलमुदाहरत् HarVi. 8. 2.

अनेकभटरक्षित (anekabhaṭa-rakṣita) *adj.* guarded by many warriors or soldiers पण्डितः। गोपुरं च समासीददनेकभटरक्षितम् PadmP. (Ra.) 33. 191.

अनेकभटश्रेणि (aneka-bhaṭaśreṇi) *f.* many series of warriors or soldiers ते ... अनेकभटश्रेणिविसंकटम्। ... पाण्डवेयानां स्कन्धावारमुपागमन् PāṇḍaC. 13. 969.

अनेकभटसंघात (anekabhaṭa-saṅghāta) *m.* group of many warriors or soldiers धीसखः ... प्रभुं नत्वा ...। प्रादात् ...। चञ्चच्चतुरकांश्चापि स्वर्विमानोपमद्युतीन्। अनेकभटसंघातसंकीर्णीकृतपर्वतान् PrabhāC. 204. 9.

अनेकभटसाहस्र (aneka-bhaṭasāhasra) *n.* many thousands of warriors or soldiers हयो गतो हेमकूटम् ...। अनेकभटसाहस्रै रक्षितो बद्धचामरः PadmP. iv. 47. 1.

अनेकभटोद्भट (anekabhaṭodbhaṭa) *adj.* excellent due to number of warriors or soldiers तदनेकभटोद्भटं बलं क्षुभितस्याप लिपिं पयोनिधेः VikraDeC.15.8.

अनेकभद्रास्पद (anekabhadrāspada) *n.* abode of many auspicious things, i.e. successes अनेकभद्रास्पदमेष जातः शुभालयस्तत्क्षणसिद्धसाध्यः VīraBhā.5.134.

अनेकभयकारक (anekabhaya-kāraka) *adj.* causing various types of fear वैधव्यदायकं स्त्रीणामनेकभयकारकम्। कार्यमुत्तरयाम्याभ्यां शालाभ्यां भयदं नृणाम् MatsyaP. 254. 13.

अनेकभयद (anekabhaya-da) *adj.* causing various types of fear मानहीनादिकं कुण्डमनेकभयदं भवेत्। यस्मात्तस्मात्सुसंपूर्णं शान्तिकुण्डं विधीयते MatsyaP. 93. 91; BhaviP. 817B. 7 (iv. 141. 92)

अनेकभयदायक (anekabhaya-dāyaka) *adj.* causing various types of fear वैधव्यदायकं स्त्रीणामनेकभयकारकम् (v.l. °दायकम्)। कार्यमुत्तरयाम्याभ्यां शालाभ्यां भयदं नृणाम् MatsyaP. 254. 13.

अनेकभवनप्रकार (anekabhavana-prakāra) *m.* manner of becoming more than one एकमेव कथमनेकं भवतीति यत्तूक्तं तत्र प्रश्ने एकस्यानेकभवनप्रकार उच्यते Bhāsk. ii. 37. 16 (*on* ii. 2. 2)

अनेकभवपरंपरा (anekabhava-paramparā) *f.* succession of many births or (worldly) existences अनेकभवपरंपरालक्षणेन दीर्घकालेन भाव्यमानस्य संकल्पारूढत्वं संभाव्यते TarkBhā. (Mo.) 34. 11.

अनेकभवपूर्विका (anekabhava-pūrvikā) *adj. (f.)* preceded by, i.e. connected with more than one birth इदं चित्तं विचित्रीकृतमिव सर्वतो मत्स्यजालं ग्रन्थिभिरिवाततमित्येता अनेकभवपूर्विका वासनाः YogBh. 71. 3 (*on* 2. 13)

अनेकभवप्राप्ति (anekabhava-prāpti) *f.* attainment in many births तेनानेकभवप्राप्तिसंबन्धेनास्य भूपतेः। बभूव परमप्रीतिर्मथुरां प्रति पार्थिव PadmP. (Ra.) 91. 44.

अनेकभवसंचित (anekabhava-sañcita) *adj.* [*f.* - ā] accumulated through many births अनेकभवसंचिता इह हि कर्मणा निर्मिताः। प्रियाप्रियवियोगसंयोगसंगमविपत्तिसंपत्तयः SubhāRaSaṁ. 255; पुराणश्रवणादेव अनेकभवसंचितम्। पापं प्रशममायाति SkandP. vi. 279. 19; vii (4). 44. 20.

अनेकभवसंभूत (anekabhava-sambhūta) *adj.* arisen or accumulated through many births अनेकभवसंभूतकर्मपङ्काङ्कितो बुधैः। आत्मा सद्वासनातोयैः प्रक्षाल्यो नियतेन्द्रियैः MārkP. 95. 12; अनेकभवसंभूतात्कल्मषादखिलादपि। मुच्यतेऽसौ न संदेहो यद्यपि ब्रह्मघातकः SkandP. i(2). 42. 17; iv. 33. 108.

अनेकभवसाध्य (anekabhava-sādhya) *adj.* to be accomplished or attained during many births अनेकभवसाध्यस्य समाधेर्न क्षतिरस्तीत्याश्वासोत्पादनाय ... आह RājMār. 65. 9.

अनेकभवानुग (anekabhavānuga) *adj.* continuing for many births जन्तूनां मोहिनां तेषां यदनेकभवानुगम्। दुःखं संजायते कस्तद्वक्तुं शक्नोति PadmP.(Ra.) 17.182.

अनेकभवोत्पन्न (anekabhavotpanna) *adj.* originated, i.e. committed through many births संदृष्टो भार्गवश्चायं साक्षाद्विष्णुस्वरूपधृक्। तेनानेकभवोत्पन्नं पातकं नाशमागतम् BrahmāṇḍP. ii. 35. 33.

अनेकभागत्व (anekabhāga-tva) *n.* the state of having many parts, i.e. divisions (साम्नः) न चैवमपि सौभरस्यानेकभागत्वान्निधनस्यैवाश्रयत्वे प्रमाणाभावः MīmāKau. iii (2). 295. 9 (*on* ii. 2. 27)

अनेकभागात्मक (anekabhāgātma-ka) *adj.* **A** of the nature of many parts, i.e. aspects 'मन्दं मन्दं नुदति पवनः' ... अनेकभागात्मकस्य नुदेर्यदा सर्वे भागा मन्दत्वेन व्याप्तुमिष्टा भवन्ति तदा वीप्सा KāvyālaṅSū. v. 2. 87; **B** of the form of more than one part एकमेव सदनेकभागात्मकमव्यक्ताख्यमुपादानमिति चेन्न, विकल्पासहत्वात् NyāySiA. 190. 16.

अनेकभाज् (aneka-bhāj) *adj.* pertaining or leading to many (objects) दोषः साधारणः प्रातिस्विकोऽर्थस्य स तु द्विधा। अनेकभागुपालम्भः साधारण इति स्मृतः AgniP. 346. 13.

अनेकभाजनगत (anekabhājana-gata) *adj.* pertaining to, i.e. kept in more than one vessel यदनेकवृत्ति तदनेकं यथानेकभाजनगततालफलानि NyāyKa. 43. 5.

अनेकभारद्वाजम् (anekabhāradvājam) *adv.* [SiddhaHe. iii. 2. 5] among many Bhāradvājas सुगूर्जरं हेतुरनेकभारद्वाजं वरो गीतगुणस्त्रिगङ्गम्। ... स्वरीशितुः पुत्र इवैष रेजे DvyāśraKā. 6. 7(comm. भारद्वाजा हि ... धर्मगुरवः ...। तेषु धर्मगुरुषु ... श्रेष्ठः)

अनेकभार्य (aneka-bhārya) *adj.* (used as noun) **A** (one) having many wives अनेकभार्यं प्रत्याह Mitā. 29. 27 (*on* 1. 88); सर्वाधाने वानेकभार्यस्य पूर्वं ज्येष्ठामरणे तत्राग्नीनुत्सृज्य पुनर्द्वितीयया सहाधानम् SmṛtiCan. ii. 443. 11; अनेकभार्यस्यर्तुयौगपद्ये ... कश्यपः NirṇaSi. 175. 4; **B** (one) who has more than one wife अनेकभार्यस्यैकभार्यस्य च साधारण्येन दोष उक्तः BālamBha. i. 265. 21 (*on* 1. 89)

अनेकभार्या (aneka-bhāryā) *f.* many wives यच्चाहुः - 'अपरित्यागोऽत्राव्यभिचारः इतरथा स्त्रीवत्पुरुषस्यानेका(?क)भार्यापरिणयनं न स्यात्' तदयुक्तम् ManuBh. ii. 271. 18 (*on* 9. 101)

अनेकभाव (aneka-bhāva) *m.* **1A** existence or presence of many (hymns) अन्त्ये निविदं दध्यादनेकभावे सूक्तानाम् ĀśvaŚS. II. i. 11. 26; **1B** existence or presence of more than one (cause) तच्चानेकभाव एव भावात् तत्कार्यमुच्यते तस्य कुतोऽनेकताप्रसङ्गः HetuBiṬ. 93. 12; **2** the state of being more than one एकोऽपि सन् विद्वान् ऐश्वर्ययोगादनेकभावमापद्य सर्वाणि शरीराण्याविशति BrahmSūBh. (Śaṅ.) 856. 15 (*on* iv. 4. 15); LaCandr. 816. 19; प्रहर्ता चैकानेकभावादुत्तमादिभेदाच्चानेकविधः DaṇḍaVi. 219. 17; **3** various sentiments अनेकभावचतुरं शृङ्गाररम्यं वचः ŚatTrayī. 489; **4** many (positive) entities यद्यप्यनेकत्वमभावेऽप्यस्ति, तथाप्यनेकत्वे सति भावत्वं पञ्चानां साधर्म्यम्। तथा चानेकभाववृत्तिपदार्थविभाजकोपाधिमत्त्वमिति फलितार्थः SiddhāMu. 8. 1 (*on* 14)

अनेकभावनानुविद्धा (anekabhāvanānuviddhā) *adj. (f.)* **1** full of various sentiments मीमांसयेवानेकभावनानुविद्धया गीत्या देवं विरूपाक्षमुपवीणयन्तीम् ... कन्यकां ददर्श Kād. 131. 8; **2** related to different productive activities, Kād. 131 . 8 (comm. यागादिप्रवृत्त्यनुकूला ख्यातार्थरूपा)

अनेकभावनाविधान (anekabhāvanā-vidhāna) *n.* injunction or prescription of many productive activities न तु फलवाक्य एवानेकभावनाविधानम्, इतरैस्तु एकैकभावनानुवादेन तत्तद्धात्वर्थविधिः MīmāKau. iii (2). 141. 14 (*on* ii. 2. 1)

अनेकभावसंयुक्त (anekabhāva-saṁyukta) *adj.* consisting of various sentiments दिव्यभावपरीतं यच्छृङ्गाराद्भुतयोजितम्। अनेकभावसंयुक्तमुदारत्वं प्रकीर्तितम् NāṭyaŚā. 16. 110.

अनेकभावा (aneka-bhāvā) *adj. (f.)* of the nature of many kinds or types तस्मादनेकभावाभिः शक्तिभिस्तदभेदतः। एक एव स्थितः शक्तः शिव एव तथा तथा ŚivDṛ. 4. 5 (comm. अनेकघटपटस्वभावाभिः)

अनेकभावापत्ति (anekabhāvāpatti) *f.* undesired contingency of many entities चक्षुरादिनानात्वेनानेकभावापत्तेः संभवात् LaCandr. 816. 20.

अनेकभावाभावज्ञान (anekabhāvābhāva-jñāna) *n.* experience of many positive and negative entities, i.e. being and non-being अनेकभावाभावज्ञानसंस्कारसंस्कृताया मेचकधियः स्मृतिबीजप्रबोधकौचित्यात् किंचिदेव स्मृतिर्विमृशति ParāTri. 4.8.

अनेकभाष (aneka-bhāṣa) *adj.* consisting of different languages प्रश्नोत्तरं तदेतद् व्यस्तसमस्तादिभिर्भवेद् बहुधा। भेदैरनेकभाषम् ... भिद्यते Kāvyālaṅ. (Ru.) 5. 27.

अनेकभाषा (aneka-bhāṣā) *f.* more than one language वाक्ये यत्रैकस्मिन्ननेकभाषानिबन्धनं क्रियते। अयमपरो विद्वद्भिर्भाषाश्लेषोऽत्र विज्ञेयः Kāvyālaṅ. (Ru.) 4. 16.

अनेकभाषाभेद (aneka-bhāṣābheda) *m.* many varieties of languages परं युगादौ प्रथमपुरुषेण ... द्विपञ्चाशदक्षरप्रमाणा मातृकैवोपदिष्टा। ... ततो बाह्या येऽष्टत्रिंशद्वर्णास्तैः संस्कारे कृते संस्कृतं जातम्। ततश्चानेकभाषाभेदा

अभूवन् KumāPraPra. 103. 27.

अनेकभाषाव्यामिश्ररूप (anekabhāṣāvyāmiśra-rūpa) *adj.* of the nature of being mixed with different languages अभिनेयार्थं दशरूपकम् ... अनेकभाषा-व्यामिश्ररूपम् Loc. 141. 25 (*on* 3. 7)

अनेकभिन्नसंख्याक्षरप्रकृति (anekabhinnasaṅkhyākṣara-prakṛti) *adj.* of the nature of many different numbers and letters सरस्वती ... अनेकभिन्न-संख्याक्षरप्रकृतिरप्रकृतिव्यवस्था HarVi. 47. 131.

अनेकभुक्ता (aneka-bhuktā) *adj. (f.)* **A** enjoyed by many संपदा पुनरनेक-भुक्तया वेश्ययेव न वशी वशीकृतः Surath. 1.94; **B** enjoyed (sexually) by many (men), Surath. 1.94.

अनेकभुजपरिघ (aneka-bhujaparigha) *m.* numerous arms resembling iron-bars अये, कोऽयमनेकभुजपरिघभीषणाकारो राक्षसः UnmaRā. (Vi.) 64 (3)

अनेकभुजसंयुक्त (anekabhuja - saṁyukta) *adj.* possessing numerous arms ध्यायेद् वा विश्वरूपिणम्। ... अनेकभुजसंयुक्तम् ... देवम् TriBrU.153.

अनेकभूत (aneka - bhūta) *n.* **1Ai** more than one element अवयविवादिनामपि ... अनेकभूतानामेकसंघातानुप्रवेशोऽवर्जनीयः NyāySiA. 207. 22; **1Aii** many elements संघातोऽनेकभूतैरपि भवति यथा ह्येकभूतस्य भागैः TattvMu. 1. 23; अनेकभूतेष्वनेकचैतन्यशक्तिकल्पनायां गौरवेण लाघवादेकस्यैव नित्यचित्स्वरूपस्य कल्पनौचित्यात् SāṁkhyaPraBh. 93. 32 (*on* 3. 22); **1B** various elements भूम्यादिभूतानां स्वत एव मिश्रत्वान्नैकभूतत्वं मांसादीनां संभवतीति विज्ञायते। तस्मात् संभूतत्वान् मांसादीनामनेकभूतकार्यत्वात् TattvPrakā. 135A. 2 (*on* ii. 4. 22); **2** various creatures or beings अनेकभूतभौतिकदेवतिर्यङ्मनुष्यानेकलोकाद्भुत-रचनायुक्तब्रह्माण्डकोटिरूपस्य ... अनायासेनोत्पत्तिस्थितिभङ्गकरणं न लौकिकम् AṇuBh. 10.5 (*on* i. 1. 2)

अनेकभूतप्रकृति (anekabhūta-prakṛti) *adj.* having various elements as the material causes इदमनेकभूतप्रकृति शरीरमगन्धमरसमरूपमस्पर्शं च प्रकृत्य-नुविधानात् स्यात्। न त्विदमित्थंभूतम् NyāyBh. 174. 14 (*on* iii. 1. 28-30)

अनेकभूतप्रकृतित्व (anekabhūtaprakṛti-tva) *n.* the state of having various elements as the (material) causes शरीरस्यानेकभूतप्रकृतित्वेऽपि न विशेषोक्ति-विरोधः TattvPrakā. 135A. 4 (*on* ii. 4. 22)

अनेकभूतसंसर्ग (anekabhūta-saṁsarga) *m.* combination of various elements किं 'पृथिवीमय आपोमयः' इत्यादिवाक्यं युगपदनेकभूतसंसर्गं दर्शयति ŚrutaPra. ii. 597. 13 (*on* iv. 2. 5)

अनेकभूतौघ (anekabhūtaugha) *m.* flow, i.e. multitude of various creatures or beings नमोऽस्तु ते देवि समुद्रगामिनि ... अनेकभूतौघसमाश्रितेऽनघे SkandP. v(3). 12. 4; नमामि ते ... सरिद्वरे ...। अनेकभूतौघसुसेविताङ्गे SkandP. v(3). 60. 27.

अनेकभूदेवनिकेतन (anekabhūdeva-niketana) *n.* abode of number of Brahmins (*lit.* divinities on earth) अनेकभूदेवनिकेतनानां संरक्षणं यत्कृतमादरेण। गङ्गावतीसूनुरगादुदारं तेन ध्रुवं मन्दिरदानधर्मम् Rāṣṭrau. 20. 47.

अनेकभूपाल (aneka-bhūpāla) *m.* many kings श्रीपार्श्वोऽथ ... प्रतस्थेऽनेक-भूपालैः PārśvC. 5. 195.

अनेकभूपालचक्रवाल (anekabhūpāla-cakravāla) *n.* circle or group of many kings अनेकभूपालचक्रवालपरिवृतः श्रीकुमारपालभूपालः ... गृहस्थानामुचिता-महोरात्रिकीं क्रियामपृच्छत् KumāPraPra. 85. 30.

अनेकभूपालजित्वर (anekabhūpāla-jitvara) *adj.* [P. iii. 2. 163] conquering many kings कुमारपालः ...। प्रतापाक्रान्तदिक्चक्रोऽनेकभूपालजित्वरः। भविष्यति PrabhāC. 196. 1.

अनेकभूपालमौलि (anekabhūpāla-mauli) *m.* head or crown of many kings अभूदनेकभूपालमौलिलालितशासनः। ... क्षितीश्वरः KathāKau. 2. 1.

अनेकभूमन् (aneka-bhūman) *adj.* having many floors or storeys शालाजातिः ...। नानाकाराङ्गान्वितानेकभूमा माला छन्दा स्यात् तु सा मालिकाख्या MayaMa. 26. 100.

अनेकभूमि (aneka-bhūmi) *adj.* having various regions कर्मस्थितिं जन्तुर-नेकभूमिं नयत्यमुं सा च परस्परस्य Viṣāpahā. 12.

अनेकभूमि (aneka-bhūmi) *f.* many storeys रतिसुखसंपत्तिप्रतिकूजा अनेक-भूमयो योजिताः। एवंविधं मण्डलं द्वादशद्वारयुतम् SāmaraU. 272. 7.

अनेकभूमिका (aneka-bhūmikā) *f.* **1** many storeys अस्ति ... अनेकभूमिका-भ्राजिष्णुभिः सौधैः ... संवलिता ... अयोध्येति यथार्थाभिधाना नगरी TilaMañ. 8. 21; शैलूष इवानेकभूमिकाभाजि ... धाम्नि ... निविष्टाम्... दमयन्तीमद्राक्षम् NalaCam. 7. 19 (3); **2** (enacting of) many roles or characters (in drama), NalaCam. 7. 19 (3) (comm. भूमिका ... वेषधारणम्)

अनेकभूमिपाल (aneka-bhūmipāla) *m.* many kings सः ... द्वीपान्तराग-तानेकभूमिपालमौलिमालालालितचरणयुगलः Kād. 7. 2.

अनेकभूमिप्रासादा (anekabhūmi-prāsādā) *adj. (f.)* having multi - storeyed mansions अयोध्या सा परा मेध्या पुरी दुष्कृतिदुर्लभा। ... अनेक-भूमिप्रासादा SkandP. ii (8) .1. 33; NaraP. 25. 6.

अनेकभूमियुक्त (anekabhūmi-yukta) *adj.* possessing several storeys गृहाणां गृहगर्भं च जातिगर्भं विमिश्रितम्। अनेकभूमियुक्तानि यानि वासगृहाणि च MayaMa. 12. 83.

अनेकभूषणभूषिताङ्गी (anekabhūṣaṇabhūṣitāṅgī) *adj. (f.)* whose body is decorated with various ornaments सः ... राजवाहनेन ... अनेकभूषण-भूषिताङ्गीमवन्तिसुन्दरीम् ... अग्निं साक्षीकृत्य संयोजयामास DaśKuC. 32.25.

अनेकभूषणयुत (anekabhūṣaṇa-yuta) *adj.* possessing, i.e. wearing various ornaments देवो रूपान्तरं दधौ। चतुर्भुजम् ... अनेकभूषणयुतम् GaṇeP. ii. 130. 22.

अनेकभूषा (aneka-bhūṣā) *f.* various decorations or ornaments निरस्त-भूषोऽपि यथा विभाति पवित्रचारित्रविभूषितात्मा। अनेकभूषाभिरलंकृतोऽपि विमुक्तवृत्तो न तथा मनुष्यः SubhāRaSaṁ. 241.

अनेकभूषादीप्ति (anekabhūṣā-dīpti) *f.* lustre of various ornaments यस्यासीत्प्रमदा रम्या नाम्नोग्रा चारुहासिनी। ... अनेकभूषादीप्त्या या नाशयित्वाखिलं तमः GaṇeP. ii. 73. 13.

अनेकभृङ्गाराव (anekabhṛṅgārāva) *m.* [P. iii. 3. 50] humming sound of many bees दिनकरकिरणाभिसंतप्तमेदिन्याम् ... अनेकभृङ्गारावोन्नादितमूलेषु ... तरुषु ... प्रत्यूषप्रदोषार्धरात्रिषु विचरन्ति (हस्तिनः) Hastyāyur. 195. 22 (2. 13)

अनेकभृङ्गी (aneka-bhṛṅgī) *adj. (f.)* [P. iv. 1.41] resorted to by many (female) bees त्रिकल्पपूर्वा सरितां वरा या (रेवा) ...। वेदाङ्गविद्यानिपुणैरुपेता सरोजमिश्राम्बुरनेकभृङ्गी Rāvaṇā. 4. 20.

अनेकभृतकसाध्य (anekabhṛtaka-sādhya) *adj.* to be accomplished by a number of hired servants यदेकं स्वामिकर्मानेकभृतकसाध्यं भवति तत्र शाठ्यं वर्जयित्वा यो भृत्यो यावत्कर्म करोति तस्मै तदनुरूपं वेतनं देयम् Aparā. 798. 27 (*on* 2. 196); VīraMi. 673. 20 (*on* 2. 196)

अनेकभृत्यसाध्य (anekabhṛtya-sādhya) *adj.* to be accomplished by a number of servants अनेकभृत्यसाध्यकर्मणि भृतिदानप्रकारमाह Mitā. 279. 6 (*on* 2. 196); एतद्यानेकभृत्यसाध्ये कर्मणि वेतने वा परिभाषिते वेदितव्यम् Aparā. 799. 3 (*on* 2. 196); Subodhi. 86. 21 (*on* 2. 196); अनेकभृत्यसाध्यकर्मस्वरूपमाह BālamBha. ii. 295. 32 (*on* 2. 196)

अनेकभेद (aneka-bheda) *adj.* of many types or kinds, i.e. various परममतिर्गुणाननेकान्(v.1. परमगुणाननेकभेदान्) ... अनुशास्य तथ्यरूपान् गगनतलं द्युतिमान् विवेश MahāBhā. xiii. 27. 101; इन्द्रादयोऽनेकभेदा दिशामष्टकदेवताः BrahmāṇḍP. iii. 20. 44; स हेतुः विपक्षाद्विशेषो हेतुरित्येतावति चोद्यमाने विपक्षाद्विशेषमात्रस्य हेतुत्वं स चानेकभेदः NyāyVār. 128. 15 (*on* i. 1. 35); मुक्ताप्रवालतपनीयमनेकभेदम्। यद्यद्य दुर्लभतमं परराजधान्यां तस्मिन्पुरे प्रतिवसत् सुलभं च वस्तु VarāṅgaC. 1. 39; पद्यमनेकभेदम् KāvyālaṅSū. i. 3. 26; यम्यन्त इत्याद्यन्वर्थतानुस्मरणेनानेकभेदमन्तादिकम् Kāvyānu. (He.) 255. 2; अर्थो विरुद्धविषमा-दिरनेकभेदः कार्याश्रितो भवति AlaṅkāRa. 62 (6)

अनेकभेद (aneka-bheda) *m.* **1A** many differences चकार विविधां सृष्टिम् ...। देवाश्चानेकभेदेन मनुष्याः पशवस्तथा JayāS. 2. 41; विचित्रभेदं पुरुषैकनाथम्। अनेकभेदैरधिवासितं ते नतोऽस्मि रूपं जगदण्डसंज्ञम् KūrmaP. 133. 11 (1. 12); **1B** many types or kinds, i.e. varieties ज्ञानं त्वनेकभेदैर्यत्तत्त्वतामेति चात्मनः। गौण(णे?) विद्यामये तत्त्वे सम्यग् विद्यामयस्य च JayāS. 4. 53; (दीक्षा) संस्थितानेकभेदे JayāS. 16. 53; **1Ci** many (subordinate or intermediate) divisions (मुनिः) अनगारं सहागारं धर्मं विविधमब्रवीत्। अनेकभेदसंयुक्तं संसारोत्तारणावहम् PadmP. (Ra.) 106. 90; **1Cii** many distinctions or ramifications ये पुनः कल्पितानेकभेदवृत्तिं प्रचक्षते NyāyMañ. i. 298. 7; **2** various modifications or forms विष्णुतत्त्वं परिज्ञाय एकं चानेकभेदगम्। दीक्षयेन्मेदिनीम् JayāS. 16.9.

अनेकभेदग (anekabheda-ga) *adj.* pertaining to various modifications or forms विष्णुतत्त्वं परिज्ञाय एकं चानेकभेदगम् (v.1. भेदकम्)। दीक्षयेन्मेदिनीम् JayāS. 16. 9.

अनेकभेदतस् (anekabheda-tas) *adv.* **A** on account of many differences गन्धशब्देन ... पृथिवी परिगृह्यते। यदि वा परभागोऽस्या गन्धस्यानेकभेदतः BṛĀraUBhVā. ii. 4. 358; **B** in various ways दुःखानि यानि संसारे विद्यन्तेऽनेक-भेदतः SubhāRaSaṁ. 555.

अनेकभेदबहुल (anekabheda-bahula) *adj.* abounding in, i.e. attended with many distinctions or ramifications अनेकभेदबहुलं नाट्यमस्मिन्प्रतिष्ठितम् NāṭyaŚā. 8. 9.

अनेकभेदभिन्न (anekabheda-bhinna) *adj.* **1** varied due to many distinctions or ramifications न्यसेम केसरे लाजास्तां शक्तिं तद्धि कर्मणि। अनेकभेदभिन्नानां व्यापिनीं सर्वदेहगाम् PauṣkS. 6. 74; अनेकभेदभिन्नेषु प्रासादेषु महामते। विस्तरेण ... वक्ष्ये ... देवतानां च संस्थितिम् PāraS. 10. 3; द्वे वस्तुनी अस्मिन्पिण्डे उपलभ्येते अनेकभेदभिन्नेन करणेन येनोपलभते AitUBh. 288. 11 (*on* 5.1); सुरतमनेकभेदभिन्नं स्फुटमुदितं परिहृत्य फल्गु वाक्यम् NāgaSa. 37. 1; मुनिभिरनेकभेदभिन्नशास्त्रजडैरभिनिविष्टमतिभिस्तत्त्वमुपादेयं न किंचित्कथितम् AuciViCa. 34 (8); मुख्यानि द्विशालानि षडेव हि। अनेकभेदभिन्नानि लघुप्रस्तारयोगतः SamarāSū. 22. 3; अनेकभेदभिन्नो हि प्रपञ्च इष्यते NyāySu. (Ja.) 406B. 3 (*on* ii. 2.8); **2** distinct on account of various forms or modifications अनेकभेदभिन्नस्तु क्रीडते परमेश्वरः KūrmaP. 49. 3 (1. 4)

अनेकभेदवितत (anekabheda-vitata) *adj.* extended by many distinctions or ramifications अनेकभेदबहुलं (v.l. अनेकभेदविततं) नाट्यमस्मिन् प्रतिष्ठितम् NāṭyaŚā. 8. 9.

अनेकभेदविषय (anekabheda-viṣaya) *adj.* referring to many divisions or branches ज्योतिःशास्त्रमनेकभेदविषयं स्कन्धत्रयाधिष्ठितम् BṛSaṁ. 1. 9.

अनेकभेदसंपन्न (anekabheda-sampanna) *adj.* endowed with, i.e. possessing many types or varieties अनेकभेदसंपन्नः पदाध्वा समुदाहृतः ŚivaP. vii (2). 17. 6 (565B. 2)

अनेकभेदसंभिन्न (anekabheda-sambhinna) *adj.* distinct due to many differences अनेकभेदसंभिन्नं यदेतद् व्याकृतं जगत्। नामरूपक्रियातत्त्वमेतत्सर्वं प्रतीयताम् BṛĀraUBhVā. i. 6. 10.

अनेकभेदिन् (anekabhed-in) *adj.* possessing various modifications or forms परिजप्यं द्विजश्रेष्ठ यावद्वाणी निवर्तते। स्वभावस्थो गुरुः साक्षात्परेणानेकभेदिना JayāS. 18. 32.

अनेकभेदोत्था (anekabhedotthā) *adj.* (*f.*) arising from many distinctions मन्त्रमूर्तिर्गृहान्तरे। एका वानेकभेदोत्था विद्यते बिम्बलक्षणा PauṣkS. 32.84.

अनेकभेदोपास्य (anekabhedopāsya) *adj.* to be meditated upon as (having) various modifications or forms ब्रह्मणः ... अनेकभेदोपास्यस्य ... उपासनं विधित्सन् आह ChāndoUBh. 173. 2 (*on* iii. 14. 0)

अनेकभोग (aneka-bhoga) *adj.* having many hoods सन्मणिरनेकभोगो गुरुभारसहः स्थिरात्मतास्थानम्। नरदेव चित्रमेतद्यदशेषगुणैस्त्वमाश्लिष्टः KuṭṭaMa. 779; **2** having, i.e. experiencing many types of enjoyments or pleasures, KuṭṭaMa. 779.

अनेकभोग (aneka-bhoga) *m.* many types of enjoyments or pleasures अनेकभोगसंयुक्ता हृष्टाः पुष्टाः स्त्रियः सतीः। रक्षन्ति पतयः पुण्या यथा वृद्धपुरस्कृताः SaurP. 38. 41.

अनेकभोजन (aneka-bhojana) *n.* various (types of) meals तन्नित्यमेवानेकभोजनभक्ष्यादिभिः पुष्टिं नीयते Pañcā. 277. 8.

अनेकभौमक (anekabhauma-ka) *n.* building with more than one storey एकभौमकमनेकभौमकं योजनीयमवनीपतीच्छया MayaMa. 25. 176.

अनेकभ्रातृ (aneka-bhrātṛ) *adj.* (used as noun) (one) having many brothers अनेकपितृकाणामनेकभ्रातॄणां ये पुत्रास्तेषाम् ... प्रत्येकमंशकल्पना DīpKa. 55. 8 (*on* 2. 120); यद्यपि भगिन्यश्चेति भ्रातृभिरिति च बहुवचनद्वयेनांशमित्येकवचनेन चानेकभ्रातृकर्तृकानेकभगिन्युद्देश्यकैकतुरीयांशकर्मकदानलाभेन प्रत्येकं भगिनीनां भागसंबन्धलाभो न BālamBha. ii. 158. 10 (*on* 2.124)

अनेकमख (aneka-makha) *m.* various sacrifices तेन ... सुहृत्स्वजनसमेतेन ... अनेकमखकरणार्जितपुण्यप्राग्भारेण ... सुखमनुभूयते स्म Pañcā. 64. 21.

अनेकमखक्रिया (anekamakha-kriyā) *f.* [P. iii. 3. 100] performance of various sacrifices नानाविधोद्यानतडागसस्यमहोत्सवानेकमखक्रियाद्यैः। मीनस्थिते देवगुरौ धरित्री रम्या VasiS. 6. 100.

अनेकमखाह्वान (anekamakhāhvāna) *n.* invocation in various sacrifices अनेकमखाह्वानगमनमूढमतिकक्षे सहस्राक्षे YaśasCam. i. 250. 2.

अनेकमङ्गलगुण (aneka-maṅgalaguṇa) *m.* various auspicious qualities उदाहृतदहरविद्यायां यदनेकमङ्गलगुणविशिष्टं दिव्याद्भुतरूपं च ब्रह्म वर्णितम् ŚivārkaMaDī. i. 429. 9 (*on.* i. 3. 12)

अनेकमङ्गलद्रव्य (aneka-maṅgaladravya) *n.* various auspicious materials मूर्ध्नि पीठस्य ...। पर्यन्तरचितानेकमङ्गलद्रव्यसंपदि। ... रैराड् निवेशयामास MahāP. 23. 6; अनेकमङ्गलद्रव्यसहितः श्रेष्ठी, ताश्च ... गतास्तत्र SamyaKau. 29.5.

अनेकमणि (aneka-maṇi) *m.* **A** various gems (अभियौ स हिमालयम्) ससुरचापमनेकमणिप्रभैरपपयोविशदं हिमपाण्डुभिः। अविचलं शिखरैरुपबिभ्रतम् ... अम्बुमुचां चयम् Kirātā. 5. 12; **B** many gems अनेकमणिष्वनुस्यूतं सूत्रमिव ... आत्मानं पश्यतः NyāySu. (Ja.) 491A. 4 (*on* iii. 2. 1); Nyāyāmṛ. 398A. 5; अनेकमणिमौक्तिकैर्घटितभूषणाभूषितः ... भातीश्वरः Vidvanmo. 8. 115.

अनेकमणित (aneka-maṇita) *n.* many inarticulate murmuring-sounds अनेकमणितैर्बन्धविशेषैश्च कलाग्रहैः। वशं नयेत यः कान्तां स धृष्टः परिकीर्तितः ŚṛṅgāDī. 2. 85.

अनेकमणिप्रबन्ध (anekamaṇi-prabandha) *adj.* having the arrangement of many gems हेम्ना विनिर्मितमनेकमणिप्रबन्धं नीवीनिबन्धनगुणं विनिवेदयामि TripuMāPūSt. (Śaṅ.) 56.

अनेकमणिमण्डित (anekamaṇi-maṇḍita) *adj.* adorned with various gems द्वाराणि तत्र शोभन्ते कांचनैः कलशैः स्थितैः। सितपद्ममुखैर्द्वारैरनेकमणिमण्डितैः SkandP. v(1). 26. 4.

अनेकमणिमाणिक्य (aneka-maṇimāṇikya) *adj.* studded with various gems and rubies अनेकमणिमाणिक्यकिरीटभूषणं क्वचित्। ... परमं कारणं कृष्णम् ... श्रोतुमिच्छामि PadmP. iv. 69. 92.

अनेकमणिमाला (aneka-maṇimālā) *f.* several strings or laces of gems अनेकमणिमालालंकृतमपि रत्नचतुष्कराजितम् ... आयतनं ददर्श TilaMañ. 215.23.

अनेकमणीमय (anekamaṇī-maya) *adj.* [*f.*- ī] [P. iv. 3. 82] **A** consisting of various gems अनेकमणीमयम्। कुसुमवर्षचितं तव देशनावनितलं क इवैत्य न मोदते ŚrīVīraSta. 12; **B** made of various gems दन्ताश्च स्फटिकमयाः ...। इत्यनेकमणीमय्यः प्रतिमास्ताश्चकाशिरे TriṣaŚaPuC. i. 6. 602.

अनेकमण्डल (aneka-maṇḍala) *n.* many states, regions or territories पुरुषातिश-येनेवानेकमण्डलकृतसेवेन श्मशानवाटेन गत्वा ... विन्ध्याटवीं विवेश VāsaDa. 243. 2.

अनेकमण्डल (aneka-maṇḍala) *m.* many dogs, VāsaDa. 243.2 (comm. पक्षे श्वा)

अनेकमण्डलेश्वर (anekamaṇḍaleśvara) *m.* lord of many states or regions सेवेतानेकमण्डलेश्वर इव तरुणः ManuBh. i. 125. 13 (*on* 2. 95)

अनेकमण्यनुस्यूत (anekamaṇy-anusyūta) *adj.* woven into, i.e. continued in many gems अनेकमण्यनुस्यूतसूत्रमिवानेकदेहेष्वनुस्यूतमात्मानं पश्यतः स्वतो भेदधीः AdvaiSi. 615. 20.

अनेकमतभेद (aneka-matabheda) *m.* many theoretical differences स्वमतेऽप्यनेकमतभेदाः ... प्रकल्पिताः सन्ति KumāPraPra. 103. 20.

अनेकमति (aneka-mati) *adj.* **1** having varied intelligence or knowledge सिंहे स्ववंशनाथः कुलीरभे ज्ञानवाननेकमतिः HorāSā. 21. 3; **2** (an-ekamati) not having concentration of mind आध(?अधा)र्मिकः कदर्यो गुणविमुखः परुषवागनेकमतिः। भुङ्क्ते संपदमीदृक् Subhāṣi. 3116.

अनेकमति (aneka-mati) *f.* notion of more than one (contradictory item) एकानेकमतौ संदेहो न स्यात् NyāyVār. 246. 13 (*on* ii. 1. 34)

अनेकमत्तमातङ्ग (aneka-mattamātaṅga) *adj.* **1** consisting of many intoxicated or rutting elephants स त्वनेकमत्तमातङ्गसैन्यसङ्गादिव मदेनान्धतां दधानो मातङ्गीसङ्गपङ्ककलङ्कभाजनमजनि PrabaCin. 112. 18; **2** consisting of many haughty low-castes, PrabaCin. 112.18.

अनेकमत्स्यपरिवृत (anekamatsya-parivṛta) *adj.* surrounded by more than one fish अनेकमत्स्यपरिवृत एकः कुलीरकोऽब्रवीत् Tantrākhyā. 18. 19; PañcT. 1. 61 (6) (66.8)

अनेकमदान्ध (anekamadāndha) *adj.* blinded with arrogance caused by manifold (factors) त्वं नूनमसुराणां नः पारोक्ष्यः परमो गुरुः। यो नोऽनेकमदान्धानां विभ्रंशं चक्षुरादिशत् BhāgP. viii. 22. 5.

अनेकमदान्धवारण (aneka-madāndhavāraṇa) *m.* many elephants blinded with (excessive) rut यस्यानेकमदान्धवारणघटाकुम्भस्थलीभेदनव्यापारैकविनोददुर्ललितया कालोऽगमल्लीलया ... स एवाधुना सिंहः ... धत्ते दशामीदृशीम् Subhāṣi. 613.

अनेकमनस् (aneka-manas) *n.* many minds अतिरंहसोऽस्य (नृपतेः) दधते हि वाजिनः पटुतामनेकमनसां विलङ्घने PṛthvīVi. 9. 59.

अनेकमनस्क (anekamanas-ka) *adj.* having more than one mind यदा तु योगी बहून्कायान्निर्मिमीते तदा किमेकमनस्कास्ते भवन्त्यथानेकमनस्काः YogBh. 185. 2 (*on* 4. 3)

अनेकमन्त्र (aneka-mantra) *m.* **1A** many sacred formulae अभूत् ... व्योगिनायकः। कृतस्थितिः पत्तनगुङ्गडीसरस्यनेकमन्त्रादिसमृद्धिमन्दिरम् Gurvā. 306; **1B** more than one sacred formula अनेकमन्त्रासाध्यो होमश्चात्र सूक्तादिसाध्य एक

एव बोध्यः VīraMi. (Paribhāṣā.). 79. 25; **2** (employment of) many spells or incantations चिन्तयेन्नष्टहृदयः ... यः ... सोऽपि पुराणरसवादादिगारुडानेकमन्त्रवित्। ... सर्ववाङ्मयवेत्ता च सर्वज्ञो देवि जायते NityāṢoḍa. 4. 30.

अनेकमन्त्रक (anekamantra-ka) *adj.* having more than one sacred formula अनेकमन्त्रके एकमन्त्रके वा अनेकहोमे प्रतिहोमं प्रणवः कार्यः VīraMi. (Paribhāṣā.) 80. 1.

अनेकमन्त्रकोटी (aneka-mantrakoṭī) *f.* many crores of sacred formulae अनेकमन्त्रकोटीभिः संस्मरेत्सेवितं सदा (महामन्त्रम्) JayāS. 21. 232.

अनेकमन्त्रपरामर्श (anekamantra-parāmarśa) *m.* consideration of several sacred formulae न चानेकमन्त्रपरामर्शसापेक्षशब्दार्थप्रत्यभिज्ञानुसारेणोपक्रमगतसप्तमीश्रुतिप्राप्तं लिङ्गमन्यथा नेतुमयुक्तम् ŚivārkaMaDī. i. 404. 24 (*on* i. 3.4)

अनेकमन्त्रसंस्कृत (anekamantra-saṁskṛta) *adj.* sanctified or purified by many sacred formulae कृते सोमयागादावनेकमन्त्रसंस्कृतेष्टकाचित्य-संस्पर्शनेऽपि स्नानदर्शनात् Aparā. 18. 14 (*on* 1. 7)

अनेकमन्त्रसाध्यका (anekamantrasādhya-kā) *adj. (f.)* to be accomplished through many sacred formulae यत्रानेकमन्त्रसाध्यका होमादिव्यक्तिस्तत्र द्वितीयादिमन्त्रादिषु प्रणवो नास्ति VīraMi. (Paribhāṣā.) 79. 17.

अनेकमन्वन्तरदर्शिन् (anekamanvantara-darśin) *adj.* who has seen, i.e. experienced numerous ages of Manus अनेकमन्वन्तरदर्शिना मया न खल्वरामो ददृशे भवादृशः Yādavā. 14. 26.

अनेकमन्वन्तरायुस् (anekamanvantarāyus) *adj.* having (the span of) life of numerous ages of Manus त्रिदशाः खल्वेते अनेकमन्वन्तरायुषोऽनिमिषचक्षुषो नभश्चारिणः कामगास्त्रिनयनचतुर्भुजादयः Kiraṇā. 55. 13.

अनेकमय (aneka-maya) *adj.* possessing (the qualities of) more than one (i.e. both the sun and the moon) सौम्यत्वेन निशामणिर्दिनमणिस्तीव्रप्रतापेन च ... एकानेकमयो गुणैर्नवनवैः श्रीकर्मराजः सुधीः EI. ii. 47. 44.

अनेकमरणनिमित्तवत् (anekamaraṇanimitta-va(n)t) *adj.* having many causes of death यस्मादयमनेकमरणनिमित्तवान् तस्मात् सर्वदा मृत्योरास्ये वर्तते BṛĀraUBh. 597. 12 (*on* iv. 3. 36)

अनेकमलप्रचय (anekamala-pracaya) *m.* collection of various types of impurities (i.e. impediments or limiting conditions) किमीश्वरविषयज्ञानमात्रं निर्वाणकारणं किं वा साक्षात्कारः। ... नापि द्वितीयः। अनेकमलप्रचयोपचितानाम् ... पशूनां परमेश्वरसाक्षात्कारानुपपत्तेः SarvaDaSaṁ. 6. 128.

अनेकमलसंभव (anekamala-sambhava) *adj.* arising from, i.e. produced by various types of impurities or moral taints अनेकमलसंभवे कृमिकुलैः सदा संकुले विचित्रबहुवेदने बुधविनिन्दिते दुःसहे। भ्रमन्नयमनारतं व्यसनसंकटे देहवान् ... भवे भवति SubhāRaSaṁ. 243.

अनेकमल्लसंचार्य (anekamalla-sañcārya) *adj.* fit to be moved by several wrestlers अनेकमल्लसंचार्यं दृष्ट्वा तस्यानतं धनुः। देवस्वामी ददौ तस्मै ... भगिनीम् BṛKathāMañ. ix. 2. 378.

अनेकमल्लिकाक्ष (aneka-mallikākṣa) *m.* many swans called *mallikākṣa* सिप्रा नाम नदी। यत्र (पयः) ... अनेकमल्लिकाक्षकुटुम्बिनीकदम्बचुम्ब्यमानजम्बालजालजटिलजलदेवतादोलम् YaśasCam. ii. 208. 2.

अनेकमशकाकीर्ण (anekamaśakākīrṇa) *adj.* full of or overspread with many mosquitoes or gnats अनेकमशकाकीर्णोदुम्बरप्रतिमात्मना। नानाजीवविभेदेन ... पुरुषेणास्थितं क्वचित् AhirbuS. 9. 27.

अनेकमस्तक (aneka-mastaka) *adj.* having many hoods सुपर्णवशगा नागा जज्ञिरेऽनेकमस्तकाः HariVaṁ. 3. 86.

अनेकमहर्षिमस्तक (anekamaharṣi-mastaka) *m., n.* heads of many great sages स जयति ... नाम्नानेकमहर्षिमस्तकवलत्पादोऽक्षपादो मुनिः NyāyMañ. ii. 208. 25.

अनेकमहापातकनाश (anekamahāpātaka-nāśa) *m.* destruction of many great sins यत्तु मण्डपाख्यानादौ सकृत्पञ्चक्रोशयात्रामात्रेणानेकमहापातकनाशप्रतिपादनम् तदर्थवादमात्रमिति भवतामङ्गीकार्यम् TristhaSe. 125. 14.

अनेकमहापापहरा (anekamahāpāpa-harā) *adj. (f.)* which removes many great sins सूर्यवंशभवानां च राज्ञां चारित्रमद्भुतम्। तत्रानेकमहापापहरा रामकथा कृता PadmP. iv. 1. 6.

अनेकमहाप्रभावमाणिक्य (aneka-mahāprabhāvamāṇikya) *n.* many rubies having great lustre (सेनापतिः) तत्कालमादिष्टनिकटराजलोकढौकितमनेकमहाप्रभावमाणिक्यखचितमुद्रसं(म)ङ्गुलीयकरत्नमग्रतो दर्शयन् ... ज्वलनप्रभदेववृत्तान्तम् ... यथाश्रुतमकथयत् TilaMañ. 98. 13.

अनेकमहाफल (aneka-mahāphala) *adj.* possessing many big fruits स्थिरोऽनेकमहाफलः। जातस्तरुरयम् Kāvyālaṅ. (Bh.) 2.80 =VakroJī. 210. 5.

अनेकमहामहीभृत् (aneka-mahāmahībhṛt) *m.* **1** many great mountains राजा तु ... अनेकमहामहीभृत्परंपरागतां गङ्गामिव दुर्गतिहराम् ... पश्यंश्चैतां (एकावलीम्) विस्मयमाजगाम HarṣaC. 334. 3; **2** many great kings, HarṣaC. 334.3.

अनेकमहारथ (aneka-mahāratha) *m.* various great warriors मृधे मृधेऽनेकमहारथास्त्रतो द्रौण्यस्त्रतश्चास्म हरेऽभिरक्षिताः BhāgP. i. 8. 24.

अनेकमहाराज (aneka-mahārāja) *m.* great king of many उवाच ... भरद्वाजः बहुभिः अनेकमहाराजाय ItihāU. 18. 20.

अनेकमहावीर (aneka-mahāvīra) *m.* various great heroes तामनेकमहावीरकरम्बनिकराङ्किताम्। वीक्ष्य युद्धक्षितिं तासां हृदयानि विदुद्रुवुः PāṇḍaC. 13. 1057.

अनेकमहाव्याधि (aneka-mahāvyādhi) *f.* various great diseases अनेकमहाव्याधिविह्वलीभूतमानसः। निद्रां न लभते नक्तं दिवापि विनयंधरः BṛKathāK.13.5.

अनेकमहासमानीक (aneka-mahāsamānīka) *m., n.* many great battles तमनेकमहासमानीकसंतोषितरणदेवताविहितबलिविधानम् ... करवालम् ... करादुत्सृज्य मुनिकुमारकयुगलमुपावीविशत् YaśasCam. i. 163. 4.

अनेकमहासामन्त (aneka-mahāsāmanta) *m.* many great (neighbouring) kings or feudatory princes सेवागतानेकमहासामन्तमुकुटमाणिक्योन्मुखमयूखशेखरिताञ्चलपल्लवैर्विचित्ररत्नरचितकाण्डकोटिभिः विविधाकृतिपताकादुकूलैः ... त्रिदिवद्रुमोद्यानश्रियं विस्तारयन् ... अहं प्रत्यावृते YaśasCam. i. 336. 1 (comm. देशपतयः)

अनेकमहास्मृति (aneka-mahāsmṛti) *f.* many great codes of laws (Smṛtis) बहूनामनुग्रहो न्याय्य इति न्यायेन तेषामनेकमहास्मृतिविरोध(?धि)तत्वमिति भावः BālamBha. iii. 75. 2 (*on* 3. 24)

अनेकमहाह्रद (aneka-mahāhrada) *m.* many large lakes or pools अभूदगस्त्यस्याश्रमो मुनेः ... कावेरीवारिबहले यत्रानेकमहाह्रदे। पीत्वोद्गीर्णमिवागस्त्येनाब्धिपाथः पदे पदे KathāSaSāg. xii. 35. 54.

अनेकमहिलासमराग (anekamahilā-samarāga) *adj.* having equal attachment to many ladies अनेकमहिलासमरागो दक्षिणः कथितः (नायकः) SāhiDa. 98. 15.

अनेकमहीमहेन्द्र (aneka-mahīmahendra) *m.* many great lords, i.e. rulers of the earth शाहभूपः। यस्यानेकमहीमहेन्द्रसमरे मत्तेभकुम्भस्थले विद्युद्भ्रान्तिकरी बभूव निभृता खड्गभ्रमिर्भास्वरा ParamāKā. 1.6.

अनेकमांसाद (anekamāṁsāda) *adj.* who eats various kinds of flesh पुरा योऽनेकमांसादो दुर्गन्धोऽभूज्जुगुप्सितः। सोऽयम् ... सुन्दरोऽभवत् PadmP. (Ra.) 41. 160.

अनेकमाणिक्य (aneka- māṇikya) *n.* various (kinds of) rubies (लिङ्गस्य) तस्य दर्शनादनेकमाणिक्यरचितं सिद्धगन्धर्वसेवितं विमानवरमारुह्य शक्रलोकं गतः। ... दर्दुरः SkandP. v(2). 84. 43; दृष्टवान् ... अनेकमाणिक्यखण्डखचितकाञ्चनशिलासंघातमेकं दिव्यमायतनम् TilaMañ. 155. 8; समन्तादुत्सर्पतानेकमाणिक्यरुचितरङ्गप्रसरेण परिकल्पयद्भिरिव ... सोपानपरंपराम् ... चैत्यालयैः ... उपशोभितं राजपुरं नाम नगरम् YaśasCam. i. 21. 3; ii. 300. 1.

अनेकमाणिक्य (aneka-māṇikya) *adj.* inlaid with various rubies दृष्टवान् ... अनेकमाणिक्यमन्त(?त्त)वारणकभूषितम् ... आयतनम् (अहम्) TilaMañ.154.12.

अनेकमातङ्गतुरङ्गसङ्गिन् (anekamātaṅgaturaṅga-saṅgin) *adj.* consisting of many elephants and horses अनेकमातङ्गतुरङ्गसंगी परैरलङ्घ्यो निजकामचारी। ... बभौ समुद्रादधिकं बलौघः Rāṣṭrau. 9. 11.

अनेकमातृ (aneka-mātṛ) *f.* many mothers (including uterine mother and step-mothers) अनेकमातृभिरेकचित्यामन्वारोहणे कृतेऽप्येवमेव SmṛtiCan. v. 428.2.

अनेकमातृक (anekamātṛ-ka) *adj.* having different mothers पृथग्जनाः पृथक्क्षेत्रसमानजातीया अपि अनेकमातृका भवन्ति ManuBh. i. 448. 22 (*on* 5. 60)

अनेकमात्र (aneka-mātra) *n.* **A** more than one (i.e. two) in general उभयग्रहणमनेकमात्रोपलक्षणम् NyāySu. (Ja.) 390A. 9 (*on* ii. 2. 7); **B** more than one only द्वितीयाह्निके एकानेकवृत्तिगुणपरीक्षाप्रकरणम् अनेकमात्रवृत्तिगुणपरीक्षाप्रकरणम् ... परीक्षितुमाह Upask. 310. 3 (*on* vii. 2. 1)

अनेकमानस (aneka-mānasa) *n.* many minds स विद्याधरः ... प्रविष्टः ... विद्याबलादनलनाशवमनादिविकारप्रबलात्कृतानेकमानसोद्वेजनवैयात्यो रेवत्याः क्वचिदपि मनोमूढतामपश्यन्(?त्) YaśasCam. ii. 301. 21.

अनेकमाय (aneka-māya) *adj.* skilled in various magics एकः पदातिः ... योऽनेकमायानि ... । रक्षःसहस्राणि चतुर्दशार्दीत् Bhaṭṭi. 12. 56.

अनेकमाया (aneka-māyā) *f.* **A** various tricks or deceits (संह्रादस्य तु दैत्यस्य ... कुले। समुत्पन्नाः) अनेकमायाकुशला धनुर्वेदस्य पारगाः (सुताः) HariVaṁ. 83*(1); अनेकमायया हत्वा रिपुं मम निवेद्यताम् GaṇeP. ii. 82. 53; **B** various magical powers (विनायके) न चात्र संशयः कार्योऽनेकमायामये विभौ GaṇeP. ii. 59. 5.

अनेकरूपता (anekarūpa-tā) *f.* **A** the state of having more than one form or nature एकस्याप्यवयविनोऽनेकरूपतया नानात्वम् TātpaṬ. (U.) 381. 26 (*on* 5(6). 33); श्रुतिः एकैकस्य देवतात्मनः युगपद् अनेकरूपतां दर्शयति BrahmSūBh. (Śaṅ.) 188. 7 (*on* i. 3. 27); ŚaṅkaVi. (Ā.) 252. 14; नात्र कश्चिद्दोषः, यदि सैव ब्रह्म नान्यथा, अनेकरूपतानुपपत्तेरेकवस्तुनः IṣṭaSi. 22. 11; एकस्यानेकरूपताया निरस्तत्वात् IṣṭaSi. 270. 16; अतोऽस्याः श्रुतेरेकैकदेवताया अनेकरूपताप्रतिपादकत्वानुपपत्तिमभिप्रेत्य अत्र सैषा श्रुतिरनुदाहृता ŚrutaPra. ii. 62. 11 (*on* i. 3. 26); जीवानामनेकरूपतां सूत्रकार एव वक्ष्यति NyāySu. (Ja.) 304A. 11 (*on* ii. 1. 7); **B** the state of having more than one shape एकस्मिन्नेवोदयेऽनेकरूपताप्यशुभा AdbhuSāg. 40. 13; **C** the state of being of various types or kinds पुनश्च सुवविषये तदित्यनेकरूपता MīmāKau. iii(1). 91. 8 (*on* i. 2. 44); iii (1). 91. 15 (*on* i. 2. 44)

अनेकरूपत्व (anekarūpa-tva) *n.* **A** the state of having more than one form or nature एकस्यानेकरूपत्वं नालिकादिपरिग्रहात्। यथा तथैव तत्र स्यात् बहूनामेकरूपता VākyaPa. 2. 113; अनेकरूपत्वाच्च नैकरूपग्रहणे सर्वात्मकवस्तुग्रहणप्रसङ्गोऽपि दर्शनीयः Śarka. 27. 1; अत्र तेन वस्तुन एवानेकरूपत्वादेवंविधप्रतीतिरिति वाच्यम् Śarka. 102. 16; चित्रवदनेकरूपत्वादत्रैकरूपाभ्युपगमो मृषा NyāyRa. 633. 10 (*on* 5(14). 78); सिप्सिचोरर्थस्य त्यागोपादानाभ्यां युक्तो व्यपदेशिवद्भावः इडागमभावाभावाभ्यामनेकरूपत्वाद्वा Pradī. vii. 191. 14 (*on* viii. 3. 59); एकस्य चानेकरूपत्वं दृष्टं यथा वृक्षस्य स्कन्धशाखाविटपादिरूपता Aparā. 992. 21 (*on* 3. 118); प्रत्यभिज्ञाया हि भेदप्रत्ययबाधकत्वं प्रस्तुतं तद्धेतुत्वे च भेद एव निषेधो नैकस्यानेकरूपत्वम् VedāntKa. 170. 28 (*on* i. 3. 28); न चाणोर्युगपदनेकरूपत्वं विना सांशतयोपपद्यते NyāySu. (Ja.) 304A. 11 (*on* ii. 1. 7); एवं सत्येकस्यानेकरूपत्वं जीवस्य न संभवति AṇuBh. 357. 13 (*on* iv. 4. 18); **B** the state of being of various kinds or types दिनादिर्लभ्यते कालो योगिनां योगकारकः। भुक्तेरनेकरूपत्वात् स्थूलः कालः स गम्यते MaBhāsk. 6. 50; सुवर्णस्यानेकरूपत्वं सुवर्णप्रकृतित्व एव AṇuBh. 117. 8 (*on* i. 4. 24); लीलाया अनेकरूपत्वात् AṇuBh. 353. 22 (*on* iv. 4. 14); तर्हि पितृद्वारा सुपुत्रावाप्तिमुक्तिस्वर्गलक्ष्मीप्राप्त्यादेस्तत्तत्प्रयोजनस्यानेकरूपत्वात्तावतः फलत्वकल्पने विपरीतं गौरवम् TristhaSe. 17. 27; अध्वर्युकर्तृकत्वाद्यादाय च नियमविधित्वमित्यादि तत्तद्विधिष्वनेकरूपत्वेऽपि क्वचित्केनचिद्रूपेण व्यवहारः MīmāKau. iii (1). 92. 2 (*on* i. 2. 44); **C** the state of having various forms or natures अनेकरूपत्वात् अभ्रादिभिः पर्जन्यस्य वैरूप्यम् ChāndoUBh. 109. 7 (*on* ii. 15. 1); न हि ब्रह्मणश्शुक्तेरिव स्वतोऽनेकरूपत्वम् IṣṭaSi. 71. 6; द्विष्ठस्यानेकरूपत्वात् सिद्धस्यान्यानपेक्षणात्। ... तेन कर्तापि कल्पितः ĪśvaPraSū. i. 2. 11; भूः...। यास्यत्यनेकरूपत्वमित्युक्त्वा लज्जिताभवत् (गिरिसुता) RāmāMañ. 19. 8; अनेका चेत्तस्या अपि विशेषत्वापत्तिः। अनेकरूपत्वैकजीवितत्वाद्विशेषाणाम् SyādvāMañ. 14 (47); अनेकरूपत्वम् विरुद्धधर्मवत्त्वं माहात्म्यार्थं स्वरूपे निरूपयति AṇuBh. 87. 13 (*on* i. 3. 25)

अनेकरूपत्वप्रतिपादन (anekarūpatva-pratipādana) *n.* expression of the state of having various forms or natures अनेन च वस्तुनोऽनेकरूपत्वप्रतिपादनेनातत्कारिव्यवच्छेदविषयत्वमपि प्रत्युक्तम् Śarka. 26. 27.

अनेकरूपत्वप्राप्ति (anekarūpatva-prāpti) *f.* attainment of the state of having various forms ज्ञानस्य गुणस्य कथमनेकरूपत्वप्राप्तिः VedāntKa. 391. 21 (*on* iii. 3. 1)

अनेकरूपत्वयोग (anekarūpatva-yoga) *m.* tenability of the state of having more than one form ब्रह्मात्मना दृग्दृश्ययोरभेद इत्ययुक्तम् दृग्दृश्यरूपाभ्यां ब्रह्मण एकस्य अनेकरूपत्वयोगात् IṣṭaSi. 21. 22.

अनेकरूपत्वानुपपत्ति (anekarūpatvānupapatti) *f.* untenability of the state of having more than one form युगपदेकस्यानेकरूपत्वानुपपत्तितर्कसहकृतमेकत्वप्रत्यभिज्ञानं भेदप्रत्ययबाधकमिति भावः PrakaVi. 280. 16.

अनेकरूपत्वाभाव (anekarūpatvābhāva) *m.* absence of the state of having more than one form ब्रह्मणस्त्वनेकरूपत्वाभावात् तज्ज्ञानं दहत्येवाशेषमज्ञानम् IṣṭaSi. 71. 5; ब्रह्मणोऽनेकरूपत्वाभावात् स्वयंप्रकाशत्वाच्च तज्ज्ञाने परिपूर्ण उदिते ... पुनरपि जन्मान्तरादिसंसारबीजमज्ञानमवशिष्यते ... इति न शक्यं कल्पयितुम् IṣṭaSi. 72. 16.

अनेकरूपत्वार्थ (anekarūpatvārtha) *adj.* meant for the state of having various kinds or types विद्वांस इति बहुवचनं वैदुष्यस्यानेकरूपत्वार्थम् CaturCin. iii (1). 402. 3.

अनेकरूपदैत्यान्त (anekarūpadaityānta) *m.* destroyer of demons of various forms विष्णुं जिष्णुं महाविष्णुं प्रभविष्णुं महेश्वरम्। अनेकरूपदैत्यान्तं नमामि पुरुषोत्तमम् MahāBhā. xiii. 633* (2)

अनेकरूपधृक् (anekarūpa-dhṛk) *adj.* assuming various forms कृते त्रेतायुगे विष्णुर्द्वापरेऽनेकरूपधृक् BhaviP. 451A. 23 (iii(2). 24. 17); त्वमेव ब्रह्मा रुद्रश्च सूर्यश्चानेकरूपधृक् GaṇeP. i. 85. 19; अविद्धधृक् परः साक्षी सर्वात्मानेकरूपधृक् ŚivaP. ii (2). 15. 40 (85B. 9)

अनेकरूपनिरूपक (anekarūpa-nirūpaka) *adj.* which describes various forms अनेकरूपनिरूपकैः सर्ववेदान्तैः प्रत्ययो ज्ञानं यस्य तत्तथा AṇuBh. 207. 26 (*on* iii. 3. 1)

अनेकरूपनिर्माण (anekarūpa-nirmāṇa) *n.* creation of various forms अनेकरूपनिर्माणं जनितं तेन (पार्थिवेण) विद्यया PadmP. (Ra.) 72. 20.

अनेकरूपप्रतिपत्ति (anekarūpa-pratipatti) *f.* acquisition or assumption of various forms अनेकरूपप्रतिपत्तिसंभवाच्च एकैका देवता बहुभी रूपैरात्मानं प्रविभज्य बहुषु यागेषु युगपदङ्गभावं गच्छति BrahmSūBh. (Śaṅ.) 188. 15 (*on* i. 3. 27)

अनेकरूपप्राप्ति (anekarūpa-prāpti) *f.* attainment of various forms तत्रैवोत्पन्नानां भवत्येवमनेकरूपप्राप्तिः ततः प्रकृते किं परिहृतम् PrakaVi. 271. 21.

अनेकरूपभवन (anekarūpa-bhavana) *n.* becoming, i.e. assumption of various forms कल्प्यमाने त्वग्निर्देवतारूपोऽनेकरूपभवनसमर्थो वाग्रूपो भूत्वा सर्वत्र प्रविष्ट इति संगच्छते AṇuBh. 162. 13 (*on* ii. 4. 14)

अनेकरूपभेद (aneka-rūpabheda) *m.* [Inst.] through the distinction of various forms अनेकरूपभेदेन रश्मिवच्चक्रमण्डले। तेन काया समुद्दिष्टा नाभिनेम्यन्तरे स्थिता PauṣkS. 8. 176.

अनेकरूपरूप (anekarūpa-rūpa) *adj.* of the nature of (assuming) various forms भगवानभवत्स्वयम्। ... अनेकरूपरूपोऽसौ सुरूपश्च सनातनः। श्रीकृष्णः ĀdiP. 12. 24.

अनेकरूपरेवन्तविभ्रम (anekarūpa-revantavibhrama) *m.* resemblance or semblance of Revanta (son of Mārtāṇḍa) who has (assumed) many forms राजसूनवः ... ते महौजसः। बिभरांचक्रिरेऽनेकरूपरेवन्तविभ्रमम् TriṣaŚaPuC. i.1.798.

अनेकरूपलावण्यवनिता (aneka-rūpalāvaṇyavanitā) *f.* many beautiful or charming women ब्राह्मणः ... ययौ शैलं मन्दरम् ... अनेकरूपलावण्यवनितोषितपादपम् PadmP. iv. 105. 25.

अनेकरूपवत् (anekarūpa-va(n)t) *adj.* possessing various forms कार्यकारणवद्रूपं समुत्थायेति शब्द्यते। अविद्यासंगतेरस्य जायतेऽनेकरूपवान् BṛĀraUBhVā. ii. 4. 423; अनेकरूपवान्देवो मयूरेशोऽखिलेश्वरः GaṇeP. ii. 100. 1; ii. 54. 18; अहर्निशं भूप स्मर्तव्योऽनेकरूपवान् ... अहम् GaṇeP. ii. 143.18.

अनेकरूपवदन (anekarūpa-vadana) *adj.* (used as noun) (one) having various kinds of faces हे नानानना अनेकरूपवदनाः स न नाः Kāvyānu. (He.) 259. 2.

अनेकरूपवर्ण (aneka-rūpavarṇa) *adj.* having various forms and colours अनेकरूपवर्णश्च ...। उत्पातरूपो जगतः पीडां दहतु मे शिखी VasiS. 18.145.

अनेकरूपवर्णाढ्या (anekarūpavarṇāḍhyā) *adj.* (*f.*) rich in various kinds of beauty and complexion स्त्रियः ...। अनेकरूपवर्णाढ्या उपालब्धो वदस्व ह PadmP. i. 15. 38.

अनेकरूपव्रत (anekarūpa-vrata) *m., n.* various types of vows गोवधाद्युपपातककारिणः ... अनेकरूपव्रतैः पापानि निर्हरेयुः ManvaMu. 473. 10 (*on* 11.107)

अनेकरूपसंयुक्त (anekarūpa-saṁyukta) *adj.* associated with various forms एतैश्चान्यैः ...। सर्वमासीज्जगद्व्याप्तम् ... अनेकरूपसंयुक्तैर्मांसमेदोवसाशिभिः MahāBhā. iii. 170. 48.

अनेकरूपसंस्थान (aneka-rūpasaṁsthāna) *adj.* assuming or having various forms and guises अनेकरूपसंस्थाना नानाप्रहरणाश्च ते। यक्षेन्द्रं मनुजश्रेष्ठ माणिभद्रमुपासते MahāBhā. iii. 140. 6; पुष्करा नाम ते मेघाः ... वर्षन्त्येते युगान्तेषु ... अनेकरूपसंस्थानाः पूरयन्तो महीतलम् VāyuP. i. 51. 41; BrahmāṇḍP. i. 22. 44.

अनेकरूपाकृति (aneka-rūpākṛti) *adj.* of various types and shapes अनेकरूपाकृतिभिर्हि बाणैः ...। स एव एकस्तव पुत्रसेनां जघान MahāBhā. ix. 23. 64.

अनेकरूपाकृतिवर्णनाद (aneka-rūpākṛtivarṇanāda) *adj.* of various forms, shapes, colours and sounds प्लवगाः... । अनेकरूपाकृतिवर्णनादाः ... नदन्ति Rāmā. iv. 540* (11)

अनेकरूपाङ्घ्रिविलोचन (aneka-rūpāṅghrivilocana) *adj.* possessing many forms, feet and eyes अनेकरूपाङ्घ्रिविलोचन त्वमनेकशीर्षश्रुतिबाहुजिह्वः GaṇeP. ii. 48. 11.

अनेकरूपात्मकत्व (anekarūpātmaka-tva) *n.* the state of having the nature of possessing more than one form अत्रैकैकस्यानेकरूपात्मकत्वे परस्परविरुद्धानामपि रूपाणामभेदे च न विप्रतिपत्तव्यम् SetuBa. 9. 16.

अनेकरूपादिग्रहण (anekarūpādi-grahaṇa) *n.* apprehension of various forms etc. (objects of sense-organs) त्वङ्मात्रमेव हि बुद्धीन्द्रियमनेकरूपादिग्रहणसमर्थमेकम् कर्मेन्द्रियाणि पञ्च सप्तमं च मनः Bhām. 389. 21 (*on* ii. 2. 10); VedāntKa. 256. 26 (*on* ii. 2. 10)

अनेकरूपायोग (anekarūpāyoga) *m.* untenability of more than one form or nature (संविदाम्) यासां भेद इष्यते तासां तस्याश्च भेदो न स्यात् ...। एकस्या अनेकरूपायोगात् IṣṭaSi. 15. 18.

अनेकरूपालिखन (anekarūpālikhana) *n.* graphic description or portraiture of various forms अनेकरूपालिखनप्रगल्भया ... वर्तिकयेव चिन्तया। स तामनाप्तेक्षणसंस्तवां पुरा लिलेख NavaSāC. 4. 6.

अनेकरूपाविर्भाव (anekarūpāvirbhāva) *m.* manifestation or appearance of various forms, i.e. sundry mimicry अनेकरूपाविर्भावकृतिज्ञानं कला स्मृता ŚukraNī. 4(3). 68.

अनेकरूपिन् (anekarūp-in) *adj.* [*f.* - iṇī] **A** of various kinds or types अतिभक्तिप्रभावेन वाच्यस्यानेकरूपिणः। संमुखीकरणादीनां कर्मणा संप्रयोजितम् PauṣkS. 32. 60; **B** of various forms गुणत्रयस्य यत्साम्यं साविद्यानेकरूपिणी JayāS. 4. 55; अनेन निहता दुष्टा बलिनोऽनेकरूपिणः GaṇeP. ii. 18. 36; अनेकरूपिणि विभौ ...। अमृतं विषरूपं च तत्र किं किं न संभवेत् GaṇeP. ii. 44. 9; **C** of various shapes अस्मात्तु येऽन्ये प्रासादाः स्मृतास्तेऽनेकरूपिणः SamarāSū. 55. 107.

अनेकरूपोपादान (anekarūpopādāna) *n.* assumption of many forms कति देवाः ... इत्युपक्रम्य त्रयश्च त्री च सहस्रेत्यनेकरूपोपादानमैश्वर्ययोगादुपन्यस्य ... देवतानिरूपणं ब्रह्मणा चोक्तम् BrahmSūBh. (Bhā.) 66. 12 (*on* i. 3. 33)

अनेकरेखापक्ष (anekarekhā-pakṣa) *m.* [Loc.] in the view of (having) more than one, i.e. two lines एकरेखात्मकभूपुरपक्षे सा रेखा परिगृहीतभूमेरन्तभागे लेख्या। ... ततश्चानेकरेखापक्षे रेखे तत्तदन्तरेव लेख्ये संपद्येते SetuBa. 335.1.

अनेकरेणुपिञ्जर (anekareṇu-piñjara) *adj.* tawny due to many (particles of) pollen dust अनेकरेणुपिञ्जरम् ... पुनातु जाह्नवीजलम्। मां बिन्दुभिः SaṁgīRa. i. 279. 5 (1(8). 14)

अनेकरोग (aneka-roga) *m.* several diseases काशीनाथाभिधानः ...। येनानीय ... द्विजचरणरजो मूर्ध्नि विन्यस्तमात्रम् ... सिद्धौषधमिव ... अनेकरोगान् जहार Vidvanmo. 1. 5.

अनेकरोगविहत (anekaroga-vihata) *adj.* struck or affected by several diseases धिगत्यन्ताशुचिं देहम् ... अनेकरोगविहितम् (v.l. °विहतम् BJP. Ed.) PadmP. (Ra.) 39.118.

अनेकरोगविहित (anekaroga-vihita) *adj.* possessing or full of several diseases धिगत्यन्ताशुचिं देहम् ... अनेकरोगविहितम् PadmP. (Ra.) 39. 118.

अनेकरोगसंपूर्ण (anekaroga-sampūrṇa) *adj.* full of several diseases स्त्रियः स्युर्निशि भोजनात्। ... अनेकरोगसंपूर्णमलिनाः PadmP. (Ra.) 14. 296.

अनेकरोगादि (anekarogādi) *adj.* several diseases etc. तपोधनानां व्रतशीलशालिनामनेकरोगादिनिपीडितात्मनाम्।... विधीयते व्यापृतिरुज्ज्वलादरात् SubhāRaSaṁ. 889.

अनेकरोगानुगत (anekarogānugata) *adj.* followed, i.e. affected by several (minor) diseases अनेकरोगानुगतो बहुरोगपुरोगमः। ... दुर्निवारः शोषो व्याधिः SuśruS. vi. 41. 3 (comm. उपद्रवसंज्ञकाः तैरनुगत आश्रितः); अनेकरोगानुगतः ...। राजयक्ष्मा AṣṭāHṛ. iii. 5. 1; Jīvān. 394. 7.

अनेकरोगिन् (anekarog-in) *adj.* having several diseases कुम्भीपाकरौरवादिषु स्थानेषु दुःखान्यनुभूयेह जातानामिमानि लक्षणानि भवन्ति। तद्यथा ब्रह्महा कुष्ठी गोघ्नश्चान्धोऽनेकरोगिणश्च ŚaṅkhaLiDS. 375.

अनेकरौद्रसत्त्व (aneka-raudrasattva) *m., n.* various types of ferocious beasts बह्वपायमिदं वनमनेकरौद्रसत्त्वसंकटत्वात् PañcT. 1. 54 (28) (45. 11); Pañcā. 21. 20.

अनेकर्णसमवाय (anekarṇa-samavāya) *m.* accumulation of several debts or liabilities यस्त्वनेकर्णसमवायाद्युगपदनेकधनिकैः दुःसाधः स कथं दाप्यः SmṛtiCan. iv. 390. 12.

अनेकर्त्विक्कार्य (anekartvik-kārya) *n.* duty (to be performed) by more than one priest ऋत्विक्समास एकस्यर्त्विजोऽनेकर्त्विक्कार्यसंबन्धः MayūMāli. 337. 16 (*on* ii. 8. 10)

अनेकर्त्विगाश्रिता (anekartvig-āśritā) *adj. (f.)* resorted to, i.e. performed by more than one priest वैहारिकीनामानेकर्त्विगाश्रितानामेकक्रियाणामुपदेशः NyāyMañ. i. 238. 31.

अनेकर्षि (anekarṣi) *m.* several seers अनेकऋषि(?कर्षि)मतानुसारिणस्त्रयः पक्षा अभिहिताः BālamBha. i. 265. 23 (*on* 1. 89)

अनेकर्षिकर्तृकत्व (anekarṣikartṛka-tva) *n.* the state of having several seers as authors (*lit.* agents) वेदानामनेकऋषि(?कर्षि)कर्तृकत्वे ... ऋषीणां स्रष्टृत्वानुपपत्तेः ŚivārkaMaDī. i. 464. 25 (*on* i. 3. 28)

अनेकर्षिगण (anekarṣi-gaṇa) *m.* group of many seers भगवन्तम् ... अनेकऋषि(?कर्षि)गणमध्योपविष्टं पप्रच्छ रोमपादः पालकाप्यम् Hastyāyur. 618. 24 (4. 7)

अनेकलक्षण (aneka-lakṣaṇa) *adj.* **A** (used as noun) (thing) possessing various characteristics or symbols नानेकलक्षणैरेकभावनिष्पत्तेः NyāySū. iv. 1. 35; **B** of various kinds or types अनेकलक्षणार्थस्य प्रसिद्धस्याभिधानतः। संशयादिप्रसङ्गः किं स्यात् NyāyVi. 2. 458 (comm. क्रमाक्रमानेकरूपस्य अर्थस्य चेतनेतरवस्तुनः)

अनेकलक्षण (aneka-lakṣaṇa) *n.* **1A** more than one rule अपवादो नामानेकलक्षणप्रसङ्गः MahāBh. ii. 42. 19 (*on* iii. 1. 32); **1B** many rules यत्रानेकलक्षणसंनिपाताभावस्तत्रानर्थकं कात्पूर्वग्रहणमिति अनेकलक्षणसंनिपाते कात्पूर्वग्रहणं कालावधारणार्थं विज्ञायते Pradī. v. 136B. 3 (*on* vi. 1. 135); **2A** more than one definition किमेतद्वाक्यमेकलक्षणाभिप्रायम् उतानेकलक्षणाभिप्रायम् NyāyKu. 187. 17; **2B** many definitions समासकरणे ... न चानेकलक्षणोक्तिवैयर्थ्यम् NyāySu. (Ja.) 96B. 13 (*on* i. 1. 2); 97A. 2 (*on* i. 1. 2); **3** many characteristics (ब्रह्मणः) अनेकलक्षणाभिन्नस्यानेकत्वप्रसङ्गः NyāySu. (Ja.) 107A. 8 (*on* i. 1. 2)

अनेकलक्षणा (aneka-lakṣaṇā) *f.* **A** indication in various senses तत्तद्भावापन्नं ब्रह्मैव सर्वत्र कारणमिति नानेकलक्षणा AṇuBh. 141. 8 (*on* ii. 3. 5); **B** implication (in the case) of more than one word ऐक्यपरतानेकलक्षणया कुतः Nyāyāmṛ. 595B. 11.

अनेकलगुडप्रहार (aneka-laguḍaprahāra) *m.* many strokes or beatings with stick (महामत्स्यः) यद्भविष्यस्तु अनेकलगुडप्रहारजर्जरितशरीरः पञ्चत्वमुपनीतः Tantrākhyā. 38.6; Pañcā. 87. 19.

अनेकलता (aneka-latā) *f.* several creepers अनेकलता वसन्तोद्भवैः कुसुमैर्वनलीलायां प्रफुल्लिता नम्रा भवन्ति SāmaraU. 229. 12.

अनेकलताग्रथिता (anekalatā-grathitā) *adj. (f.)* woven or thickened with several creepers तस्मिन् कदम्बवने निर्भरसेचनरससंकुलिता अनेकलताग्रथिताः सुवर्णालवालश्रेणयो ग्रथिताः जलपुष्करिण्य इवागाधजलपूरिता एवासते SāmaraU. 267. 15.

अनेकलतान्तर (anekalatāntara) *n.* [Loc.] in the interior of several creepers सूक्ष्मलतान्तरे शय्योपकरणानि। अनेकलतान्तरे रासक्रीडा भवतितराम् SāmaraU. 283. 17.

अनेकलब्धि (aneka-labdhi) *adj.* having many acquisitions (of supernatural powers) वज्रेण विचक्रेऽनेकलब्धिना। सहस्रपत्रं कमलम् PariPar. 12. 286.

अनेकलब्धिमत् (anekalabdhi-ma(n)t) *adj.* endowed with many accomplishments श्रीवज्रस्वामी ... अनेकलब्धिमान् सहजमप्रतिरूपं रूपं विकुर्व्य सौवर्णे सहस्रपत्रे निषद्य देशनां विधाय राजादिजनताममोदयत् ViviTīKa. 69.28.

अनेकलब्धिवत् (anekalabdhi-va(n)t) *adj.* (irr.) endowed with many accomplishments °श्रीआचार्यनागहस्तिगुरूणामनेकलब्धिवतां पुत्रेच्छया पादप्रक्षालनजलं पिब PurāPraSaṁ. 92. 16.

अनेकलयम् (anekalayam) *adv.* with various pauses or stops, with

different rhythms (in music) विहगाः ... इह गाः कलयन्त्यनुक्षणमनेकलयम् ŚiśuVa. 4. 36 (comm. अनेके बहुविधा लया विच्छेदा यस्मिन् कर्मणि तद्यथा तथा गाः वाचः); SaraKaṇṭhā. 204. 23 (comm. कूजितक्रियान्तरालकालो द्रुतमध्यविलम्बितात्मानेको लयः)

अनेकलास्यसंयुक्त (anekalāsya-saṁyukta) *adj.* endowed with, i.e. performing various dances (गणाः) अनेकलास्यसंयुक्ता वीरभद्राग्रतोऽभवन् SkandP. i (1). 3.61.

अनेकलिङ्ग (aneka-liṅga) *n.* **1A** more than one (image of Śiva in the form of) phallus आत्मार्थलिङ्गेषु स्वयंभुवं परार्थके। कुर्यादनेकलिङ्गेषु चैकलिङ्गं न कारयेत् MānaSā. 52. 139; 52. 60; **1B** phallus associated or set with many (gods), i.e. many phalli चलितभिन्नादिदोषदुष्टमनेकलिङ्गं च वर्ज्यम् ĪśānŚiPa. ii. 19. 23 (2); **2A** many genders अनेकलिङ्गसंभवेऽपि सौकुमार्यात् कविभिः स्त्रीलिङ्गमेव प्रयुज्यते VakroJī.36.1; **2B** several indications or characteristics लिङ्गद्वयादनेकलिङ्गानां प्रबलतया तदनुसारेणैवाद्दश्यत्वाग्राह्यत्वयोर्नेतव्यत्वात् ŚivārkaMaDī. i. 380. 20 (*on* i. 2. 22); **3** characteristics of many अनेकलिङ्गसंदोहे बलवत्कस्य किं भवेत् Bhām. 157. 2 (*on* i. 1. 28)

अनेकलिङ्ग (aneka-liṅga) *adj.* **1** having many genders अनेकलिङ्गत्वेऽपि पदार्थस्य स्त्रीलिङ्गविषयः प्रयोगः क्रियते VakroJī. 114. 5; **2** having many symptoms or indications अनिलपित्तकफशोणितानि ... रोगाननेकलिङ्गानुत्पादयन्ति Hastyāyur. 278. 10 (2. 55)

अनेकलिङ्गोपन्यास (anekaliṅgopanyāsa) *m.* explanation or statement of many indications or characteristic marks इदमेव चानेकलिङ्गोपन्यासे बीजम् MīmāKau. ii. 117. 14 (*on* ii. 4. 8)

अनेकलिपिज्ञ (anekalipi-jña) *adj.* (used as noun) knower of many scripts सलेख्येन समानेन लेख्येन युक्तिभिश्चानेकलिपिज्ञेन कृतं स्वलेख्यं शुद्धिं न यातीत्यध्याहार्यम् Aparā. 691. 20 (*on* 2. 92)

अनेकलीला (aneka-līlā) *f.* **1** many playful activities कोऽपि वेत्ति न ते कूटं कर्म यत्त्वं करोषि हि। ... अनेकलीलाविर्भावं कुर्वन् ĀdiP.16.22; **2** more than one playful activity एकस्यैव भक्तस्य पौर्वापर्येणानेकलीलासंबन्धित्वं श्रूयते AṇuBh. 217. 11 (*on* iii. 3. 9)

अनेकलीलाविलास (aneka-līlāvilāsa) *m.* many gestures of amorous play अहो विचित्रता कार्यपरिणतेर्या स्वशुद्धान्तसौधाबद्धवसतिरनेकलीलाविलासनिर्भरं भोगसुखमनुभवन्ती ... मया द्रष्टव्या (मलयसुन्दरी) TilaMañ. 380. 6.

अनेकलोक (aneka-loka) *m.* **1** many worlds अनेकलोकान् स महत्तमादीन् भुक्त्वा ... विष्णोः परमं पदम् ... प्राप्नोति MatsyaP. 58. 56; **2** many people लहरभूपालो निर्ययौ नगरान्तरात्। अनेकलोकसंयुक्तः RājTa. (Prā.) 645; 756.

अनेकलोकधातु (aneka-lokadhātu) *m.* many world regions or world-systems तेष्वपि तेषामज्ञानम्। अनेकलोकधात्वन्तरितदेशत्वात् Sphuṭā. i. 5. 17 (*on* 1. 1) [cf. **लोकधातु**, DBHS.]

अनेकलोकप्रलय (aneka-lokapralaya) *m.* many dissolutions or destructions of worlds मृकण्डुपुत्रेण ...। अनेकलोकप्रलयाः समीक्षिताः PadmP. vi. 236. 97.

अनेकलोकाद्भुतरचना (anekalokādbhutaracanā) *f.* extra-ordinary or marvellous creation of many worlds अनेकलोकाद्भुतरचनायुक्तब्रह्माण्डकोटिरूपस्य ... उत्पत्तिस्थितिभङ्गकरणं न लौकिकम् AṇuBh. 10. 5 (*on* i. 1. 2)

अनेकलोकाशय (anekalokāśaya) *m.* intention of many people अस्ति ... अनेकलोकाशयविभक्तरागाभिनिवेशविलासिनीकुचपीठमर्दकपीठमर्दकविटविदूषकजनावटवनाभिधाना राजधानी YātrāPra. 1. 12 (5)

अनेकलोकोत्पादितप्रत्यया (anekalokotpādita-pratyayā) *adj.* (*f.*) who has created faith among many people (श्रीसुदत्ताचार्यः) अनेकलोकोत्पादितप्रत्यययाः पुरदेव्याः सिद्धायिकायाः ... उद्यानम् अवलोक्य YaśasCam. i. 107. 1.

अनेकलोचन (aneka-locana) *n.* many eyes माहेन्द्री त्वगनेकलोचनपदैः कीर्णा पताका कृता TripuDi. 3. 5.

अनेकलोचन (aneka-locana) *m.* epithet of god Śaṅkara (*lit.* having many, i.e. three eyes) शंकरे ... सुभगोऽनेकलोचनः ŚeṣaNā. 1585; गङ्गाधरः ... सुभगोऽण्डैक (v.l. अनेक)लोचनः KalpaK. 390. 93 [name of Indra, Apte; name of the Supreme being, he being said to be *sahasrākṣaḥ, sahasrapāt* etc., Apte.]

अनेकवक्तृवचन (anekavaktṛ-vacana) *n.* statements of more than one speaker एकस्य ग्रन्थस्यानेकवक्तृवचनसंदर्भमयत्वे प्रमाणाभावात् AbhinBhā. i. 9. 7 (*on* 1. 6)

अनेकवक्त्र (aneka-vaktra) *adj.* **A** having many faces लिङ्गेन च पुनर्दृष्टः शूलः शंकरवल्लभः। संभूतोऽनेकवक्त्रस्तु हर्षाद्विस्मितमानसः SkandP. v(2). 51. 28; **Bi** having many mouths, i.e. hoods प्रक्षीणक्लेशराशिर्विषमविषधरोऽनेकवक्त्रः सुभोगी। ... देवोऽहीशः स वोऽव्यात् YogBh. 1. 8 (*on* 1. 0); शेषो न वर्णने शक्तोऽनेकवक्त्रो न चात्मभूः GaṇeP. ii. 52. 38; **Bii** having more than one mouth, i.e. head; स स्तौति ... एकवक्त्रोऽनेकवक्त्रः ... कर्मणां परमीशं च स्तोतुं को वाप्यनुत्तमम् PāñcaRā. (Nā.) i. 12. 41.

अनेकवक्त्रनयन (aneka-vaktranayana) *adj.* having many mouths and eyes हरिः। दर्शयामास पार्थाय परमं रूपमैश्वरम्। अनेकवक्त्रनयनम् MahāBhā. vi. 33. 10 = BhagGī. 11. 10; JayāS. 21. 230; अनेकवक्त्रनयनो ज्वलज्ज्वलनभीषणः। वीरभद्र इति ख्यातः करपादायुतैर्युतः MatsyaP. 72. 12; PadmP. v. 24. 27; अनेकवक्त्रनयनम् ... रूपं पाशुपतास्त्रस्य प्रोक्तम् ĪśānŚiPa. ii. 12. 92.

अनेकववक्त्रवत् (anekavaktra-va(n)t) *adj.* having many faces सिंहगो बर्हिगो वापि गजास्योऽनेकवक्त्रवान् GaṇeP. i. 91. 42.

अनेकवक्त्रशिरस् (aneka-vaktraśiras) *adj.* having many faces and heads (भानुः) दर्शयामास तद्रूपम् ...। अनेकवक्त्रशिरसम् BhaviP. 239A. 24 (i. 160.29)

अनेकवक्त्रुच्चारित (anekavaktr-uccārita) *adj.* pronounced or uttered by many speakers अनुनासिकादीनां तु धर्माणां युगपदनेकवक्त्रुच्चारिते वर्णे समवेतानां कथमनेकवर्णविषयत्वम् ŚāstrDī. 93. 10 (*on* i. 1. 5); युगपदनेकवक्त्रुच्चारितस्य गकारस्य नानात्वम् NyāyRa. 731. 20 (*on* 6. 11)

अनेकवचन (aneka-vacana) *adj.* expressive of many (senses or meanings) आत्मशब्दो ह्यनेकवचनः NyāyKu. 114. 19.

अनेकवचन (aneka-vacana) *n.* **1** many (unconnected) speeches आह्वानं च निवारणनिर्माणे चाप्यनेकवचः (v.l. आवाहने निवारणनिदर्शने चाप्यनेकवचने च)। ... त्रिपताकहस्तजानि ... कर्माणि NāṭyaŚā. 9. 51; **1B** many statements, cf. **अनेकवचनविरोध 1; 2A** (case-suffix indicating) plural number पदार्थतावच्छेदकभेदेन एकशेषानेकवचनयोरुक्तिः GuruCandr. i. 100. 15; **2B** non-singular or plural affix ईश्वरस्य बहुवचनवाच्यत्वे भेदः स्यादित्यत आह। एकस्मिन्ननेकवचनप्रयोगं संप्रतिपन्नस्थले दर्शयति TattvPrakā. 116B. 6 (*on* ii. 3. 22) [dual, Apte]; **3** the expression '*aneka*' (more than one) अनेकवचनमुपसर्जनार्थम् LaŚabdeŚe. i. 529. 12.

अनेकवचनविरोध (anekavacana-virodha) *m.* **1** contradiction with many (Smṛti) statements जाबालयमवचनाभ्यां प्रतिषिद्धानाम् ... अप्यनुष्ठानार्थम्। अनेकवचनविरोधात् HārLa. 6. 14; मनुवचनम् ... स्त्रीणाम् ... अपत्य उत्पन्ने देवरेण धनलोभो न कर्तव्यस्तस्यैव तद्धनं समर्पयेदित्येवमर्थपरं व्याख्येयम् अनेकवचनविरोधात् Subodhi. 64. 25 (*on* 2. 136); **2** contradiction with plural case-suffix 'अनियतसंख्यस्त्रीधनमङ्गीकृत्य ... प्राप्तं शिल्पैस्त्विति तेन न तत् स्त्रीधनं सौदायिकं तु तथा' इति तदपास्तम्। अनेकवचनविरोधापत्तेः BālamBha. ii. 256. 9 (*on* 2. 144)

अनेकवचस् (aneka-vacas) *n.* many (unconnected) speeches आह्वानं च निवारणनिर्माणे चाप्यनेकवचः।... त्रिपताकहस्तजानि ... कर्माणि NāṭyaŚā. 9.51.

अनेकवडवामुखसहस्र (aneka-vaḍavāmukhasahasra) *n.* several thousands of submarine fires (*lit.* one having faces of mares) अन्यथा त्वामाग्नेयास्त्रप्रतापितमनेकवडवामुखसहस्रपरिक्षीणतोयं सद्यः करिष्यामि Tantrākhyā. 38. 23; PañcT. 1. 127 (47) (138. 6)

अनेकवत् (aneka-vat) *adv.* like more than one आदित्य एक एवानेकेषु जलभाजनेषु अनेकवत् प्रतिभासते ViṣṇuSaBh. 46. 7 (*on* 18); दृगेका सर्वभूतेषु भाति दृश्यैरनेकवत् NaiṣkaSi. 74. 8; 89. 5; एकोऽप्यनेकवत्तैस्तु सेनः पल्लीशसंयुतः। ददृशे दृग्दुरालोको जलबिम्बितसूर्यवत् SamarāSaṁ. 7. 310.

अनेकवदनीभूत (anekavadanī-bhūta) *adj.* which has become the possessor of many mouths स्तोतुं तमाद्यमर्हन्तं पद्यैर्भृङ्गनिनादिभिः। अनेकवदनीभूत इव पद्माकरो महान् TriṣaŚaPuC. i. 2. 222.

अनेकवधूसहित (anekavadhū-sahita) *adj.* accompanied by many wives or spouses अनेकवधूसहितः ... कापालिकनामा योगी ... बन्धुश्रीगृहमागतः SamyaKau. 43. 1.

अनेकवनशोभाढ्य (anekavanaśobhāḍhya) *adj.* rich in grandeur of many groves गतो भूपः ...। बाणस्य तत्पुरश्रेष्ठम् ... अनेकवनशोभाढ्यम् SkandP. v(3). 26. 61.

अनेकवनितासख (anekavanitā-sakha) *m.* [P. v. 4. 91] friend of many ladies स त्वनेकवनितासखोऽपि सन् पावनीमवलोक्य संततिम् RaghuVa.19.53.

अनेकवनेचरनिशाचर (aneka-vanecaraniśācara) *m.* many foresters and demons (भीमः) अनेकवनेचरनिशाचरैः। आश्वासभवनं यक्षभवनं दिव्यमैक्षत PārśvC. 7. 638.

अनेकवरदातृ (anekavara-dātṛ) *adj.* giver or bestower of many boons नमः ... अनेकवरदात्रे ते (गणेशाय) GaṇeP. ii. 37. 7.

अनेकवरिवस्या (aneka-varivasyā) *f.* many kinds of worships सुरथः ...। अनेकवरिवस्याभिः श्रीरामं समतोषयत् PadmP. iv. 53. 29.

अनेकवर्ग (aneka-varga) *adj.* consisting of many divisions यास्यन् पुरो रक्ष्यमनेकवर्गम् ... बलं विदध्यात् NītiSā. 16. 17.

अनेकवर्ण (aneka-varṇa) *adj.* [*f.* - ā] **1A** having various colours, variegated, multi-coloured गवामनेकवर्णानां क्षीरं स्यादेकवर्णकम् PārāSi. 154; नभःस्पृशं दीप्तमनेकवर्णम् ... दृष्ट्वा हि त्वाम् MahāBhā. vi. 33. 24 = BhagGī. 11. 24 (*but* Śaṅ. अनेके वर्णाः भयंकराः यस्मिन् त्वयि तं त्वाम्); दिव्यां मालामुरसानेकवर्णां समुद्वहन्तम्। अपश्यमेनम् MahāBhā. xiii. 15. 12; अनेकवर्णं पवनावधूतं भूमौ पतत्याम्रफलं विपक्वम् Rāmā. iv. 27. 19; अनेकवर्णैः श्वभिः ... अनुगम्यमानम् ... शबरसेनापतिमपश्यम् Kād. 31. 2; (कुमारः) अनेकवर्णान् रूप्यधातून् ... अवलोकमानः ... चीरवाससं ददर्श AvantiKa. 225. 15; हिरण्मयं दीप्तमनेकवर्णम् ... पुरुषं भजन्ते (कृतिनः) ŚāraTi. 25. 58; मूर्छद्भिरन्योन्यमनेकवर्णैर्घनाविलेऽह्नीव सहस्रभासम्। तन्वानमिन्द्रायुधजालमुस्रैः ... ददर्श रामः ... अण्डजेशम् RāmC. 32. 2; शरीररक्षाधिकारनियुक्तानां वीरपुरुषाणामन्योन्यलग्नाभिरनेकवर्णगुणलयनिकाभिः ... स्थपुटितावकाशं स्वावासमव्रजन्(?म्) TilaMañ. 123. 6; प्रकृतिश्चास्यानेकवर्णा मनुष्यसवर्णा च YaśasCam. ii. 364. 16; वासांस्यनेकवर्णानि महार्हाणि GaṇeP. i. 1. 35; अनेकवर्णैः शितिकान्तिभिः ... महांशुकैस्तेन जिनेश्वरोऽर्चितः VasaViKā. 13. 15; अनेकवर्णो भवति ...। होतृदाही च यो वह्निर्द्विजानां क्षयमादिशेत् Hastyāyur. 714. 15 (4. 36); कृकलासोऽनेकवर्णे जन्तुभेदे NānārthaMa. 1931; समानयेत् .... कन्दुकमनेकवर्णम् KandaCū. iii. 3. 11; पयस्विन्याः पुत्रम् ... अनेकवर्णम् ... उत्सृजेत् BālamBha. i. 583. 3 (*on* 1. 252); अनेकवर्णं वियतीन्द्रचापम् SiddhāTaVi. 35. 18; **1B** (used as noun) (deity) of various colours मध्यजिह्वायै अनेकवर्णायै ... स्वाहा LiṅgaP. ii. 25. 57; **1C** (used as noun) (material) of various colours (विषे) पक्वाशयगते पुनः। अनेकवर्णं वमति AṣṭāHṛ. i. 7. 23; **2** of various types or species अनेकवर्णैः ... महाद्रुमैः ... तपःप्रधानाः ... शृङ्गं गिरेश्चिन्तयितुं न शेकुः MahāBhā. iii. 161. 7; ततस्त्वनेकवर्णाः स्युश्चरवः प्रतिदैवतम् MatsyaP. 58. 14; अनेकवर्णैः कुसुमैर्गन्धैः ... अर्चयित्वारभेत ताम् SamarāSū. 72. 12; **3** (used as noun) (substitution) consisting of various syllables or letters अनेकवर्णः सर्वस्य। अयं विधिः षष्ठ्योक्तस्य सर्वस्यैव स्यात् SiddhaHe. vii. 4. 107 (Vṛtti अनेकवर्ण आदेशः) [involving more than one (unknown) quantity (the unknown quantities x, y, z, etc. being represented in Sanskrit by colours *nīla*, *kāla* etc.), APTE]

अनेकवर्ण (aneka-varṇa) *m.* **1** various colours अनेकवर्णचारुभिर्दिव्यांशुककलापैः पल्लवितम् ... कल्पतरुखण्डमपश्यत् TilaMañ. 213. 22; YaśasCam. ii. 174. 4; **2** many castes पादपः ... प्रजापतिरिव प्रदर्शितानेकवर्णप्रसूतिः YaśasCam. ii. 174. 4 (comm. ब्राह्मणक्षत्रियवैश्यशूद्राणां प्रसूतिमुत्पत्तिं प्रदर्शयति); **3** various letters or syllables ध्वनयः ... भासयन्ति... अनेकवर्णपरिमाणस्थानसंस्थानभेदम् Bhām. 244. 16 (*on* i. 3. 28); **4** field-mouse महामूषस्तु ...। अनेकवर्णो वनजः KalpaK. 324. 58 (pw.) [(in algebra compounded with various words to denote) many unknown quantities (colours) representing x, y, z, etc., MW.]

अनेकवर्णकचित्रित (anekavarṇaka-citrita) *adj.* painted with various colours अन्येद्युश्च रथकारः ... अनेकवर्णकचित्रितम् ... गरुडयन्त्रमादायोपस्थितः Pañcā. 50. 2.

अनेकवर्णकल्पना (anekavarṇa-kalpanā) *f.* assumption of many letters or syllables वीचीतरङ्गादिन्यायेनानेकवर्णकल्पनायां गौरवमपास्तम् VaiyāBhū. 256. 26 (*on* 68)

अनेकवर्णकुसुम (anekavarṇa-kusuma) *n.* flower of various colours रम्योऽयमनेकवर्णकुसुममञ्जरीमञ्जुलतरस्तरुवनाभोगः DaśKuC. 107. 18.

अनेकवर्णकृत (anekavarṇa-kṛta) *adj.* caused by various letters यत्र संयोगादनन्तरं सर्वनामस्थानं तत्र यद्युपधायाः सर्वनामस्थानस्य चानेकवर्णकृतं व्यवधानं तथापि दीर्घत्वं भवत्येव Nyās. ii. 503. 9 (*on* vi. 4. 10)

अनेकवर्णगुणन (anekavarṇa-guṇana) *n.* multiplication of many unknown quantities, MW., APTE.

अनेकवर्णगोचर (anekavarṇa-gocara) *adj.* referring to various letters or syllables स्मरणस्य चैकस्यैव युगपदनेकवर्णगोचरस्य ... अक्रमत्वात् NyāyRaMā. 75. 21.

अनेकवर्णज्वाल (anekavarṇa-jvāla) *adj.* of flame of various colours वह्निस्तु सविषमन्नं प्राप्यैकावर्तो रूक्षमन्दार्चिरिन्द्रायुधवदनेकवर्णज्वालो भृशं चटचटायते AṣṭāSaṁ. i. 46. 7 (1. 8)

अनेकवर्णता (anekavarṇa-tā) *f.* the state of having various colours गत्वा च संपिण्डितसुरचापपरमाणुनिवहमनोहराकारमनेकवर्णतया क्वचिद्धूलोचनयुगमिव कृष्णतारोचितम् ... अभिनवं मठमैक्षिष्ट TilaMañ. 222. 2.

अनेकवर्णत्व (anekavarṇa-tva) *n.* the state of being many castes अनेकवर्णत्वोद्देशेन विधीयमानमुपनयनं दृष्टान्तीकृतम् CaturCin. ii (1). 5. 18.

अनेकवर्णधर (anekavarṇa-dhara) *adj.* [*f.* - ā, ī] having or possessing of various colours शक्रकुमार्यः कार्याः ... एतासाम्। प्रीतैः कृतानि विबुधैर्यानि पुरा भूषणानि सुरकेतोः। तानि क्रमेण दद्यात् ... रसना स्वयंभुवा शंकरेण चानेकवर्णधरी BṛSaṁ. 43. 42; किमेतस्यैष समयवशादनेकवर्णधरः कोऽपि मणिदलविशेषः UdaySuKa. 28. 19; 29. 8; धवला भस्मनः प्रलेपेन, कपिला जटाभिः, आपाटला जटानामग्रकोटिभिः आवरणवल्कलेन च हरितकान्तिभिरित्यनेकवर्णधरा मूर्तिरिव गारुडी ... तपस्विनी ... निर्जगाम UdaySuKa. 69. 7; तस्याः ... अनेकवर्णधरेण विचित्रयन् रणरणकमिन्द्रचापेन ... विवेश ... अम्भोमुचां कालः UdaySuKa. 103. 11.

अनेकवर्णध्वनि (anekavarṇa-dhvani) *m.* sounds of various letters अनेकवर्णध्वनिकल्पने मानाभावात् VaiyāSiMañ. 227. 4.

अनेकवर्णन (aneka-varṇana) *n.* various descriptions कायोत्सर्गः पारितः श्रीसंघेन। प्रतिष्ठा जाता। ऊदावसहीति नाम जज्ञे। - इत्याद्यनेकवर्णनानि तथापि किंचित् खण्डितसंबन्धा लिख्यन्ते PurāPraSaṁ. 27. 3.

अनेकवर्णनिचय (anekavarṇa-nicaya) *m.* collection or store-house of various colours मणिरत्नमयं चित्रम् ...। अनेकवर्णनिचयम् ... तं विद्धि मेरुं नगोत्तमम् VāyuP. i. 34. 65.

अनेकवर्णपद (aneka-varṇapada) *n.* various letters and words अनुभवोऽपि च वाक्यात्मानमेकमवयविनमनेकवर्णपदव्यासङ्गिनमङ्गप्रत्यङ्गवर्तिनमिव देवदत्तमनुभवेत्प्रत्यस्तमितवर्णपदविभागं वा TattvBi. 9. 3.

अनेकवर्णभेद (anekavarṇa-bheda) *m.* [Inst.] by way of difference in various colours रसे रसायने चैव योज्यं वज्राभ्रकं प्रिये। अनेकवर्णभेदेन तद्यतुर्विधमभ्रकम्। रक्तं पीतं च हेमार्थे कृष्णम् ... शुक्लं च Rasā. 6. 8.

अनेकवर्णमेघौघ (anekavarṇa-meghaugha) *adj.* accompanied by groups of clouds having various colours अनेकवर्णमेघौघास्संगीताम्बरदिक्चयाः। विवान्ति वाता हृदयं हारयन्तीव वेगिनः ŚivaP. ii (2). 22. 3 (95A. 7)

अनेकवर्णराग (aneka-varṇarāga) *adj.* **1** possessing various hues of colours मध्यधवलभासेनेन्द्रायुधेनेवातिदीर्घेण लोचनयुगलेन परितो महामण्डलमिवानेकवर्णरागमालिखन्तं सितपीतलोहितपताकावलीशबलं शिवबलिमिव दिक्षु विक्षिपन्तम् ... कलेर्भगवन्तं साक्षादिव विरूपाक्षं भैरवाचार्यं ददर्श HarṣaC. 155. 9 (Bālabodhinī अनेके वर्णरागाः शुक्लादयः); **2** (anekavarṇa-rāga) having affection for many castes, HarṣaC. 155. 9 (Bālabodhinī अनेकेषां वर्णानां ब्राह्मणादीनां प्रेमयुक्ताः)

अनेकवर्णरुचिर (anekavarṇa-rucira) *adj.* **1** charming with various colours सपुलकाभ्यां दोर्भ्यामात्मकर्णादपनीयानेकवर्णरुचिरं संदेशमिव कर्णाभरणमस्य कर्णे कृत्वा कण्ठागतबाष्पगद्गदिकागृह्यमाणाक्षरमवादीत् Kād. 264. 15; **2** charming with various syllables, Kād. 264. 15.

अनेकवर्णरूप (aneka-varṇarūpa) *adj.* having various colours and forms अनेकवर्णरूपं च ...। दृष्ट्वैवं देवदेवस्य रूपं भानोर्महात्मनः BhaviP. 227B. 10 (i. 153. 47)

अनेकवर्णवत् (anekavarṇa-va (n) t) *adj.* possessing various colours अग्निप्रतिष्ठितं लिङ्गं तत्रास्तेऽनेकवर्णवत्। तद्देवदर्शनादेव सर्वक्रतुफलं लभेत् BrahmP. 98. 22.

अनेकवर्णवसन (anekavarṇa-vasana) *n.* **i** garment of various colours भागभागार्पितानेकवर्णवसनवेष्टितोष्णीषम् ... यथायथकथमौत्तरपथं बलम् YaśasCam. i. 465. 2; **ii** (characteristic of) the Bhūyiṣṭha type of garment of Lord Kṛṣṇa युगं चतुष्कं भूयिष्ठं वसनं त्रिविधं हरेः। ... अनेकवर्णवसनं भूयिष्ठं कथितम् BhaktiRaSi. ii. 1. 140.

अनेकवर्णविषय (anekavarṇa-viṣaya) *adj.* referring to various letters किं पुनर्हलित्येवमादीनामनेकवर्णविषयाणां संज्ञाशब्दानाम् Nyās. i. 153. 16 (*on* i. 2. 10)

अनेकवर्णविषयता (anekavarṇaviṣaya-tā) *f.* the state of referring to various letters न च संस्कारसाहित्यादनेकवर्णविषयता NayaVi. 176. 1 (*on* i. 1. 5)

अनेकवर्णव्यवकलन (anekavarṇa-vyavakalana) *n.* substraction of unknown quantities, APTE.

अनेकवर्णव्यवधान (anekavarṇa-vyavadhāna) *n.* intervention or interruption by various letters अनेकवर्णव्यवधानेऽपि लघुनि स्यादेवेति मतम् KātanVṛ. *on* iii. 3. 35.

अनेकवर्णसमीकरण (anekavarṇa-samīkaraṇa) *n.* [Math.] equation with various letters of alphabet (indicating unknown quantity) एकवर्णसमीकरण-

मुक्त्वा ... क्रमप्राप्तमनेकवर्णसमीकरणम् ... आह BījGa. 9.134.

अनेकवर्णस्मृति (anekavarṇa-smṛti) *f.* recollection of various letters संस्कारैः संभूयानेकवर्णस्मृतिः कृतेति युक्तम् NayaVi. 180. 6 (*on* i. 1. 5); 181.1 (*on* i. 1. 5)

अनेकवर्णहार (aneka-varṇahāra) *m.* division of unknown quantities, Apte.

अनेकवर्णाकृति (aneka-varṇākṛti) *adj.* having various colours and shapes अनेकवर्णाकृति खे प्रकाशते पुरं पताकाध्वजतोरणान्वितम् BṛSaṁ. 36.5.

अनेकवर्णाञ्चित (anekavarṇāñcita) *adj.* full of, i.e. adorned with various colours अनेकवर्णाञ्चितमन्यथा कथं पयोमुचा निर्मितमिन्द्रकार्मुकम् VikraDeC.13.21.

अनेकवर्णात्मकत्व (anekavarṇātmaka-tva) *n.* the state of having the nature of various letters ननु वर्णानामपि वाचकत्वे विभक्त्यन्तत्वे च पदत्वमेव। तत्किमर्थं पृथग् ग्रहणम्। एकानेकवर्णात्मकत्वविवक्षयेति ब्रूमः NyāySu. (Ja.) 182A. 4 (*on* i. 4. 2)

अनेकवर्णादेश (anekavarṇādeśa) *m.* substitution for various letters or syllables अक्षु चानेकवर्णादेशेषु Vār. 10 *on* P. i. 1. 50; MahāBh. i. 123. 25 (*on* i. 1. 50)

अनेकवर्णानुभव (anekavarṇānubhava) *m.* experience or knowledge of various letters or syllables (at one time) एवं च वर्णानां क्रमवतामाशुतरविनाशित्वेनैकदानेकवर्णानुभवासंभवात् TarkBhā. (Ke.) 49. 9.

अनेकवर्णाभिव्यक्ति (anekavarṇābhivyakti) *f.* expression of many letters or syllables अनेकवर्णाभिव्यक्तीनां यौगपद्याभावेन मन्त्रत्वस्याभिव्यक्त्यनापत्तेः MīmāKau. iii(2). 108. 5 (*on* ii. 1. 33)

अनेकवर्णावृत्ति (anekavarṇāvṛtti) *f.* repetition, i.e. alliteration of different letters or syllables स्यादावृत्तिरनुप्रासो वर्णानां पदवाक्ययोः। एकवर्णानेकवर्णावृत्तेर्वर्णगुणो द्विधा AgniP. 342. 1.

अनेकवर्णास्पद (anekavarṇāspada) *n.* abode of various letters or syllables प्रणवम् ... सरः ...। त्रयीरहस्यं विचितं तपोधनैरनेकवर्णास्पदमेकमक्षरम् YātrāPra. 9. 41.

अनेकवर्णोच्चारण (anekavarṇoccāraṇa) *n.* utterance of various letters or syllables न ह्येको वक्ता युगपदनेकवर्णोच्चारणक्षमः NyāyRa. 528. 11 (*on* 5(11). 71); अनेकवर्णोच्चारणस्य तद्धेतुत्वे दूरेऽपि तदप्रत्ययापत्तेः TattvCin. iv(1). 440. 5.

अनेकवर्णोपवर्णन (anekavarṇopavarṇana) *n.* description as having various colours चक्षुरादेरनेकवर्णोपवर्णनम् KāvyMī. 85. 19; Kāvyānu. (He.)18.1.

अनेकवर्तिनी (aneka-vartinī) *adj.* (*f.*) exisiting in more than one (substratum) द्वित्वादिका परार्धान्ता संख्या यानेकवर्तिनी ĀtmaSi. 60. 20.

अनेकवर्त्मन् (aneka-vartman) *adj.* consisting of various modes, i.e. recensions एकोऽप्यनेकवर्त्मेव समाम्नातः पृथक् पृथक् VākyaPa.1. 5.

अनेकवर्षशतिक (aneka-varṣaśatika) *adj.* many hundreds of years old अनेकवर्षसाहस्रो (v. l. °शतिको) वृद्धस्त्वमसि पार्थिव Rāmā. ii. 2. 15; अनेकवार्षिको यस्तु चिर(v.l. अनेकवर्षशतिकश्चिर)कालसमुत्थितः। सोऽयमद्य हतः शेते Rāmā. iii. 64. 21.

अनेकवर्षसंभुक्त (anekavarṣa-sambhukta) *adj.* experienced through many years क्वानेकवर्षसंभुक्तश्चपचावनिपभ्रमः YogVā. v. 50. 2.

अनेकवर्षसहस्र (aneka-varṣasahasra) *n.* many thousands of years तथा हि अनेकवर्षसहस्रातीतपृथुसंबन्धा मही तेनैव व्यपदिश्यते पृथिवीति ManuBh. ii. 253. 19 (*on* 9. 44)

अनेकवर्षसाध्य (anekavarṣa-sādhya) *adj.* to be accomplished through many years प्रारब्धकर्मणश्चासमाप्तावनेकवर्षसाध्यस्य च मासव्रतस्यारब्धस्यान्यस्मिन्वर्षे पुनरारम्भसंकल्पविरोधः CaturCin. iii(2). 64. 10.

अनेकवर्षसाहस्र (aneka-varṣasāhasra) *adj.* many thousands of years old अनेकवर्षसाहस्रो वृद्धस्त्वमसि पार्थिव Rāmā. ii. 2. 15.

अनेकवर्षसाहस्रम् (anekavarṣasāhasram) *adv.* for many thousands of years अनेकवर्षसाहस्रं तपन्तं कुशिकात्मजम्। साधु साध्विति राजर्षिमूचुर्ब्रह्मादयः सुराः Rāmā. i. 1095*(2)

अनेकवलभीकूट (anekavalabhī-kūṭa) *n.* ends of many turrets or upper rooms तटे निषधकूटस्य श्लक्ष्णचारुशिलातले ...। अनेकवलभीकूटप्रतोलीशतसंकटम्। ... रक्षसां राक्षसं पुरम् VāyuP. i. 41. 52.

अनेकवल्गित (aneka-valgita) *n.* various gallops or leaps, i.e. exercises in weapons धनुर्वेदः ...। अनेकवल्गिताकारभूषणः पिङ्गलेक्षणः। ... वृषारूढस्स उच्यते NītiPra. 2. 4 (comm. अनेकवल्गितानि शस्त्राभ्यासाः)

अनेकवल्लीवलय (anekavallī-valaya) *m.*, *n.* circle, i.e. grove of many vines अनेकवल्लीवलयलटभा वृतयः क्व ताः TriṣaŚaPuC. ii. 1. 120.

अनेकवसु (aneka-vasu) *n.* various kinds of wealth (स्त्री) ईर्ष्यान्विता सुखपरा शशिशुक्रलग्ने ...। शुक्रज्ञयोस्तु रुचिरा सुभगा कलाज्ञा त्रिष्वप्यनेकवसुसौख्यगुणा शुभेषु Bṛhajjā. 24. 13.

अनेकवसु (aneka-vasu) *adj.* possessing much wealth यत्र ... कतिपयवसुविराजितमनेकवसवः समुपहसन्ति स्वर्गवासिनं जनं जनाः NalaCam. 1.27(3)

अनेकवसुप्राण (anekavasu-prāṇa) *adj.* having much effulgence as the life - principle ये त्वनेकवसुप्राणदेवा ज्योतिःपुरोगमाः। वसवोऽष्टौ ViṣṇuP. i.15. 109; KūrmaP. 171. 14(1. 16); AgniP. App. 4. 57; NaraP. 5. 45.

अनेकवस्तु (aneka-vastu) *n.* **1A** many things or objects आत्मशब्दश्च लोकेऽस्मिन् प्रसिद्धोऽनेकवस्तुषु BṛĀraUBhVā. iv. 3. 281; तस्य च संस्थानस्य चानेकवस्तुषु प्रकारतयावस्थितिः VedāSaṁ. 107. 5; ननु सर्ववस्तूनां स्वभिन्नत्वेऽपि न तच्छून्यत्वापत्तिः अनेकवस्तूनामेव संभवात् LaCandr. 795. 31; **1B** more than one thing or object परमार्थतो वाक्यार्थगतत्वेनास्यालंकारस्य संभवेऽप्येकया क्रिययानेकवस्तुनो भिन्नस्य संबन्धादौचितीवशेन पदार्थगतत्वेनाभिधानम् Ekāva. 8. 16(7) (241. 9); पर्यायेण यदेकस्य वस्तुनोऽनेकवस्तुनि। गमनं वर्ण्यते सा हि पर्यायालंकृतिर्मता AlaṅkāMañ. 151. 14; **1C** different entities संस्थानरूपप्रकाराख्यस्य पदार्थस्यानेकवस्तुनिष्ठतयानेकवस्तुविशेषणत्वं द्वितीयादिप्रत्ययावगम्यमिति द्वितीयादिप्रत्ययाः सविकल्पका इत्युच्यन्ते VedāSaṁ. 88. 9; **2** more than one referent एतदेव सूत्रकाराणां परं कौशलं यदेकेनैव वाक्येन स्वल्पैरेवाक्षरैरनेकवस्तुसमर्पणम् NyāyMañ. i. 26. 4.

अनेकवस्तुक्रय (anekavastu-kraya) *m.* purchase of many things or objects अनेकवस्तुक्रयविक्रयैश्च ... संशोभितं जगति ... नगरं नरेन्द्र BrahmāṇḍP. ii. 27. 14.

अनेकवस्तुजाती (aneka-vastujātī) *f.* various things and jasmine flowers सुरथो वीक्ष्य श्रीरामम् ...। अनेकवरिवस्याभिः (v. l. अनेकवस्तुजातीभिः) ... समतोषयत् PadmP. iv. 53. 29.

अनेकवस्तुविशेषण (anekavastu-viśeṣaṇa) *n.* differentiating factor of various things or objects संस्थानरूपप्रकाराख्यस्य पदार्थस्यानेकवस्तुनिष्ठतयानेकवस्तुविशेषणत्वं द्वितीयादिप्रत्ययावगम्यम् VedāSaṁ. 88. 10.

अनेकवस्तुविषय (anekavastu-viṣaya) *m.* object of many things सा ... °अनेकवस्तुविषयमात्रभाविनी TattvSaṁPañ. 223. 15 (*on* 673)

अनेकवस्तुविषय (anekavastu-viṣaya) *adj.* which has many things as its objects समसनं समासः संक्षेप इत्यर्थः। संक्षेपश्चानेकवस्तुविषयः Nyās. i. 340. 4 (*on* ii. 1. 4)

अनेकवस्तुसंकीर्ण (anekavastu-saṅkīrṇa) *adj.* mixed up with, i.e. involving many topics यत्तु 'अनेकपदसंकीर्णः पूर्वपक्षो न सिध्यति' इति तत्र यद्यनेकवस्तुसंकीर्ण इत्युच्यते तदा न दोषः Mitā. 132. 2 (*on* 2. 6)

अनेकवस्तुसद्भाव (anekavastu-sadbhāva) *m.* existence of various things or objects अनेकवस्तुसद्भावे जायमानतयाथवा। विभक्तानेकतन्त्वादिविषया इव बुद्धयः TattvSaṁ. 673.

अनेकवस्तुसंनिपात (anekavastu-sannipāta) *m.* coming together or concurrence of many things यानेकवस्तुसंनिपाते सत्युपजायते सा ... इयं संयुक्तधीः TattvSaṁPañ. 223. 14 (*on* 673)

अनेकवस्तुसंबन्ध (anekavastu-sambandha) *m.* relation with many things सममौचित्यतोऽनेकवस्तुसंबन्धवर्णनम्। अनुरूपं कृतं सद्म हारेण कुचमण्डलम् Candrā. 5. 81.

अनेकवस्तुसूचन (anekavastu-sūcana) *n.* indication of more than one thing or referent श्रुत्यर्थद्वारकानेकवस्तुसूचनशालिषु। सूत्रेष्वनेकार्थविधेर्वाक्यभेदो न दूषणम् NyāyMañ. i. 25. 26.

अनेकवस्त्वनुपगम (anekavastv-anupagama) *m.* non-admittance of different entities, i.e. categories यथानेकवस्त्वनुपगमेऽपि परमतेऽणुचयो धीहेतुः NayaVi. 97. 8 (*on* i. 1. 5)

अनेकवस्त्वालम्बन (anekavastv-ālambana) *adj.* based on many things येनेदमुच्यते विज्ञानमपास्य तन्निदर्शयितव्यम् इति। अनेकवस्त्वालम्बनं हि यत्र ज्ञानं तत्रेदं युज्यते वक्तुम् Bṛha. 240. 9 (*on* i. 1. 5)

अनेकवाक्य (aneka-vākya) *n.* **Ai** many sentences or statements इयं च विद्वद्रेहेष्वेव दृश्यते इत्येतावतः प्रभूतस्यार्थस्यानेकवाक्येन प्रतिपादितत्वात् SaraKaṇṭhā. 86. 16; उपधानमात्रस्य विधेयत्वे 'चित्रिणीरुपदधाति वज्रिणीरुपदधाती'त्यनेकवाक्यानां वैयर्थ्यापत्तिः LaCandr. 372. 29; **Aii** more than one sentence or statement, cf. **अनेकवाक्यगतत्व; Bi** various injunctive sentences भवतु वा अनेकवाक्यकल्पनम्

... तस्मात्तदेवेदं कर्म न तु कर्मान्तरमिति सिद्धम् Bhām. 595. 5 (*on* iii. 3.7); **Bii** various originative injunctions, cf. **अनेकवाक्योत्पादित.**

अनेकवाक्यगतत्व (anekavākyagata-tva) *n.* the state of being conveyed by more than one sentence असंभवद्वस्तुनिदर्शना त्वेकवाक्यानेकवाक्यगतत्वेन द्विविधा SāhiDa. 556. 8; अत्र तु विधायकानां लिङामनेकत्वाद्विकाराणां चानेकवाक्यगतत्वेन तावद् विकारविशिष्टैकप्रयोगविधायकत्वकल्पनानवकाशात् VidhiRa. 41 (205.16)

अनेकवाक्यगा (anekavākya-gā) *f.* variety of figure of speech called Nidarśanā (*lit.* what is conveyed by more than one sentence) वस्तुनिदर्शना त्वेकवाक्यानेकवाक्यगतत्वेन द्विविधा। ... अनेकवाक्यगा यथा SāhiDa. 557. 2.

अनेकवाक्यज्ञान (anekavākya-jñāna) *n.* knowledge of more than one sentence ब्राह्मणेऽग्निहोत्रादिवाक्यैः साध्यसाधनेतिकर्तव्यतावत्यां भावनायां नियुक्तेषु पुरुषेष्वेकानेकवाक्यज्ञानं क्वोपयुज्यते TantrVā. 424. 23 (*on* ii. 1. 46)

अनेकवाक्यता (an-ekavākyatā) *f.* absence of syntactic unity प्रधानोत्पत्तिवाक्यैर्गुणानुवादे परस्पराश्रयं, अनेकवाक्यता ... एते दोषाः प्रसज्येरन् CaturCin. iii(1). 114. 4; त्रिकपक्षेऽप्यनेकवाक्यतां स्वादिसूत्रे वक्ष्यति न्यासकारः PaiVr.(Sī.)44.3.

अनेकवाक्यत्व (an-ekavākyatva) *n.* absence of syntactic unity सिद्धे ह्यनेकवाक्यत्वे कल्प्या भिन्नाधिकारिता BṛĀraUBhVā. (Sambandha.) 285.

अनेकवाक्यलक्षणा (anekavākya-lakṣaṇā) *f.* indication of more than one sentence निवर्तन्त इत्येकस्य वाक्यस्य मुख्यत्वायानेकवाक्यलक्षणाश्रयणायोगात् ŚrutaPra. iB. 233. 18 (*on* i. 1. 17)

अनेकवाक्यविहित (anekavākya-vihita) *adj.* enjoined or prescribed by various injunctive sentences वागन्तेन दीक्षणीया ... इत्याद्यनेकवाक्यविहितस्वरभेदवत्त्वात् तत्तदिष्टीनां तत्तदिष्टिसंबद्धप्रयाजादिदेवानां भेदापत्तेः VīraMi. (Saṁskāra.) 893. 7.

अनेकवाक्यव्यवहिता (anekavākya-vyavahitā) *adj.* (*f.*) intervened by many sentences स चोदकशब्दो न दूरे सतीमिमामनेकवाक्यव्यवहितां प्रकृतिमपेक्षिष्यते ŚābaBh. 1866. 4 (*on* x. 3. 2)

अनेकवाक्यसंयुक्त (anekavākya-saṁyukta) *adj.* connected with many sentences अनेकयुक्ति यद्वाक्यमनेकार्थप्रसाधकम्। अनेकवाक्यसंयुक्तं तन्निर्भासनमुच्यते NāṭyaŚā. 16. 26.

अनेकवाक्यसाध्यत्व (anekavākyasādhya-tva) *n.* the state of being what is to be accomplished through many sentences प्रतिवचनस्यानेकवाक्यसाध्यत्वात् मध्ये न चोदनीयम् ŚrutaPra. iA. 91. 19 (*on* i. 1. 1)

अनेकवाक्यस्थ (anekavākya-stha) *adj.* existing, i.e. occurring in many sentences अहंशब्दैश्चिन्मात्रमुपलक्ष्यते चेत् अनेकवाक्यस्थाहंशब्दलक्षणैव दोषः ŚrutaPra. iA. 172. 21 (*on* i. 1. 1)

अनेकवाक्यस्वारस्य (anekavākya-svārasya) *n.* fitness for (employing) more than one sentence एकवाक्यस्वारस्यभङ्गेन अनेकवाक्यस्वारस्यं ह्यनुवर्तनीयम् ŚrutaPra. iB. 233. 19 (*on* i. 1. 17)

अनेकवाक्यानुमान (anekavākyānumāna) *n.* inference of many sentences एकार्थानेकपदोपस्थितौ वानेकवाक्यानुमानमेव TattvCin. iv(1). 488. 2.

अनेकवाक्यानुरोध (anekavākyānurodha) *m.* [Abl.] in accordance with many statements बहूनामनुग्रहो न्याय्य इति न्यायेनानेकवाक्यानुरोधात् VīraMi. (Saṁskāra.) 742. 8.

अनेकवाक्यान्तरायत्त (anekavākyāntarāyatta) *adj.* depending upon, i.e. caused by many other sentences भावनाभिधानक्रियायाः ... फलकरणांशपूरणं पदद्वयमात्रसाध्यमितिकर्तव्यतालाभस्त्वनेकवाक्यान्तरायत्तसिद्धिः TantrVā. 872. 13 (*on* iii. 3. 14)

अनेकवाक्यान्तरित (anekavākyāntarita) *adj.* (used as noun) (what is) intervened by many sentences अनेकवाक्यान्तरितस्य च प्रकृतिगामित्वं विक्षेपात् प्रकरणमिव भवति SaṅkarKāBh. 153. 9(*on* iii. 3. 3)

अनेकवाक्यार्थ (aneka-vākyārtha) *m.* **i** many sentence - meanings पदार्थसामर्थ्यादनियमेनानेकवाक्यार्थपरिप्लवे सति ... विशिष्टवाक्यार्थावगतिसिद्धिः NyāyRaMā. 83. 9; **ii** more than one sentence- meaning द्वितीये त्वध्याहृतस्य प्रभुकर्तृकारकस्य निद्रादिष्वन्वय इत्येकस्यानेकवाक्यार्थान्वयेन दीपकच्छायापत्त्या कारकदीपकम् Kuval. 117(7); एकस्यैव कर्तृकारकस्य भिक्षुकस्य विकल्पादिष्वन्वयेनानेकवाक्यार्थान्वयात् AlaṅkāMañ. 157. 27.

अनेकवाक्यार्थरूप (anekavākyārtha-rūpa) *adj.* of the form of many sentence - meanings 'मृग्यः ... दिशि ... उत्पक्ष्मराजीनि विलोचनानि' पूर्वत्र पादत्रयार्थोऽनेकवाक्यार्थरूपः। चतुर्थपादार्थो हेतुत्वेनोपन्यस्तः AlaṅkāSa. 145. 3; RasGaṅ. 632. 12.

अनेकवाक्यार्थहेतुक (anekavākyārthahetu-ka) *adj.* having many sentence - meanings as the cause, caused by many sentence - meanings यत्त्वन्नेत्रसमानकान्ति सलिले ... इत्यनेकवाक्यार्थहेतुककाव्यलिङ्गोदाहरणे ... इन्दीवरशशिहंसविशेषणानि तेषां वाक्यार्थानां हेतुभावोपपादकानि Kuval. 121(65)

अनेकवाक्योत्पादित (anekavākyotpādita) *adj.* (used as noun) (what is) produced, i.e. referred to by various originative injunctions कथं पुनरनेकवाक्योत्पादितस्यैकत्वं विज्ञायते TantrVā. 644. 11(*on* ii. 4. 13)

अनेकवाचक (aneka-vācaka) *adj.* **A** expressive of various (individuals) यः शब्दोऽनेकवाचकः स सर्वो जातिनिमित्तकः NyāySu. (Ja.) 374A. 11 (*on* ii. 2. 6); **B** expressive of various (meanings) नानाशब्दस्यानेकवाचकत्वाद्भावप्रधानत्वादनेकत्वमर्थः GuruCandr. ii. 272. 21.

अनेकवाचकशक्ति (aneka-vācakaśakti) *f.* various expressive powers सर्वव्यक्त्यभिधानं तावदयुक्तम्। अनेकवाचकशक्तिकल्पनाप्रसङ्गात् TantrVā. 273. 11(*on* i. 3. 26)

अनेकवाचना (aneka-vācanā) *f.* more than one reading or recitation तावदेकवाचनया वज्रात्पेठुर्महर्षयः। अप्यनेकवाचनाभिर्यावन्न गुरुसंनिधौ PariPar.12.190.

अनेकवाचिन् (aneka-vācin) *adj.* expressive of various (meanings) न ह्यक्षादिशब्दानां रूढ्यादिनैवानेकवाचिनां क्वचिन्मुख्यता क्वचिन्नेत्यस्ति TattvPrakā. 72B. 12 (*on* i. 4. 16)

अनेकवातायन (aneka-vātāyana) *adj.* having many windows or airholes कूटागारम् ... समन्तात् सुवृत्तं मृत्कर्मसंपन्नमनेकवातायनम् CaraS. i. 14. 46; AṣṭāSaṁ. i. 134. 10 (1. 26); सा ... आलोहितक्षितिविवि(?व)रसहस्रसंपन्नतया पद्मरागविमानमिवानेकवातायनम् ... जीवितेश्वरं तदवस्थं ददर्श AvantiKa. 128.9.

अनेकवातायन (aneka-vātāyana) *n.* many windows or air-holes महाप्रासादैरनेकवातायनविवरविनिर्गतयुवतिभूषणकिरणसहस्रतया कनकशृङ्खलाजालकेनेवापरिवितितेन ... विराजमानम् ... राजकुलं विवेश Kād. 87. 3.

अनेकवातिकमण्डल (aneka-vātikamaṇḍala) *n.* many circles of winds उर्वीपतिः ... नखप्रभाविसरमनेकवातिकमण्डलं भ्रमणलग्नं रक्षाया भूतिरज इव दिक्षु विक्षिपन्तम् ... एकं वेतालमद्राक्षीत् TilaMañ. 46. 20.

अनेकवादिन् (aneka-vādin) *n.* **1** several plaintiffs अनेकवादियुग्मानां युगपदुपस्थाने तु दर्शनक्रममाह SmṛtiCan. iii. 80. 3; **2** many disputants or defendants अनेकवादिनिर्जिष्णुर्वादिपुत्रकपद्धतिम्। वामपादे वहन् PrabhāC. 174. 6; **3** teacher or advocate of the diversity(of souls) एवं निरूपितमेकानेकवादिनां जीवस्वरूपम् SiddhāTa. 4. 24.

अनेकवादिविप्रतिपत्ति (anekavādi-vipratipatti) *f.* difference of opinion among many defendants एवं चानेकवादिविप्रतिपत्तौ ... चोदना प्रमाणत्वेन प्रतिज्ञायते YuktiSneha. 16. 26 (*on* i. 1. 2)

अनेकवाद्य (aneka-vādya) *adj.* full of various musical instruments अनेकवाद्यं विविधास्त्रपङ्क्तिकम् ... विनिर्मयेद् वासगृहं मनोरमम् NāgaSa. 2. 4 (comm. नानावाद्यसहितम्)

अनेकवाद्य (aneka-vādya) *n.* **A** different musical instruments अनेकवाद्यध्वनितैरनारतैर्जगर्ज गाढं गुरुभिर्नभस्तलम् KumāSaṁ. 14.39; **B** different sounds (produced from different instruments) क्रीडामण्डपमेतस्मिन् प्रदेशे देव तिष्ठति ...। अनेकवाद्यसंयुक्तं रमणीयं ययौ हरः SaurP. 59. 38.

अनेकवाद्यजाति (aneka-vādyajāti) *f.* different varieties of musical instruments सदा विजयभेरीणां ध्वनेराकर्णने महः। अनेकवाद्यजातीनां ध्वानालोचनकौतुकम् ParamāKā. 179. 37.

अनेकवाद्यनिर्घोष (anekavādya-nirghoṣa) *m.* sound(s) of different musical instruments राजा ...। अनेकवाद्यनिर्घोषैर्विमानस्यान्तिकं ययौ GaṇeP.i.56.19.

अनेकवाद्यविकृति (anekavādya-vikṛti) *f.* modification (of sounds) produced from different musical instruments अनेकवाद्यविकृतौ ज्ञानं तद्वादने कला। ... स्मृता ŚukraNī. 4(3). 67.

अनेकवानरानीक (aneka-vānarānīka) *m., n.* many troops or batalions of monkeys अनेकवानरानीकनायकेन साक्षादुपकृतेन सख्या सुग्रीवेण महापक्षस्य ... अयमेव ... तस्याभियोगसमयः AnargharaRā. 6. 11(1)

अनेकवापीमणिमन्दिर (aneka-vāpīmaṇimandira) *n.* many wells and mansions of gems or jewels अनेकवापीमणिमन्दिरैश्च। अनोपमं तं भवतो निकेतं मुनीश्वराः प्रापुः Nārāy. iii. 11. 2.

अनेकवायसकुल (aneka-vāyasakula) *n.* various families of crows अस्ति कस्मिंश्चिद् वनोद्देशे महान् न्यग्रोधवृक्षः। ... तत्र (v. l. तत्रानेकवायसकुलपरिवृतो) मेघवर्णो नाम वायसराजः प्रतिवसति स्म PañcT. 3. 1(4) (273. 1)

अनेकवाय्वादिसहकार (anekavāyvādi-sahakāra) *m.* assistance or help of various winds etc. एकशब्देन कथमनेकशब्दारम्भः सामग्र्यभेदादिति चेत्। न। सर्वतोऽनेकवाय्वादिसहकारात् प्रागभावभेदाद् वा TattvCin. i. 631. 1.

अनेकवारकृत (anekavāra-kṛta) *adj.* made or effected many times एवमनेकवारकृतैककर्तृकैककर्मकविक्रयादावपि पुनर्विक्रयादिर्वशित्वाभावान्न सिध्यति SmṛtiCan. iii. 310. 3.

अनेकवारपरिकल्पना (anekavāra-parikalpanā) *f.* contemplation for many times सर्वथा स एवैष भगवाननेकवारपरिकल्पनानिर्मितो विप्रलम्भः पुनःपुनरनुबध्नाति माम् UttaRāC.3. 43(16)

अनेकवारम् (anekavāram) *adv.* many times, again and again, repeatedly अयि वत्स ...। अनेकवारमपरिश्लथं मां परिष्वजस्व Utta RāC. 6. 12(10); तत्कूजितान्यनुवदद्भिरनेकवारं शिष्यायितं गृहकपोतशतैः ŚṛṅgāTi. (Ru.) 1. 62; SāhiDa. 110. 9; प्रसाद्य प्रभो प्रार्थयेऽनेकवारम् Subrahma. 22; मांसं महादुःखमनेकवारं ददाति जग्धं मनसापि पुंसाम् SubhāRaSaṁ. 538; (विनायकः) त्वया तु पूजितोऽनेकवारम् GaṇeP. ii. 22. 7; स चक्रवर्ती भरतः। ... राज्याभयं कर्तुमनेकवारं पुलोमजा यस्य पुरे ययाचे PṛthvīVi. 6. 90; इन्द्रेणानेकवारं निषिद्धोऽहम् SiṁhāDvā.(App.) 242. 0(34); अनेकवारं श्वकाकशूद्रोच्छिष्टदूषितानामेकविंशतिवारं क्षारोदकमार्जनाच्छुद्धिः VīraMi.(Śuddhi.) 117. 29; अम्बुजबीजमाला। ... अनेकवारं परिवर्तयन्तम् ... मुनिम् ... प्रणनाम राजा Rāgh. 2. 6.

अनेकवारोदीरित (anekavārodīrita) *adj.* uttered many times स्वमुखानेकवारोदीरितमधुरशात्कृतिग्राहिणीनाम् ... कलमगोपिकासु ... मुग्धयुवतयः ... पातुमस्थुः AvantiKa. 32. 10.

अनेकवार्षिक (aneka-vārṣika) *adj.* many years old, long-lived अनेकवार्षिको यस्तु चिरकालसमुत्थितः। सोऽयमद्य हतः शेते Rāmā. iii. 64.21.

अनेकवावदूकवादिन् (aneka-vāvadūkavādin) *m.* many noisy or talkative disputants कथमहमिदानीमनेकवावदूकवादिवृषभविघट्टनोपार्जिताम् ... वाचम् ... माधुर्यकोमलां करिष्यामि PadmPrā. 9. 5.

अनेकवासना (aneka-vāsanā) *f.* **A** various desires अनेकवासनामिश्रप्रपञ्चोऽयं धृतो मया NirguMāPū. 17; **2** many impressions अनेकवासनाचित्रं तल्लिङ्गं पटभित्तिवत् BṛĀraUBhVā. ii. 3. 86.

अनेकवासस् (aneka-vāsas) *adj.* wearing more than one piece of cloth गङ्गायाम् ...। एकवासोऽनेकवासोऽप्यकुशस्वर्णरूप्यकम् BṛDharmaP. i. 54. 43.

अनेकवाहनिवह (aneka-vāhanivaha) *m.* many troops of horses सन्ति क्षोणिभुजः क्षितौ कति न ते ये स्वप्रियप्रीतये। वाहं वाहमनेकवाहनिवहान् प्रौढिं दृढां तन्वते HammīMaKā. 14. 9.

अनेकवाहिनीवियोग (anekavāhinī-viyoga) *m.* separation from many rivers तुषारशैलद्रवनिर्झरोदकं समाहरन्नुत्तरभूमिनिम्नगाः। हिमोपचारार्थमनेकवाहिनीवियोगतप्तस्य सरित्पतेरिव VikraDeC. 13. 7.

अनेकविशेषणाभिसंबन्धिन् (anekaviśeṣaṇābhisambandhin) *adj.* associated with more than one qualifier एकस्य वानेकविशेषणाभिस(म्ब)न्धिनोऽनेकशब्दाभिधानमिति NyāyVār. 152. 4 (*on* i. 2. 42)

अनेकविशेषणोपन्यास (anekaviśeṣaṇopanyāsa) *m.* mentioning of several qualifiers वस्तुतस्त्वनेकविशेषणोपन्यास एव परिकर इति न नियमः Kuval.62(27)

अनेकविशेषणोपादान (anekaviśeṣaṇopādāna) *n.* mention of several qualifiers अनेकविशेषणोपादानेऽपि शब्देऽस्य नित्यवैधर्म्यासिद्धेः स्वशब्देनैव नित्यानुपादाय तेभ्योऽन्यत्वादित्युच्यताम् NyāyRa. 817. 7 (*on* 6. 342)

अनेकविशेषयोग (anekaviśeṣa-yoga) *m.* connection with many distinctive features or properties धर्मो जयत्यभ्युदयैकहेतुर्यस्य प्रकारान् षड्डुदाहरन्ति। अवान्तरा-नेकविशेषयोगादन्येऽपि यस्मिन् बहवो भवन्ति CaturCin. ii (1). 4. 5.

अनेकविशेषविधि (aneka-viśeṣavidhi) *m.* many special rules यद्यप्यत्राधिरष्टविधो दर्शितः तथापि गोप्यभोग्ययादृच्छिकसावधिरूपभेदानामत्रानेकविशेषविध्युपयोगार्थतात्पर्यातिशयेन कथनं नान्येषामिति वक्तुं प्रोक्तश्चतुर्विधः SmṛtiCan. iv. 318.2.

अनेकविशेषस्फुरण (anekaviśeṣa-sphuraṇa) *n.* knowledge of various distinctive properties अनेकविशेषस्फुरणं यथा एकमेव भिन्नमभिन्नं चेत्याद्यनैकान्तवादिनाम् NyāyPari. 54. 6.

अनेकविशेषस्मरण (anekaviśeṣa-smaraṇa) *n.* recollection of many distinctive properties धर्मिग्रहणे मिथोविरुद्धानेकविशेषस्मरणं संशयः YatīndraDī.3.19.

अनेकविशेषानुगामित्व (anekaviśeṣānugāmi-tva) *n.* the state of being that which continues or is common to many distinctive features or properties विशेषाणां च येन सह पूर्वं दर्शनमभूत्तस्मिन्ननुपलभ्यमाने स्मरणासंभवात् अतस्तस्यानेकविशेषानुगामित्वात्समानत्वात्समानत्वमपरिहार्यम् NyāyMañ. ii. 125.21.

अनेकविशेषानुषक्त (anekaviśeṣānuṣakta) *adj.* closely associated with many distinctive features कार्यत्वं हि ... असार्वज्ञादिव्याप्तिवित्त्युपयुक्ततरानेकविशेषानुषक्तम् ĀgaPrā. 16. 19.

अनेकविशेषावगति (anekaviśeṣāvagati) *f.* understanding of many distinctive features or proparties प्रायश्चित्तभूतपुनरुपनयने तूक्तवचनेभ्योऽनेकविशेषावगतेस्तत्प्रयोगो लिख्यते BālamBha. i. 58. 22 (*on* 1. 14)

अनेकविशेष्य (aneka-viśeṣya) *m.* many qualificands or substantives शब्दादिः किं विशेष्यः प्रकारो वा ... अनेकार्थपदादनेकविशेष्य(प्र)कारोपस्थित्योरावृत्तिमन्तरेणायोगात् SetuBa. 247. 3.

अनेकविश्राम (aneka-viśrāma) *m.* many resting places तस्याग्रभागाद् गृहनीलकण्ठैरनेकविश्रामविलङ्घ्यशृङ्गात्। सखा प्रकाशेतरमूर्तिना ते केनापि सत्त्वेन निगृह्य नीतः Śāk. 6. 30.

अनेकविषय (aneka-viṣaya) *adj.* [*f.* - ā] **Ai** having more than one object (of comparison) शशाङ्कवत्प्रकाशन्ते ज्योतींषीति भवेत्तु या। एकस्यानेकविषया सोपमा परिकीर्तिता NāṭyaŚā. 16. 44; सादृश्ये भेदेनारोपो रूपकमेकानेकविषयम् Kāvyānu. (He.) 298. 18; 301. 13; 351. 3; **Aii** referring to many objects (सारः) अनेकविषयः स एव RasGaṅ. 626. 18; **Aiii** referring to more than one object वस्तुनि यत्रैकस्मिन्ननेकविषयस्तु भवति संदेहः। प्रतिपत्तुः ... संशयः सः Kāvyālaṅ. (Ru.) 8. 59; **Aiv** (used as noun) one of the two types of the figure of speech called Saṁśaya (*lit.* referring to more than one object) (संशयः) शङ्क्यते। यस्मिन्नेकमनेकत्र सोऽनेकविषयः स्मृतः SaraKaṇṭhā. 444. 25 (comm. यस्मिन्नानाधर्मिण्येकः शङ्क्यते सोऽनेकविषयः); **Bi** having many meanings or referents भावस्य लक्षणं शब्दः लक्ष्यतेऽनेन भावः सर्वो भावसमाख्याशब्दोऽनेकविषयो यथा कुम्भ इति NyāyVār. 479. 8 (*on* iv. 1. 34); न चैकं वाक्यमनेकविषयं संभवति NyāySu. (Ja.) 146B. 11 (*on* i. 1. 7); **Bii** consisting of more than one (word) ननु अनेकविषयः समाहारः नैकस्य संभवति, कथम्, इहैकमप्यपूपं कश्चित्कृपणो ददद्नेकं मन्यते PadMañ. *on* KāśiVṛ. *on* P. ii. 1. 52 (69. 16); **C** concerning more than one (person) एकस्या अप्यनेकविषया रतिराभासः RasTa. 178. 6; **D** having many subjects (*pakṣas*) एवं त्र्यणुकादिकारणानुमानमनेकविषयत्वात्प्रच्यावितम् ŚivārkaMaDī. ii. 75. 35 (*on* ii. 2. 13)

अनेकविषय (aneka-viṣaya) *m.* **A** more than one object (of sense) इन्द्रियान्तरवैयर्थ्यं वा एकैकमेवेन्द्रियमनेकविषयग्रहणं प्रतिसंधत्ते इन्द्रियान्तरोत्पादो व्यर्थः NyāyVār. 351. 18 (*on* iii. 1. 1); **B** many objects (of sense) न चैकदानेकविषयेन्द्रियसंबन्धे युगपज्ज्ञानानुत्पत्त्या ... तदेव ... इन्द्रियं लाघवात् TattvCin. i. 770. 4.

अनेकविषयकत्व (anekaviṣayaka-tva) *n.* **i** the state of referring to many topics (of discussion) आहवनीयवाक्यानुगतो जुहोतिधातुः नानाप्रकरणपठितानन्नारभ्याधीतांश्च सर्वानपि होमान् आहवनीयगुणविधानार्थमनुवदति इत्यनेकविषयकत्वात् न व्यभिचारः PūrvottaVāNaMā. 4. 5; **ii** the state of referring to many objects अनेकतादृशकारणतादिव्यक्तिकल्पनागौरवं तु कल्पनारूपप्रतीतेरनेकविषयकत्वगौरवे पर्यवसन्नम् LaCandr. 354. 19.

अनेकविषयत्व (anekaviṣaya-tva) *n.* **Ai** the state of referring to more than one object चित्रशब्दस्यानेकैकविषयत्वात् (v.l. °स्यैकानेकविषयत्वात्) चित्रशब्देनानेकं

चाभिधीयते NyāyVār. 511. 6 (*on* iv. 2. 12); एकविषयस्यापि वाचकस्यानेकविषयत्वोपपत्तेः SyādvāMañ. 14. (220); विधिफलस्यैकविषयत्वस्वाभाव्येनानेकविषयत्वे आवृत्त्यवश्यंभावात् MīmāKau. iii (2). 199. 4 (*on* ii. 2. 16); विधिफलस्य ... तस्यानेकविषयत्वे बाधप्रसङ्गः BhāṭṭDī. i. 114. 7 (*on* ii. 2. 3); **Aii** the state of referring to many objects न चैवमस्य पादस्यानेकविषयत्वेनानेकत्वापत्तिः NyāySu. (Ja.) 430B. 10 (*on* ii. 3. 1); **Bi** the state of having more than one object एकानेकविषयत्वाच्च प्रत्ययनानात्वाभिमानस्य एकानेकविषयाधिगतिः NyāyVār. 408. 7 (*on* ii. 2. 9); एकस्याश्च संविदोऽनेकविषयत्वदर्शनेन परस्परविरुद्धानेकतादात्म्ये तेषामपि मिथस्तादात्म्यप्रसङ्गात् ŚatDū. 101. 4; **Bii** the state of having many objects बहुत्वमीश्वरापेक्षा बुद्धिजन्यं तद्बुद्धेरनेकविषयत्वेऽप्यदृष्टविशेषोपग्रहो नियामकः Upask. 296. 5 (*on* vii. 1. 9); **Biii** the state of having more than one object (of comparison) इमं चालंकारमेकानेकविषयत्वेन पुनर्द्विविधमामनन्ति RasGaṅ. 626. 6; स च क्वचिच्छृङ्खलानुप्राणितः क्वचित् स्वतन्त्र इत्यनेकविषयत्वमेकविषयत्वं च सुस्थम् RasGaṅ. 627. 14.

अनेकविषयनिरूप्य (anekaviṣaya-nirūpya) *adj.* fit to be described by many objects or things अनेकविषयनिरूप्यस्यापि ईश्वरज्ञानादेः ... अद्वैतस्यैक्यदर्शनात् Nyāyāmṛ. 558A.8.

अनेकविषयबुद्धि (anekaviṣaya-buddhi) *f.* knowledge of more than one object (अनेकद्रव्या संख्या) तस्याः खल्वेकत्वेभ्योऽनेकविषयबुद्धिसहितेभ्यो निष्पत्तिरपेक्षाबुद्धिविनाशाद् विनाश इति PadārthaSaṁ. 111. 6; NyāyKa. 115.9.

अनेकविषययोग (anekaviṣaya-yoga) *m.* contact with many objects एतेन प्रधानपरमाणुवासनासंविद्ब्रह्मप्रभृतीनां निरंशानामेव यथाभागपरिणामावरणानावरणानेकविषययोगादिरुपपद्यत इत्युपरम्यते NyāySiA. 253. 27.

अनेकविषयसंनिधान (anekaviṣaya-sannidhāna) *n.* proximity, i.e. presence of many objects (of senses) प्रदीपादितेजो रूपरसाद्यनेकविषयसंनिधानेऽपि रूपस्यैव प्रकाशीभवितुमर्हति NyāyMañ. ii. 52. 13.

अनेकविषयसंनिधि (anekaviṣaya-sannidhi) *m.* proximity, i.e. presence of many objects (of senses) युगपदनेकविषयसंनिधौ अनेकचक्षुरादिकरणाधिष्ठानेन ... स्मृतीरारभेत Kiraṇā. 130. 15.

अनेकविषयाधिगति (anekaviṣayādhigati) *f.* cognition of more than one object एकानेकविषयत्वाच्च प्रत्ययनानात्वाभिमानस्य एकानेकविषयाधिगतिः कथम् NyāyVār. 408. 8 (*on* iii. 2. 9)

अनेकविषयानुभव (anekaviṣayānubhava) *m.* experience of many objects अणुत्वे युगपदनेकविषयानुभवः कथमिति न शङ्कनीयम् YatīndraDī.69.4.

अनेकविषयाश्रित (anekaviṣayāśrita) *adj.* resorted or attached to various objects मनस्तु चञ्चलं राजन्ननेकविषयाश्रितम् DevīBhāP. vi. 12. 19.

अनेकविषयिणी (anekaviṣay-iṇī) *adj. (f.)* **A** referring to more than one object एकगुणयोरनेकविषयिण्येका बुद्धिरुत्पद्यते PadārthaSaṁ. 111. 11; अनेकविषयिण्युभयैकगुणालम्बिन्येका बुद्धिरुत्पद्यते NyāyKa. 115. 22; **B** referring to many objects यत्र समूहालम्बनात्मिका अनेकविषयिणी कामना तत्र तावतामुत्पत्तिरनिवार्या एव BhāṭṭDī. ii. 131. 17 (*on* iv. 3. 9)

अनेकविषयैकस्मरण (anekaviṣayaikasmaraṇa) *n.* one recollection of more than one object संस्काराणामन्त्यगुणानुभवानन्तरम् ... संयोगैकत्वादनेकविषयैकस्मरणोत्पादे सत्यनुभवस्मरणाभ्यामपेक्षाबुद्धिभ्यां स्वाश्रयेषु शतसंख्या जन्यते NyāyKa. 119. 2.

अनेकविषयोपलब्धि (anekaviṣayopalabdhi) *f.* knowledge of more than one object एकस्यानेकविषयोपलब्धिप्रतिसंधानमनेन सूत्रेणोपदर्श्यते NyāyVār. 366. 10 (*on* iii. 1. 14)

अनेकविषविध्वंसिन् (anekaviṣa-vidhvaṁsin) *adj.* destroying various (types of) poisons नाकुलीयुगलं तिक्तं कटूष्णं च त्रिदोषजित्। अनेकविषविध्वंसि BhojanKu. 63. 20.

अनेकविसभागक्षण (aneka-visabhāgakṣaṇa) *m., n.* many dissimilar moments न ह्येकस्मादनेकविसभागक्षणव्यवहितस्य पूर्वसभागक्षणस्योत्पत्तिः संभवति BrahmSi. 37. 7.

अनेकविस्तर (aneka-vistara) *adj.* having much or great expansion or extension द्वावेव खलु रोगौ निजश्चागन्तुश्च तावनेकविस्तरौ KāśyaS. 39B.13.

अनेकविस्तारता (aneka-vistāratā) *f.* [Inst.] with much or great extensiveness नन्दालये या लीलाः ... कृतास्त्वया। (ताः) अनेकविस्तारतया वद ĀdiP. 14. 122.

अनेकविहगाराव (anekavihagārāva) *m.* noise of several birds स गत्वा पर्वतवरम् ... ददर्श ... अनेकविहगारावबधिरीकृतकाननम् BrahmāṇḍP. ii.22.31.

अनेकविहारदेहधारिन् (anekavihāradehadhār-in) *adj.* assuming various bodies for sport श्रीकृष्णराधारूपिणे। नमोऽनेकविहारदेहधारिणे SāmaraU. 277. 14.

अनेकवीक्षण (aneka-vīkṣaṇa) *adj.* (used as noun) (one) having many eyes, i.e. Indra अनेकवीक्षण क्षतकरण पौलोमीरमण नार्हसि प्रणयकलहकुपितायाः ... अनुनयनानि विधातुम् YaśasCam. i. 81. 2.

अनेकवीरकोटी (aneka-vīrakoṭī) *f.* many crores of heroes or warriors ययौ पुरीं स चक्राङ्काम् ... अनेकवीरकोटीभी रक्षितः PadmP. iv. 23. 3.

अनेकवीरक्षय (anekavīra-kṣaya) *m.* destruction or loss of many heroes or warriors अकाण्डे प्रथनं यथा वेणीसंहारे द्वितीयेऽङ्केऽनेकवीरक्षये प्रवृत्ते भानुमत्या सह दुर्योधनस्य शृङ्गारवर्णनम् KāvyPra. 440. 2.

अनेकवीरयुत (anekavīra-yuta) *adj.* accompanied by many heroes or warriors हिरण्यगर्भोऽनेकवीरयुतांस्तानप्यपातयत् GaṇeP. ii. 121. 23.

अनेकवीरसंयुक्त (anekavīra-saṁyukta) *adj.* accompanied by many heroes or warriors गच्छन्स ददृशे बालः ...। अनेकवीरसंयुक्तो देवैरिव शतक्रतुः GaṇeP. ii. 14. 50; अनेकयुद्धसंभाररथा याताः ... अनेकवीरसंयुक्ताः GaṇeP. ii. 118. 13.

अनेकवीरसंबाधा (anekavīra-sambādhā) *adj. (f.)* crowded with many heroes or warriors तौ तु ... नरान्तकसभां गतौ ...। अनेकवीरसंबाधाम् GaṇeP. ii. 56. 2.

अनेकवृक्ष (aneka-vṛkṣa) *adj.* having many trees शून्यालये श्मशाने वानेकवृक्षे चतुष्पथे। ... वा स्वपेत् ViṣṇuDhaP. ii. 94. 1.

अनेकवृक्ष (aneka-vṛkṣa) *m.* many trees फलान्यनेकवृक्षाणां मधुना मदनेन च। लिप्तवृन्तानि तिष्ठन्ति क्षतहीनानि ŚārṅgaPa. 3014.

अनेकवृक्षललित (anekavṛkṣa-lalita) *adj.* beautiful due to many trees कदाचिद्धूतपापायास्तीरेऽहं गतवान्पुरा। अनेकवृक्षललिते सर्वत्र सुमनोरमे PadmP. iv. 67. 58.

अनेकवृत्तान्त (aneka-vṛttānta) *adj.* having various events or activities अनेकवृत्तान्तैः शबरवृन्दैः परिवृतम् ... शबरसेनापतिमपश्यम् Kād. 31. 9; अनेकवृत्तान्तैर्ग्रामेयकैरवलोक्यमानबलसंहतिः ... वारिभगवन्तमम्भोनिधिमपश्यम् TilaMañ. 120. 4.

अनेकवृत्तान्तता (anekavṛttānta-tā) *f.* the state of possessing various events or activities भूपालः ... स्कन्धावारम् ... अनेकवृत्तान्ततया कौतुकजननम् ... वीक्ष्य(?क्ष)माणः कटकं जगाम HarṣaC. 287. 10.

अनेकवृत्ति (aneka-vṛtti) *f.* **1** existence or occurrence in more than one (thing or object) विभागेऽपि यथायोगं वाच्यमेतत्प्रमाद्वयम्। एकस्यानेकवृत्तिश्च न युक्तेति प्रबाधकम् TattvSaṁ. 674; **2** various powers of words शब्दस्यानेकवृत्तयः संदेहबीजम् TattvPrakā. 145B. 5 (*on* iii. 1. 24)

अनेकवृत्ति (aneka-vṛtti) *adj.* **1A** existing or occurring in more than one (object) सामान्यम् ... स्वविषयसर्वगतमभिन्नात्मकमनेकवृत्ति एकद्विबहुष्वात्मस्वरूपानुगमप्रत्ययकारि PadārthaSaṁ. 311. 15; समानधर्मोपपत्तेरित्यनेनैव यश्चैकोऽनेकवृत्तिश्चानेकवृत्तिः स लभ्यत इति चरितार्थत्वात् NyāyVār. 95. 7 (*on* i. 1. 23); Śarka. 16.20; यत्पुनर्यदनेकवृत्ति तन्नाना अनेकवृत्तिश्चावयव्यभ्युपगतः TātpaṬ. (Vā) 386. 18 (*on* ii. 1. 32); अनेकेषु पिण्डेषु वृत्तिर्यस्य तदनेकवृत्ति अभिन्नस्वभावमनेकत्र वर्तते NyāyKa. 313. 5; अनेकवृत्ति सामान्यम् NyāyRa. 559. 13 (*on* 5(12). 51); पृथक्त्वम् एकानेकवृत्ति SaptaPa. 28 (10); नित्यमेकमनेकवृत्ति सामान्यम् Kiraṇā. 22. 9; नहि किंचिदनेकवृत्ति विना प्रतीतेः वास्तवमिष्यते TarkSaṁ. (Ā.) 27.7; द्वित्वादिकमनेकवृत्ति TarkKau. 5. 5; नित्यमनेकवृत्ति सामान्यम् SarvaMaSaṁ. 23. 21; **1B** existing or occurring in many objects, cf. **अनेकवृत्तित्व B; 2** possessing of various significations or powers of words निर्दोषा लक्षणवती सरीतिर्गुणभूषणा। सालंकाररसानेकवृत्तिर्वाक्काव्यनामभाक् Candrā. 1. 7; **3** possessed of more than one function मनस्तु एकमनेकवृत्तिकम् BrahmSūBh. (Śaṅ.) 500. 16 (*on* ii. 4. 6); अन्तःकरणमेकमनेकवृत्तिकम् GoviBh. 172. 6 (*on* ii. 4. 6)

अनेकवृत्तिगुण (anekavṛtti-guṇa) *m.* quality existing or present in more than one object (at the same time) द्वितीयाह्निके एकानेकवृत्तिगुणपरीक्षाप्रकरणम् Upask. 310. 3 (*on* vii. 2. 1)

अनेकवृत्तिता (anekavṛtti-tā) *f.* the state of existing in more than one (thing or object) यदा सामान्यरूपतया विशेषानवगच्छति तदानेकवृत्तिता भवति Śarka. 17. 3; पृथक्त्वम् एकानेकवृत्ति (v.l. एकानेकवृत्तितया द्विविधम्) SaptaPa. 28 (10)

अनेकवृत्तित्व (anekavṛtti-tva) *n.* **A** the state of existing in more than one (thing or object) अपि चानेकवृत्तित्वं सामान्यस्य यदुच्यते। तत्र केयं मता वृत्तिः स्थितिः किं व्यक्तिरेव वा TattvSaṁ. 798; एकस्यानेकवृत्तित्वमवगम्यते

NyāyKa. 313. 20; जातिसमवाययोः ... तद्व्यवच्छेदायोक्तमेकवृत्तिरिति। अनेकवृत्तित्वात् तयोः TārkiRa. 159. 11; सामान्यस्यानेकवृत्तित्वात् TarkBhā. (Ke.) 65. 9; न ... सादृश्यस्यानेकवृत्तित्वे प्रमाणमस्ति NyāySu. (Ja.) 370B. 8 (*on* ii. 2. 6); अनेकवृत्तित्वममीषाम् (द्वित्वप्रभृतीनाम्) Upask. 41. 10 (*on* i. 1. 25); नित्यत्वे सति अनेकवृत्तित्वमत्यन्ताभावेऽप्यस्ति SiddhāMu. 5. 6 (*on* 8); घटे ... आकाशत्वसत्त्वे तस्यानेकवृत्तित्वात् (जातित्वापत्तिः) GuruCandr. i. 215.1; वनशब्दस्य युगपदनेकवृत्तित्वेऽपि ... नैकवचनानुपपत्तिः SiddhāSi. i. 28. 24; **B** the state of existing or occurring in many (objects) नानात्वाभावादनेकवृत्तित्वाभावः इति प्रसङ्गविपर्ययः TātpaṬ. (Vā.) 386. 19 (*on* ii. 1. 32); अननुगमो नाम ... एकस्यानेकवृत्तित्वाभावः NyāySu. (Ja.) 6B. 1 (*on* i. 1. 1)

अनेकवृत्तित्वविशेष (anekavṛttitva-viśeṣa) *m.* distinguishing feature (in the form) of the state of existing in more than one (object) द्वित्वादेरनेकवृत्तित्वविशेषप्रतिपादनार्थस्तुशब्दः NyāyKa. 115. 8.

अनेकवृत्तित्वाभ्युपगम (anekavṛttitvābhyupagama) *m.* acceptance of the state of existing in more than one (object) सामान्ये अनेकवृत्तित्वाभ्युपगमेऽनेकत्वप्रसञ्जनम् TarkBhā. (Mo.) 26. 30.

अनेकवृत्तित्वायोग (anekavṛttitvāyoga) *m.* untenability of the state of existing in more than one (place) हृदये चक्षुषि वाचि च तव सैवाभिनवयौवना वसति ... अत्रैकस्य युगपदनेकवृत्तित्वायोगेऽपि योग उक्तः Kāvyānu. (He.) 320. 15.

अनेकवृत्तिधर्म (anekavṛtti-dharma) *m.* property existing in more than one, i.e. two (objects) यत्रानेकवृत्तिधर्मो द्वित्वान्वयितावच्छेदकतया भासते तत्रोभयादिनैव समं पदार्थान्तरस्यान्वयः VyutpaVā. 108. 16.

अनेकवृत्तिभेद (anekavṛtti-bheda) *m.* distinction (in the form) of being what exists in more than one (object or thing) गणनाव्यवहारासाधारणं कारणं संख्या। सा द्विविधैकानेकवृत्तिभेदात् TarkKau. 5. 3.

अनेकवृत्तिमात्र (anekavṛtti-mātra) *n.* all that have existence in more than one (object) अनेकवृत्तिमात्रे तुल्यमेतत् (जातित्वम्) TarkSaṁ. (Ā.)27.6.

अनेकवृत्तिसंख्या (anekavṛtti-saṅkhyā) *f.* number existing in many (objects) प्रकृत्यर्थतावच्छेदकव्याप्यपर्याप्तिसंबन्धेनैवानेकवृत्तिसंख्यान्वयस्य व्युत्पन्नतया तादृशसंबन्धेन तथाविधबहुत्वान्वये योग्यताविरहात् VyutpaVā. 109. 23.

अनेकवृत्तिस्वभावा (anekavṛtti-svabhāvā) *adj. (f.)* of the nature of existing in many (objects) संख्या चेयमनेकवृत्तिस्वभावा समस्तलक्षितप्रयोगगतापि शक्नोति सर्वेषां प्रयाजानामुपकर्तुम् ŚāstrDī. 429. 3 (*on* v. 3. 1)

अनेकवृन्द (aneka-vṛnda) *n.* many groups अनेकवृन्दानि वने गजानां सिंहस्य नादेन मदं त्यजन्ति ŚatTrayī. 463.

अनेकवेणुवीणासहस्र (aneka-veṇuvīṇāsahasra) *n.* many thousands of flutes and lutes अनेकवेणुवीणासहस्रवसंवर्धितः ... आजगाम तं प्रदेशात् ... दिव्यमङ्गलगीतनिनदः TilaMañ. 141. 20.

अनेकवेद (aneka-veda) *m.* **A** various Vedas नायमात्मा प्रवचनेन अनेकवेदस्वीकरणेन लभ्यः KāṭhUBh. 135. 19 (*on* 2. 23); **B** many Vedas अनेकवेदकल्पने च स्वानुभवविरोधः, मनुस्मृतिमूलं चानेकं वाक्यं नावश्यकमिति कथमाधुनिकोऽनुमिनुयात् TattvCin. iv (1). 488. 4.

अनेकवेदना (aneka-vedanā) *f.* **Ai** many feelings or sensations किं वेदना वेदनाया एव समनन्तरप्रत्ययः। अनेकवेदनोत्पत्तावसामर्थ्यात् Sphuṭā. ii. 166. 19 (*on* 2. 62); **Aii** more than one feeling or sensation एकस्यानेकवेदनानुसंधानं भवेदिति चेद् अस्त्येवेश्वरस्यानुसंधानम् SarvaDaKau. 115. 25; **B** pains or torments in various (bodily) parts अनेकवेदनास्वेकस्यैवानुसंधानम् ... अनेकशरीरोपाधिव्यवस्थितानेकवेदनास्वेकस्यैवानुसंधानप्रसङ्गात् न चैतदस्ति NyāyMa. 5. 4.

अनेकवेदवाक्य (aneka-vedavākya) *n.* many Vedic sentences सर्वाणि हि सूत्राणि प्रत्येकमनेकवेदवाक्यविचारपरत्वादवान्तरब्रह्मविद्याः NyāySu. (Ja.) 10A . 11 (*on* i. 1. 1)

अनेकवेदशाखा (aneka-vedaśākhā) *f.* various Vedic recensions मनुर्नाम कश्चित्पुरुषविशेषोऽनेकवेदशाखाध्ययनविज्ञानानुष्ठानसंपन्नः ManuBh. i.2.29 (*on* 1.1)

अनेकवेदाध्ययन (anekavedādhyayana) *n.* **A** study of many Vedas विवक्षामेव मत्वानेकवेदाध्ययनमप्राप्तं प्रतिप्रसविष्यते 'वेदानधीत्येति' ManuBh. i. 158. 25 (*on* 2. 165); यत्तूक्तं 'अनेकवेदाध्ययनमदृष्टार्थं युक्त'मिति तस्य... परिहारं वक्ष्यामः ManuBh. i. 161. 16 (*on* 2. 165); अनेकवेदाध्ययनमपि द्रष्टव्यम् ManuBh. i. 202. 1 (*on* 3. 1); **B** study of more than one Veda यः ... ग्रहणार्थोऽध्ययनविधिः स एकवेदाध्ययनेनात्रापि संपद्यते। एवमनेकवेदाध्ययनं तु धर्मायैवेत्युक्तम् ManuBh. ii. 445. 25 (*on* 11. 237)

अनेकवेलम् (anekavelam) *adv.* many times विलोलयन्मौलिमनेकवेलमनेकपास्यः समुपास्यतां सः। यः प्रत्यहं स्वप्रणतिप्रियेभ्यः प्रदातुमाकारयतीव सिद्धिम् Surath.1.24.

अनेकवेश (aneka-veśa) *adj.* having various kinds of dresses (लोककण्टकान्) चारैरनेकसंस्थानैरनेकवेशैः प्रोत्साह्य चौर्यादिकरणे प्रवर्त्य वशमानयेत् ManvaVi. 1245. 23 (*on* 9. 261)

अनेकवेश्या (aneka-veśyā) *f.* many prostitutes विटैरनेकवेश्यानामेकान्येयंविधानि तु। देशकालोपपन्नानि प्रियाण्येव न चाप्रियम्।... प्रदापयेत् VitVr.68.

अनेकवेश्यादिचरित (anekaveśyādi-carita) *n.* activity or behaviour of many prostitutes etc. (प्रहसनम्) तदेकद्वारेणानेकवेश्यादिचरितेन हसनीयेन संकीर्णत्वात् संकीर्णम् AbhinBhā. ii. 448. 14 (*on* 18. 105); Kāvyānu. (He.) 389. 9.

अनेकवेष (aneka-veṣa) *adj.* having various kinds of dresses अनेकवेषो बहुदेशभाषस्तदिद्वपुश्चश्चलघूर्णितास्त्रः। तेषां पुनर्वाजिरथद्विपानां पदातिसंघः पुरतः प्रतस्थे VarāṅgaC. 17. 18.

अनेकवैचित्र्यसुभग (anekavaicitrya-subhaga) *adj.* beautiful due to much variety कुमारः ... ययौ कान्तीं महापुराम्। तस्याः परिसरेऽनेकवैचित्र्यसुभगे भ्रमन्। कबन्धं कस्यचित्पुंसो वीक्षांचक्रे KumāDeC. (So.) 12. 11.

अनेकवैभव (aneka-vaibhava) *n.* various powers or splendours कामाक्षीप्रपञ्चश्चिन्त्यते। सा तु... ब्रह्मविद्या रुद्रशक्तिः। इदानीमपि गुहावासिनी भूत्वा वर्तते, निजमहिमाप्रकटार्थमनेकवैभवान(?न्य)नुभवती ŚaṅkaVi. (Ā.) 254. 4.

अनेकव्यक्ति (aneka-vyakti) *f.* **1Ai** more than one individual लोकः प्रयोगभूयस्त्वं शब्दस्यैकस्य मन्यते। अनेकव्यक्तिनिष्ठत्वात्संबन्ध उपपद्यते TattvSaṁ. 2469; **1Aii** many individuals न तावत्सास्नादिमद्व्यक्तिभ्यो विलक्षणमनेकव्यक्तिकृत्स्नपरिसमाप्तं नित्यं किंचिद्वस्तु जातिशब्दवाच्यतया अभ्युपगममर्हति NītiMā. 40.21; अङ्गुल्या कंचिदेकमर्थं निर्दिश्य संबन्धः क्रियेत। अनेकव्यक्तिषु अङ्गुलिनिर्देशासंभवात् YuktiSneha. 147. 14 (*on* i. 1. 6); **1B** various or different individuals प्रातिपदिकस्यानेकव्यक्तिपरत्वेऽपि प्रत्येकव्यक्तिवृत्त्येकत्वविवक्षया एकवचनस्यापि लक्षणां विनैवोपपत्तेर्न सकलस्य मन्त्रस्य संकोचः BhāṭṭDī. iii. 88. 16 (*on* ix. 1. 16); **2** manifestation in many (forms) प्रकृतेरनेकव्यक्तिकत्वेऽपि नैकत्वक्षतिः Sāṁkhya-PraBh. 59. 7 (*on* 1. 126); 60. 13 (*on* 1. 128)

अनेकव्यक्तिभान (anekavyakti-bhāna) *n.* cognition of various individuals गोत्वेनानेकव्यक्तिभानात्, भूमरूपमत्वर्थेऽत्र बहुव्रीहिः LaŚabdeŚe. ii. 93.7.

अनेकव्यक्तिभेद (anekavyakti-bheda) *m.* distinction of various individuals अनेकव्यक्तिभेदभिन्नस्यार्थस्य... यः सूचकोऽर्थः... स यत्र... स्थापितो भवति तत्परीक्षारूपनिरुक्तम् AbhinBhā. i. 264. 23 (*on* 6. 12)

अनेकव्यक्तिवर्तिनी (anekavyakti-vartinī) *adj. (f.)* existing or inhering in various individuals or particulars, i. e. different moments of an action जातिमन्ये क्रियामाहुरनेकव्यक्तिवर्तिनीम् VākyaPa. 3 (8). 20.

अनेकव्यक्तिवृत्ति (anekavyakti-vṛtti) *adj.* **A** existing in more than one individual एकैकत्वाद् व्यक्तिभेदाभावात्। नित्यमेकमनेकव्यक्तिवृत्ति सामान्यम् इति लक्षणव्याघातेन स्वरूपव्याघातप्रसङ्गात् Kiraṇā. 105. 9; 196. 11; Upask. 51. 11 (*on* i. 2. 3); परममहत्परिमाणसामान्यं विशेषगुणशून्यद्रव्याधिकरणानेकव्यक्तिवृत्ति NyāySu. (Ja.) 216 B. 10 (*on* i. 4. 6); **B** existing in different individuals वैकृती अनेकव्यक्तिवृत्त्यधिकसंख्या श्रुता BhāṭṭDī. ii. 190. 2 (*on* v. 3. 1)

अनेकव्यक्तिवृत्तिता (anekavyaktivṛtti-tā) *f.* the state of existing in more than one individualपरममहत्परिमाणसामान्यं विशेषगुणशून्यद्रव्याधिकरणानेकव्यक्तिवृत्ति। ... सामान्यस्याप्यनेकव्यक्तिवृत्तिताया निराकरिष्यमाणत्वात् बाधाश्रयासिद्धी च NyāySu. (Ja.) 216 B. 12 (*on* i. 4. 6)

अनेकव्यक्तिवृत्तित्व (anekavyaktivṛtti-tva) *n.* the state of existing in more than one individual (अत्यन्तव्यावृत्तिबुद्धिहेतुत्वाद्विशेषा एव विशेषाः) अनेकव्यक्तिवृत्तित्वे च कथमत्यन्तव्यावृत्तबुद्धिहेतवः Kiraṇā. 25. 9; न चानेकव्यक्तिवृत्तित्वे नित्यत्वे जातित्वापत्तिः TattvCin. i. 607. 2.

अनेकव्यक्तिसंग्राहक (anekavyakti-saṅgrāhaka) *adj.* which includes, i.e. is common to more than one individual नन्वनेकव्यक्तिसंग्राहकलक्षणे तथा स्यात् एकव्यक्तिलक्षणे कथं यथाकाशादेः शब्दमात्रवत्त्वादाविति चेन्न NyāyPari. 145.9.

अनेकव्यक्तिसमवाय (anekavyakti-samavāya) *m.* inherence in more than one individual कथं तर्हि सामान्येषु प्रत्ययानुवृत्तिः सामान्यं सामान्यमिति। अनेकव्यक्तिसमवायोपाधिवशात् विशेषेष्वपि एकशब्दप्रवृत्तिरत्यन्तव्यावृत्तिबुद्धिजनकत्वस्य सर्वत्र संभवात् NyāyKa. 20. 8.

अनेकव्यक्तिसमवेत (anekavyakti-samaveta) *adj.* inherent in more than one individual अनेकव्यक्तिसमवेतस्य निरतिशयस्य नित्यस्य सामान्यादन्यत्वं च नोपपद्यते Kiraṇā.48.3; सामान्यं नित्यमेकम् अनेकसमवेतं च (v.l.अनेकव्यक्तिसमवेतं च) SaptaPa. 70 (23)

अनेकव्यक्तिसमवेतत्व (anekavyaktisamaveta-tva) *n.* the state of being inherent in more than one individual जातेः यत्किंचिद्व्यक्तिनिष्ठायाः व्यक्त्यन्तरनिष्ठत्वानुपपत्तेः अनेकव्यक्तिसमवेतत्वासंभवदोषः TarkSaṁ. (Ā.) 26. 19.

अनेकव्यक्त्यनुगत (anekavyakty-anugata) *adj.* common to more than one individual नानेनैकं वस्त्वनेकव्यक्त्यनुगतमभिधीयते Nyās. i. 199. 2 (*on* i. 2. 58); (अननुगतेनापि अनुगतप्रतीतौ जातिमात्रोच्छेदप्रसङ्गात्) अनेकव्यक्त्यनुगतवस्तुविषयकत्वेन सर्वसंमतप्रतीतेः अननुगतानेकार्थविषयकत्वस्वीकारे LaCandr. 354. 16.

अनेकव्यक्त्यन्वय (anekavyakty-anvaya) *m.* relation or construing with various individuals अनेकव्यक्त्यन्वयरूपा ह्यनुवृत्तिः ŚrutaPra.iA.119.16 (*on* i.1.1)

अनेकव्यक्त्यभिव्यङ्ग्या (anekavyakty-abhivyaṅgyā) *adj.* (*f.*) to be manifested by more than one individual अनेकव्यक्त्यभिव्यङ्ग्या जातिः स्फोट इति स्मृता। कैश्चिद्व्यक्तय एवास्या ध्वनित्वेन प्रकल्पिताः VākyaPa. 1. 94; VaiyāBhū. 257. 26 (*on* 70)

अनेकव्यक्त्यवगति (anekavyakty-avagati) *f.* comprehension of various individuals संबोध्यत्वेनैवानेकव्यक्त्यवगतिर्न तु द्वित्वादेर्भानं नाप्येकत्वस्येति त्वमौ न कृतौ LaŚabdeŚe. i. 333. 8.

अनेकव्यक्त्याधारा (anekavyakty-ādhārā) *adj.* (*f.*) based on more than one individual देवदत्तशब्दो यदृच्छाशब्दः। नानेनैकं वस्त्वनेकव्यक्त्यनुगतमभिधीयते। अनेकव्यक्त्याधारा हि जातिः Nyās. i. 199. 2 (*on* i. 2. 58)

अनेकव्यक्त्युपाधि (anekavyakty-upādhi) *m.* condition (in the form) of various individual items यदि चानेकव्यक्त्युपाधिशङ्का तदानुगतं तदाकृतिकत्वमेकमुपाधिलाधवात्तर्कतः NayaVi. 122. 3 (*on* i. 1. 5)

अनेकव्यङ्ग्यार्थप्रतीति (anekavyaṅgyārtha-pratīti) *f.* cognition or apprehension of various suggested senses एकस्मादेव व्यञ्जकात् तत्तत्प्रतिपत्तुर्विवक्षानुसारेणानेकव्यङ्ग्यार्थप्रतीतिरनुमानपरिपाटीविरुद्धा PratāYaBhū. 56. 4.

अनेकव्यञ्जन (aneka-vyañjana) *adj.* containing various sauces or condiments विनैधांसि विनानलम्। अनेकव्यञ्जनं क्षीरम्। शालिदालिघृतप्लुताः। नानामोदकपक्वान्नाजायन्त UttaKuC. 177.

अनेकव्यञ्जनभक्ष्य (anekavyañjana-bhakṣya) *n.* edibles containing various sauces or condiments अन्नम् ... नैकव्यञ्जनभक्ष्यवत् ... उपकल्पयेत्। ... नैकव्यञ्जनभक्ष्यवत् अनेकव्यञ्जनभक्ष्योपेतम् SmṛtiCan. v. 202. 12.

अनेकव्यवधान (aneka-vyavadhāna) *n.* **A** intervention by many अनेकव्यवधानादिति गौणत्वं स्यात् NyāyRa. 542. 14 (*on* 5(11). 126); प्रत्येकमिति व्याख्यानादनेकव्यवधाने षत्वं न SiddhāKau. 99B. 19 (*on* viii. 3. 58); न तु हननीयतेर्ण्वुल्यनेकव्यवधाने LaŚabdeŚe. i. 312. 3; **B** various interventions or obstructions अनेकव्यवधानेनापि नीलादिवासितमेव ज्ञानमुत्पद्यते PrakaVi. 536.20.

अनेकव्यवस्थित (aneka-vyavasthita) *adj.* established or present in more than one, i. e. two places अन्येनैवात्मना वृत्तौ नैकोऽनेकव्यवस्थितः TattvSaṁ. 611.

अनेकव्यवहार (aneka-vyavahāra) *m.* **1A** usage or convention as more than one (कालः) स एकोऽप्युपाधिभेदादनेकव्यवहारमातनोति Kiraṇā. 121. 16; **1B** many relations or connections सर्वेषां व्यवहारो न मुख्य इति चेन्न, मुख्यत्वे संभवत्यनेकव्यवहारामुख्यताश्रयणानुपपत्तेः ŚrutaPra. ii. 179. 23 (*on* i. 4. 28); **1C** various acitivities or operations समवायः ... स द्रव्येऽनेकव्यवहारनिर्वाहहेतुर्विशेषश्च NyāySu. (Ja.) 357 B. 12 (*on* ii. 2.6); **2** more than one suit or litigation प्रत्यभियोगं कुर्यात्। दण्ड्योऽयमनपराधे मयि कृतपीडनत्वादिति भाषायां प्रत्यभियोगस्य प्रत्यवस्कन्दनोत्तरत्वेन युगपदनेकव्यवहारापत्तिदोषस्याभावात् DīpKa. 38. 12 (*on* 2. 10)

अनेकव्यवहारासंभव (anekavyavahārāsambhava) *m.* impossibility of more than one suit अभियुक्तः सन्नुत्तरमदत्त्वा भाषावादिनं वादान्तरेण न योजयेत्। युगपदनेकव्यवहारासंभवात् DīpKa. 38. 8 (*on* 2. 9)

अनेकव्यवहित (aneka-vyavahita) *adj.* intervened by more than one (letter) भिनत्तीत्यादौ अनेकव्यवहितस्यैको न गुणः SiddhāKau. 340 A. 13 (*on* vii. 3. 86)

अनेकव्यवाय (aneka-vyavāya) *m.* intervention by many (letters) अनेकव्यवाये षत्वाप्रसङ्गः Pradī. vii. 188. 14 (*on* viii. 3. 58)

अनेकव्याकरण (aneka-vyākaraṇa) *n.* various schools of grammar स भगवान् ... विहरमाणः ... कैश्चिदैन्द्रजैनेन्द्रचान्द्रापिस(श)लपाणिनीयाद्यनेकव्याकरणोपदिश्यमानशब्दार्थसंबन्धवैदग्धीसरित्क्षालितशिष्यशेमुषीपदविन्यासावनीकैः ... पारासरिभिः ... पुरमनुसिसीर्षुः (उद्यानमपश्यत्) YaśasCam. i. 90. 3.

अनेकव्याधिपीडिता (anekavyādhi-pīḍitā) *adj.* (*f.*) afflicted by various diseases विशल्या नाम दुहिता ...। यस्यां गर्भप्रपन्नायामनेकव्याधिपीडिता। देवी ममोपकाराभूत्सर्वरोगविवर्जिता PadmP. (Ra.) 64. 44.

अनेकव्याधिलिङ्ग (anekavyādhi-liṅga) *adj.* possessing the symptoms of various (other) diseases अभिचारोऽपि नागानां क्रियापथे परीक्ष्यः ... अभिचारसमुत्थश्चानेकव्याधिलिङ्गः (व्याधिः) Hastyāyur. 400. 1 (3. 6)

अनेकव्यापकत्व (anekavyāpaka-tva) *n.* the state of being the pervader of many entities अनेकव्यापकत्वावधारणादिकं च नामरूपसमुन्मेषाभावाभिप्रायं योज्यम् ŚivārkaMaDī. ii. 140. 26 (*on* ii. 3. 18)

अनेकव्यापार (aneka-vyāpāra) *adj.* having more than one activity or operation कथमेकस्य स्रष्टुरनेकव्यापारत्वमविरुद्धम् Bhām. 472. 14 (*on* ii. 3. 5 (? 6))

अनेकव्यापार (aneka-vyāpāra) *m.* **A** many activities or operations आयस्तानां करणानामनेकव्यापारनिमित्तग्लानानां स्वव्यापारेभ्य उपरमो भवति ChāndoUBh. 375. 16 (*on* vi. 8.1); **B** more than one activity or operation एकस्य कर्तुरनेकव्यापारवत्त्वमपि विरुद्धम् VedāntKā. 310. 5 (*on* ii. 3. 5(? 6))

अनेकव्यापारनिर्वर्तन (anekavyāpāra-nirvartana) *n.* execution or carrying out of many activities or operations इच्छामात्रेण च तस्य (आत्मनः) कर्तृत्वादनेकव्यापारनिर्वर्तनोपात्तदुर्वहक्लेशकालुष्यविकल्पोऽपि प्रत्युक्तः NyāyMañ. i. 185. 25.

अनेकव्यापारमयत्व (anekavyāpāramaya-tva) *n.* the state of consisting of many activities or operations शृङ्गारः। ... संभोगो विप्रलम्भश्च। ... संभोगस्य परस्परावलोकनसंभाषणालिङ्गनचुम्बनाद्यनेकव्यापारमयत्वेनानन्त्याद्देकविधत्वेन गणना कृता PratāYaBhū. 277. 9.

अनेकव्यापारसंनिपात (anekavyāpāra-sannipāta) *m.* aggregation or concurrence of many activities or operations अविद्याकर्तृत्वाकर्तृत्वकृत आत्मनो विशेषः स्यादिति चेत् न ... अनेकव्यापारसंनिपातजनितत्वाच्च अविद्याभ्रमस्य BṛĀraUBh. 622. 1 (*on* iv. 4. 6)

अनेकव्यापृतिमती (anekavyāpṛti-matī) *adj.* (*f.*) having operations with many (things) अनेकव्यापृतिमती ह्यावृत्तिर्जगतीक्ष्यते BṛĀraUBhVā. iv. 3. 580.

अनेकव्यावृत्त (aneka-vyāvṛtta) *adj.* excluded from many अनेकाकारग्रहो नानाकारग्रहो विवक्षितः। न त्वनेकव्यावृत्तासाधारणाकारग्रहः NyāyPari. 62. 6.

अनेकव्यावृत्ति (aneka-vyāvṛtti) *f.* **A** distinction or exclusion from many (objects) ब्रह्मणोऽनेकव्यावृत्तिमत्त्वात् सधर्मकत्वम् ŚrutaPra. iA. 91. 25 (*on* i. 1. 1); **B** distinction or exclusion from more than one कोऽयं विशिष्टताभेदो नाम किं विशेषणभेद एव उत तत्संबन्धभेदः उत व्यावृत्तिभेदः ... न तृतीयः ... तत्तद्विशेषणसंबन्धभेदैर्यथास्वं विरोधिव्यावृत्तिभेदे विवक्षितेऽनेकव्यावृत्तीनामेकत्र संभवात् ŚatDū. 162. 18.

अनेकव्युत्पत्तिकल्पन (anekavyutpatti-kalpana) *n.* assumption of many rules of semantic relationships तत्तत्कारकादीनां धात्वर्थे तस्य च कालादीनां च भावनायां तस्यासंख्यायाश्च प्रथमान्त इत्यनेकव्युत्पत्तिकल्पनाद् गौरवम् MīmāKau. iii (2). 37. 18 (*on* ii. 1. 5)

अनेकव्युत्पत्तिकल्पनापत्ति (anekavyutpattikalpanāpatti) *f.* undesired contingency of assuming many relationships कारकाणां भावनायाम् ... अन्वयः भावनायाश्च प्रथमान्तपदोपस्थाप्य इत्यनेकव्युत्पत्तिकल्पनापत्तिः BhāṭṭCin. i. 83. 20 (*on* i. 1. 4)

अनेकव्योमादिभेद (aneka-vyomādibheda) *m.* many distinctions such as sky etc. एकस्यैव सन्मात्ररूपतया प्रागवस्थितात्मनोऽनेकव्योमादिभेदभिन्नप्रपञ्चरूपेण ... परिणामो दर्शितः SāstrDī. 111. 27 (*on* i. 1. 5)

अनेकव्रण (aneka-vraṇa) *m., n.* many wounds कुमारः ... प्राङ्मुखमासीनम् ... अनेकव्रणकिण(कने?)कर्कशका ... कमपि चीरवाससं ददर्श AvantiKa.226.5.

अनेकव्रणपीडित (anekavraṇa-pīḍita) *adj.* afflicted with or troubled by many wounds न तु दहेत् भिन्नकोष्ठमन्तःशोणितमन्तःशल्यमनेकव्रणपीडितम् ... क्षारानर्हं च AṣṭāSaṁ. i. 193. 12 (1. 40)

अनेकव्रतदान (anekavrata-dāna) *n.* donations or charities in various vows सः (राजा) ... अनेकव्रतदानानि यज्ञांश्च कृतवान् बहून् GaṇeP. ii.73.16.

अनेकव्रतदानक (anekavrata-dānaka) *adj.* who is the object of the charity in various vows कपिलाम् ...। संकल्पयित्वा पुरुषं सपत्नं दद्यादनेकव्रतदानकाय MatsyaP. 97. 15.

अनेकव्रतनायक (anekavrata-nāyaka) *m.* chief, i.e. follower of various vows गां कल्पयित्वा पुरुषं सपत्नं दद्यादनेकव्रतनायकाय BhaviP. 771 B. 10 (iv. 115. 17)

अनेकव्रतयाजिन् (anekavrata-yājin) *adj.* who observes various vows सोऽप्येतत्कृतवान्राजा पुत्रं चैवोपलब्धवान् । ... अनेकव्रतयाजिनम् VarāP. 63.10.

अनेकव्रतसमुदाय (anekavrata-samudāya) *m.* collection of various vows ब्रह्मचर्यशब्दस्यानेकव्रतसमुदायवचनत्वात् ब्रह्मचर्यशब्देन मध्वशननिषेधोऽपि क्रत्वर्थतया विधीयते MayūMāli. 748. 23 (*on* x. 6. 12)

अनेकव्रतोपवासनियम (anekavratopavāsa-niyama) *m.* rules regarding various vows and fasts अनेकव्रतोपवासनियमपरस्य ... मम दक्षिणाप्रलेपस्त्वया कर्तव्यः LaṭaMe. 2. 34 (15)

अनेकव्रीहि (aneka-vrīhi) *m.* many rice-grains संपन्नो व्रीहिरित्यनेकव्रीहितात्पर्येकेऽप्येकवचनदर्शनेन तादृशव्युत्पत्तिसंकोचस्यावश्यकत्वात् VyutpaVā. 12. 1.

अनेकशकुनिकुल (anekaśakuni-kula) *n.* group of various kinds of birds अनेकशकुनिकुलकूजितैः उन्मीलित° ... °अमङ्गलमिव कोलेषु ज्ञापयन्तीम् ... मृगयाटवीमवाप (राजा) UdaySuKa. 42. 29.

अनेकशक्तत्व (anekaśakta-tva) *n.* the state of being expressive of many meanings शक्यशरीराभेदेन लक्षणया वा प्रयोगोपपत्तावनेकशक्तत्वस्यान्याय्यत्वात् LaCandr. 835. 38.

अनेकशक्ति (anekaśakti) *m.* name of a prince तस्य च पुत्रास्त्रयः ... वसुशक्तिरुग्रशक्तिरनेकशक्तिश्चेति नामानो बभूवुः Tantrākhyā. 1. 14; PañcT. 0. 2 (6) (3. 10)

अनेकशक्ति (aneka-śakti) *f.* **Ai** more than one (expressive) power अनेकशक्तिरेकस्य युगपच्छ्रूयते क्वचित्। अग्निः प्रकाशदाहाभ्यामेकत्रापि नियुज्यते VākyaPa. 2. 480; **Aii** many expressive powers, cf. **अनेकशक्तिकल्पनA; Bi** various (divine) powers अनेकक्रियानेकशक्तिस्वरूपम् ... गणेशं नमामः GaṇeP. i. 13. 11; **Bii** various (supernatural) powers सहस्राक्षमनेकशक्तिकम् ... यदुदकम् ... पवित्रं कृतम् ... तेनोदकेन त्वाम् ... अभिषिञ्चामि Mitā. 100. 2 (*on* 1. 281); **C** many powers, i. e. protecting divinities (मन्त्रार्णशक्तयः) एताश्चैकैकशोऽनेकशक्तिभिः पृथगावृताः ĪśānŚiPa. i. 24. 23; **D** various faculties, cf. **अनेकशक्तिताA.**

अनेकशक्ति (aneka-śakti) *adj.* having more than one (expressive) power अनेकशक्तेरेकस्य प्रविभागोऽनुगम्यते VākyaPa. 2. 448; 2. 476; अनेकशक्तेः शब्दस्य शक्त्यवच्छेदेन संज्ञिनि विनियोगान्नित्यत्वाच्च सर्वसंज्ञानां लौकिकत्वादादैच्छब्दस्यानुकरणशब्दत्वाज्जातिशब्दत्वाद्वा शास्त्रप्राप्तिरस्तीति प्रश्नः Pradī. i. 152 A. 4 (*on* i. 1. 1)

अनेकशक्तिकत्व (anekaśaktika-tva) *n.* the state of having more than one (expressive) power इयमपि च श्रुतिर्द्विविधादपि विशिष्टविधेर्बलीयसी एकविधिसंभवे अनेकशक्तिकत्वानुपपत्तेः TantrVā. 496. 3 (*on* ii. 2. 16)

अनेकशक्तिकल्पन (anekaśakti-kalpana) *n.* **A** assumption of many (expressive) powers or significations (न हि सत्यां गतौ वानप्रस्थविशेषणेन परिव्राजको ग्रहणमर्हति) न तु सत्यां गतौ अनेकशक्तिकल्पनप्रसङ्गात् PrakaVi. 947. 17; अनेकशक्तिकल्पनं गौणत्वं वा न स्यात् ŚrutaPra. iA. 19. 10 (*on* i. 1. 1); यः प्रकृत्यादिष्वस्य प्रयोगः स ब्रह्मगुणलेशयोगादौपचारिक इत्यभाषि ... अनेकशक्तिकल्पने गौरवात् ŚatDū. 50. 8; अनेकशक्तिकल्पनस्य अप्रामाणिकत्वात् त्वदनुमानं प्रतिकूलतर्कपराहतम् PūrvottaVāNaMā. 107. 10; सैन्धवपदाभिधेयं लवणाश्वादिकम् ... उपलक्ष्य ... शक्यतावच्छेदकस्य लवणत्वादेर्भेदादनेकशक्तिकल्पनम् MīmāKau. i. 143. 22 (*on* i. 3. 33); iii (2). 250. 3 (*on* ii. 2. 21); **B** assumption of more than one (expressive) power or signification न च एकत्रैव शक्तिकल्पनेनेतरत्र तत्सादृश्येन प्रयोगोपपत्तौ नानेकशक्तिकल्पनमुपपत्तिमत् इति वाच्यम् MīmāKau. i. 73. 6 (*on* i. 3. 9); i. 77. 11 (*on* i. 3. 9); तात्पर्यग्राहकताङ्गीकारे चानेकशक्तिकल्पनस्य तावदवश्यंभावाल्लाघवादेकत्रैव शक्तिरन्येषां लक्षणादिना MīmāKau. iii (2). 21. 5 (*on* ii. 1. 5)

अनेकशक्तिकल्पना (anekaśakti-kalpanā) *f.* assumption of many (expressive) powers or significations अनेकशक्तिकल्पनाप्रसङ्गादेकाभिधानेनैव संबन्धादितरत्र प्रतीतेरुपपन्नत्वात् व्यक्तेरेवाभिधेयत्वम् TantrVā. 270. 10 (*on* i. 3. 26); 942. 20 (*on* iii. 4. 13); अनेकशक्तिकल्पनाभयात्पुंस्त्वं द्वित्वं चास्य वाच्यमित्यध्यवसीयते ṬupṬ. 90. 10 (*on* vi. 1. 22); (कल्प्यते शक्तिभेदश्चेच्छक्तिरेवेन्द्रियं भवेत्) अनेकशक्तिकल्पनायामप्यस्मत्पक्ष एव इत्याह कल्प्यत इत्यर्धेन शक्तिभेदश्चेच्छक्तिरेवेन्द्रियं भवेत्) अनेकशक्तिकल्पनायामप्यस्मत्पक्ष एवं इत्याह कल्प्यत इत्यर्धेन TātpaṬ. (U.) 161. 10 (*on* 4. 163); सेनापतौ तु प्रमाणान्तरवशादुपचारो युक्तः। न त्वयं साधारणोऽनेकशक्तिकल्पनाया अपन्यायत्वात् BrahmSūBh. (Bhā.) 22. 26 (*on* i. 1. 7); अनेकशक्तिकल्पनाभयेन हि शब्दस्य विशेषणमात्रपर्यवसानमिष्टम् Kāśi. iii. 35. 21 (*on* 5 (4). 49); अनेकार्थत्वं हि अनेकशक्तिकल्पनादोषादन्याय्यम् NyāyRaMā. 201. 1; भिन्नत्वे च तेषामर्थप्रतीतिकारणत्वादनेकशक्तिकल्पना स्यात् NyāyRa. 643. 8 (*on* 5 (15). 15); संभवति चैवं नानेकशब्दत्वमेकस्यार्थस्याभ्युपगन्तुं न्याय्यम् अनेकशक्तिकल्पनाप्रसङ्गात् ŚāstrDī. 47. 12 (*on* i. 3. 9); प्रैषादीनां विशेषाणां व्यभिचारादनेकशक्तिकल्पनाप्रसङ्गात् ... प्रेरणामात्र एव लिङादिसंगतिरवसीयते NyāyMa. 241. 6; गौडीमाध्व्योर्गौणः 'सुरा'शब्दयोगः। एवं च नानेकशक्तिकल्पनादोषो नाप्युपाध्याश्रयणं कृतम् Mitā. 431. 31 (*on* 3. 253); नात्मशब्दोऽयं गौणः। ... नापि साधारणः अनेकशक्तिकल्पनाप्रसङ्गात् PrakaVi. 99. 21; सौरमासे वैशाखादिपदप्रवृत्तिः ... केचिदाहुः अनेकशक्तिकल्पनादोषाद् गौणीति CaturCin. iii (2). 13. 4; iii (2). 14. 1; अनेकशक्तिकल्पनायां गौरवात् तत्र औपचारिकोऽयं प्रयोग: इति चेन्न विपर्यासस्य दुर्वारत्वात् ŚatDū. 206. 22; अल्पैरेव पदैः अष्टवाक्यानि परिणमन्ते। तत्रानेकशक्तिकल्पनाः स्युः TantrRaha. 35. 5; अनेकशक्तिकल्पनागौरवं न मदनुमानबाधकम् PūrvottaVāNaMā. 101. 10; MīmāKau. i. 188. 21 (*on* i. 4. 3); लौकिकप्रमाणावगतेऽर्थे अनेकशक्तिकल्पनाभिया न शक्तिः अपि तु लक्षणादिनैव बोधः BhāṭṭDī. i. 44. 20 (*on* i. 3. 4); i. 92. 14 (*on* ii. 1. 5); ii. 7. 20 (*on* iii. 5. 6); ii. 53. 17 (*on* iii. 7. 16), ii. 119. 16 (*on* iv. 2. 8); लक्षणयैव तत्तदर्थविशेषोपस्थितिसंभवेऽनेकशक्तिकल्पनावैयर्थ्यात् SiddhāSi. i. 21. 20; i. 24. 7; अनेकप्रत्ययानां तत्र शक्तिर्वाच्येति शक्ततावच्छेदकानन्त्यादनेकशक्तिकल्पनागौरवापत्तिः VaiyāBhū. 40. 11 (*on* 7); 211. 25 (*on* 45)

अनेकशक्तिकल्प्यत्व (anekaśaktikalpya-tva) *n.* the state of what is to be assumed of many (expressive) powers प्रत्यक्षेन्द्रियकत्वादेरौलूक्यानामसिद्धता। अनेकशब्दकल्प्यत्वात् (v. l. अनेकशक्तिकल्प्यत्वात्) आद्यमध्यभवेषु च ŚlokaVār. 6.329 (813.6)

अनेकशक्तिजनकत्व (anekaśaktijanaka-tva) *n.* the state of producing various powers (विद्यायाः ... त्रैविध्यम्) तासु एकैकस्या अनेकशक्तिजनकत्वं विशिष्य प्रतिपादयन्ति LalitāSaBh. 170. 21 (*on* 208)

अनेकशक्तितस् (anekaśakti-tas) *adv.* due to many (expressive) powers अनेकशक्तितो वा शब्दानां न किंचिदनिष्टं प्राप्नोति Nyās. ii. 735. 5 (*on* vii. 2. 59)

अनेकशक्तिता (anekaśakti-tā) *f.* **A** the state of being various faculties (of concepts) प्रमाणान्तरसिद्धत्वादन्यत्रानेकशक्तिता ŚlokaVār. 5 (3). 178 (317. 3); **B** the state of having many (expressive) powers प्रतीतेर्वाचकत्वं चेत्प्रसक्तानेकशक्तिता ŚlokaVār. 5 (7). 69 (467. 5)

अनेकशक्तितादवस्थ्य (anekaśakti-tādavasthya) *n.* status-quo of (the contingency of) having many (expressive) powers समुदायस्यातिरिक्तत्वे ... । अनतिरिक्तत्वे शक्यतावच्छेदकभेदेनानेकशक्तितादवस्थ्यात् BhāṭṭDī. iii. 125. 15 (*on* ix. 2. 12)

अनेकशक्तित्व (anekaśakti-tva) *n.* **A** the state of having many (expressive) powers संख्यासामान्यरूपेण तदा सोंऽशः प्रतीयते। अर्थस्यानेकशक्तित्वे शब्दैर्नियतशक्तिभिः VākyaPa. 3 (14). 104; कुणपादिप्रतीतयः। अर्थस्यानेकशक्तित्वान्नावहन्त्यर्थशून्यताम् NyāyMañ. ii. 112. 33; **Bi** the state of having many powers जगदुत्पत्तिस्थितिप्रलयहेतुत्वश्रुतेरनेकशक्तित्वं ब्रह्मणः BrahmSūBh. (Śaṅ.) 834. 16 (*on* iv. 3. 14); **Bii** the state of having various abilities or capacities (of superimposition) अज्ञानस्यानेकशक्तित्वेऽनारब्धकर्मतत्कार्यतराध्याससंपादनशक्तिमात्रस्य ... प्रतिबन्धो लेशानुवृत्तित्वेन विवक्षित इति निरस्तम् Nyāyāmṛ. 640A. 7.

अनेकशक्तिदर्शन (anekaśakti-darśana) *n.* perception, i. e. experience of many (expressive) powers स्वःशब्दे क्रियासंबन्धे अनेकशक्तिदर्शनात्सत्त्ववाचित्वनिश्चयः Pradī. i. 346 A. 18 (*on* i. 1. 37); PadMañ. *on* KāśiVṛ. *on* P. i. 1. 37 (147. 11)

अनेकशक्तिपक्ष (anekaśakti-pakṣa) *m.* view of (accepting) many (expressive) powers अनेकशक्तिपक्षे अन्तर्यामिण्यन्तर्यामित्वेन शक्त्यन्तराभ्युपगमसंभवेऽपि तस्य परमसिद्धान्तत्वेन त्वया अनभ्युपगतत्वात् PūrvottaVāNaMā. 181. 14.

अनेकशक्तिप्रधानता (anekaśaktipradhāna-tā) *f.* the state of having prominence of many (expressive) powers स्वरादीनामनेकशक्तिप्रधानता स्वरागतः स्वः स्थितः स्वः पश्येत्यादिदर्शनात् LaŚabdeŚe. i. 357. 2.

अनेकशक्तिप्रवृत्ति (aneka-śaktipravṛtti) *f.* many powers and functions यथा वृक्षोऽनेकशाखः एवमनेकशक्तिप्रवृत्तियुक्तं ब्रह्म BrahmSūBh. (Śaṅ.) 309. 10 (*on* ii. 1. 14)

अनेकशक्तिमत् (anekaśakti-ma(n)t) *adj.* possessing various abilities or capacities अनेकशक्तिमदविद्यायाः ... निवृत्तावपि ... शक्तेरनुवृत्तेः तद्वती अविद्यापि तिष्ठत्येव AdvaiSi. 891. 2.

अनेकशक्तियुक्त (anekaśakti-yukta) *adj.* endowed with many (expressive) powers कुतश्चानेकशक्तियुक्तस्य पदस्य तत्तच्छक्तिविशिष्टरूपेण तत्तदर्थाभिधायित्वम् NyāyRa. 899. 18 (*on* 7. 194)

अनेकशक्तियोग (anekaśakti-yoga) *m.* **A** connection with many (expressive) powers उत्पत्त्यादिश्रुतीनामैकात्म्यावगमपरत्वात् नानेकशक्तियोगो ब्रह्मणः BrahmSūBh. (Śaṅ.) 836. 3 (*on* iv. 3. 14); **B** application of more than one

(expressive) power केचिदर्थभेदेन शब्दभेदमिच्छन्ति। ... अन्ये तु एकशब्दत्वं तत्र चानेकशक्तियोगः Pradī. i. 234 B. 7 (*on* i. 1. 7); ii. 373 B. 21 (*on* ii. 1.29)

अनेकशक्तिविधान (anekaśakti-vidhāna) *n.* prescription of many (expressive) powers कारकविशेषाणां पुनरेकार्थसमवायेन संबन्धनियमसंभवात् लक्षणायोगेऽप्यनेकशक्तिविधानस्य लक्षणाव्यावृत्तिफलत्वात् SiddhāSi. i. 21. 23.

अनेकशक्तिशालिन् (anekaśakti-śālin) *adj.* possessed of various powers सन्मात्रवपुषोऽनेकशक्तिशालिन एकस्मादद्वितीयाद् ब्रह्मणः कृत्स्नस्य चिदचित्प्रपञ्चस्य जन्मस्थितिलयं प्रतिपाद्यम् ŚrutaPra. iB. 171. 19 (*on* i. 1. 4)

अनेकशक्तिसंयुक्त (anekaśakti-saṁyukta) *adj.* endowed with various powers नताः स्म ...। अनेकशक्तिसंयुक्तं सर्वकामप्रपूरकम्। दीनानुकम्पिनं देवम् GaṇeP. ii. 40. 21; ii. 95. 28.

अनेकशक्तिसंयुत (anekaśakti-saṁyuta) *adj.* endowed with various powers अनादिनिधनो देवः ... अनेकशक्तिसंयुतः GaṇeP. ii. 96. 50.

अनेकशक्तिसंभव (anekaśakti-sambhava) *m.* possibility of having more than one (expressive) power एकस्याप्यनेकशक्तिसंभवात् अनेकार्थप्रत्यायनमविरुद्धम् Pradī. vii. 84. 16 (*on* viii. 2. 3)

अनेकशक्तिसमाश्रयत्व (anekaśaktisamāśraya-tva) *n.* the state of being the substratum of many (expressive) powers यत् पुनरस्यानेकशक्तिसमाश्रयत्वाद् व्यापारान्तरपरिकल्पनं तदर्थस्यैवोपपद्यते न शब्दस्य तस्यानेकशक्तिसमाश्रयत्वासिद्धेः VyaktiVi. 23. 21.

अनेकशक्यार्थ (aneka-śakyārtha) *m.* many expressed senses अनेकशक्यार्थनिर्णयेऽपि प्रकृते विवक्षितार्थो नावधार्यते UpaParā. 24. 29.

अनेकशङ्कातङ्क (aneka-śaṅkātaṅka) *m.* many doubts and anguishes ततः श्मशानं स प्राप ...। अविवेकमिवानेकशङ्कातङ्कनिकेतनम् BṛKathāMañ. ix. 2. 49; VetāPañ. (Śi.) 7. 8.

अनेकशत (aneka-śata) *n.* several hundreds या चा(ङ्गीकृतानङ्गभा)वयोग्याभिरनेकशतपुरुषोपग्रहप्रकाराभिरपि ... शोकनिश्चेतनीभूतमिवापरिस्पन्दममरभवनभित्तिचित्रेष्वादर्शयति AvantiKa. 7. 1; 145. 20; अनेकशतपाषण्डबुद्धिविकल्पास्पदः ... एष संसारवृक्षः KāṭhUBh. 169. 13 (*on* 6. 1); दुष्करो राजसूयोऽयं सर्वैरपि महीश्वरैः। अनेकशतपादातरथकुञ्जरवाजिमान् SkandP. iii (1). 21. 32; भ्रातः पान्थ पथि त्वया नु पथिकः कश्चित्समासादितो बालेऽनेकशतानि कीदृश इति प्रख्यायतां वल्लभः Subhāṣi. 1145.

अनेकशतक्षुर (anekaśata-kṣura) *adj.* furnished with many hundred razors चक्राणि चानेकशतक्षुराणि प्रादुर्बभूवुर्ज्वलनप्रभाणि MahāBhā. vii. 154. 28.

अनेकशतगुण (aneka-śataguṇa) *adj.* increased by many hundred times अद्य ... वयमस्मदानन्दादनेकशतगुणं भवदानन्दमुपपादयन्तीम् ... श्रुतिमपि न विस्रम्भामहे NīlaVi. 35. 6.

अनेकशतजीवित (anekaśata-jīvita) *adj.* living for many hundred (years) पोतपः ... सः ... मत्पितरि तपोबलप्रा(प्तो?प्ता)ऽनेकशतजीविते अस्यामरण्यभूमौ ... चन्द्रगुप्तम् ... उपस्थितवान् AvantiKa. 176. 2.

अनेकशततार (anekaśata-tāra) *adj.* full of many hundred sufferings पुन्नाम नरकमनेकशततारं तस्मात् त्रातीति पुत्रः GopBr. i. 1. 2 (2. 9)

[1]**अनेकशतपत्त्र** (anekaśata-pattra) *n.* many hundred vehicles भ्राम्यन्ननेकशतपत्त्रशरारिराशिसेवास्पदाहवसरोभुवि राजहंसः। ... अखण्डयत् ... रिपोर्धवलकीर्तिमृणालवल्लीः HarVi. 16. 40 (comm. पत्त्राणि वाहनानि)

[2]**अनेकशतपत्त्र** (aneka-śatapattra) *n.* many lotuses भ्राम्यन्ननेकशतपत्त्रशरारिराशिसेवास्पदाहवसरोभुवि राजहंसः। ... अखण्डयत् ... रिपोर्धवलकीर्तिमृणालवल्लीः HarVi. 16. 40 (comm. शतपत्त्राणि पद्मानि)

अनेकशतभौम (anekaśata-bhauma) *adj.* **1** having many hundred (things and animals) that live on the land or earth भवनानि प्रकाशन्ते दिवि तेषाम्(अन्नदानाम्) महात्मनाम्।... अनेकशतभौमानि MahāBhā. xiii. 62. 47; xiii. App. I. 15 (3221); **2** having many hundred storeys, i. e. multi-storeyed अपश्यं तत्र वेश्मानि तैजसानि कृतात्मनाम्। ... अनेकशतभौमानि MahāBhā. xiii. 70. 22.

अनेकशतयज्वन् (anekaśata-yajvan) *adj.* (used as noun) (one) performing many hundred sacrifices अष्टकस्त्वथ राजर्षिः कौशिको माधवीसुतः। अनेकशतयज्वानं वचनं प्राह धर्मवित् MahāBhā. v. 120. 12.

अनेकशतयोजन (anekaśata-yojana) *n.* many hundred measures of distance (equal to four *krośa*s or about nine miles) *(yojanas)* कन्दर्पकेतुः ... गत्वा निमेषमात्रादेवानेकशतयोजनम् ... विन्ध्याटवीं विवेश VāsaDa. 243. 3.

अनेकशतयोजना (anekaśata-yojanā) *adj.* (*f.*) having many hundred measures of distance (*yojanas*) कन्दर्पकेतुः ... गत्वा निमेषमात्रादेवानेकशतयोजनम् (v.l. °नाम्) ... विन्ध्याटवीं विवेश VāsaDa. 243. 3.

अनेकशतरत्ना (anekaśata-ratnā) *adj.* (*f.*) having many hundred gems or jewels आरुरोह शचीपतिः। ... (वरवारणम्) अनेकशतरत्नाभिः पताकाभिरलंकृतम् MahāBhā. ii. App. I. 21 (1398)

अनेकशतलक्षण (anekaśata-lakṣaṇa) *adj.* having many hundred characteristics ग्रहाणां संग्रहः ...। अनेकशतसाहस्र(?स्रः) अनेकशतलक्षणः। देवलब्धवराकाशे प्राह सर्वान् पृथक्पृथक् AVPari. 52 (16). 5.

अनेकशतवत्सर (anekaśata-vatsara) *m.* many hundred years रामकृष्णो महामुनिः। ... स्थित्वा तत्र तपस्यन्तमनेकशतवत्सरान्। तं चाक्रमत वल्मीकम् SkandP. ii (1). 15. 10; iii (1). 25. 11.

अनेकशतवत्सरम् (anekaśatavatsaram) *adv.* for many hundred years मुद्गलोऽपि गते विष्णावनेकशतवत्सरम्। ... उवास SkandP. iii (1). 37. 50.

अनेकशतवर्ष (anekaśata-varṣa) *n.* many hundred years अभूत् ऋषभो नाम तापसः। अनेकशतवर्षायुस्तपस्वी कोपनो भृशम् MahāBhā. iii. 109. 7.

अनेकशतवर्ष (aneka-śatavarṣa) *adj.* of (the age of) many hundred years इन्द्रोऽकरोद्रूपं ब्राह्मणस्य तपस्विनः। अनेकशतवर्षस्य दुर्बलस्य सयक्ष्मणः MahāBhā. iii. 135. 30.

अनेकशतविस्तीर्ण (anekaśata-vistīrṇa) *adj.* having the extension of many hundred measures of distance अनेकशतविस्तीर्णं योजनानां महोदधिम्। तिमिनक्रझषावासं चिन्तयन्तः सुदुःखिताः MahāBhā. iii. 266. 44.

अनेकशतसंख्य (anekaśata-saṅkhya) *adj.* [*f.*-ā] numbering many hundreds भवनानि च दिव्यानि दिवि तेषां महात्मनाम् ...। अनेकशतसंख्यानि सान्तर्जलवनानि च MahāBhā. xiv. App. I. 4 (2303); VṛGautaSm. 592. 3 (12); अनेकशतसंख्यांश्च दीपानतिसमुज्ज्वलान्। धारयन्तो जना विप्र ... गच्छेयुः PāraS. 17. 143; अनेकशतसंख्यैर्येषां सितप्रासादैः सर्वतः समाकुलं राजकुलमाससाद (भूमिपतिः) TilaMañ. 68. 16; अनेकशतसंख्यः शुद्धान्तवारस्त्रीजनः ... पाथोनिधीन् बभ्राम TilaMañ. 76. 7; अनेकशतसंख्याभिः ... अङ्गनाभिः ... अनुगम्यमाना ... चक्रसेनस्य महिषी TilaMañ. 341. 2.

अनेकशतसंख्या (anekaśata-saṅkhyā) *f.* [Inst.] in many hundreds of numbers तावत्समुत्थिता घोरा असुरा रुधिरोद्भवाः। खड्गहस्ता महावीर्या अनेकशतसंख्यया SkandP. v(1). 37. 16.

अनेकशतसहस्र (aneka-śatasahasra) *n.* many hundred thousands अनेकशतसहस्रपुरुषसंख्यस्य यदुकुलस्य पुत्रसंख्या वर्षशतैरपि वक्तुं न शक्यते ViṣṇuP. iv. 15. 43; मया ... अने(क)शतसहस्रवसुना(म)र्धेनासौ शपथपूर्वं समं विभक्तः AvantiKa. 177. 13; न प्रबुध्यते अनेकशतसहस्रानर्थसंनिपातजदुःखमुद्गराभिघातानुभवैरपि AitUBh. 266. 12 (*on* 3. 12); सर्वज्ञायाः देवतायाः बुद्धिपूर्वकमनेकशतसहस्रानर्थाश्रयं देहमनुप्रविश्य दुःखमनुभविष्यामीति संकल्पनम् ChāndoUBh. 354. 4 (*on* vi. 3. 2); 401. 1 (*on* vi. 14. 2); आत्मा ... अनेकशतसहस्रविवेकविज्ञानप्रतिपक्षे ... विषमे प्रविष्टः BṛĀraUBh. 633. 15 (*on* iv. 4. 13)

अनेकशतसाहस्र (aneka-śatasāhasra) *adj.* [*f.* -ī] consisting of, i.e. numbering many hundred thousands ग्रहाणां संग्रहः ... अनेकशतसाहस्र-(?स्रः) अनेकशतलक्षणः देवलब्धवराकाशे प्राह सर्वान्पृथक् पृथक् AVPari. 52 (16). 5; सुसंग्राहाः सुसंतोषा हेमभाण्डपरिच्छदाः। अनेकशतसाहस्रास्ते च सादिवशे स्थिताः MahāBhā. v. 152. 17; अनेकशतसाहस्रमनीकमनुकर्षतः। महान्दुर्योधनस्यासीन्नागो मणिमयो ध्वजः MahāBhā. vi. 17. 25; vii. 65. 16; अनेकशतसाहस्रे बले दुर्योधनस्य ह। नान्यो महारथो राजञ्जीवमानो व्यदृश्यत MahāBhā. ix. 28. 33; अनेकशतसाहस्रं मुक्ताहारं वराङ्गना। अवमुच्य ... कैकेयी मन्थरामिदमब्रवीत् Rāmā. ii. 9. 43; अनेकशतसाहस्रीं विषण्णां हरिवाहिनीम्। जाम्बवान्समुदीक्ष्यैवं हनुमन्तमथाब्रवीत् Rāmā. iv. 65. 1; अनेकशतसाहस्रजन्मसंचयसंचितम्। पुण्यापुण्यं नृणां तद्वत् MārkP. 14. 23; (तक्षकस्य पुरम् ... सोऽपश्यद्राजतनयः) अनेकशतसाहस्रमणिदीपविराजितम् SkandP. iii (3). 8. 67; अवन्ती नाम नगरी मालवे भुवि विश्रुता। ... अनेकशतसाहस्रैः प्रासादैः समलंकृता BrahmP. 42. 28; 44. 44; 65. 9; 68. 37; रुरुः ... अनेकशतसाहस्रकोटिकोटिशतोत्तरैः। असुरैरन्वितः श्रीमान्द्वितीयो नमुचिर्यथा PadmP. v. 26.63.

अनेकशतहृद (anekaśata-hrada) *m.* several hundred ponds or lakes अस्ति ...प्रावृडिव घनश्यामलानेकशतहृदालंकृता च ...विन्ध्याटवी नाम Kād. 19. 19 (Bālabodhinī अनेकशतानि ये हृदास्तैरलंकृता)

अनेकशतह्रदा (aneka-śatahradā) *f.* many (flashes of) lightnings अस्ति ...प्रावृडिव घनश्यामलानेकशतह्रदालंकृता च ...विन्ध्याटवी नाम Kād. 19. 19 (Bālabodhinī अनेकाभिः शतह्रदाभिः विद्युत्स्फुरणैः)

अनेकशता (aneka-śatā) *adj.* (*f.*) consisting of, i.e. numbering more than one hundred अनेकशताः सेना एक एव जिगाय सः MahāBhā. xii. 133.6.

अनेकशफ (aneka-śapha) *adj.* (also used as noun) (animal) having more than one, i. e. two hooves अनेकशफेष्विति वक्तव्यम् MahāBh. i. 252. 23 (*on* i. 2. 73); KāśiVṛ. *on* i. 2. 73; PrakriKau. i. 644.3; वर्गाणामनुपानं पृथक् पृथक्। .... अनेकशफानां खदिरासवः SuśruS. i. 46. 433; अनेकशफेष्वित्यादि। अनेकानि शफानि खुरा येषां तेषु अयमेकशेषो भवतीत्येतदर्थरूपं व्याख्येयम् Nyās. i. 208. 8 (*on* i. 2. 73)

अनेकशबर (aneka-śabara) *m.* many foresters or wild mountaineers स महीपालो रत्नभूषणलोलुपैः। निहतोऽनेकशबरैः VetāPañ. (Śi.) 65. 8.

अनेकशब्द (aneka-śabda) *adj.* **1** expressed by many words एकार्थमनेकशब्दमित्येतद् उक्तम् Nir. 4. 1 (75. 2) (*but* MW. synonymous); **2** having different words युक्तावेकस्य चार्थस्य न्याय्या नानेकशब्दता ŚāstrDī. 46. 2 (*on* i. 3. 9)

अनेकशब्द (aneka-śabda) *m.* **1** different or various sounds नानोपहारस्रग्दीपकाकविक्षेपकालिकम्। अनेकशब्दबहुलं श्मशानं नरकायते MārkP. 8. 117. **2Ai** many words प्रत्यक्षैन्द्रियकत्वादेरौलुक्यानामसिद्धता अनेकशब्दकल्प्यत्वात् ŚlokaVār. 6. 329 (813. 6); अनेकार्थानेकशब्दयोरन्याय्यत्वात् ... संज्ञान्तरमपेक्षते TantrVā.528. 7 (*on* ii. 2. 22); प्रमादादितूलगाव्याद्यपशब्दप्रयोगसंभवादनेकशब्दगतवाचकशक्तिकल्पनागौरवप्रसङ्गात् NyāyMañ. i. 388. 23; अनेकशब्दानां स्वरूपबोधनपूर्वमेकार्थबोधने कोशतात्पर्यात् LaŚabdeŚe. i. 235. 1; **2Aii** more than one word श्लेषः। ... द्वेधा। ... अनेकशब्दप्रतिभानद्वारैकशब्दप्रतिभानद्वारा च RasGaṅ. 523. 7; **2B** many (synonymous) words या तु हस्तः करः पाणिरित्यत्रानेकशब्दता TantrVā. 226. 7 (*on* i. 3. 23); **3** the word *aneka* असहायवचनो वायमनेकशब्दः। असहायानि गतानि, भार्या सहायभूता एषां नासीदित्यर्थः ManuBh. i. 493. 26 (*on* 5. 157); कथं तर्हि द्व्यादिविशेषेष्वनेकशब्दः एकापोहेन वर्तते TātpaṬ. (Vā.) 492. 11 (*on* ii. 2. 65); अनेकशब्द एको न भवतीति व्युत्पत्त्या द्वयोर्बहुषु च द्रष्टव्यः NyāyKa. 115. 12.

अनेकशब्दत्व (anekaśabda-tva) *n.* **A** the state of being various words तत्रानेकार्थाभिधानेऽनेकशब्दत्वम् Vār. 2 *on* i. 2. 64; अनेकार्थाभिधानेऽनेकशब्दत्वं प्राप्तम् KāśiVṛ. *on* i. 2. 64; जात्युपलक्षितस्य द्रव्यस्य शब्देनाभिधाने सत्यभिधेयानेकत्वेनानेकशब्दत्वप्रसङ्गात् Pradī. ii. 93 B. 33 (*on* i. 2. 64); केवलं जातिपक्षे अक्षाः पादाः माषा इत्यादौ अनेकशब्दत्वं स्यात् PadMañ. *on* KāśiVṛ. *on* P. i. 2. 64 (377. 10); जातिपक्षेऽप्यक्षा इत्यादावनेकशब्दत्वं स्यात् Prasā. i. 124. 18; **B** the state of having many words (विकल्पः) स चेहानेकशब्दत्वे निश्चयेन प्रसज्यते TantrVā. 226. 4 (*on* i. 3. 23); अनेकशब्दत्वमनेकार्थत्वं च दैवबलवत्तयाङ्गीकृतम् NyāyMañ. i. 387. 25; अन्याय्यं ह्येकस्यार्थस्यानेकशब्दत्वमिति भेदस्तावदौत्सर्गिकः PrakaPañ. 261. 5; अनेकशब्दत्वमनेकार्थत्वं चान्याय्यमिति वक्ष्यते NyāyRa. 501. 20 (*on* 5 (10). 13)

अनेकशब्ददर्शन (anekaśabda-darśana) *n.* observation or perception of many words केवलद्रव्यपक्षेऽपि वृक्षश्चेति वाक्येऽनेकशब्ददर्शनाद्विरूपेषु द्वन्द्वदर्शनाच्चारम्भणीयमेतदिति PadMañ. *on* KāśiVṛ. *on* P. i. 2. 64 (377. 12)

अनेकशब्दप्रत्यय (anekaśabda-pratyaya) *m.* cognition (produced) from many words द्रव्यमेव संस्थानादिभेदादनेकशब्दप्रत्ययभाक् भवति BrahmSūBh. (Śaṅ.) 376. 9 (*on* ii. 2. 17); 378. 14 (*on* ii. 2. 17); सलिलं फेनं चेत्यनेकशब्दप्रत्ययभाक्सलिलमेव AitUBh. 250. 9 (*on* 1. 1)

अनेकशब्दप्रसङ्ग (anekaśabda-prasaṅga) *m.* undesired occasion for (being) more than one expressive word यदि तावज्जातिरेव शब्दार्थस्तदा तस्या एकत्वान्नानेकशब्दप्रसङ्गः PadMañ. *on* KāśiVṛ. *on* P. i. 2. 64 (376. 28)

अनेकशब्दराशि (anekaśabda-rāśi) *m.* multitude or group of many words एकैकत्राधिकरणे समानन्यायानामनेकशब्दराशीनां निर्णीयमानत्वात् NyāySu. (Ja.) 125 A. 11 (*on* i. 1. 6)

अनेकशब्दवाच्य (anekaśabda-vācya) *adj.* expressible by more than one word अनेकशब्दवाच्यस्त्वेकोऽर्थस्तं वाचकं शब्दं न जह्यात् NyāyMañ. i. 387.21.

अनेकशब्दविज्ञान (anekaśabda-vijñāna) *n.* cognition of many words अनेकशब्दविज्ञानान्न विशेषावधारणम् ŚlokaVār. 7. 105 (875. 3)

अनेकशब्दशक्ति (aneka-śabdaśakti) *f.* many expressive powers of words प्रत्यक्षेऽपि तावदर्थे अनेकशब्दशक्तेः कल्पना निष्प्रमाणिका TantrVā. 400. 6 (*on* ii. 1. 17)

अनेकशब्दसंघात (anekaśabda-saṅghāta) *adj.* consisting of various clusters of sounds अनेकशब्दसंताने(v. l. °संघाते) श्रुतिः कलकले कथम् PramāVār. 1. 258; श्रुतिनियमे इन्द्रियाणामनेकशब्दसंघातस्य कलकलस्य श्रुतिर्न स्यात् PramāVāSvopVṛ. 88. 24.

अनेकशब्दसंतान (anekaśabda-santāna) *adj.* consisting of continuous series of various sounds (words) अनेकशब्दसंताने श्रुतिः कलकले कथम् PramāVār. 1. 258.

अनेकशब्दसमवाय (anekaśabda-samavāya) *m.* assemblage of many sounds श्रोत्रे अनेकशब्दसमवायेऽपि बुभुत्सितमात्रशब्दग्रहवत् व्यासङ्गदशायां युगपज्ज्ञानानुत्पत्तेरुपपत्तेः TattvCin. i. 770. 8.

अनेकशब्दापेक्षा (anekaśabdāpekṣā) *adj.* (*f.*) dependent on many words न ह्यनेकशब्दापेक्षा व्यञ्जनप्रतिपत्तिः Sphuṭā. ii. 109. 14 (*on* 2. 47)

अनेकशब्दाप्रयोग (anekaśabdāprayoga) *m.* absence of use or employment of more than one word तस्याश्च (जातेः) एकत्वादनेकशब्दाप्रयोगः Pradī. ii. 73 A. 2 (*on* i. 2. 64)

अनेकशब्दाभिधान (anekaśabdābhidhāna) *n.* conveying or expression by more than one word एकस्य वानेकविशेषणाभिसंधिनोऽनेकशब्दाभिधानम् NyāyVār. 152. 4 (*on* i. 2. 42)

अनेकशब्दाभिधेयत्व (anekaśabdābhidheya-tva) *n.* the state of being what is to be expressed by many words पर्यायवक्रत्वम् ... यत्रानेकशब्दाभिधेयत्वे वस्तुनः किमपि पर्यायपदं प्रस्तुतानुगुणत्वेन प्रयुज्यते VakroJī. 31. 7.

अनेकशब्दाभिलप्य (anekaśabdābhilapya) *adj.* to be expressed by many words यदा पुनरेकमनेकनिमित्तसंबन्धि भवति तदा कथं तदा निमित्ततन्त्रत्वात् समाख्यायास्तद्वस्तु (अनेकेन निमित्तेन संबन्धेन सति) अनेकशब्दाभिला(v.l.ल)प्यम् NyāyVār. 195. 17 (*on* ii. 1. 15)

अनेकशब्दाभिलाप्य (anekaśabdābhilāpya) *adj.* to be expressed by many words निमित्ततन्त्रत्वात् समाख्यायास्तद्वस्तु (अनेकेन निमित्तेन संबन्धेन सति) अनेकशब्दाभिलाप्यम् NyāyVār. 195. 17 (*on* ii. 1. 15)

अनेकशब्दारम्भ (anekaśabdārambha) *m.* commencement, i. e. production of more than one word नन्वेकशब्देन कथमनेकशब्दारम्भः TattvCin. i.630.5.

अनेकशब्दार्थत्व (anekaśabdārtha-tva) *n.* the state of being the meaning of many words अनेकशब्दार्थत्वमेकशब्दार्थत्वेन ... बाध्यते TantrVā. 879. 18 (*on* iii. 3. 14)

अनेकशब्दोपलब्धि (anekaśabdopalabdhi) *f.* obtainment, i. e. cognition of many notes of sound घण्टास्थं संतानवृत्ति युगपदनेकशब्दोपलब्धिप्रसङ्गः NyāyVār. 306. 17 (*on* ii. 2. 36)

अनेकशब्दोपादान (anekaśabdopādāna) *n.* **A** employment of more than one word अनेकशब्दोपादानात् क्रियैकैवात्र दीप्यते Kāvyāda. 2. 112; **B** employment of different words अनेकशब्दोपादाने गोबलीवर्दन्यायेन पुनरुक्तिपरिहारः ManvaMu. 293. 30 (*on* 8. 28)

अनेकशय्या (aneka-śayyā) *f.* many beds अनेकशय्यायाः सुगन्धशृङ्गारात् ... सुवर्णगन्धेन युता लतान्तराः सन्तितराम् SāmaraU. 286. 22.

अनेकशर (aneka-śara) *m.* more than one arrow धनुर्वेदे हि ... संधानेऽनेकशरमोक्षणमित्यादिकं कर्मवैचित्र्यम् JayaMa. 123. 7 (*on* 2. 4)

अनेकशरावोदक (anekaśarāvodaka) *n.* water in more than one (earthen) pot प्रतिफलति भानुरेकोऽनेकशरावोदकेषु PraboSu. 124.

अनेकशरीर (aneka-śarīra) *n.* **A** different or various bodies अनेकापवरकसंचारितैकरत्नप्रदीप इवानेकशरीरेष्वप्येकोऽहम् TātpaVṛ. 123. 12 (*on* 2. 2); प्रभाया दीपस्येव ज्ञानेन धर्मभूतेन जीवस्यानेकशरीरेष्वावेशो भवति VedāntPāSau. 430. 20 (*on* iv. 4. 15); अनेकशरीरेषु जीवस्य धर्मभूतं ज्ञानमाश्रित्यापि स्थितिर्वक्तुमशक्या VedāntKau. 431. 16 (*on* iv. 4. 16); **Bi** more than one body यत्पुनरनेकशरीरेष्वेकं मुखमिति महदाश्चर्यम् SyādvāMañ. 11 (161); अनेकशरीरे एकजीववादस्याङ्गीकारात् AdvaiSi. 540. 5; **Bii** many bodies (जीवन्मुक्तिदशा) तत्र ह्यनेकशरीराण्यास्थाय सुखभोगस्य भोक्तव्यत्वात् SarvaDaKau. 29. 19; भूतभविष्यदनेकशरीरनियन्तृत्वपरतया जीव एव योजनीयम् ŚivārkaMaDī. i. 450. 33 (*on* i.3. 23)

अनेकशरीरगा (anekaśarīra-gā) *adj.* (*f.*) belonging or referring to different bodies आदावन्ते तथा मध्ये धियोऽनेकशरीरगाः TaiUBhāVā. 67. 15 (2)

अनेकशरीरग्रहण (anekaśarīra-grahaṇa) *n.* assumption of more than one body (simultaneously) न खलु शरीरविशिष्टः सन्नेवायमात्मा शरीरमुपादत्ते योगिनो युगपदनेकशरीरग्रहणायोगात् ĪśvaSi. (Yā.) 77.16.

अनेकशरीरत्व (anekaśarīra-tva) *n.* the state of having many bodies मुक्तस्य परमपुरुषसृष्टशरीराद्युपकरणवत्त्वम् ... अनेकशरीरत्वं सर्वज्ञत्वं च सूपपन्नम् VedāntKau. 432. 7 (*on* iv. 4. 16)

अनेकशरीरपरिग्रह (anekaśarīra-parigraha) *m.* **i** assumption of many bodies अनेकशरीरपरिग्रहोपपत्तिः, अनेकधाभवनं च शरीरसापेक्षम् ŚrutaPra. ii. 644. 18 (*on* iv. 4. 10); ii. 646. 30 (*on* iv. 4. 15); निष्पन्नोपायस्यापि प्रतिबन्धक-

कर्मविशेषात् ... अनेकशरीरपरिग्रहोपपत्तेः NyāyPari. 111. 11; **ii** assumption of more than one body अणुत्वे युगपदनेकशरीरपरिग्रहानुपपत्तिः ŚivārkaMaDī. ii. 493. 22 (*on* iv. 4. 15); मुक्तानां शरीराणि ... युगपदनेकशरीरपरिग्रहा इत्यादीनि भगवत्संकल्पादेव भवन्ति YatīndraDī. 53. 8; 70. 1.

अनेकशरीरप्रतिपत्ति (anekaśarīra-pratipatti) *f.* **1** acquisition or assumption of more than one body (simultaneously) सौभरिप्रभृतीनां शक्तिमतां युगपदनेकशरीरप्रतिपत्तिः BrahmSūBh. (Rā.) 315. 13 (*on* i. 3. 25); VedāntDī. 55. 17 (*on* i. 3. 26); **2** assumption of many bodies अनेकशरीरप्रतिपत्त्या देवानां संनिधानात्र कर्मणि विरोधः ŚrutaPra. ii. 61. 25 (*on* i. 3. 26)

अनेकशरीरप्रयुक्त (anekaśarīra-prayukta) *adj.* caused by more than one body सौभरिप्रभृतिषु ह्यात्मैकत्वेनानेकशरीरप्रयुक्तसुखादिप्रतिसंधानमेकस्य दृश्यते BrahmSūBh. (Rā.) 434. 8 (*on* ii. 1. 15); VedāntTaSā. 36. 1.

अनेकशरीरप्राप्ति (anekaśarīra-prāpti) *f.* **A** assumption of various bodies मनोभेदादनेकधाभावोपपत्तेर्नानेकशरीरप्राप्तिः VedāntKa. 552. 20 (*on* iv. 4. 10); **B** assumption of more than one body एकस्यापि योगसिद्धस्यानेकविग्रहप्रतिपत्तेः अनेकशरीरप्राप्तेः VedāntKau. 99. 5 (*on* i. 3. 27)

अनेकशरीरयोग (anekaśarīra-yoga) *m.* **A** association with, i. e. assumption of more than one body एकस्यानेकशरीरयोगः शरीरवियोगश्चात्यन्तं न स्यात् NyāyBh. 53. 13 (*on* i. 1. 40); स्मृतिरपि ... योगिनामपि युगपदनेकशरीरयोगं दर्शयति BrahmSūBh. (Śaṅ.) 188. 14 (*on* i. 3. 27); ŚaṅkaVi. (Ā.) 253. 1; **B** association with, i. e. assumption of various bodies (simultaneously) आत्ममनसोर्भेदानुपपत्तेः अनेकशरीरयोगासंभव इति नैष दोषः BrahmSūBh. (Śaṅ.) 857. 1 (*on* iv. 4. 15); योगशास्त्रेषु चानेकशरीरयोगं योगिनां वर्णयन्ति BrahmSūBh. (Bhā.) 61. 13 (*on* i. 3. 27); अणोरप्यनेकशरीरयोगः संभवति ŚrutaPra. ii. 644. 15 (*on* iv. 4. 10)

अनेकशरीरवृत्ति (anekaśarīra-vṛtti) *f.* existence in many bodies अणोरनेकशरीरवृत्त्ययोगात् ... मुक्तसृष्टशरीराणि निरात्मकानि ŚrutaPra. ii. 648. 16 (*on* iv. 4. 16)

अनेकशरीरवैयर्थ्य (anekaśarīra-vaiyarthya) *n.* futility of more than one body एकशरीरेणैव चरितार्थत्वादनेकशरीरवैयर्थ्यं स्यात् TantrVā. 380. 21 (*on* ii. 1. 5)

अनेकशरीरसंबन्धिन् (anekaśarīra-sambandhin) *adj.* related to more than one body (अणुत्वम्) तच्चैकदा एकशरीरस्येवानेकशरीरसंबन्धिन एकस्योपपन्नम् ŚrutaPra. ii. 386. 9 (*on* ii. 3. 52)

अनेकशरीरसर्ग (anekaśarīra-sarga) *m.* creation of many bodies अनेकशरीरसर्गे किं निरात्मकानि शरीराणि दारुयन्त्रवत्सृज्यन्ते BrahmSūBh. (Śaṅ.) 856. 8 (*on* iv. 4. 15)

अनेकशरीरस्थ (anekaśarīra-stha) *adj.* existing in many bodies एकीकृत्यानेकशरीरस्थमिमं ज्ञं यं विज्ञायेहैव स एवाशु भवन्ति। यस्मिंल्लीनाः HariStu.29.

अनेकशरीरादि (anekaśarīrādi) *adj.* more than one body etc. अथ मतं नैकस्यानेकशरीरादियोगः संसारः NyāyKa. 82. 3; एकस्यानेकशरीरादिसंयोगलक्षणः संसारः ... नोपपद्यते NyāyKa. 173. 5.

अनेकशरीराधिष्ठातृत्व (anekaśarīrādhiṣṭhātṛ-tva) *n.* the state of being one who occupies more than one body (simultaneously) अणिमाद्युपेतस्य युगपदनेकशरीराधिष्ठातृत्वाद् व्यापकत्वसिद्धिः NyāySā. 37. 12.

अनेकशरीराधिष्ठान (anekaśarīrādhiṣṭhāna) *n.* **1** control over many bodies अनेकशरीराधिष्ठानलक्षणैश्वर्यानुपपत्तिपरिहारपरं स्वाप्ययसंपत्त्योरिति सूत्रम् ŚrutaPra. ii. 648. 7 (*on* iv. 4. 16); **2** act of supporting, i.e. assuming many bodies अनेकशरीराधिष्ठानशक्तानां तु यथेष्टम् NyāySiA. 196. 25.

अनेकशरीरानुयायित्व (anekaśarīrānuyāyi-tva) *n.* the state of being that which follows or continues in several bodies प्रारब्धस्यानेकशरीरानुयायित्वशङ्कया कस्यापि विद्यानुष्ठाने प्रवृत्तिश्च न संभवति ŚivārkaMaDī. ii. 449. 12 (*on* iv. 1. 19)

अनेकशरीरानुयायिन् (anekaśarīrānuyāyin) *adj.* following or continuing in several bodies येषामाधिकारिकाणामन्येषां वानेकशरीरानुयायिप्रारब्धं न तेषां तत्प्राप्तिसंभवति ŚivārkaMaDī. ii. 448. 25 (*on* iv. 1. 19); ii. 449. 11 (*on* iv.1.19)

अनेकशरीरारम्भ (anekaśarīrāramabha) *m.* origin of more than one body अनेकशरीराम्भफलकत्वमेकस्य कर्मण इति वचनबलादवगन्तव्यम् ŚrutaPra. ii. 414. 27 (*on* iii. 1. 8)

अनेकशरीरावसान (anekaśarīrāvasāna) *adj.* which ends in more than one body आरब्धकार्ययोः पुण्यपापयोर्यत्फलं तदेकशरीरावसानमनेकशरीरावसानं वा भुक्त्वैव तदनन्तरं ब्रह्म प्राप्नोति VedāntSā. (Rā.) 376. 4 (*on* iv. 1. 19)

अनेकशरीरावेश (anekaśarīrāveśa) *m.* entering into, i.e. assumption of many bodies कथं पुनः मुक्तस्यानेकशरीरावेशादिलक्षणमैश्वर्यमभ्युपगम्यते BrahmSūBh. (Śaṅ.) 857. 6 (*on* iv. 4. 16); BrahmSūBh. (Bhā.) 247. 14 (*on* iv. 4. 16)

अनेकशरीरासंभव (anekaśarīrāsambhava) *m.* impossibility of various bodies आत्ममनसोर्भेदानुपपत्तेरनेकशरीरासंभवः LaCandr. 816. 21.

अनेकशरीरित्व (anekaśarīri-tva) *n.* the state of being one who is endowed with various bodies स्वरूपाणुत्वे ज्ञानेनानेकशरीरित्वोपपत्तौ च श्रुतिरस्ति ŚrutaPra. ii. 646. 29 (*on* iv. 4. 15)

अनेकशरीरैकजीववाद (anekaśarīraikajīva-vāda) *m.* doctrine of one soul in more than one body उक्ता दोषाः ... न त्वनेकशरीरैकजीववादे तस्य सर्वत्रापि सत्त्वात् Nyāyāmṛ. 294 B. 7.

अनेकशरीरोपाधि (anekaśarīropādhi) *m.* condition in the form of different bodies पादे मे वेदना शिरसि मे वेदनेत्यनेकवेदनास्वेकस्यैवानुसंधानं तथानेकशरीरोपाधिव्यवस्थितानेकवेदनास्वेकस्यैवानुसंधानप्रसङ्गात् NyāyMa. 5. 5.

अनेकशव (aneka-śava) *m.* many dead bodies or corpses अनेकशवमुण्डमालामालिवपुषि चण्डिकायामिव रूपपरिवर्तेन कृतसंनिधापलक्ष्यमाणायां क्षितौ ... नृपकुमारः ... अतिरंहसा निररी[र]मत् TilaMañ. 88. 11.

अनेकशशिभ्रम (anekaśaśi-bhrama) *m.* illusion as many moons क्व न प्रचिक्षेप पयोधिः ... तरङ्गभङ्गान्। सांयात्रिकस्त्रीवदनेष्वनेकशशिभ्रमेणेव कृताभियोगः ŚrīKaC. 12. 51.

अनेकशस् (aneka-śas) *adv.* [SiddhaHe. vii. 2. 151] **1** in various manners or ways, variously **2A** in great or large number **B** in great or much quantity **3** many times, again and again, frequently, repeatedly **4** as (preceded) by more than one (means of knowledge) **1** in various manners or ways, variously असर्वशस्त्रिप्रभृतिष्वनेकशः स्मरन्ति संख्यानियमेन शाकलम् ṚPrātī. 11. 11; तान्निवृत्तान् रणे शूरान् राधेयः ... अनेकशः ... बभञ्ज MahāBhā. viii. 56. 48; वानर। तानि तान्यात्मरूपाणि सृजसे त्वमनेकशः Rāmā. vi. 47. 83; ध्रुवासंज्ञानि यानि स्युर्नारदप्रमुखैर्द्विजैः। गीताङ्गानि तु (॰नीह) सर्वाणि विनियुक्तान्यनेकशः NāṭyaŚā. 32. 1 (AbhinBhā. व्यस्तसमस्तादिप्रकारवैचित्र्येण); वीतरागाः ... संसारनिःसारदुरन्ततां च विचिन्तयामासुरनेकशस्ते VarāṅgaC. 30. 29; कुलाष्टकसमायुक्तं चतुःषष्टिसमन्वितम्। अर्चितं च प्रयत्नेन सिद्धिर्भवत्यनेकशः KulārT. 10. 134; अभ्यासो ह्येकस्यार्थस्य अनेकशस्साध्यत्वमाक्षिपतीति भेदस्तावदौत्सर्गिकः PrakaPañ. 263. 8; न चेद्दशस्तादृश इत्यनेकशो वचोविचारेण किमर्थवेदिनाम्। वपुर्बलाकारविशेषशालिनां निरीक्ष्य साम्यं प्रवदन्ति तद्विदः KalyāKā. 2. 6; DevīŚ. 43; शृङ्गारः ... तद्भेदाः काममितरे हास्याद्या अप्यनेकशः (जायन्ते) AgniP. 338. 5; नास्माकं विविधो भावो वर्तते मुनिसत्तमाः। सम्यग्दृशः प्रपश्यन्ति विपरीतेष्वनेकशः VarāP. 71. 7; समुत्पद्य विपद्येह देहिनोऽनेकशः किल। मद्यीभवन्ति कालेन YaśasCam. ii. 327. 14; स राजा ... अनेकशः प्रजावतीम् ... विधाय वसुमतीम् ... साम्राज्यसिंहासनं भेजे UdaySuKa. 24. 14; 30. 19; 91. 8; खंभः ... अनेकसो(शो) येन रणे रिपु(पू)णामानर्तितानीह कव(ब)न्धकानि EI. xxii. 190. 21; पुत्रवत् त्रातपूर्वी नः पूर्वलक्षाण्यनेकशः। असंस्तव इवेदानीं प्रभुरस्मासु वर्तते TriṣaŚaPuC. i. 3. 310; कुम्भिभिर्नवसिन्दूरारुणकुम्भैरनेकशः। संध्याभ्रविभ्रमकरैः परिवव्रे नृपद्विपः PariPar. 1. 43; 8. 436; कन्दुकम्। क्रीडन्तः प्रेरयेयुस्ते बहुघातैरनेकशः। पुरोघातेन तेष्वेकः पश्चाद्घातेन चापरः Mānaso. iv. 4. 811; कामं हृष्यन् हृषीकेशोऽप्युपचारैरनेकशः। ... द्वारकां ययौ PāṇḍaC. 4. 470; त एव भूपाः प्रययुः प्रसिद्धिं ये वाचि विस्तारमगुः कवीनाम्। अनेकशो गाथकगीतिगृह्या मह्यां श्रियः केलिमया बभूवुः VasaViKā. 1. 9; भासि त्वमेको विश्वेश ... । भाथ यूयं हरिहरब्रह्माद्याः पाद्यनेकशः MugdhaBo. 25. 32 (147. 12); मूढास्तु तुच्छभोगानां कृते क्लिश्यन्त्यनेकशः। जानन्तोऽप्यस्थिरं देहं स्वं पश्यन्त्यजरामरम् SamarāSam. 8. 537; नायं त्यजति प्रभुणापि च। अनेकश उपायैस्तैः सुपरिच्छेदितोऽपि PrabhāC. 15. 5; (गमकाः सप्त कीर्तिताः) स्वरूपं कथ्यते नैषां व्याख्यातत्वादनेकशः BhāvPra. (Śā.) 192. 9 (7); (रूपकम्) इदमश्लिष्टशब्दनिबन्धनं मालया। अनेकशो रूपणात् Ekāva. 8. 6 (62) (217. 3); भास्करः ... कुर्वन् दानान्यनेकशः[।] ... श्रुतवान् फलमुत्तमम् EI. xiv. 102. 39; माघपण्डितः। पित्रा ... भोगायानेकशो दत्त्वा च विपेदे PurāPraSam. 130. 26; गोलैष्टङ्कैः कुशीभिश्च प्रभिन्दन्तोऽप्यनेकशः। न तेऽलम्भूष्णवोऽभूवन्दुर्गं भेत्तुं मनागपि HammīMaKā. 4. 118; **2A** in great or large number कन्यास्ताः ... वस्त्राणि जगृहुस्तानि यथासन्नान्यनेकशः MahāBhā. i. 73. 5; MatsyaP. 27. 5; तीर्थानि च सुपुण्यानि मया दृष्टान्यनेकशः MahāBhā. iii. 43. 25; iii. 146. 29; ix. 224*(1); ते रथास्तत्र विध्वस्ताः परार्ध्या भान्त्यनेकशः MahāBhā. viii. 14. 11; viii. 49. 79; नारीणां तदा वृन्दान्यनेकशः। शोकार्तान्यद्रवन् MahāBhā. xi. 9. 12; ऋष्टयस्तोमराः खड्गाः ... फलकान्यथ चर्माणि प्रतिकल्प्यान्यने-

कशः MahāBhā. xii. 101. 8; (लवणः) स तत्र दानवः क्रीडन्वर्षपूगाननेकशः ... लोकानुद्वासयति HariVaṁ. 44. 24; अन्तर्भूमिनिवासीनि सन्ति सत्त्वान्यनेकशः Rāmā. i. 880 * (1); (साधकः) भक्ष्यभोज्यान्यनेकशः। ... देवाय विनिवेदयेत् JayāS. 12. 67; अनेकशो मृगान् हत्वा। ... विकुक्षिरेकं शशमभक्षयत् ViṣṇuP. iv. 2. 16; iv. 4. 58; खे संगतान्यवाद्यन्त देवतूर्याण्यनेकशः ViṣṇuP. v. 20. 72; v. 22. 13; नरेन्द्रतनयैः सह ... द्विजभूपविशां सुताः। समानवयसः प्रीत्या रन्तुमायान्त्यनेकशः MārkP. 20. 7; जनयामास धर्मात्मा म्लेच्छान्सर्वाननेकशः ... दक्षः MatsyaP. 4. 54; उपानत्पादुकादीनि पादपीठान्यनेकशः। ... सर्वाणि ये अर्पयन्ति जगद्विभोः। ... भक्तोत्तमास्ते विज्ञेयाः PāraS. 8. 189; पावकात् अग्नेः विस्फुलिङ्गाः ... सहस्रशः अनेकशः प्रभवन्ते MuṇḍUBh. 325. 1 (*on* ii. 1. 1); पश्य मे पार्थ रूपाणि शतशः अथ सहस्रशः अनेकशः इत्यर्थः GītāBh. (Śaṅ.) 303. 5(*on* 11. 5); अधीयतेऽत्रार्थे वेदवाक्यान्यनेकशः BṛĀraUBhVā. i. 4. 808; वर्णानां वाचकत्वस्य समर्थनम् ... क्रमभाविनापि समस्तानां कार्यकारिणामनेकशो दर्शनात् NyāyMañ. i. 344. 21; अदर्शनं याति शक्तिर्नारायणात्मिका। ततः कर्माणि कुर्वीत विविधानि त्वनेकशः LakṣmīT. 48. 19; सृष्टाः ... भगवन् ... मांधा[तृ]प्रमुखाः ... नूनं त्वयानेकशः EI. xii. 60. 10; नद्यश्चक्रुस्तीर्थान्यनेकशः NīlaP. 186; अप्सरोगणसंघाश्च समाजग्मुरनेकशः BrahmP. 39. 11; 49. 28; च्यवने वृते सुकन्यया ... । देवदुन्दुभयश्चैव प्रावाद्यन्त अनेकशः BhaviP. 47A. 23 (i. 19. 48); मरीचेः कश्यपो जातो दक्षकन्यास्त्रयोदश। ताभ्यो देवाश्च दैत्याश्च समुत्पन्ना ह्यनेकशः DevīBhāP. iii. 13. 13; करिष्येऽनेकशः क्रीडास्ताभिः सह मनोरमाः ĀdiP. 23. 20; सिद्धा महात्मानो मरीच्याद्या महर्षयः। ... समाराध्य महादेवं सिद्धिं प्राप्ता ह्यनेकशः SaurP. 27. 20; राजराजाभिधानः ... आजहार च मखाननेकशः EI. xviii. 44. 340: [ना][ना]परिजनांतस्मै जनजातीननेकशः[।]प्रादात् श्रीहट्टनाथोऽयं शिवाय शिवकी[र्त्त]नः EI. xix. 281. 29; iii. 76. 19; संपादयन्ति चानग्रा दिव्यवासांस्यनेकशः TriṣaŚaPuC. i. 1. 235; i. 2. 962; i. 3. 210; दिग्गजानां युवराजानिव शौडीर्यशालिनः। मत्ताननेकपानेकेऽनेकशः पर्यढौकयन् TriṣaŚaPuC. ii. 2. 559; ii. 3. 232; सर्वकल्याणधुर्याणि तूर्यवर्याण्यनेकशः। नेदुः श्रेष्ठिगृहद्वारे PariPar. 2. 68; 4. 29; अनेकशो येन धृताङ्कुशा इव प्रचारशान्त्यै कलिदुष्टदन्तिनः ... ददिरे न धेनवः ŚrīKaC. 3. 36; अनेकशोऽङ्कैर्वीराणां पीतधाराम्बुडम्बरे। शोषः प्रादुष्कृतो न स्यात्तज्ज्वालासंज्वरं विना RājTa. (Ka.) 8. 2881; देवि ... द्वीपशैलाननेकशः .. वीक्षस्व PāṇḍaC. 5. 319; 15. 59; पुण्डरीकं दधत्येकं राजहंसाननेकशः। आकृष्टारियशःफेना प्रतस्थे तस्य वाहिनी KīrtiKau. 2. 72; ग्रामाकरद्रोणमडम्बपत्तनान्यनेकशः संघवृषो विलङ्घ्य सः। ... समाययौ पुरे गूर्जरनिर्जरेशितुः VasaViKā. 13. 43; 13. 60; विबुधैः सन्निवेशज्ञैः संगृहीतान्यनेकशः। ... सन्ति सूक्तानि SūktiMu. 0. 38; सुगत्यर्थं च दत्तानि महादानान्यनेकशः SamarāSaṁ. 4. 363; 7. 538; पराक्रमेण स्वायत्तीकृत्य देशाननेकशः। ... गोपाचलमहादुर्गं क्रमेण प्राप्तवानसौ UttaKuC. 499; पापिष्ठः क्षत्रबन्धुश्चेत्यादिवाक्यशतश्रुतेः। तस्य पादाश्रिता भूत्वा भूपाः प्रादुरनेकशः EI. xiv. 93. 62; मृतश्चाहं पुनर्जातो जातश्चाहं पुनर्मृतः। नानायोनिसहस्राणि मया दृष्टान्यनेकशः VetāPañ. (Śi.) 47. 6; के ... जनपदाः ... भूतलैरक्रियन्त सुकृतान्यनेकशः। यद् भवच्चरणपङ्कजद्वयस्पर्श एष चिरमन्वभावि तैः Nalābhyu. 3. 22; सम्राजः समजायंत क्रमशोऽनेकशस्ततः EI. vii. 80. 10; एको हि सूत्रधारः काष्ठप्रकृतीरनेकशो युगपत्। स्तम्भाग्रपट्टिकायां नर्तयतीह प्रगूढतया PraboSu. 128; यदमी एकत्र समुपचिता अनेकशो नानादेशीया जनाः परतो दृश्यन्ते तदमी तैर्थिका एव CaitaCan. 235. 22 (10); (प्रभुः) यस्य लोकगुणांशानां विभूतीनामनेकशः। प्राकृतेऽप्यनुभूयन्ते जनानां मुक्तिहेतवे BṛBrahmaS. i. 7. 56; iii. 4. 24; अहन् एको रणे रामो यातुधानाननेकशः RasGaṅ. 635. 5; वपुर्जलीयम् ... तदिन्द्रियं स्याद्रसनाभिधानकम्। ... विलक्षणास्तद्विषयास्त्वनेकशः Vidvanmo. 4. 13; वेश्याः शैलूषा अप्यनेकशः। ... आययुः सद्मचलम् ParamāKā. 42. 9; सुन्दरा अर्थाः ... अनेकशोऽद्याप्यज्ञातार्थाः सन्ति SetuBa. 178. 9; विश्वामित्रगणस्थशालङ्कायनस्य अन्येन नामसाम्येऽपि किंचित्प्रवरसाम्याभावान्न द्विगोत्रत्वं लोके सनाम्नां भिन्नानामनेकशो दर्शनात् BālamBha. i. 186. 4 (*on* 1. 153); **2B** in great or much quantity उत्थिते तस्मिन्नवनीश्वरे .. अनेकशो मणिभिः सरत्नोद्गारो वेलाप्रसर इव सागरस्य ... बभूव ... महानास्थानसंक्षोभः UdaySuKa. 39. 6; पुत्र्या सममनैषीच्च धनकोटीरनेकशः PariPar. 12. 280; मालाकारोपनीतेषु पुष्पाकल्पेष्वनेकशः। तासां दूरमनास्थाभूत् PāṇḍaC. 1. 575; **3** many times, again and again, frequently, repeatedly सैन्यानि तव भारत। ऊर्ध्वमेवाभ्यवेक्षन्त दुःखत्रस्तान्यनेकशः MahāBhā. viii. 2. 3; ix. 10. 14; मानुष्यं भावमापन्नं ये मां गृह्णन्त्यवज्ञया। संसरन्तीह ते मूढास्तिर्यग्योनिष्वनेकशः MahāBhā. xiv. App. I. 4 (85); अश्वमेधे महायज्ञे ... दीयतामन्नं वासांसि विविधानि च। इति संचोदितास्तत्र तथा चक्रुरनेकशः Rāmā. i. 13. 10; i. 74. 24; अनेकशो वध्यमानाः कुम्भकर्णेन वानराः। राघवं शरणं जग्मुः Rāmā. vi. 55. 34; अलिपङ्क्तिरनेकशस्त्वया गुणकृत्ये धनुषो नियोजिता KumāSaṁ. 4. 15; 5. 56; (स्वामित्वमीश्वरत्वं च) दत्तं ममान्यैरन्येभ्यो मया दत्तमनेकशः MārkP. 10. 24; 116. 52; अक्षराणि कर्णशष्कुलीमण्डलस्य सर्वां नेमिं व्याप्नुवद्भिः संयोगविभागैर्नैरन्तर्येणानेकशो ग्रहणात् महानिवावयववानिवोपलभ्यन्ते ŚābaBh. 84. 1 (*on* i. 1. 17); पठन्ति चतुरो वेदान् धर्मशास्त्राण्यनेकशः। आत्मानं नैव जानन्ति दर्वी पाकरसं यथा CāṇaNīDa. 15. 12; प्रतिमा ... ईक्ष्यते। रुदितैरिव पुष्पितेक्षणा विपुलत्रासकृतैरनेकशः JānaHa. 4. 56; तीर्थेषु मया श्राद्धान्यनेकशः। कृतानि पितृतुष्ट्यर्थम् PrajāSm. 1. 3; (हे जामदग्न्य) अनेकशो निर्जितराजकस्त्वम् Bhaṭṭi. 2. 52; रक्तकुवलयवनानि। ह्येषामनेकशो रतिरणप्रणीतोत्थितानां प्रतिस्पर्धिजये सहायकृत्यम् AvantiKa. 27. 13; अनेकशः संस्तुतमप्यनल्पा नवंनवं प्रीतिरहो करोति ŚiśuVa. 3. 31; अनेकशः कृतोद्योगस्तस्यास्मि विनिपातने। निवारितस्त्वया PadmP. (Ra.) 12. 162; VṛGautaSm. 500. 16 (1); 524. 9 (5); TriṣaŚaPuC. i. 6. 515; अहं च सुचरिताचरणेषु पित्रा निरूपितैरनेकशः प्रवर्त्यमानोऽपि वृद्धैः ... उद्वेजकः पित्रोरभूवम् UdaySuKa. 55. 30; अनेकशो युद्धेऽनेन यशोर्थिना तृणमिव त्यक्ता वयं केव(लम्) EI. i. 181. 9; भीमराजस्य सैन्यम् ... यश्चानेकशः अन्योन्य(ा)स्त्रसमायोगसञ्जाताग्नौ महाहवे। ... रिपुसैन्यमनीनशत् EI. v. 133. 28; अनेकशः स्मृतिष्वपीश्वरः कारणत्वेनोपादानत्वेन च प्रकाश्यते BrahmSūBh. (Śaṅ.) 284. 2 (*on* ii. 1. 1); ओंकारमिति च द्वितीयानेकशः श्रुता बाध्येतान्यथा PraśnaUBh. 286. 5 (*on* 5. 5); यः पुरुषः ... पक्षान् कृत्वा संपतेत् अनेकशः ... परमात्मनः ... असौ ... अन्तं न गच्छेत् SanatBh. 306. 15 (*on* 4. 22); (विप्रसर्वस्वं हृतम् ... तन्निमित्तं क्षतः) तदाहरणनिमित्तं यथाशक्त्या घातितोऽपि पुनःपुनरुत्थाय व्यायच्छन्ननेकशः शस्त्रैः क्षतो यदि जीवति तथाप्यनाहृतेऽपि द्रव्ये विशुध्यत्येव BālaKrī. ii. 103. 2 (*on* 3. 241 (? 247)); न तत्र सूर्यो भातीति मन्त्राम्नायो ह्यनेकशः BṛĀraUBhVā. iv. 3. 363; घटतेऽसाविदं सर्वं सर्वस्यायुर्यतो ह्यसुः। तस्मात्तं तद्विदः प्राहुः सर्वायुषमनेकशः TaiUBhāVā. 98. 21 (2); उपदिश्यन्ते मोक्षशास्त्रेष्वनेकशः ... प्रत्यूहभावनाः NyāyMañ. ii. 87. 5; विषयं वनमप्यनेकशः स सुखं दुःखमिवात्यगान्नृपः RāghPāṇ. (Dha.) 4. 50; उक्तं गोत्रार्षेयादिस्मृतिमत्स्वित्यनेकशः। आस्तामप्रस्तुता चिन्ता ĀgaPrā. 73. 11; भ्राजिष्णवो नवनवोन्मीलितनायकगुणोत्कर्षास्तेषां हर्षातिरेकमनेकशोऽप्यास्वाद्यमानाः समुत्पादयन्ति सहृदयानाम् VakroJī. 244. 18; जलधिमध्यमग्नौसमुद्धरणेष्वनेकशः कवलितोऽपि हर्म्यतलप्रणालसलिलपूर इव हेलया निष्क्रामति मकरमुखः TilaMañ. 130. 6; नारदेन ... अनेकशः कृतोपदेशः काश्यपीतलं यियासुर्वसुः YaśasCam. ii. 355. 24; ii. 55. 2; तां च गुहामहं पुष्यश्चानेकशो नन्दाभगवतीयात्रानुसारित्वात्साधु जानीवः YaśasCam. ii. 364. 15; ii. 376. 5; (श्लोकेऽस्मिन्) अत्रानेकशो दण्ड इत्यस्यावृत्तिः SaraKaṇṭhā. 262. 24; 657. 7; जलस्य शुद्धिं विधिवन्मन्त्रैः कुर्यादनेकशः SaurP. 42. 30; कर्मव्यवहारः लोके वेदे च ... 'आत्मानं वेद' 'आत्मा ज्ञातव्यः' इत्यनेकशः प्रयोगः ŚāstrDī. 122. 20 (*on* i. 1. 5); व्यतिकरमनेकशः स्थाने स्थाने विविधरूपमुपलब्धवती (अहम्) UdaySuKa. 111. 10; ŚabdaBhePra. (Ma.) 3. 18; सत्कृतोऽनेकशोऽप्येष सत्क्रियेत यदापि न। ... कायः खलु खलोपमः TriṣaŚaPuC. i. 1. 252; i. 2. 671; i. 4. 601; अभ्रंलिहेषु वृक्षेषु कृतास्पदमनेकशः। क्रीडया खेचरद्वन्द्वैर्विहंगमिथुनैरिव। ... प्रविवेश तदुद्यानं भगवानजितप्रभुः TriṣaŚaPuC. ii. 3. 247; अपानसत्रशालायां द्विकास्तस्यां द्विजा इव। विविशुश्च निरीयुश्चानेकशो भोजनार्थिनः PariPar. 2. 389; 11. 2; अनेकशोऽहं विमृशन्नपीत्थं खलं न वेद्मि स्थिरमस्थिरं वा ŚrīKaC. 2. 24; AlaṅkāRa. 31 (39); यौष्माकीयेऽपि हि मते मया श्रुतमनेकशः। दर्शनस्य तिरस्कारं? सर्वस्थाम्ना निवारयेत् MudriKu. 1. 31; अत्याश्चर्यम् ... इदम् ... कुर्वन्कार्यमनेकशः सुमनसामागान्न वैकुण्ठताम् EI. ii. 184. 14; अनुरागमायतदृशः कृशेतरं त्वयि ... लिखितत्वदाकृतिरनेकशस्तया रतिवासभित्तिरपि तेऽभिधास्यति NemiNir. 9. 50; भीमः कदाचिदेतेषाम् ... शिरः। नालिकेरद्वयास्फालमास्फालयदनेकशः PāṇḍaC. 3. 164; गलद्गङ्गाजलभ्रान्तिं यानहंसस्य यच्छता। चामरेण सरस्वत्या वीज्यमानमनेकशः ... विलोक्य तत्र सावित्रीप्रियं पिप्रियिरे सुराः Surath. 3. 4; भयानकमयान्येव प्रकरणानि प्रपञ्चयद्भिरनेकशः कुशीलवसार्थैः कदर्थितोऽयं लोकः HammīMaMa. 1. 1 (9); VasaViKā. 6. 17; तृप्तिवाक्यमपि ... प्राशस्त्यपरमेवेति। तन्न ... फलदातृत्वस्यापि विधिमन्त्रयोरादिमध्यावसानेष्वनेकशोऽभिधानात् ... अलीकत्वकल्पनानुपपत्तेः CaturCin. iii (1). 23. 20; मनसापि हते जन्तौ हन्तुर्मृत्युरनेकशः SamarāSaṁ. 4. 306; कीर्त्तिपालो महाबाहुः सुराष्ट्रामण्डलं ययौ। तद्देशाधीश्वरं निग्रहीतुम् ...। अनेकशो विग्रहैश्च खेदिताद्य नराधिपम् PrabhāC. 198. 10; कृष्णैलेश्वरसंनिधौ ... वीतापायमनेकशो विदधता ब्रह्मप्रतिष्ठापनम्। आनृण्यं समपादि RasāSu. 2. 14 (1. 12); मया दत्तानि दानानि। दीनानामप्यनेकशः UttaKuC. 265; गोमयगाढोद्वर्तितपूर्वं पश्चादनेकशो लिप्तम्। भवति हयलिङ्गसदृशं लिङ्गं कठिनाङ्गनादयितम् ŚārṅgaPa. 3232; प्रोक्ताः .... नानामन्त्राश्च यन्त्राणि सिद्धोपायान्यनेकशः MahNirvāT. 2. 25; लब्ध्वा तरोश्छायाम् यस्य भवद्भिरेव शमिता घर्मापदोऽनेकशः Subhāṣi. 809; 2937; न... एतदनुशासनमनादरणीयम्। ... 'पाणिनीयं महाशास्त्रं पदसाधुत्वलक्षणम् ...।' इति पराशरोपपुराणादेश्चानेकशो दर्शनात् VaiyāBhū. 72. 21 (*on* 21); 95. 9 (*on*

22); अनेकशः पुनः पुनः BālamBha. ii. 56. 24 (*on* 2. 39); **4** as (preceded) by more than one (means of knowledge) (अर्थापत्तिः) सर्वप्रमाणपूर्वत्वादेकशोऽनेकशश्च सा।... प्रत्यक्षपूर्विकेत्यादिभेदैः षोढा निगद्यते SaraKaṇṭhā. 392. 14 (comm.अनेकप्रमाणपूर्वा)

अनेकशस्त्रपात (anekaśastra-pāta) *m.* fall, i.e. stroke of various weapons अनेकशस्त्रपातव्यतिकरत्रस्तभृङ्गवृन्दोन्मुच्यमानगण्डमण्डलानाम्... मातङ्गानां गरीयसा गर्जितानुस्वरेण... ग(?र)णतलमनुकरोति स्म मूलरसातलस्य AvantiKa. 102. 14.

अनेकशस्त्रप्रहारिन् (anekaśastra-prahārin) *adj.* striking with various weapons दैत्याः ... प्राकाम्येन युयुधिरेऽनेकशस्त्रप्रहारिणः GaṇeP. ii. 64. 5.

अनेकशस्त्रश्रेणि (aneka-śastraśreṇi) *f.* many series or multitudes of weapons शस्त्रागारमिवानेकशस्त्रश्रेणिविभूषितम्। ... अध्यास्त स रथं रथिनां वरः TriṣaŚaPuC. i. 4. 89.

अनेकशस्त्रसंवीत (anekaśastra-saṁvīta) *adj.* furnished with or involving various weapons रात्रौ युद्धम् ... अनेकशस्त्रसंवीतं महारौद्रमवर्तत SkandP. i (1). 17. 219.

अनेकशस्त्रसंपन्न (anekaśastra-sampanna) *adj.* equipped with various weapons यातो नरान्तकः। अनेकशस्त्रसंपन्नश्चतुरङ्गबलान्वितः GaṇeP. ii. 62. 43.

अनेकशस्त्राली (anekaśastrālī) *f.* series of various weapons समर्प्य कवचानेकशस्त्रालीतुरगादिकम्। सारसत्कारतः सज्जीचकार सुभटान् नृपः CitraPaC. 424.

अनेकशस्त्रास्त्र (aneka-śastrāstra) *n.* various weapons and missiles समेत्य सर्वे स्वबलैरुदारैरनेकशस्त्रास्त्रविभूतिमद्भिः। ... निश्चक्रमुर्भूपतयः प्रयोद्धुम् VarāṅgaC. 16. 34.

अनेकशस्त्रास्त्रयुत (anekaśastrāstra-yuta) *adj.* equipped with various weapons and missiles दैत्याः ...। अनेकशस्त्रास्त्रयुतास्तदाभवन् विष्णौ गते गर्जमानास्तदानीम् SkandP. i (1). 12. 74.

अनेकशस्त्रास्त्रविद् (anekaśastrāstra-vid) *adj.* well-versed in (the operation of) various weapons and missiles बालोऽपि भूपाल तनूभवस्ते ... अनेकशस्त्रास्त्रविदाहवज्ञः Raghunā. 7. 52.

अनेकशस्यप्रशस्या (anekaśasya-praśasyā) *adj. (f.)* praiseworthy due to abundant crops वसुधानेकशस्यप्रशस्या भूयात् HammīMaMa. 5.60(?61)

अनेकशाख (aneka-śākha) *adj.* [*f.* - *ā*] **A** having many branches पशुपतिवचनाद्भवामि सद्यः कृमिरथ वा तरुरप्यनेकशाखः MahāBhā. xiii. 14. 95; अनेकशाखश्चैत्यश्च निपपात महीतले HariVaṁ. 106. 49; नन्वनेकात्मकं ब्रह्म यथा वृक्षोऽनेकशाखः BrahmSūBh. (Śaṅ.) 309. 10 (*on* ii. 1. 14); दक्षः ... यस्याशीर्वाददूर्वादलकलितशिखो भूपतेर्यज्ञयूपः संयातोऽनेकशाखः Vidvanmo. 1. 2; **B** having various branches, i. e. schools of thought अनेकशाखा विप्रतिपत्तिः (वाक्यार्थे) NyāyMañ. i. 300. 25; अनेकशाखं प्रतिपदं ज्ञानयौगपद्यमापद्यते NyāyMañ. i. 360. 27.

अनेकशाखत्रयी (anekaśākha-trayī) *f.* triad of the Vedas with various recensions वाल्मीकिरश्लाघत (सभाम्) तामनेकशाखत्रयीभूरुहराजिभाजा।... कण्ठपथेन NaiṣC. 10. 57.

अनेकशाखप्रशाख (aneka-śākhapraśākha) *adj.* having many branches and sub-branches अनेकशाखप्रशाखो विटपः तन्मध्यभागो वृक्षविस्तारो वा येषां ते तथा AupaSūṬ. 12. 8.

अनेकशाखयत् (anekaśākhayat) *adj.* rendering to be of various kinds or types अस्य संपदमनेकशाखयत् प्रेक्ष्यतामिदमिहान्यदद्भुतम् Yādavā. 17. 12 (comm. बहुविधां कुर्वत्)

अनेकशाखा (aneka-śākhā) *f.* **1** many branches शृणु दृष्टान्तम् ... अनेकशाखादियुक्तस्य वृक्षस्य ChāndoUBh. 391. 7 (*on* vi. 11. 1); **2** various recensions (of the Veda) एकस्या वैश्वानरविद्यादिकाया अनेकशाखासु श्रूयमाणायाः किमेकविद्यात्वमुत विद्याभेद इति चिन्त्यते BrahmSūBh. (Rā.) 614. 7 (*on* iii. 3. 1); बृहदारण्यके च शाण्डिल्यविद्याम्नाता सा च यथानेकशाखासु वेद्यैक्याद्विद्यैक्यं तथैकस्यामप्येकैव विद्यैक्याद्गुणोपसंहारः VedāntPāSau. 311. 16 (*on* iii. 3. 19); उद्गीथविद्या°...° वैश्वानरविद्याद्याः एकैका अनेकशाखासु पठिताः VedāntKau. 299. 3 (*on* iii. 3. 1); SarvaDaKau. 97. 17.

अनेकशाखागत (anekaśākhā-gata) *adj.* belonging or pertaining to various branches (of the Veda) न चेहानेकशाखागतानामनुमन्त्रणानां मिथः प्रत्यासत्तिर्हि विहिता ŚāstrDī. 409. 67 (*on* v. 1. 3); NyāyKuA. i. 132. 6.

अनेकशाखागहन (anekaśākhā-gahana) *adj.* **1** deep or difficult (to understand) due to various recensions सतीं श्रुतस्कन्धवने विहारिणीमनेकशाखागहने सरस्वतीम्। गुरुप्रवाहेण जडानुकम्पिना स्तुवेऽभिनन्दये वनदेवतामिव RāghPāṇ. (Dha.) 1. 2 (comm. प्राभृतिकादिग्रन्थविशेषैर्गहने); **2** thick due to many branches (of the trees), RāghPāṇ. (Dha.) 1.2 (comm. अनेकाभिर्वृक्षशाखाभिर्निबिडे)

अनेकशाखाजन्य (anekaśākhā-janya) *adj.* produced from various recensions अनेकशाखाजन्यज्ञानरूपस्य च श्रवणस्य ...अतिप्रयत्नसाध्यत्वानुभवात् Nyāyāmṛ. 625A. 8.

अनेकशाखाद्यभिज्ञ (anekaśākhādy-abhijña) *adj.* knower of various recensions etc. इतिहासपुराणाभ्यां वेदं समुपबृंहयेत् ...वेदतात्पर्यम् ... अनेकशाखाद्यभिज्ञऋषिप्रणीतनिर्णयात्मकेतिहासाद्यनुसारेणैव ज्ञेयम् Nyāyāmṛ. 618A.9.

अनेकशाखाध्ययन (anekaśākhādhyayana) *n.* **i** study of many recensions (of the Veda) अनेकशाखाध्ययनमप्यस्ति वेदानधीत्येति ManuBh. i. 87. 27 (*on* 2.29); °विध्यर्थवादमन्त्रात्मकानेकशाखाध्ययनधारणादिष्वधीरधियो भक्तानवलोक्य ...तदर्थं संक्षिप्योपदिदेश ĀgaPrā. 51. 16; त्रयीनिष्कर्षम् ...पूर्वमभ्यस्य पश्चाद्वेदम् ...एतद्यानेकशाखाध्ययनपक्षे ManvaVi. 518. 7 (*on* 4. 125); अनेकशाखाध्ययने च स्वशब्दवैयर्थ्यापत्तेः MīmāKau. iii (1). 17. 5 (*on* i. 2. 7); **ii** study of more than one recension (of the Veda) न च पुंविशेषं प्रत्यस्यार्थवत्त्वम् ...वाच्यम्, एकस्यानेकशाखाध्ययनासंभवात् AdvaiSi. 822. 14; 'अध्वर्युं वृणीते' तिवत्स्वीयत्वैकत्वयोर्विवक्षितत्वेनानेकशाखाध्ययनानुपपत्तेः BhāṭṭDī. i. 180. 7 (*on* ii. 4. 2)

अनेकशाखाध्यायिन् (anekaśākhādhyāyin) *adj.* **i** who studies or learns various recensions (of the Veda) अनेकशाखाध्यायिनस्तु तदर्थपरस्य सर्वमेतत्प्रत्यक्षम् ManuBh. i. 146. 3 (*on* 2. 136); काठकादिभ्यः पूर्वपुरुषसंज्ञाभिश्च समाख्यानप्रसङ्गात्। पूर्वे त्वनेकशाखाध्यायिनः ŚrutaPra. ii. 66. 13 (*on* i. 3. 28); **2** who studies more than one recension (of the Veda) तत्र अनेकशाखाध्यायिनापि वेदमित्येकवचनात् एकामेव शाखामादितः ...आरभ्य पठनीयम् VīraMi. (Āhnika.) 329.7.

अनेकशाखाप्रभिन्न (anekaśākhā-prabhinna) *adj.* divided into various recensions (of the Veda) लब्धनानागमस्थितिः। ... नाना अनेकशाखाप्रभिन्नसामादयः LalitāTriBh. 345. 1 (*on* 53)

अनेकशाखाबोधित (anekaśākhā-bodhita) *adj.* made known or conveyed by more than one recension (of the Veda) अनेकशाखाबोधिते चैकस्मिन् कर्मणि प्रथमेनाज्ञातज्ञापने सिद्धे द्वितीयादेरनुवादकत्वेन तत्र प्रामाण्यम् SarvaDaKau.97.23.

अनेकशाखाभेद (anekaśākhā-bheda) *m.* divisions of various recensions (of the Veda) अनेकशाखाभेदभिन्नस्य ... ऋग्वेदाद्याख्यस्य ... महतो भूताद् योनेः संभवः BrahmSūBh. (Śaṅ.) 13. 17 (*on* i. 1. 3); अनेकशाखाभेदभिन्नो वेदो न शक्यते सर्वैः प्रमातुम् ManuBh. i. 6. 10 (*on* 1. 3); स वेदो विशिष्टः शब्दराशिरपौरुषेयो मन्त्रब्राह्मणाख्योऽनेकशाखाभेदभिन्नः ManuBh. i. 59. 19 (*on* 2. 6)

अनेकशाखारचित (anekaśākhā-racita) *adj.* constituted of many branches क्रूरकर्माणो नराः ...यान्ति दक्षिणेन यमालयम्।... अनेकशाखारचितैर्व्याप्तैर्वंशवनैः क्वचित् BhaviP. 285 A. 23 (i. 192. 15)

अनेकशाखावितत (anekaśākhā-vitata) *adj.* extended over many branches विष्णुरूपस्तरुः ...। अनेकशाखावितत्श्चतुर्मुख इवापरः PadmP. v. 18. 189; नराः ...यान्ति दक्षिणेन यमालयम्। ...अनेकशाखाविततैर्व्याप्तं वंशवनैः ...पीड्यमानाः ŚivaP. v. 7. 13 (413B. 8)

अनेकशाखाविद् (anekaśākhā-vid) *adj.* well-versed in various recensions (of the Veda) ननु वाधूलशाखोक्तमपि कुतो ब्रह्मेत्यत आह ...अनेकशाखाविदामेवात्र सम्यगधिकारज्ञापनायैतदुक्तम् NyāySu. (Ja.) 143 A. 11 (*on* i. 1. 6)

अनेकशाखाविप्रकीर्ण (anekaśākhā-viprakīrṇa) *adj.* spread over various branches अनेकशाखाविप्रकीर्णम् ...शिवस्य वैभवम् ŚivārkaMaDī. i. 582. 29 (*on* i. 4. 29); अनेकशाखाविप्रकीर्णसकलगुणोपसंहारस्य कर्तुमशक्यत्वात् ŚivārkaMaDī. ii. 290. 20 (*on* iii. 3. 5)

अनेकशाखाश्रुत (anekaśākhā-śruta) *adj.* mentioned, i. e. known in various recensions (of the Veda) अनेकशाखाश्रुतमग्निहोत्रादिकं प्रतिशाखं भिद्यते MayūMāli. 180. 8 (*on* ii. 4. 2)

अनेकशाखासनाथ (anekaśākhā-sanātha) *adj.* possessing or endowed with many branches अस्ति दाक्षिणात्ये जनपदे पृथ्वीप्रतिष्ठानं नाम नगरम्। तस्य समीपस्थो महान् अनेकशाखासनाथो न्यग्रोधपादपस्तिष्ठति Pañcā. 174.10.

अनेकशाखासंबाध (anekaśākhā-sambādha) *adj.* thronged or crowded with, i. e. consisting of many branches ते (अरण्ये) अनेकशाखासंबाधन्यग्रोधं ददृशुः SkandP. iii (1). 31. 34.

अनेकशाखास्थ (anekaśākhā-stha) *adj.* present or existing in various recensions (of the Veda) गुरूपदेशेनानेकशाखास्थवाक्यार्थग्रहणमात्रं श्रवणम् Nyāyāmṛ. 623 A. 3; न च ...अनेकशाखास्थवाक्यार्थज्ञानम् AdvaiSi. 871. 3; अनेकशाखास्थवेदान्तवाक्यानां ...श्रवणं विधीयते LaCandr. 871. 17.

अनेकशान्तिपद्धति (anekaśāntipaddhati) *f.* name of a work, pw.

अनेकशापभ्रुकुटि (aneka-śāpabhrukuṭi) *f.* many eyebrows raised at the time of (uttering) curses अनेकशापभ्रुकुटिभवनतोरणेन भ्रूलताद्वयेन विराजितम् ...मुनिकुमारकमपश्यम् Kād. 139. 16.

अनेकशाबलेयादिविशेष (aneka-śābaleyādiviśeṣa) *m.* many particular items such as spotted one etc. सामान्यरूपं ह्यनेकशाबलेयादिविशेषगतम् Śarka.16.4.

अनेकशासितृत्व (anekaśāsitṛ-tva) *n.* the state of being the ruler of many जगतो यथाकथंचिदनेकाधारत्वकल्पनसंभवेऽप्यनेकशासितृत्वकल्पनं न संभवति ŚivārkaMaDī. i. 423. 23 (*on* i. 3. 10)

अनेकशास्त्र (aneka-śāstra) *n.* **A** various sciences विष्णुशर्मा नाम ब्राह्मणोऽनेकशास्त्रविख्यातकीर्तिरस्ति Tantrākhyā.1. 20; आसीदिन्द्रस्यानेकशास्त्रागमाप्रतिहतबुद्धिः ...शुकः पुष्पको नाम Pañcā. 106. 11; **B** various works or scriptures हारीतेन तथा प्रोक्ता काकमाची सुपूजिता। आलोक्यानेकशास्त्राणि आत्रेयेणापि पूजिता HārīS. iii. 3. 27; **C** various topics or rules अनेकशास्त्रदर्शित्वमित्यर्थालोकहेतवः Vāgbhaṭa. 1. 14 (comm. नानाशास्त्रदर्शनशीलत्वम्)

अनेकशास्त्रविवरण (anekaśāstra-vivaraṇa) *n.* explanation of various topics or rules सर्वेषाम् ...अनेकशास्त्रविवरणव्यापारसक्तचित्तानां कालोऽतिवर्तते Tantrākhyā. 82. 25; PañcT. 2. 77 (33) (251. 9)

अनेकशास्त्रसंसिद्धि (anekaśāstra-saṁsiddhi) *f.* perfection in various sciences तदत्रास्ति विष्णुशर्मा नाम ब्राह्मणोऽनेकशास्त्रसंसिद्धिलब्धकीर्तिः Pañcā.1.24.

अनेकशास्त्राधिगत (anekaśāstrādhigata) *adj.* acquired through various sciences मदनव्याधिः येनानेकशास्त्राधिगतनिष्पन्दबुद्धिः ...कर्णीपुत्रोऽपि नामैतामवस्थामुपनीतः PadmPrā. 3. 9; संजीवकेनाप्यनेकशास्त्राधिगतबुद्धिप्रागल्भ्येन ...पिङ्गलको धीमान् कृतः Pañcā. 21. 24.

अनेकशास्त्रार्थ (anekaśāstrārtha) *m.* **1** purport of various sciences अनेकशास्त्रार्थप्रणिहितबुद्धित्वात् च संजीवकेन ...पिङ्गलकः ... धीमान् कृतः Tantrākhyā. 13. 23; PañcT. 1. 54 (34) (46. 4); 2. 72 (3) (246. 11); Pañcā. 164. 4; अनेकशास्त्रार्थमतिप्रवीणैः। विवक्तु(?क्तृ)भिः ...स्वपक्षसिद्धिं निजगाद राजा VarāṅgaC. 25. 93; **2** objective of various works or scriptures उपनीयतेऽनेनेति व्युत्पत्तौ ...अन्यपदार्थत्वेनोपनयनं स्यात्। ततश्चोपनयनानियम इत्यनेकशास्त्रार्थविप्लवापत्तिः VīraMi. (Saṁskāra.) 334. 17.

अनेकशास्त्रावगाहन (anekaśāstrāvagāhana) *n.* plunging deep into, i. e. deep study of various sciences अनेकशास्त्रार्थप्रणिहितबुद्धित्वात् च संजीवकेन (v. l. अनेकशास्त्रावगाहनाद् उत्पन्नबुद्धिप्रागल्भ्येन) ... पिङ्गलको धीमान् कृतः PañcT. 1. 54 (34) (46. 4)

अनेकशिख (aneka-śikha) *adj.* having many flames दहते भवबीजसंततिं शिखिनेऽनेकशिखाय ते नमः Kirātā. 18. 38.

अनेकशिखर (aneka-śikhara) *adj.* **1** having various spires or the lower turrets षोडशास्त्रसमायुक्तो नानारूपसमन्वितः। अनेकशिखरस्तद्वत् सर्वतोभद्र उच्यते MatsyaP. 269. 34; ते वीरसत्तमाः ...। अनेकशिखरं तस्य सभामण्डपमाययुः GaṇeP. ii. 122. 33; अनेकशिखरश्चित्रश्चतुर्द्वारो महोच्छ्रितः। विमानच्छन्दकस्त्वष्टभूमिकः SamarāSū. 63. 6; **2** having many crests सूर्यपुत्रोऽग्निपुत्रस्तु ...। अनेकशिखरः केतुः स ते पीडां व्यपोहतु BhaviP. 260 B. 34 (i. 175. 49)

अनेकशिखराकीर्ण (anekaśikharākīrṇa) *adj.* crowded with or surrounded by many spires पञ्चभूः सर्वतोभद्रः ...। अनेकशिखराकीर्णः कर्तव्यः SamarāSū. 63.8.

अनेकशिखरानन (anekaśikharānana) *adj.* consisting of many spires and faces, i. e. doors प्रोक्ताः ... प्रासादाः ... कैलासो नवभूमिकः। विमानच्छन्दकस्तद्वदनेकशिखराननः MatsyaP. 269. 32.

अनेकशिखावपन (anekaśikhā-vapana) *n.* cutting or shaving off of more than one, i. e. five locks of hair (ब्राह्मण्याः शिरसि वपनं कारयित्वा) अनेकशिखावपनप्राप्तये शिरसीत्युक्तम् Aparā. 1085. 24 (*on* 3. 260)

अनेकशिरस् (aneka-śiras) *adj.* **i** of many hoods सुरसायाः सहस्रं तु सर्पाणाममितौजसाम्। अनेकशिरसाम् ... जज्ञिरे HariVaṁ. 3. 85; ViṣṇuP. i. 21. 19; BrahmāṇḍP. ii. 7. 31; KūrmaP. 213. 4 (1. 18); BrahmP. 3. 97; **ii** of many heads तद्दृष्ट्वानेकशिरसम् ... देवदेवस्य रूपं भानोर्महात्मनः। ... तुष्टुवुस्ते दिवाकरम् BhaviP. 227B. 7 (i. 153. 46)

अनेकशिल्प (aneka-śilpa) *n.* various arts or crafts अनेकशिल्पाध्ययनप्रवीणाश्चाराश्चरेयुः NītiSā. 13. 50.

अनेकशिल्पजात (aneka-śilpajāta) *n.* aggregate of various arts or crafts अनेकशिल्पजातानि नैककर्मक्रियाणि च। तान्यशेषाणि रूपाणि कर्तव्यानि प्रयोक्तृभिः NāṭyaŚā. 19. 148.

अनेकशिल्पपर्यवदात (anekaśilpa-paryavadāta) *adj.* expert or skilled in various arts or crafts अनेकशिल्पपर्यवदातस्य पुरुषस्य क्रियावसायात् क्रियायां करणान्तरापेक्षित्वम् NyāyVār. 393. 4 (*on* iii. 1. 55); 84. 6 (*on* i. 1. 16); 465. 19 (*on* iv. 1. 21); अनेकशिल्पपर्यवदातः परशुं कृत्वा तेन पलाशं छिनत्ति Bhām. 467. 7 (*on* ii. 2. 43); 301. 18 (*on* i. 4. 14)

अनेकशिल्पिन् (aneka-śilpin) *m.* many artisans अनेकशिल्पिकल्पितत्वेऽपि प्रासादादीनाम् ... एकरूपताया अविगानेनोपलम्भात् SyādvāMañ. 6 (98)

अनेकशिष्य (aneka-śiṣya) *m.* many students or disciples विष्णुशर्मा नाम ब्राह्मणः ... अनेकशिष्यविख्यातकीर्तिः अस्ति PañcT. 0. 4 (6) (5. 1); श्रीशंकराचार्यगुरुरनेकशिष्याणाम् ... सदुपदेशमाचकार ŚaṅkaVi. (Ā.) 13. 3; 16.11.

अनेकशिष्यगण (anekaśiṣya-gaṇa) *m.* group of many students or disciples अनेकशिष्यगणोपास्यमानम् ... आचार्यमनार्यः कश्चित् ... आगत्य ... आकुलयति NyāyMañ. ii. 152. 23.

अनेकशिष्यपरिच्छद (anekaśiṣya-paricchada) *adj.* having, i. e. accompanied by a retinue of several students or disciples तत्रानेकशिष्यपरिच्छदः ... सूरिर्विजयसेनाख्यः ... उद्याने समवासार्षीत् SamarāSaṁ. 1. 227.

अनेकशिष्यसंनिधि (anekaśiṣya-sannidhi) *m.* [Loc.] in the presence of many students or disciples (प्रीतात्मा) अनेकशिष्यसंनिधावहमत्र नियुक्त इति बहुमानेन प्रीतात्मत्वम् ManuBh. i. 34. 14 (*on* 1. 60)

अनेकशिष्यसंपूर्ण (anekaśiṣya-sampūrṇa) *adj.* complete, i.e. associated with many students or disciples देवमन्त्री ...। अनेकशिष्यसंपूर्णः पीडां दहतु मे गुरुः VasiS.18.141.

अनेकशिष्योपाध्याय (anekaśiṣyopādhyāya) *m.* many disciples and teachers अनेकशिष्योपाध्यायैः श्रोत्रियैराहतोऽपरैः शक्तो रचयितुं श्रुत्वा शाखां तां तां कुतश्चन ManuBh. i.65.25 (*on* 2.6)

अनेकशीतांशुफल (aneka-śītāṁśuphala) *adj.* having many fruits in the form of moons (चमूः) गवाक्षलक्ष्यवामाक्षीमुखैः कनकवेश्मभिः। चकाशेऽनेकशीतांशुफलैः कल्पद्रुमैरिव PāṇḍaC.12.122.

अनेकशुकशावक (aneka-śukaśāvaka) *m.* many young parrots अहो अयमनेकशुकशावकानुगमनिकामश्यामलहरितलतावितानमनोरमारामरमणीयसंनिवेशः प्रदेशः PrasaRā.2. 0(3)

अनेकशुद्ध (anekaśuddha) *m.* type of an interlude, a sub-variety of Śuddha Viṣkambhaka विष्कम्भकः ... शुद्धो मिश्रः ...। शुद्धः ... द्विधा। ... एकशुद्धः ... अनेकशुद्धो विष्कम्भः षष्ठाङ्केऽनर्घराघवे RasāSu. 280.6 (3.181)

अनेकशुभग्रहोत्थ (anekaśubhagrahottha) *adj.* arising due to many auspicious planets यः कर्तरी नाम महान् हि दोषो लग्नोद्भवानेकशुभग्रहोत्थान्। गुणान्निहन्ति VasiS. 32.44.

अनेकशुभप्रदा (anekaśubha - pradā) *adj.* (*f.*) bestowing various auspicious fortunes प्रयाणे ...। पशुप्रदा मानकरी सुगन्धरक्ताम्बरानेकशुभप्रदा स्यात्। एकादशी VasiS. 37.20.

अनेकशुषिर (aneka-śuṣira) *adj.* having many holes अनेकशुषिरे कुम्भे तावन्मात्रा गभस्तयः। प्रसरन्ति बहिस्तद्वन्नाडीभिर्बीजरश्मयः AgniP. 30. 31.

अनेकशृङ्गवत् (anekaśṛṅga - va(n)t) *adj.* possessing many peaks or summits मेरुश्चानेकशृङ्गवान् ... विविधा देवतागणाः। ते कुमाराभिषेकार्थं समाजग्मुः MahāBhā. ix. 44.13; हिमवांश्चैव विन्ध्यश्च मेरुश्चानेकशृङ्गवान्। ... देवस्याभिषेकार्थं समायान्ति BrahmP. 65.38.

अनेकशेखर (aneka-śekhara) *m.* many spires or turrets निम्नोन्नतप्रवेशांश्च विदधीत ... । (अ?)धिकाभिर्विचित्राभिः कूटैश्चानेकशेखरैः SamarāSū. 68.45.

अनेकशेष (an-ekaśeṣa) *m.* **1** absence of a type of copulative compound wherein only one of the two members subsists (सरूपाणामेकशेष एकविभक्तौ) संख्याया अर्थासंप्रत्ययादन्यपदार्थत्वाद्यानेकशेषः Vār. 25 *on* P. i. 2.64; ब्राह्मणवत्साब्राह्मणीवत्सयोर्लिङ्गस्य विभक्तिपरस्य विशेषवाचकत्वादनेकशेषः Vār. 2 *on* P. i. 2. 68; न पुनः ... विरूपाणामनेकशेष आरभ्यते MahāBh. i. 234.1 (*on* i. 2. 64); **2** (aneka-śeṣa) various subsidiary rites अनेकशेषिशेषत्वात् पूर्वमेतावुदाहृतौ। अनेकशेषसंबन्धात् संप्रत्येकस्य शेषिणः TantrVā. 858.19 (*on* iii. 3.14)

अनेकशेषपक्ष (anekaśeṣa-pakṣa) *m.* view of the absence of a type of copulative compound न तावदेकशेषे क्रमाप्रतीतिः विग्रहवाक्ये चानेकशेषपक्षे च मातुः पूर्वपाठादेव क्रमप्रतीतेः Subodhi. 73.18 (*on* 2.135-36); BālamBha. ii. 212. 24 (*on* 2. 135-36)

अनेकशेषभाव (an-ekaśeṣabhāva) *m.* absence of the operation of a type of copulative compound न वा युष्मदस्मदोरनेकशेषभावात्तदधिकरणानामप्यनेकशेषभावादविप्रतिषेधः Vār. 6 *on* P. i. 4.105; *on* P. i. 4. 108.

अनेकशेषव्याकरण (anekaśeṣa-vyākaraṇa) *n.* grammar (of Deva) not dealing with a type of copulative compound उपज्ञोपक्रम इत्येवमन्तः षसो नब्भवति ... देवोपज्ञमनेकशेषव्याकरणम् JaineVyā. 79.20 *(on* i. 4.97)

अनेकशेषिविधि (anekaśeṣi-vidhi) *m.* injunction of several principal rites एकादशे त्वनेकशेषिविधिप्रयुक्तस्य शेषस्य सकृदनुष्ठानादेव सर्वशेषिणामुपकार-साम्यरूपं तन्त्रनामकमुक्तम् VivaPraSaṁ. 139.14.

अनेकशेषिशेषत्व (anekaśeṣiśeṣa-tva) *n.* the state of being the subsidiary of many principal rites अनेकशेषिशेषत्वात्पूर्वमेतावुदाहृतौ TantrVā. 858.18 *(on* iii. 3.14)

अनेकशेषिसद्भाव (anekaśeṣi-sadbhāva) *m.* existence of several principal rites अनेकशेषिसद्भावेऽपि यत्रान्यप्रयुक्तस्यैवान्यत्र विनियोगः तत्र यत्प्रयुक्त-स्यान्यत्र विनियोगः स एव शेषं प्रयुङ्क्ते ŚivārkaMaDī. i. 73.34 *(on* i.1.1)

अनेकशैलान्तरित (anekaśailāntarita) *adj.* intervened or separated by many mountains अनेकशैलान्तरितं योजनानां शतादपि। अदूरस्थितविस्पष्टं दृश्यं पश्यामि JātaMā. 14.3 (2.47)

अनेकश्राद्धसंपात (anekaśrāddha-sampāta) *m.* concurrence of many 'ceremonies for the departed' at a time अनेकश्राद्धसंपाते तु यदि तत्प्रसङ्गसिद्धि-स्तदा तदीयमेव तर्पणम् NirṇaSi. 345. 21.

अनेकश्रीमुख (aneka-śrīmukha) *n.* many beautiful faces भूपतिः ... सरस्वतीतीर्थानि संभावयन् अनेकश्रीमुखपरंपरानुकृष्टमेनमात्मसादकरोत् AvantiKa.10.15.

अनेकश्रुत (aneka-śruta) *n.* various learnings जातिकुलरूपवयोवर्णानेक-श्रुतमदान्धाः क्लीबाः परत्र चेह च हितमप्यर्थं न पश्यन्ति BhaviP.82A.29 (i.42.4)

अनेकश्रुति (aneka-śruti) *f.* **Ai** many Vedic statements मार्गपराणां चानेक-श्रुतीनां नैरर्थक्यं प्रसज्येत ŚrutaPra. iA. 50.11 *(on* i.1.1); न ... लिङ्गकल्प्या श्रुतिः तत्तत्प्रकृतापूर्वसंबन्धिनीं देवतां तत्तदग्न्यादिपदैः प्रकाशयेदिति एवंविधा ... अनेकश्रुतिकल्पनापत्तेः। किन्तु ... एवंविधा एकैव BhāṭṭDī. iii. 292.15 *(on* x.4.14); पैठीनसिनैव तत्र पृथग् दिग्विशेषाभिधानात् अनेकश्रुतिकल्पनापत्तेश्च VīraMi. (Āhnika.) 65.6; **Aii** more than one scripture न चानेकश्रुतिकल्पने पाठासंभावादेकश्रुतिकल्पनस्य चैकोपलक्षणमन्तरेणासिद्धेः ... पूर्वोक्तरीत्या निर्वक्तुम-शक्यत्वान्निर्मूलत्वमिति वाच्यम् MīmāKau. i. 123.16 *(on* i 3.25); **B** various Vedic statements अनेकश्रुतिदर्शनात्संशयमुक्त्वा पूर्वपक्षमाह PrakaVi. 1061.18.

अनेकश्रुतिवाक्य (aneka-śrutivākya) *n.* many Vedic sentences साधूनेव प्रयुञ्जीत नासाधूनित्येकः। गवादय एव साधवः न गाव्यादय इत्यपरः। न च नियमद्वयस्य मूलं संभवति, प्रतिगवादिशब्दमनेकश्रुतिवाक्यपाठासम्भवात् BhāṭṭDī. i.51.14 *(on* i.3.8)

अनेकश्रुतिसामर्थ्य (anekaśruti-sāmarthya) *n.* strength of many Vedic statements पूर्वमनेकश्रुतिसामर्थ्यपर्यालोचनया समुच्चयमूचे PrakaVi. 756.23.

अनेकश्रुतिसिद्धा (anekaśruti-siddhā) *adj. (f.)* established by many Vedic statements न केवलं श्रुतार्थापत्तिसिद्धा माया, अनेकश्रुतिसिद्धापि भवति PrakaVi.325.16.

अनेकश्रुत्यन्तरस्वारस्य (anekaśrutyantara-svārasya) *n.* fitness or propriety of (meanings of) many other Vedic statements सद्विद्यावाक्यस्योक्तार्थ-परत्वमनेकश्रुत्यन्तरस्वारस्येनोपपादयति ŚrutaPra. iB. 177.24 *(on* i.1.5)

अनेकश्रोत्रप्राप्ति (anekaśrotra-prāpti) *f.* act of reaching to many ears (simultaneously) न चैकवक्त्रुच्चारितस्यैकस्य शब्दस्य युगपदनेकश्रोत्रप्राप्तिः संभवति NyāyRa. 781.16 *(on* 6.201)

अनेकश्लोकसमुदाय (anekaśloka-samudāya) *m.* collection of many verses अस्य ... स्तवस्याप्यनेकश्लोकसमुदायरूपत्वेन तदविघ्नतायै ... गणेशस्मरणम् SetuBa. 8.11.

अनेकश्वापदनिनादिता (anekaśvāpada-nināditā) *adj. (f.)* filled or resounded with the noise of many wild animals सिंह°...°ऋक्षानेकश्वापदनिनादितासु ... गिरिवरदरीषु... हस्तिनः ... विविधसुखमनुभवन्ति Hastyāyur. 196.1 (2.13)

अनेकश्वापदाकीर्ण (anekaśvāpadākīrṇa) *adj.* crowded with, i.e. abounding in many wild animals किरातः। ... विचरन्गिरिकन्दरे। अनेकश्वापदाकीर्णे ... आगतस्तत्र यत्र लिङ्गं सुपूजितम् SkandP. i (1). 5.119; एकाकिनी (मलयसुन्दरी) ... अनेकश्वापदाकीर्णमर्णवोपकण्ठपुलिनमिदमागता TilaMañ. 379.16.

अनेकषकार (aneka-ṣakāra) *m.* many '*ṣa*' sounds सांहितिकेऽपि वा षकारे 'अनचि च' इति द्विर्वचनविधानादनेकषकारत्वसंभवात्संशयः Pradī.iv.231 B. 22 *(on* iv.4.9)

अनेकसंयमक्षाम (anekasaṁyama-kṣāma) *adj.* emaciated on account of various restraints, i.e. practices of penance (विप्रम्) अनेकसंयमक्षामं तमेत्य त्रिदिवेश्वरः। उवाच BṛKathāMañ. 14.349.

अनेकसंयुक्त (aneka-saṁyukta) *adj.* **1** associated with many (gross bodies) लिङ्गं चानेकसंयुक्तं चलं दृश्यं विकारि च। अव्यापकमसद्रूपं तत्कथं स्यात्पुमानयम् AparoAnu. 39; **2** consisting of many (parts, i. e. *kalās*), AparoAnu. 39.

अनेकसंयोगाधिकरणत्व (anekasaṁyogādhikaraṇa-tva) *n.* the state of being the substratum of more than one contact परमाणोरेकस्य युगपत्कारणसंभवे सत्यनेकसंयोगाधिकरणत्वमुपपद्यते NyāyKa. 43.25.

अनेकसंयोजना (aneka-saṁyojanā) *f.* combination of various (ingredients) अनेकसंयोजनया तथाकृतेर्निकृत्य निष्पिष्य च तादृगर्जनात्। अमी कृताका-लिकवस्तुविस्मयं जना बहु व्यञ्जनमभ्यवाहरन् NaiṣC. 16.83.

अनेकसंवत्सरसहस्र (aneka-saṁvatsarasahasra) *n.* many thousands of years फलं च धर्मस्य कस्यचिदनेकसंवत्सरसहस्रोपभोग्यम् NyāyKa. 275.10.

अनेकसंवत्सरातिक्रम (anekasaṁvatsarātikrama) *m.* lapse or passing of many years अनेकसंवत्सरातिक्रमेऽपि ... न मे दुःखसंवेगः प्रशाम्यति UttaRāC. 4.3(4)

अनेकसंवर्ण (aneka- saṁvarṇa) *adj.* of various kinds दुःखैरनेकसंवर्णैः संतप्तोऽस्मि दिने दिने PadmP. ii.8. 81.

अनेकसंशय (aneka- saṁśaya) *m.* various doubts तवोद्याने जिनस्वामी गजगामी समागतः। अनेकसंशयध्वान्तध्वंसकतिग्मभानुवत् MalliC. 7. 935.

अनेकसंशयोच्छेदिन् (anekasaṁśayocchedin) *adj.* uprooting or removing various doubts अनेकसंशयोच्छेदि परोक्षार्थस्य दर्शकम्। ... शास्त्रम् Hitopa.0.10.

अनेकसंश्रय (aneka-saṁśraya) *m.* association with more than one पर्यायो यदि पर्यायैणैकस्यानेकसंश्रयः Kuval. 110.

अनेकसंश्रिति (aneka-saṁśriti) *f.* many locations अशक्तिरनुपादानादन्यादा-नादनन्तता। मिथो न प्रतिसंधिश्च संकरेऽनेकसंश्रितिः ĀtmaTaVi. 780.5.

अनेकसंसर्ग (aneka-saṁsarga) *m.* relationship or contact with more than one (entity) न चैकस्यानेकसंसर्गो विरुध्यते दृष्टो हि चित्रज्ञाने नीलाकारावच्छिन्ने पीताद्याकारसंसर्गः NyāyKa. 42.24; (व्यवहारः) ततोऽनेकसंसर्गैकनिमित्तोऽयं परिशिष्यते ĀtmaTaVi. 347.5; युगपदेकस्यानेकसंसर्गप्रवृत्तमध्यक्षमविशेषात् सर्वसंसर्गं वा प्रतिक्षिपेत् ĀtmaTaVi. 607.21; 621.5.

अनेकसंसारधर्म (aneka-saṁsāradharma) *m.* various properties of transmigratory or worldly existence किंनिमित्तोऽयं खिल्वभाव आत्मनः ... अनेकसंसारधर्मोपद्रुत इति उच्यते BṛĀraUBh. 316.7 *(on* ii.4.12)

अनेकसंसारबीज (anekasaṁsāra-bīja) *n.* seed or root-cause of many transmigratory or worldly existences अविद्याद्यनेकसंसारबीजम् अन्तर्दोषवत् ... यत् तत् कूटम् GītāBh. (Śaṅ.) 342. 4 *(on* 12.3)

अनेकसंसारभय (aneka-saṁsārabhaya) *n.* various fears of transmigratory or worldly existence अनेकसंसारभयार्दितानां पापैरनेकैरभिवेष्टितानाम्। गतिस्त्वम् SkandP. v(3).60.30.

अनेकसंसारसंघ (anekasaṁsāra-saṅgha) *m.* aggregate of many transmigratory or worldly existences तिष्ठत्यनेकसंसारसंघाघौघविनाशिनी। कृष्णे भक्तिः VāmaP. 29.40.

अनेकसंसारसंभव (anekasaṁsāra-sambhava) *adj.* arising from many transmigratory or worldly existences सुखदुःखानि ... भुञ्जानोऽनेकसंसारसंभवानीह तिष्ठति MārkP.14. 31.

अनेकसंसारिजन्तु (aneka-saṁsārijantu) *m.* several transmigratory or worldly creatures or beings अनेकसंसारिजन्तुकामकर्मादिसंस्काराश्रयः अक्षरः पुरुषः उच्यते GītāBh. (Śaṅ.) 444. 9 *(on* 15.16)

अनेकसंस्कार (aneka-saṁskāra) *m.* **1** purification of more than one (vessel) श्रुतैकत्वपरित्यागेनानेकसंस्काराच्छ्रुतं हीयेताश्रुतं च परिगृह्येत TantrVā. 739. 23 *(on* iii.1.14); **2** many impressions न चानुमितिः स्मृतिमात्रमिति वक्तुं शक्या। अधिकविषयकत्वात्। न चानेकसंस्कारसंभेदेन तत् NyāyPari. 99. 2.

अनेकसंस्कारवाक्य (aneka-saṁskāravākya) *n.* many sentences of purification अनेकसंस्कारवाक्यगतयवलक्षणातो वरमेकस्मिन् यववाक्ये व्रीहिलक्षणा युक्ता CaturCin. iii (2). 158.5.

अनेकसंस्कार्यसंबन्ध (anekasaṁskārya-sambandha) *m.* relation with many things to be purified न चैवमेकस्यैव ग्रहणस्य अनेकसंस्कार्यसंबन्धोपपत्तावपि उत्पत्तिशिष्टैकदेवतावरोधे देवतान्तरनिवेशानुपपत्तेः गुणात् भेदोपपत्तिरिति वाच्यम् MīmāKau. iii (2). 225. 22 *(on* ii. 2.19)

अनेकसंस्कृतप्राकृत (aneka-saṁskṛtaprākṛta) *adj.* **i** (meals) having cultivated and original (tastes) स्वादयन् रसमनेकसंस्कृतप्राकृतैः ... मुदं जनो

नाटकैरिव बभार भोजनैः ŚiśuVa. 14. 50; **ii** (drama) having many (types of) Saṁskṛta and Prākṛta usages, ŚiśuVa. 14. 50.

अनेकसंस्थान (aneka-saṁsthāna) *adj.* **1A** residing or stationed at various places तान्विदित्वा सुचरितैर्गूढैस्तत्कर्मकारिभिः। चारैश्चानेकसंस्थानैः प्रोत्साद्य वशमानयेत् ManuSm. 9. 261 (ManvaMu. चारैरनेकस्थानस्थैः); **1B** occurring at many places कृष्णखरपरुषमलिनमनेकसंस्थानमण्डलम् ... ऋतुसन्धिपूष्णे चातिबाधते कपालाकृति कपालम् KāśyaS. 116A.30; **2** wearing various disguises, i.e. assuming various forms or appearances, ManuSm. 9. 261; ManuBh. ii. 313. 20 (*on* 9. 261); अनेकसंस्थानैरनेकवेशैः ManvaVi. 1245.23 (*on* 9. 261); **3** having various changing states or attitudes प्रतिदिनमनेकसंस्थानानामपि पित्रादीनां न वस्त्वन्यत्वं भवति BrahmSūBh. (Śaṅ.) 323.16 (*on* ii.1.18)

अनेकसंहितासमधिगत (anekasaṁhitā-samadhigata) *adj.* known or understood from various scriptures अनेकसंहितासमधिगतनिषेधस्य निर्माल्योपभोगस्य कथमिव पावनत्वाङ्गीकारः ĀgaPrā. 80. 19.

अनेकसक्तचेतस् (anekasakta-cetas) *adj.* whose mind is attached to many (gods) उपास्यदर्शनं मृता (better ॰दर्शनमृता)वनेकसक्तचेतसः। न संभवेत्फलं ततो विकल्प एव युज्यते NayaMañ. III. iii. 34. 68.

अनेकसखी (aneka-sakhī) *f.* many (female) friends or companions अन्या अनेकसख्यो रतिसुखमनुभवन्त्यो भावापन्ना भवन्ति SāmaraU. 272. 4.

अनेकसंकल्प (aneka-saṅkalpa) *m.* **i** various thoughts अद्यनल्पमनेकसंकल्पकवलितचित्तवृत्तेश्चिन्तयतः एव मे जगाम परिणाममप्रतर्कितैव रजनिः TilaMañ.150.11; **ii** various desires अनेकसंकल्पपर्याकुलचेतसः प्रबन्धवर्धमाना रतेरनवरतमुक्तायतोष्णनिःश्वासस्य ... नष्टनिद्रस्य ... कथमपि क्षपा विराममभजत TilaMañ. 177. 5; 292. 16.

अनेकसंकल्पविकल्प (aneka-saṅkalpavikalpa) *m.* various thoughts and doubts अनेकसंकल्पविकल्पगाढां दशां वहन्त्या विरहे त्वमेव। स्वप्नेऽपि जाग्रच्चरिते च तस्याः सुखस्य दुःखस्य च हेतुरेकः HarVi. 25. 9.

अनेकसंकेतविषय (anekasaṅketa-viṣaya) *adj.* having various conventions as its objects अत एव सविकल्पोत्पत्तिरपि युगपदभिव्यक्तेष्वनेकसंकेतविषयेषु संस्कारेषु स्मृतिहेतुत्वात्मान्तःकरणसंयोगस्य सामर्थ्यादिकस्यानेकविषयस्मरणस्योत्पादात् NyāyKa. 116. 2.

अनेकसंख्य (aneka-saṅkhya) *adj.* **A** immense, boundless क्रामद्भिर्घनपदवीमनेकसंख्यैस्तेजोभिः शुचिमणिजन्मभिर्विभिन्नः। उस्राणाम् ... निचयः Kirātā. 5. 34 (*but* comm. परःसहस्रैः); **Bi** innumerable, many in number जयसिंहेन सलिलतरणसाधनानीतेनानेकसंख्येन द्रागागत्यागृह्यत सकलत्रः ... सः DaśKuC.123. 7; वितेनिवांसोऽप्यविलङ्घ्यरूपतामनेकसंख्या दधतोऽनपायताम्। हरेण कल्पा इव येन कालतामुपेयुषानायिषत द्विषः क्षयम् HarVi. 12. 3; तं भूमिदेशं यत्र विवेश सः। ... वृक्षैरनेकसंख्यैश्च भूषितम् SkandP. v(1). 5. 11; एकस्य दाशरथेः अनेकसंख्यैर्यातुधानैर्यत्समरकर्म SaraKaṇṭhā. 342. 4; **Bii** more than one in number यस्यैकोऽनेकसंख्ये रणशिरसि ककुप्प्रान्तविश्रान्तशैलश्वभ्रान्तस्थैः सपत्नैरपि करकलितः सर्वतो वीक्ष्यमाणः। ... कृपाणः KhaḍgaŚ. 34.

अनेकसंख्यत्व (anekasaṅkhya-tva) *n.* the state of being more than one in number नञा समासेऽनेकधेत्येव स्यादत आह - नशब्देनेति। एकशब्दस्येति भावः। ततो धा प्रकारे। प्रकारेऽनेकसंख्यत्वप्रतीतेः LaŚabdeŚe. ii. 53. 17.

अनेकसंख्या (aneka-saṅkhyā) *f.* great or large number अतोऽनेकसंख्या परिशिष्यते NyāyKuA. ii (2). 65. 5; [Inst.] in great or large number सा नाम कन्यका अनेकसंख्यया सखीभिः ... अवस्थितिं चक्रे UdaySuKa. 97. 15.

अनेकसंख्यात्व (anekasaṅkhyā-tva) *n.* the state of being great or large number सा अपेक्षाबुद्धिजन्या अनेकसंख्यात्वात् NyāyKuA. ii (2). 65.5.

अनेकसंख्याभाव (anekasaṅkhyābhāva) *m.* absence of great or large number अनेकसंख्याभावे वाववयविनोऽवयवापेक्षया अधिकपरिमाणानुपपत्तेः Kiraṇā. 65. 11.

अनेकसंख्यावचन (anekasaṅkhyā-vacana) *adj.* expressive of great or large number सहस्रशब्दोऽत्रानेकसंख्य(?ख्या)वचनः YuktiSneha. 52.22 (*on* i. 15)

अनेकसंगीतविद् (aneka-saṅgītavid) *adj.* (used as noun) many experts in music अनेकसंगीतविदामजस्रसांनिध्ययोगात्सुतरां प्रवीणाः। गायन्ति यस्यां क्षितिपालकीर्तीर्विलासशारीशुकराजहंसाः Rāṣtrau. 9. 50.

अनेकसंग्रामजय (anekasaṅgrāma-jaya) *m.* victory in many battles अयि मित्र शमं गच्छ तवाप्येष न गोचरः। कोपस्यानेकसंग्रामजयोपार्जनशालिनः PadmP. (Ra.) 15. 172.

अनेकसंग्रामविधा (aneka-saṅgrāmavidhā) *f.* different ways of fighting अनेकसंग्रामविधास्वभिज्ञाः। परःशतास्ते युधि पारसीका नृपाल बालेन कथं निवार्याः Raghunā. 7. 46.

अनेकसंघातरूप (anekasaṅghāta-rūpa) *adj.* of the form of the aggregate of many (atoms) द्व्यणुकपर्यन्तं च स्थूलं ततोऽनेकसंघातरूपमिति परमाणुसिद्धिः PramāVāBh. 41. 20.

अनेकसच्छिद्रधारा (aneka-sacchidradhārā) *f.* many streams or flows of water from the bag with holes चर्मभाण्डस्य जलनिर्गमार्थं ऋते अनेकसच्छिद्रधारारूपपादवतः एकेनापि पादेन यथा सर्वजलसेको भवतीत्यर्थः ManvaVi. 174. 15 (*on* 2. 99)

अनेकसजातीयविजातीयसंवाद (aneka-sajātīyavijātīyasaṁvāda) *m.* many homogeneous and heterogeneous conformities, i.e. proofs or evidences यत्प्रपञ्चप्रत्ययस्य याथार्थ्यं तन्नास्तिताप्रत्ययस्य बाध्यत्वम्। अनादितोऽनुवृत्तस्यानेकसजातीयविजातीयसंवादवतो याथार्थ्यसंभवात् NyāySu. (Ja.) 404A. 2 (*on* ii. 2. 8)

अनेकसजातीयसत्त्व (anekasajātīya-sattva) *n.* existence of many (persons) belonging to the same caste अनेकसजातीयसत्त्वे विभज्य (धनं) तैर्ग्राह्यम् BālamBha. ii. 215. 8 (*on* 2. 135-136)

अनेकसंजवन (aneka-sañjavana) *n.* numerous groups (of four houses) forming a court अनेकसंजवनचन्द्रशालिकाविटङ्कवेदिकासंकटशिखरैः ... महाप्रासादैः ... विराजमानम् ... राजकुलं विवेश Kād. 87. 1.

अनेकसंज्ञ (aneka-sañjña) *adj.* of various names, i. e. species वनोत्तमम् ... वृक्षैरनेकसंज्ञैर्यद्भूषितं शिखरान्वितैः PadmP. v. 15. 27.

अनेकसंज्ञकत्व (anekasañjñaka-tva) *n.* the state of having more than one term or designation ज्योतिष्टोमस्यैव पश्वर्थमनेन विधिना अनुष्ठापकत्वे च तत्र प्रतिबन्धकसत्त्वेन उद्भित्संज्ञकत्वायोगात् कथंचित् योगेऽपि वा एकस्यानेकसंज्ञकत्वायोगेन ... प्रामाण्यम् MīmāKau. i. 172. 3 (*on* i. 4. 2)

अनेकसंज्ञाकरण (anekasañjñā-karaṇa) *n.* (Gr.) **i** act of making, i. e. coining of various (technical) terms अनेकसंज्ञाकरणमनर्थकं स्यात् Nyās. i. 118. 19 (*on* i. 1. 61); अनेकसंज्ञाकरणात् ... तद्भावितसंज्ञाश्रयणम् LaŚabdeŚe. i. 245. 9; **ii** act of making, i.e. coining of more than one technical term न चेहैकस्यानेकसंज्ञाकरणे भिन्नप्रयोजनमस्ति Nyās. i. 165. 1 (*on* i. 2. 27); PadMañ. *on* KāśiVṛ. *on* P. i. 2. 27 (302. 9); यद्यप्येकैकस्य त्रिकस्यानेकसंज्ञाकरणे प्रयोजनाभावः तथापि कस्यचित्त्रिकस्य काचित्संज्ञेत्येतावल्लभ्येत न तु यथाभिमतविषयविभागलाभः Pradī. ii. 299A. 20 (*on* i. 4. 100)

अनेकसंज्ञादर्शन (anekasañjñā-darśana) *n.* observation of different technical terms or designations अत एव स्मृत्यन्तरेष्वेकस्यैवार्थस्यानेकसंज्ञादर्शनेऽपि देशभेदेन तथाविधप्रयोगसत्तानुमानम् BālaKrī. i. 89. 21 (*on* 1. 92 - 93)

अनेकसंज्ञानर्थक्य (anekasañjñānarthakya) *n.* uselessness or futility of having more than one technical term or designation एकस्यानेकसंज्ञानर्थक्येन संज्ञायाः ... संज्ञानिबन्धनभेदस्यैव दृढीकरणार्थम् MayūMāli. 165. 17 (*on* ii. 3.4)

अनेकसंज्ञानुपपत्ति (anekasañjñānupapatti) *f.* untenability of having more than one term or designation नन्वेकत्वेऽनेकसंज्ञानुपपत्तेः MayūMāli. 322. 7 (*on* iii. 7. 9)

अनेकसंज्ञालाभार्थ (anekasañjñālābhārtha) *adj.* having the purpose of obtaining various technical terms तत्र तत्त्वविधावुपसंख्यानेन सिद्धे प्रथमे उपसर्गसंज्ञायामुपसंख्यानमनेकसंज्ञालाभार्थम् LaŚabdeŚe. ii. 354. 3.

अनेकसंज्ञाविधान (anekasañjñā-vidhāna) *n.* **i** act of making or coining of various (technical) terms प्रत्ययादर्शनस्य लुक् श्लु लुप् इत्येताः संज्ञा भवन्ति। अनेकसंज्ञाविधानाच्च तद्भावितग्रहणमिह विज्ञायते KāśiVṛ. *on* i. 1. 61; Prasā. i. 158. 14; संज्ञासंकरे हि सति तत्कार्याण्यपि संकीर्येरन्नित्यत आह अनेकसंज्ञाविधानाच्चेत्यादि Nyās. i. 118. 17 (*on* i. 1. 61); **ii** act of making or coining of more than one (techincal) term न ह्येकस्य भिन्नप्रयोजनमन्तरेण अनेकसंज्ञाविधानमर्थवद् भवति Nyās. i. 164. 26 (*on* i. 2. 27); तत्र यदि एकस्य अनेकसंज्ञाविधानवैयर्थ्यात् एका संज्ञा भवेत् न त्वेकैकस्य तिस्रः Nyās. i. 325. 3 (*on* i. 4. 101)

अनेकसत्तानधिकरण (anekasattānadhikaraṇa) *n.* non - substratum of many (absolute) realities विश्वमनेकसत्तानधिकरणम् NyāySu. (Ja.) 38A. 12 (*on* i. 1. 1)

अनेकसत्त्व (aneka-sattva) *n.* **1A** more than one living being or ceature यदि बोधिसत्त्वानां दानमेकस्यैव सत्त्वस्य सुखदं स्यादात्मनश्च बहुकल्पविघातकृत्। तथापि तत्तेषां प्रियं स्यात्करुणाविशेषात् किं पुनर्यदनेकसत्त्वसुखं च भवत्यात्मनश्च बहुकल्पानुग्रहकृत् MaYānaSū. 112. 25 (16. 57); **1B** various living beings or creatures बहूपायमिदं वनमनेकसत्त्वसंकटत्वात् Tantrākhyā. 13. 18; **2** many (ab-

solute) realities विश्वमनेकसत्तानधिकरणमिति प्रतिजानतानेकसत्त्वान्यङ्गीक्रियन्ते NyāySu. (Ja.) 38A. 12 (*on* i. 1. 1); **3** existence of more than one (form) एकणिजन्ते तावन्मात्रनिमित्तकस्यैवाग्लोपस्य ग्रहणमनेकसत्त्वे त्वनेकनिमित्तकस्यैव तस्य ग्रहणम् LaŚabdeŚe. ii. 617. 21.

अनेकसत्त्वप्रलय (anekasattva-pralaya) *m.* destruction of various living beings or creatures इदं च ... तीर्थमन्यतीर्थिकपरिगृहीतैरनेकसत्त्वप्रलयहेतुभिः प्रपाततीर्थैः समीकृतम् TilaMañ. 319. 23.

अनेकसत्त्वसंतान (anekasattva-santāna) *m.* series of various living beings or creatures अथ भगवांस्तां - पर्षदमवगाह्य पुरस्ताद् भिक्षुसंघस्य प्रज्ञप्त एवासने निषद्यानेकसत्त्वसन्तानकुशलमूलसमारोपिकां धर्मदेशनां कृतवान् GiMs. iii (1). 247.14.

अनेकसत्त्वाधिकरणता (anekasattvādhikaraṇa-tā) *f.* the state of being the substratum of more than one reality अनेकसत्त्वाधिकरणताप्रतिषेधसामर्थ्यादि-कैकसत्त्वस्वीकारापत्तेः NyāySu. (Ja.) 38B. 1 (*on* i. 1. 1)

अनेकसत्त्वानधिकरणत्व (anekasattvānadhikaraṇa-tva) *n.* the state of not being the substratum of more than one reality किमेकसत्त्वानधिकरणत्व-मुतानेकसत्त्वानधिकरणत्वम् NyāySu. (Ja.) 37B. 7 (*on* i. 1. 1); 38A. 11 (*on* i.1.1)

अनेकसत्त्वोपकार (anekasattvopakāra) *m.* favour to more than one living being or creature न ह्येवंविधभुवनाद्भुतमतिशयमन्तरेण युगपदनेकसत्त्वो-पकारः शक्यः कर्तुम् Kāvyānu. (He.) 2. 11.

अनेकसदनङ्गीकार (anekasad-anaṅgīkāra) *m.* non-acceptance of many realities न ह्यनेकसदनङ्गीकारे सर्वशब्दस्य प्रयोजनमस्ति NyāySu. (Ja.) 38B. 2 (*on* i. 1. 1)

अनेकसद्रत्नविभूषण (aneka-sadratnavibhūṣaṇa) *n.* various ornaments made of precious gems भगवन्तमैक्षन्नारायणम् ... सः ... अनेकसद्रत्नविभूषणाढ्यम् SkandP. ii (9). 17. 15.

अनेकसद्रूपकल्पना (anekasadrūpa-kalpanā) *f.* assumption of many real forms or existences अनेकसद्रूपकल्पनापत्तिरूपस्तर्कोऽपि नोक्तप्रमितत्वापवादकः GuruCandr. i. 51. 16.

अनेकसंततिक (anekasantati-ka) *adj.* pertaining or relating to many descendants आ चतुर्थात् कूटस्थप्रपौत्रपर्यन्तं दायधनविभागस्यादित्यनेकसंततिकदाय-विभागमर्यादा SmṛtiCan. iv. 648. 17.

अनेकसंतानवश (anekasantāna-vaśa) *m.* [Inst.] by the force of more than one series अतोऽस्य साधारणत्वादेकसंतानवशेन व्यवस्थानम्। रूपस्य तु साधारणत्वात् अनेकसंतानवशेन AbhidhKoBh. 28. 13 (*on* 1.39)

अनेकसंनिकर्षानुज्ञान (anekasannikarṣānujñāna) *n.* acceptance of various relations अनेकसंनिकर्षानुज्ञानं च - असमवायिकारणभूतः संयोगो ह्यात्मना सहानुज्ञातः NayaVi. 76. 5 (*on* i. 1. 4)

अनेकसंनिधान (aneka-sannidhāna) *n.* presence of many (objects) नीलज्ञानं हीदमनेकसंनिधाने समुपजायमानं कथमखिलतदितरपदार्थपरिहारेण केवलनीलानुलग्नतामवलम्बेत NyāyMañ. ii. 105. 6.

अनेकसंनिधि (aneka-sannidhi) *m.* presence of many (words) अनुषङ्गो नामानेकसंनिधावाम्नातस्यासंबन्धिपदाव्यवेतस्याम्नानं सर्वार्थमिति परिकल्प्य सर्वैः संनिहितैरेकवाक्यत्वकल्पनम् MayūMāli. 382. 11 (*on* iv. 3. 5)

अनेकसंनिपात (aneka-sannipāta) *m.* concurrence of many items यदि निर्धारणे षष्ठीयमेवं हि सति निर्धारणमनेकसंनिपाते भवतीत्यच इत्येकवचनं न स्यात् Nyās. i. 122. 12 (*on* i. 1. 64)

अनेकसंनिहितापेक्ष (anekasannihitāpekṣa) *adj.* expectant of or dependant on several things which are proximate यदि ज्योतिष्टोमस्तत एतद् यदि द्वादशाहस्ततोऽमुकमिति। अनेकसंनिहितापेक्षं ह्येतद्वचनम् TantrVā. 1110.19 (*on* iii. 6. 42)

अनेकसमयव्युत्पन्न (anekasamaya-vyutpanna) *adj.* fashioned at different times एकीभूय शनैरनेकसमयव्युत्पन्नमेकक्रियं मुक्ताक्रन्दमितस्ततः किमिदमित्युद्-भ्रान्तनारीनरम्। एतत् त्वत्पुरम् MahāvīC. 4. 57 (117. 4)

अनेकसमयान्वित (anekasamayānvita) *adj.* associated with many conventions आख्यास्ये तत्र पौलोममाख्यानम् ...। विचित्रार्थपदाख्यान-मनेकसमयान्वितम् MahāBhā. i. 2. 30.

अनेकसमर (aneka-samara) *n.* many battles अनेकसमरसंप्रहारप्रणविजय-प्रशस्तिशृङ्गारितगात्रः शालिहोत्रः ... मन्मुखेनापि ... आचार्यपरिषद् ... अर्वन्तं विज्ञापयति YaśasCam. i. 307. 5.

अनेकसमरपीत (anekasamara-pīta) *adj.* drunk during many battles अशस्त्रव्रणैरपि अमर्षस्वेदच्छलेनानेकसमरपीतमसिधाराजलमिव वमद्भिः ... कथ्यमानसत्त्वावष्टम्भः ... नरनाथः सावज्ञमवादीत् HarṣaC. 166. 15.

अनेकसमरविजय (anekasamara-vijaya) *m.* victory in many battles अनेकसमरविजयगणनालेखाभिरिव वलिवलयराजिभिस्तनीयसीभिस्तरङ्गितोदरेणातिस्थवीयसा हस्तार्गलदण्डेनार्गलयन्तमिव ... ककुभां चक्रवालम् ... गर्जिताडम्बराणां दर्पशातमपश्यत् (हस्तिनम्) HarṣaC. 104. 4.

अनेकसमराङ्गण (aneka-samarāṅgaṇa) *n.* many battle - fields अयं नश्चिरसेवकोऽनेकसमराङ्गणलब्धजयप्रतिष्ठः प्रबन्धकविः पराभवितुं न रोचते PrabaK.37.7.

अनेकसमराधिगत (anekasamarādhigata) *adj.* acquired in many battles द्वावप्यनेकसमराधिगतप्रतिष्ठौ RāmC. 36. 34.

अनेकसमर्थसंभव (anekasamartha-sambhava) *m.* possibility of many competent ones शेषे इत्यत्रापि तत्तत्समर्थविभक्त्यन्तविशिष्टोऽर्थः एव शेष इत्यनेकसमर्थसंभवः LaŚabdeŚe ii. 186. 1; ii. 185. 11.

अनेकसमर्थासंभव (anekasamarthāsambhava) *m.* impossibility of many competent words स्वार्थिकेष्वनेकसमर्थासंभवात् 'प्राग्दिशः' इत्युत्तरं नास्य संबन्ध इति बोध्यम् LaŚabdeŚe. ii. 186. 1.

अनेकसमवाय (aneka-samavāya) *m.* **1** inherence in more than one (object) अद्रव्यादिदियो हेतुर्न गुणत्वादि युक्तिमत्। अनेकसमवायश्च न सामान्यधिय-स्ततः। अनेकसमवायश्च संख्यादिष्वपि विद्यते TattvSaṁ. 778; **2** (Mus.) combination of many (tones or accents) अनेकसमवायस्तु (?पातका) हरिणा स्मृताः। ... अष्टौ तु समवायस्तु वीरा तथा। ... स्वरशाखा प्रकीर्तिता BrahmāṇḍP. ii. 62.43.

अनेकसमवायिन् (aneka-samavāyin) *adj.* **1** comprising or consisting of more than one (item) न च तत्सेना वनं वा करिचम्पकाद्यनेकसमवाय्येकोऽवयवी प्रसिध्यति TattvBi. 52. 4; **2** inherent in more than one (item) सामान्यं नित्यमेकं स्यादनेकसमवायि च TārkiRa. 159. 1; NyāySiA. 265. 17.

अनेकसमवेत (aneka-samaveta) *adj.* [*f.* - ā] **i** inherent in more than one (item) नित्यत्वे सत्यनेकसमवेतं सामान्यम् KhaṇḍanKhā. 1082. 23; सामान्यं नित्यमेकमनेकसमवेतं च SaptaPa. 70 (23); TattvPrakā. 97B. 5 (*on* ii. 2. 11); TarkKau. 1. 16; सामान्यं तु प्रध्वंसप्रतियोगित्वरहितमनेकसमवेतम् SarvaDaSaṁ. 10.51; नित्या एका अनेकसमवेता च जातिः सिध्यति NyāyKu. 156. 2; **ii** inherent in many (items) घटात्यन्ताभावान्योन्याभावयोर्नित्ययोरनेकसमवेतयोः सामान्यत्वापत्तेः Upask. 351. 3 (*on* vii. 2. 26)

अनेकसमवेतता (anekasamaveta-tā) *f.* the state of being inherent in more than one (item) अद्रव्यनिष्ठे सामान्ये नानेकसमवेतता TarkSaṁ. (Ā.)121.6.

अनेकसमवेतत्व (anekasamaveta-tva) *n.* **i** the state of being inherent in many (items) किमनेकत्वसंख्याविशिष्टेषु समवेतत्वमनेकसमवेतत्वम् TattvPradī. (Ci.) 193. 1; TarkSaṁ. (Ā.) 121. 1; अथैवमन्योन्यात्यन्ताभावयोर्नित्यत्वे अनेकसमवे-तत्वे च जातित्वप्रसङ्गः TattvCin. i. 670. 4; नित्यत्वे सति अनेकसमवेतत्वम्। अनेकसमवेतत्वं च संयोगादीनामप्यस्ति SiddhāMu. 5. 4 (*on* 8); **ii** the state of being inherent in more than one (item) नित्यत्वे सत्यनेकसमवेतत्वमिति सामान्यलक्षणम् Tarkāmṛ. 14. 13.

अनेकसमा (aneka-samā) *f.* (pl.) many years ततोऽनेकसमाः कृत्वा नानाविधतपांसि तु। धनदः स मुनिर्विद्वान् ... जगाम निर्वृतिम् BṛKathāK. 46. 186.

अनेकसमाकुल (aneka-samākula) *adj.* occupied with many (gods) मेरुम् ... आवसत् ... ब्रह्मा ...। महासुरसहस्रैस्तं दिक्ष्वनेकसमाकुलम् VāyuP. i.34.71.

अनेकसमाधि (aneka-samādhi) *m.* various (types of) concentrations (of mind) or trances भगवान् ... विहरति स्म ... सार्धम् ... बोधिसत्त्वैर्महासत्त्वैः अनेकसमाधिवशिताबलाभिज्ञाविक्रीडितैः LaṅkāSū. 1. 0 (6) (1.5)

अनेकसमान (aneka-samāna) *adj.* common to more than one एकोऽनेक-समानो भर्ता तृप्तिस्ततो नासाम् KandaCū. v. 6. 2.

अनेकसमाश्रय (aneka-samāśraya) *m.* abidance or continuance in many (objects) हृदयाश्रयिकामेभ्य आत्मसंश्रयिणां यतः। प्रसूतिरिह कामानामतोऽनेक-समाश्रयात् BṛĀraUBhVā. iv. 4. 398.

अनेकसमास (aneka-samāsa) *m.* **1** compounding with many words (तद्यानेकप्रत्ययसमासार्थम्) तद्यावश्यं सतिशिष्टस्वरबलीयस्त्वं वक्तव्यम्। किं प्रयोजनम्। अनेकप्रत्ययार्थमनेकसमासार्थं च MahāBh. iii. 100. 2 (*on* vi. 1. 158); **2** many types of compounds वार्तिककारः ... अनेकसमासप्रतिभासनात्संशयं कृत्वा द्वन्द्वसमासमवधारयति TātpaṬ. (Vā.) 225. 6 (*on* i. 1. 14)

अनेकसमुदाय (aneka-samudāya) *m.* A collection of many (rites) राजसूये प्रक्रमस्य कर्तारो नियता न किम्। नियता वा दक्षिणानां भेदादनियता अमी।

अनेकसमुदायात्मराजसूयाय ते कृता: NyāyMāVi. 653. 1 (*on* xi. 4. 3); **B** collection of more than one (rite) अनेकसमुदाये महाप्रकरणादेकधर्मप्राप्ति: MīmāKau. ii. 363. 8 (*on* iii. 3. 14)

अनेकसमुदायानुगत (anekasamudāyānugata) *adj.* common to or continued in the group or collection of more than one (item) सामान्यं त्वनेकसमुदायानुगतं ततो व्यतिरिच्यत एव NyāyRa. 632. 12 (*on* 5 (14). 74)

अनेकसमुदायान्तर्भाव (anekasamudāyāntarbhāva) *m.* inclusion in group or collection of many (letters) शक्यते चेकारोऽप्यनेकसमुदायान्तर्भावात् नानारूप इवोपलभ्यमानेन रूपेण एकाज्-इति व्यपदेष्टुम् Pradī. v. 4B. 17 (*on* vi. 1. 1)

अनेकसमूह (aneka-samūha) *m.* group or aggregate of many (limbs) एकैकोऽवयवस्तेषां न ब्राह्मण्यं समश्नुते। न चानेकसमूहेऽपि सर्वथातिप्रसङ्गत: BhaviP. 82B. 2 (i. 41. 52)

अनेकसमूहस्वभाव (anekasamūha-svabhāva) *adj.* of the nature of the collection of many (items) न शरीरस्य ज्ञानादियोग: ... अनेकसमूहस्वभावत्वात् त्रिदण्डादिवत् सन्निवेशविशिष्टत्वाच्च NyāyMañ. ii. 12. 26.

अनेकसंपराय (aneka-samparāya) *m.* many battles अनेकसंपरायेषु निर्व्यूढबलशक्तय:। महाशकटभारेषु महोक्षा इव ते सदा TrisaŚaPuC. i. 4. 339.

अनेकसंबन्ध (aneka-sambandha) *m.* **1Ai** syntactic or semantic relation (of *kāraka*) with many (referents) नैव ह्यनेकसंबन्धाद् वाक्यभेद: प्रसज्यते TantrVā. 555. 5 (*on* ii. 2. 26); भावना हि क्रियारूपा सर्वकारकसाधारणरूपैवेति युक्तं पदवैरूप्येणानेकसंबन्धं लभते ŚāstrDī. 71. 14 (*on* i. 4. 6); धर्मस्य प्रकृताप्रकृतानेकसंबन्धस्योपनिबन्धाभावान्न तुल्ययोगितादय: AlaṅkāRa. 13 (5); **1Aii** syntactic or semantic relation (of *kāraka*) with more than one (referent) सहार्थवशादेकस्यानेकसंबन्धे सहोक्ति: AlaṅkāRa. 42; **1B** various syntactic or semantic relations नात्रेयं परिभाषोपतिष्ठते। अनेकसंबन्धप्रसङ्गे हि संबन्धान्तरव्यवच्छेदार्थमेषा प्रणीता Nyās. ii. 495. 12 (*on* vi. 4.1); **1C** relation with more than one (item) क्रमेणानेकसंबन्ध एकस्यानुपपन्न: NyāyKuA. i. 65. 3; रूपरसयोरिव नैकवस्तुसंबन्धं प्रतिभन्त्स्यति। न चैकस्यानेकसंबन्ध: क्वचिदपि नास्तीति वाच्यम् NyāySiA. 189. 2; **2** denotation or signification of more than one यद्येकस्य अनेकसंबन्धो नाभ्युपगम्यते तदैक: शब्दोऽनेकमर्थं संबन्धाभावान्न प्रत्याययेत् Pradī. ii. 92B. 36 (*on* i. 2.64)

अनेकसंबन्धकरण (anekasambandha-karaṇa) *n.* assumption of various syntactic or semantic relations न चैतदस्ति अनेकसंबन्धकरणे वाक्यभेदप्रसङ्गात् TantrVā. 548. 15 (*on* ii. 2. 25); 572. 13 (*on* ii. 2. 29)

अनेकसंबन्धत्व (anekasambandha-tva) *n.* the state of having relation with more than one (item) वर्तमानकालपरिच्छेदे चातत्कालव्यवच्छेदो युक्तो भावाभावयोर्विरोधात् न तु कालान्तरसंबन्धव्यवच्छेदो मणिसूत्रवदेकस्यानेकसंबन्धत्वाविरोधात् NyāyKa. 81. 26.

अनेकसंबन्धभेद (anekasambandha-bheda) *m.* difference in various (kinship) relationships यथैकस्मिन् पुरुषे अनेकसंबन्धभेदानुविधायिन्यभिन्ने पिता पुत्रो भ्रातेति प्रत्यया भवन्ति तद्वदेक: काल: कार्यकारणविशेषापेक्ष: परापरादिप्रत्ययहेतु: NyāyVār. 255. 3 (*on* ii. 1. 36)

अनेकसंबन्धविधि (anekasambandha-vidhi) *m.* injunction of (actions in connection with) various syntactic or semantic relations अनेकार्थविधि: पूर्वं निराकृत:। त्वत्पक्षेऽनेकसंबन्धविधिश्चात्र प्रसज्यते TantrVā. 544. 4 (*on* ii. 2. 25)

अनेकसंबन्धविरोध (anekasambandha-virodha) *m.* contradiction to syntactic or semantic relations (of one *kāraka*) with more than one यदि चैकस्यानेकसंबन्धविरोध: कथं नानाभूताभि: शक्तिभिरेक: संबध्यते BrahmSi. 56.5.

अनेकसंबन्धसंभव (anekasambandha-sambhava) *m.* possibility of various syntactic or semantic relations 'षष्ठी स्थानेयोगा' इत्यस्या: परिभाषाया उपस्थानं नास्ति अनेकसंबन्धसंभवे संबन्धविशेषप्रतिपादनफलत्वात्तस्या: Pradī. v. 268A. 6 (*on* vi. 4. 1); PariVṛ. (Sī.) 1. 12; अनेकसंबन्धसंभवेऽप्यन्तरङ्गत्वान्निमित्तनिमित्तिभावलक्षण एव संबन्ध: परिगृह्यते Pradī. v. 315B. 9 (*on* vi. 4. 49)

अनेकसंबन्धानुग्रहार्थम् (anekasambandhānugrahārtham) *adv.* for the sake of allowing various syntactic or semantic relations षष्ठी ... तत्रानेकसंबन्धानुग्रहार्थमनाश्रितविशेषं संबन्धसामान्यमुपादाय प्रवृत्ता Nyās. ii. 494. 18 (*on* vi. 4. 1)

अनेकसंबन्धाभाव (anekasambandhābhāva) *m.* absence of syntactic or semantic relation with more than one एकस्मिन्विधेये विभागं विना तस्यानेकसंबन्धाभावेन विभागपर्यन्तत्वात्तत्र विधिव्यापारस्य तत्र चैकरूप एवोभयत्र विधिव्यापारो वाच्य इति समविभागविधि: MayūMāli. 722. 18 (*on.* x. 5. 8)

अनेकसंबन्धार्थम् (anekasambandhārtham) *adv.* for the sake of relation (of result) with many (persons) यदि ह्युत्पन्नं संयुज्येत, ततोऽनेकसंबन्धार्थमिति वचनं गम्येत ŚābaBh. 1390. 4 (*on* vi. 2. 2)

अनेकसंबन्धोपपादक (anekasambandhopapādaka) *adj.* effecting or facilitating syntactic or semantic relation with more than one अत एव संबन्धभेदाङ्गीकारेऽप्यनेकसंबन्धोपपादकैकयागकल्पनैव लाघवादस्त्वित्यप्यपास्तम् MīmāKau. iii (2). 245. 6 (*on* ii. 2. 20)

अनेकसंबन्ध्याधार (anekasambandhy-ādhāra) *m.* basis or substratum of various related things योगो हि संबन्ध:। स चानेकसंबन्ध्याधार: Nyās. ii. 911. 25 (*on* viii. 1. 16)

अनेकसंमर्दसह (anekasammarda- saha) *adj.* which has endured many battles अनेकसंमर्दसहानपि द्राक् कपीन्द्रकायान् स निशाचरेन्द्र:। टसीत्यभाङ्क्षीत् RāmC. 32. 61.

अनेकसर्ग (aneka-sarga) *adj.* **1** having many cantos तत्र स्फुटरसैश्चित्रै: सुश्लोकविनिबन्धनै:। अनेकसर्गै: संग्रामे महाकाव्यायितं भटै: HarVi. 43. 87 (comm. सर्ग: ... विच्छेदस्थानम्); **2** having various creations, HarVi. 43. 87 (comm. सर्ग: सृष्टि:)

अनेकसर्पक (aneka-sarpaka) *m.* many serpents आवाहनोद्वाहनतोयकर्दमैर्झषैर्जलूकाभिरनेकसर्पकै:। ... परिघा समन्विता MayaMa. 29. 162.

अनेकसर्वसत्त्व (aneka-sarvasattva) *n.* various existences, i.e. realities of all भेदवादिनैकैकस्यार्थस्यानेकसर्वसत्त्वास्वीकारात् NyāySu. (Ja.) 37B.12 (*on* i.1.1)

अनेकसल्लक्षण (aneka-sallakṣaṇa) *n.* various auspicious signs or marks श्रीधर्मसेनस्य ... जज्ञे कुमार: ...। अनेकसल्लक्षणलक्षिताङ्ग: VarāṅgaC. 2. 4.

अनेकसस्यशालिनी (anekasasya-śālinī) *adj.* (*f.*) endowed with various crops or sheaves of corns गौ: पृथिवी व्युप्तबीजा न तदैवानेकसस्यशालिनी भवति ManuBh. i. 387. 11 (*on* 4. 172)

अनेकसस्यसंपूर्णा (anekasasya-sampūrṇā) *adj.* (*f.*) full of various crops or sheaves of corns अनेकसस्यसंपूर्णा ... भू: श्रावणेऽब्दे विराजते NāraS.2 (5). 11.

अनेकसहकारिसाधारण (anekasahakāri-sādhāraṇa) *adj.* common to various auxiliaries or secondary means तत् कार्यमनेकसहकारिसाधारणमेकविशेषापायेऽपि न भवति। पुनरविकलेषु सर्वेषु विशेषेषु भवति PramāVāSvopVṛ. 54. 25.

अनेकसहस्र (aneka-sahasra) *n., m.* (nu.) **i** many thousands (विशांपति:) ऐक्षिष्ट ... अनेकसहस्रै राजानेयवाजिनाम् ... अरातिसैन्यम् AvantiKa. 100. 4; सुभटानां चानेकसहस्रमस्त्येव DaśKuC. 88. 12; यो वदति यश्च शृणोति स: अनेकसहस्रेषु कश्चिदेव भवति GītāBh. (Śaṅ.) 44. 12 (*on* 2. 29); अनन्तचरणाधाराणामनेकसहस्राणां वेदशाखानां कार्त्स्न्येनोपलम्भासंभवात् ŚāstrDī. 25. 13 (*on* i. 3. 3); **ii** many thousands, i.e. great many अनेकसहस्राणामतिबहूनामित्यर्थ: MayūMāli. 25. 17 (*on* i. 3. 3)

अनेकसहस्रचेतन (anekasahasra-cetana) *m.* several thousands of sentient beings or souls तदभ्युपगमे च एकशरीर एवानेकसहस्रचेतनापातात् ĀtmaSi. 7. 6.

अनेकसहस्रजन (anekasahasra-jana) *m.* several thousands of people अवश्यं ह्यनेकसहस्रजनाधिष्ठितामपि सभामध्यासीनैस्तत्रागत: सिंह: पार्थिवो वा तदैव ग्रहीतव्य: NyāyRa. 484. 10 (*on* 5 (8). 29)

अनेकसहस्रयोजन (anekasahasra-yojana) *adj.* of many thousands of measures of distance equal to four *krośas* or about nine miles (*yojanas*) ते ... अनेकसहस्रयोजनमपि पन्थानमतिलङ्घितं गणयन्तो गव्यूतिमात्रमिव ... विश्रमु: NīlaVi. 47. 12.

अनेकसहस्ररश्मि (anekasahasra-raśmi) *adj.* of many thousands of rays चन्द्रश्च साचिव्यमिवास्य कुर्वन् ... अभ्युत्थितोऽनेकसहस्ररश्मि: Rāmā. v. 171* (4)

अनेकसहस्रवत्सर (anekasahasra-vatsara) *m.* many thousands of years अनेकसहस्रवत्सरपरिमितस्यायुष: ... प्रामाणिकत्वम् BhāṭṭDī. ii. 326. 14 (*on* vi. 7. 12)

अनेकसहस्रसंख्य (anekasahasra-saṅkhya) *adj.* [P. iii. 2. 7] amounting to or numbering many thousands अनेकसहस्रसंख्यम् ... शबरसैन्यमद्राक्षम् Kād. 29. 18; भूपाल: ... शुश्राव ... शिष्यैरिवानेकसहस्रसंख्यैर्व्याप्तमर्त्यलोकं भैरवाचार्यनामानं महाशैवम् HarṣaC. 152. 6; 187. 10; 303. 13; अनेकसहस्रसंख्यानाम् ... कदलीगृहाणामन्तरेण स्तोकान्तरमतिक्राम्य (समरकेतु:) TilaMañ. 227.19; 323.1.

अनेकसहस्राश्व (anekasahasrāśva) *m.* many thousands of horses अनेकसहस्राश्वप्रतिग्रहे तन्त्रानुष्ठानम् ŚābaBh. 1311. 8 (*on* v. 2. 3)

अनेकसहायशत (aneka-sahāyaśata) *n.* many hundreds of attendants अनेकसहायशतपरिवृतमिव ... आत्मानमुद्वहन् ... कदलीगृहाभ्यन्तर एव द्वित्राणि पदान्यभिमुखमगच्छत् (हरिवाहनः) TilaMañ. 231. 3.

अनेकसांवत्सरिक (aneka-sāṁvatsarika) *m.* many astrologers (क्षोणिपतिः) अवाप ... निमेः पुरम् ...। अनेकसांवत्सरिकानुचिन्तितप्रशस्तवैवाहिकलग्नसौष्ठवम् Ragh. 4. 49.

अनेकसाधन (aneka-sādhana) *n.* **1** various instruments or efficient means निष्क्रान्तशब्दः कर्तृशक्त्युपसर्जनीभूतं द्रव्यमाह। तद्यानेकसाधनशक्त्युपचितम् Nyās. i. 185. 2 (*on* i. 2.44); **2** more than one reason एकस्मिन्नर्थेऽनेकसाधनोपन्यासो व्यर्थः NyāyKa. 61. 7; **3A** more than one cause or probans नापि व्याप्यान्तरसहवृत्तिः एकत्रापि साध्येऽनेकसाधनोपगमात् NyāyKuA. i. 170. 5; **3B** various means (of attaining liberation) (कैलासम्) अनेकसाधनरताः पुण्यवन्तो व्रजन्ति GaṇeP. ii. 52. 45; **4** various supernatural powers एते देवगणाः ... सर्वेश्वरम् ... आविर्भूतदेववधूनामनेकसाधनसिद्धानां विनोदायोपात्तनटवरवेशमालोक्य संजातानन्दसंदोहाः GopāKeCan. 146. 13.

अनेकसाधनविभक्तिक (anekasādhanavibhakti-ka) *adj.* having various instrumental case-endings निष्क्रान्तशब्दः कर्तृशक्त्युपसर्जनीभूतं द्रव्यमाह। तद्य ... अनेकसाधनविभक्तिकं भवति Nyās. i. 185. 3 (*on* i. 2.44)

अनेकसाधनसाध्यत्व (anekasādhanasādhya-tva) *n.* the state of being what is to be accomplished through various means अग्निहोत्रादिकर्म प्रति श्रुतेरधिको यत्नः महांश्च कर्मण्यायासः अनेकसाधनसाध्यत्वादग्निहोत्रादीनाम् TaiUBh. 223.9 (*on* 1. 11)

अनेकसाधना (aneka-sādhanā) *adj. (f.)* of various means अनेकसाधना यस्मादभिव्यक्तिरिहेक्ष्यते BṛĀraUBhVā. i. 2. 97.

अनेकसाधनोपकरण (anekasādhanopakaraṇa) *adj.* having various (surgical) means for help ते ... सम्राडवयवानामादधुरनेकसाधनोपकरणम् ... पट्टबन्धम् AvantiKa. 136. 12.

अनेकसाधनोपसंहार (anekasādhanopasaṁhāra) *m.* the bringing together or accumulation of many instruments or implements कुम्भकारादीनामनेकसाधनोपसंहारेण प्रवृत्तिदर्शनात् BrahmSūBh. (Bhā.) 104. 2 (*on* ii. 1.24)

अनेकसाधारण (aneka-sādhāraṇa) *adj. [f. - ī]* **A** (woman) common to many (people) (सा) अशप्यत मया ... अनेकसाधारणी भवेति DaśKuC. 72. 6; **B** (property or nature) common to many (entities) पिण्डव्यतिरिक्तमनेकसाधारणं वस्तुभूतमपोहतत्त्वमिष्यते NyāyKa. 320. 14; **C** (power) common to many (means) उभयोरपि वादिनोरनेकसाधारणान्वितप्रतिपादकशक्तिः ... नियम्यते NyāyRaMā. 83. 18.

अनेकसाधारणत्व (anekasādhāraṇa-tva) *n.* **A** the state of being (the object) common to many (people) पत्युश्चैकत्वादनेकसाधारणत्वाच्चातृप्तिः KāmSū. 296. 6 (5. 6); एकोऽपि तृप्तिं कुर्यादिति चेदाह अनेकसाधारणत्वाच्चेति JayaMa. 296. 9 (*on* 5. 6); **B** the state of being (a property) common to many (entities) उरःप्रभवत्वं तु न पयोधरयोर्विषयतावच्छेदकमनेकसाधारणत्वात् CitraMī. 104. 5.

अनेकसाधुजन (aneka-sādhujana) *m.* many noble people तस्यानेकसाधूपपादितसूक्ष्मवासोविशेषोपचयात् (v. l. तस्यानेकसाधुजनदत्तसूक्ष्मवस्त्रविक्रयवशात्) कालेन महत्यर्थमात्रा संवृत्ता PañcT. (Bühler Ed.) 34. 3.

अनेकसाधुशब्दत्व (anekasādhuśabda-tva) *n.* the state of having more than one grammatically correct word एकस्यार्थस्यानेकसाधुशब्दत्वमन्याय्यं तस्मादेकोऽनादिरन्येऽपभ्रंशाः VaiyāSiMañ. 86.1; 84.4.

अनेकसाधुसंयुक्त (anekasādhu-saṁyukta) *adj.* accompanied by many noble persons or saints अनेकसाधुसंयुक्तम् ...। नाम्ना यशोधरं सूरिमद्राक्षीन्मुदितो धनः SamarāSaṁ. 4. 253

अनेकसाधूपपादित (anekasādhūpapādita) *adj.* presented or offered by many noble persons तस्यानेकसाधूपपादितसूक्ष्मवासोविशेषोपचयान्महत्यर्थमात्रा संवृत्ता Tantrākhyā. 14.2; PañcT. 1.55(4)(48.4)

अनेकसाध्यता (aneakasādhya-tā) *f.* the state of being what is to be accomplished by various (means) विनियोगान्तरद्वारा न दुष्टानेकसाध्यता MṛgendraT. i. 11. 13.

अनेकसाध्यसाधन (aneka-sādhyasādhana) *n.* **1** various ends to be accomplished (श्रुतिविप्रतिपन्ना ... बुद्धिः) अनेकसाध्यसाधनसंबन्धप्रकाशनश्रुतिभिः ... विप्रतिपन्ना .. तव बुद्धिः GītāBh. (Śaṅ.) 58. 13 (*on* 2. 53); **2** various proofs of the plaints to be established अनेकसाध्यसाधनतयाभिहितैः साक्षिभिः साध्यार्थजातस्यैकदेशेऽपि साधिते सकलं भवेत् BālamBha. ii. 25.12 (*on* 2.20)

अनेकसाध्योद्देश (aneaksādhyoddeśa) *m.* [Inst.] by aiming at more than one (person) to be subdued संहितायां साध्यनाम्नामिति बहुवचननिर्देशादनेकसाध्योद्देशेन सकृदेवायं प्रयोग इति ध्वनितम् SetuBa. 117. 3.

अनेकसापेक्षता (anekasāpekṣa-tā) *f.* the state of expecting or depending on many entities विश्वजित् ... सर्वपृष्ठः सर्वशब्दस्यानेकसापेक्षतया आतिदेशिकपृष्ठद्वयानुवादासंभवात् BhāṭṭCin. ii. 52. 12 (*on* i. 4. 2)

अनेकसामग्रीसंनिपात (anekasāmagrī-sannipāta) *m.* concurrence of more than one totality of causes एकस्यानेकसामग्रीसंनिपातात् प्रतिक्षणम्। षट्कारकी प्रकल्प्येत Laghīya. 1. 48.

अनेकसामग्रीसाध्या (anekasāmagrī-sādhyā) *adj. (f.)* to be accomplished by more than one totality of causes न ह्येका व्यक्तिरनेकसामग्रीसाध्या ŚrutaPra. iB. 127. 28 (*on* i. 1. 3)

अनेकसामत्व (anekasāma-tva) *n.* the state of having many Sāmans (chants) पुनर्दूषितमनेकसामत्वाज्ज्योतिष्टोमस्य ŚābaBh. 576. 2 (*on* ii. 3. 2)

अनेकसामन्तामात्यपरिवृत (anekasāmantāmātya-parivṛta) *adj.* surrounded, i.e. accompanied by many feudatories and ministers नरपतिरनेकसामन्तामात्यपरिवृतः ... तद्राज्यसुखमनुभवन् ... अवतिष्ठते VetāPañ. (Jam.)4.7.

अनेकसामान्य (aneka-sāmānya) *adj.* similar to or resembling with more than one standard (of comparison) मालोपमेति सेयं यत्रैकं वस्त्वनेकसामान्यम्। उपमीयेतानेकैरुपमानैः Kāvyālaṅ. (Ru.) 8.25 (*but* comm. अनेकधर्मकम्)

अनेकसामान्य (aneka-sāmānya) *n.* **i** more than one class (of entities) न च सामान्यविशेषवचनत्वं शब्दस्य दृष्टमक्षादिशब्दानामनेकसामान्यवचनत्वात् TantrVā. 276. 10 (*on* i. 3. 26); **ii** various classes or universals यस्यापि वस्तुरूपं सामान्यमस्ति तस्याप्यनेकसामान्यसंनिधौ किंनिबन्धनो विशेषप्रत्ययो भवेत् Śarka.25.20.

अनेकसामान्याध्यवसाय (anekasāmānyādhyavasāya) *m.* determinate cognition of various classes or universals एवं च कृत्वा यस्मिन् कस्मिंश्चिच्छाबलेयादिपिण्डेऽनेकाश्वमहिष्यादिव्यावृत्तियोगादनेकसामान्याध्यवसायप्रसङ्गः Śarka. 42. 24.

अनेकसायक (aneka-sāyaka) *m.* various arrows लक्ष्मणः ... तमेव ... विव्याधानेकसायकैः AdhyāRā. vi. 9. 41.

अनेकसायकाभिहत (anekasāyakābhihata) *adj.* struck with various arrows (सः) तां वीक्ष्य मन्मथशरव्याकुलीकृतचेतनः। दत्तशाप इवानेकसायकाभिहतैर्मृगैः BṛKathāMañ. ix. 2. 1073.

अनेकसारिका (aneka-sārikā) *f.* many *mainā*-birds of the species *Turdus salica* अनेकसारिकोद्घुष्यमाणसुब्रह्मण्यम् ... आश्रममपश्यम् Kād. 39.13.

अनेकसालभञ्जिका (aneka-sālabhañjikā) *f.* various images or figures made from *sāla* wood अनेकसालभञ्जिकाः काष्ठमय्यः कान्ता(न्त)प्रकृतयः AbhinBhā. i. 63. 14 (*on* 2. 76)

अनेकसाहस्र (aneka-sāhasra) *adj.* of many thousands संवार्य तु रणे द्रोणः कुमारं वै महाबलः। शरैरनेकसाहस्रैः MahāBhā. vii.15. 24; viii. 12. 7; सुतसोमस्तु ... पितुरत्यन्तवैरिणम्। शरैरनेकसाहस्रैश्छादयामास MahāBhā. viii. 18. 18; viii. 38. 38; SkandP. v(1). 27. 56; (वैष्णवं पदम् अङ्कितम्) कालैरनेकसाहस्रैरयुतायुतसंकुलैः AhirbuS. 9. 23.

अनेकसाहस्रशत (aneka-sāhasraśata) *n.* many hundreds of thousands वाजिपादातरथौघजालैरनेकसाहस्रशतैर्ददर्श। किरीटिनं संपरिवार्यमाणं शिनेर्नप्ता MahāBhā. vi. 55. 75.

अनेकसाहित्य (aneka-sāhitya) *n.* association with more than one (entity) पश्चैक्यात्प्रकृतावर्थादानन्तर्यमनुष्ठितम्। इह त्वनेकसाहित्यात्साजात्यात्तु समीयते ŚāstrDī. 424. 6 (*on* v. 2. 5)

अनेकसाहित्यकला (aneka-sāhityakalā) *f.* various types of literature and art तस्य पुत्रः समभवद् गणेशो नाम ... अनेकसाहित्यकलाकलितः ParamāKā. 149. 5.

अनेकसिद्ध (aneka-siddha) *m.* many semi-divine beings characterised by (eight) supernatural powers किंनिमित्तं वानेकसिद्धसाध्यसंबाधानि ... अपहाय दिव्याश्रमपदानि ... वनमिदममानुषमधिवससि Kād. 135. 4; SthānṬ. 34A. 4; अनेकसिद्धादेशजनितप्रत्ययेन ... ब्राह्मणेनाहमादिष्टः BhagAjju. 4.1; गिरौ ... अनेकसिद्धोन्नतस्थितौ। विहार उचितः PrabhāC. 207. 17.

अनेकसिद्ध (aneka-siddha) *adj.* effected through various means or causes लोके कार्यस्यानेकसिद्धत्वनियमात् एकस्मादेव तस्मात्तद्वक्तुं न ताः क्षमाः GoviBh. 82. 8 (*on* i. 4. 27)

अनेकसिद्धि (aneka-siddhi) *f.* various supernatural powers अनेकसिद्धिश्रद्धालुसिद्धान्विष्यमाणाभिः .. ओषधीभिः TilaMañ. 234. 16.

अनेकसिद्धिकुलावनि (anekasiddhikulāvani) *f.* abode of host of various supernatural powers ईदृक् पुनः कथं प्राप्योऽनेकसिद्धिकुलावनिः PrabhāC.167.20.

अनेकसिद्धिसंयुक्त (anekasiddhi-saṁyukta) *adj.* possessed of various supernatural powers अनेकसिद्धिसंयुक्तः ... स चागन्तात्र निश्चितम् PrabhāC.52.21.

अनेकसुखदुःखव्यक्ति (anekasukhaduḥkha-vyakti) *f.* manifestation of more than one pleasure and pain एकस्यैवानेकसुखदुःखव्यक्तिदर्शनात् सुखादिस्वरूपबहुत्वं नात्मैक्यविरोधि ŚrutaPra. iA. 241. 9 (*on* i. 1. 1)

अनेकसुखपूर (anekasukha-pūra) *m.* flood, i.e. abundance of various pleasures अनेकसुखपूरैश्च गोपा गोप्यस्तथा व्रजे। विस्मृत्य गृहकार्याणि मां विलोकितुमागताः ĀdiP. 18. 140.

अनेकसुखप्रमोदमनस् (anekasukhapramoda-manas) *adj.* (used as noun) (one) having mind rejoicing at various pleasures and delights धन्यानाम् ... °अनेकसुखप्रमोदमनसां स्वल्पायते शर्वरी ŚatTrayī. 540.

अनेकसुगन्धपुष्प (aneka-sugandhapuṣpa) *adj.* having, i.e. decorated with various fragrant flowers पश्चात्तिलाचलमनेकसुगन्धपुष्पं सौवर्णपिप्पलहिरण्मयहंसयुक्तम्। आकारयेत् PadmP. v. 21. 103.

अनेकसुगन्धपुष्प (aneka-sugandhapuṣpa) *n.* various fragrant flowers पश्चात्तिलाचलमनेकसुगन्धपुष्पसौवर्णपिप्पलहिरण्यमयहंसयुक्तम्। आकारयेत् BhaviP. 886A. 35 (iv. 195. 24)

अनेकसुगन्धरस (aneka-sugandharasa) *m.* various fragrant saps or juices अगुरुचन्दनकेसरीमृगमदकर्पूराद्या अनेकसुगन्धरसाः श्रीराधिकया संभोज्या भवन्ति SāmaraU. 237. 17.

अनेकसुगन्धिपुष्प (aneka-sugandhipuṣpa) *n.* various fragrant flowers पश्चात्तिलाचलमनेकसुगन्धिपुष्पसौवर्णपिप्पलहिरण्मयहंसयुक्तम्। आकारयेत् MatsyaP. 83. 23.

अनेकसुतशून्यविषय (anekasutaśūnya-viṣaya) *adj.* referring to (the person) devoid of more than one son तद्वचनद्वयमनेकसुतशून्यविषयम् SmṛtiCan. iv. 445. 15.

अनेकसुत्यासाधारण (anekasutyā-sādhāraṇa) *adj.* common to many Soma-pressings, i.e. Soma sacrifices न हि त्र्यनीकानामानेकसुत्यासाधारणमेकमङ्गम् BhāṭṭDī. iv. 41. 20 (*on* x. 5. 25)

अनेकसुन्दरी (aneka-sundarī) *f.* many beautiful ladies तव वदनेन्दूदये सत्यनेकसुन्दरीरूपलावण्यसंपदामन्तरङ्गोऽप्यपांपतिर्यन्न मनागपि क्षोभमुपयाति तन्मन्ये रूपान्तरं किमपि प्रपन्नः VyaktiVi. 127. 18.

अनेकसुबन्त (aneka-subanta) *n.* many words ending in case -affixes, i.e. nouns अनेकमन्यपदार्थ इत्यनेनानेकसुबन्तानामन्यपदार्थप्रतिपादकत्वे बहुव्रीहिविधानाच्चित्रग्वादिपदानाम् ... द्वन्द्वापत्तिः VaiyāBhū. 139. 19 (*on* 30); अनेकसुबन्तानां चार्थे वृत्त्यभावेनैकार्थीभावरूपसामर्थ्याभावात् LaŚabdeŚe. ii. 127. 12.

अनेकसुबन्ताभाव (anekasubantābhāva) *m.* absence of many nouns सर्वत्र एकशेषे कृते अनेकसुबन्ताभावाद् द्वन्द्वो न SiddhāKau. 208B. 10 (*on* i. 2. 73)

अनेकसुभाषित (aneka-subhāṣita) *n.* many pleasant conversations or witty sayings आवयोः ... अनेकसुभाषितपुराणादिकथाप्रश्नप्रहेलिकादानादिभिर्विनोदैः कालोऽतिवर्तते Pañcā. 188. 5.

अनेकसुभाषितगोष्ठी (anekasubhāṣita-goṣṭhī) *f.* discourse of many pleasant conversations आवयोः ... सुभाषितप्रश्नप्रतिप्रश्नैः (v.l. अनेकसुभाषितगोष्ठ्या) कालोऽति-वर्तते PañcT. 3. 46 (7) (303. 2)

अनेकसुर (aneka-sura) *m.* many gods गुरुजनस्य ... दर्शयन्ननेकसुरसिद्धसाध्यसंबद्धानि तीर्थस्थानानि ... दिनान्यगमयत् TilaMañ. 382. 20.

अनेकसुरपादप (aneka-surapādapa) *m.* many desire-yielding (*kalpa*) trees राजा ... अनेकसुरपादपप्रसूनपरिमलमुचः श्वासपवनात् ... उद्वमन्तमेकं वैमानिकमपश्यत् TilaMañ. 428.9; 38. 5; 408. 10.

अनेकसुरलोकनायिका (aneka-suralokanāyikā) *f.* many heavenly heroines झटित्यनेकसुरलोकनायिकोपभोगक्रीडाकृतार्थमपि ... निविष्टमस्यां मे मनः UdaySuKa. 140. 25.

अनेकसुरसुन्दरी (aneka-surasundarī) *f.* several celestial beautiful damsels (राजा) अनेकसुरसुन्दरीसेविततीरसंकेतलतामण्डपाम् ... समुत्तीर्य भगवतीं मेकलकन्याम् ... प्रयाणविच्छेदमकरोत् NalaCam. 6. 11 (4)

अनेकसुरुङ्गासंचार (aneka-suruṅgāsañcāra) *adj.* having several tunnel-paths or passages कारयेत् ... भूमिगृहं वा ... अनेकसुरुङ्गासंचारम् ArthŚā. i. 98. 6 (1. 20) (comm. अनेकाः(?के) सुरुङ्गासञ्चाराः तिर्यग्भूखातात्मकाः सञ्चरणमार्गाः)

अनेकसुविदत्रवस्तु (aneka-suvidatravastu) *n.* various propicious or auspicious objects (अहम्) पर्युपास्य ... द्रविणोदशमनेकसुविदत्रवस्तुव्यस्तहस्तैः .. यायजूकलोकैः YaśasCam. i. 324. 2.

अनेकसुषिर (aneka-suṣira) *adj.* having many holes अनेकसुषिरं कान्तं वादि स्त्रीमुखपङ्कजम्। पश्य कान्ते वनस्यान्ते (वल्मीकम्) SūktiMu. 98. 32.

अनेकसूक्तोपशालिनी (anekasūktopaśālinī) *adj.* (*f.*) furnished with many good words (बाणः) कृतकृत्य इवानेकसूक्तोपशालिनीभिः स्तुतिभिः स्तुत्वा ... भगवतीम् ... नगरमाजगाम UdaySuKa. 155. 7.

अनेकसूत्रधारघटितत्व (anekasūtradhāraghaṭita-tva) *n.* the state of being built by various architects एकसौधान्तर्गतानामपवरकादीनामनेकसूत्रधारघटितत्वदर्शनाच्चानैकान्तिको हेतुः TattvSaṁPañ. 57. 24 (*on* 92)

अनेकसूत्रव्यवहितत्व (anekasūtravyavahita-tva) *n.* the state of being intervened or separated by many aphorisms प्रवृत्ति(त्ते?)स्त्वनेकसूत्रव्यवहितत्वान्न सानुबन्धमर्हति ŚrutaPra. ii. 285. 34 (*on* ii. 2. 8)

अनेकसूरि (aneka-sūri) *m.* many scholars अस्माभिरनेकसूरिरचितग्रन्थार्थमालोड्य तत्सारम् ... प्रकाशीकृतम् Prasā. i. 2. 17.

अनेकसूर्यपरिस्पन्द (aneka-sūryaparispanda) *m.* many movements of the Sun अनेकसूर्यपरिस्पन्दावच्छिन्नकालसंबन्धिन्यः क्रियाः ... यौगपद्यप्रत्ययगोचरः TātpaṬ. (Vā.) 405. 2 (*on* ii. 1. 39)

अनेकसूर्यशोभाजित् (anekasūryaśobhā-jit) *adj.* [P. iii. 2. 61] which surpasses the splendour of many Suns (लोकाध्यक्षः दर्शयामास तान्रूपम्) अनेकसूर्यशोभाजिन्मुकुटभ्राजिमस्तकम् GaṇeP. i. 12. 36.

अनेकसूर्यसंकाश (anekasūrya-saṅkāśa) *adj.* [*f.* - *ā*] resembling many Suns विनायकः ... अनेकसूर्यसंकाशः GaṇeP. i. 20. 31; सेना ...। भूतलं छादयामास ...। अनेकसूर्यसंकाशा GaṇeP. i. 42. 17; गजाननः। दर्शयामास .. निजं रूपम् ... अनेकसूर्यसंकाशतेजोज्वालासुदीपितम् GaṇeP. i. 87. 35.

अनेकसृष्टि (aneka-sṛṣṭi) *f.* many creations तौ ... अनेकसृष्टिसंहारस्थितिकार्यपरायणौ SkandP. v (2). 59. 7; v (2). 63. 22.

अनेकसृष्टिरचना (anekasṛṣṭi-racanā) *f.* fashioning of many creations अनेकसृष्टिरचनाः सन्ति तस्यैव लीलया BhaviP. 605 A. 2 (iii (4). 25. 151)

अनेकसेवकासक्तदृश् (anekasevakāsakta-dṛś) *adj.* having eyes fixed on several attendants (सा) गन्तुमुद्यता। अनेकसेवकासक्तदृशा तेन न वीक्षिता BṛKathāMañ. ix. 2. 1286.

अनेकसेवासुमुख (anekasevā-sumukha) *adj.* favourably disposed to various services शम्भुराजः ... अनेकसेवासुमुखैः सेवकैरभिसेवितः ... प्रविवेश स्वकं पुरम् ParamāKā. 175. 45.

अनेकसैनिकोपेत (anekasainikopeta) *adj.* accompanied by many soldiers शंकरः ... अनेकसैनिकोपेतः (विचचार) SkandP. iii (1). 48. 8.

अनेकसैन्य (aneka-sainya) *adj.* having many regiments of army तीव्रोद्धवं क्रुद्धमनेकसैन्यं परासुषेणन्तमरिव्रजाय। निर्विज्य नित्यास्तमयात् कथंचिद्वैरोचनी दीप्तिरुपायतेव RāghPāṇ. (Dha.) 16. 39.

अनेकसौरभोद्गार (anekasaurabhodgāra) *m.* discharges or outflows of various fragrances अनेकसौरभोद्गारव्याकुलीकृतषट्पदैः। प्रक्षुभ्यत्कोकिलकुले रसत्समदसारसे। ... संजाताधिकसंतापस्तत्र वत्सेश्वरात्मजः BṛKathāMañ. xi.1.2.

अनेकस्कन्धपादप (anekaskandha-pādapa) *adj.* having trees possessing many branches स्निग्धवर्णं महामूलमनेकस्कन्धपादपम्। ... भूतवनं नाम नानाभूतगणालयम् LiṅgaP. i. 51. 6.

अनेकस्कन्धवाहन (anekaskandha-vāhana) *adj.* bearing many branches स्निग्धपर्णमहामूलमनेकस्कन्धवाहनम्। ... भूतवटं नाम ... महादेवस्य ... आयतनम् VāyuP. i. 40. 19.

अनेकस्खलित (aneka-skhalita) *n.* **1** many stumblings असत्कवेर्वागिव वीतसौष्ठवं निवेशयन्ती पदमव्यवस्थया। असावनेकस्खलितैः समाकुला विमुच्य मार्गं किमितः प्रतिष्ठते NavaSāC. 4. 13; **2** many mistakes or wrong usages, NavaSāC. 4. 13.

अनेकस्तबककदम्बक (anekastabakakadamba-ka) *adj.* having many multitudes of bunches of flowers अनेकस्तबककदम्बकखर्वशाखस्य क्रमुकखण्डस्यास्य निरपायासु छायासु विनोदय ... मार्गखेदम् KaumuMi. 4. 1 (5)

अनेकस्तम्भशत (aneka-stambhaśata) *n.* many hundreds of pillars or columns गङ्गादेवीद्वीपः ... गङ्गादेवीभवनेन क्रोशायामेन तदर्द्धविष्कम्भेन किंचिदूनक्रोशोच्चेनानेकस्तम्भशतसंनिविष्टेनालङ्कृतोपरितनभागः SthānṬ. 74 B.13.

अनेकस्तम्भसंयुत (anekastambha-saṁyuta) *adj.* consisting of many pillars or columns अनेकस्तम्भसंयुतम् ... महाविमानं प्रथितं भास्करं जातवेदसम् VāyuP. i. 34. 79.

अनेकस्तुति (aneka-stuti) *f.* **1** many hymns of praises अनेकस्तुतिभिः स्तुत्वा गिरीशम् SkandP. i (1). 5. 140; **2** praise in various ways राज्ञानेकस्तुतीः कृत्वा सविनयं नत्वा कृत्यादेशेन प्रसीदत PurāPraSaṁ. 16. 21.

अनेकस्तुतिजन्य (anekastuti-janya) *adj.* produced from many hymns of praises विधेयभावनाभाव्यस्यानेकस्तुतिजन्यापूर्वस्य भेदावश्यंभावात्तद्वतद्वादशत्वेनापि स्तोत्रादिद्वादशत्योपपत्तिः MīmāKau. iii (2). 98. 12 (*on* ii. 1. 25)

अनेकस्तुतिव्यतिकर (anekastuti-vyatikara) *adj.* mixed with many hymns of praises अनिमिषनिकायकीर्त्यमानानेकस्तुतिव्यतिकरमितस्ततो महामहोत्सवावतारं च निचाय्य सत्वरम् ... श्रेणिकधरणीश्वरायेदं निवेदयामासुः YaśasCam. ii. 305.21.

अनेकस्तोमक (anekastoma-ka) *adj.* **i** (sacrifice) having more than one typical form of chant (*stoma*) किमेकस्तोमकस्य क्रतोरेष वाद उतैकस्तोमकस्यानेकस्तोमकस्य चेति ŚābaBh. 1335. 1 (*on* v. 3. 43); **ii** (sacrifice) having many typical forms of chants (*stomas*) स्तोमान्तरसत्त्वेऽपि त्रिवृदादेरपि सत्त्वात् अनेकस्तोमकक्रतुदीपकत्वम् BhāṭṭDī. ii. 204. 4 (*on* v. 3. 15)

अनेकस्त्रीपुरुषवहन (anekastrīpuruṣa-vahana) *adj.* carrying, i. e. effecting many females and males अनेकस्त्रीपुरुषवहनानि तेषां बंदा(बन्धना)नि चैवं कदाचिद्भवति(न्ति) BhelaS. 84. 17 (4. 4)

अनेकस्थ (aneka-stha) *adj.* **A** pertaining to many (males), i.e. polyandrous न च धर्मोऽप्यनेकस्थश्चरितव्यः सनातनः MahāBhā. i. 188. 8; **B** carried out at different places, cf. **अनेकस्थत्व A; C** occurring in more than one item, cf. **अनेकस्थत्व B; D** (an-ekastha) not occurring in one place चोरप्रकृतीनां म्लेच्छजातीनां च स्थानविपर्यासमनेकस्थं कारयेद्दुर्गराष्ट्रदण्डमुख्यानां च ArthŚā. iii. 210. 9 (13. 5) (comm. असंहतम्)

अनेकस्थत्व (anekastha-tva) *n.* **A** the state of being carried out at different places यौगपद्यात्तु कर्मणामनेकत्वादनेकस्थत्वाच्च देशकालात्ययो मा भूदिति परोक्षममात्यैः कारयेत् ArthŚā. i. 46. 6 (1. 9); **B** the state of occurring in more than one item, i. e. two सादृश्येन सह सादृश्येऽनेकस्थत्वादौ सादृश्यरूपत्वाश्रिते सादृश्यरूपत्वस्याश्रयणाभ्युपगमे परस्पराश्रयभावः KhaṇḍanKhā. 740. 12 (comm. सादृश्यस्य च द्विगामितया अनेकस्थत्वात्)

अनेकस्थान (aneka-sthāna) *adj.* existing at many places किमीश्वरोऽवयवी पाणिपादाद्यवयवैरनेकस्थानः TattvPrakā. 153 A. 10 (*on* iii. 2. 2)

अनेकस्थान (aneka-sthāna) *n.* **A** various places (मरीचिः) एकोऽपि अनेकस्थानभेदत्वाद् बहुवचनभाक्मरीचय इति AitUBh. 252. 7 (*on* 1. 2); **B** more than one place एकैकदेशतोऽनेकस्थानगतत्वं परस्याविरुद्धं श्रुतिविरुद्धं च TattvPrakā. 153B. 2 (*on* iii. 2. 11)

अनेकस्थानतल (aneka-sthānatala) *adj.* having many rooms and storeys अनेकस्थानतलम् ... पण्यगृहं कोष्ठागारं च ... कारयेत् ArthŚā. i. 133. 1 (2. 5) (comm. अनेकैः कोष्ठैर्भूमिकाभिश्च युक्तम्)

अनेकस्थानवृत्ति (anekasthāna-vṛtti) *f.* existence in more than one place किमेषां विकल्पः समुच्चयो वेति विशये निरपेक्षत्वप्रतीतेर्युगपदनेकस्थानवृत्त्यसंभवाच्च विकल्पः BrahmSūBh. (Rā.) 587. 5 (*on* iii. 2. 7); युगपदनेकस्थानवृत्त्ययोगाच्च विकल्पः स्यात् ŚrutaPra. ii. 431. 13 (*on* iii. 2. 7)

अनेकस्थानस्थ (anekasthāna-stha) *adj.* staying at various places वञ्चकान् ... चारैरनेकस्थानस्थैर्ज्ञात्वा प्रोत्साद्य स्ववशान् कुर्यात् ManvaMu. 412. 14 (*on* 9. 261)

अनेकस्थायसंचार (anekasthāya-sañcāra) *adj.* moving in various components of melody (*sthāyas*) अनेकस्थायसंचारः सर्वदोषविवर्जितः ... गायनाग्रणीः SaṁgīRa. ii. 154. 6 (3. 16)

अनेकस्थित (aneka-sthita) *adj.* [*f.* - ā] **A** staying in more than one place (नन्दनन्दिनी) एकानेकस्थिता लोके इन्दीवरनिभेक्षणा ... सा मे साक्षान्महादेवी पापमाशु व्यपोहतु LiṅgaP. i. 82. 21; **B** occurring in many places अनेकस्थितं वस्त्वेकत्र निषिध्यान्यत्र नियम्यते तत्र परिसंख्यालङ्कृतिः AlaṅkāMañ. 154. 13.

अनेकस्थूपिकोपेत (anekasthūpikopeta) *adj.* consisting of or possessing many spines अनेकस्थूपिकोपेतं कोष्ठकं मध्यमे भवेत् MayaMa. 22. 84.

अनेकस्थूलावयव (aneka-sthūlāvayava) *m.* number of gross constituents सर्वतो योजनादिव्यापिगन्धोपलम्भायानेकस्थूलावयवापसारेण सद्यो गुरुत्वादिह्रासस्य द्रव्यक्षयस्य चापातात् Nyāyāmṛ. 612 A. 8.

अनेकस्मार्य (aneka-smārya) *n.* many things which are to be remembered वानेकस्मार्ये। अनेकस्मार्ये प्रयोक्तरि सति स्मरणार्थैर्योगेऽतीते काले ती वा स्यात् MugdhaBo. 25. 30 (147. 1)

अनेकस्मृति (aneka-smṛti) *f.* **1A** recollection of more than one (thing) एकस्मृतौ विपर्ययः, ततोऽविवेकात्, अनेकस्मृतौ तु संशयः नैकस्मादविवेकात् BrahmSi. 139. 16; **1B** more than one recollection एकस्मृत्यारूढपदद्वयात् स्वस्य शक्त्या स्वस्वार्थयोरेकदा स्मृतिसंभवादनेकस्मृत्यर्थं न साहित्ये लक्षणा TattvCin. iv (2). 801. 4; **2** various Smṛti texts अध्येतॄणां अनेकस्मृतिमूलश्रुतिवाक्यत्यागकल्पनानुपपत्तेः MīmāKau. i. 3. 14 (*on* i. 3. 1)

अनेकस्मृतिवाक्य (anekasmṛti-vākya) *n.* sentences from various Smṛti-texts न हि तदनुरोधेनानेकस्मृतिवाक्यानामपलापः कर्तुमुचितः BālamBha. i. 65. 10 (*on* 1. 14)

अनेकस्मृतिव्याकोप (anekasmṛti-vyākopa) *m.* contradiction with various Smṛti-texts उत्तरार्धपाठः... मेधातिथिकल्पतर्वादिधृतो न युक्तः। अनेकस्मृतिव्याकोपापत्तेः BālamBha. ii. 146. 15 (*on* 2. 118-119)

अनेकस्मृत्युपन्यास (anekasmṛty-upanyāsa) *m.* mention or teaching of many Smṛti-texts केनचित् किंचित् स्मृतमिति दर्शनायानेकस्मृत्युपन्यासः Pradī. ii. 487 B. 19 (*on* ii. 3. 2) (*but* F.N. अनेकवार्तिकोपन्यास इत्यर्थः)

अनेकस्रोतस् (aneka-srotas) *adj.* having many currents or streams दीक्षितः ... अनेकस्रोतसं वा नदीं तरति ŚābaBh. 2212. 4 (*on* xi. 4. 50); ŚāstrDī. 841. 2 (*on* xi. 4. 17)

अनेकस्वकृत्योपयोगित्व (anekasvakṛtyopayogi-tva) *n.* the state of being useful to many acts of oneself द्रविणशब्देन सर्वस्वप्रायत्वमनेकस्वकृत्योपयोगित्वमुक्तम् Loc. 216. 16 (*on* 3. 41); Kāvyānu. (He.) 313. 21.

अनेकस्वतन्त्रपद (aneka-svatantrapada) *n.* many independent words नेदं शास्त्रीयं द्विर्वचनं किं तर्हि परप्रत्यायनायानेकस्वतन्त्रपदप्रयोग इत्युक्तं भवति Pradī. vii. 36. 15 (*on* viii. 1. 12)

अनेकस्वत्वाक्रान्त (anekasvatvākrānta) *adj.* covered with what belongs to many, i. e. common ownership यथा साधारणस्यानेकस्वत्वाक्रान्तस्य न यथेष्टविनियोगार्हत्वं तथा परद्रव्यस्यापीति तदपहरणमपि साहसं भवति BālamBha. ii. 310. 32 (*on* 2. 230)

अनेकस्वभाव (aneka-svabhāva) *adj.* [*f.* -*ā*] **A** possessing more than one nature or property तदेवं सर्वपक्षेषु नैवैकात्मा स युज्यते। एकानिष्पत्तितोऽनेकस्वभावोऽपि न संभवी TattvSaṁ. 1996; **B** possessing different or various natures विरोधादेकमनेकस्वभावमयुक्तम् NyāyKa. 30. 13; चैत्रदेहोऽनेकस्वभावेऽपि 'स एवायम्' इति एकरूपताम् अपरित्यजन्नेव निर्भासते PratyabhiVi. ii. 33. 8 (*on* ii. 2. 1); अभिसारिकाः शिवाश्चानेकस्वभावा असंहतरूपा एकस्मिन्नाश्रये राजपथे क्रमवर्तिन्यः AlaṅkāSa. 151. 15; जीवद्रव्यम् ... अनेकस्वभावं भवति TātpaVṛ. 370. 14 (*on* 3.75); परमाणव इमे खल्वनेकस्वभावैः ... एकजात्यावरूढैः। आरभ्यन्ते NayaMañ. II. ii. 3. 5.

अनेकस्वभाव (aneka-svabhāva) *m.* nature of more than one thing न ह्येकमनेकस्वभावं(वो) नाम व्याघातात् NyāyKuA. i. 12. 5 (comm. न ह्येकमेकस्वभावात्मकमनेकेषां स्वभावो भवति)

अनेकस्वभावक (anekasvabhāva-ka) *adj.* having more than one nature न कपित्थादिवत्तत्त्वं स्वतोऽनेकस्वभावकम्। उक्त्वा सलिलवत्तस्मादेक इत्यब्रवीच्छ्रुतिः BṛĀraUBhVā. iv. 3. 1800.

अनेकस्वभावकल्पन (anekasvabhāva-kalpana) *n.* assumption of more than one nature परमाणवः रूपरसस्पर्शभावाः आप्याः .... इति भवद्भिरेकैकस्यानेकस्वभावकल्पनात् ŚatDū. 85. 12.

अनेकस्वभावता (anekasvabhāva-tā) *f.* the state of having more than one nature सहकारिसमवधाने जनकमजनकं चान्यदेति स्वभाव इति चेन्नैवम्। एकस्यानेकस्वभावतानुपपत्तेः TattvPradī. (Ci.) 210. 6; एकस्यानेकस्वभावतामन्तरेणानेकस्वावयवव्यापनायोगात् SyādvāMañ. 28 (99); न चैकस्यानेकस्वभावताघातः ŚatDū. 85. 10.

अनेकस्वभावत्व (anekasvabhāva-tva) *n.* the state of having more than one nature श्रुतत्वाददोष इति चेत् न एकस्य अनेकस्वभावत्वानुपपत्तेः BrahmSūBh. (Śaṅ.) 590.16 (*on* iii. 2. 21); विरोधः—एकस्यानेकस्वभावत्वविरोधः Bhāsk. ii. 9. 12 (*on* ii. 1. 1)

अनेकस्वभावांश (anekasvabhāvāṁśa) *m.* part or aspect of manifold nature न चानेकस्वभावांशवत्त्वं ज्ञानस्य संमतम् BṛĀraUBhVā. iv. 3. 698.

अनेकस्वयंप्रकाशभाव (aneka-svayamprakāśabhāva) *m.* several self-illuminated beings किमनेकस्वयंप्रकाशभावाभ्युपगमेन ĀtmaSi. 47. 17.

अनेकस्वर (aneka-svara) *adj.* consisting of more than one vowel निन्दहिंसक्लिशखादानेकस्वरविनाशिव्याभाषासूयां वुञ् Kātan. iv. 4. 28; SiddhaHe. v. 2. 68; व्रीहेरर्थात्स्वरूपतः। यथा व्रीहीति शालीति इत्यनेकस्वरादतः KātanVṛ. *on* ii. 6. 15 (3); *on* ii. 6. 40; योऽनेकस्वरस्य SiddhaHe. ii. 1. 56; iii. 4. 46; अव्यक्तानुकरणादनेकस्वरात् कृभ्वस्तिना अनितौ द्विश्च SiddhaHe. vii. 2. 145; vii. 2.6.

अनेकस्वर (aneka-svara) *m.* **1** various notes अनेकस्वरसंयोगे योऽत्यर्थमुपलभ्यते। अन्यश्च बलिनो यस्य संवादी चानुवाद्यपि NāṭyaŚā. 28. 68; **2** more than one accent विधानं च भूयस्त्वादिना एकस्मिन्नेव वेद इति नानेकस्वरप्राप्तिः MīmāKau. ii. 317. 14 (*on* iii. 3. 6)

अनेकस्वरूप (aneka-svarūpa) *adj.* **A** of more than one form जयानेकस्वरूपैकविध प्रभो MatsyaP. 245. 75; VāmaP. 30. 26; वाच्यं वस्तु घटादिकम्। एकात्मकमेव एकरूपमेव सत् अनेकम् अनेकस्वरूपम् SyādvāMañ. 14 (181); अनेकस्वरूपे त्वयि मम रतिरुच्चैर्वर्धताम् StavMā. 305. 11; **B** of many aspects अनंशिन इत्येव श्रुतिरेतेषु वर्तते। अप्यनेकस्वरूपेषु विशेषादेव केवलम् AnuVyā. 21B. 4 (*on* ii. 1. 7)

अनेकस्वरूपधृक् (anekasvarūpa-dhṛk) *m.* one of the thousand epithets of Gaṇeśa (*lit.* bearing more than one form) एकानेकस्वरूपधृक् ... इति वैनायकं नाम्नां सहस्रम् GaṇeP. i. 46. 136.

अनेकस्वरूपप्रतिपत्ति (anekasvarūpa-pratipatti) *f.* assumption of more than one form एकस्यापि देवतात्मनो युगपदनेकस्वरूपप्रतिपत्तिः संभवति BrahmSūBh. (Śaṅ.) 188. 2 (*on* i. 3. 27)

अनेकस्वरूपिन् (anekasvarūp-in) *adj.* having more than one form न जानीषे मयूरेशम् ... एकानेकस्वरूपिणम् GaṇeP. ii. 116. 8.

अनेकस्वर्णपात्रस्थ (anekasvarṇapātra-stha) *adj.* being, i.e. present in many gold vessels अनेकस्वर्णपात्रस्थैः पक्वान्नैः ... पूजितम् ... न दृश्यते देवमुखम् GaṇeP. ii. 48. 28.

अनेकस्वर्णापहरण (anekasvarṇāpaharaṇa) *n.* stealing of large quantity of gold युगपदनेकस्वर्णापहरणेऽप्येकमेव प्रायश्चित्तं हरणक्रियाया एकत्वात् BālamBha. ii. 153. 9 (*on* 3. 258)

अनेकस्वलक्षण (aneka-svalakṣṇa) *adj.* possessed of different unique characteristics or particulars तमोमोहादिभेदेन तमोऽनेकस्वलक्षणम् BṛĀraUBhVā. iv. 4. 599.

अनेकस्वातन्त्र्य (aneka-svātantrya) *n.* independence of many अनेकस्वातन्त्र्ये कार्योदयायोगात् NyāySu. (Ja.) 286A. 4 (*on* ii. 1. 4)

अनेकस्वादता (anekasvāda-tā) *f.* the state of having different tastes एतास्तृणाः ...। अन्योन्यरससंयोगादनेकस्वादतां गताः PadmP. ii. 66. 14.

अनेकस्वादुयुत (anekasvādu-yuta) *adj.* associated with various sweet flavours खाद्यपेयलेह्यचोष्यरसा अनेकस्वादुयुताः SāmaraU. 225.19.

अनेकस्वामिक (anekasvāmi-ka) *adj.* **A** which has many owners or claimants, belonging to many persons सामान्यं स्वमनेकस्वामिकं रथ्याद्यत्र विवक्षितम् SmṛtiCan. iv. 442. 3; (सामान्यं याचितं न्यास आधिर्दाराश्च तद्धनम्) 'सामान्यं' अनेकस्वामिकम् CaturCin. i. 51. 1; VīraMi. 652. 6 (*on* 2. 175-76); सामान्यद्रव्यं हीनद्रव्यं धान्यादि अनेकस्वामिकं वा DīpKa. 67. 8 (*on* 2. 230); **B** which has more than one owner, cf. **अनेकस्वामिकत्व B.**

अनेकस्वामिकत्व (anekasvāmika-tva) *n.* **A** the state of having many owners यद्यपि अनेकस्वामिकत्वेन रथ्यादिकमपि कुटुम्बधनतुल्यं तथापि स्वतन्त्रानेकस्वामिकत्वाददेयम् SmṛtiCan. iv. 442. 5; **B** the state of having more than one owner द्रव्यस्यानेकस्वामिकत्वेनैकस्य व्ययेऽनधिकारात् NirṇaSi. 357. 1.

अनेकस्वाम्य (aneka-svāmya) *adj.* having ownership of many विभागो नाम द्रव्यसमुदायविषयाणामनेकस्वाम्यानां तदेकदेशेषु व्यवस्थापनम् Mitā. 216. 8 (*on* 2.114)

अनेकस्वावयवव्यापन (anekasvāvayava-vyāpana) *n.* pervading, i.e. penetrating more than one of its own parts एकस्यानेकस्वभावतामन्तरेणानेकस्वावयवव्यापनायोगात् SyādvāMañ. 28 (99)

अनेकहंसकुलपरिवृत (anekahaṁsakula-parivṛta) *adj.* surrounded by many hosts of swans शल्मलिवृक्षः। तस्मिन्दुरारोहतया निर्भीरनेकहंसकुलपरिवृतः क्षीरोदो नाम हंसराजः प्रतिवसति स्म Tantrākhyā. 121. 21.

अनेकहयमेध (aneka-hayamedha) *m.* many horse-sacrifices श्राद्धं च तर्पणं चात्र ...। अनेकहयमेधानां प्रदत्ते फलमव्ययम् BṛDharmaP. i. 21. 30.

अनेकहर्म्य (aneka-harmya) *n.* many mansions or buildings अनेकहर्म्यस्य विशालदेशके सभूषणोन्मानं यथा प्रविश्यते। कुर्वन्ति दोषं किल भर्तृकर्तृणाम् उक्ते(क्तं) मानं कुरुते तु संपत् MānaSā. 30. 83.

अनेकानर्थ (anekānartha) *m.* **A** various evils or undesired consequences तन्निमित्तं चानेकानर्थं दर्शयित्वा ...अभयप्राप्तिं दर्शितां श्रुत्वा ...प्राह धृतराष्ट्रः SanatBh. 217. 15 (*on* 1. 22); **B** various miseries जन्म दुःखमेवेति भावयितव्यम् ... अनेकानर्थपरंपरायामपवर्गप्रत्यूहप्रसङ्गात् TātpaṬ. (Vā.) 628. 8 (*on* 1. 58)

अनेकानर्थकलुषित (anekānartha-kaluṣita) *adj.* defiled by various evils अनेकानर्थकलुषितमिवात्मानं मन्यमानस्य भ्रान्तस्य ...पुरुषार्थसिद्धेः PañcPā. 86. 15 (*on* i. 1. 4); अनेकानर्थकलुषितं आत्मतत्त्वं बद्धमिव अनुभूयमानम् TarkSaṁ. (Ā.) 141. 21.

अनेकानर्थनीड (anekānartha-nīḍa) *m., n.* abode of various evils or undesired consequences अनेकानर्थनीडेऽस्मिन्निमग्नं ब्रह्मविद्यया। संक्रामयितुमिष्टत्वाद् ब्रह्मान्तरतमं नरम् TaiUBhāVā. 88. 16 (2) (comm. अनेकानर्थाश्रये संसारसागरे)

अनेकानर्थयोगिन् (anekānartha-yogin) *adj.* associated with various miseries or evils जैवं रूपं कर्तृत्वभोक्तृत्वरागद्वेषादिदोषकलुषितमनेकानर्थयोगि BrahmSūBh. (Śaṅ.) 178. 13 (*on* i. 3. 19); SiddhāLeSaṁ. 459. 1.

अनेकानर्थव्रात (anekānartha-vrāta) *m.* group of various miseries or evils सा श्रुतिर्जीवस्याहमनुभवसिद्धेन कर्तृत्वभोक्तृत्वाद्यनेकानर्थव्रातकलुषितेन रूपेण ब्रह्मभावं न प्रतिपादयति ŚivārkaMaDī. i. 87. 10 (*on* i. 1. 1)

अनेकानर्थशत (anekānartha-śata) *n.* hundreds of various miseries or °शतसहस्र many hundreds of thousand evils लोकान् ...अनेकानर्थशतसहस्रसंकुलान् ... पृष्ठतः कृत्वा MuṇḍUBh. 322. 2 (*on* i. 2. 12)

अनेकानर्थसंकट (anekānartha-saṅkaṭa) *adj.* full of various miseries or evils गह्वरेष्ठं गह्वरे ... अनेकानर्थसंकटे तिष्ठतीति KāṭhUBh. 129. 12 (*on* 2. 12); VedāntKa. 138. 23 (*on* i. 2. 11)

अनेकानर्थसंकट (anekānartha-saṅkaṭa) *n.* danger of various miseries or evils आत्मा...संदेहे अनेकानर्थसंकटोपचये...प्रविष्टः BṛĀraUBh.633.14 (*on* iv.4.13)

अनेकानर्थसंकीर्ण (anekānartha-saṅkīrṇa) *adj.* mixed with, i. e. full of various miseries or evils नाहं कर्ता भोक्ता च किं तु ब्रह्मैवेति विदन् कथंकारमनेकानर्थसंकीर्णे कर्मण्यधिक्रियेत PrakaVi. 19. 9.

अनेकानर्थसंकुल (anekānartha-saṅkula) *n.* collection of various miseries or evils इहैव अनेकानर्थसंकुले सन्तः BṛĀraUBh. 634. 11 (*on* iv. 4. 14)

अनेकानर्थसंबन्ध (anekānartha-sambandha) *m.* contact with various miseries or evils मिथ्याज्ञानमज्ञानं तन्निबन्धनो ह्यात्मनोऽनेकानर्थसंबन्धः NaiṣkaSi. 112. 1.

अनेकानर्थापत्ति (anekānarthāpatti) *f.* undesired contingency of various miseries or evils अनित्यत्वेऽपि पौरुषेयत्वेन विधिनिषेधवाक्यानामप्रामाण्यम्। अतस्तत्प्रयुक्तकर्मणां चासिद्धिरित्यनेकानर्थापत्तिः BrahmSūBh. (Śrī.) i. 462. 4 (*on* i. 3. 27)

अनेकानित्यविज्ञानपूर्वकत्व (anekānityavijñānapūrvaka-tva) *n.* the state of being preceded by various fleeting ideas तथा हि सौधसोपानगोपुराट्टालकादयः। अनेकानित्यविज्ञानपूर्वकत्वेन निश्चिताः TattvSaṁ. 73; अत एवायमिष्टस्य विघातकृदपीच्य(ष्य?)ते। अनेकानित्यविज्ञानपूर्वकत्वप्रसाधनात् TattvSaṁ. 74.

अनेकानिष्टप्रसञ्जन (anekāniṣṭa-prasañjana) *n.* undesired occasion for, i. e. imposition of more than one undesired consequence आत्मसिद्धान्तसिद्धं पूर्णम् ... तर्काधिकं यथा। एकविषयेऽनेकानिष्टप्रसञ्जनम् NyāyPari. 201. 4.

अनेकानीककानन (anekānīka-kānana) *n.* forest in the form of vast armies भूरिरभ्रभरो रेभी कोऽनेकानीककाननम्। ...अकाले नोपाप RāghPāṇ. (Dha.) 18. 43 (comm. प्रचुरसैन्यकान्तारम्)

अनेकानीकनायक (anekānīka-nāyaka) *m.* leader of several troops आययौ सह्यकटकादनेकानीकनायकः। ... दरीमुखः RāmC. 10. 14.

अनेकानुगत (anekānugata) *adj.* [*f.*-ā] **1** followed by more than one एकात्वनेकानुगता यथा हासास्पदं जने MārkP. 65. 24; **2** continued in or common to more than one सामान्यम् ...एकमनेकानुगतं च TarkBhā. (Ke.) 75. 14; NyāySu. (Ja.) 337 B. 2 (*on* ii. 2. 7); TarkSaṁ. (Ā.) 60. 20; BhāṭṭCin. i.18. 25 (*on* i. 1. 4); LaŚabdeŚe. i. 405. 19; सादृश्यं तावदेकमनेकानुगतम् NyāySu. (Ja.) 370 B. 2 (*on* ii. 2. 6)

अनेकानुगतत्व (anekānugata-tva) *n.* the state of being common to more than one जातेः ...एकत्वमनेकानुगतत्वं च बोधितम् LaŚabdeŚe. i. 411.3.

अनेकानुगमक्लृप्ति (anekānugama-klṛpti) *f.* ascertainment of commonness for more than one यद्यप्यनेकानुगमक्लृप्तेस्तन्नानावयवव्यासङ्गि द्रव्यं सामान्यमित्येवं विकल्प्य न गृह्यते Kāśi. iii. 97. 20 (*on* 5 (5). 181)

अनेकानुगमावमर्श (anekānugamāvamarśa) *m.* consideration of commonness for more than one शब्दादिस्मरणोत्तरकालं त्वनेकानुगमावमर्शात् सामान्यमिति विकल्प्य गृह्यते Kāśi. iii. 97. 25 (*on* 5 (5). 181)

अनेकानुग्रह (anekānugraha) *m.* act of facilitating many, i. e. applying

plural ending पाशानित्यनेन पदेन पाशकर्मत्वं बहुत्वं च प्रतीयते तत्र पाशकर्मत्वयोः समवायाल्लिङ्गानामेव परस्परविसंवादेऽनेकानुग्रहायानुत्कर्ष एव न्याय्यः MayūMāli. 624. 7 (*on* ix. 3. 5)

अनेकानुबन्धिन् (anekānubandhin) *adj.* **A** connected with more than one, i. e. two (or more) कार्यं त्रिवर्गस्तच्छुद्धमेकानेकानुबन्धि च DaśRū. 1. 16 (comm. द्वित्र्यनुबन्धम्); **B** connected with, i. e. referring to more than one परकृतिः। अनेकानुबन्धी तु पुराकल्पः NyāyPari. 393. 22.

अनेकानुमानप्रतिहतत्व (anekānumānapratihata-tva) *n.* the state of being refuted by several inferences अनेकानुमानप्रतिहतत्वान्न दृश्यत्वानुमानं समञ्जसमिति सिद्धम् Vādā. 80. 4.

अनेकानुमितिकरण (anekānumiti-karaṇa) *n.* means of more than one inference एकानुमित्युत्पत्तावनेकानुमितिकरणरूपानुमानप्रमाणाभ्युपगमावश्यंभावे लाघवात् ŚivārkaMaDī. i. 166. 17 (*on* i. 1. 4)

अनेकानुयाजार्थ (anekānuyājārtha) *adj.* meant for more than one fore-offering वचनबलादेकैकस्य चतुर्गृहीतस्य हविषोऽनेकप्रयाजार्थत्ववदनेकानुयाजार्थत्ववच्चतुर्गृहीतद्वयरूपस्य हविर्द्वयस्यैकैकयागार्थत्वस्याप्युपपत्तेः VidhiRa. 9 (53. 14)

अनेकानुवृत्त (anekānuvṛtta) *adj.* continued in, i. e. common to more than one नरत्वादिकमैके(?मैकै)कप्रतीतावतो नानुगतम् ...नरत्वादिकं नानेकानुवृत्तम् NyāySu. (Ja.) 370 A. 10 (*on* ii. 2. 6)

अनेकानुष्ठान (anekānuṣṭhāna) *n.* performance of more than one (rite) न ह्येकेन कर्ता(र्त्रा) युगपदनेकानुष्ठानं कर्तुं शक्यते CaturCin. iii (1). 761.13.

अनेकानुसंधान (anekānusandhāna) *n.* recollection of many (things, viz, letters, words and denotations) अनेकानुसंधानम्। नात्मनः क्षणिकतायामुपपद्यते NyāySu. (Ja.) 396 B. 10 (*on* ii. 2. 7)

अनेकानेकप (anekānekapa) *m.* many elephants अस्ति ...। अनेकानेकपैरश्वैः नररत्नैरलंकृतम् ...। नगरं पोतनाभिधम् PārśvC. 1. 19.

अनेकानेकपयूथ (anekānekapayūtha) *n.* many herds of elephants मालवनाथोऽप्यनेकानेकपयूथसनाथो विग्रहः सविग्रह इव साग्रहोऽभिमुखीभूय भूयो निर्जगाम DaśKuC. 3. 2.

अनेकानेहोयोग (anekānehoyoga) *m.* separation for a long period अन्योन्यं द्रागाददुस्ते ददुश्चानेकानेहोयोगजैक्यान्नमांसि ŚaṅkaDigVi. (Mā.) 14. 144 (comm. अनेककालायोगजन्यादैक्यात्)

अनेकानोकहच्छन्ना (anekānokaha-cchannā) *adj.* (*f.*) covered with various trees अनेकानोकहच्छन्ना प्रत्यासन्ना वनावलिः। ...प्रतिभासते KīrtiKau. 1.50.

अनेकान्त (anekānta) *adj.* [*f.* -ā] **1** having many ends or fruits **2** contradictory **3** large, much, limitless **4** varied, i. e. being both real and unreal (an-ekānta) **5** not forming an integral part or member **6A** uncertain, variable, non-absolute **Bi** overcomprehensive or inconclusive (example or argument) **ii** inconclusive or deviating (probans) **7A** indeterminate or equivocal (position of the Jainas) **B** not one-sided, i. e. many-sided **1** having many ends or fruits अनेकान्तं बहुद्वारं धर्ममाहुर्मनीषिणः MahāBhā. xiii. 23. 18 (BhārBhāDī. अनेकफलाकारम्); xiv. App. I. 4 (2211); VṛGautaSm. 588. 2 (12); **2** contradictory (*lit.* having many ends) अनेकान्तोऽयमिति स्वतन्त्रपरतन्त्रोपलब्ध्यनुपलब्धिकारणभावाच्च विशेषः NyāyVār. 10. 13 (*on* i. 1. 1); तद्बुद्धिहेतुत्वात् प्रामाण्यं भूतगोचरम्। इष्यते तदनेकान्तं पदेषु ĀgaPrā. 21. 15; **3** large, much, limitless विषयाः ...। अनेकान्तव्ययायासदुःखसाधनसाधनजाः ...दुःखं च सुवते LakṣmīT. 43. 102; **4** varied, i. e. being both real and unreal चेतनाचेतनात्मकं चेदं जगदनेकान्तम् SarvaMaSaṁ. 17. 4; (an-ekānta) **5** not forming an integral part or member अनेकान्ता अनुबन्धाः MahāBh. i. 76. 2 (*on* i. 1. 20); ii. 79. 24 (*on* iii. 1. 94); iii. 112. 19 (*on* vi. 1. 186); Pradī. vi. 22. 11 (*on* vii. 1. 18); ParibhāŚe. 4; **6A** uncertain, variable, non-absolute अनेकान्ता गुरुलघुतयार्थेषु धनिनामवस्था ŚatTrayī. 12; अयमप्यनेकान्तः यः सविकल्पक एव प्रत्यक्षः Kāśi. i. 248. 22 (*on* 4. 112); TattvBi. 154. 4; एकत्वविधिः सवित्रीबन्ध्यात्वविधिरिव अनेकान्तः ĀtmaSi. 33. 25; 61. 23; अल्पपरिमाणैरनेकद्रव्यैः स्थूलैककार्यारम्भोऽनेकान्तः NītiMā. 48. 9; **6Bi** overcomprehensive or inconclusive (example or argument) वदेद् वाक्यैरनेकान्तं निग्रहस्थानम् SarvaSiSaṁ. 6. 32; दृष्टान्त एकस्मिन् पक्षे उपादेयो न प्रतिपक्षे इत्यनेकान्तः ...एवं च सत्यनेकान्त इत्ययं प्रतिषेधो न भवति NyāyBh. 89. 4 (*on* ii. 1. 20); **6Bii** inconclusive or deviating (probans) (*lit.* not one-pointed as it is concomitant with both the probandum and its contrary) अनेकान्तश्च हेतुस्ते तच्छरीरादिना भवेत् ŚlokaVār. 5 (15). 77 (660. 3); स्थास्यति पूर्वोक्तहेतुजातमनेकान्तम् NayaVi. 242. 2 (*on* i. 1. 8); अनेकान्तः परिच्छेदे संभवे च न निश्चयः NyāyKuA, ii (1). 205. 7; NyāyVārPari. 335. 13; हेत्वाभासेषु सव्यभिचारो नामानेकान्तः TārkiRa. 218. 1; नामरूपाभ्यां भेदव्यपदेशादाकाशं ब्रह्म ...भेदव्यपदेशोऽनेकान्तः VedāntKa. 194. 1 (*on* i. 3. 42); 160. 19 (*on* i. 3. 14); NyāyPari. 241. 13; SarvaDaSaṁ. 3. 63; SarvaDaKau. 47. 24; 116. 4; **7A** indeterminate or equivocal or sceptical (position of the Jainas) श्रुतादर्थमनेकान्तमधिगम्याभिसंधिभिः Laghīya. 1. 73; **7B** not one-sided, i. e. many-sided अक्षज्ञानमनेकान्तमसिद्धेः PramāSaṁ. 3. 4; NyāyVi. 2. 128; अनेकान्तः सर्वोऽपि पदार्थः SarvaDaKau. 37. 5.

अनेकान्त (an-ekānta) *m.* **1** not an integral part or member **2** non-identity or difference among homogenous types **3A** inconsistency, discrepancy **Bi** variation, overlapping [Inst.] overlappingly **ii** inconclusive or deviating probans **iii** inconclusive or overcomprehensive argument **C** uncertainty, doubtfulness **4** one of the thirty-two types of medical treatment **5** indetermination or equivocalism (of the Jainas) (anekānta) **6** many sidedness **7** contradictory predication of both reality and unreality **8** contradictory predication of both singularity and plurality **1** not an integral part or member अनेकान्ते वृत्तिविशेषः Vār. 11 *on* P. i. 3. 9; उभयमिदमनुबन्धेषूक्तमेकान्ता अनेकान्ता इति MahāBh. i. 266. 22 (*on* i. 3. 9); **2** non-identity or difference among homogenous types अनेकास्तो ह्यनन्यत्वकरः Vār. 9 *on* P. i. 1. 69; यो ह्यनेकान्तेन भेदो नासावन्यत्वं करोति MahāBh. i. 179. 24 (*on* i. 1. 69); **3A** inconsistency, discrepancy येषां चाप्यारभ्यते तेषामप्यनेकान्तः। यस्मिन्नेव च प्रत्यये दीर्घत्वं दृश्यते तस्मिन्नेव च न दृश्यते MahāBh. iii. 12. 8 (*on* vi. 1. 7); संस्कारस्यापि व्यञ्जकत्वेन समाधानादिभिरनेकान्तः SphoṭSi. 198. 2; **3Bi** variation, overlapping क्वचिच्चोपलब्धेरनेकान्तः NyāySū. iii. 2. 17; यदि प्रतिक्षणं क्षणविवेकदर्शिनोऽधिकृत्योच्यते तदा भिन्नोपयोगितया पृथक् प्रामाण्यात् नानेकान्तः HetuBiṬ. 37. 23; वेदमूलत्वमनेकान्तान्न लभ्यते TantrVā. 104. 11 (*on* i. 3. 4); Kāśi. i. 126. 8 (*on* 2. 117); ii. 9. 9 (*on* 5 (1). 15); iii. 113. 8 (*on* 5 (5). 27); यत्तथा स एकान्तः ... क्वचिदन्यथासावनेकान्तः ViṣṇuDhaP. iii. 6. 6; NayaVi. 207. 9 (*on* i. 1. 5); अनेकान्तः किं स्वातन्त्र्येण प्रतिपाद्यते VedāntKa. 299. 23 (*on* ii. 2. 33); [Inst.] overlappingly सर्वमेव हि नोऽनेकान्तेन परत्र प्रवर्तते Kāśi. ii. 127. 5 (*on* 5 (3). 69); **3Bii** inconclusive or deviating probans शब्दकर्मबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नाश्च न व्याप्ताः तस्मादनेकान्तः NyāyBh. 257. 12 (*on* iv. 1. 32); SphoṭSi. 207. 1; HetuBiṬ. 83. 19; TattvSaṁ. 681; जलमातपोऽपनयति न तु गन्धं द्रव्यस्याभिव्यनक्ति तस्मान्नानेकान्तः TātpaṬ. (Vā.) 530. 20 (*on* iii. 1. 62); चतुर्थे बाधानेकान्तौ NyāyKuA. ii (2). 34. 7; ii (2). 13. 5; Bhām. 233. 8 (*on* i. 3. 27); प्रयोगेऽयथार्थप्रत्ययोऽस्ति इत्यस्मदुपेतप्रत्ययेऽनेकान्तः PrakaVi. 8. 21; 12. 7; 50. 20; 76. 16; शब्दस्वाभाव्यात् परोक्षज्ञानजनकत्वमिति तत् ... दशमादिष्वनेकान्तं च SarvaDaKau. 131. 2; **3Biii** inconclusive or overcomprehensive argument द्रव्यभेदेऽप्यनेकान्तं मत्वाह किमतो यदि ŚlokaVār. 6. 369 (824. 4); **3C** uncertainty, doubtfulness ज्योत्स्नामयी स्वभावान् मयि दहनमयीव वर्तसे यदिह। तदनेकान्ते कान्ते जातासि निदर्शनं प्रथमम् MohaRāPa. 3. 13; **4** one of the thirty-two types of medical treatment क्वचित्तथा क्वचिदन्यथेति यः सोऽनेकान्तः। यथा केचिदाचार्या ब्रुवते द्रव्यं प्रधानम् ...केचित् वीर्यम् SuśruS. vi. 65. 24; **5** indetermination or equivocalism or scepticism (of the Jainas) स्यात् ... नेकान्तोऽप्यनेकान्त इति जैनी श्रुतिः VarāṅgaC. 26. 82; सिद्धिरनेकान्तात् JaineVyā. i. 1. 1; TattvPradī. (A.) 27. 3 (*on* 1. 27); PramāMī. 18. 4 (*on* i. 1. 21); नानेकान्तं प्रतिक्षिपेत् Vītarā. 8. 8; न चाप्यनेकान्तमृते नयस्थितिः MahāViSt. (H.) 2. 28; स्यादित्यनेकान्ते। स्याद्वादिनो जैनाः GaṇRa. 1. 13 (30); KumāPraPra. 64. 27; तवाप्रसिद्धमेतच्चेदनेकान्तं ततः पठ PrabhāC. 179. 22; (anekānta) **6** many-sidedness प्रकाशयञ्जगत्तत्त्वमनेकान्तमयं महः TattvPradī. (A.) 2.2 (*on* 1. 0); **7** contradictory predication of both reality and unreality न त्वनेकान्तो द्वेधा ....अनेकान्ते प्रबलप्रमाणसद्भावात् कथं नियमे बाधकाभावः NyāySu. (Ja.) 412 A. 12 (*on* ii. 2. 10); **8** contradictory predication of both singularity and plurality, cf. **अनेकान्तवादिन् 1B**.

अनेकान्तःकरणाधिकरण (anekāntaḥkaraṇādhikaraṇa) *n.* abode or locus of many internal organs अनेकान्तःकरणाधिकरणापेक्षाबुद्धिजन्यबहुत्वस्यैव दृष्टान्ततोपपत्तेः TattvPradī. (Ci.) 334. 14.

अनेकान्तजयपताका (anekāntajayapatākā) *f.* name of a book ग्रन्थाः प्रायश्चित्तपदे कृताः। ...शतक-पञ्चाशत्-षोडशक-अष्टक-पञ्चलिङ्गी-अनेकान्तजयपताका-न्यायावतारवृत्तिपञ्चवस्तुक°...°प्रभृतीनि ... °हारिभद्राणि PrabaK. 25. 14.

अनेकान्तता (anekānta-tā) *f.* **1** the state of being both real and unreal सर्वत्रानेकान्ततामिच्छतामेकमनेकं नित्यमनित्यम् ...एवंरूपा बुद्धयः IṣṭaSi. 267. 7;

न वा कदाचित् क्वचित्, अनेकान्तत्वादेव। व्यवहारो न नास्तीति चेत्, मा तर्हि चीक्लपोऽनेकान्तताम् IṣṭaSi. 267. 11; **2** inconclusiveness or deviation (of probans) न च मूलजलादिनानेकान्तता, पूर्वास्तित्वमानेऽसतीति हेतोर्विशेषणात् NayaVi. 229. 4 (*on* i. 1. 6); स्वप्रकाशत्वाच्च प्रपञ्चमिथ्यात्वसाधकदृश्यत्वादिहेतूनां तत्र नानेकान्तता SarvaDaKau. 117. 25.

अनेकान्ततावाद (anekāntatā-vāda) *m.* **1** (Jain.) dovitrine of indetermination, equivocalism or scepticism स्याद्वादिनामनेकान्ततावादस्येष्टतया विरोधासिद्धेः SarvaDaSaṁ. 3. 30; **2** doctrine of predication of both reality and unreality अनेकान्त(ता)वादे पदार्थानां क्षणिकत्वस्याङ्गीकृतत्वेन ... अपूर्वार्थताभ्युपगमसौलभ्यात् NyāySu. (Ja.) 250 B. 12 (*on* ii. 1. 2)

अनेकान्ततोपपादन (anekāntatopapādana) *n.* ascertainment of inconclusiveness or deviation (of the probans) एवं तावद्देहादिः सन् भासमानत्वादात्मवदित्यनुमानस्य मरीचिकोदकादावनेकान्ततोपपादनेन देहादेरनिर्वाच्यत्वमुक्तम् VedāntKa. 14. 20 (*on* i. 1. 1)

अनेकान्तत्व (anekānta-tva) *n.* **1** the state of not forming an integral part or member **2A** the state of being indefinite or uncertain **B** the state of being inconclusive or deviating (probans) **3** the state of being both real and unreal **1** the state of not forming an integral part or member सिद्धमनुबन्धस्यानेकान्तत्वात् Vār. 8 *on* P. i. 1. 20 = 5 *on* P. iii. 1. 94; इतश्चानेकान्तत्वात् Vār. 5 *on* P. vi. 1. 186; MahāBh. i. 76. 2 (*on* i. 1. 20); ii. 79. 24 (*on* iii. 1. 94); एतच्च ज्ञापनमनुबन्धानामेकान्तत्वे उपयुज्यते। अनेकान्तत्वे स्वत एव एजन्तत्वाज्ज्ञापनप्रयोजनाभावः Pradī. iii. 259B. 16 (*on* iii. 4. 19); ii. 137A. 29 (*on* i. 3. 9); Prasā. ii. 756. 21; अनुबन्धानामनेकान्तत्वात् LaŚabdeŚe. i. 79. 1; i. 17. 8; **2A** the state of being indefinite or uncertain अनेकान्तत्वाच्च Vār. 4 *on* P. vi. 1. 7; परमाणुस्वरूपेऽपि शून्यात्मकत्वम् ... एकान्तत्वानेकान्तत्वसत्यासत्यात्मकत्वादिविसंवाददर्शनात् BrahmSūBh. (Rā.) 416. 11 (*on* ii. 1. 13); **2B** the state of being inconclusive or deviating (probans) यूकादावनेकान्तत्वमाह VedāntKa. 167. 12 (*on* i. 3. 26); भास्वराध्वान्ताभास्वररूपाभ्यामनेकान्तत्वाच्च NyāySi A. 188. 4; **3** the state of being both real and unreal नन्वनेकात्मकं वस्त्विति ...संशयज्ञानवन्नाप्रमाणं भवितुमर्हति नेति ब्रूमः निरङ्कुशं ह्यनेकान्तत्वं सर्ववस्तुषु BrahmSūBh. (Śaṅ.) 404. 13 (*on* ii. 2. 33); IṣṭaSi. 267. 10; VedāntKa. 237. 13 (*on* ii. 1. 14)

अनेकान्तत्वाभिधान (anekāntatvābhidhāna) *n.* mention of the state of being both real and unreal एकस्मिन् देश एव सत्त्वासत्त्वादिनानेकान्तत्वाभिधाने दृष्टान्तानुपपत्तेः SarvaDaSaṁ. 4. 9.

अनेकान्तदिवाकर (anekānta-divākara) *m.* sun in the form of indetermination or equivocalism तर्पयेत् स्वर्गवासिनः। ...गदन्तं तमनेकान्तदिवाकरम् PadmP. (Ra.) 11. 252.

अनेकान्तदेशिन् (anekānta-deśin) *adj.* who teaches the doctrine of indetermination or equivocalism पृथक्त्वैकत्ववादाय सर्वानेकान्तदेशिने। जिनेश्वराय ...नमः PadmP. (Ra.) 9. 183.

अनेकान्तद्योतक (anekānta-dyotaka) *adj.* signifying or indicating the doctrine of indetermination or equivocalism यदि पुनरयमनेकान्तद्योतकः स्याच्छब्दो न भवेत् स्यादस्तीति वाक्ये स्यात्पदमनर्थकं स्यात् Bhām. 457. 19 (*on* ii. 2. 33); स्यादित्यव्ययमनेकान्तद्योतकम् SyādvāMañ. 5 (6); 25 (1); स्याच्छब्दः खल्वयं निपातस्तिङन्तप्रतिरूपकोऽनेकान्तद्योतकः SarvaDaSaṁ. 3. 379.

अनेकान्तद्योतकत्व (anekāntadyotaka-tva) *n.* the state of signifying or indicating the doctrine of indetermination or equivocalism स्याच्छब्दस्यानेकान्तद्योतकत्वे जैनैरुक्तम् VedāntKa. 300. 1 (*on* ii. 2. 33); अनेकान्तद्योतकत्वे तु स्यादस्ति कथंचिदस्तीति स्यात्पदात् कथंचिदित्ययमर्थो लभ्यते SarvaDaSaṁ. 3. 384.

अनेकान्तद्योतिन् (anekānta-dyotin) *adj.* signifying or indicating the doctrine of indetermination or equivocalism स्याच्छब्दः खल्वयं निपातस्तिङन्तप्रतिरूपकोऽनेकान्तद्योती Bhām. 457. 16 (*on* ii. 2. 33); SarvaDaKau. 36. 12.

अनेकान्तधी (anekānta-dhī) *f.* knowledge of indetermination or equivocalism प्रमाणनयसङ्गता स्वसमयेऽप्यनेकान्तधीर्नयस्मयतटस्थतोल्लसदुपाधिकिर्मीरिता। कदाचन न बाधते JñānBiPra. 49. 5.

अनेकान्तपक्ष (anekānta-pakṣa) *m.* **1** view concerning inconclusive or deviating (probans) किमयं दृष्टान्तः साधनपक्ष उतानैकान्तिकपक्षः(v.l. अनेकान्तपक्षः) NyāyVār. 370. 2 (*on* iii. 1. 20); **2** view concerning indetermination or equivocalism अत्रापि दोषतादवस्थ्यमिति वाच्यम्। कुक्कुटसर्पनरसिंहादिवज्जात्यन्तरत्वादनेकान्तपक्षस्य SyādvāMañ. 19 (33); अनेकान्तपक्षे तु कथंचित्कचित्केनचित् सत्त्वेन हानोपादाने प्रेक्षावतामुपपद्येते SarvaDaSaṁ. 3. 391; GoviBh. 135. 7 (*on* ii. 2. 32)

अनेकान्तभङ्गप्रसङ्ग (anekāntabhaṅga-prasaṅga) *m.* undesired occasion for violating the doctrine of indetermination or equivocalism मातुरपि वन्ध्यात्वम् ...इत्यादि सर्वमप्यङ्गीकुर्यात्। अन्यथानेकान्तभङ्गप्रसङ्गात् NyāySu. (Ja.) 413 B. 3 (*on* ii. 2. 10)

अनेकान्तभाज् (anekānta-bhāj) *adj.* possessor of, i.e. practising indetermination or equivocalism स्वाद्वादिने ते नमस्तात्प्रत्यक्षमलक्षयन् स्वमतमभ्यस्याप्यनेकान्तभाक् Laghīya. 1. 50.

अनेकान्तमत (anekānta-mata) *n.* doctrine of indetermination or equivocalism अनेकान्तमताम्भोधिसमुल्लासनचन्द्रमाः। दद्यादमन्दमानन्दं भगवान्नाभिनन्दनः TriṣaŚaPuC. i. 1. 6; अयुक्तमेवानेकान्तमतम् NyāySu, (Ja.) 412 A. 3 (*on* ii. 2. 10)

अनेकान्तमयत्व (anekāntamaya-tva) *n.* the state of consisting of many-sidedness आगमेन तावत्सर्वाण्यपि द्रव्याणि प्रमीयन्ते ...सहक्रमप्रवृत्तानेकाधर्मव्यापकानेकान्तमयत्वेनैवागमस्य प्रमाणत्वोपपत्तेः TattvPradī. (A.) 325. 1 (*on* 3. 35)

अनेकान्तमुनिव्रत (anekāntamuni-vrata) *n.* vow of a hermit resorting to indetermination or equivocalism अहम् ...। चराम्याराधयन्देवमनेकान्तमुनिव्रतम् KathāSaSāg. xii. 14. 23.

अनेकान्तय (anekāntaya-) *denom.* **A** to make (something) variable or inconstant सोमशब्दो हि लताचन्द्रमसोर्मुख्यः ...सोमपदादन्यतोऽनधिगतायां लतायामत्र वाक्ये प्रयुक्तः ...। अन्यतो निश्चिते शब्दस्य मुख्यत्वमित्येतदनेकान्तयति VedāntKa. 160. 17 (*on* i. 3. 14); **B** to make (probans) inconclusive or deviating लोकप्रसिद्धिमन्यथासिद्धयत्यनुमानं वानेकान्तयति VedāntKa. 222. 3 (*on* i. 4. 19)

अनेकान्तरित (anekāntaritā) *adj.* (used as noun) (what is) separated or hidden by many वाक्प्रशस्तं चिरातीतमनेकान्तरितं लघु। ... शुचिन्यश्च तथैवापः MārkP. 35. 13; BrahmP. 221. 121; VāmaP. 14. 66.

अनेकान्तरुचि (anekānta-ruci) *adj.* (used as noun) (one) having liking for indetermina-tion or equivocalism सम्यग्ज्ञानं एकान्तरुचौ न संभवति, अनेकान्तरुचौ तु समस्तीति JñānBiPra. 48. 11.

अनेकान्तवाद (anekānta-vāda) *m.* **1A** theory or doctrine of contradictory predication of singularity and plurality अनेकान्तवादं च मायामोहेन .... तेन दर्शयता दैत्याः स्वधर्मं त्याजिताः ViṣṇuP. iii. 18. 12; **1B** theory or doctrine of ascertaining of contradictory predication of both reality and unreality न ह्यन्यस्यान्य आत्मा भवति। न चानेकान्तवादः Bhām. 351. 10 (*on* ii. 1. 14); NyāyRa. 633. 7 (*on* 5 (14). 77); PrakaVi. 554. 11; भेदपक्षेऽनेकान्तवादश्च न भवति VedāntKa. 237. 12 (*on* i. 1. 14); अत एव ह्यनिर्वचनीयानेकान्तवादयोरनवतारः NyāyPari. 275. 3; न चानेकान्तवादेन निस्तारः। द्वयोरपि सावधारणत्वासंभवात् NyāySu. (Ja.) 443B. 6 (*on* ii. 3. 14); 411 B. 13 (*on* ii. 2. 10); वस्तुविषयो ह्यस्माकमनेकान्तवादोऽनेकाकारं वस्तु YuktiSneha. 106. 33 (*on* i. 1. 5); **2** theory or doctrine of indetermination, equivocalism or scepticism (of the Jainas) अनेकान्तवादस्य लिङ्गं स्याच्छब्दः VarāṅgaC. 26. 83; PramāMī. 19. 6 (*on* i. 1. 23); दोषास्तेऽपि अनेकान्तवादप्रचण्डमुद्गरजर्जरितत्वान्नोच्छ्वसितुमपि क्षमाः SyādvāMañ. 14 (105); 5 (8); 14 (92); अनेकान्तवादे अनुमानं परिवृत्यते SarvaDaKau. 38. 8.

अनेकान्तवादप्रतिपत्ति (anekāntavāda-pratipatti) *f.* acceptance of the theory or doctrine of indetermination or equivocalism सर्वेषामपि तन्त्रान्तरीयाणां पदे पदेऽनेकान्तवादप्रतिपत्तिरेव यथावस्थितपदार्थप्रतिपादनौपयिकं नान्यत् SyādvāMañ. 19 (73)

अनेकान्तवादप्रवेशक (anekāntavādapraveśaka) *n.* title of a work, pw.

अनेकान्तवादावतार (anekāntavādāvatāra) *m.* appearance of the theory or doctrine of indetermination or equivocalism न हि कोऽपि वादी पदार्थानां कालतो रूपतश्चावस्थावैचित्र्यमनङ्गीकुर्वाणोऽस्ति। यं प्रत्यनेकान्तवादावतारः NyāySu. (Ja.) 413A. 6 (*on* ii. 2. 10)

अनेकान्तवादाश्रय (anekāntavādāśraya) *m.* act of resorting to the theory or doctrine of indetermination or equivocalism अनेकान्तवादाश्रयादेव केवलज्ञानावरणेन आवृतोऽपि अनन्ततमभागावशिष्टोऽनावृत्त एव ज्ञानस्वभावः JñānBiPra. 3. 2.

अनेकान्तवादाश्रयण (anekāntavādāśrayaṇa) *n.* act of resorting to the theory of ascertaining contradictory predication of both reality and unreality पदपदार्थव्यतिरेकविकल्पस्याप्यनेकान्तवादाश्रयणेन परिहारः NyāyRaMā. 73. 19; अन्यानन्यविकल्पश्च सर्वत्रानेकान्तवादाश्रयणेन परिहर्तव्यः NyāyRa. 694. 16 (*on* 5 (17). 22)

अनेकान्तवादिन् (anekānta-vādin) *m.* **1A** advocate of the theory of contradictory predication of both reality and unreality यथाहुरनेकान्तवादिनः BrahmSi. 60. 12; अनुपपत्तिः ... अनेकान्तवादिनां नासज्यते Kāśi. i. 262. 9 (*on*

4. 144); ii. 148. 21 (*on* 5 (3). 123); ii. 181. 14 (*on* 5 (3). 220); NyāyVārPari. 471. 7; निरुद्धेऽनेकान्तवादिनि स्वमतेन सामानाधिकरण्यमुपपादयति VedāntKa. 72. 15 (*on* i. 1. 4); **1B** advocate of the theory of contradictory predication of both singularity and plurality (of Brahman) संप्रत्यनेकान्तवादिनमुत्थापयति Bhām. 350. 16 (*on* ii. 1. 14); **2** advocate of the theory of indetermination or scepticism साक्षादुपयोगोऽनेकान्तवादिनिरासादिनापि नास्ति ŚrutaPra. ii. 345. 30 (*on* ii. 3. 9); अनेकान्तवादिनः तत्तद्वाद्युक्तदोषभाक्त्वस्यापि प्रसङ्गात् ŚivārkaMaDī. ii. 102. 29 (*on* ii. 2. 31)

अनेकान्तवादिमत (anekāntavādi-mata) *n.* theory or doctrine of the Jainas who advocate indetermination or equivocalism यदप्यनवस्थानं दूषणमुपन्यस्तं तदप्यनेकान्तवादिमतानभिज्ञेनैव PramāMī. 28. 16 (*on* i. 1. 32)

अनेकान्तवारण (anekānta-vāraṇa) *n.* avoidance of deviation (of the probans) निरन्तरतरुष्वध्यस्तवनेऽनेकान्तवारणाय प्रत्येकमित्युक्तम् VedāntKa. 251. 5 (*on* ii. 2. 1)

अनेकान्तविद्या (anekānta-vidyā) *f.* many-sided knowledge कश्चिदासन्नसंसारपारावारः ... पारमेश्वरीमनेकान्तविद्यामुपगम्य TattvPradī. (A.) 2. 6 (*on* 1.0)

अनेकान्तविद्विष् (anekānta-vidviṣ) *adj.* (used as noun) (one who is) inimical to the theory or doctrine of indetermination or equivocalism अनलः पावकोऽग्नित्यादित्यनेकान्तविद्विषाम् NyāyVi. 2. 368; मिथ्योत्तरं जातिः यथानेकान्तविद्विषाम् NyāyVi. 2. 371; मिथ्याज्ञानादनिर्मोक्षः तथानेकान्तविद्विषाम् NyāyVi.2.451.

अनेकान्तविधायिहेतु (anekāntavidhāyi-hetu) *m.* cause of regulating many-sidedness श्रीपार्श्वनाथः स जयत्यजस्रं यस्मिन्ननेकान्तविधायिहेतौ। स्वनिग्रहव्यग्रतया स्थितानामेकान्तमन्तर्न सुखं परेषाम् NemiNir 1. 23.

अनेकान्तविशिष्ट (anekānta-viśiṣṭa) *adj.* qualified by indetermination or equivocalism प्रमीयते परिच्छिद्यतेऽर्थोऽनेकान्तविशिष्टोऽनेनेति प्रमाणं स्याद्वादात्मकम् SyādvāMañ. 28 (9)

अनेकान्तविशेषित (anekānta-viśeṣita) *adj.* qualified by indetermination or equivocalism सकला नयभङ्गमार्गनीता यदनेकान्तविशेषितास्त एव। ... विदुषां श्रेयसि हेतवो भवन्ति VarāṅgaC. 24. 61.

अनेकान्तसम (anekānta-sama) *m.* (type of fallacious probans) parity per inconclusiveness तादृशेनैव बाधो बाधसमः ... तादृशेनैवासिद्ध्यापादनमसिद्धिसमः। एवमनेकान्तसमादयोऽपि ग्राह्याः NyāyPari. 237. 8.

अनेकान्तसाधक (anekānta-sādhaka) *adj.* establishing the ascertion of contradictory predication दृष्टस्य नियमस्य निवारकमनेकान्तसाधकं प्रबलप्रमाणं स्यात् NyāySu. (Ja.) 412 A. 7 (*on* ii. 2. 10)

अनेकान्तस्वभाव (anekānta-svabhāva) *adj.* of equivocal or indeterminate nature निश्चितानि ज्ञातानि निर्णीतान्यनेकान्तस्वभावनिजशुद्धात्मादिपदार्थप्रतिपादकानि सूत्रार्थपदानि येन स भवति निश्चितसूत्रार्थपदः TātpaVṛ. 359. 17 (*on* 3.63)

अनेकान्तस्वभावतस् (anekāntasvabhāva-tas) *adv.* on account of being indeterminate or equivocal nature तत्रान्यानन्यवृत्तीनामनेकान्तस्वभावतः। उत्पत्तिस्थितिनाशानां विरोधः प्राङ् निराकृतः ŚlokaVār. 6. 440 (843. 5)

अनेकान्तस्वभावत्व (anekāntasvabhāva-tva) *n.* the state of being of indeterminate or equivocal nature यद्येकान्ततोऽवस्थातद्वतोरभेदः स्यात्, अनेकान्तस्वभावत्वे च अन्यानन्यभूतयोरवस्थातद्वतोर्वर्तमानामुत्पत्तिस्थितिविनाशानां को विरोधः NyāyRa. 843. 21 (*on* 6. 440)

अनेकान्तात्मक (anekāntātma-ka) *adj.* of indeterminate or equivocal nature अनेकान्तात्मकं वस्तु संगिरते JaineVyā. 29. 16 (*on* i. 2. 48); अनेकान्तात्मकं वस्तु गोचरः सर्वसंविदाम् ... मतः Nyāyāva. 29; NyāyVi. 2. 229; परमार्थविनिश्चयोऽनेकान्तात्मकपदार्थसमूहः TātpaVṛ. 119. 18 (*on* 2. 1); चोदनाबलान्निखिलार्थज्ञानोत्पत्त्यन्यथानुपपत्त्या सर्वमनेकान्तात्मकं सत्त्वादिति व्याप्तिज्ञानोत्पत्तेश्च SarvaDaSaṁ. 3. 104 (comm. अनिश्चयात्मकम्)

अनेकान्तात्मकत्व (anekāntātmaka-tva) *n.* the state of having indeterminate or equivocal nature अनेकान्तात्मकत्वं च सप्तभङ्गीप्ररूपणेन सुखोन्नेयं स्यात् SyādvāMañ. 24 (2); समस्तेषु वस्तुष्वनेकान्तात्मकत्वस्य स्याद्वादिनो मते सुप्रसिद्धत्वात् SarvaDaSaṁ. 3. 228.

अनेकान्तात्मन् (anekāntātman) *adj.* of indeterminate or equivocal nature अनेकान्तात्मनो वस्तुनो बुधरूपवेद्यत्वमुक्तम् SyādvāMañ. 24 (1)

अनेकान्ताधीना (anekāntādhīnā) *adj.* (*f.*) dependant on indetermination or equivocalism शब्दानां व्युत्पादनम्। तच्च ... शब्दार्थसंबन्धसिद्धिश्चानेकान्ताधीना JaineVyā. 1. 19 (*on* i. 1. 0)

अनेकान्तानुरोधिनी (anekāntānurodhinī) *adj.* (*f.*) conforming to indetermination or equivocalism गतिः। अशक्तेरणुवत् सेयमनेकान्तानुरोधिनी NyāyVi. 2. 317.

अनेकान्ताभिधान (anekāntābhidhāna) *n.* mention of indetermination or equivocalism स्यात्पदेनानेकान्ताभिधाने किं प्रयोजनम् VedāntKa. 299. 26 (*on* ii. 2. 33)

अनेकान्ताभ्युपगम (anekāntābhyupagama) *m.* acceptance of indetermination or equivocalism सत्यप्यनेकान्ताभ्युपगमेऽभेदोऽस्ति TattvVai.131.16 (*on* 3.13)

अनेकान्तावलम्बन (anekāntāvalambana) *n.* act of resorting to indetermination or equivocalism केचिदेकान्ततस्तेषां मिथ्यात्वं न निवर्तते। तस्मादेवार्हतं युक्तमनेकान्तावलम्बनात् VarāṅgaC. 26. 74.

अनेकान्ताव्यक्तलिङ्ग (anekāntāvyakta-liṅga) *adj.* of uncertain and imperceptible gender अन्यथानुपात्तस्त्रीलिङ्गक्रियादिपदेनानेकान्ताव्यक्तलिङ्गेन शब्दधर्मतया कथंचित् कल्प्यः स्यात् TantrVā. 773. 20 (*on* iii. 2. 8)

अनेकान्ताश्रयण (anekāntāśrayaṇa) *n.* [Abl.] due to the act of resorting to difference or variety गौरिति वक्तव्यमशक्त्या गो इत्युक्तमनुक्रियतेऽनेकान्ताश्रयणात् JaineVyā. 7. 26 (*on* i. 1. 24)

अनेकान्तिकप्रसङ्ग (anekāntika-prasaṅga) *m.* undesired occasion for deviation काचाद्यन्तरितोपलब्ध्या किमप्राप्यप्रकाशकत्वं कल्पयामः ... आद्यः प्रमाणविरुद्धोऽनेकान्तिकप्रसङ्गपराहतः NyāySu. (Ja.) 256 A. 10 (*on* ii. 1. 2)

अनेकान्तिषत्परिषद् (anekāntiṣat-pariṣad) *f.* assembly of many students तत्र ... प्रतिवसति स्म ... मेघचन्द्रनामा दिगम्बरः व्रतिपतिरेकोऽनेकान्तिषत्परिषदन्वासितपदः ViviTīKa. 98. 14.

अनेकान्तोद्भावन (anekāntodbhāvana) *n.* raising (of the fault) of inconclusive (probans) न किंचित् प्राग्जनकं भूत्वा पश्चात् स्थापकतामुपैति यतोऽनेकान्तः स्यादिति। पुनरन्यथा तत्स्वभावस्य जननादित्यनेकान्तोद्भावनं परस्याशङ्क्याह HetuBiṬ. 113. 6.

अनेकान्नलाभासंभव (anekānnalābhāsambhava) *m.* impossibility of obtaining food from more than one (place) भिक्षार्थभ्रमणाशक्तावनेकान्नलाभासंभवे परानुग्रहार्थं च यतेरेकान्नभोजनाभ्यनुज्ञादर्शनात् CaturCin. iii (i). 424. 1.

अनेकान्वयकल्पन (anekānvaya-kalpana) *n.* **1** assumption of semantic relation with more than one meaning or referent एकेनैवान्वयेनोभयोराकाङ्क्षोपरमसंभवे अनेकान्वयकल्पनमयुक्तं गौरवात् NyāyRaMā. 81. 16; **2** assumption of connection among various items विषमं यद्यनौचित्यादनेकान्वयकल्पनम् Candrā. 5. 80.

अनेकान्वयबोधपरत्व (anekānvayabodhapara-tva) *n.* the state of being intended to convey cognition of relation with more than one meaning or referent अनेकान्वयबोधपरत्वे वृत्तिद्वयविरोधस्य दोषत्वे परिभाषापत्तेः यत्र मुख्यार्थे शीघ्रत्वेन तत्र वृत्तिरेव प्रथममन्वयबोधः अनन्तरं लाक्षणिकान्वयबोधः TattvCin. iv (1).339.2.

अनेकान्वयित्व (anekānvayi-tva) *n.* the state of being related to many meanings or referents यद्यपि च विशिष्टविधिस्थले भावनाया अनेकान्वयित्वस्वाभाव्यादनेकेषां विशेषणानामन्वयेऽपि नावृत्तिः MīmāKau. iii (2). 176. 5 (*on* ii. 2. 6)

अनेकापत्याद्यर्थ (anekāpatyādy-artha) *m.* various meanings such as patronymy तद्धितेऽप्यनेकापत्याद्यर्थसंदेहात्तुल्यमेतत् TantrVā. 537. 2 (*on* ii.2.23)

अनेकापद् (anekāpad) *adj.* involving various calamities मूर्ख ...। जगत्यत्रारण्ये प्रतिपदमनेकापदि सदा हरिध्याने व्यग्रं भव सकलतापैककदने VijñāŚ. 14.

अनेकापदेशपूर्वम् (anekāpadeśapūrvam) *adv.* under various pretexts तदङ्गनासु चानेकापदेशपूर्वमपाचरन्नरेन्द्रः DaśKuC. 136. 24.

अनेकापवरक (anekāpavaraka) *m.* many inner apartments or rooms (जीवाः) अविहिताहंकारममकारा अनेकापवरकसंचारितरत्नप्रदीपमिवैकरूपमेवात्मानमुपलभमानाः ... स्वसमया जायन्ते TattvPradī. (A.) 123. 4 (*on* 2. 2); TātpaVṛ. 123. 12 (*on* 2. 2)

अनेकापादानक (anekāpādāna-ka) *adj.* having many ablations अनेकापादानकव्यावृत्तिहेतुत्वात् लक्षणयानेक इत्युच्यते TātpaṬ. (Vā.) 248. 5 (*on* i. 1.23)

अनेकापायसंगता (anekāpāya-saṅgatā) *adj.* (*f.*) associated with various harms or evils वर्जनीया निशाभुक्तिरनेकापायसंगता PadmP. (Ra.) 14. 308.

अनेकापूर्वकल्पन (anekāpūrva-kalpana) *n.* assumption of various transcendental or unseen merits किमेकैव भावना नानाधात्वर्थानुरक्ता विधीयते उत प्रतिधात्वर्थं भावनाभेद इति। तत्र भिन्नासु भावनासु स्यादनेकापूर्वकल्पनम् ŚāstrDī. 121. 11 (*on* ii. 2. 1)

अनेकापूर्वकल्पना (anekāpūrva-kalpanā) *f.* **i** assumption of more than

one transcendental or unseen merit अनेकापूर्वकल्पनाप्रसङ्गात् एकापूर्वावान्तरव्यापारमेकं कर्मेति प्राप्तम् Bhām. 585.3 (*on* iii. 3. 1); **ii** assumption of various transcendental or unseen merits यदि प्रतिधात्वर्थं भावनाभेदः स्यात् ततः सा भाव्यरूपापूर्वभेदाद्दते न भिद्यत इत्यनेकापूर्वकल्पना स्यात् ŚāstrDī. 121.13 (*on* ii. 2. 1); MīmāKau. iii (2). 61. 5 (*on* ii. 1. 6); MayūMāli. 121. 19 (*on* ii. 2. 1)

अनेकापेक्ष (anekāpekṣa) *adj.* **A** expectant of conveying more than one (meaning) अपि च भागस्यैकत्वाद्यत्किंचिदित्यनेकापेक्षः शब्दो नावकल्पते ŚāstrDī. 586. 13 (*on* ix. 1.6); अनेकापेक्षस्य सर्वशब्दस्य द्वयोरसंभवात् षाडहिकविधिरेवायमिति सप्तमे व्यवस्थापितम् MayūMāli. 744. 20 (*on* x. 6. 4); **B** expectant of conveying many (meanings) यदेवेत्यनेकापेक्षं तु वचनमुपांशुयाजस्याग्नीषोमदेवताकत्वात् तदभिप्रायेण न विरुध्यते BhāṭṭDī. ii. 210. 4 (*on* v.4.4)

अनेकापोहप्रसङ्ग (anekāpoha-prasaṅga) *m.* undesired occasion for many exclusions प्रत्येकरूपेणापोह्यमानेष्वश्वादिष्वनन्तत्वादपोह्यव्यावृत्तीनामनेकापोहप्रसङ्गः Śarka. 42. 23.

अनेकाप्सरस् (anekāpsaras) *f.* many nymphs दृष्टा ततः पूरयतीयमेकानेकाप्सरःप्रेक्षणकौतुकानि NaiṣC. 7. 92.

अनेकाब्द (anekābda) *m.* many years अनेकाब्देषूपजीवनार्थं सकृदेव दाने तु नायमवधिनियमो नापि स्थावरपर्युदासः SmṛtiCan. iv. 653. 8; द्विसहस्रपणो दायः स्त्रियै देयः ... इयं संख्या प्रत्यब्दे देये। सकृदेवानेकाब्दपर्याप्तधनदाने तु नेयं संख्या BālamBha. ii. 252. 25 (*on* 2. 143)

अनेकाब्दम् (anekābdam) *adv.* for many years अनेकाब्दं तथा चाप्सु दिव्यमण्डं व्यवस्थितम्। ततो वर्षसहस्रान्ते द्विधा कृतम् LiṅgaP. i. 17. 66; ŚivaP. ii (1). 8. 22 (46B. 8)

अनेकाब्दशत (anekābdaśata) *adj.* having, i. e. continuing for many hundreds of years कथं पुनरेकस्यानेकाब्दशतो भोगः पुरुषस्य ManuBh. ii. 138. 23 (*on* 8. 148)

अनेकाभ (anekābha) *adj.* having more than one splendour शंयुः ... दीप्तो ज्वालैरनेकाभैरग्निरेकोऽथ वीर्यवान् MahāBhā. iii. 209. 3.

अनेकाभयदान (anekābhayadāna) *n.* act of giving of the (assurance of) protection to many (दिवाकरमित्रः) उत्क्षिप्य चानेकाभयदानदीक्षादक्षिणो दक्षिणं महापुरुषलक्षणलेखाप्रशस्तं हस्तम् ... राजानमन्वग्रहीत् HarṣaC. 318. 15.

अनेकाभरण (anekābharaṇa) *n.* various ornaments कविजनवारः ... कनककटकमकुटकेयूरमौक्तिकहारहीरकर्णिकाङ्गुलीयककलधौतकटिसूत्राद्यनेकाभरणैः ... भूषितः ĀnandRa. 2. 16 (3)

अनेकाभरणभूषित (anekābharaṇa-bhūṣita) *adj.* adorned with various ornaments अनेकाद्भुतदातारमनेकाभरणभूषितम्। ... अनेकमन्त्रकोटीभिस्संस्मरेत्सेवितं सदा JayāS. 21. 230.

अनेकाभरणान्वित (anekābharaṇānvita) *adj.* possessing various ornaments अनेकाभरणान्वितम्। ... दृष्ट्वैवं देवदेवस्य रूपं भानोर्महात्मनः। ... तुष्टुवुस्ते दिवाकरम् BhaviP. 227 B. 8 (i. 153. 46)

अनेकाभावधर्मवत् (anekābhāvadharma-va(n)t) *adj.* possessing many negative properties अनन्तभेदभिन्नस्यानेकाभावधर्मवतो दृश्यप्रपञ्चस्य दृशोऽभेदाद् दृशोऽपि तथात्वप्रसङ्गात् त्रिविधमप्यानन्त्यं हीयेत IṣṭaSi. 11. 1.

अनेकाभावप्राप्ति (anekābhāva-prāpti) *f.* occurrence of more than one absence निषेधप्रतियोगी विधिविषयः भावरूपोऽभावरूपो वा ...। तेनानृतवदनगर्दभाभिधानीप्रयाजादीनां नासंग्रहः। न वानेकाभावप्राप्तावेकाभावपरिसंख्यायाः MīmāKau. iii (1). 85. 19 (*on* i. 2. 44)

अनेकाभाससंमिश्रीकार (anekābhāsa-sammiśrīkāra) *m.* act of mixing up of various appearances or manifestations न तु अनेकाभाससंमिश्रीकारे बाह्येन्द्रियजस्याविकल्पकस्य व्यापारः PratyabhiVi. ii. 41. 4 (*on* ii. 2. 3)

अनेकाभिधान (anekābhidhāna) *n.* stating of many (arguments) जल्पादौ यावत्प्रतिभासमनेकाभिधाननियमे तु भूषणमपि। यावत्संभवमनेकाभिधानं चासर्वज्ञेनाशक्यमिति प्रायशो न तथा नियमः संभवति NyāyPari. 201. 12.

अनेकाभिधानशक्ति (anekābhidhānaśakti) *f.* **i** many expressive powers दण्डो हि दण्डिनो विशेषणं न संबन्धः। स च प्रकृत्या प्रथममभिहित एव। अत एव नानेकाभिधानशक्तिकल्पनादोषः Kāśi. iii. 29. 25 (*on* 5 (4). 32); **ii** more than one expressive power एकस्मिंश्च वाच्ये संभवत्यनेकाभिधानशक्तिकल्पनाया अयुक्तत्वात् NyāyMa. 227. 10; 240. 6.

अनेकाभिन्न (anekābhinna) *adj.* not different from more than one किं च विमतं ज्ञानं नानेकनीलाद्यात्मकम्, एकत्वात्, यदेकं तन्नानेकाभिन्नम्, यथैकं पीतज्ञानम्, एकत्वं चैकरूपावभासनादित्याह PrakaVi. 538. 22.

अनेकाभिप्राय (anekābhiprāya) *adj.* **i** intended to convey more than one (meaning) एतेषामेव स्वमतत्वे जैमिन्यादिग्रहणवैयर्थ्यम्। विरुद्धानां च नैकमतत्वम्। एकस्यैव वेदस्यानेकाभिप्रायतायोगात् TattvPrakā. 74B. 13 (*on* i. 4. 23); **ii** intended to convey many (nouns) अथ वा 'नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्याम्'-मिति स्मरणान्नपुंसकानपुंसकानेकाभिप्रायमपि युक्तमेव तदिति नपुंसकैकवचनम् ŚivārkaMaDī. i. 440. 23 (*on* i. 3. 16)

अनेकाभिमन्यमान (anekābhimanyamāna) *adj.* (used as noun) many (objects) which are governed or presided over परिच्छिन्नानामभिमानिनीनां (देवतानाम्) कथमनेकाभिमन्यमानाधिष्ठातृत्वमपीत्यस्यानुगतिः TattvPrakā. 83A. 10 (*on* ii. 1. 7)

अनेकाभोगगामिनी (anekābhoga-gāminī) *adj.* (*f.*) going through many curves or extensions पुण्योदा नदी ह्याकाशगामिनी ... वायुना प्रेर्यमाणा च अनेकाभोगगामिनी परिवर्तत्यहरहः VāyuP. i. 42. 7.

अनेकाभोगवक्राङ्गी (anekābhoga-vakrāṅgī) *adj.* (*f.*) having curved body with many extensions पवनेनेरितोदका। अनेकाभोगवक्राङ्गी क्षिप्यमाणा नभस्तले। ... विकीर्यमाणा मालेव निपपात महानदी VāyuP. i. 42. 59.

अनेकाभ्युपगमवत् (anekābhyupagama-vat) *adv.* like the admitting of more than one (view) तस्मान्नासंहतोऽस्तीति विरोधान्न किंचिदेतत्। एकप्रतिषेधादनेकाभ्युपगमवदिति NyāyVār. 234. 14 (*on* ii. 1. 31)

अनेकामयबद्ध (anekāmaya-baddha) *adj.* bound by, i. e. afflicted with various diseases अपि कल्पायुषां तेषां देवानां तु विपर्ययः। अनेकामयबद्धानां का कथा नरदेहिनाम् SkandP. iii (3). 10. 54.

अनेकामरविकिर (anekāmara-vikira) *m.* birds in the form of many gods अनेकामरविकिरत्रु(?कु)लकीर्णकिशलयाशोकानोकहोल्लसत्प्रसवपरागपुनरुक्तसकलदिक्पालहृदयरागप्रसरम् ... जिनम् ... स्नपयामि YaśasCam. ii. 384. 20.

अनेकामरवेश्मराजि (anekāmaraveśma-rāji) *f.* row of abodes, i. e. temples of many gods (अस्ति क्षितावुज्जयिनीति नाम्ना पुरी) यस्यामनेकामरवेश्मराजिर्मणिध्वजाग्रोच्छलितैर्मयूखैः। लिखत्यमर्त्यप्रमदाकुचेषु विचित्रवर्णा इव पत्रलेखाः NavaSāC. 1. 49.

अनेकामात्यसामन्त (anekāmātyasāmanta) *m.* many ministers and feudatories महाबलोऽपि ... अनेकामात्यसामन्तैः ...। परिष्कृतां निजास्थानीं सोऽधितस्थौ TriṣaŚaPuC. i. 1. 285.

अनेकामेध्यदर्शन (anekāmedhya-darśana) *n.* sight of more than one polluted or impure thing युगपदनेकामेध्यदर्शनरूपनिमित्तसमवाये ... सकृन्नैमित्तिकानुष्ठानमिति चैकदेशे स्थितम् CaturCin. iii (1). 339. 9; iii (2). 596. 9; MayūMāli. 841. 4 (*on* xi. 4. 17); 'अबद्धं मनो दरिद्रं चक्षुः' इत्यमेध्यदर्शने प्रतिमन्त्रणमन्त्रोऽपि युगपदनेकामेध्यदर्शने न भिद्यते BhāṭṭDī. iv. 212. 17 (*on* xi. 4. 17)

अनेकायनशत (anekāyanaśata) *n.* many hundreds (of people) running away (for life) भग्नानामनेकायनशतानां पृष्ठं ग्राह्यम् ManuBh. ii. 56. 22 (*on* 7. 190)

अनेकायाससमन्वित (anekāyāsa-samanvita) *adj.* involving, i.e. produced by many efforts or exertions केवलाच्चेत् ज्ञानात् पुरुषार्थसिद्धिः स्यात्, किमर्थम् अनेकायाससमन्वितानि कर्माणि ते कुर्युः BrahmSūBh. (Śaṅ.) 720. 2 (*on* iii.4.3)

अनेकायुगपत्कालप्रत्यय (anekāyugapatkālapratyaya) *m.* many non-simultaneous perceptions यद् वस्तु प्राक् सिद्धं पुनर्निमित्तान्तरसंनिधाने सति उपलभ्यते यत् तस्यानेकायुगपत्कालप्रत्ययविषयत्वं सा स्थितिः NyāyVār. 196.19 (*on* ii. 1. 16)

अनेकायुध (anekāyudha) *n.* various weapons विष्णोर्भुजचतुष्टयगतैरनेकायुधैर्विधीयमानं कार्यं तदंशस्य भवतः खड्गेनैव संपाद्यते AlaṅkāMañ. 109.13.

अनेकायुधगण (anekāyudha-gaṇa) *m.* group of various weapons नारायणयन्त्रं प्रज्वलति। तस्योपरि च ... तुरीयस्वरूपम् ... सुदर्शनपाञ्चजन्यपद्मगदासिशार्ङ्गमुसलपरिघाद्यैश्चिन्मयैरनेकायुधगणैः मूर्तिमद्भिः सुसेवितम् TripāMaNāU. 380. 16 (7)

अनेकायुधधारिन् (anekāyudha-dhārin) *adj.* wielding various weapons (रक्षसाम्) युधि हिंसाविहाराणामनेकायुधधारिणाम् Rāmā. iii. 382*(2); अनेकायुधधारिणम् ...। अनेकमन्त्रकोटीभिः संस्मरेत्सेवितं सदा JayāS. 21.231.

अनेकायुधभीषण (anekāyudha-bhīṣaṇa) *adj.* formidable due to various weapons अनेकायुधभीषणैः। भुजैः ... शस्त्राणि मुञ्चन्तम् ... रूपं पाशुपतास्त्रस्य प्रोक्तमेतत्समासतः ĪśānŚiPa. ii. 12. 92.

अनेकायुधमण्डित (anekāyudha-maṇḍita) *adj.* adorned with various weapons विष्णुनाम्ना पुनर्देवस्त्वनेकायुधमण्डितः। ... उज्जयिन्यां वै स्थितः

PauṣkS. 36. 363; ध्यायेद्वा विश्वरूपिणम्। ... अनेकायुधमण्डितम् TriBrU.153.

अनेकायुधसंकीर्ण (anekāyudha-saṅkīrṇa) *adj.* loaded with various weapons अनेकायुधसंकीर्णाः ... स्यन्दना नृपैः ... कार्या रणे Mānaso. ii. 6. 679.

अनेकायुधसंपूर्ण (anekāyudha-sampūrṇa) *adj.* complete, i. e. equipped with various weapons हरिः समालोक्य रथम् ... अनेकायुधसंपूर्णम् ... आरुरोह SkandP. v(1). 27. 31.

अनेकायुधहस्त (anekāyudha-hasta) *adj.* who has various weapons in his hands नमः ... अनेकायुधहस्ताय (गणेशाय) GaṇeP. ii. 37. 7: सा तदैवाभवद्दुष्टा बालं वीक्ष्य ... अनेकायुधहस्तम् GaṇeP. ii. 81. 18.

अनेकारभ्यत्व (anekārabhya-tva) *n.* the state of being that which is to be commenced, i.e. produced by many (causes) कार्यद्रव्येषु अनेकारभ्यत्वनियमस्य दध्यादिष्विव महाकार्येष्वनेककर्तृकत्वनियमस्य क्वचिदपि भङ्गादर्शनेन सर्वाभ्युपगतत्वात् ŚivārkaMaDī. ii. 74. 31 (*on* ii. 2. 12)

अनेकारम्भकत्व (anekārambhaka-tva) *n.* the state of having many (material) causes द्रव्यारम्भ एवानेकारम्भकत्वनियम इति चेत्, न, परिणामाभ्युपगमात् BrahmSūBh. (Śaṅ.) 433. 12 (*on* ii. 3. 7)

अनेकारावबहल (anekārāva-bahala) *adj.* full of various sounds or cries (of birds) अनेकारावबहलं विहंगकोलाहलमशृणवम् UdaySuKa. 30. 24.

अनेकारोप्यानुगत (anekāropyānugata) *adj.* common to a number of superimposed objects न चानेकारोप्यानुगतमधिष्ठानम् एकैकस्यारोपितस्यासाधारणम् Nyāyāmṛ. 283 B. 6.

अनेकारोहमण्डित (anekāroha-maṇḍita) *adj.* adorned with various ascents, i. e. branches मध्ये तस्याश्च पद्मिन्याः ...। न्यग्रोधो विपुलस्कन्धो ह्यनेकारोहमण्डितः VāyuP. i. 38. 55.

अनेकार्गलोपेत (anekārgalopeta) *adj.* equipped with various checks or alleys नगरम् ...। नृपमन्दिरसंयुक्तं युक्त्यानेकार्गलोपेतम्। ... विजयं नाम्ना वरैः प्रोक्तम् MayaMa. 10. 69.

अनेकार्जितपातक (anekārjita-pātaka) *n.* sins accumulated through many (births) प्रयान्त्यनेकार्जितपातकानि व्रतस्य संदर्शयतोऽपि मुक्तिम् SkandP. ii (4). 29. 29.

अनेकार्णवौपम्य (anekārṇavaupamya) *adj.* similar or equal to many *sāgara* periods ते नारकाः पापबन्धेन दुष्कर्माणः ...। अनेकार्णवौपम्यबन्धस्थितिं प्राप्नुवन्ति PadmP. (Ra.) 78. 62 (27)

अनेकार्ति (anekārti) *f.* [Inst.] due to various afflictions अतश्चानेकान्ता- (v.l. °नेकार्त्या) गुरुलघुतयार्थेषु धनिनामवस्था वस्तूनि प्रथयति च संकोचयति च ŚatTrayī. 12.

अनेकार्थ (anekārtha) *adj.* [*f.* - ā] **1A** (word) which has more than one meaning or referent **B** (word) which has many meanings or referents (used as noun) (that) which serves many meanings, polysemous (word) **2A** serving various aims or goals or objectives (used as noun) (that) which serves many objectives or purposes **B** referring to various things or significants **3** composed of many ingredients **4** having more than one object **5** covering many topics **1A** (word) which has more than one meaning or referent यान्यनेकार्थान्येकशब्दानि तान्यतोऽनुक्रमिष्यामः Nir. 4. 1 (75. 2); न चैकः शब्दोऽनेकार्थो युक्तः ŚābaBh. 2220. 5 (*on* xii. 1. 4); 1566. 25 (*on* vii. 3. 35); एकमाहुरनेकार्थं शब्दमन्ये परीक्षकाः VākyaP. 2. 252; सर्वत्रैव तावदनेकार्थानेकशब्दयोरन्याय्यत्वात् TantrVā. 528. 7 (*on* ii. 2. 21 (? 22)); 145. 20 (*on* i. 3. 8); यस्य पदस्यानेकार्थस्यैकोऽर्थोऽसभ्यः स्यात् तदसभ्यार्थान्तरम् KāvyālaṅSū. ii. 1. 14 (1); Kāśi. iii. 181. 20 (*on* 5(7). 69); अनेकार्थस्य युग्मस्य सादृश्ये स्तबकोपमा Candrā. 5.16; न च एकः शब्दः अनेकार्थः, न्यायविरोधात् TarkSaṁ. (Ā.) 86. 24; SāhiDa. 58. 7; LaŚabdeŚe. i. 183. 5; **1B** (word) which has many meanings or referents शब्दरूपं पदार्थश्च व्युत्पत्तिः प्रकृतिर्गुणः। सर्वमेतदनेकार्थम् BṛDe. 2. 108; अनेकार्थे युष्मदस्मदी MahāBh. iii. 307. 12 (*on* viii. 2. 98); अनेकार्था अपि धातवो भवन्ति MahāBh. iii. 408. 22 (*on* viii. 2. 48); CāndraVṛ. *on* i. 1. 75; ManuBh. i. 203. 29 (*on* 3.2); ii. 351. 24 (*on* 10. 74); श्लिष्टमिष्टमनेकार्थमेकरूपान्वितं वचः Kāvyāda. 2. 310; KāvyālaṅSū. iv. 1. 1; शब्दानामत्र सदानेकार्थानाम् ...। निश्चीयते हि सोऽर्थः Kāvyālaṅ. (Ru.) 6.9; स्वशब्दश्चायमनेकार्थः Nyās. i. 80. 6 (*on* i. 1. 35); ii. 795. 6 (*on* vii. 3. 43); ये ह्यनेकार्था अक्षादिशब्दाः ते कृतैकशेषाः ... बहूनर्थानभिदधति NyāyRa. 629. 6 (*on* 5 (14). 64); 218. 20 (*on* 5 (2). 6); अनेकार्थस्य शब्दस्य वाचकत्वे नियन्त्रिते। संयोगाद्यैरवाच्यार्थधीकृद् व्यापृतिरञ्जनम् KāvyPra. 63. 4; Kāvyānu. (He.) 46. 14; GaṇRa. 1. 17 (43); TattvPradī. (Ci.) 232. 6; BhāvPra. (Śā.) 169. 9 (6); RasGaṅ. 137. 2; मासशब्दः ... अनेकार्थगवादिशब्दवद् वाचकः Catur Cin. iii (2). 11. 8; PadMañ. *on* KāśiVṛ. *on* P. iii. 1. 22 (379. 15); अनेकार्थस्य शब्दस्यार्थान्तरमपि यत्र क्वचन प्रतीतिगोचरीभवति तत्र व्यञ्जनाव्यापार एव Ekāva. 2. 3 (28) (60. 3); 3. 1 (298) (112. 2); NyāyPari. 479. 16; अनेकार्थोऽपि गोशब्दः NyāySu. (Ja.) 92B. 11 (*on* i. 1.1); 115A. 8 (*on* i. 1. 5); 184B. 12 (*on* i. 4. 2); DhātuPra. 1. 812 (57.8); VidhiRa. 6 (32. 11); ŚivārkaMaDī. i. 22. 9 (*on* i. 1.1); BālamBha. ii. 120. 13 (*on* 2. 112); (used as noun) (that) which has many meanings, polysemous (word) ईडे। क्षयति। तपति। अनेकार्थाः AVPari. 48. 116; रूढो द्विविधः पर्यायोऽनेकार्थश्च VedāntRaMañ. 1. 4 (62. 3); **2A** serving various aims or goals or objectives अनेकान्तं (v. l. अनेकार्थम्) बहुद्वारं धर्ममाहुः ...। किं निश्चितं भवेत्तत्र MahāBhā. xiii. 23. 18; अर्थाभिधानयुक्तः प्रवेशकः स्यादनेकार्थः NāṭyaŚā. 18. 35; BhāvPra. (Śā.) 216. 12 (7); अनेकार्थं वाक्यमभ्युपगन्तव्यं भवति ŚābaBh. 889. 10 (*on* iii. 3. 46); पण्यस्त्रीणामनेकार्था ... कुट्टनी Deśopa. 4. 14; सार्धमङ्गैरनेकार्थैः कथ्यन्ते वृत्तयोऽधुना SāhiSā. 2. 1; 1. 68; (used as noun) (that) which serves many objectives or purposes यदवधारणेनोच्यते स एकान्तः। ... क्वचित्तथा क्वचिदन्यथेति ... सोऽनेकान्तः (v.l. अनेकार्थः Calcutta Ed.) SuśruS. vi. 65. 24; **2B** referring to various things or significants तं शयानं नरव्याघ्रं निद्रा नाभ्यागमत्तदा। चिन्तयानमनेकार्थं रामगीतम् Rāmā. vii. 72.1 (comm. अनेकविधत्वेन प्रतिभासमाना अर्था यस्मिन्); **3** composed of many ingredients अनेकार्थं च तत्रार्घ्यं कल्प्यम् LakṣmīT. 37. 29; **4** having more than one object इतोऽपि चित्तमेकमनेकार्थमवस्थितं च TattvVai. 37. 23 (*on* 1. 32); **5** covering many topics देयमुत्तरमीदृशम्। पूर्वपक्षार्थसंबद्धम् ...। अनेकार्थं निष्कृष्टार्थजातम् SmṛtiCan. iii. 97. 4; VīraMi. (Vyavahāra.) 55. 17.

अनेकार्थ (anekārtha) *m.* **1A** more than one meaning or referent **B** many meanings or referents **2A** many objects or things **B** various aims or goals **3** kind of Kośa **4** many (fruitful) functions **5** more than one idea **6** many details **1A** more than one meaning or referent येन वाक्येन समानश्रुत्यानेकार्थो गम्यते तत्रातिप्रसक्तावतिप्रसङ्गनिराकरणार्थमवधारणम् NyāyVār. 113. 16 (*on* i. 1. 33); NyāyMañ. i. 299. 7; एकस्यानेकार्थो दृष्टा हरिसैन्धवादिषु पदेषु VarivaRaha. 153; 156; अनेकार्थानामेकार्थभावासादनमेकार्थीभावः Bhāsk. i. 155. 16 (*on* i. 4. 1); **1B** many meanings or referents अनेकार्थः सह प्रयुज्यमानस्य प्रकृष्टशब्दस्य न तत्तदभिन्नार्थत्वम् IṣṭaSi. 26. 2; सिद्धे कर्मभेदेऽनेकार्थस्यान्याय्यत्वादेकत्राग्निहोत्रशब्दो मुख्योऽपरत्र गौणः VedāntKa. 8. 17 (*on* i. 1. 0); BhāvPra. (Śā.) 169. 15 (6); **2A** many objects or things यदि हि किंचिदिन्द्रियमनेकार्थग्राह्यव्यवस्थितविषयं स्यादिति कस्ततोऽन्यं चेतनमनुमातुं शक्नुयात् NyāyVār. 352. 15 (*on* iii. 1. 3); **2B** various aims or goals अनेकार्था व्याख्याता वृद्धवादिना PrabhāC. 57. 32; **3** kind of Kośa (listing polysemous words) एकार्थानेकार्था देश्या निर्घण्ट इति च चत्वारः। विहिताश्च नामकोशाः PrabhāC. 211. 14; **4** many (fruitful) functions अनेकार्थकारित्वादेको नेक इवोच्यते। अतत्कार्यपरावृत्तिबाहुल्यपरिकल्पितः TattvSaṁ. 1039; **5** many ideas अनेकार्थगर्भितं च मन्मथलेखं प्रस्थापयति NāṭaLaRaK. 2440; **6** many details, cf. **अनेकार्थसंग्राहक** [Kośas give *anekārtha* as the meaning of *nānā*, AnekāSaṁ. 7. 32; ŚabdaRaSaK. 187. 20] [multiplicity of objects, topics etc. APTE]

अनेकार्थक (anekārtha-ka) *adj.* which has many referents or meanings अनेकार्थकस्योद्गातृशब्दस्य बहुवचनानुरोधेन ... त्रितयपरत्वम् BhāṭṭDī. ii. 7. 17 (*on* iii. 5. 6); (used as noun) (that) which has many referents or meanings, i. e. polysemous (words) पूरणार्थास्त्वनर्थकाः। कमीमिद्विति विज्ञेया ये त्वनेकार्थकाश्च ते BṛDe. 2. 91.

अनेकार्थकथन (anekārtha-kathana) *n.* mention or expression of many meanings श्लेषोऽनेकार्थकथनं पदेनैकेन कथ्यते SaraKaṇṭhā. 543. 22.

अनेकार्थकथनद्वार् (anekārthakathana-dvār) *f.* [Inst.] through the expression of many meanings वाक्यस्यानेकार्थकथनद्वारार्थानुमापकत्वात् ततोऽपि दौर्बल्यम् TattvPrakā. 52A. 12 (*on* i. 3. 24)

अनेकार्थकल्पना (anekārtha-kalpanā) *f.* **i** assumption of more than one meaning एकानेकार्थकल्पनयोर्विशेषश्चेद् गुरुलाघवं प्रति न गम्येत ततोऽनेकोऽपि कल्पेत TantrVā. 444. 7 (*on* ii. 2. 1); **ii** assumption of many meanings न चानेकशब्दस्य अनेकार्थकल्पनादोषः TantrVā. 950. 16 (*on* iii. 4. 13); 'गुरु'शब्दस्यान्यत्रापि प्रयोगो दृश्यते। ... न चानेकार्थकल्पनादोषः 'गुरु'शब्दस्य प्रवृत्तिनिमित्तभूतायाः पूजार्हतायाः सर्वत्रानुस्यूतेः Mitā. 442. 8 (*on* 3. 259); 322. 10 (*on* 3. 1)

अनेकार्थकल्पनायोग (anekārthakalpanāyoga) *m.* untenability of as-

sumption of many meanings शब्दस्तत्रैव मुख्यवृत्तः। ... अनेकार्थकल्पनायोगात् भगवच्छब्दवत् BrahmSūBh. (Rā.) 2. 12 (*on* i. 1. 0)

अनेकार्थकार्य (anekārtha-kārya) *n.* operation or act of conveying many referents or meanings (उच्येत तर्हि न तु गम्येत। यो हि गामश्व इति ब्रूयादश्वं वा गौरिति, न जातुचित् संप्रत्ययः स्यात्) उच्येतेति। वचनादनेकार्थकार्याणि प्रवर्तन्ताम् Pradī. ii. 88B. 26 (*on* i. 2. 64)

अनेकार्थकृत् (anekārtha-kṛt) *adj.* **1** which conveys more than one meaning एकोऽनेकार्थकृद् यत्र स्वभावेनेव दीपवत्। समयस्मृत्यनाकाङ्क्षस्तन्त्रस्य विषयो हि सः VyaktiVi. 89. 12; **2** which serves many purposes, VyaktiVi. 89.12.

अनेकार्थकैरवकौमुदी (anekārthakairavakaumudī) *f.* name of a work, pw.; *nt.*

अनेकार्थकोश (anekārthakośa) *m.* title of a lexicon (by Maṅkha), pw.

अनेकार्थकोष (anekārthakoṣa) *m.* title of a work on words, PW.

अनेकार्थक्रियाकारिन् (anekārthakriyā-kārin) *adj.* performing many fruitful functions, i.e. efficacious मा भूदनेकार्थक्रियाकारिणोऽपर्यायेण रूपभेदः TātpaṬ. (Vā.) 559. 17 (*on* iii. 2. 14)

अनेकार्थक्रोडीकार (anekārtha-kroḍīkāra) *m.* embracing, i.e. inclusion of many meanings उदाहरणगतेषु अब्जकीलालवाहिनीपत्यादिशब्देषु परस्परविलक्षणं पदभङ्गमनपेक्ष्यानेकार्थक्रोडीकारादभङ्गश्लेषः Kuval. 65 (48)

अनेकार्थगर्भ (anekārtha-garbha) *adj.* impregnated with, i.e. containing many meanings न्यायमालाया आदौ स्वकीयग्रन्थत्वद्योतनाय स्वमुद्रारूपमनेकार्थगर्भं देवतानमस्कारप्रतिपादकं श्लोकं पठति NyāyMāVi. 1. 23 (*on* i. 1. 0)

अनेकार्थगुणविधान (anekārthaguṇa-vidhāna) *n.* injunction of subsidiaries having various purposes न च प्राप्ते कर्मणि अनेकार्थगुणविधानं संभवति TantrVā. 540. 6 (*on* ii. 2. 23)

अनेकार्थग्रहण (anekārtha-grahaṇa) *n.* **1** acceptance of many things न चानेकार्थग्रहणेऽपि दोषः सुवर्णगत एवं परिमाणे दर्शनात् BālaKrī. ii. 121. 16 (*on* 3. 258); **2** grasping of many referents or meanings, BālaKrī. ii. 121. 16 (*on* 3. 258)

अनेकार्थज्ञानप्रतिसंधातृ (anekārthajñāna-pratisandhātṛ) *adj.* who recollects the knowledge of many objects तदनेकज्ञानसाध्येत्यसत्येकस्मिन्ननेकार्थज्ञानप्रतिसंधातरि नोपपद्यते Bhām. 447. 22 (*on* ii. 2. 28); VedāntKa. 292. 19 (*on* ii. 2. 28)

अन्तःकरणवारण (antaḥkaraṇa-vāraṇa) *m.* elephant in the form of the heart राजा ... श्रुत्वा द्विजवधूं तस्थौ प्रागेवाङ्कुरितस्मरः। तस्य धावन्तमुन्मत्तमन्तःकरणवारणम्। बलान्नियमितुं नासीदपवादभयाङ्कुशः RājTa. (Ka.) 1.251; हे सुन्दर्यः तर्हि नापराधो ममान्तःकरणवारणस्य युष्मदालोकनजनितमदेन धैर्यशृङ्खलामुच्छिन्दतः RasSa. 194 (2)

अन्तःकरणवासिन् (antaḥkaraṇa-vāsin) *adj.* dwelling in the heart अन्तःकरणवासिवैवस्वतानुजादेहलावण्येनेव लिप्ताभिः ... निम्नगाभिसारिकाभिर्गाढमुपगूढम् ... अम्भोनिधिमपश्यम् TilaMañ. 120. 18.

अन्तःकरणविकार (antaḥkaraṇa-vikāra) *m.* **Ai** feeling of the heart अन्तःकरणविकारं गुरुपरिजनसंकटेऽपि कुलटानाम्। जानन्ति तदभियुक्ता भ्रूभङ्गापाङ्गमधुरदृष्टेन KuṭṭaMa. 507 (comm. हृदयस्य विकारं विविधां विरुद्धां वा कृतिं विकृतिं भावम् इति यावत्); **Aii** mental attitude 'भावदूषितं' कार्पण्यकुत्साकुत्सितसारूप्यारोपादिभिरन्तःकरणविकारैर्दूषितम् CaturCin. iii (1). 608. 6; **B** modification or product of the internal organ, i. e. the mind सर्वं ह्यन्तःकरणविकारमेव जगत् मनस्येव सुषुप्ते प्रलयदर्शनात् MuṇḍUBh. 328. 9 (*on* ii. 1. 4)

अन्तःकरणविकारत्व (antaḥkaraṇavikāra-tva) *n.* the state of being modification or product of the internal organ, i. e. the mind सुखदुःखादिष्वनैकान्ति-

कमिति चेन्न। तेषामन्तःकरणविकारत्वाभ्युपगमात् NyāySu. (Ja.) 198B. 8 (*on* i. 4. 6)

अन्तःकरणविकारभेद (antaḥkaraṇavikāra-bheda) *m.* type of modification or product of the internal organ, i. e. the mind इन्द्रियार्थसंनिकर्षादन्तःकरणविकारभेद उत्पन्नमात्र एव प्रमातुरर्थश्चोपलम्भश्च प्रत्यक्षौ भवतः Bhām. 448. 21 (*on* ii.2.28)

अन्तःकरणविक्रिया (antaḥkaraṇa-vikriyā) *f.* **A** modification of the internal organ, i.e. the mind आनन्दबोधयोर्लिङ्गमन्तःकरणविक्रियाः ŚivaP. vii. 15. 17 (562A. 6); **B** agitation of the mind भगवानन्तःकरणविक्रियां तपोबलेन संयम्य तत्कारणाय विष्वग्विलोचनानि व्यापारितवान् PārvPa. 3. 9 (2)

अन्तःकरणविक्षेप (antaḥkaraṇa-vikṣepa) *m.* **A** agitation of the mind क्रोधो नाम ... अन्तःकरणविक्षेपः SanatBh. 248. 11 (*on* 2. 16);**B** distraction of or disturbance in the mind कल्पनायाः कारणमन्तःकरणविक्षेपः RasMañ. 128 (2)

अन्तःकरणविद्यावृत्ति (antaḥkaraṇa-vidyāvṛtti) *f.* cognitive function of the internal organ, i.e. the intellect अन्तःकरणविद्यावृत्तेरपि ज्ञानशब्दाभिधेयत्वात् ŚaṅkaVi. (Ā.) 85. 16.

अन्तःकरणविधुर (antaḥkaraṇa-vidhura) *adj.* devoid of, i.e. free from (modification of) the internal organ मुक्तानामिति। अन्तःकरणविधुराणामपीति NyāySu. (Ja.) 573B. 8 (*on* iii. 4. 4)

अन्तःकरणविमर्श (antaḥkaraṇa-vimarśa) *m.* consideration or thought in the mind निश्चलज्ञानवतोऽपि ममान्तःकरणविमर्शस्य विश्वकारणं भगवती, तत्र भगवतो निमित्तकारणत्वमात्रमेव दृश्यते ŚaṅkaVi. (Ā.) 270. 5.

अन्तःकरणविलय (antaḥkaraṇa-vilaya) *m.* dissolution, i. e. merging of the internal organ अस्ति तावत्संसारे प्रचुरोऽयमन्तःकरणवृत्तिरूपः कामः ... न चैक एवायम्। मुक्तावन्तःकरणविलयात् NyāySu. (Ja.) 325A. 4 (*on* ii. 2.1)

अन्तःकरणविशिष्ट (antaḥkaraṇa-viśiṣṭa) *adj.* **A** qualified, i. e. delimited by the internal organ, i.e. the mind तत्र किमन्तःकरणविशिष्टं चैतन्यं जीवः, उत तदुपलक्षितम् ŚrutaPra. ii. 359. 29 (*on* ii. 3. 18); यस्य भोक्तृत्वम् अन्तःकरणविशिष्टस्य तस्य प्रतिशरीरं भेदः Nyāyāmṛ. 603B. 8; **B** qualified by the internal organ, i.e. thought अविद्याविशिष्टस्यात्मनोऽनुभवितृत्वम्, अन्तःकरणविशिष्टस्यैय(?व) स्मर्तृत्वम्, इति वैयधिकरण्यम् VivaPraSaṁ. 73. 20; 94. 13; **C** qualified by the internal organ, i.e. the Intellect विशेषणोपाध्योर्भेदस्य सिद्धान्तसंमतत्वेनान्तःकरणविशिष्टः प्रमाता, तदुपहितः साक्षीति भेदोपपत्तेः SiddhāLeSaṁ. 166. 1.

अन्तःकरणविशिष्टता (antaḥkaraṇaviśiṣṭa-tā) *f.* the state of being qualified, i. e. delimited by the internal organ ध्याता ...आत्मानमन्तःकरणविशिष्टतया ...अवगच्छन् 'अहं ब्रह्मास्मि' इति ध्यानं कथं वस्तुविषयं मन्येत VivaPraSaṁ. 326. 7.

अन्तःकरणविशुद्धि (antaḥkaraṇa-viśuddhi) *f.* purity of the mind अन्तःकरणविशुद्धिं भक्तिं च त्वयि सतीं प्रदेहि विभो SuvarṇaMā. 14.

अन्तःकरणविशेष (antaḥkaraṇa-viśeṣa) *m.* distinct or particular type of the internal organ, i. e. Intellect सांख्या हि प्रकृतेः सत्त्वप्रधानं प्रथमं परिणामं महदाख्यमन्तःकरणविशेषं बुद्धिमाहुः Kiraṇā. 258. 6; Upask. 356. 2 (*on* viii. 1.1)

अन्तःकरणविषय (antaḥkaraṇa-viṣaya) *m.* object of the internal organ ज्ञानसंकल्पनिश्चयानुसंधानाभिमाना आकाशकार्यान्तःकरणविषयाः TriBrU. 1; किं चाहमित्यनुभवस्यान्तःकरणविषयत्वं वक्ष्यते BhedaDhi. 20. 2.

अन्तःकरणविषयिणी (antaḥkaraṇa-viṣayiṇī) *adj.* (*f.*) referring to the internal organ अन्तःकरणविषयिण्यामन्तःकरणाश्रितायां शब्दादिजन्यवृत्तौ आद्यस्य व्यभिचारात् Nyāyāmṛ. 527B. 6.

अन्तःकरणविसर्पण (antaḥkaraṇa-visarpaṇa) *n.* movement, i. e. operation of the internal organ अन्तःकरणविसर्पणे हि भोक्तारो विसर्पन्ति आ लोमभ्य आ नखाग्रेभ्यः ŚrutaPra. ii. 450. 21 (*on* iii. 2. 29)

अन्तःकरणवृक्ष (antaḥkaraṇa-vṛkṣa) *m.* tree in the form of the internal organ अत्र वाक्ये बीजाङ्कुरन्यायेनैकस्यैवान्तःकरणवृक्षस्य वृत्तिमात्ररूपेण चित्ताद्याख्यावस्थाभेदाः ...उक्ताः SāṁkhyaPraBh.34. 11 (*on* 1. 64)

अन्तःकरणवृत्ति (antaḥkaraṇa-vṛtti) *f.* **Ai** function or psychosis of the internal organ, i. e. the mind अन्तःकरणवृत्तौ च व्यर्था बाह्यार्थकल्पना। तस्मादनुपकारो वा ग्राह्यं वा न तथा स्थितम् VākyaPa. 3 (14). 91; अन्तःकरणवृत्तौ ... प्रयोगो धर्मशब्दस्य न दृष्टः ŚlokaVār. 2. 195 (105. 5); अन्तःकरणवृत्तिवासनाविशेषपुद्गलगुणापूर्वेषु ...धर्मशब्दप्रयोगाभावात् TātpaṬ. (U.) 94. 14 (*on* 2. 195); संकल्पोऽपि ...अन्तःकरणवृत्तिः ChāndoUBh. 425. 7 (*on* vii. 4. 1); अन्तःकरणवृत्तिर्या संस्कारपरिशेषिणी। सा स्वप्न इति विज्ञेया LakṣmīT. 22. 24; 24. 28; (सुषुप्तिः) अन्तःकरणवृत्तीनां लयतो विषयस्य तु। पूर्वार्णानां विलोमेन भ्रूमध्ये बिन्दुसंस्थिता NityāṢoḍa. 8. 187; Kāśi. i. 160. 24 (*on* 2. 195. 196); न चान्तःकरणवृत्तावप्यस्य साक्षात्कारे सर्वोपाधिविनिर्मोकः Bhām. 42. 9 (*on* i. 1. 1); ज्ञानम् ...अन्तःकरणवृत्त्यभिव्यक्तः चित्प्रकाशः PrakaVi. 90. 13; ŚatDū. 181. 29; प्रथमं दोषकलुषितेन चक्षुषेदन्तामात्रविषयान्तःकरणवृत्तिरुत्पद्यते SarvaDaSaṁ. 16. 635; 16. 643; प्रथमं दोषसहितेनेन्द्रियेणेदन्तामात्रविषया अन्तःकरणवृत्तिर्जन्यते VivaPraSaṁ. 42. 14; 24. 20; 311. 2; साक्षी ...अन्तःकरणवृत्तीनां याथार्थ्यं स्वयमेव गृह्णाति NyāySu. (Ja.) 48A. 13 (*on* i. 1. 1); अन्तःकरणवृत्तौ कूटस्थस्यैव प्रतिफलनं जीव इति प्रसिद्धिः ŚaṅkaVi. (Ā.) 148. 1; 148. 19; विषयगतचैतन्यावरणभङ्गार्था चान्तःकरणवृत्तिः SiddhāBi. 59. 3; 147. 4; अधिष्ठानांशे अन्तःकरणवृत्तिः, अध्यस्तांशे चाविद्यावृत्तिः AdvaiSi. 652. 1; 652. 5; अन्तःकरणवृत्त्यभिव्यक्तस्यानवच्छिन्नचैतन्यस्याधिष्ठानत्वे न काचिदनुपपत्तिः SiddhāLeSaṁ. 294. 3; भागासिद्धेः, योगिनोऽन्तःकरणवृत्तेरपि तेषु निस्सरणे मानाभावात् GuruCandr. i. 121. 19; अन्तःकरणं चित्तादात्म्येनाध्यस्तं चिद्रूपम्। तस्यादृष्टेन्द्रियार्थसंनिकर्षादिनोत्पद्यमानः परिणामोऽपि ... अन्तःकरणवृत्तिरिति गीयते SiddhāTa. 6.16; इन्द्रियजन्यज्ञानं चान्तःकरणवृत्तिः VedāntPari. 318. 1; अव्यक्तं माया। तस्याश्च लयो नाम ,.. सुषुप्तावन्तःकरणवृत्तीनामिव मायावृत्तीनामनुदयादत्यन्तनिर्विकल्पात्मनः LalitāSaBh. 104. 16 (*on* 137); अन्तःकरणवृत्तीनां यावान्विषयस्तस्य सर्वस्यापि लयो हि सुषुप्तिकाले सकले विलीन इत्यादि श्रुतिषु सिद्धः SetuBa. 342. 4; **Aii** function or psychosis of the internal organ, considered three fold as mind, intellect and ego बाह्यार्थास्तिसृभिः सार्धमन्तःकरणवृत्तिभिः पाशविश्लेषवद्भूत्वा देवतास्वधिरोपयेत् MṛgendraT. ii. 8. 143; **Aiii** function or psychosis of the internal organ, i. e. the intellect प्रज्ञानरूपस्य ब्रह्मण उपलब्ध्यर्था या अन्तःकरणवृत्तयो बाह्यान्तर्वर्तिविषयविषयाः, ता इमा उच्यन्ते- संज्ञानम् ...स्मृतिः ... इत्येवमाद्या अन्तःकरणवृत्तयः AitUBh. 290. 9 (*on* 5. 2); निश्चयात्मिकाः सविकल्पनामकाः अन्तःकरणवृत्तयो धियः LalitāTriBh. 340. 15 (*on* 51); अन्तःकरणवृत्तिर्या चक्षुरादिसमाश्रया। रूपादिविषयाभासा लौकिकी दृष्टिरुच्यते BṛĀraUBhVā. iii. 4. 149 (comm. बुद्धिपरिणामः); यदपि सांख्या आचख्युर्विषयान्तरव्यासक्तेऽन्तःकरणे चक्षुरादिसंबन्धस्याप्यज्ञानादन्तःकरणवृत्तिर्ज्ञानमिति तन्निराकरणपरं भाष्यम् TātpaṬ. (Vā.) 539. 5 (*on* iii. 2. 8); बुद्धिर्नाम निश्चयात्मिकान्तःकरणवृत्तिः VedāntSā. (Sa.) 10. 9; **B** modification of the internal organ, i.e. the Intellect घटसृष्टिवदन्तःकरणातिरिक्ताखिलसृष्टेरन्तःकरणवृत्तिपूर्वकत्वानुमानम् SāṁkhyaPraBh. 77. 10 (*on* 2. 10); **C** effect, i. e. thought produced by the mind विकल्पेभ्यो लुठन्त्येताश्चान्तःकरणवृत्तयः YogVā. i.30. 4; **D** mental disposition किमिदमस्मत्समीकसंकटावधारणेनार्द्रत्वमन्तःकरणवृत्तेः UdaySuKa. 90. 3; **E** activity of the mind, mental activity यागानुष्ठाय्येव ह्यपूर्वान्तःकरणवृत्त्यादिकमप्यनुतिष्ठति NyāyRa. 104. 14 (*on* 2. 192); **F** state or condition of the mind, cf. **अन्तःकरणवृत्तिविशेषB.**

अन्तःकरणवृत्ति (antaḥkaraṇa-vṛtti) *adj.* being or abiding in the mind मैत्रगतानामपि चैत्रेण ग्रहणप्रसङ्गाद(?द्) अन्तःकरणवृत्तीनां च गुणान्तराणां नित्याप्रत्यक्षत्वादात्माश्रिता एवेच्छादयो नान्तःकरणाश्रयाः TātpaṬ. (Vā.) 569. 7 (*on* iii. 2.35)

अन्तःकरणवृत्तिजनक (antaḥkaraṇavṛtti-janaka) *adj.* producer of the function or psychosis of the internal organ तत्रान्तःकरणवृत्तिजनकसामग्रीसंभवेऽपि प्रमात्वाभावावरोधेनान्तःकरणस्यासामर्थ्यात् SiddhāBi. 124. 6.

अन्तःकरणवृत्तिज्ञान (antaḥkaraṇavṛtti-jñāna) *n.* knowledge of the function or psychosis of the internal organ सुषुप्तावविद्यावृत्तिभिरतिसूक्ष्माभिरनुभूयमानमपि स्वरूपसुखं तदानीं सविकल्पकेनान्तःकरणवृत्तिज्ञानेन ग्रहीतुमशक्यम् JīvanVi. 115. 5; साक्षी तद्वदेवाज्ञानमपि साधयत्येव न तु निवर्तयति। तन्निवर्तकं त्वन्तःकरणवृत्तिज्ञानमेव VivaPraSaṁ. 20. 5.

अन्तःकरणवृत्तिता (antaḥkaraṇavṛtti-tā) *f.* the state of being the function or psychosis of the internal organ क्लेशकर्म तद्वासनानामन्तःकरणवृत्तितया सत्यन्तःकरणे भावात् TattvVai. 80. 19 (*on* 2. 17)

अन्तःकरणवृत्तित्रय (antaḥkaraṇavṛtti-traya) *n.* triad of functions of the internal organ considered threefold as mind, intellect and ego रजःसत्त्वतमोरूपाणि अहंकारबुद्धिमनांसि अन्तःकरणवृत्तित्रयम् NityoNi. 7. 6.

अन्तःकरणवृत्तित्व (antaḥkaraṇavṛtti-tva) *n.* **Ai** the state of being the activity of the internal organ क्षेत्रज्ञगतधर्माधर्मसहायवैचित्र्याद्वैचित्र्यम् (प्रपञ्चस्य) इति चेत्। न। अन्तःकरणवृत्तित्वाद् धर्माधर्मयोः ŚāstrDī. 114. 3 (*on* i. 1. 5); 114. 10 (*on* i. 1. 5); **Aii** the state of being the function or psychosis of the internal organ मायावादिमते अधिष्ठानज्ञानस्यान्तःकरणवृत्तित्वेन सत्यत्वान्न दोषजन्यत्वम् NyāySu. (Ja.) 55B. 9 (*on* i. 1. 1); **B** the state of being what exists in the internal organ न चात्मनः परिस्पन्दलक्षणा क्रियोपपद्यते। ...नापि प्रयत्नलक्षणा।

तस्याः अन्तःकरणवृत्तित्वात् NyāySu. (Ja.) 317B. 13 (*on* ii.2.1)

अन्तःकरणवृत्तित्वाविशेष (antaḥkaraṇavṛttitvāviśeṣa) *m.* non-difference from the state of being the function or psychosis of the internal organ न च (घटज्ञानस्य) अन्तःकरणवृत्तित्वाविशेषादिच्छाद्वेषादिरूपवृत्तयोऽपि देहान्निर्गत्य विषयसंसृष्टा भवन्तीति कथं न स्वीक्रियते इति वाच्यम् AdvaiSi. 482. 18.

अन्तःकरणवृत्तिद्वार् (antaḥkaraṇavṛtti-dvār) *f.* [Inst.] through the function or psychosis of the internal organ नन्वेकस्या एव संविदः अन्तःकरणवृत्तिद्वारा विषयसंबन्धः कादाचित्कः ŚrutaPra. iA. 139. 20 (*on* i. 1. 1)

अन्तःकरणवृत्तिधर्म (antaḥkaraṇavṛtti-dharma) *m.* attribute of the function or psychosis of the internal organ चैतन्यधर्म एवापरोक्ष्यं, न त्वनुमितित्वादिवत् अन्तःकरणवृत्तिधर्मः SiddhāLeSaṁ. 403. 3.

अन्तःकरणवृत्तिनिबन्धन (antaḥkaraṇavṛtti-nibandhana) *adj.* caused by the function or psychosis of the internal organ न चाभेदे लक्ष्यलक्षणभावायोगः अन्तःकरणवृत्तिनिबन्धनाकारभेदेन उभयोपपत्तेः AdvaiSi. 677. 2.

अन्तःकरणवृत्तिनिर्गमन (antaḥkaraṇavṛtti-nirgamana) *n.* act of reaching out of function or psychosis of the internal organ वह्न्यंशे त्वन्तःकरणवृत्तिनिर्गमनाभावेन वह्न्यवच्छिन्नचैतन्यस्य प्रमाणचे(?चै)तना(?न्य)स्य च परस्परं भेदात् VedāntPari. 56. 3.

अन्तःकरणवृत्तिपरंपरा (antaḥkaraṇavṛtti-paramparā) *f.* series of the function or psychosis of the internal organ अन्तःकरणवृत्तिपरंपरायामनुप्रविष्टा चित्ततद्रूपैव भासते SetuBa. 344. 15.

अन्तःकरणवृत्तिपूर्वकत्व (antaḥkaraṇavṛttipūrvaka-tva) *n.* the state of being preceded by the function or psychosis of the internal organ घटसृष्टिवदन्तःकरणातिरिक्ताखिलसृष्टेरन्तःकरणवृत्तिपूर्वकत्वानुमानम् SāṁkhyaPraBh. 77. 10 (*on* 2. 10)

अन्तःकरणवृत्तिप्रकाश (antaḥkaraṇavṛtti-prakāśa) *m.* illumination (in the form) of the function or psychosis of the internal organ (स्वेन भासा ... अयं पुरुषः स्वयं ज्योतिर्भवति) स्वेन आत्मीयेन, भासा ... सर्ववासनात्मकेन अन्तःकरणवृत्तिप्रकाशेनेत्यर्थः – सा हि तत्र विषयभूता सर्ववासनामयी प्रकाशते BṛĀraUBh. 546. 4 (*on* iv. 3. 9)

अन्तःकरणवृत्तिप्रतिबिम्बित (antaḥkaraṇavṛtti-pratibimbita) *adj.* reflected on the function or psychosis of the internal organ सिद्धान्तेऽप्यन्तःकरणवृत्तिप्रतिबिम्बितचैतन्यस्य ...तदाश्रितत्वात् विशेषगुणत्वव्यवहारे न काचित् क्षतिः VedāntKa. 469. 1 (*on* iii. 3. 53); नन्वन्तःकरणवृत्तिप्रतिबिम्बितस्सप्रमा Nyāyāmṛ. 73B. 7.

अन्तःकरणवृत्तिभेद (antaḥkaraṇavṛtti-bheda) *m.* **A** diversity or difference of the function or psychosis of the internal organ यत् चक्षुषा न पश्यति ...येन चक्षूंषि अन्तःकरणवृत्तिभेदभिन्नश्चक्षुर्वृत्तीः पश्यति KenUBh. 39. 7 (*on* 1. 7); अन्तःकरणवृत्तिभेदेनैकस्यापि लक्ष्यलक्षणभाव इत्यस्य च पूर्वमुक्तत्वात् LaCandr. 688. 28; पर्वतो वह्निमानित्यादौ पर्वतांशे वह्न्यंशे चान्तःकरणवृत्तिभेदाङ्गीकारेण ...न कश्चिद् विरोधः VedāntPari. 62. 1; **B** kind or variety of the function or psychosis of the internal organ अविद्यानिवृत्तिस्तु ...अन्तःकरणवृत्तिभेदात् साक्षात्कारादिति द्रष्टव्यम् Bhām. 58. 21 (*on* i. 1. 1); 68. 11 (*on* i. 1. 2); ब्रह्मसाक्षात्कारश्चान्तःकरणवृत्तिभेदः Bhām. 114. 14 (*on* i. 1. 4); अन्तःकरणवृत्तिभेदविषया सा श्रुतिः ŚrutaPra. iB. 168. 17 (*on* i. 1. 4)

अन्तःकरणवृत्तियुक्त (antaḥkaraṇavṛtti-yukta) *adj.* possessing the function or psychosis of the internal organ अन्तःकरणवृत्तियुक्ता रूपादयः चैतन्यस्य विषया भवन्ति PrakaVi. 616. 24.

अन्तःकरणवृत्तिरूप (antaḥkaraṇavṛtti-rūpa) *adj.* [*f.* - ā] **A** of the form of activity of the internal organ, i. e. the intellect अन्तःकरणवृत्तिरूपज्ञानक्रियाकर्तृत्वं अविक्रिये ज्ञानेऽध्यस्तम् NītiMā. 49. 22; **B** of the form of the function or psychosis of the internal organ अस्ति तावत्संसारे प्रचुरोऽयमन्तःकरणवृत्तिरूपः कामः NyāySu. (Ja.) 325A. 3 (*on* ii. 2. 1); अन्तःकरणवृत्तिरूपज्ञानवत्तद्वृत्तिरूपसुखाभावे अहं सुखीत्यनुभवायोगात् Nyāyāmṛ. 75A. 6; यद्यपि ईश्वरे यागायागसमुदायक्रियया जीववदन्तःकरणवृत्तिरूपा प्रीतिर्नोत्पद्यते, अन्तःकरणाभावात् VīraMi. (Pūjā.) 1.10.

अन्तःकरणवृत्तिरूपत्व (antaḥkaraṇavṛttirūpa-tva) *n.* the state of being of the form of the function or psychosis of the internal organ अथ प्रमाणज्ञानं न चैतन्यम् अपि त्वन्तःकरणवृत्तिरूपत्वाज्जडरूपमिति चेत्, तर्ह्यन्तःकरणवत्तस्मादपि विषयोपलब्धिर्न स्यात् NītiMā. 15. 3.

अन्तःकरणवृत्तिलक्षण (antaḥkaraṇavṛtti-lakṣaṇa) *adj.* of the characteristic of the function or psychosis of the internal organ अन्तःकरणवृत्तिलक्षणज्ञानद्वयानङ्गीकारात् TattvPradī. (Ci.) 84. 6; जडेऽज्ञानानभ्युपगमेनान्तःकरणवृत्तिलक्षणप्रमाणज्ञानानां तथाविधवस्तुपूर्वकत्वाभावेऽपि हेतोस्तत्र सद्भावादनैकान्तिकत्वात् Vādā.24.6.

अन्तःकरणवृत्तिविशिष्ट (antaḥkaraṇavṛtti-viśiṣṭa) *adj.* characterised by the function or psychosis of the internal organ अभ्युपेयते हि अनुभूतिशब्दवाच्यस्यान्तःकरणवृत्तिविशिष्टस्य ज्ञानस्य ज्ञानगोचरता TattvPradī. (Ci.) 8.7.

अन्तःकरणवृत्तिविशेष (antaḥkaraṇavṛtti-viśeṣa) *m.* **A** particular function or psychosis of the internal organ आनन्द इति परं ब्रह्म, तद्धि ... अन्तःकरणवृत्तिविशेषे तमसा अप्रच्छाद्यमाने प्रसन्ने अभिव्यज्यते TaiUBh. 252. 4 (*on* 2. 5); अन्तःकरणवृत्तिविशेषाश्रितवासनात्मकविशेषविज्ञानेन सर्वो लोकः एतस्मिन्काले सविज्ञानो भवति BṛĀraUBh. 605. 18 (*on* iv. 4. 2); अन्तःकरणवृत्तिविशेषे प्रसन्ने सति ...आत्मैवानन्दः प्रकटीभवति IṣṭaSi. 28. 10; 30. 15; सामग्रीसंपत्तिदशायामुत्पत्स्यमानान्तःकरणवृत्तिविशेषमेव सहकारित्वेनापेक्ष्य ब्रह्मैव निवर्तकम् ŚatDū. 181. 29; भावोऽन्तःकरणवृत्तिविशेषः SetuBa. 275. 10; **B** particular state or condition of the mind द्वाविमौ संयोगवियोगाख्यावन्तःकरणवृत्तिविशेषौ RasGaṅ. 41.7.

अन्तःकरणवृत्तिवेद्यत्व (antaḥkaraṇavṛttivedya-tva) *n.* the state of being what is to be known through the function or psychosis of the internal organ एवं घटादिवद् वृत्तिवेद्यत्वेऽज्ञानान्तःकरणरजतादीनामपि अन्तःकरणवृत्तिवेद्यत्वमेवास्तु SiddhāTa. 9. 5.

अन्तःकरणवृत्तिव्यक्त (antaḥkaraṇavṛtti-vyakta) *adj.* manifested by the function or psychosis of the internal organ अन्तःकरणवृत्तिव्यक्तचित्प्रकाशमन्तरेण विषये पृथक् प्राकट्यानङ्गीकारात् VivaPraSaṁ. 24. 20.

अन्तःकरणवृत्तिव्याप्य (antaḥkaraṇavṛtti-vyāpya) *adj.* pervaded by the function or psychosis of the internal organ अन्तःकरणवृत्तिव्याप्ये ब्रह्मणि वाग्वृत्तेरपि सर्वथा निषेधायोगः AdvaiSi. 785. 5.

अन्तःकरणवृत्तिसंयुक्त (antaḥkaraṇavṛtti-saṁyukta) *adj.* associated with the function or psychosis of the internal organ यच्चक्षुषा न पश्यति न विषयीकरोति अन्तःकरणवृत्तिसंयुक्तेन लोकः KenUBh. 39. 6 (*on* 1. 7)

अन्तःकरणवृत्तिसंसर्ग (antaḥkaraṇavṛtti-saṁsarga) *m.* relation of the function or psychosis of the internal organ अन्तःकरणवृत्तिसंसर्गमनपेक्ष्य तेन प्रकाशनस्य चायोगात् SiddhāLeSaṁ. 293. 2.

अन्तःकरणवृत्तिसाक्षिता (antaḥkaraṇavṛttisākṣi-tā) *f.* the state of being a witness of the function or psychosis of the internal organ समस्तनामरूपकर्मातिदूरतया सर्वकामाद्यन्तःकरणवृत्तिसाक्षितया तदालम्बनशून्यतया च निरालम्बयोगः TripāMaNāU. 328. 7 (8)

अन्तःकरणवृत्त्यंश (antaḥkaraṇavṛtty-aṁśa) *m.* aspect or element of the function or psychosis of the internal organ अन्तःकरणवृत्त्यंशस्य चाज्ञानत्वात् VivaPraSaṁ. 53. 22.

अन्तःकरणवृत्त्यवच्छिन्न (antaḥkaraṇavṛtty-avacchinna) *adj.* delimited by the function or psychosis of the internal organ अन्तःकरणवृत्त्यवच्छिन्नचैतन्यं तु प्रमाणम् AdvaiSi. 489. 4; अन्तःकरणवृत्त्यवच्छिन्नं चैतन्यं प्रमाणचैतन्यम् VedāntPari. 44. 5; YatīndraDī. 15. 4.

अन्तःकरणवृत्त्याश्रय (antaḥkaraṇavṛtty-āśraya) *adj.* resorting to the function or psychosis of the internal organ असुप्तः स्वयम् ... अन्तःकरणवृत्त्याश्रयान् बाह्याध्यात्मिकान् सर्वानेव भावान् ... अभिचाकशीति BṛĀraUBh. 549. 18 (*on* 3. 11)

अन्तःकरणवृत्त्याश्रय (antaḥkaraṇavṛtty-āśraya) *m.* abode of the function or psychosis of the internal organ जानामीति चानुभवस्यान्तःकरणवृत्त्याश्रयप्रमातृविषयतयाप्युपपत्तेः TattvPradī. (Ci.) 24. 11.

अन्तःकरणवृत्त्युपधान (antaḥkaraṇavṛtty-upadhāna) *n.* condition or adjunct existing in the function or psychosis of the internal organ ज्ञानत्वानन्दत्वाभ्यामप्यन्तःकरणवृत्त्युपधानलब्धभेदचिदानन्दविशेषानुगताभ्यां लक्ष्यमाणचिदानन्दव्यक्त्योरपि योज्यम् VedāntKa. 55. 25 (*on* i. 1. 2); ज्ञानपदानन्दपदयोरपि ... अन्तःकरणवृत्त्युपधानलब्धभेदचिदानन्दविशेषानुगते ज्ञानत्वानन्दत्वे AdvaiSi. 691. 33.

अन्तःकरणवृत्त्युपाधि (antaḥkaraṇavṛtty-upādhi) *m.* condition or adjunct existing in the function or psychosis of the internal organ यद्यपि एते (धर्माः) स्वरूपभूता एवात्मनः, तथाप्यन्तःकरणवृत्त्युपाधौ नानेवावभासन्त इति तेषां धर्मत्वमुपचर्यते VivaPraSaṁ. 14. 20; उक्ततादात्म्याकारवृत्तिद्वारकशुद्धब्रह्माकारवृत्तिर्निवेश्या। ...अन्तःकरणवृत्त्युपाधौ भिन्ना इवेति LaCandr. 156. 28.

अन्तःकरणवृत्त्युपारूढ (antaḥkaraṇavṛtty-upārūḍha) *adj.* associated with the function or psychosis of the internal organ केवलजीवचैतन्याप्रकाश्यस्यापि

घटादेरन्तःकरणवृत्त्युपारूढतत्प्रकाश्यत्वं युक्तम् SiddhāLeSaṁ. 125. 3.

अन्तःकरणवेदन (antaḥkaraṇa-vedana) *n.* comprehension of (disposition of) the internal organ, i.e. the mind सुव्यक्तमात्रासंबोधमुग्धत्वेन विहीयते। तत्त्ववित्कारणज्ञानादन्तःकरणवेदनम् RājTa. (Ka.) 8. 3054.

अन्तःकरणवैविध्य (antaḥkaraṇa-vaividhya) *n.* diversity of the internal organ, i.e. the mind मन एकमेव अन्तःकरणम्, संकल्पाध्यवसायादयस्तद्व्यापारभेदादेव जायन्ते इति नान्तःकरणवैविध्यम् NyāySiA. 194. 11.

अन्तःकरणव्यवस्थानुमान (antaḥkaraṇavyavasthānumāna) *n.* inference regarding the establishment of the internal organ, i.e. the mind कर्मबुद्धीन्द्रियासंभविन्या संकल्पादिक्रियाव्यवस्थयान्तःकरणव्यवस्थानुमानम् Bhām. 510. 6 (*on* ii. 4. 6)

अन्तःकरणव्यापार (antaḥkaraṇa-vyāpāra) *m.* operation of the internal organ शमो नाम अन्तःकरणव्यापाराणाम् ...निष्फलत्वावधारणपूर्वकः परित्यागः PrakaVi. 28. 19.

अन्तःकरणव्यापारदशा (antaḥkaraṇavyāpāra-daśā) *f.* stage or condition of the operation of the internal organ जीववर्गस्य चक्षुःश्रोत्रान्तःकरणव्यापारदशासु परमेश्वरस्यानवभासमानतोक्त्या तस्य प्रत्यक्षादिप्रमाणातीतत्वं लब्धम् ŚivārkaMaDī. i. 425. 6 (*on* i. 3. 12)

अन्तःकरणशक्ति (antaḥkaraṇa-śakti) *f.* faculty or power of the internal organ, i. e. the intellect ताभिः संपूर्णमन्तःकरणशक्तिभिः। ...ध्यायेत् PauṣkS. 27. 289.

अन्तःकरणशबलता (antaḥkaraṇaśabala-tā) *f.* the state of being mixed with or conditioned by the internal organ, i. e. the intellect ब्रह्माज्ञानपक्षेऽपि ज्ञानाश्रयत्वस्य ब्रह्मणोऽन्तःकरणशबलताद्वारत्वादनाद्यज्ञानसंबन्धोऽपि ब्रह्मणोऽज्ञानसंबन्धद्वारक एव PañcPra. 57. 4.

अन्तःकरणशरण (antaḥkaraṇa-śaraṇa) *adj.* which has mind (of a sage) as the refuge or abode मुनीन्द्राणामन्तःकरणशरणौ ...कामाक्ष्या दुरितहरणौ नौमि चरणौ MūkaPañ. 3. 73.

अन्तःकरणशरण (antaḥkaraṇa-śaraṇa) *n.* refuge or abode of the mind गतवति विततायुःकर्मणि प्रान्तमन्तःकरणशरणवैरिध्वंसनादत्तकीर्तिः KathāK. 85. 26.

अन्तःकरणशल्य (antaḥkaraṇa-śalya) *n.* dart in the heart, i. e. cause of heart-rending grief अमराः ...आखण्डलनरोपशल्यमन्तःकरणशल्यमालोकयन्तः ... तपोलोकसमीपमापेदिरे NīlaVi. 36. 15.

अन्तःकरणशारीरपरता (antaḥkaraṇaśārīrapara-tā) *f.* the state of being intended to convey the internal organ and the embodied individual soul सत्त्वक्षेत्रज्ञशब्दयोरन्तःकरणशारीरपरतया प्रसिद्धत्वात् BrahmSūBh. (Śaṅ.) 110. 16 (*on* i. 2. 12)

अन्तःकरणशुद्ध (antaḥkaraṇa-śuddha) *adj.* (used as noun) (one) whose mind is pure अन्तःकरणशुद्धाये(?ने)तान् विभूतिः पवित्रयेत् SkandP. iv. 35. 141.

अन्तःकरणशुद्धात्मतत्त्व (antaḥkaraṇaśuddhātmatattva) *adj.* whose essence of the soul is purified through the internal organ (गुरुः) अन्तःकरणशुद्धात्मतत्त्वः ...शिष्यं शिवीभूतं ध्यात्वा तस्मै शिवविषयान् षडङ्गगुणानापादयेत् ĪśānŚiPa. ii. 18. 120 (7)

अन्तःकरणशुद्धि (antaḥkaraṇa-śuddhi) *f.* **A** purification of the mind मनुः ...कर्मणः अन्तःकरणशुद्धावेव विनियोगं दर्शितवान् SanatBh. 186. 3 (*on* 1. 6); जटातीर्थे ...स्नातानाम् ...। अन्तःकरणशुद्धिः स्यात्ततोऽज्ञानं विनश्यति SkandP. iii (1). 20. 12; न ह्यन्तःकरणस्यादृष्टवशादन्तःकरणशुद्धिरित्यत्र प्रमाणमस्ति ŚrutaPra. iA. 163. 29 (*on* i. 1. 1); जन्मान्तरानुष्ठितैरपि कर्मभिरन्तःकरणशुद्धौ ज्ञानोदयसंभवात् VivaPraSaṁ. 207. 13; जपादिभिरन्तःकरणशुद्धौ सत्यां विद्योदयः VedāntKau. 373. 19 (*on* iii. 4. 37); मोक्षार्थं सर्वथा ज्ञानमपेक्षितं तच्च कर्मादिनान्तःकरणशुद्ध्या भवति TattvPrakā. 74B. 9 (*on* i. 5. 23); **B** purity of the mind अन्तःकरणशुद्धिर्या शुचिता सा प्रकीर्तिता RasāSu. 12. 4 (1. 69); तदर्थाया अन्तःकरणशुद्धेरपेक्षितत्वात् Nyāyāmṛ. 618B. 2; AdvaiSi. 865. 3; सत्त्वशुद्धिरन्तःकरणशुद्धिः ŚivārkaMaDī. ii. 401. 34 (*on* iii. 4. 29); तत्रान्तःकरणशुद्धिर्द्वारम् SiddhāTa 27. 5; भावशुद्धिरन्तःकरणशुद्धिः VīraMi. (Āhnika.) 43. 1; एवं सतीति। अन्तःकरणशुद्धौ सत्यामित्यर्थः BālamBha. iii. 102. 13 (*on* 3. 62)

अन्तःकरणशुद्धिकृत् (antaḥkaraṇaśuddhi-kṛt) *adj.* which causes the purity of the mind मरणवचनानां त्वन्तःकरणशुद्धिप्रतिपादनमात्रपरता पृथूदकादौ यन्मरणं तदप्यत्यन्तशुद्धिकृत् TristhaSe. 365. 11.

अन्तःकरणशुद्धिद्वार् (antaḥkaraṇaśuddhi-dvār) *f.* [Inst.] **A** through the purification of the mind (कर्मणः) यदि साक्षात्करणत्वं न संभवेत्, तदा अन्तःकरणशुद्धिद्वारा तत्कल्पनीयम् VivaPraSaṁ. 207. 1; ब्रह्मविद्यार्थिनो यद्यपि कर्मभिरन्तःकरणशुद्धिद्वारा विद्या स्यात् VedāntKau. 368. 23 (*on* iii. 4. 27); कर्मणामप्यन्तःकरणशुद्धिद्वारा ब्रह्मसाक्षात्कारोपयोगितया मुक्तिफलकत्वसंभवात् ŚivārkaMaDī. i. 575. 27 (*on* i. 4. 29); काशीमरणेनान्तःकरणशुद्धिद्वारा तत्त्वज्ञानमुत्पद्यत इति न युक्तम् VīraMi. (Tīrtha.) 317. 18; **B** through the purity of the mind अन्तःकरणशुद्धिद्वारा क्रममुक्तिश्च SiddhāBi. 140. 6; 81. 2; सर्वानपि विधीनन्तःकरणशुद्धिद्वारा स्वशेषतामापादयत् PrasthāBhe. 6. 5; ब्रह्मचारिणाम् ...अन्तःकरणशुद्धिद्वारा विविदिषादिसिद्धिः SiddhāTa. 30. 9.

अन्तःकरणशुद्धिद्वार (antaḥkaraṇaśuddhi-dvāra) *n.* [Inst.] **A** through the purification of the mind कर्मणां त्वन्तःकरणशुद्धिद्वारेण मोक्षहेतुत्वम् ViṣṇuSaBh. 128. 3 (*on* 123); कर्मणां त्वन्तःकरणशुद्धिद्वारेण ज्ञानाङ्गत्वोपपत्तेः NyāySu. (Ja.) 17B. 4 (*on* i. 1. 1); **B** through the purity of the mind सगुणब्रह्मोपासनविधायकानां वेदान्तानाम् ... तेषामप्यन्तःकरणशुद्धिद्वारेण तत्रैव पर्यवसानात् VivaPraSaṁ. 131. 12.

अन्तःकरणशुद्धिमत् (antaḥkaraṇaśuddhi-ma(n)t) *adj.* (used as noun) (one) having purity of the mind वेदबाह्यत्वेऽप्यन्तःकरणशुद्धिमतां रक्षणार्थम् ... शिवकेशवाभ्यां पाशुपतपाञ्चरात्रादीनि निर्मितानि ŚivārkaMaDī. ii. 117. 14 (*on* ii. 2. 42)

अन्तःकरणशुद्धिरूप (antaḥkaraṇaśuddhi-rūpa) *adj.* of the nature of purity of the mind पुरुषगतो विशेषः अन्तःकरणशुद्धिरूपः प्रतिबन्धाभावः AdvaiSi. 739. 17.

अन्तःकरणशुद्धिहेतुत्व (antaḥkaraṇaśuddhihetu-tva) *n.* the state of being the cause of the purification of the mind कथं कर्मणां तत्तत्फलसाधनानामन्तःकरणशुद्धिहेतुत्वम् SiddhāTa. 25. 17

अन्तःकरणशुद्ध्यर्थ (antaḥkaraṇaśuddhy-artha) *adj.* having the purification of the mind as its purpose 'दर्वीहोमेन ...भवति' इत्यादिश्रुतेरन्तःकरणशुद्ध्यर्थानां कर्मणां वैयर्थ्ये तत्प्रतिपादकश्रुतीनां व्याकोपः TristhaSe. 295. 28.

अन्तःकरणशुद्ध्यर्थम् (antaḥkaraṇaśuddhyartham) *adv.* for the sake of the purification of the mind तदपि सम्यग्दर्शनवतामपि प्रत्यहमन्तःकरणशुद्ध्यर्थमग्निहोत्रादेरनुवर्तनीयतायाः ...अनुपपन्नम् ŚrutaPra. ii. 589. 27 (*on* iv. 1. 18); अन्तःकरणशुद्ध्यर्थं कर्मणां विनियोग इति चेत् ŚatDū. 65. 3; अन्तःकरणशुद्ध्यर्थं पञ्चरात्रानुसारतः। श्रुतिस्मृत्युदितं धर्मम् ...। संसेवते BṛBrahmaS. i. 7. 29.

अन्तःकरणशुद्ध्यादि (antaḥkaraṇaśuddhy-ādi) *adj.* **A** purity etc. of the mind उक्तरीत्या दासमार्गप्रपदनमात्रस्य ...दासबुद्ध्या तत्स्वीकरणस्य वा अन्तःकरणशुद्ध्यादिद्वारमनपेक्ष्य मोक्षसाधनत्वायोगात् PūrvottaVāNaMā. 173. 7; **B** purification etc. of the mind मरणस्य सम्यगन्तःकरणशुद्ध्यादिक्रमेण ज्ञानजनकताङ्गीकारात् TristhaSe. 295. 24.

अन्तःकरणशुद्ध्युत्कर्ष (antaḥkaraṇaśuddhy-utkarṣa) *m.* excess of the purity of the mind अन्तःकरणशुद्ध्युत्कर्षादेवानन्दोत्कर्षः IṣṭaSi. 28. 22.

अन्तःकरणशोधकता (antaḥkaraṇaśodhaka-tā) *f.* the state of being the purifier of the mind न च प्राणवियोगात्मकस्य मरणस्य क्वचिदन्तःकरणशोधकता श्रुता दृष्टा चेत्यलौकिकम् TristhaSe. 306. 7.

अन्तःकरणशोधकत्व (antaḥkaraṇaśodhaka-tva) *n.* the state of being the purifier of the mind तस्माद्युक्तमुक्तं कर्मणामन्तःकरणशोधकत्वम् SiddhāTa. 26. 27; तादृशानुष्ठानस्यान्तःकरणशोधकत्वमुक्तं सांप्रदायिकैः VīraMi. (Bhakti.) 122. 31; 66. 1.

अन्तःकरणशोधन (antaḥkaraṇa-śodhana) *n.* purification of the mind उपायस्ते कर्मात्मा ...। संज्ञानं जनयेच्छुद्धमन्तःकरणशोधनात्। ...ददामि बुद्धियोगं तमन्तःकरणशोधनम्। सांख्यं नाम द्वितीयो य उपायः कथितस्तव LakṣmīT. 16. 35.

अन्तःकरणश्री (antaḥkaraṇaśrī) *f.* name of a particular mystic formula, viz. *bam pham pam prīm* अन्तःकरणश्रीर्मायाव्योमेशकृतशेखरा LakṣmīT. 44. 30.

अन्तःकरणसंयम (antaḥkaraṇa-saṁyama) *m.* control over the mind अन्तःकरणसंयमो दमः Mitā. 41. 13 (*on* 1. 122); SmṛtiCan. i. 14. 2.

अन्तःकरणसंयोग (antaḥkaraṇa-saṁyoga) *m.* connection or contact with the internal organ वैशेषिकादिवदेव भोगजनकतावच्छेदकत्वेनान्तःकरणसंयोगे वैजात्यं चास्माभिरपीष्टम् SāṁkhyaPraBh. 14. 20 (*on* 1. 19)

अन्तःकरणसंशुद्धि (antaḥkaraṇa-saṁśuddhi) *f.* purification of the mind अन्तःकरणसंशुद्धिमचिरात्समवाप्नुयात् BṛBrahmaS. i. 6. 100.

अन्तःकरणसंसर्ग (antaḥkaraṇa-saṁsarga) *m.* cnnection or contact with the internal organ यदुक्तं मुक्तस्यान्तःकरणाद्यभावान्न संसारानुभवप्राप्तिरिति, तदसत्, निर्विशेषत्वादेकरसे चैतन्येऽन्तःकरणसंसर्गभावाभावयोरप्ययोगात् Vādā. 148. 1.

अन्तःकरणसंसृति (antaḥkaraṇa-saṁsṛti) *f.* transmigration of the internal organ न शून्यं नापि चाशून्यं नान्तःकारण(v.l. °करण Viśva.)संसृतिः

TejoBiU. 6. 17.

अन्तःकरणसंसृष्टत्व (antaḥkaraṇasaṁsṛṣṭa-tva) *n.* the state of being what is associated with the internal organ ब्रह्मणोऽन्तःकरणसंसृष्टत्वेऽपि ब्रह्माकारपरिणतान्तःकरणवृत्त्यभावान्न सदा जीवस्य ब्रह्मज्ञानप्रसङ्गः VivaPraSaṁ. 91. 7.

अन्तःकरणसंसृष्टवस्तु (antaḥkaraṇasaṁsṛṣṭa-vastu) *n.* thing associated with the internal organ अन्तःकरणसंसृष्टवस्तुज्ञातृत्वे ब्रह्मस्वरूपमपि जीवः सर्वदा जानीयात्, सर्वगतस्य ब्रह्मणोऽन्तःकरणेऽपि संसृष्टत्वात् VivaPraSaṁ. 90. 1.

अन्तःकरणसंस्कार (antaḥkaraṇa-saṁskāra) *m.* (latent) impression in the internal organ शरीरान्तःकरणोपाधिद्वयरहितोऽन्तःकरणसंस्कारावच्छिन्नाविद्यामात्रोपहितः ... प्राज्ञः SiddhāBi. 92. 6.

अन्तःकरणसंस्था (antaḥkaraṇa-saṁsthā) *adj.* (*f.*) existing or stored in the internal organ अन्तःकरणसंस्था हि वासनाः यातयन्ति शरीरिणः LakṣmīT. 17. 52.

अन्तःकरणसंस्थित (antaḥkaraṇa-saṁsthita) *adj.* present in the internal organ ब्रह्मभिन्नं विभो ज्ञानं श्रोतुमिच्छामि तत्त्वतः। येन संप्राप्यते ज्ञेयमन्तःकरणसंस्थितम् JayāS. 5. 1.

अन्तःकरणसंकल्परूप (antaḥkaraṇasaṅkalpa-rūpa) *adj.* of the nature of resolve in the mind (नोद्यन्तमादित्यमीक्षेत) अनीक्षणं नामान्तःकरणसंकल्परूपं नियम्यते TantrRa. 31. 3.

अन्तःकरणसंघात (antaḥkaraṇa-saṅghāta) *m.* aggregate of the internal organs (viz. mind, vital air and speech) अन्नादीनामशितानाम् ... । अणिष्ठा धातवः मनः प्राणं वाचं देहस्यान्तःकरणसंघातमुपचिन्वन्ति ChāndoUBh. 383.8 (*on* vi. 8. 6)

अन्तःकरणसत्ता (antaḥkaraṇa-sattā) *f.* [Inst.] through the power of the mind (कर्कटी नाम राक्षसी ...सूचीभावं प्रपन्ना) विससार दिगन्तेषु सान्तःकरणसत्तया YogVā. iii. 70. 52.

अन्तःकरणसत्त्व (antaḥkaraṇa-sattva) *n.* **A** function of the internal organ, i. e. the Intellect यदा तु रजस्तमोलेशानुविद्धमन्तःकरणसत्त्वं भाव्यते तदा ... सुखप्रकाशमयस्य सत्त्वस्य ...सानन्दः समाधिर्भवति RājMār. 8. 7; हृदयं शरीरस्य प्रदेशविशेषस्तस्मिन्नधोमुखस्वल्पपुण्डरीकाभ्यन्तरेऽन्तःकरणसत्त्वस्य स्थानम् RājMār. 55. 3; **Bi** persistence of the internal organ सुषुप्तेऽपि च संस्कारात्मनान्तःकरणसत्त्वात् SiddhāTa. 13. 2; **Bii** existence of the internal organ सवृत्तिकान्तःकरणावच्छिन्नस्यैव चैतन्यस्य प्रमात्वनियमात् तदान्तःकरणसत्त्वेऽपि प्रमात्रभावः SiddhāBi. 109. 4.

अन्तःकरणसद्भाव (antaḥkaraṇa-sadbhāva) *m.* **i** existence of the internal organ अन्तःकरणसद्भावे प्रमाणमाह TātpaṬ. (U.) 162. 15 (*on* 4. 166); मन्त्रं तन्त्रम् ... । अन्तःकरणसद्भाव अविद्यायाश्च संशयः TejoBiU. 5. 53; **ii** continued existence or persistence of the internal organ सुषुप्तावपि सूक्ष्मरूपेणान्तःकरणसद्भावात् तदुपहितः साक्षी तदाप्यस्त्येव SiddhāLeSaṁ. 165. 3.

अन्तःकरणसंत्याग (antaḥkaraṇa-santyāga) *m.* abandonment, i. e. cessation of the internal organ अन्तःकरणसंत्यागादवशिष्टे चिदात्मनि। अहं ब्रह्मेति वाक्येन ब्रह्मत्वं साक्षिणीक्ष्यते PañcDa. 7. 89.

अन्तःकरणसंनिधान (antaḥkaraṇa-sannidhāna) *n.* proximity of the internal organ परमात्मैव ...अन्तःकरणसंनिधानात् ...अविकृतः पश्यति PañcPra. 33. 3.

अन्तःकरणसमाधानापेक्ष (antaḥkaraṇasamādhānāpekṣa) *adj.* dependent on the steadiness or concentration of the mind चक्षुषो दृष्टिसंनिपातः। स च अन्तःकरणसमाधानापेक्षो विवक्षितः GītāBh. (Śaṅ.) 192. 5 (*on* 6. 13)

अन्तःकरणसंबद्ध (antaḥkaraṇa-sambaddha) *adj.* connected with the internal organ स्वतोऽन्तःकरणसंबद्धानां धर्माधर्मादीनां ब्रह्मणश्च वृत्तिमन्तरेणैव सर्वदा भानं स्यात् SiddhāBi. 60. 1.

अन्तःकरणसंबन्ध (antaḥkaraṇa-sambandha) *m.* **i** connection or association with the internal organ, i. e. the intellect मायासंबन्धतश्चेशो जीवोऽविद्यावशस्तथा। अन्तःकरणसंबन्धात्प्रमातेत्यभिधीयते KaṭhRuU. 39; अन्तःकरणसंबन्धे विज्ञानमिति कर्तरि। प्रत्ययः BṛĀraUBhVā. ii. 1.185 (comm. ल्युडन्तस्य विज्ञानमितिशब्दस्यान्तःकरणेन वाचकतया संबन्धे विवक्षिते कर्तरि प्रत्ययः स्यादन्तःकरणस्य ज्ञानकर्तृत्वात्); **ii** connection or association with the internal organ, i. e. the mind यदा रूपं जिघृक्षते पुरुषस्तदा रूपं पश्यति ... न चान्तःकरणसंबन्धमन्तरेण बाह्येन्द्रियस्य विषयग्राहकत्वम् NyāyKa. 310. 1.

अन्तःकरणसंबन्धमात्र (antaḥkaraṇasambandha-mātra) *n.* mere connection with the internal organ, i. e. the mind सुखदुःखादौ स्वत इति नान्तःकरण-संबन्धमात्रेण भानप्रसङ्गः SiddhāBi. 61. 2.

अन्तःकरणसंभव (antaḥkaraṇa-sambhava) *adj.* **i** arising from the internal organ, i. e. the mind स एवं भगवान् रुद्रो मोचयत्यपि सेवितः। दशेन्द्रियमयैः पाशैः अन्तःकरणसंभवैः LiṅgaP. ii. 9. 17; **ii** born of, i.e. produced from the internal organ, i. e. the intellect (by which decision is made) (चेतोऽन्तःकरणं मनः ...मारस्तत्रोद्भवो मतः) अन्तः निश्चयः क्रियतेऽनेन, अन्तःकरणम् ...अन्तःकरणसंभवः comm. *on* NāmMā. 81.

अन्तःकरणसंभिन्न (antaḥkaraṇa-sambhinna) *adj.* **i** connected with, i.e. delimited by the internal organ आलम्बनतया भाति योऽस्मत्प्रत्ययशब्दयोः। अन्तःकरणसंभिन्नबोधः स त्वंपदाभिधः VākyaVṛ. 44; AdhyāU. 31; PaiṅgU. 423. 20 (3.1); PañcDa. 7. 71; **ii** connected, i.e. associated with the internal organ, i.e. the mind अन्तःकरणसंभिन्नं पापं तस्य विनश्यति DevīBhāP. xi. 16. 44.

अन्तःकरणसंभृत (antaḥkaraṇa-sambhṛta) *adj.* held, i. e. cherished in the mind धर्मशास्त्रं महर्षीणामन्तःकरणसंभृतम् AhirbuS. 12.14; SītāU. 6.

अन्तःकरणसंमित (antaḥkaraṇa-sammita) *adj.* cognised properly by the internal organ, i. e. mind विश्वं तदेव सूक्ष्माख्यमन्तःकरणसंमितम् AhirbuS. 51. 25 (comm. चित्तेन सम्यक् प्रमितम्)

अन्तःकरणसर्वस्वमोषण (antaḥkaraṇasarvasva-moṣaṇa) *n.* act of stealing of the entirety of the heart अङ्गनापाङ्गपथिकाभिरन्तःकरणसर्वस्वमोषणाय प्रेषयत्प्रगल्भचोरमिव ...कामपालः कामलेखमालो(च?क)यत् AvantiKa. 202. 9.

अन्तःकरणसहकारित्व (antaḥkaraṇasahakāri-tva) *n.* the state of being an auxiliary (cause) of the internal organ, i. e. the intellect पूर्वपूर्ववर्णसंस्काराणां तत्स्मृतीनां चान्तःकरणनिष्ठानामन्तःकरणसहकारित्वस्यैवौचित्यात् YogSā. 69. 11(4)

अन्तःकरणसाधन (antaḥkaraṇa-sādhana) *adj.* having the internal organ as the means or instrument यस्य पुनर्वृत्तिवृत्तिमतोर्नानात्वं तस्यान्तःकरणसाधनश्चक्षुरादिसाधनश्चात्मा अर्थानुपलभते NyāyVār. 407. 5 (*on* iii. 2. 8)

अन्तःकरणसाध्य (antaḥkaraṇa-sādhya) *adj.* to be accomplished through the internal organ, i. e. the intellect बोधो बुद्धिरिति भावार्थो विवक्षितश्चेत् सोऽन्तःकरणसाध्यः Kiraṇā. 258. 14.

अन्तःकरणसामग्री (antaḥkaraṇa-sāmagrī) *f.* **A** totality (of causes) comprising of the internal organ, i. e. the intellect देशनाकाललब्ध्यादिबाह्यकारणसंपदि। अन्तःकरणसामग्र्यां भव्यात्मा स्याद् विशुद्धकृत् (दृक्) MahāP. 9. 116; **B** totality (of causes) comprising of the internal organ, i. e. the mind (आत्मा) अन्तःकरणसामग्र्यैकत्र स्पष्टीकृतः संकल्पादिदर्शनात्सर्वव्यापित्वे सति Aparā. 988. 20 (*on* 3. 110)

अन्तःकरणसामानाधिकरण्य (antaḥkaraṇa-sāmānādhikaraṇya) *n.* semantic co-referentiality or syntactic agreement with the internal organ, i.e. the mind अन्तःकरणसामानाधिकरण्यं तु कामादीनां 'कामः संकल्पः' इत्यादिश्रुतिसिद्धम् VivaPraSaṁ. 115. 24.

अन्तःकरणसामान्य (antaḥkaraṇa-sāmānya) *n.* **A** internal organ, i. e. ego in general अहमर्थोऽन्तःकरणसामान्यम् SāṁkhyaPraBh. 34. 10 (*on* 1. 64); **B** internal organ, i. e. the mind in general चित्तमन्तःकरणसामान्यम् YogVār. *on* 1.2.

अन्तःकरणसाहित्य (antaḥkaraṇa-sāhitya) *n.* association with the internal organ अन्तःकरणसाहित्यराहित्याभ्यां विशिष्यते। उपाधिर्जीवभावस्य ब्रह्मतायाश्च PañcDa. 7. 85.

अन्तःकरणसृष्टि (antaḥkaraṇa-sṛṣṭi) *f.* creation of the internal organ अन्तःकरणसृष्टौ बुद्ध्युपधानेन विना कर्तृत्वस्याभ्युपगन्तव्यत्वात् ŚrutaPra. ii. 374. 10 (*on* ii. 3. 39)

अन्तःकरणस्थ (antaḥkaraṇa-stha) *adj.* [*f.* - ā] present or existing in the internal organ, i. e. the mind विवेकाविवेकौ रूपादिवत् प्रत्यक्षावुपलभ्येते अन्तःकरणस्थौ TaiUBh. 276. 11 (*on* 2. 8); आशया हि अन्तःकरणस्थया स्मरति स्मर्तव्यम् ChāndoUBh. 447. 8 (*on* vii. 14.1); योऽयं देहे चेष्टयितान्तःकरणस्थः ... सोऽस्यहमेव इति ...यं विदुरीशं तम् ...हरिमीडे HariStu. 31; अन्तःकरणस्थानां कामानां मोक्षमेव हि आह श्रुतिः AnuVyā. 55A. 3 (*on* 3. 4)

अन्तःकरणस्थित (antaḥkaraṇa-sthita) *adj.* present or existing in the internal organ, i. e. the intellect विज्ञप्तिमात्ररूपं यन्ममान्तःकरणस्थितम्। ...हेमनालं महाप्रभम् JayāS. 2. 35.

अन्तःकरणस्थित्यभ्युपगम (antaḥkaraṇasthity-abhyupagama) *m.* acceptance of the existence or persistence of the internal organ

प्रलयेऽप्यन्तःकरणस्थित्यभ्युपगमे तेषामन्तःकरणानामनादितया ब्रह्मकार्यत्वं न स्यात् ŚrutaPra. ii. 226. 4 (*on* ii. 1. 12)

अन्तःकरणस्वरूप (antaḥkaraṇa-svarūpa) *n.* **A** nature of the internal organ, i. e. the mind न ह्यन्तःकरणस्वरूपमात्रं वस्त्वभिव्यञ्जकम् किं तु तदाकारपरिणामः VivaPraSaṁ. 91. 8; **B** nature of the internal organ, i.e. the intellect न तु परिणामसामान्यस्यान्तःकरणस्वरूपस्य वोच्छेदः SāṁkhyaPraBh. 33. 12 (*on* 1. 63)

अन्तःकरणहरण (antaḥkaraṇa-haraṇa) *n.* stealing, i. e. attracting of the heart यथा यूनस्तद्वत्परमरमणीयापि रमणी कुमाराणामन्तःकरणहरणं नैव कुरुते Kuval. 136 (6); SaduktiKa. 298. 17.

अन्तःकरणहरिण (antaḥkaraṇa-hariṇa) *m.* deer in the form of the mind भ्रान्त्या चान्तःकरणहरिणो याति विश्रान्तिम् CaturSaṁ. 4. 18; त्वत्कैः प्रतिपदनिबद्धैर्ध्य-निलवैरथेदानीमन्तःकरणहरिणः शाम्यति मम ŚrīKaC. 25. 60.

अन्तःकरणाग्र्य (antaḥkaraṇāgrya) *m.* one of the thousand epithets of lord Viṣṇu (*lit.* the foremost among the souls) ब्राह्मणश्चान्तःकरणाग्र्यो नमो नमः। इत्येतद्वासुदेवस्य विष्णोर्नामसहस्रकम् PañcaRā. (Nā.) iv. 3.173 (? 183)

अन्तःकरणातिरिक्त (antaḥkaraṇātirikta) *adj.* **A** different from the internal organ, i. e. the intellect घटसृष्टिवदन्तःकरणातिरिक्ताखिलसृष्टेरन्तःकरण-वृत्तिपूर्वकत्वानुमानम् SāṁkhyaPraBh. 77. 10 (*on* 2. 10); **B** different from the internal organ, i. e. the mind अन्तःकरणातिरिक्तोऽहमिति प्रतीयमानो जीवः परस्मान्न भिद्यते BhedaDhi. 6. 3.

अन्तःकरणात्मक (antaḥkaraṇātma-ka) *adj.* **A** having the internal organ for the soul न त्वं राजन्न चाप्यहम्। न तन्मात्रं मया वाच्यं नैवान्तःकरणात्मकौ MārkP. 38. 14; **B** of the nature of the internal organ considered as fourfold महत्तत्त्वं गुणान्तःकरणात्मकम् ŚāraTi. 1. 17; **C** of the nature of the internal organ, i. e. the mind इन्द्रियरूपत्वेन चान्तःकरणात्मकत्वेन चेन्द्रियान्तःकरणरूपम् AṇuBh. 31. 17 (*on* i. 1. 11)

अन्तःकरणात्मरूपा (antaḥkaraṇātma-rūpā) *adj.(f.)* having the internal organ as one's own nature विषयेन्द्रियाणां परां तथान्तःकरणात्मरूपाम्। ... संचिन्तयार्थां सकलार्थदात्रीम्। ... अजामेकां जुषमाणोऽनुशेते SaurP. 50. 72.

अन्तःकरणात्मसंयोग (antaḥkaraṇātma-saṁyoga) *m.* contact between the internal organ, i. e. the mind and the self अन्तःकरणात्मसंयोगस्यासमवायि-कारणस्यापायात्तदपाय इति चेत्, एवमप्यन्तःकरणस्योपादानत्वमेव कल्पनीयम्, अभ्यर्हितत्वात् VivaPraSaiṁ. 115. 17.

अन्तःकरणादि (antaḥkaraṇādi) *adj.* **A** internal organ, i. e. the mind etc. प्रत्यगात्मानं सर्वसाक्षिणं तद्विपर्ययेणान्तःकरणादिष्वध्यवस्यति BrahmSūBh. (Śaṅ.) 5. 4. (*on* i. 1. 0); अन्तःकरणादीनां चानित्यत्वादनाद्यज्ञानाश्रयत्वानुपपत्तिः IṣṭaSi. 195. 14; उक्तं च वार्त्तिककारैरन्तःकरणादेरज्ञानस्याभिव्यञ्जकत्वम् PañcPra. 68. 4.; Bhām. 25. 12 (*on* i. 1. 1); सापि प्रागुक्ता (अविद्यायाः) वृत्तिः अभिज्ञारूपा विनश्यन्ती स्वाश्रये अन्तःकरणादौ संस्कारमाधाय विनश्यति TarkSaṁ. (Ā.) 141. 13; जीवोपाधिः। आभ्यन्तरो बाह्यश्च। ...स्वभावविपरीतावभासहेतुरन्तःकरणादि-र्बाह्यः NyāySu. (Ja.)506A. 9 (*on* iii. 2. 10); अन्तःकरणादौ च योग्यत्वस्यापि व्यावहारिकत्वात् Nyāyāmṛ. 67A. 6; आत्मन एकत्वेऽपि सुखदुःखाद्याश्रयाणामन्तः-करणानां (v.l. अन्तःकरणादीनाम्) भेदाभ्युपगमाद् व्यवस्थोपपत्तेः स्वेनैव स्वाभावग्रहणे विरोधात् SiddhāBi. 17.1; साक्षिभास्येऽन्तःकरणादौ सर्वत्र साक्ष्यभेदे सति प्रमातृभेदस्याप्रयोजकत्वात् SiddhāLeSaṁ. 164. 5; **B** the internal organ, i. e. the intellect etc. स्मृतेर्ह्यसाधारणं कारणं संस्कारः आत्मान्तःकरणादीनां ज्ञानान्तर-साधारण्यात्, स च चिरकालोत्पन्नो न प्रत्युत्पन्नः NyāyVārPari. 148.3; ज्ञानस्य विशेषणत्वे नित्यत्वे च मोक्षदशायामपि अन्तःकरणादेरवस्थानप्रसङ्गात् Tattv-Pradī. (Ci.) 390. 6.

अन्तःकरणादिक (antaḥkaraṇādi-ka) *adj.* the internal organ, i. e. the mind and the like अन्तःकरणादिकं तु ईश्वराश्रितमायापरिणाममहाभूतोपसृष्टजीवाविद्या-कृतभूतसूक्ष्मकार्यम् SiddhāLeSaṁ. 55. 2.

अन्तःकरणादिगत (antaḥkaraṇādi-gata) *adj.* present or existing in the internal organ, i. e. the mind etc. चैतन्यमिति। अन्तःकरणादिगतमित्यर्थः VedāntKa. 24. 12 (*on* i. 1. 0); TarkSaṁ. (Ā.) 141. 13.

अन्तःकरणादिज्ञानसाधन (antaḥkaraṇādi- jñānasādhana) *n.* means of cognition such as the internal organ etc. आत्मान्तःकरणादिज्ञानसाधनसंपन्नः Mitā. 387. 4 (*on* 3. 141)

अन्तःकरणादिदोष (antaḥkaraṇādi-doṣa) *m.* defect in the internal organ, i. e. the mind etc. अन्तःकरणादिदोषेणाशनायादिना चिदात्मा चिदात्मनो गुणेन चैतन्यानन्दादिनान्तःकरणादि न संबध्यते Bhām. 25. 11 (*on* i. 1. 1)

अन्तःकरणादिधर्म (antaḥkaraṇādi-dharma) *m.* attribute such as the internal organ, i. e. the mind etc. (हानोपादाननिर्मुक्ता) अशरीरस्य ब्रह्मणोऽ-न्तःकरणादिधर्माणामसंभवात् ताभ्यां निर्मुक्ता निःसङ्गा LalitāTriBh.309.13 (*on* 33)

अन्तःकरणादिनिष्कृष्ट (antaḥkaraṇādi-niṣkṛṣṭa) *adj.* differentiated from the internal organ, i. e. the mind etc. तत्र कार्श्यादिनिष्कृष्टस्य शरीरस्यैव स्थौल्याधिकरणतया विवेकिनामुद्देश्यत्वम् इति वाच्यम्, प्रकृतेऽप्यन्तःकरणादिनिष्कृष्टस्यैव तदुद्देशविषयत्वात् AdvaiSi. 597. 16.

अन्तःकरणादिरूपोपाधि (antaḥkaraṇādirūpopādhi) *m.* adventitious condition or adjunct like the internal organ, i. e. the mind etc. न चौपाधिका धर्माः ... उपाधिकृतत्वरूपत्वे तूक्तनित्यत्वश्रुतिविरोधात् अन्तःकरणादिरूपोपाधिसृष्टेः प्रागेवेक्षितृत्वाति(?दि)श्रुतेश्चNyāyāmṛ. 490A. 9; AdvaiSi. 721. 10.

अन्तःकरणादिवाचकत्व (antaḥkaraṇādivācaka-tva) *n.* the state of being denotative or expressive of the internal organ etc. कः पुनरयं शब्दोऽन्तः-करणादिवाचकत्वेन निषिध्यते Śarka. 77. 3.

अन्तःकरणादिविपर्यय (antaḥkaraṇādi-viparyaya) *m.* reverse of the internal organ, i. e. the mind etc. अन्तःकरणादिविपर्ययेण अन्तःकरणाद्यचेतनं तस्य विपर्ययः चैतन्यं तेन Bhām. 30. 22 (*on* i. 1. 1)

अन्तःकरणादिविशिष्टभेद (antaḥkaraṇādiviśiṣṭa-bheda) *m.* distinction qualified by the internal organ, i. e. the mind etc. कर्मण्यधिकारानधिकारादि-व्यवस्था चान्तःकरणादिविशिष्टभेदेनाप्युपपद्यते BhedaDhi. 65. 5.

अन्तःकरणादिसंस्कारावच्छेद (antaḥkaraṇādisaṁskārāvaccheda) *m.* [Inst.] through the delimitation of the impression of the internal organ, i. e. the mind सुषुप्तौ तावदज्ञानाद्याकारा वृत्तिः ...। सा च ...परिच्छिन्नैव अन्तः-करणादिसंस्कारावच्छेदेन चोत्पद्यते SiddhāTa. 13. 15.

अन्तःकरणादिसङ्गित्व (antaḥkaraṇādi-saṅgitva) *n.* association or connection with the internal organ, i. e. the mind etc. विवरणे च प्रतिकर्मव्यवस्थायां ब्रह्मचैतन्यस्योपादानतया घटादिसङ्गित्वं, जीवचैतन्यस्य तदसङ्गित्वेऽप्यन्तःकरणादि-सङ्गित्वं च वर्णितम् SiddhāLeSaṁ. 58. 1.

अन्तःकरणादिसापेक्षत्व (antaḥkaraṇādi-sāpekṣatva) *n.* expectancy of or dependence on the internal organ, i. e. the mind etc. ननु मुक्तस्य संसारः स्यादिति किं संसाराधिकरणस्वरूपेणैक्यमापाद्यते। उत संसारानुभवः ... नोत्तरः, अनुभवस्यान्तः-करणादिसापेक्षत्वात् Vādā. 146. 1.

अन्तःकरणाद्यधीन (antaḥkaraṇādy-adhīna) *adj.* dependent on the internal organ, i. e. the mind etc. तप आलोचनं स्वरूपज्ञानमयम्, नान्तःकरणाद्यधीनम् PrakaVi. 89. 19.

अन्तःकरणाद्यपरपर्याय (antaḥkaraṇādy-aparaparyāya) *adj.* which has the (word) mind *(antaḥkaraṇa)* etc. as another synonym निरोधप्रतियोगि-भूतानाम् ...वृत्तीनामन्तःकरणाद्यपरपर्यायचित्तधर्मत्वाङ्गीकारात् SarvaDaSaṁ.15.184.

अन्तःकरणाद्यभाव (antaḥkaraṇādy- abhāva) *m.* absence of the internal organ, i.e. the mind etc. यदुक्तं मुक्तस्यान्तःकरणाद्यभावान्न संसारानुभवप्राप्तिरिति, तदसत् Vādā. 147. 7.

अन्तःकरणाद्यभेदभ्रम (antaḥkaraṇādyabheda-bhrama) *m.* erroneous notion or illusion of indentity of the internal organ, i. e. the mind etc. (with the soul) स्वस्यान्तःकरणाद्यभेदभ्रमो न स्यात् AdvaiSi. 517. 4; GuruCandr. ii.252.19.

अन्तःकरणाद्यवच्छिन्न (antaḥkaraṇādy-avacchinna) *adj.* delimited by the internal organ, i. e. the mind etc. अन्तःकरणाद्यवच्छिन्नः प्रत्यगात्मा ... इतरे-तराध्यासोपादानस्तदुपादानश्चाध्यास इत्यनादित्वाद् बीजाङ्कुरवन्नेतरेतराश्रयत्वम् Bhām. 30. 25 (*on* i. 1. 1)

अन्तःकरणाद्यविशिष्ट (antaḥkaraṇādy-aviśiṣṭa) *adj.* not qualified by the internal organ, i.e. the mind etc. अन्तःकरणाद्यविशिष्टात्मभेदस्य श्रुतौ क्वाप्य-दर्शनात् BhedaDhi. 65. 3.

अन्तःकरणाद्युपहित (antaḥkaraṇādy-upahita) *adj.* conditioned by the internal organ, i. e. the mind etc. स्वरूपचैतन्यमन्तःकरणाद्युपहितं फलचैतन्यतया प्रकाशयति LalitāTriBh. 340. 19 (*on* 51)

अन्तःकरणाद्युपाधि (antaḥkaraṇādy-upādhi) *m.* adventitious condition or adjunct such as the internal organ, i. e. the mind etc. सुषुप्तादावन्तः-करणाद्युपाधिरभिभूतो भवति VedāntKa. 371. 19 (*on* iii. 2. 9); 'आत्मानमात्मना' इत्यादावन्तःकरणाद्युपाधिकृतभेदवत् शब्दरूपोपाधिकृतभेदाग्रहणे मानाभावात् LaŚabdeŚe. i. 498. 2.

अन्तःकरणाद्युपाधिक (antaḥkaraṇādyupādhi-ka) *adj.* having the adventitious condition or adjunct like the internal organ, i. e. the mind etc.

स्वभावतो निर्गुणस्यैव तस्यान्तःकरणाद्युपाधिककर्तृत्वाद्याश्रयत्वप्रतिभासोपपत्तेः VedāntPari. 330. 2.

अन्तःकरणाद्युपाधिकल्पित (antaḥkaraṇādyupādhi-kalpita) *adj.* assumed or imposed through the adventitious condition or adjunct like the internal organ, i. e. the mind etc. (जीवाः) अन्तःकरणाद्युपाधिकल्पिता हि ते Bhām. 247. 5 (*on* i. 3. 30)

अन्तःकरणाद्युपाधिप्रतिबिम्ब (antaḥkaraṇādyupādhi-pratibimba) *n.* reflection on the adventitious condition or adjunct like the internal organ, i. e. the mind etc. अन्तःकरणाद्युपाधिप्रतिबिम्बं प्रति तदनन्तर्गतस्यैव बिम्बत्वं स्यात् SiddhāLeSaṁ. 96. 7.

अन्तःकरणाद्युपाधिभेद (antaḥkaraṇādyupādhi-bheda) *m.* distinction of the adventitious conditions or adjuncts such as the internal organ etc. अन्तःकरणाद्युपाधिभेदादप्रतिसंधानमिति चेन्न ŚatDū. 221. 6.

अन्तःकरणाद्युपाधिविरह (antaḥkaraṇādyupādhi-viraha) *m.* absence of the adventitious conditions or adjuncts such as the internal organ, i. e. the mind etc. अन्तःकरणाद्युपाधिविरहाज्जागरापेक्षयानन्दाभिव्यक्तेः (सुषुप्तौ) SiddhāTa. 14. 2.

अन्तःकरणाधिष्टान (antaḥkaraṇādhiṣṭhāna) *n.* **1** locus or substratum of the internal organ, i. e. the mind हृदयमन्तःकरणाधिष्ठानम् AitUBh. 254. 9 (*on* 1. 4); **2** control over the internal organ, i. e. the mind (श्रोत्रस्य) प्रयोज्यत्वमन्तःकरणाधिष्ठानद्वारेण NyāyKa. 71. 10.

अन्तःकरणाधिष्ठित (antaḥkaraṇādhiṣṭhita) *adj.* governed by the internal organ, i. e. the mind नेन्द्रियमात्रं प्रत्यक्षम्। किन्त्वन्तःकरणाधिष्ठितम् NyāySu. (Ja.) 76B. 5 (*on* i. 1. 1)

अन्तःकरणाध्यास (antaḥkaraṇādhyāsa) *m.* superimposition of the internal organ, i. e. the mind (on the self) ब्रह्मणि...अन्तःकरणाध्यासेऽपि अविद्यासंबन्धित्वस्यैव सादृश्यत्(?स्य) विद्यमानत्वात् AdvaiSi. 496. 23; देहेन्द्रियादि विना कथमन्तःकरणाध्यासः GuruCandr. ii. 180. 19.

अन्तःकरणाध्यासनिवृत्ति (antaḥkaraṇādhyāsa-nivṛtti) *f.* removal of the superimposition of the internal organ, i.e. the mind (on the self) सर्वजीवसाधारणेषु पृथिव्यादिषु सत्स्वपि अन्तःकरणाध्यासनिवृत्तौ प्रमातृत्वाभावात् ...एतद्दर्शनं न प्राप्नोति VivaPraSaṁ. 246. 3.

अन्तःकरणाध्यासप्रसङ्ग (antaḥkaraṇādhyāsa-prasaṅga) *m.* undesired occasion for the superimposition of the internal organ, i. e. the mind देहेन्द्रियाद्यभावेऽप्यज्ञानसद्भावेनान्तःकरणाध्यासप्रसङ्गः AdvaiSi. 498. 10.

अन्तःकरणाध्याससंभव (antaḥkaraṇādhyāsa-sambhava) *m.* possibility of the superimposition of the internal organ, i. e. the mind (on the self) अन्तःकरणाध्याससंभवेन...नात्ममात्रगतमुक्तीच्छा AdvaiSi. 603. 5.

अन्तःकरणानधिष्ठित (antaḥkaraṇānadhiṣṭhita) *adj.* not governed by the internal organ, i. e. the mind प्रलीने च तस्मिन् मनस्युपरतेन्द्रियग्रामो भवत्यन्तःकरणानधिष्ठितानामिन्द्रियाणां विषयग्रहणाभावात् NyāyKa. 185. 6.

अन्तःकरणानन्तःकरणविभाग (antaḥkaraṇānantaḥkaraṇa-vibhāga) *m.* division as what is the internal organ and as what is other than the internal organ न ह्यन्तःकरणानन्तःकरणविभागोऽत्र क्रियते, किं तु चिदचिद्विभाग एवेति भावः ŚrutaPra. iB. 201. 16 (*on* i. 1. 13)

अन्तःकरणानवच्छिन्नत्ववत् (antaḥkaraṇānavacchinnatva-vat) *adv.* like the state of not being delimited by the internal organ, i. e. the mind न हि सुषुप्तिकाले अन्तःकरणानवच्छिन्नत्ववदज्ञानानवच्छिन्नत्वमप्यस्ति AdvaiSi. 810. 16.

अन्तःकरणानिष्ठ (antaḥkaraṇāniṣṭha) *adj.* not existing in the internal organ, i. e. the mind स्वप्रकाशत्वम् ... अन्तःकरणानिष्ठमपि तदुपादेयवृत्तिनिष्ठमस्तु Nyāyāmṛ. 218B. 7.

अन्तःकरणानुरूप (antaḥkaraṇānurūpa) *adj.* [*f.*-ā] **i** befitting or conforming to one's mental disposition आकारम् ...दधानमन्तःकरणानुरूपम्। नियोजयिष्यन् ...तं तपःसमाधौ मुनिः Kirātā. 3. 27 (comm. अन्तःकरणशब्देन-तद्वृत्तिरुत्साहो लक्ष्यते); **ii** befitting or conforming to the internal organ, i. e. the mind सत्त्वमन्तःकरणं सर्वस्य पुरुषस्यान्तःकरणानुरूपा श्रद्धा भवति GītāBh. (Rā.) 615. 25 (*on* 17.3)

अन्तःकरणान्तररहित (antaḥkaraṇāntara-rahita) *adj.* devoid of another internal organ, i. e. the mind (as the means) विभु चान्तःकरणं ज्ञानमन्तःकरणान्तररहितमिति शेषः TātpaṬ. (Vā.) 564. 22 (*on* iii. 2. 19)

अन्तःकरणान्तरसंसर्ग (antaḥkaraṇāntara-saṁsarga) *m.* association with another internal organ, i. e. the mind अन्तःकरणान्तरसंसर्गे पुनरपि बन्धापत्तेः SiddhāLeSaṁ. 448. 8.

अन्तःकरणान्तराभ्युपगम (antaḥkaraṇāntarābhyupagama) *m.* acceptance of another internal organ, i. e. the mind किं बुद्ध्युपधानेन कर्तृत्वं परमात्मन उच्यते ...न ...। प्रलयावस्थायामन्तःकरणान्तराभ्युपगमे एकत्वावधारणविरोधाच्च ŚrutaPra. ii. 374. 11 (*on* ii. 3. 39)

अन्तःकरणापाय (antaḥkaraṇāpāya) *m.* disappearance or loss of the internal organ, i. e. the intellect तथाभूतं नाशमनुभूय न संज्ञाविशेषपरिज्ञानं भवति, अन्तःकरणापायेऽप्रमातृत्वात् PrakaVi. 363. 21.

अन्तःकरणाभाव (antaḥkaraṇābhāva) *m.* **A** absence of (persistence of) the internal organ, i. e. the mind अन्तःकरणभावात् (better अन्तःकरणाभावात्) जाग्रत्स्वप्नसुषुप्तीनामभावे जीवत्ववर्जितप्रत्यगात्मचैतन्यस्वभावो नित्यस्वभावं ब्रह्म तत्त्वंपदार्थौ परिशिष्टौ PañcPra. 36. 5; न चैवं प्रलयेऽन्तःकरणाभावाद्धर्मादिकं क्व तिष्ठतिति वाच्यम् SāṁkhyaPraBh. 121. 30 (*on* 5. 25); सुषुप्तावन्तःकरणाभावात् ... न ... अन्तःकरणपरिणामः SiddhāTa. 9. 8; **B** non-existence of the internal organ, i. e. the mind अन्तःकरणाभावो युगपत्स्मरणानि स्युरपेक्षणीयाभावात् NyāyKa. 73. 4; कथं ब्रह्मणः सर्वज्ञत्वं संगच्छते। जीववदन्तःकरणाभावेन ज्ञातृत्वस्यैवायोगात् SiddhāLeSaṁ. 119. 2; ईश्वरे ... जीववदन्तःकरणवृत्तिरूपा प्रीतिर्नोत्पद्यते। अन्तःकरणाभावात् VīraMi. (Pūjā.) 1. 10; ईश्वरे प्रीतिस्तु अन्तःकरणाभावेऽपि मायावृत्तिविशेषरूपैव सिसृक्षादिवद् बोध्या BālamBha. i. 467. 7 (*on* 1. 209)

अन्तःकरणाभावापत्ति (antaḥkaraṇābhāvāpatti) *f.* undesired contingency of the absence of-persistence of the internal organ, i. e. the mind (संस्कारशेषत्वे) किं कारणमेव तिष्ठति, उत कार्यमपि। आद्ये अन्तःकरणाभावापत्तिः VivaPraSaṁ. 57. 21.

अन्तःकरणाभासादि (antaḥkaraṇābhāsādi) *adj.* illusory or false appearance etc. of internal organ, i.e. the intellect अयम् (ब्रह्मविद्) ... अन्तःकरणाभासादीनामवभासकः सन् ... ब्रह्मावतिष्ठते VedāntSā. (Sa.) 34.6.

अन्तःकरणाभिप्रायाशङ्का (antaḥkaraṇābhiprāyāśaṅkā) *f.* apprehension about the internal organ being the intended sense or meaning विज्ञानेन विज्ञानमादायेति ... विज्ञानेनेति चान्तःकरणाभिप्रायाशङ्कां परिणेतुम् ... उपपद्यते BrahmSūBh. (Bhā.) 137. 6 (*on* ii. 3. 28)

अन्तःकरणाभिव्यक्त (antaḥkaraṇābhivyakta) *adj.* which is manifested in the internal organ न हि वयं चैतन्यस्य केवलस्य विषयानुभवहेतुत्वं ब्रूमः, तस्याविद्यावृतत्वात्। किं तर्हि। अन्तःकरणाभिव्यक्तस्य तथात्वम् VivaPraSaṁ. 89. 2.

अन्तःकरणाभेदाध्यास (antaḥkaraṇābhedādhyāsa) *m.* superimposition of the non-distinction, i. e. identity of the internal organ (with the soul) न चानुभवविरोधः, अन्तःकरणाभेदाध्यासबलात् तदननुभवतद्विपरीतानुभवयोरुपपत्तेः AdvaiSi. 541. 5.

अन्तःकरणारण्यलग्न (antaḥkaraṇāraṇya-lagna) *adj.* ignited in the forest in the form of the internal organ, i.e. the mind सर्वेऽपि लोकपालाः ... अन्तःकरणारण्यलग्नमदनदावानलानलम् ... अभ्यर्थितवन्तः NalaCam. 7. 22 (18)

अन्तःकरणारूढ (antaḥkaraṇārūḍha) *adj.* reflected on (*lit.* mounted upon) the internal organ, i. e. the mind रूपान्तरमन्तःकरणारूढं न भवति AṇuBh. 216. 12 (*on* iii.3.7)

अन्तःकरणार्थ (antaḥkaraṇārtha) *adj.* meant for the sake of the internal organ, i. e. the mind न चात्रात्मान्तःकरणार्थः येनात्मगतो मोक्षो मनस उद्देश्यः स्यात् Nyāyāmṛ. 390B. 7; AdvaiSi. 610. 1; उद्देश्यगतत्वानपायात् अन्तःकरणार्थाहमर्थाभिन्नात्मगतत्वस्यानपायात् GuruCandr. iii. 86. 22; LaCandr. 610. 32.

अन्तःकरणावच्छिन्न (antaḥkaraṇāvacchinna) *adj.* delimited by the internal organ, i. e. the mind जीवब्रह्मणोरैक्यं नाम किम् ... संविदवच्छिन्नान्तःकरणस्य संविदश्च, उतान्तःकरणावच्छिन्नसंविदः केवलसंविदश्च ŚrutaPra. iB. 168. 2 (*on* i. 1. 4); अविद्यावच्छिन्नमन्तःकरणावच्छिन्नं वा ब्रह्म प्रत्यगात्मशब्दाभिधेयम् VedāntRaMañ. 1 (6. 20); सौषुप्तिकाज्ञानादिस्मर्तृत्वम्...अन्तःकरणावच्छिन्नस्याहमर्थस्य वा Nyāyāmṛ. 375B. 7; 224B. 8; 582B. 6; अन्तःकरणावच्छिन्नो जीवः SiddhāBi. 59. 1; SiddhāLeSaṁ. 95. 4; अन्तःकरणावच्छिन्नचित्येव ... भ्रान्तत्वस्वीकारादविद्यावच्छिन्नचैतन्यमधिष्ठानम् GuruCandr. ii. 180. 20; अन्तःकरणावच्छिन्नं चैतन्यं प्रमातृचैतन्यम् VedāntPari. 44. 6; SiddhāTa. 49. 2; अन्तःकरणावच्छिन्नं चैतन्यम् YatīndraDī. 15. 4; 75. 1; आत्मानं जानातीत्यादौ चात्मभेदः कल्प्यते। एकः शरीरावच्छिन्नोऽपरस्त्वन्तःकरणावच्छिन्नस्तत्रान्तःकरणावच्छिन्नः कर्ता चेच्छरीरावच्छिन्नः कर्म VaiyāBhū. 57. 17 (*on* 13)

अन्तःकरणावच्छिन्नचैतन्य (antaḥkaraṇāvacchinna-caitanya) *n.* consciousness delimited by the internal organ, i. e. the mind अन्तःकरणावच्छिन्नचैतन्यरूपत्वे जीवस्यावच्छेदकान्तःकरणतत्तद्विषयाकारवृत्त्या तत्तद्विषयावच्छिन्नचैतन्याभिव्यक्तौ तत्तत्प्रकाशः AdvaiSi. 480. 4; 489. 4; SiddhāLeSaṁ. 131. 2; कथं घटादेरन्तःकरणावच्छिन्नचैतन्याभेदः। अहमिमं पश्यामीति भेदानुभवविरोधादिति चेत्, उच्यते VedāntPari. 65. 1; तत्र जीवो नाम अन्तःकरणावच्छिन्नचैतन्यम् VedāntPari. 96. 1; 117. 2.

अन्तःकरणावच्छिन्नजीव (antaḥkaraṇāvacchinna-jīva) *m.* individual soul which is delimited by the internal organ, i. e. the mind सर्वज्ञमप्यन्तःकरणावच्छिन्नजीवाज्ञानविषयतया आवृतमिति व्यपदेशात् SiddhāBi. 61. 5.

अन्तःकरणावच्छिन्नसाक्षिचैतन्य (antaḥkaraṇāvacchinna-sākṣicaitanya) *n.* witness-consciousness which is delimited by the internal organ, i. e. the mind द्विविधमावरणम्। एकमसत्त्वापादकमन्तःकरणावच्छिन्नसाक्षिचैतन्यनिष्ठम् SiddhāBi. 65. 3.

अन्तःकरणावच्छेद (antaḥkaraṇāvaccheda) *m.* delimitation by the internal organ, i. e. the mind ब्रह्मणि ... अन्तःकरणावच्छेदस्याभावात् Nyāyāmṛ. 582B. 3.

अन्तःकरणावच्छेद्य (antaḥkaraṇāvacchedya) *adj.* to be delimited by the internal organ, i. e. the mind एतेनावच्छिन्नस्य जीवत्वे कर्तृभोक्तृसमययोस्तत्र तत्रान्तःकरणावच्छेद्यचैतन्यप्रदेशस्य भिन्नत्वात् कृतहानाकृताभ्यागमप्रसङ्ग इति निरस्तम् SiddhāLeSaṁ. 97. 2.

अन्तःकरणावधि (antaḥkaraṇāvadhi) *adj.* having the internal organ as the limit, i. e. as the adventitious condition तमोऽन्तः कारणं बुद्धेर्दृष्टान्तःकरणावधिः BṛĀraUBhVā. iv. 3. 1528.

अन्तःकरणावस्था (antaḥkaraṇāvasthā) *f.* stage or condition of the internal organ, i. e. the mind आत्मनोऽन्तःकरणावस्थाविशेषोपाधिजनितो विशेषः ... फलम् PañcPā. 24. 19 (*on* i. 1. 1); परमात्मैव ... अन्तःकरणावस्थाः ... पश्यति PañcPra. 33. 3.

अन्तःकरणाविद्यावृत्ति (antaḥkaraṇāvidyā-vṛtti) *f.* function or psychosis of the internal organ and nescience अन्तःकरणाविद्यावृत्त्योः प्रमाणदोषाभ्यां जन्यतयेहोभयाभावेन वृत्त्ययोगाच्च Nyāyāmṛ. 336A. 6.

अन्तःकरणाविद्याविशिष्ट (antaḥkaraṇāvidyā-viśiṣṭa) *adj.* qualified, i. e. delimited by the internal organ, i. e. the mind and nescience अत्र यो भाति अन्तःकरणाविद्याविशिष्टस्याहमर्थस्य निर्दुःखाद् भेदः स ममापीष्टः Nyāyāmṛ. 568A. 5.

अन्तःकरणाशय (antaḥkaraṇāśaya) *m.* particular state, i. e. psychosis of the internal organ, i. e. the mind तमः नाशयामि आत्मभावस्थः आत्मनः भावः अन्तःकरणाशयः तस्मिन्नेव स्थितः GītāBh. (Śaṅ.) 285. 3 (*on* 10. 11)

अन्तःकरणाशुद्धिरूप (antaḥkaraṇāśuddhi-rūpa) *adj.* of the nature of impurity of the internal organ, i. e. the mind अन्तःकरणाशुद्धिरूपस्य पापस्य च प्रतिबन्धकत्वम् AdvaiSi. 739. 17.

अन्तःकरणाश्रय (antaḥkaraṇāśraya) *adj.* [*f.* - ā] **A** having the internal organ, i.e. the mind as the substratum (दर्पः) अन्तःकरणाश्रयः दोषविशेषः GītāBh. (Śaṅ.) 462. 4 (*on* 16. 18); बाह्यवागादिचेष्टा च या चान्तःकरणाश्रया BṛĀraUBhVā. i. 4. 1850; TātpaṬ. (Vā.) 569. 8 (*on* iii. 2. 35); **B** based on, i. e. caused by the internal organ, i.e. the intellect अभिन्नस्य चितेस्तद्वद्भेदोऽन्तःकरणाश्रयः NaiṣkaSi. 75. 3 (comm. बुद्ध्युपाधिनिबन्धनः)

अन्तःकरणाश्रयता (antaḥkaraṇāśraya-tā) *f.* the state of having the internal organ as the substratum तर्हि ज्ञानस्यान्तःकरणाश्रयताभ्रमः स्यात् NyāySiA. 212. 19.

अन्तःकरणाश्रयत्व (antaḥkaraṇāśraya-tva) *n.* the state of having the internal organ as the substratum सिद्धान्ते ज्ञानेच्छासुखादीनामन्तःकरणाश्रयत्वाभ्युपगमात् SiddhāBi. 15. 3.

अन्तःकरणाश्रिता (antaḥkaraṇāśritā) *adj.* (*f.*) abiding in the internal organ, i. e. the mind अन्तःकरणाश्रितायां शब्दादिजन्यवृत्तौ आद्यस्य व्यभिचाराच्च Nyāyāmṛ. 527B. 6.

अन्तःकरणासाधारणधर्म (antaḥkaraṇāsādhāraṇadharma) *m.* unique characteristic or property of the internal organ, i. e. the intellect ज्ञातृत्वमन्तःकरणासाधारणधर्मः स्यात् ŚrutaPra. iA. 158. 23 (*on* i. 1. 1)

अन्तःकरणास्वास्थ्य (antaḥkaraṇāsvāsthya) *n.* uneasiness or illness of the internal organ व्याध्याद्यन्यतरेणान्तःकरणास्वास्थ्यमनध्याय एतेषाम् PārāSū. 63. 19.

अन्तःकरणेन्द्रियधर्म (antaḥkaraṇendriya-dharma) *m.* property or quality of the internal organ, i. e. the mind and the external sense-organ जीवसाम्येऽन्तःकरणेन्द्रियधर्माः प्राप्नुवन्ति AṇuBh. 98. 7 (*on* i. 3. 42)

अन्तःकरणेन्द्रियसंयोग (antaḥkaraṇendriya-saṁyoga) *m.* contact between the internal sense-organ, i.e. the mind and the external sense-organ विषयोपलम्भानु-मितान्तःकरणेन्द्रियसंयोगः प्रयत्नपूर्वकान्तःकरणक्रियाजन्यः NyāyKa. 263. 17.

अन्तःकरणेन्द्रियसंयोगत्व (antaḥkaraṇendriyasaṁyoga-tva) *n.* the state of being a contact between the internal sense-organ, i. e. the mind and the external sense-organ विषयोपलम्भानुमितान्तःकरणेन्द्रियसंयोगः प्रयत्नपूर्वकान्तःकरणक्रियाजन्योऽन्तःकरणेन्द्रियसंयोगत्वात् NyāyKa. 263. 18.

अन्तःकरणैकगोचर (antaḥkaraṇaika-gocara) *m.* object of only the internal organ, i. e. the mind सुखदुःखप्रायास्तु भरताद्युक्तरूपाः स्थायिव्यभिचारिरूपा रतिनिर्वेदादयोऽन्तःकरणैकगोचरीभूताः (v. l. अन्तःकरणैकगोचराः) बहिरात्मना भान्ति PratyabhiVi. i. 420. 1 (*on* i. 8. 9)

अन्तःकरणैकत्वानेकत्व (antaḥkaraṇaikatvānekatva) *n.* oneness or singleness and plurality of the internal organ, i. e. the mind न चान्तःकरणैकत्वानेकत्वे अनुसंधानाननुसंधानयोस्तन्त्रे Nyāyāmṛ. 580B. 8.

अन्तःकरणैकविषयत्व (antaḥkaraṇaikaviṣaya-tva) *n.* the state of being the object of merely the internal organ, i. e. the mind तद्वदेकस्यैव वस्तुनः अन्तरन्तःकरणैकविषयत्वादेकत्वम् Bhāsk. ii. 39. 20 (*on* ii. 2. 2)

अन्तःकरणैकवेद्य (antaḥkaraṇaika-vedya) *adj.* (used as noun) what is cognisable or knowable through merely the internal organ, i. e. the mind तस्य प्रथमसृष्टावस्माकमन्तःकरणैकवेद्यमिव ध्यामलप्रायम् ... यद्भावचक्रम् PratyabhiVi. ii. 219. 5 (*on* iii. 1. 2)

अन्तःकरणैकवेद्यता (antaḥkaraṇaikavedya-tā) *f.* the state of being what is cognisable through merely the internal organ, i. e. the mind सुखादीनाम् अन्तःकरणैकवेद्यतापादनमेव निर्माणम् PratyabhiVi. ii. 157. 3 (*on* ii. 4. 4)

अन्तःकरणैकवेद्यत्व (antaḥkaraṇaikavedya-tva) *n.* the state of being what is cognisable or knowable through merely the internal organ, i. e. the mind एकत्वम्आभासान्तरामिश्रतायामन्तःकरणैकवेद्यत्वे चिन्मात्रतायाम् PratyabhiVi. ii. 39. 4 (*on* ii. 2. 2); Bhāsk. ii. 36. 14 (*on* ii. 2. 2)

अन्तःकरणैक्य (antaḥkaraṇaikya) *n.* oneness of the internal organ, i. e. the identity of the mind (with the soul) अन्तःकरणैक्यात्तदुपपत्तिरिति चेन्न ŚatDū. 149. 29.

अन्तःकरणैक्याध्यास (antaḥkaraṇaikyādhyāsa) *m.* superimposition of oneness or identity of internal organ, i. e. the mind (with the soul) अन्तःकरणैक्याध्यासस्यानुसंधानसामग्रीत्वेन ... कथं तद्वारणम् LaCandr. 816. 39.

अन्तःकरणोच्छित्तिद्वार (antaḥkaraṇocchitti-dvāra) *n.* [Inst.] through the loss of the internal organ, i. e. the mind तस्मिन् समाधौ स्थितस्य छिद्रेष्वन्तरायेषु यानि प्रत्ययान्तराणि ... संस्कारेभ्यः ... प्रभवन्ति अन्तःकरणोच्छित्तिद्वारेण तेषां हानं कर्तव्यमित्युक्तं भवति RājMār. 80. 15.

अन्तःकरणोज्ज्वलन (antaḥkaraṇojjvalana) *n.* the act of enlightening of the internal organ, i. e. the intellect नित्योज्ज्वलचैतन्यसंयोगविशेषमात्रस्य संयोगविशेषजन्यचैतन्यप्रतिबिम्बस्यैव वान्तःकरणोज्ज्वलनरूपत्वात् SāṁkhyaPraBh. 48. 24 (*on* 1. 99)

अन्तःकरणोत्तीर्ण (antaḥkaraṇottīrṇa) *adj.* (used as noun) that which is different from the internal organ, i. e. the mind अन्तःकरणोत्तीर्णस्य ज्ञातृत्वमाह तस्माद्वा इति ŚrutaPra. iA. 154. 18 (*on* i. 1. 1)

अन्तःकरणोत्थ (antaḥkaraṇottha) *adj.* arising in the mind अगस्त्यदृष्ट्वा रघुनन्दनस्ततः स खेदमन्तःकरणोत्थमत्यजत् ŚaṅkaDigVi. (Mā.) 14. 122.

अन्तःकरणोत्पत्ति (antaḥkaraṇotpatti) *f.* origination of the internal organ, i. e. the mind न च कर्माविद्यासंस्कारा अन्तःकरणोत्पत्तेः प्राग्विद्यमाना अपि जीवं विभजन्ते VivaPraSaṁ. 308. 12; अन्तःकरणोत्पत्तेः पूर्वोक्ताया आञ्जस्येनोपपत्तये मनोवैभवपूर्वपक्षमपाकरोति SāṁkhyaPraBh. 132. 29 (*on* 5. 69)

अन्तःकरणोत्पादनार्ह (antaḥkaraṇotpādanārha) *adj.* capable of producing the internal organ, i. e. the mind शक्तिशब्देन किमविद्यामात्रं विवक्षितम्, उतान्तःकरणोत्पादनार्हमचिद्द्रव्यम् ŚrutaPra. ii. 370. 11 (*on* ii. 3. 32)

अन्तःकरणोद्युक्त (antaḥkaraṇodyukta) *adj.* yearning or eager at heart अन्तःकरणोद्युक्ता द्रष्टारो गायना अपि RājTa. (Śrī.) 1 (4). 6.

अन्तःकरणोपधान (antaḥkaraṇopadhāna) *n.* adventitious condition in the form of internal organ, i. e. the mind अपरे तु... अन्तःकरणोपधानापादित-

रागद्वेषसुखदुःखाद्यशिवगुणनिर्भासम् ... इमम् (आत्मानम्) अभिदधति ĀtmaSi. 3. 3; अन्तःकरणोपधानेन जीवः साक्षी SiddhāLeSaṁ. 164. 6.

अन्तःकरणोपरति (antaḥkaraṇoparati) *f.* cessation or quietude of the internal organ, i.e. the mind दमः अन्तःकरणोपरतिः। बहिःकरणोपरतिरिति केचित् SanatBh. 234. 9 (*on* 1. 43); शमः अन्तःकरणोपरतिः SanatBh. 251. 12 (*on* 2. 19)

अन्तःकरणोपरम (antaḥkaraṇoparama) *m.* cessation or quietude of the internal organ, i. e. the mind यश्चेन्द्रियाणामन्तःकरणोपरमस्तच्छौचं बाह्यं मृज्जलादिना MāṭhVṛ. 39. 12 (*on* 23)

अन्तःकरणोपराग (antaḥkaraṇoparāga) *m.* **A** association with the internal organ, i. e. the intellect स्वज्ञानमस्याः पुनर्नास्त्यन्तःकरणोपरागशबलीभावं विना युक्तितः SaṁkṣeŚā. 3. 8 (ii. 153. 12); **B** association with the internal organ, i. e. the mind अन्तःकरणोपरागनिमित्तं मिथ्यैवाहंकर्तृत्वमात्मनः PañcPā. 20. 25 (*on* i. 1. 1); एवं च सति अन्तःकरणोपरागेण यत्रावरणमभिभूयते VivaPraSaṁ. 90. 9; अन्तःकरणोपरागकालीनानुभवजन्यत्वाभावाच्च न तत्रोल्लेखाभावेऽपि स्मरणत्वानुपपत्तिः SiddhāBi. 121. 3.

अन्तःकरणोपलक्षित (antaḥkaraṇopalakṣita) *adj.* adventitiously qualified by the internal organ, i. e. the mind अन्तःकरणोपलक्षितज्ञप्त्यैक्यं विषय इति चेत् - तदुपलक्षितज्ञप्तेः केनैक्यमुपदिश्यते ŚrutaPra. iB. 168. 5 (*on* i. 1. 4); अन्तःकरणोपलक्षितस्यैव जीवशब्दार्थत्वं षष्ठाध्याये वक्ष्यति SāṁkhyaPraBh. 48. 2 (*on* 1. 97)

अन्तःकरणोपशम (antaḥkaraṇopaśama) *m.* quietude, i.e. control over the internal organ, i. e. the mind शमः अन्तःकरणोपशमः TaiUBh. 210. 17 (*on* 1. 9)

अन्तःकरणोपहित (antaḥkaraṇopahita) *adj.* conditioned by the internal organ, i. e. the mind किं तु जीवः सन्नन्तःकरणोपहितः सन् ... भवशतेषु कुत्सितयोनिशतेषु च याति Aparā. 996. 5 (*on* 3. 130); अहमिच्छामि द्वेष्मीतीच्छादेरहमर्थविशेषणतया व्यवहारात् अहंशब्दस्य नान्तःकरणोपहितेच्छादिवाचित्वम् ŚrutaPra. iB. 70. 18 (*on* i. 1. 1); सर्वभूतानाम् ... अन्तःकरणोपहितानामनेकत्वाद् बद्धमुक्तव्यवस्थेति वाच्यम् Nyāyāmṛ. 296B. 2; (जीवचैतन्यस्य) अन्तःकरणोपहितस्य ... विषयतादात्म्यस्यापादनमेव चिदुपरागोऽभिसंहितः SiddhāLeSaṁ. 129. 4; (स्वनिष्ठेति विशेषणे जीवे व्यभिचारः दुःखस्यान्तःकरणानिष्ठत्वात्) दुःखस्य स्वनिष्ठदुःखानुभवितृत्वस्य। अन्तःकरणनिष्ठत्वात् अन्तःकरणोपहितनिष्ठत्वात् ... वा LaCandr. 812. 39; अन्तःकरणोपहितः साक्षी, यदन्तःकरणोपहिते संस्कारः तस्यैव स्मरणम् SiddhāTa. 12. 27.

अन्तःकरणोपहितचैतन्य (antaḥkaraṇopahita-caitanya) *n.* consciousness conditioned by the internal organ, i. e. the mind प्रत्यक्षं पुनर्द्विविधम् - जीवसाक्षी ईश्वरसाक्षी चेति। तत्र जीवो नाम अन्तःकरणावच्छिन्नचैतन्यम्, तत्साक्षी तु अन्तःकरणोपहितचैतन्यम् VedāntPari. 93. 1.

अन्तःकरणोपहितजीव (antaḥkaraṇopahita-jīva) *m.* individual soul conditioned by the internal organ, i. e. the mind अविद्योपहितचित्त एवानादेरीश्वरत्वेनान्तःकरणोपहितजीवकल्पितत्वायोगात् AdvaiSi. 504. 1.

अन्तःकरणोपहितज्ञप्ति (antaḥkaraṇopahita-jñapti) *f.* consciousness conditioned by the internal organ, i. e. the mind अहंशब्दस्य अन्तःकरणोपहितज्ञप्तिवाचित्वात् तदुपपत्तिरिति चेन्न; अहंशब्दस्यान्तःकरणोपहितज्ञप्तिवाचित्वाभावात् ŚrutaPra. iB. 70. 17 (*on* i. 1. 1)

अन्तःकरणोपहितत्व (antaḥkaraṇopahita-tva) *n.* the state of being what is conditioned by the internal organ, i. e. the mind सर्वगततया सर्वविषयसंनिहितस्यापि जीवस्य ... तस्यान्तःकरणोपहितत्वरूपेणैव विषयावभासकत्वात् SiddhāLeSaṁ. 130. 1.

अन्तःकरणोपहितसाक्षिन् (antaḥkaraṇopahita-sākṣin) *m.* witness conditioned by the internal organ, i.e. the mind अज्ञानस्यान्तःकरणोपहितसाक्ष्यसंसर्गेण ततः प्रकाशानुपपत्तिः ... इति वाच्यम्। अवस्थारूपाज्ञानस्यान्तःकरणोपहितसाक्ष्यसंसर्गेऽपि ... 'इदमहं न जानामि' इति प्रत्यक्षप्रमाणोपदर्शनात् SiddhāLeSaṁ. 151.2.

अन्तःकरणोपादानक (antaḥkaraṇopādāna-ka) *adj.* having the internal organ, i. e. the mind as the material cause or base अनुमानं चार्थाकारपरिणामसुखादिकम् अन्तःकरणोपादानकं बाधकाभावे सति तदन्वयव्यतिरेकानुविधायित्वाद् मनःसंयोगवदिति YogVār. *on* 1. 4.

अन्तःकरणोपादानकत्व (antaḥkaraṇopādānaka-tva) *n.* the state of having the internal organ, i. e. the mind as the material cause or base दुःखादीनामन्तःकरणोपादानकत्वेन साध्यवैकल्यम् AdvaiSi. 764. 18.

अन्तःकरणोपादानता (antaḥkaraṇopādāna-tā) *f.* the state of having the internal organ, i. e. the mind as the material cause or base अध्यासकार्यानुपपत्तिस्तु नास्त्येव ज्ञानस्यान्तःकरणोपादानतोपपत्तेः NyāySu. (Ja.) 64A. 2 (*on* i. 1. 1)

अन्तःकरणोपादानत्व (antaḥkaraṇopādāna-tva) *n.* the state of having the internal organ , i. e. the mind as the material cause or base सुखादिकं च घटादेरपि रूपादिवदेव धर्मोऽन्तःकरणोपादानत्वादन्यकार्याणामित्युक्तम् SāṁkhyaPraBh. 59. 20 (*on* 1. 127); प्रकाशकत्वसाम्येनान्तःकरणोपादानत्वस्यैवोचिततयाहङ्कारिकत्वश्रुतेरेव मुख्यत्वात् SāṁkhyaPraBh. 80. 25 (*on* 2. 20)

अन्तःकरणोपाधि (antaḥkaraṇopādhi) *m.* adventitious condition as the internal organ, i. e. the mind स एषः प्रज्ञानरूप आत्मा ... प्रज्ञात्मा अन्तःकरणोपाधिष्वनुप्रविष्टः AitUBh. 291. 17 (*on* 5. 3); क्रोधहर्षादिप्रत्ययैर्जायमान इव जायमानः अन्तःकरणोपाध्यनुविधायित्वात् MuṇḍUBh. 337. 9 (*on* ii. 2. 6); अन्तःकरणोपाधौ ... स्वतःसिद्धस्य कर्तृत्वस्य यावद्द्रव्यभावितयानपोहितत्वात् JīvanVi. 146. 4; जीवभावेऽन्तःकरणोपाधेरपि तन्त्रत्वे बहुजीववादापातात् Nyāyāmṛ. 296B. 3.

अन्तःकरणोपाधि (antaḥkaraṇopādhi) *adj.* having the internal organ, i. e. the mind as the adventitious condition यद्वान्तःकरणोपाधिर्जीवो बुद्ध्या बहिर्गतः। विषयब्रह्मचैतन्याभेदव्यक्त्यार्थसाधकः VedāntSiSūMañ. 1. 62.

अन्तःकरणोपाधिक (antaḥkaraṇopādhi-ka) *adj.* having the internal organ, i. e. the mind as the adventitious condition अन्तःकरणोपाधिकाः सर्वे जीवाः TripāMaNāU. 365. 28 (4); धीस्थस्याज्ञानमुक्तम्, तदन्तःकरणोपाधिकस्य जीवरूपस्य स्वकारणाज्ञानप्रत्यभिज्ञाव्यञ्जकत्वाभिप्रायेण PañcPra. 65. 4; जीवचैतन्यमविद्योपाधिकं सत् सर्वगतमन्तःकरणोपाधिकं सत् ... मतद्वयम् Nyāyāmṛ. 215A. 8; AdvaiSi. 478. 5; तथा चान्तःकरणोपाधिकं जीवस्य परिच्छिन्नत्वं परमात्माख्यात् केवलपुरुषाद्भिन्नत्वं चेति भावः SāṁkhyaPraBh. 161. 28 (*on* 6. 63); यद्वा अन्तःकरणोपाधिकं चैतन्यं निरुपाधिकायाश्रित एकदेश इति। ... स्मृतेः LalitāSaBh. 150. 29 (*on* 192)

अन्तःकरणोपाधिकत्व (antaḥkaraṇopādhika-tva) *n.* the state of having the internal organ, i. e. the mind as the adventitious condition आत्मभेदस्य अन्तःकरणोपाधिकत्वाभावात् चैकमनोमूलत्वनिर्बन्धोऽत्यन्तानुपपन्नः ŚrutaPra. ii. 648. 11 (*on* iv. 4. 16)

अन्तःकरणोपाधित्व (antaḥkaraṇopādhi-tva) *n.* the state of having the internal organ, i. e. the mind as the adventitious condition अन्तःकरणोपाधित्वेन जीवः परिच्छिन्नः SiddhāLeSaṁ. 125. 4.

अन्तःकरणोपाधिद्वार (antaḥkaraṇopādhi-dvāra) *n.* [Inst.] through the adventitious condition in the form of the internal organ, i. e. the mind अन्तःकरणोपाधिद्वारेणैव श्रोत्रादीनामपि उपाधित्वम् GītāBh. (Śaṅ.)384.17(*on*13.14)

अन्तःकरणोपाधिनिमित्त (antaḥkaraṇopādhi-nimitta) *adj.* caused by the adventitious condition in the form of the internal organ, i. e. the mind तावन्मात्रं ब्रह्म ...। दहरोऽस्मिन्नन्तराकाश इत्यवोचाम अन्तःकरणोपाधिनिमित्तम् ChāndoUBh. 474. 18 (*on* viii. 1. 3)

अन्तःकरणोपाधिनिवृत्ति (antaḥkaraṇopādhi-nivṛtti) *f.* cessation of the adventitious condition in the form of the internal organ, i. e. the mind नाज्ञाननिवृत्त्यर्थं तावत्तत्त्वज्ञानापेक्षा, नापि जीवगतसंसारनिवृत्त्यर्थम्, अन्तःकरणोपाधिनिवृत्त्यैव तन्निवृत्तेः VīraMi. (Bhakti.) 17. 2.

अन्तःकरणोपाधिपक्ष (antaḥkaraṇopādhi-pakṣa) *m.* view considering the internal organ as the adventitious condition अन्तःकरणोपाधिपक्षेऽपि वस्तुतश्चैतन्यैक्यस्य ... तन्त्रत्वाभ्युपगमेन तद्दोषनिराकरणसंभवात् SiddhāLeSaṁ. 99.3.

अन्तःकरणोपाधिपरिच्छिन्न (antaḥkaraṇopādhi-paricchinna) *adj.* delimited by the adventitious condition in the form of the internal organ अन्तःकरणोपाधिपरिच्छिन्नस्यैव चैतन्यस्य जीवत्वे योगिनः कायव्यूहाधिष्ठानानुपपत्तेः SiddhāLeSaṁ. 89. 2.

अन्तःकरणोपाध्यपेक्षा (antaḥkaraṇopādhy-apekṣā) *f.* [Inst.] with regard to the internal organ as the delimiting adjunct or adventitious condition तस्य मायोपाध्यपेक्षयैकत्वम् अन्तःकरणोपाध्यपेक्षया नानात्वं व्यवह्रियते VedāntPari. 327. 2.

अन्तःकरणोल्लासादि (antaḥkaraṇollāsādi) *adj.* joy or delight etc. in the heart शतं दीयत इति। मनसि विचार्यान्तःकरणोल्लासादिवशात्सहस्रं दीयत इत्युक्तौ सत्यां मनसोऽनभिप्रेतमप्युक्तानुसारेण यद् दीयते तदित्यर्थः Subodhi. 84. 19 (*on* 2. 176)

अन्तःकरविष्टिक (antaḥkaraviṣṭi-ka) *adj.* involving the internal taxes and forced labour श्रीविजयशिवमान्धातृवर्मा ... अन्तःकरविष्टि(ष्टि)कम् ... केदारं

द(त्त)वान् EI. vi. 14. 9.

अन्तःकर्णपालि (antaḥkarṇapāli) *adv.* into the lobe of the ear उषसि निविडयन्त्या(न्त)कुण्डलं केलिपर्यायविलविगलितमन्तःकर्णपालि प्रियायाः SaduktiKa. 157. 20.

अन्तःकर्मका (antaḥkarma-kā) *f.* type of action (*lit.* which has the grammatical object included within) द्वादश धात्वर्थभेदाः क्रिया भवन्ति। तद्यथा- अकर्मकाः, अन्तःकर्मकाः, अर्थान्तरकर्मकाः ŚṛṅgāPra. 161. 3.

अन्तःकलङ्क (antaḥ-kalaṅka) *m.* inner stain त्वद्वक्त्रं नेत्रपद्मप्रकटितमसकृत् स्पर्धितं यन्मयैतज्ज्ञातं तस्मात्कृशत्वं ग्रहणमपि ततो जाड्यमन्तःकलङ्कः ŚārṅgaPa.3363.

अन्तःकलह (antaḥ-kalaha) *m.* internal strife, i. e. dispute (among the subjects) सततं त्वन्तःकलहं करोति सौभिक्षमतिवर्षम् VasiS. 9. 60.

अन्तःकलहकलुष (antaḥkalaha-kaluṣa) *adj.* defiled, i. e. spoiled due to internal strife राष्ट्रादन्तःकलहकलुषान्मथ्यमानादिवाब्धेस्तन्वी बाला किसलयमृदुर्निर्गता RāghPāṇ. (Ka.) 3. 33.

अन्तःकलुष (antaḥ-kaluṣa) *n.* **1A** internal confusion or malice आसीत् ... (गोपाङ्गनानाम्) तासामन्तःकलुषकलनानल्पसंकल्पजल्पः DaśāvaC. 8. 73; **1B** inward wrath अन्तःकलुषस्तम्भितरसया भृङ्गारनालयेव मम। अप्युन्मुखस्य विहिता वरवर्णिनि न त्वया तृप्तिः ĀryāSaŚa. 35 (comm. अन्तःकलुषेणान्तरक्रोधादिना स्तम्भितोऽप्रकटितो रसः शृङ्गारादिर्यया); **2** dirt (collected) within, ĀryāSaŚa.35 (comm. आभ्यन्तरपङ्कादिना)

अन्तःकलुष (antaḥ-kaluṣa) *adj.* **A** malicious at heart, having evil at heart उक्तः सोऽग्निजटिना दूतोऽन्तःकलुषः खलु। ... अगमत् TriṣaŚaPuC. iv. 1. 506; **B** inwardly impure तेषामन्तःकलुषशुद्धप्रमातृरूपत्वेन बुद्धितत्त्वेऽन्तर्भावस्य पूर्वं वर्णितत्वात् SetuBa. 257. 28.

अन्तःकलुषित (antaḥ-kaluṣita) *adj.* [*f.* - ā] **A** foul internally, malicious at heart वैदग्ध्यादेवमन्तःकलुषितवचनं दुष्टदेवारिनाथं देवी वः पातु ... भवानी CaṇḍīŚ. 81; **Bi** dirty inside अन्तःकलुषिता ... राधा तव विरहतापादनुदिनं निदाघे कुल्येव क्रशिमपरिपाकं प्रथयति UjjvaNīMa. 555. 12 (comm. पङ्किला); **Bii** afflicted with sadness or disgust, UjjvaNīMa. 555. 12 (comm. पक्षे विषाददैन्यादिभिः दुःखिता)

अन्तःकल्प (antaḥ-kalpa) *m.* internal (sub-division of a) *kalpa* or aeon, or intermediate *kalpa* (period between major *kalpas*) अर्धं प्रतापने अवीचावन्तः- कल्पं परः पुनः। कल्पं तिरश्चां प्रेतानां मासाह्ना शतपञ्चकम् AbhidhK. 3. 83; अन्तःकल्पोऽमिताद् यावद्दशवर्षायुषः ततः। उत्कर्षा अपकर्षाश्च कल्पा अष्टादशापरे AbhidhK. 3. 91, cf. **अन्तरकल्प** [DBHS.]

अन्तःकल्पितत्व (antaḥkalpita-tva) *n.* the state of being assumed internally, i. e. on one's own part अन्तःकल्पितत्वात् स्वांशालम्बनत्वादित्यर्थः NyāyRa. 852. 17 (*on* 7. 24)

अन्तःकषायकलुष (antaḥkaṣāya-kaluṣa) *adj.* impure due to internal fluids, i. e. passion, wrath etc. (हे जीव) अन्तःकषायकलुषोऽशुभयोगसंगात्कर्माण्युपार्जयसि बन्धनिबन्धनानि YaśasCam. i. 267. 8 (comm. क्रोधमानमायालोभैर्मलिनः)

अन्तःकाञ्चि (antaḥkāñci) *adv.* in the (city of) Kāñcī अन्तःकाञ्चि स्फुरति जगतामादिना कापि माता MūkaPañ. 5. 79.

अन्तःकान्ति (antaḥ-kānti) *f.* inner brightness, i. e. purity of the mind (गङ्गा) अनेकदुरितोद्गारहारिणी दुर्गतारिणी। भजमानजनस्यान्तःकान्तिकेलिविलासिनी PadmP. iv. 85. 48.

अन्तःकायसंभूत (antaḥkāya-sambhūta) *adj.* arising inside the body बहिर्विक्षेपात्समाधिभ्रंश इति चेत्। न। समाधिजस्यान्तःकायसंभूतस्य कायसुखस्य समाध्यनुकूलत्वात् AbhidhKoBh. 439. 11 (*on* 8. 9)

अन्तःकारणसंसृति (antaḥkāraṇa-saṁsṛti) *f.* course of worldly life or transmigration arising from internal cause न शून्यं नापि चाशून्यं नान्तः- कारणसंसृतिः TejoBiU.6.17.

अन्तःकिरणसंबन्ध (antaḥ-kiraṇasambandha) *m.* mutual contact between rays किरणानामन्तःकिरणसंबन्धाभावाद्वृत्तसूच्यग्राकारादीर्घा छायैवास्ति SiddhāTaVi. 280. 10.

अन्तःकीट (antaḥ-kīṭa) *m.* insect inside (a seed) अन्तःकीटदुष्टवटबीजे भाव्यङ्कुरादिजननशक्तिप्रतिहतावपि बाह्यबीजमात्रव्यवहारदर्शनम् PrakaVi. 79. 24.

अन्तःकीलभ्रान्ति (antaḥkīla-bhrānti) *f.* illusion of an inner bolt मेदिन्याश्रेन्मेखलादानलीलामाबिभ्राणस्याम्भसामाकरस्य। अश्चद्रत्नस्यात्तमौखर्य- पूर्तेरन्तःकीलभ्रान्तिमासूत्रयन्तम् ... सेतुं सीताश्वासहेतुं य एति Acyutarā. 7.10.

अन्तःकुक्षि (antaḥ-kukṣi) *m.* inner abdomen or womb युगान्तेऽन्तःकुक्षेरिव परिसरे पल्लवलघोरमी सर्वे ... यथास्थानम् ... मान्ति स्म शतशः CaitaCa. 195. 4 (8)[NānārthāSaṁ. i. 67. 290 and ViśvaLoK. 86. 4 give *antaḥkukṣi* as the meaning of *koṣṭha*]

अन्तःकुक्षि (antaḥ-kukṣi) *adj.* existing within the abdomen or womb त्रिष्वन्तःकुक्षि कोष्ठोऽस्त्री कुसूलेऽन्तर्गृहे पदे ŚabdaRa. (Vā.) 3799.

अन्तःकुक्षि (antaḥkukṣi) *adv.* inside the abdomen or womb डिम्बवाक्। डमरे पक्षिणामण्डेऽन्तःकुक्ष्यवयवान्तरे NānārthāSaṁ. i. 25. 56.

अन्तःकुटिल (antaḥ-kuṭila) *adj.* **1** curved inwards तत्र सहजान्यर्शांसि कानिचिदणूनि ... कानिचिदन्तःकुटिलानि CaraS. vi. 14. 7; **2** inwardly crooked, fraudulent, cf. **अन्तःकुटिलहृदय.**

अन्तःकुटिल (antaḥ-kuṭila) *m.* conch, shell, PW.; MW.; APTE.

अन्तःकुटिलहृदय (antaḥkuṭila-hṛdaya) *adj.* whose heart is inwardly crooked or fraudulent अथ दुष्टबुद्धिरन्तःकुटिलहृदयः स्वार्थसिद्धये तमाह PañcT. 1. 158 (13) (155. 8)

अन्तकुडङ्गम् (antaḥkuḍaṅgam) *adv.* in a bower अन्तःकुडङ्गं भुक्तेऽस्मिन् सुतानां भावि ते शतम् Dhūrtā. 37.

अन्तःकुपित (antaḥ-kupita) *adj.* angry at heart कथां तदीयां स निशम्य भीमः प्रभाव्यसौमित्रिप्रभिधानरूढः। ... अन्तर्मदोऽन्तःकुपितः करीव RāghPāṇ. (Dha.) 5. 22; अन्तःकुपितेन मौनावलम्बिना तेन राज्ञा न किमपि तेषां प्रति प्रत्यादिष्टम् PrabaCin. 14. 11.

अन्तःकुम्भक (antaḥ-kumbhaka) *m.* the act of holding of air inside the body by suppressing breath यथाशक्ति वायुमापूर्यानन्तरं क्रियमाणोऽन्तःकुम्भकः JīvanVi. 93. 2.

अन्तःकुसुम (antaḥ-kusuma) *adj.* having flowers (entwined) in between (strands of hair) धूपोष्मणा त्याजितमार्द्रभावं केशान्तमन्तःकुसुमं तदीयम् KumāSaṁ. 7. 14.

अन्तःकूजदुदारकण्ठ (antaḥkūjad-udārakaṇṭha) *adj.* possessing excellent throat warbling inwardly, i.e. inarticulately अन्तःकूजदुदारकण्ठमसकृन्मुञ्चेति लोलेक्षणम् ... पीतं येन सुखं(?मुखं) त्वदीयमबले सोऽयं हि धन्यो युवा VasaTi. 8. 20.

अन्तःकूजन्मुखरशकुन (antaḥkūjan-mukharaśakuna) *adj.* having prattling birds warbling inside गोदावर्याः पयसि विततश्यामलानोकहश्रीरन्तःकूजन्मु- खरशकुनो यत्र रम्यो वनान्तः UttaRāC. 2. 25.

अन्तःकूजितषट्पद (antaḥkūjita-ṣaṭpada) *adj.* having a bee humming inside इदं रुणद्धि मां पद्ममन्तःक्वणित(v.l. °कूजित° KALE's Ed.) षट्पदम् Vikramo. 4. 40.

अन्तःकृत (antaḥ-kṛta) *adj.* **Ai** comprised within (itself), i. e. encompassing तदेव हि अनुत्तरम् ... अन्तःकृतबोधमयविश्वभावप्रसरम् ParāTri. 38.6; 6.7; **Aii** included, i. e. absorbed inside अन्तःकृते निगीर्णेऽस्मिन्नारोपविषये सति। एषा साध्यवसानात्मा लक्षणेति विभाव्यते BhāvPra. (Śā.) 165. 1 (6); **B** put on, i. e. worn inside (as a lower garment) तच्छ्रुत्वा ब्राह्मणी वाक्यं भीतभीतावदन्नृप। तद्वस्त्रं तु मया विप्र स्नात्वा ह्यन्तःकृतं महत् SkandP. v (3). 42. 15; **C** caused or produced in the mind सा ह्यन्तःकृतातङ्का शल्यशलाकेव कमहंकारोत्सेकं सविवेकं च लोकं खरं न खेदयति YaśasCam. i. 430. 6 (comm. मनस्युत्पादितसंतापा); **D** contained within विस्मयगर्भया - विस्मयकारित्वा- न्यथानुपपत्त्यान्तःकृतविस्मयया उक्त्या Bhāsk. i. 165. 21 (*on* i. 4. 3)

अन्तःकृततत्त्वषट्त्रिंशक (antaḥkṛta-tattvaṣaṭtriṁśaka) *adj.* which has comprised within thirtysix principles or elements अन्तःकृततत्त्वषट्त्रिंशकस्यैव तत्त्वस्य परशिवत्वात् Bhāsk. i. 58. 7 (*on* i. 1. 2)

अन्तःकृतप्रकाश (antaḥkṛta-prakāśa) *m.* illumination which is comprised within, i. e. which has become the essence प्रकाशरूपता ज्ञानं तत्रैव स्वातन्त्र्यात्मा विमर्शः क्रिया, विमर्शश्च अन्तःकृतप्रकाशः PratyabhiVi. i. 423. 6 (*on* i. 8. 11) (Bhāsk. सारभूतप्रकाशः)

अन्तःकृतबाह्यपूर्णत्वापूर्णत्व (antaḥkṛta-bāhyapūrṇatvāpurṇatva) *n.* completeness and incompleteness of the external objects which are comprised within पूर्णत्वं चात्रान्तःकृतबाह्यपूर्णत्वापूर्णत्वेन किमप्यान्तरं न तु लौकिकम् Bhāsk. i. 5. 6 (*on* i. 1. 1)

अन्तःकृतरसालेप (antaḥkṛta-rasālepa) *adj.* having the besmearing of mercury or quick-silver made inside एवं लवणनिक्षेपात् प्रोक्तम् ...। अन्तःकृतरसालेपात् ताम्रपात्रमुखस्य च। ... तद् भाण्डं पटुनापूर्य क्षारैर्वा पूर्ववत् पचेत् RasRaSa. 9. 38.

अन्तःकृतसकलमन्त्रमहेशादि (antaḥkṛta-sakalamantramaheśādi) *adj.* which includes within itself the entire host of expedients like formula and

Maheśa etc. अन्तःकृतसकलमन्त्रमहेशादिभिः यत् ... भैरवात्मपूर्णतामयम् .... ब्रह्म ParāTri. 221. 8.

अन्तःकृतसर्ववेद्यरूपा (antaḥkṛtasarvavedya-rūpā) *adj.* (*f.*) having the form of one which encompasses all knowable objects within विश्वमय्या अन्तःकृतसर्ववेद्यरूपया सह तादात्म्येन- तद्रूपतया वृत्तिः - स्थितिः यस्य तादृशम् Bhāsk. i. 142. 11 (*on* i. 3. 7)

अन्तःकृतहस्त (antaḥkṛta-hasta) *adj.* who has kept his hands between, i. e. under (the knees) अन्तर्जानुरिति। जानुनोरन्तःकृतहस्त इत्यर्थः VīraMi. (Āhnika.) 360. 32.

अन्तःकृतानन्तविश्व (antaḥkṛtānantaviśva) *n.* endless (forms of) universe which are comprised within उभयत्र ज्ञानक्रियाशक्तिमये रूपे सदाशिवेश्वरसारे सैव 'अहम्' इति चमत्कृतिः अन्तःकृतानन्तविश्वेदन्ताचमत्कृतिपूर्णवृत्तिः ParāTri. 6. 7.

अन्तःकृतानन्तविश्वरूप (antaḥkṛtānantaviśva-rūpa) *adj.* of the form of one who has endless (forms of) universe comprised within न चेदन्तःकृतानन्तविश्वरूपो महेश्वरः। स्यादेकश्चिद्वपुर्ज्ञानस्मृत्यपोहनशक्तिमान् ĪśvaPraSū. i. 3. 7.

अन्तःकृताश्रुसलिलम् (antaḥkṛtāśrusalilam) *adj.* with tears contained inside (the eyes) अन्तःकृताश्रुसलिलं नयनोत्पलेन ... इयमन्वेति ... इन्दुचूडम् ŚṛṅgāTi. (Rā.) 127.

अन्तःकृति (antaḥ-kṛti) *f.* inner action or procedure, i. e. meditation within आत्मानं पूजयित्वा तु कुर्यादन्तःकृतिं यथा। तथा ते कथयिष्यामि MālinīT. 8. 54.

अन्तःकृत्य (antaḥkṛt-ya) *ger.* having contained or comprised within सा च परमेश्वरी ... परापराभट्टारिकादिस्फाररूपा अन्तःकृत्य ParāTri. 102.9; स्वरूपसाकल्येन भासमानं विमृश्यमानं च तद्भासा विमर्शचमत्कारमन्तःकृत्य तथाविधधरणितत्त्वसंस्कारसत्ताकं पूरयेत् ParāTri. 138. 16.

अन्तःकृत्य (antaḥ-kṛtya) *n.* inner activity, i. e. internal organ अव्याप्तिरन्तःकृत्यादेर्भवेत्षड्धामवादिनाम् ŚivDṛ. 6. 31.

अन्तःकृमि (antaḥ-kṛmi) *m.* disease caused by worms in the body, PW.; MW.; Apte.

अन्तःकृशा (antaḥ-kṛśā) *adj.* (*f.*) thin, i. e. sparse in the middle पुरोगैरनुगैः स्फारा विशिखान्तःकृशा चमूः NemiNir. 12. 23.

अन्तःकृष्यमाणा (antaḥ-kṛṣyamāṇā) *adj.* (*f.*) being drawn in or back आढ्यराजकृतारम्भैर्हृदयस्थैः स्मृतैरपि। जिह्वान्तःकृष्यमाणेव न कवित्वे प्रगल्भते SubhāRaK. 50. 38.

अन्तःकेसर (antaḥ-kesara) *m.* pollen or pistils inside स (रामः) पृच्छति। किं रूपं किं स्थानं किं पद्मं किमन्तःकेसरः RādhU. 208.14(1)

अन्तःकेसरमण्डल (antaḥkesara-maṇḍala) *adj.* having the circle of pollen or pistils inside प्रभुः। लोकबीजं ससर्जाग्रे पुण्डरीकं सितप्रभम्। सहस्रदलपर्यस्तं अन्तःकेसरमण्डलम् ParaS. 1. 51.

अन्तःकेसरसंपूर्ण (antaḥkesara-sampūrṇa) *adj.* filled with pollen or pistils inside तस्मिन् ब्रह्मोद्भवं पद्मं सिद्धं द्वादशपद्मकम्। अन्तःकेसरसंपूर्णम् ParaS. 4. 33.

अन्तःकोटर (antaḥ-koṭara) *adj.* having a hollow or cavity inside वक्रमशय्यासंस्थितमन्तःकोटरमनेकदुर्ग्रन्थि। प्रगुणीकर्तुं शक्तो दुर्दारु न विश्वकर्मापि Subhāṣi. 958.

अन्तःकोटरपुष्पी (antaḥkoṭarapuṣpī) *f.* name of a sweet purgative medicinal plant, *Argyreia Speciosa* प्रकीर्या चोदकीर्या च प्रत्यक्पुष्पी तथाभया। अन्तःकोटरपुष्पी च हस्तिपर्ण्यश्च शारदम् CaraS. i. 1. 81 (1922 Ed.) [Kośas give *antaḥkoṭarapuṣpī* as a synonym of *nīlinī*, ParyāRaMā. 111; ParyāMu. 17. 20 and of *vṛddhadāraka*, KośaKaTa. 1. 4113]

अन्तःकोटि (antaḥ-koṭi) *f.* top end rim of the calotte (formed by the *cakra* -lotus) 'आदिकोटिः' हृदयम् 'अन्तःकोटिः' द्वादशान्तः तयोः प्राणोल्लासविश्रान्त्यवसरे 'निभालनं' चित्तनिवेशनेन परिशीलनम् PratyabhiHṛ. 44. 10(18)

अन्तःकोटीकोटि (antaḥkoṭīkoṭi) *adv.* within a crore of crores (of years) सर्वेषां कर्मणां शेषेऽन्तःकोटीकोट्यवस्थितौ TriṣaŚaPuC. iv. 3. 207.

अन्तःकोणस्थराशि (antaḥkoṇastha-rāśi) *m.* mound or heap piled up at the a corner (of a wall) शूकधान्यराशिमानानयनाय ... द्विवेदसत्रिभागैकनिघ्नात् परिधेः फलम्। भित्त्यन्तःकोणस्थराशेः स्वगुणभाजितम् Līlā. 235.

अन्तःकोणस्थित (antaḥkoṇa-sthita) *adj.* piled at the corner (of a wall) अन्तःकोणस्थितस्यापि तिथितुल्यकरः सखे Līlā. 236.

अन्तःकोप (antaḥ-kopa) *m.* **A** internal fury or revolt अन्तःकोपमाटविकं वा समुत्थापयितुकामः ... मामुपरुणद्धि ArthŚā. i. 81. 2 (1. 16); ii. 245. 2 (7.2); अन्तःकोपो बहिःकोपो यत्र स्यातां महीक्षिताम्। अन्तःकोपो महांस्तत्र नाशकः MatsyaP. 223. 7; ViṣṇuDhaP. ii. 68. 7; अपि शक्रसमो राजा अन्तःकोपेन नश्यति MatsyaP. 223. 11; इहैवान्तर्नगरे वर्तमानः खलु महान्तमन्तःकोपमुत्पादयेत् MudrāRā. 3. 24 (74); **B** anger in (one's) heart, inner wrath बलव्यसनानि। अमानितम् ... अन्धमिति। तेषाममानितविमानितयोरमानितं कृतार्थमानं युध्येत न विमानितमन्तःकोपम् ArthŚā. iii. 35. 8 (8.5)

अन्तःकोपशमित (antaḥkopa-śamita) *adj.* pacified or alleyed due to inner wrath अन्तःकोपशमितमदनसंतापतया तत्क्षणलब्धसुखप्रसुप्तमिव ... तम् ... अद्राक्षम् Kād. 165. 9.

अन्तःकोपसाटोपवक्त्र (antaḥkopa-sāṭopavaktra) *adj.* whose face is overshadowed due to inner wrath भुवनपालोदन्तमाकर्ण्य कर्णज्वरभरकरमन्तःकोपसाटोपवक्त्रः। ... वस्तुपालश्चचाल VasaViKā. 5. 105.

अन्तःकोपहुताश (antaḥkopa-hutāśa) *m.* fire in the form of inner wrath दन्तिनामनिलोद्धूता रेजुः सिन्दूररेणवः। अन्तःकोपहुताशस्य ज्वाला बहिरिवोत्थिताः PāṇḍaC. 13. 62.

अन्तःकोपानल (antaḥkopānala) *n.* fire in the form of inner wrath अन्तकोपानलं बभ्रे पयोधिरिव वाडवम् PrabhāC. 177. 29.

अन्तःकोश (antaḥ-kośá) *n.* box or store within अ॒न्तःको॒शमि॑व जा॒मयोऽपि॑ नह्यामि ते॒ भग॑म् AV. i. 14. 4; AV. (P.) i. 15. 4; अ॒न्तःको॒शमि॑वान्तःपा॒त्रे रेरि॑हतीं सद्यष्क्रीः APrāti. 201 (*but* the interior of a store-room, MW; Apte)

अन्तःकोशागार (antaḥ-kośāgāra) *n.* inner chamber of treasury प्रविश्यान्तःकोशागारम् ... बलिमर्पयामि Jīvan. 287. 1 (comm. कोष्ठादीनामन्तःप्रदेशम्)

अन्तःकोष्ठ (antaḥ-koṣṭha) *m.* inner (opening of) abdomen दोषाः ... अन्तःकोष्ठे जनयन्ति ... स्तम्भं जाड्यम् ... वा CaraS. viii. 2. 9 (1941 Ed.); पञ्चमी पुरीषधरा नाम यान्तःकोष्ठे मलमभिविभजते पक्वाशयस्था SuśruS. iii. 4. 14; अन्तःकोष्ठो महास्रोत आमपक्वाशयाश्रयः AṣṭāHṛ. i. 12. 45.

अन्तःक्रतु (antaḥ-kratu) *m.* **A** internal or inner (part of) sacrifice यथैवान्तःक्रतुः सोपक्रियोऽचोदिततत्सिद्धार्थोऽर्थाद् बहिष्क्रियते ManuBh. i. 220. 14 (*on* 3. 27); **B** [Loc.] during the procedure or performance of a sacrifice अन्तःक्रतौ तु प्रत्येकं पञ्च प्रयोगाः BhāṭṭDī. i. 144. 22 (*on* ii. 3. 3)

अन्तःक्रतु (antaḥkratu) *adv.* in the midst of a sacrifice, during the performance of a sacrifice अन्तःक्रतु क्रियमाणं विगुणं भवति ManuBh. ii. 170.7 (*on* 8. 207); मन्त्रः पुनरन्तःक्रतु प्रयुज्यमानः। ... उत्तरं मन्त्रं पर्युपस्थापयति TantrRa. 264. 9 [during a sacrifice, MW.]

अन्तःक्रतु (antaḥ-kratu) *adj.* that which accrues within the sacrifice तेन क्रतुबहिर्भूता हिंसा वैदिकी निषिध्यते नान्तःक्रतुरिति विवेकः YuktiSneha. 30. 19 (*on* i. 1. 2)

अन्तःक्रतुगत (antaḥkratu-gata) *adj.* pertaining to what forms the inner part of a sacrifice अस्तु वा ... अन्तःक्रतुगतलौकिकविषयत्वमपि BhāṭṭDī. iii. 144. 6 (*on* ix. 3. 3)

अन्तःक्रतुप्रयुक्त (antaḥkratu-prayukta) *adj.* what is performed in the midst of a sacrifice तथान्तःक्रतुप्रयुक्तानि MīmāSū. vi. 2. 29.

अन्तःक्रतुप्रयोग (antaḥ-kratuprayoga) *m.* [Loc.] in the midst of, i. e. during the performance of a sacrifice तस्या एव ... आग्नेयीन्यायेन ग्रहणं न त्वन्तःक्रतुप्रयोगे BhāṭṭDī. iv. 196. 1 (*on* xi. 4. 1); एषाम् ... अन्तःक्रतुप्रयोग एव प्रमाणाभावः BhāṭṭDī. iv. 197. 18 (*on* xi. 4. 3)

अन्तःक्रन्दत् (antaḥ-krandat) *adj.* crying internally, i. e. feebly or silently उर्वीपतिः ... अन्तःक्रन्दतः ... वेतालसाधकस्य साधितपक्कम् ... वेतालमद्राक्षीत् TilaMañ. 47. 15.

अन्तःक्रम (antaḥ-krama) *m.* inner pervasion (*lit.* inner movement) अन्तःक्रमो हृदादेश्चेत्प्राणादेः किं न सत्यता। सर्वस्यान्तःपरामर्शपूर्णतास्ति प्रवर्तने ŚivDṛ. 2. 14 (comm. हृदाद्याक्रमणात्)

अन्तःक्रुध् (antaḥ-krudh) *f.* internal or inner wrath अन्तःक्रुधा मुह्यतः। कीर्णा बाष्पकणैः पतन्ति धनुषि व्रीडाजडा दृष्टयः SūktiMu. 90. 16.

अन्तःक्रुधान्वित (antaḥkrudhānvita) *adj.* full of internal wrath प्राह लान्तवेन्द्रः ... धरणेन्द्रम् ... खेटमन्तःक्रुधान्वितम् BṛKathāK. 78. 27.

अन्तःक्रूर (antaḥ-krūra) *adj.* [*f.* - ā] cruel at heart क्लिश्यन्तीहाल्पबुद्धयः ... अन्तःक्षुराः(v. l. अन्तःक्रूराः) वाङ्मधुराः ... क्षुद्राः MahāBhā. xii. 152. 16; श्यामे ... न लाक्षान्तःक्रूरे परिचिनु गिरेर्गैरिकमिदम् UjjvaNīMa. 39. 9.

अन्तःक्रोधवती (antaḥkrodha-vatī) *adj.* (*f.*) having inner wrath तयान्तः-

क्रोधवत्यापि विलक्षहसितस्पृशा। प्रोचे SamarāSaṁ. 5. 109.

अन्तःक्रोधार्चिष्मत् (antaḥkrodhārciṣma(n)t) *m.* fire in the form of inner wrath नानावर्णास्तदैवान्तःक्रोधार्चिष्मच्छिखा इव। स्कन्धावारप्रवीराणां नेत्रपट्टा विनिर्ययुः PāṇḍaC. 12. 386.

अन्तःक्रौर्य (antaḥ-kraurya) *m.* inward cruelty, MW.

अन्तःक्रौर्य (antaḥ-kraurya) *n.* internal cruelty अन्तःक्रौर्यमहोशठस्य मधुरं हा हारि गेयं मुखे Subhāṣi. 1021.

अन्तःक्लेद (antaḥ-kleda) *m.* moisture from within (the earthly substances) i. e. inner moisture (of the worldly objects) स्वेदः पार्थिवानां द्रव्याणा-मग्न्यादित्यादितापसंबन्धादन्तःक्लेदः ManuBh. i. 28. 19 (*on* 1. 45)

अन्तःक्लेशकलङ्किता (antaḥkleśa-kalaṅkitā) *adj.* (*f.*) (permanently) marked by the inner suffering अन्तःक्लेशकलङ्किताः किल वयं यामोऽद्य याम्यां पुरीम् VidaMā. 2. 37 (comm. अन्तःक्लेशेन कलङ्किताश्चिह्निताः सत्यः। मृत्योरनन्तर-मप्ययं क्लेशः स्थास्यति)

अन्तःक्वणत् (antaḥ-kvaṇat) *adj.* jingling from inside अन्तःक्वणत्करज-वज्रशिखाभिघातः। किं केसरी ... तृणेन प्राणात्ययेऽपि कुरुते स्वशरीरयात्राम् Subhāṣi. 603.

अन्तःक्वणितषट्पद (antaḥkvaṇita-ṣaṭpada) *adj.* having a bee humming inside इदं रुणद्धि मां पद्ममन्तःक्वणितषट्पदम् Vikramo. 4. 40.

अन्तःक्वथन (antaḥ-kvathana) *n.* internal or inward boiling आश्लेषमन्तः-क्वथनं प्रणामं कामोपदंशानि च चुम्बनानि। दृष्ट्वाङ्गनानामसहा निसोढुं हासादिवासौ स्फुटिता प्रभासीत् RāghPāṇ. (Dha.) 17. 85 (*but* comm. अन्तःकरणपाकं यथा भवति तथा)

अन्तःक्षत (antaḥ-kṣata) *adj.* deeply cut or wounded inwards कंचित् ... अन्तःक्षतेन। हस्ताग्रेण प्राप्तमप्यग्रतोऽभूदानैश्वर्यं वारणस्य ग्रहीतुम् ŚiśuVa. 18. 49.

अन्तःक्षत (antaḥ-kṣata) *n.* name of a kind of fistulous disease (in the chest) उरस्यन्तःक्षते सद्यो लाक्षां क्षौद्रयुतां पिबेत् AṣṭāSaṁ. ii. 24. 23 (4. 5)

अन्तःक्षतभय (antaḥkṣata-bhaya) *n.* fear of fistulous disease (in the chest) क्षीणादीनामौषधबलाक्षमत्वाद् देहबलोपरोधोऽन्तःक्षतभयं च AṣṭāSaṁ. i. 137. 20 (1. 27)

अन्तःक्षमा (antaḥ-kṣamā) *f.* inner or mental forbearance आनन्दयित्रीमखिलस्य जन्तोरन्तःक्षमां स्वामपहाय मोहात्। ... बहिःक्षमायै स्पृहयामि BhārCam. 8. 18.

अन्तःक्षमावत् (antaḥkṣamā-va(n)t) *adj.* (used as noun) (one) possessing inner or mental forbearance अन्तःक्षमावतां वासे वसन्नपि निरन्तरम्। अक्षम्यहं यतोऽम्बुस्थः कुलीरस्तरणे पटुः MalliC. 8. 365.

अन्तःक्षिति (antaḥkṣiti) *adv.* on the earth चेदीश्वरः ...येनायम् ... प्रेषि[तः] ... अन्तःक्षिति EI. i. 34.5.

अन्तःक्षितिस्थ (antaḥkṣiti-stha) *adj.* present or abiding in the ground अन्तःक्षितिस्थं खननादिवाम्भोः लोकोत्तरं वर्त्म दुरापमाप Saund. 17. 22.

अन्तःक्षिप्त (antaḥ-kṣipta) *adj.* **A** thrown into (a crowd) अन्तःक्षिप्तस्थिता-नेकभीतापन्नजनाकुले। निरयाणामिवोत्पत्तिधाम्नि द्वौ तावपश्यताम् KathāSaSāg. xii. 34. 291; **B** intermixed up with द्रौपदीम् ... अन्तःक्षिप्तकर्पूर-कस्तूरीकुङ्कुमैरिव। वारिभिः स्नपयांचक्रुः PāṇḍaC. 4. 397.

अन्तःक्षिप्तमण्डूक (antaḥkṣipta-maṇḍūka) *adj.* having a frog thrown into अन्तःक्षिप्तमण्डूकं सपिधानं नवं घटम्। स्वैरमानाय्य राजा तं हरिशर्माणमब्रवीत् KathāSaSāg. vi. 4. 131.

अन्तःक्षीणाविद्य (antaḥkṣīṇāvidya) *adj.* (used as noun) (one) whose ignorance is weakened or attenuated at the end (of life) देहादन्यः परोऽस्म्यहम्। इति निश्चितवानन्तःक्षीण(?णा)विद्यो विमुच्यते MahāU. 4 (127)

अन्तःक्षीर (antaḥ-kṣīra) *n.* milk (produced) within उच्चचूचुकश्यामलिम्नालं-कृतमापूर्यमाणमन्तःक्षीरेण क्षणं क्षणमखिद्यत पयोधरद्वन्द्वमुद्वहन्ती (राजमहिषी) NalaCam. 3. 22 (25)

अन्तःक्षीरिकम्प (antaḥkṣīri-kampa) *m.* the act of shaking with milky sap inside अन्तःक्षीरिकम्पादिवातिस्निग्धवर्णैः ... खुरमण्डलैरुपेतः ... तुरङ्गरत्नं भद्रवाहनो नाम AvantiKa. 89. 10.

अन्तःक्षुर (antaḥ-kṣura) *adj.* bearing (as if) a razor inwardly, i. e. fraud क्लिश्यन्तीहाल्पबुद्धयः। ... अन्तःक्षुरा वाङ्मधुराः ... क्षुद्राः MahāBhā. xii. 152. 16; SkandP. i (2). 5. 105.

अन्तःक्षेत्रज्ञभास्कर (antaḥkṣetrajña-bhāskara) *adj.* having the sun in the form of the inner self प्रतिज्ञावृक्षमफलं शान्तिच्छायासमन्वितम्। ज्ञानाश्रयं तृप्तितोयमन्तःक्षेत्रज्ञभास्करम्। येऽधिगच्छन्ति तत्सन्तस्तेषां नास्ति भयं पुनः MahāBhā. xiv. 27. 16.

अन्तःक्षोभ (antaḥ-kṣobha) *m.* **A** internal turmoil स्रजो ह्यामोदास्तदिदमखिलं रागिणि जने। करोत्यन्तःक्षोभं न तु विषयसंसर्गविमुखे ŚatTrayī. 134; कमप्यन्तःक्षोभं प्रथयसि VidaMā. 2. 11; **B** internal disorder or disturbance ज्वरेऽधिकं विकाराः स्युरन्तःक्षोभो मलग्रहः AṣṭāSaṁ. i. 263. 23 (3. 2); **C** internal or mental agitation उपशमित इवेदानीमन्तःक्षोभार्णववडवानलायमानो रौहिणेयः कोपपावकः SubhaDha. 4. 21 (2) (comm. चित्तक्षोभे)

अन्तःक्षोभकुल (antaḥkṣobha-kula) *n.* group or multitude of internal turmoils अन्तःक्षोभकुलैरहं परिवृता प्रज्ञातुमज्ञाभवम् VidaMā. 2. 4.

अन्तःक्षोभावेग (antaḥkṣobhāvega) *m.* flurry or force of internal turmoil पिता ... अन्तःक्षोभावेगविक्षिप्ताक्षरमवादीत् Kād. 297. 4.

अन्तःख (antaḥ-kha) *n.* [Loc.] in the middle of the sky चकासदन्तःख उदीर्णदीधिति। चक्रेण चिच्छेद BhāgP. iii. 19. 14 (Padaratnāvali आकाशमध्ये)

अन्तःखिन्न (antaḥ-khinna) *adj.* compressed inside or down अन्तःखिन्न-भुजङ्गभोगविगलल्लालाभिरासीन्नदी SubhāRaK. 41. 26.

अन्तःखेद (antaḥ-kheda) *m.* inner grief or turmoil बाह्यखेदादसह्योऽन्तःखेद एव Kād. 292. 13.

अन्तःखेदपरीतात्मन् (antaḥkhedaparītātman) *adj.* whose mind is overpowered by, i. e. brooding with inner grief नात्तुमन्नानि शक्नोति न विहर्तुं गृहावनिम्। अन्तःखेदपरीतात्मा तूष्णीं तिष्ठति केवलम् YogVā. i. 8. 11.

अन्तःख्या (antaḥ-khyā-) II.P. to tell to oneself, i. e. to know internally well इन्द्र ...। अ॒न्तर्हि ख्यो जना॑नाम॒र्यो वेदो॒ अदा॑शुषा॒म् ṚV. i. 81. 9; अ॒न्तर्ह्यख्य॑दुभे अ॒स्य धेने॒ ...इन्द्रः॑ ṚV. v. 30. 9 (*but* Sāy. गृहमध्ये निदधे) [to inquire into, investigate, MW.]

अन्तःपक्तृता (antaḥpaktṛ-tā) *f.* the state of being one who digests within रुद्ररूपेणान्तःपक्तृतया संनिधानं प्रार्थ्यते ŚivārkaMaDī. i. 365. 30 (*on* i. 2. 18)

अन्तःपक्षसम् (antaḥpakṣasm) *adv.* so as to be inside the wing (of the chariot) एनामप्राप्य निवृततान्तःपक्षसमेनां कृत्वा सव्यानवगृह्य दक्षिणैरनुपरिवर्तयाध्वै मो अप्रसूताः सर्पत BaudhŚS. ii. 76. 6.

अन्तःपङ्क (antaḥ-paṅka) *m., n.* **A** sin in the mind तव भजनवदन्तः-पङ्कमुच्छोषयन्तम् ... तपसमयमनैषीर्यामुनेषु स्थलेषु Nārāy. x. 58. 7 (comm. मनसि...दुरितम्); **B** mire inside (the river), Nārāy. x. 58. 7 (comm. अन्तर्नद्यादेः कर्दमम्)

अन्तःपञ्चमकारयजन (antaḥ-pañcamakārayajana) *n.* internal offering of five objects beginning with the sound *m* (like *madya, māṁsa, matsya, mudrā* and *maithuna*), pw.

अन्तःपट (antaḥ-paṭa) *m.,n.* cloth held between (two persons who are to be united as pupil and teacher or bride and bridegroom until the right moment has arrived) अन्तःपटं वेदिकायां धारयित्वा ...उपनिन्युश्च बालकम् GaṇeP. ii. 10. 7; अन्तःपटं दत्त्वा श्रीसूक्तं प्रजपन्बहिः BṛBrahmaS. i. 8. 121; वरस्य मधुपर्कं कृत्वान्तःपटं धृत्वा ...दक्षिणां दद्यात् NirṇaSi. 235. 22.

अन्तःपटलीक्रियमाणकाया (antaḥpaṭalīkriyamāṇa-kāyā) *adj.* (*f.*) whose body is being coated or covered inside दृष्टवानस्मि ... आसन्नवनलताकिसलयैः सरसैर्दुःखक्षतैरिवान्तःपटलीक्रियमाणकायाम् ...योषितम् HarṣaC. 323.2.

अन्तःपतच्चिन्ता (antaḥpatac-cintā) *f.* worry which is appearing or arising in the heart श्रुत्वा ... मिथिलावृत्तान्तमन्तःपतच्चिन्तापह्नवसावहित्थवदनत्व-ग्विप्रकीर्णस्मितः। ...अवति माम् ...न लङ्केश्वरः AnargharRā. 4. 8.

अन्तःपतत् (antaḥ-patat) *adj.* **Ai** falling in, i. e. striking the heart अन्तःपत-न्मन्मथपुष्पबाणपक्षानिलेनेव कृताभिवृद्धीन्। ...निःश्वासदण्डान्मुहुरुत्सृजन्तीम् (सखीम्) HarVi. 25. 48; **Aii** appearing or arising in the heart, cf. **अन्तःपतच्चिन्ता**; **B** falling inside ज्वलन्माणिक्यतेजोभिरलक्षितनतोन्नताः। (सभायां) तस्यामन्तःपतन्तः के नागमन् जनहास्यताम् PāṇḍaC. 5. 517.

अन्तःपतित (antaḥ-patita) *adj.* **1A** fallen in, i. e. reflected inside प्रतिफलितमूर्तिना गगनपिधानकेनेवाल्पकत्वादन्तःपतितेन महत्त्वमद्भुतं बिभ्राणम् (राजा तडागमद्राक्षीत्) UdaySuKa. 129. 18; **1B** dwelling within the jurisdiction, i. e. inhabitant महाराजश्रीश[क्ति]वर्म्मा कलिङ्गविषये राकुलवग्रामे सर्वसमन्वागतान्तह-[Read °न्तः प] पतितान् आज्ञापयति EI. xii. 2. 4; **2** fallen in, i.e. included within इन्द्रियगुणानामन्तःपतितत्वान्न प्रमेयत्वम् NyāyMañ. ii. 53. 1.

अन्तःपत्र (antaḥ-patra) *n.* inner petal विरलविरलैरन्तःपत्रैर्मनाङ् मिलितं ततः। ...मुकुलनविधौ वृद्धाब्जानां बभूव कदर्थना SubhāRaK. 27. 24.

अन्तःपद (antaḥ-pada) *n.* **A** [Loc.] within the word or in the middle of the word अनुस्वारं रोष्मसु मकारः। नुश्चान्तःपदेऽरेफे VājaPrāti. 4. 2; 4.8; नान्तःपदे स्वरपञ्चमान्तस्थासु VājaPrāti. 4. 119; 4. 163; अनुनासिकोऽन्तःपदे ह्रस्वः

CaturA. (Śau.) 1. 83; उष्मस्वेवान्तःपदे CaturA. (Śau.) 2.33; 3.59 (*but* MW. *adv.* अन्तःपदे); **B** [Loc.] at the interior विस्तारेऽल्पगृहे क्वचिद् विशिखभक्तेऽन्तःपदे पीठिकां पङ्क्त्या गर्भगृहं करोतु TantrSa. 2. 20; ŚilpaRa. i. 21. 4; **C** inner resort, i. e. inner soul एनं सर्वकलभावेभ्यः कृत्वा निर्मूलम् ... मतिरन्तःपदं याति यथा पुत्र तथा कुरु YogVā. iv. 53. 32 (comm. अन्तःपदं प्रत्यग्भूतं ब्रह्म)

अन्तःपददीर्घीभाव (antaḥpada-dīrghībhāva) *m.* lengthening in the middle of the word अन्तःपददीर्घीभावे VājaPrāti. 4. 192 (comm. पदमध्ये दीर्घीभाव:)

अन्तःपदम् (antaḥpadam) *adv.* in the middle of the (inflected) word पुरएता तितउना प्रउगं नमउक्तिभिः। अन्तःपदं विवृत्तयः ṚPrāti. 2. 5, cf. **अन्तःपदस्थ.**

अन्तःपदविकृत (antaḥpada-vikṛta) *n.* change or modification in the middle of the word अन्तःपदविकृतमनन्यकारितम् Upalekha. 55. 23 (comm. अन्तर्मध्ये पदस्य विकारः यः तच्च वेष्टयेत्)

अन्तःपदस्थ (antaḥpada-stha) *adj.* occurring in the middle of the word तकारवर्गस्तु टकारवर्गमन्तःपदस्थोऽपि षकारपूर्वः ṚPrāti. 5. 3; युग्मान्तःस्थादन्तमूलीयपूर्वैरन्तःपदं नम्यतेऽन्तःपदस्थैः ṚPrāti. 5. 10; 5. 20.

अन्तःपदार्थविवेचन (antaḥpadārtha-vivecana) *n.* discussion about the internal object, i. e. the soul सर्वत्रान्तःपदार्थविवेचने मनोयुक्ताभ्यास इष्यते AdvaTāU. 385. 11.

अन्तःपयस् (antaḥ-payas) *n.* [Loc.] **A** in the innermost water (of the ocean in the form of the battle), i. e. in the thick of the fight संग्रामैकार्णवान्तःपयसि विचरितुं पण्डिताः पाण्डुपुत्राः VeṇīSaṁ. 1. 305; **B** inside the water स्नात्वासौ सखेऽन्तःपयसि रघुपतिर्दिव्यदेहः ...व्योम्नि स्थिरोऽभूत् MahāN. 9. 147.

अन्तःपरामर्शपूर्णता (antaḥparāmarśapūrṇa-tā) *f.* the state of being full of comprehension or consideration within सर्वस्यान्तःपरामर्शपूर्णतास्ति प्रवर्तने ŚivDṛ. 2. 15.

अन्तःपरिकृष्यमाण (antaḥ-parikṛṣyamāṇa) *adj.* which is being drawn inward or withheld inside (the mouth) हारलतामपरिस्फुटमन्तःपरिकृष्यमाणभारत्या। ...इत्यभिदधतीं जहुः प्राणाः KuṭṭaMa. 471.

अन्तःपरिक्षिप्त (antaḥ-parikṣipta) *adj.* thrown inside, i. e. stuck deep inside मोक्षे ...। बहिरन्तःपरिक्षिप्तशल्यतुल्या भवन्ति च। नाधयः TriṣaŚaPuC. i. 3. 570.

अन्तःपरिग्रह (antaḥ-parigraha) *m.* holding in the heart, i. e. deep attachment अन्तःपरिग्रहो रागो बहिस्त्वनुचितोपधिः। लोकेऽपि वन्द्यते त्यक्तबहिरन्तःपरिग्रहः PārśvC. 1. 559.

अन्तःपरितोष (antaḥ-paritoṣa) *m.* inner satisfaction सर्वथा धैर्यमाधेहि। धारय परममन्तःपरितोषम् TilaMañ. 346. 19.

अन्तःपरिधान (antaḥ-paridhāna) *n.* the innermost garment, MW., Apte.

अन्तःपरिधि (antaḥparidhí) *adv.* [P. vi. 1. 223] within or inside the enclosing sticks यत् कीटावपन्नेन जुहुयात् ...यदनायतने निनयेत् ...। मध्यमेन पर्णेन द्यावापृथिव्ययर्चान्तःपरिधि निनयेत् KāṭhS. 35. 18 (iii. 64. 9); KapiKaS. 48. 16 (307. 4); TaiBr. III. vii. 2. 2; BhārŚS. ix. 3. 5; ĀpaŚS. ix. 2. 5; MānŚS. 98. 1; HirŚS. xv. 1. 43 (271. 12); VaikhāŚS. 20.5; यजमानचमसमुन्नयेत् तस्मिन् द्वे दर्भतरुणके प्रास्ते स्यातां तयोर्वषट्कृतेऽन्तःपरिधि पूर्वं प्रास्येत् AitBr. 35. 7 (888); यदि पीतापीतौ सोमौ संगच्छेयातामन्तःपरिध्यङ्गारान्निर्वर्त्य जुहुयात् PañcBr. ix. 9. 8; ĀpaŚS. xiv. 30. 2; MānŚS. 102. 13; VaikhāŚS. 21. 16; गौपायनानां वै सत्त्रमासीनानां किरातकुल्यावसुरमाये अन्तःपरिध्यसून् प्राकिरत PañcBr. xiii. 12. 5 (Sāy. परिधीनां मध्यदेशे); JaimiBr. 3. 168; आयतनमास्तावः। आयतन एव तदेतान् कामान् प्रतिष्ठापयन्ति। तासामत्र यावत्कामं निनीय, अथान्तःपरिधि निनयेत् JaimiBr. 3. 116; 3. 169; सर्वा दिशः समेधन्ते। अन्तःपरिधि पिन्वयति तेजसोऽस्कन्दाय TaiĀ. v. 8. 5 (626. 6); ŚāṅkhāŚS. xiii. 12. 7; उदङ्ङत्याक्रम जुह्वामप आनीय संक्षालनमन्तःपरिधि निनयति BaudhŚS. i. 26. 8; ĀpaŚS. ii. 21. 7; VaikhāŚS. 6. 10; 15. 8; महावीरम् ... अथैनमन्तःपरिध्यभिपीययतोऽध्वर्युश्च प्रतिप्रस्थाता च BaudhŚS. i. 279. 22; iii. 168. 6; यदि राजन्यं वैश्यं वा याजयेत् स यदि सोमं बिभक्षयिष्येत् ... चमसेषु हूयमानेष्वन्तःपरिध्यङ्गारं निर्वर्त्य ...अस्मै भक्षं प्रयच्छेत् ĀpaŚS. xii. 24. 5; HirŚS vii. 7. 43 (882. 27); VaikhāŚS. 15. 31; हुताहुतसंसर्गेऽङ्गारमन्तःपरिधि निर्वर्त्य। कुशतरुणेन जुहोति KātyŚS. xxv. 11. 35; यजमानः ...विक्षरन्तम् (महावीरम्) अनुमन्त्रयते दिशोऽन्तःपरिध्यनुप्रहावयति HirŚS. xxiv. 4. 10 (877. 14); उन्नेतर्युपहवमिष्ट्वा ...(धानान्) द्विरुपघ्राय पश्चादाहवनीयस्यान्तःपरिधि निवपेयुः LāṭyāŚS. ii. 11. 12; DrāhyŚS. vi. 3. 18; सूक्तेनाप्यस्तुवन्नग्निं द्वैपदेन यथात्रिषु। अग्निरप्यब्रवीदेतानयमन्तःपरिध्यसुः BṛDe. 7. 98; अन्तःपरिधि साध्यांस्तानाम्नातांस्तु पितॄन्स्रुचा निनीयान्तःपरिधि वै निर्णिज्य ĪśānŚiPa. i. 14. 65.

अन्तःपरिधिदर्शन (antaḥparidhi- darśana) *n.* perceiving or speaking within or inside the enclosing sticks यत् समाने लिङ्गत्वेऽन्तःपरिधिदर्शनमसाधकमितरत्साधकमिति ŚābaBh. 1633. 4 (*on* viii. 4. 23)

अन्तःपरिधिदेश (antaḥparidhi-deśa) *m.* region within or inside the enclosing sticks विष्यन्दमानं मही द्यौः पृथिवी च न इत्यन्तःपरिधिदेशे निर्वपेयुः ĀśvaŚS. I. iii. 10. 24; I. vi. 12. 5; अन्तःपरिधिदेशे अन्तर्वेदिदेशे इति ŚābaBh. 1634. 19 (*on* viii. 4. 28)

अन्तःपरिपूर्णशोणितयुत (antaḥparipūrṇaśoṇita-yuta) *adj.* having blood completely filled inside (due to puncture) वर्ज्या वह्निविधानतः ... क्षीणोऽन्तःपरिपूर्णशोणितयुतः श्रान्तः सशल्यश्च यः ... नरः KalyāKā. 21. 23.

अन्तःपरिमार्जन (antaḥ-parimārjana) *n.* **A** type of medicinal therapy (*lit.* cleansing of the internal part (of the body)) शरीरदोषप्रकोपे खलु शरीरमेवाश्रित्य प्रायशस्त्रिविधमौषधमिच्छन्ति। अन्तःपरिमार्जनं बहिःपरिमार्जनं शस्त्रप्रणिधानं चेति। तत्रान्तःपरिमार्जनं यदन्तःशरीरमनुप्रविश्यौषधमाहारजातव्याधीन् प्रमार्ष्टि CaraS. i. 11. 55; **B** type of caustic acid (which helps to cleanse the body internally) क्षारो हि ...सर्वरसाधिष्ठानम् ...। स द्विधा बाह्यान्तःपरिमार्जनेन AṣṭāSaṁ. i. 190. 2 (1. 39); अर्शांसि क्षारशस्त्राग्निलेपाभ्यङ्गैरुपाचरेत्। दृश्यान्यदृश्यानि पुनः सदान्तःपरिमार्जनैः AṣṭāSaṁ. ii. 65. 23 (4. 10)

अन्तःपरिमार्जन (antaḥ-parimārjana) *adj.* which cleanses or purifies the internal part (of the body) तृष्णामोहपरीतस्य तस्य दाहज्वरापहम्। विधिं यथोक्तं युञ्जीत बाह्यान्तःपरिमार्जनम् AṣṭāSaṁ. ii. 50. 5 (4. 9)

अन्तःपरिवेषबन्धिन् (antaḥpariveṣa-bandhin) *adj.* binding, i. e. forming a circle within or inside तां प्रति ...शृङ्गारचेष्टा विविधा बभूवुः। कश्चित् कराभ्यामुपगूढनालम् ...। रजोभिरन्तःपरिवेषबन्धि लीलारविन्दं भ्रमयांचकार RaghuVa. 6. 13; SaraKaṇṭhā. 584. 17.

अन्तःपरिवेषशोभिन् (antaḥpariveṣa-śobhin) *adj.* beautiful on account of the circle (of pollen) inside कश्चित् कराभ्यामुपगूढनालम् ...। रजोभिरन्तःपरिवेषबन्धि(v. l. °शोभि) लीलारविन्दं भ्रमयांचकार RaghuVa. 6. 13.

अन्तःपरिषद्भव (antaḥpariṣad-bhava) *adj.* being or present in the inner circle (of gods) (स्वयंप्रभायाः) अस्या दृढधर्माख्यो देवोऽन्तःपरिषद्भवः। शुचं व्यपोह्य सन्मार्गे मतिमासंजयत्तराम् MahāP. 6. 53.

अन्तःपरिस्पन्द (antaḥ-parispanda) *m.* inner throbbing, i. e. inner activity अस्ति विमर्शरूपा स्वसंविद् विषयान्तरानवभासिनी। तस्या झटित्युच्चलनाकारप्रतिभोन्मज्जनात्मकोऽन्तःपरिस्पन्दः पूर्णाहंभावनामकस्तुर्यावस्थानामकश्च LalitāSaBh. 13. 20 (*on* 30)

अन्तःपरीणाह (antaḥ-pariṇāha) *m.* inner circumference or width इदं विमानं खलु पुष्पकाख्यम् ...। अन्तःपरीणाहममुष्य मातुं त्रिविक्रमालं यदि हि त्वमेव ...गन्तासि Rāgh. 20. 50.

अन्तःपर्शव्य (antaḥ-parśavyá) *n.* [P. iv. 2. 94] **A** intestinal flesh (*lit.* flesh which is inside the ribs) ईशानं मन्युना महादेवमन्तःपर्शव्येन VājaS. 39. 8 (Mahīdhara पार्श्वास्थिसंबन्धिना मांसेन) (*but* Apte *adj.*); **B** the word *antaḥparśavya* (विसर्जनीयः न सकारषकारावापद्यते) वाजपतिर्वासः ...अन्तःपर्शव्येन VājaPrāti. 3. 38; cf. **अन्तःपार्श्व.**

अन्तःपल्लवजृम्भमाण (antaḥpallava-jṛmbhamāṇa) *adj.* opening or blossoming in the midst of foliage (new leaves) अन्तःपल्लवजृम्भमाणसुमनःसंदोहमन्दस्मिताः। ...नववीरुधः क्षितिरुहैराक्रीडवाटीं गताः VasaTi. 6. 11.

अन्तःपवित्र (antaḥ-pavitrā) *n.* [Abl.] from inside of the strainer, i. e. the filtered stream अन्तर्यामो नाम। तमन्तःपवित्राद् गृह्णाति। ...अस्याप्युपांशुरन्तःपवित्राद् गृहीतो भवति ŚatBr. IV. i. 2. 3; ŚatBr. (K.) V. i. 2. 2.

अन्तःपशु (antaḥ-paśu) *m.* [Loc.] at the time of the cattle (staying) inside (the stable or village), i. e. in the evening (when the cattle have come home) and in the morning (before they go out) अन्तःपशौ पशुकामस्य सायंप्रातः (होमकालः) KātyŚS. iv. 15. 14 (comm. अन्तःपशौ काले ग्राममध्ये पशवो यस्मिन् काले। सायं पशुषु ग्राममध्य आगतेषु प्रातश्च ग्रामादनिःसृतेषु)

अन्तःपश्यदवस्था (antaḥpaśyad-avasthā) *f.* stage or condition of perceiving within the soul स एवात्मा सर्वदेहव्यापकत्वेन वर्तते। अन्तःपश्यदवस्थैव चिद्रूपत्वमरूपकम् ŚivDṛ. 2. 3 (comm. भोक्तृतारूपा)

अन्तःपा (antaḥ-pā-) I.P. cf. **अन्तःपेय** [Viśva.]

अन्तःपाक (antaḥ-pāka) *m.* baking or burning inside (earthenware)

अन्तःपाकस्यापि सच्छिद्रत्वादवयविनाम् ...उपपत्तेः TattvPradī (Ci.) 320. 2.

अन्तःपाटलीक्रियमाणकाया (antaḥ-pātalikriyamāṇakāyā) *adv. (f.)* whose body is being reddened inside दृष्टवानस्मि ... आसन्नवनलताकिसलयैः सरसैर्दुःखक्षतैरिवान्तःपटली (v.l. पाटली) क्रियमाणकायम् ... योषितम् HarṣaC. 323.2.

अन्तःपाण्डुकवनम् (antaḥpāṇḍukavanam) *adv.* inside the Pāṇḍuka forest तत्रान्तःपाण्डुकवनं चूलिकादक्षिणेन तु ...। सिंहासने जिनस्नानयोग्येऽङ्कस्थापितप्रभुः। न्यषीदद् वासवः PārśvC. 5. 89.

अन्तःपात (antaḥ-pātá) *m.* **1** name or designation of a peg (*lit.* internal or intermediate peg) पूर्वार्ध्यो वर्षिष्ठ स्थूणाराजो भवति। तस्मात् प्राङ् प्रक्रामति त्रीन् विक्रमांस्तच्छङ्कुं निहन्ति सोऽन्तःपातः ŚatBr. III. v. 1. 1; ŚatBr. (K.) IV. v. 1. 1; यदेवात्रान्तःपातेन गार्हपत्यस्य वेदेर्व्यवच्छिन्नं भवति तदेवैतदनुसंतनोति ŚatBr. III. v. 2. 2; ŚatBr. (K.) IV. v. 2. 2 [a post fixed in the middle of the place of sacrifice, MW; a post fixed in the middle of the sacrificial ground, Apte]; **2** type of euphonic combination (insertion of a letter) आहुः सकारोदययोस्तकारं ञकारे शकारपरे चकारम्। तेऽन्तःपाताः ṚPrāti. 4. 7 (Uvaṭa अन्तर्मध्ये पदयोः पतन्तीत्यन्तःपाताः। एतेऽन्तःपातसंज्ञाः संधयो वेदितव्याः); **3** inclusion यदा तु सारूप्यमात्रवशेनाप्रस्तुतप्रशंसायामप्रकृतप्रकृतयोः संबन्धस्तदाप्रस्तुतस्य सरूपस्याभिधीयमानस्य प्राधान्येनाविवक्षायां ध्वनावेवान्तःपातः Dhvanyā. 128. 2 (*on* 1. 13); केचिच्चित्राख्यं तृतीयं काव्यभेदमिच्छन्ति। ... तन्न। ... आस्वाद्यव्यङ्ग्यत्वमनास्वाद्यव्यङ्ग्यत्वं वा। आद्ये प्राचीनभेदयोरेवान्तःपातः SāhiDa. 248. 4; 460. 9; **4** [Loc.] in the course or occurrence within अन्तःपाते साहसानां नाद्भुतं तद्विधेर्वशात्। जीयते लक्षमेकेन लक्षैणैकोऽथवा युधि RājTa. (Ka.) 8. 1499.

अन्तःपातित (antaḥ-pātita) *adj.* inserted or included in, PW.; MW.; inserted, included or comprised in, falling within, Apte.

अन्तःपातिता (antaḥpāti-tā) *f.* the state of being included or comprised in (वैश्वदेवान्नस्य) तस्यापि चान्तःपातित्वात् सर्वाद्यस्यैव युक्तिमान्। ग्रहस्तस्य गृहीतौ तु नास्यान्तःपातिता तथा BṛĀraUBhVā. i. 5. 32 (comm. सर्वाद्यान्नेऽन्तर्भूतं वैश्वदेवान्नम्)

अन्तःपातित्व (antaḥpāti-tva) *n.* **1** the state of occurring in the mind यो बाह्यः स खलु जलैर्निरासि रागो यश्चित्ते स तु तदवस्थ एव तेषाम्। धीराणां व्रजति हि सर्व एव नान्तःपातित्वादभिभवनीयतां परस्य ŚiśuVa. 8. 58 (comm. अन्तर्गतत्वात्); **2A** the state of being included in (वैश्वदेवान्नस्य) तस्यापि चान्तःपातित्वात् सर्वाद्यस्यैव युक्तिमान् BṛĀaUBhVā. i. 5. 32; **2B** the state of falling within, i. e. being a constituent part समस्तैरेव ...पदार्थैः समग्र एव यः समाप्तिं नीतो लोकस्तं खलु तदन्तःपातित्वेऽप्यचिन्त्यस्वपरपरिच्छेदशक्तिसंपदा जीव एव जानीते न त्वितरः TattvPradī. (A.) 207. 1 (*on* 2. 53); अङ्गुलीनखादीनामवयवावयविनोरभेदोपचारेणान्तःपातित्वात् तल्लक्षणेनैव गतार्थता VīraMi. (Lakṣaṇa.) 45. 19.

अन्तःपातिन् (antaḥ-pātin) *adj.* **A** falling within, comprised in, which comes under (the jurisdiction of a certain district) विदितमस्तु भवतामेतद्विषयान्तःपाति मयु(यू)रशाल्मलाग्रहारक्षेत्रं(त्रं) राज्ञा श्रीभूतिवर्म्मणा ताम्रपट्टीकृतम् EI. xix. 118. 6; कुमारीग्रामो नाम ग्रामः ...अल[न्दि] ग्रामा[त्*] थिऊरग्रामाद्य पू[र्]व्[व]त ...पूनकविषयान्तःपाती EI. xiii. 280. 31; श्रीनगरभुक्तौ राजगृहविषयान्तःपाति...गयाविषयान्तःपातिकुमुदसूत्रवीथी प्रतिव(ब)द्धपालामकग्रामेषु EI. xvii. 321. 26; xxiii. 291. 6; महाराज श्रीभोजदेवः। ...श्रीकारञ्जमण्डलान्तःपाति उदु(म्ब)रविषयस(म्ब)द्धवलाकाग्रहारे समुपागतान् सर्व्वानेव ...समाज्ञापयति EI. xix. 18. 6; ix. 9. 53; मया श्रीहर्षपुराद्धीष्टमशतान्त[ः]पाति[क]र्प्पटवाणिज्यचतुर[ा]शीतिकाप्रतिबद्धरूरिद्धादशकान्त[ः]पातिव्याघ्रासग्रामः (समाभिजिख्यते) EI. i. 55. 35-36; रामतीर्थि[का]चतुरशीति[कान्तः]पातिकिणिहिकाग्रामः EI. xxv. 170. 30; चतुर्द्दशग्रामशतोपलक्षितकोन्क[ङ्क]णान्तःपातिमाहिरिरविषयान्न(न्त)र्व[र्]तिभादानग्रामः EI. iii. 274. 56; xxii. 137.4; xviii. 322. 6; xx. 106. 11; xvi. 12. 8; xvi. 275. 7; **B** being or residing in, dwelling in करहाटदशसहस्रान्तःपातिभ्यो ब्राह्मणेभ्यः ...कुमारिग्रामो नाम ग्रामो दत्तः EI. xiii. 280. 26; श्रीकण्णदेवः स्वभुज्यमान°- ...°षड्विंशत्यधिकग्रामशतान्तःपातिनः समस्तराजपुरुषान् ...बोधयति EI. i. 317. 4; **C** being contained, i. e. situated in उदकं शनैरभ्यवेयान्न धावेदन्तःपातिशर्करादिभिः BālamBha. i. 322. 26 (*on* 1. 100) [inserted in, MW.; Apte; coming out from within, *nt.*]

अन्तःपातिनैमित्तिक (antaḥpāti-naimittika) *adj.* (used as noun) (main ritual) which includes occasional or optional rites within तन्त्रान्तःपातिनैमित्तिके तु न पार्थक्येन पुनर्ब्रह्मासनास्तरणप्रभृतयः VīraMi. (Saṁskāra.) 1025. 13.

अन्तःपातिसकलपाप (antaḥpāti-sakalapāpa) *n.* all the sins which are falling, i.e. included within सर्वेत्यनेनान्तःपातिसकलपापनिरासः सूचितः BālamBha. iii. 135. 13 (*on* 3. 243)

अन्तःपात्य (antaḥ-pātya) *m.* **1** name of a peg (*lit.* internal or intermediate peg) पूर्वार्ध्यात् स्तम्भात् पुरस्तात् त्रिषु प्रक्रमेषु शङ्कुं निहन्ति सोऽन्तःपात्यः KātyŚS. viii. 3. 7; अन्तःपात्यात् षट् प्रक्रमान् प्राङ् यात्वा ...औदुम्बरीं मिनोति KātyŚS. viii. 5. 30; उख्यस्थानेऽर्धव्यामेन गार्हपत्यस्य परिलिखति। मण्डलाद् वा प्रक्रमणमन्तःपात्यस्य KātyŚS. xvi. 7. 30; xvi. 3. 27; (अध्वर्युप्रतिप्रस्थातारौ) दीक्षावत् पावयतोऽन्तःपात्ये (यजमानम्) श्येनपत्राभ्याम् KātyŚS. xix. 2. 27; xxvi. 7. 2; **2** group of three steps (near the intermediate peg to the east of *gārhapatya*, up to the *vedi*) नान्तःपात्यगार्हपत्ययोर्वृद्धिर्भवति KātyŚuS. 6. 6 (comm. व्याममात्रविस्तारा मण्डलाकारा (भूः) गार्हपत्यशब्देनोच्यते। तस्मात् पूर्वभागे वेद्यन्तपर्यन्त प्रक्रमत्रयपरिमितो भूभागोऽन्तःपात्यः) [a post fixed in the middle of the place of sacrifice, MW.; a post fixed in the middle of the sacrificial ground, Apte; (in Gr.) insertion of a letter, MW.; Apte]

अन्तःपात्यदेश (antaḥpātya-deśa) *m.* [Loc.] near the region of intermediate or internal peg आज्यप्रोक्षणीरन्तःपात्यदेशे उत्पूय पश्चाज्यग्रहणम् KātyŚS. viii. 6. 34 (*but* comm. अन्तःपात्यसंज्ञके देशे); यूपं परीत्य (रथम्) अन्तःपात्यदेशे स्थापयति KātyŚS. xv. 6. 22; अन्तःपात्यदेशे संभारान् निदधाति KātyŚS. xxvi. 1. 2.

अन्तःपात्यपुरस्तात् (antaḥpātyapurastāt) *adv.* in front of the intermediate peg रोहिते चर्मण्यानडुहेऽन्तःपात्यपुरस्तादिष्टकाः करोति प्रथमचितेः KātyŚS. xvii. 3. 17.

अन्तःपात्यसमीप (antaḥpātya-samīpa) *n.* [Loc.] near the intermediate peg (अन्तःपात्यसहितं बर्हिरन्तं प्रेष्यति) अन्तःपात्यसमीपे स्थितः ...प्रेष्यति comm. *on* KātyŚS. viii. 6. 26.

अन्तःपात्यसहितम् (antaḥpātyasahitam) *adv.* near the intermediate peg अन्तःपात्यसहितं बर्हिरन्तं प्रेष्यति KātyŚS. viii. 6. 26 (comm. अन्तःपात्यसमीपे स्थितः) [Viśva.]

अन्तःपात्यस्थान (antaḥpātya-sthāna) *n.* [Loc.] near the place or region of intermediate peg अन्तःपात्यस्थाने चर्मणि ...सीसेन शष्पक्रयः KātyŚS. xix. 1.18.

अन्तःपात्र (antaḥ-pātrá) *n.* [APrāti. 201; P. ii. 4. 84] [Loc.] inside an inner vessel, at the bottom of an inner vessel श्वन्वतीरप्सरसो रूपका उतार्बुदे। अन्तःपात्रे रेरिहतीं रिशां दुर्णिहितैषिणीम्। सर्वास्ता अर्बुदे त्वममित्रेभ्यो दृशे कुरु AV. xi. 9. 15; AV. (P.) xvii. 12.1.

अन्तःपादम् (antaḥpādam) *adv.* [P. vi. 1. 115; viii. 3. 103; Nyās. i. 618. 17 (*on* iii. 2. 66)] **A** in the interior or middle of a quarter of a *ṛc* अन्तःपादमकाराच्चेत् संहितायां लघोर्लघु। यकाराद्यक्षरं पदं वकाराद्यपि वा भवेत् ṚPrāti. 2. 14; 2. 26; अन्तःपादं नाम्युपधः सकारः षकारमप्यूष्मपरैर्यथोक्तम्। अन्यैरेकारान्नितरत्र पूर्वा ततो व्यापत्तिर्भवतीति विद्यात् ṚPrāti. 5. 1; 8. 1; अन्तःपादमिति सप्तम्यन्तमेतत् Nyās. ii. 274. 21 (*on* vi. 1. 115); SaraKaṇṭhā. (Gr.) viii. 1. 30; **B** in the middle of a quarter of a verse (in general) अन्तःपादमिति। पादस्य मध्ये। ...पादग्रहणेन ऋक्पादश्लोकपादयोः सामान्येन ग्रहणम् Nyās. ii. 1094. 4 (*on* viii. 3. 103)

अन्तःपादविकृत (antaḥpāda-vikṛta) *n.* change or modification in the quarter of a *ṛc* अन्तःपद(v. l.°पाद Viśva.)विकृतमनन्यकारितम् Upalekha. 55. 23.

अन्तःपादोत्तर (antaḥpādottara) *n.* Uttara entablature on the inner pillar श्रीकेशस्य तु संस्थानम् ...। अन्तःपादोत्तरैर्युक्तं मध्ये वारणशोभितम् MayaMa. 24. 108.

अन्तःपापाग्नि (antaḥpāpāgni) *m.* fire (i. e. destroyer) of inner sin संसारपतितश्रान्तदुःखध्वंस' नमोऽस्तु ते। ...प्रतिस्वस्वनदीप्ताय अन्तःपापाग्नये नमः SkandP. ii (2). 17. 124.

अन्तःपार्श्व (antáḥ-pārśva) *n.* [TaiPrāti. 8. 31] **1** intestinal flesh (*lit.* flesh which is inside the ribs) (मन्त्रानुवाकः) चित्तं॑ संता॒नेन॑ ...म॒हादे॒वम॒न्तःपा॑र्श्वेन TaiS. I. iv. 36. 1; TaiĀ. iii. 21. 1 (362. 1); comm. *on* TaiPrāti. 8. 31; cf. **अन्तःपर्शव्य**; **2** [Loc.] in the inner side पादयोर्दश नखाः। तेषामुभौ पुरोनखौ। पुरोनखद्वयस्य प्रत्येकं बहिःपार्श्वे द्वौ सनखौ। अन्तःपार्श्वे नखश्रा(स्रा)वौ (प्रदेशौ) Hastyāyur. 528. 7 (3. 29)

अन्तःपार्श्वकण्डू (antaḥpārśva-kaṇḍū) *f.* itching sensation over the inner sides खुरशिखरसमाकृष्टरेणुस्तुरंगः ...। पृष्ठान्तःपार्श्वकण्डूव्यपनयनवशाद् द्वित्रिरुद्ध-

र्तिताङ्गः ...वपुरास्यानुपूर्वं धुनोति SaduktiKa. 279. 7.

अन्तःपार्श्वापवृत्तशिरस् (antaḥpārśvāpavṛtta-śiras) *adj.* whose head is bent inwards or to the side (मूढगर्भः) अन्तःपार्श्वापवृत्तशिराः कश्चिदेकेन बाहुना ...योनिमुखं प्रतिपद्यते SuśruS. ii. 8. 5 (comm. पार्श्वमध्यनिक्षिप्तशिराः)

अन्तःपार्श्व्य (antaḥpārśv-yá) *n.* **A** intestinal flesh (*lit.* flesh which is inside the ribs) रुद्रस्यान्तःपार्श्व्यम् VājaS. 39. 9 (Mahīdhara पार्श्वस्यान्तर्मध्ये भवम् मांसम्); VājaS. (K.) 39. 7; **B** the word *antaḥpārśvya* वाजपतिर्वासः ...अन्तःपार्श्व्यमिति च (एते विसर्जनीयाः यथाप्राप्तं न सकारषकारौ आपद्येते) VājaPrāti. 3. 38 [flesh at both sides, MW.]

अन्तःपाल (antaḥ-pāla) *m.* keeper or guard of the harem अन्त(v. l. °न्तः)-पालश्च यास्यन्ति सदारो यत्र राघवः Rāmā. ii. App. I. 15 (23) (*but* PW. keeper or guard of palace)

अन्तःपाषाणसंयुक्त (antaḥ-pāṣāṇasaṁyukta) *adj.* having (structure of) stones inside यवमानं घनं शेषं गाढमत्र प्रकल्पयेत्। गाढयुक्तं तु वृत्ताभमन्तःपाषाणसंयुतम् ŚilpaRa. ii. 16. 49.

अन्तःपिटकाञ्चित (antaḥ-piṭakāñcita) *adj.* distinguished by or covered with boils from inside सू(शू)नः स्तब्धो गुरुः शीतः सुप्तोऽन्तःपिटकाञ्चितः। ...स कफेनातुरो व्रणः Hastyāyur. 355. 17 (3. 1)

अन्तःपिण्डिकापीठपातिन् (antaḥpiṇḍikāpīṭha-pātin) *adj.* falling (for refuge) on the broad pedestal (of the idol) inside अन्तःपिण्डिकापीठपातिभिश्च सर्वपशुजीवितैरिव शरणमुपागतैरलक्तकपटैरविरहितचरणमूलाम् ...चण्डिकामपश्यत् (चन्द्रापीडः) Kād. 225. 14.

अन्तःपिहित (antaḥ-pihita) *adj.* **A** hidden inside or within सरस्वत्याः स्रोतः परिमलगभीरं विजयते। अतिस्वादुन्यन्तःपिहितरसरम्ये यदुपरि प्लवन्ते भूयांसः कतिचिदपि मज्जन्ति निपुणाः SaduktiKa. 51. 10; **B** concealed in the heart नूनमियमन्तःपिहितमदनविकारा वर्तते SāhiDa. 338. 12.

अन्तःपिहितज्योतिस् (antaḥpihita-jyotis) *adj.* whose light (of knowledge) is covered or hidden within अन्तःपिहितज्योतिः संतुष्यत्यात्मनोऽन्यतो मूढः YogŚā. 12. 10.

अन्तःपीठ (antaḥ-pīṭha) *adj.* **A** being, i.e. situated inside the seat or pedestal लिङ्गानि ... मुमुक्षूणामन्तःपीठानि कारयेत् ĪśānŚiPa. ii. 8. 78; **B** (spout) of internal pedestal नालं प्रकर्तव्यं वामे प्रासादमध्यमे। अन्तःपीठस्य नालस्य समं वा बहिरिष्यते MayaMa. 19. 29.

अन्तःपीडा (antaḥ-pīḍā) *f.* internal agony or suffering देव्यपि कादम्बरी ... अन्तःपीडाकूणननिमीलितेन चक्षुषा मूर्च्छितेव ... सकलमेव तं दिवसमस्थात् Kād. 250. 22.

अन्तःपीडोपराग (antaḥpīḍoparāga) *m.* **1** dye in the form of internal agony or suffering अन्तःपीडोपरागरक्ते रक्ततामरसानुकारिणि मुखे ... दृष्टिं निवेश्यैव ... शुकनासो राजानमप्राक्षीत् Kād. 292. 19; **2** effect of the internal agony or suffering, Kād. 292. 19.

अन्तःपुट (antaḥ-puṭa) *n.* [Loc.] in the internal layer or wrapper चूर्णं विभावयेत्। ... अर्कपत्रं लिपेत्तेन रुद्ध्वा चान्तःपुटे पचेत् RasaRaSa. 19.27.

अन्तःपुर (antaḥ-pura) *n.* **1A** inner apartment of a royal palace, harem, female apartment **B** inner part of a house **C** king's (private) palace, royal residence **D** inner part of the city, interior of the city **E** inside or interior of the palace **F** sanctum sanctorum or inner chamber (where the image of a deity is installed) **G** living place or covert **2A** inmates or royal ladies in the inner apartment or harem **B** queen **C** supervisor of the harem, chamberlain **Di** wife or consort **ii** housewife **3** the word *antaḥpura* **1A** inner apartment of a royal palace, harem, female apartment ययातिः ...। प्रविश्यान्तःपुरं तत्र देवयानीं न्यवेशयत् MahāBhā. i. 77. 1 = MatsyaP. 31. 1; अन्तःपुरं प्रवेश्यैव (शकुन्तलां पूजयामास) MahāBhā. i. 683* (2); i. 166. 23; ii. 183* (3); iii. 113. 10; iii. 127. 10; वासांसि परिजीर्णानि लब्धान्यन्तःपुरेऽर्जुनः। ... पाण्डवेभ्यः प्रयच्छति MahāBhā. iv. 12. 7; (उत्तरः) अन्तःपुरे श्लाघमान इदं वचनमब्रवीत् MahāBhā. iv. 33. 21; iv. 67. 2; संजयः ...। अन्तःपुरमुपस्थाय द्वाःस्थं वचनमब्रवीत् MahāBhā. v. 32. 2; v. 38. 12; अन्तःपुरं प्रविश्यैव संजयः ... राजानमुपजग्मिवान् MahāBhā. viii. 7* (5); अन्तःपुरे ततस्तस्य स्त्रियः ... परमदुःखिताः MahāBhā. xiii. App. I. 8 (48); अन्तःपुरेषु च तदा सुमहान् रुदितस्वनः। प्रादुरासीत् MahāBhā. xv. 45. 42; अन्तःपुरं प्रविश्यास्मै कन्यां दत्त्वा यथाविधि। ... राजा हर्षमवाप Rāmā. i. 9. 31; i. 15. 23; (रामः) तस्मिन्क्षणे विनिर्गत्य मातुरन्तःपुरं ययौ Rāmā. ii. 4. 29; ii. 64. 21; (लक्ष्मणः) ददर्शान्तःपुरं महत् (सुग्रीवस्य) Rāmā. iv. 32. 19; समृद्धं स्त्रीसहस्रेण ...अन्तःपुरं समुत्सृज्य त्वामुपैष्यति रावणः Rāmā. v. 21. 13; (रावणः) जयाशिषा मन्त्रिगणेन पूजितो विवेश सोऽन्तःपुरमृद्धिमन्महत् Rāmā. vi. 27. 22; vi. 98. 1; (सा) धर्षयित्वा हृता राजन्गुप्ताप्यन्तःपुरे तव Rāmā. vii. 25. 27; vii. 35. 56; अयोध्याम् ... तथैवान्तःपुरं मुनिः। ... वसिष्ठः पर्यरक्षत HariVaṁ. 10. 4 = BrahmP. 8. 4; अपुत्रस्य स राज्ञस्तु ववृधेऽन्तःपुरे शिशुः HariVaṁ. 25. 12; BrahmP. 14. 51; परिव्राजिका लब्धविश्वासान्तःपुरे कृतसत्कारा महामात्रमेकैकमुपजपेत् ArthŚā. i. 49. 4 (1. 10); ManuBh. ii. 18. 22 (*on* 7. 54); (राजवास्तुकस्य) पश्चिमार्धे तस्यान्तःपुरम् ArthŚā. iii. 103.7 (10. 1); इन्द्रियार्थैरन्तःपुरे नैव सुतोऽस्य रेमे BuddhaC. 3. 51; राजा ... मध्याह्ने ... भोक्तुमन्तःपुरं विशेत् ManuSm. 7. 216 = SūktiRa. 158. 6; NītiPra. 8. 88; ManuSm. 7. 221; 7. 224; एवमन्तःपुरे ज्ञेयो बाह्यश्चासनतो विधिः NāṭyaŚā. 12. 236; भो वानर ... केन कारणेन धर्षितोऽस्माकमन्तःपुरं प्रविष्टः Abhiṣe. 3. 14 (7); सर्वमन्तःपुरे कथयिष्यामि Avimā. 4. 21 (32); 6. 8 (7); यावदहमपि अन्तःपुरं प्रविश्य देवकीं समाश्वासयामि BālC. 1. 29 (23); अन्तःपुरे ... शोकाश्रुभिर्वसुमती सिषिचे JātaMā. 11. 12 (2, 30); कलत्रावग्रहोपायेनैनामन्तःपुरं प्रवेशयेत् KāmSū. 293. 20 (5. 5); नागरकस्तु सुप्रापमप्यन्तःपुरमपायभूयिष्ठत्वान्न प्रविशेदिति वात्स्यायनः KāmSū. 298. 8 (5. 6); राजकुलचारिण्य एव लक्षण्यान्पुरुषानन्तःपुरं प्रवेशयन्ति KāmSū. 301. 14 (5. 6); भगवान् ...। जाम्बवतीं चान्तःपुरे निवेशयामास ViṣṇuP. iv. 13. 63; v. 27. 21; गन्धमाल्यैस्तथा धूपैः पूज्यमानः स तिष्ठति। अन्तःपुरे (मूषकः) MārkP. 116. 50; 71. 20; ततः संस्थापयामास ... अन्तःपुराणि च VāyuP. i. 8. 96; गत्वा ह्यन्तःपुरं भ्रातः प्रणम्य जगदीश्वरौ। ... यास्यामि BrahmāṇḍP. ii. 41. 37; ii. 32. 17; ii. 41. 49; (बलिः) अन्तःपुरे जुगोपैनं भक्ष्यैर्भोज्यैश्च तर्पयन् BrahmāṇḍP. ii. 74. 67; आयाति स्वसमीपं सा यद्यप्यन्तःपुरं गता LalitāSa. 263; अन्तःपुराद्वा स्वनिवेशनाद्वा ... कुर्यान्नरेन्द्रः प्रथमं प्रयाणम् YogYā. 13.1; अन्तःपुराद्वैशंपायनमादायागच्छेति ... राजा प्रतीहारीमादिदेश Kād. 17. 17; अन्तःपुरं शृङ्गाराभरणानाम् ... दर्पशातमपश्यत् (हस्तिनम्) HarṣaC. 109. 1; सहसैवोत्थितोऽन्तःपुरेऽग्निः Ratnā. 4. 14; राजा ... मन्मथप्रतिमकान्तिरन्तःपुरेष्वरमत AvantiKa. 22. 20; 183. 7; (असौ) न मामन्तःपुरं प्रवेशयति DaśKuC. 134. 15; 76. 1; विधायान्तकसन्मानं सुरेशोऽन्तःपुरं ययौ PadmP. (Ra.) 8. 490; (राजा) निषेवितः ... अन्तःपुरेषु विचरेत् कुब्जकैरातवामनैः NītiSā. 7. 41; (ध्रुवे) तपोवनं गते तस्मिन्प्रविष्टोऽन्तःपुरं मुनिः (नारदः) BhāgP. iv. 8. 63; iv. 12. 16; अन्तःपुरमपि केचिद्दासीभिः कथितसदुपायाः। प्रविशन्ति RatiRaha. 13. 104; सर्वत्रान्तःपुरेऽस्मिन् भवतु कृतपदा कौमुदी वासरेऽपि TāpaVa. 1. 3; स्नात्वा ... अन्तःपुरं प्रविश्य कामतः सुपरीक्षितमन्नमश्नीयात् BālaKrī. i. 188. 19 (*on* 1. 322); कक्षान्तरेष्वन्तर्वंशिकसैन्याधिष्ठितोऽन्तःपुरं प्रविशेत् (राजा) ManuBh. ii. 44. 17 (*on* 7. 153); ii. 66. 27 (*on* 7. 216); अन्तःपुरान्निष्क्रम्यालंकृत आयुधीयं पश्येत् ManuBh. ii. 68. 9 (*on* 7. 222); अन्तःपुरे राजनि राजधान्याम् ... उत्सवोऽयमद्यापि विश्राम्यति न प्रजासु RāghPāṇ. (Dha.) 3. 17; अन्तःपुरं वित्तगृहं परदौत्यं व्रजेन्न हि AgniP. 155. 18; सातवाहनो नाम राजा, तेन प्राकृतभाषात्मकमन्तःपुरे एवेति (प्रवर्तितो नियमः) KāvyMī. 50. 18; राजापि ... तामेवान्वेष्टुमन्तःपुरमाजगाम NalaCam. 3. 5 (3); देवी व्यपास्य शयनं धृतमानतन्तुरन्तःपुरं गतवती ViddhaŚā. 1. 19 = SaraKaṇṭhā. 721. 17; एषा गाधिसुता ...। अन्तःपुरात्समायाता SkandP. vi. 165. 18; नाक्रमेत् ...। अन्तःपुरम् ऋतुगृहम् ViṣṇuDhaP. ii. 89. 19; बह्व्यो मत्सदृशा भार्यास्तिष्ठन्त्यन्तःपुरे तव VarāP. 137. 153; कौलीनं प्रविश्यान्तःपुरं नृपः। अनयत् क्षणदाशेषम् BṛKathāŚloSaṁ. 1. 33; नृपतिः ... देवतायाचनव्यग्रस्त्रीकमन्तःपुर ययौ BṛKathāŚloSaṁ. 2. 18; 3. 41; 7. 22; यावदन्तःपुराटव्यौ ...। नास्त्यसौ यो न चास्माभिरीक्षितश्चारचक्षुषा BṛKathāŚloSaṁ. 12. 34; 20. 303; 27. 46; अधिरुह्यान्तःपुरम् ... देवीमिदं सदुःखमवदम् TilaMañ. 29. 3; 21. 15; अन्तःपुरे भूमिपतिर्मदान्धः करोति यः संगतिमङ्गनाभिः YaśasCam. ii. 153. 10; i. 595. 6; ii. 288. 21; अन्तःपुरे वर्षवराः ... स्वस्वकार्योपयोगिनः DaśRū. 2. 44; य उक्तो राजदण्डोऽयं तस्येदं स्थानपञ्चकम्। गजो व्याघ्रश्च ... भृङ्गो यथाक्रमम् ... भ्रमरेऽन्तःपुरं कुर्यात् YuktiKa. 37. 12; (मागधी ... अन्तःपुरसमाश्रया) नरेन्द्राणां यदन्तःपुरं तन्निवासिनामिति संबन्धः AbhinBhā. ii. 377. 12 (*on* 17. 51); नरपतिः (दशरथः) ... प्रविश्यान्तःपुरं कान्तां नापश्यत् RāmāMañ. 58. 11; नान्तःपुरैर्न वासोभिः ...। भवन्ति पूजिता नार्यः RāmāMañ. 397. 21; वधूरूपं स्थितमन्तःपुरे नरम्। आदित्यवर्मा विज्ञाय पश्चात्तापं समाययौ BṛKathāMañ. i. 2. 181; iii. 1. 333; iv. 1. 13; (गुणशर्मा) विवेशान्तःपुरे प्रातर्वीणां शिक्षयितुं स्वयम् BṛKathāMañ. vi. 1. 187; BrahmP. 200. 20; मङ्गलानि विचित्राणि यथोचितमकारयन्। विवेशान्तःपुरे साधुः BhaviP. 455B. 20 (iii (2). 28. 17); सती ...। विवेशान्तःपुरं देवी यत्र माता प्रसूरिति BṛDharmaP. i. 37. 2; भूपकन्या चान्तःपुरात्तु सा ... तत्राजगाम ŚivaP. ii (1). 3. 44 (40A. 6); पद्मावती ...। दौवारिकैर्वेत्रहस्तैः शासितान्तःपुराद्बहिः KalkiP. i. 5. 19; सुन्दरीणां सहस्राणि षोडशान्तःपुरे हरेः। बभूवुः DaśāvaC. 8. 195; राज्ञस्तु तनया पाटलीत्यस्ति कन्यका। उपर्यन्तःपुरे सा च रत्नमित्यभिरक्ष्यते

KathāSaSāg. i. 3. 58; ii. 5. 60; विधातव्यम् … अन्तःपुरं दक्षिणतः SamarāSū. 45. 35; आनीयान्तःपुराद् भक्तपानादि प्रतिवासरम्। गुरवे पुष्पचूलादात् PariPar. 6. 149; 3. 244; तरुणो विटः। अन्तःपुरे मदीयां स्त्रीं कटाक्षैः स्प्रष्टुमीक्षते Mānaso. ii. 18. 998; स मन्त्री …। अन्तःपुरे यथाकामं विजहार तया सह RājTa. (Ka.) 3. 499; देवोऽन्तःपुरमध्यास्ते MudriKu. 5. 0 (7); अन्तःपुरेषूद्यानेषु च वपुषो लतानां च दुर्लभत्वम् AlaṅkāRa. 16 (6); वेसरादिकं पुरं च नगरमन्तःपुरं च अवरोधनम् JñātāDhaṬ. 12B. 5; अन्तःपुरं संप्रविशेन्नियम्य त्वङ्गरक्षकान् VasiS. 33. 59; नन्दो वृद्धगोष्ठीतोऽन्तःपुरमासाद्याह GopāKeCan. 118. 33; EI. i. 25. 4; विमृश्याह नृपो देवीं गच्छान्तःपुरमात्मनः PārśvC. 3. 721; 2. 338; क्षणेन तुमुलो जज्ञे पुरेऽप्यन्तःपुरेऽपि च PrabhāC. 33. 24; 84. 30; (नियुञ्जीत … भीरूनन्तर्निवेशने) अन्तर्निवेशनेऽन्तःपुरे ManvaVi. 785. 16 (*on* 7. 62); 866. 13 (*on* 7. 224); अन्तःपुरे संगतां कन्यामधिकृत्य कर्तव्या (नाटिका) NāṭaLaRaK. 2751; कालिदासो दासीवेषेणान्तःपुरं प्राप्य लीलादेव्या सह रमते BhojPra. 27. 10; 8. 23; भीमः … (बकुलदेवीम्) तामन्तःपुरे न्यधात् PrabaCin. 77. 9; 34. 2; KumāPraPra. 37. 30; श्रीगर्दभिल्लो नृपतिस्ततः किं भो रम्यमन्तःपुरमस्य किं वा KālikāKa. 22; उच्छलितोऽन्तःपुरे स्त्रीणां कोलाहलः PrabaK. 10. 15; महीपतिः पुत्त्रमुखं दिदृक्षुः प्राविक्षदन्तःपुरमात्तहर्षः MadhuVi. 2. 24; राजा चान्तःपुरं गत्वा रहस्यचिन्तयत् PuruṣPa. 7. 12; प्रविश्यान्तःपुरे वेश्मन्यङ्गदः AdhyāRā. vi. 10. 24; iv. 5. 50; v. 2. 12; अथ प्रवेशयामास जनकोऽन्तःपुरं शुकम् YogVā. ii. 1. 23; स रेमे कान्तया … । अन्तःपुरेषु हर्म्येषु YogVā. iii. 16. 17; विदूरथस्ते भर्तैष तनुं त्यक्त्वा रणाङ्गणे। तदेवान्तःपुरं प्राप्य तादृगात्मा भविष्यति YogVā. iii. 45. 1; अन्तःपुरे भार्यादिभिरेकाकी क्रीडेत (राजा) DīpKa. 34. 1 (*on* 1. 329); प्रथमावतीर्णमदनविकारा … निर्याति नान्तःपुरात् SāhiDa. 108. 11; 565. 1; देवः …। देदीप्यमानं शरीरं विधायान्तःपुरं गतः SiṁhāDvā. (App.) 243. 74; अन्तःपुरं गत्वा … पार्वती सम्यगलंक्रियताम् PārvPa. 5. 9 (1); विदर्भभूपालसुतां विलोकितुं विशन्तमन्तःपुरमस्य भूपतेः। … याहि Nalābhyu. 4. 21; (बालः) प्रच्छन्नमन्तःपुरे प्रहितः PurāPraSaṁ. 13. 10; 6. 24; 10. 12; अन्यदा अन्तःपुरे पुत्री जाता (नरवाहनस्य) PurāPraSaṁ. 109. 3; रामदेवस्य पितृव्यसुता लुखाईराणी अन्तःपुरेऽस्ति PurāPraSaṁ. 112. 17; यावन्मद्यमदप्रमादविवशः सुप्तो जनोऽन्तःपुरे। … तावदसौ स्मरामयवतां वैद्यः समासाद्यताम् Subhāṣi. 1949; उद्दामाम्बुदगर्हितान्धतमसप्रध्वस्तदिङ्मण्डले …। कर्णस्य … अन्तःपुरादायातासि Subhāṣi. 2555; PadyaVe. 831; पर्यस्तहारस्तबकं प्रयान्त्या स्तनावभूतां तरलेत्तरीयौ। अन्तःपुरस्याविशतोऽवनीन्दोः पुरः प्रणीताविव पूर्णकुम्भौ Acyutarā. 12. 29; अन्तःपुरे परपुरुषागमनस्यात्यन्तमसंभावनया क एष मां बोधयतीत्यादावुचित एव त्रासः RasGaṅ. 120. 13; उद्घाटयन्ति … अन्तःपुरम् … मयूखाः ŚivLī. 9. 5; 5. 58; Gaṅgāva. 8. 88; सुरपतिः … अन्तःपुरं प्रविश्य … जजागार तां रजनीम् NīlaVi. 15. 2; 42. 6; देव्या गृहिण्याः स्नेहसर्वस्वभाजनं तदन्तःपुरादेवागच्छामि Jīvān. 24. 8; अश्रान्तमर्पितमना जनकात्मजायां नान्तःपुराद्बहिरुपैति निशाचरेन्द्रः JānaPa. 6. 3; मृगाक्षि … ममान्तःपुरमलंकुरु KathāK. 148. 9; 129. 7; अन्यायाद्विनिवृत्ता ये … स्वपन्त्यन्तःपुरे हि ते AlaṅkāMañ. 101. 4; इङ्गितं चेष्टितं यत्नात् … स्त्रीणामन्तःपुरे च यत्। शृणुयात् ŚukraNī. 1. 336; 4 (5). 71; अन्तःपुरे वर्षवरकिराताः (नायकसहायादयः) SāhiSā. 4. 69; विहरन्वधूभिरन्तःपुरेऽग्निवर्णः। … ग्रस्तोऽथ यक्ष्मणा UpadeŚ. 51; **1B** inner part of a house अन्तःपुरं ततस्तस्य ब्राह्मणस्य महात्मनः। विवेश कुन्ती त्वरिता MahāBhā. i. 145. 18; पितुरन्तःपुरं दद्यात् KṛṣiPa. 80; **1C** king's (private) palace, royal residence न ह्यतुष्टो जनोऽस्तीह पुरे चान्तःपुरे च ते MahāBhā. iii. 287. 21; अन्तःपुराणि राज्ञाम् … कारयामास धर्मात्मा MahāBhā. xiv. 86. 15; BrahmP. 47. 40; वास्तुकप्रशस्ते देशे सप्राकारपरिखाद्वारमनेककक्ष्यापरिगतमन्तःपुरं कारयेत् ArthŚā. i. 98. 2 (1. 20); शोकाग्निना … निःश्वासधूमेन … दह्यमानमन्तःपुरं चैव पुरं च कृत्स्नम् BuddhaC. 9. 29; VetāPañ. (Jam.) 88. 21; VāyuP. i. 8. 96; **1D** inner part of the city, interior of the city (वीरः … पूर्वं कृत्वा विधानं च यात्रायां नगरे तथा) अन्तःपुरे च राष्ट्रे च MahāBhā. xii. 159* (1); वसिष्ठः … पुरीं समतिक्रम्य … ददर्शान्तःपुरं श्रेष्ठम् Rāmā. ii. App. I. 10 (11); ii. App. I. 10 (14); iii. 782* (1); अयं परिभवो भूयः पुरस्यान्तःपुरस्य च। श्रीमतो राक्षसेन्द्रस्य वानरेन्द्रप्रधर्षणम् Rāmā. vi. 8. 7; ततोऽस्त्राग्निस्फुरद्धूमपटलैः शकलीकृतम्। बभूव च्छन्नमम्भोधेरन्तःपुरम् BrahmāṇḍP. ii. 57. 60; (यन्त्रम्) अन्तःपुरे नगर्यास्तु दिक्षु मध्ये च तत् खनेत् TantrRā. 10. 62; अन्तःपुरं जनपदामरधाममार्गैराचक्ष्महे नगरसंप्रविभागमत्र SamarāSū. 9. 54½; 38. 9; अन्तःपुरे पुरंध्रीणां रम्याणि भवनानि च। … भस्मसात्कुरुते यत्तु स दण्डः स्थानदाहकः Mānaso. ii. 20. 1076; लोकानां प्रीतिकर एव अन्तःपुरे वा गृहे वा … प्रवेशो यस्य सः AupaSūṬ. 190. 3; **1E** inside or interior of the palace (नियुञ्जीत … भीरूनन्तर्निवेशने) अन्तर्निवेशने अन्तःपुरभोजनशय्यास्त्रीगृहाणि ManuBh. ii. 21. 11 (*on* 7. 62); अन्तःपुरे यदुत्पन्नं रत्नं तस्य क ईश्वरः PariPar. 6. 99; ViviTīKa. 67. 27; **1F** sanctum sanctorum or inner chamber (where the image of a deity is installed) जलमेत्य किंचिदन्तःपुरं भगवतोऽपनुनोद मृत्साम् ŚaṅkaDigVi. (Mā.) 5. 76; **1G** living place or covert सर्वासां वनदेवीनामन्तःपुरमिव … कदम्बवृक्षम् … ददर्श YogVā. iv. 49. 20; **2A** inmates or royal ladies in the inner apartment or harem तदवस्थां तु तां (दमयन्तीम्) दृष्ट्वा सर्वमन्तःपुरं तदा। … प्ररुरोद MahāBhā. iii. 67. 3; अन्तःपुराणां सर्वेषां भृत्यानां चैव सर्वशः … सर्वं वेद कृताकृतम् MahāBhā. iii. 222. 50; गान्धारी …। निःसंज्ञा पतिता भूमौ सर्वाण्यन्तःपुराणि च MahāBhā. viii. 3. 4; श्रुत्वा … निर्याणं धृतराष्ट्रस्य …। अन्तःपुराणां च तदा महानार्तस्वरोऽभवत् MahāBhā. xv. 45. 40; अन्तःपुराणि सर्वाणि शान्तां दृष्ट्वा तथागताम्। … प्रीत्यानन्दमुपागमन् Rāmā. i. 10. 28; हा रामेति जनाः केचिद् राममातेति चापरे। अन्तःपुरं समृद्धं च क्रोशन्तं पर्यदेवयन् Rāmā. ii. 35. 28; अन्तःपुराणि सर्वाणि रुदमानानि …। पृष्ठतोऽनुययुः Rāmā. vi. App. I. 69 (17); हते भौमे … उपनिन्युः … रत्नान्यन्तःपुराणि च। दानवाः HariVaṁ. 92. 8; किं हि वक्ष्यति मां राजा त्वदृते नगरं गतम्। वक्ष्याम्युचितदर्शित्वात् किं तवान्तःपुराणि वा BuddhaC. 6. 37; 1. 23; इष्टमन्तःपुरं सर्वं मातृवत् पूजितं मया PañcRā. 2. 71; महायत्नः कुमाराणामन्तःपुरस्य रक्षणे। … कुर्यात् BṛParāSm. 12. 13; अन्तःपुराणां च वृत्तमेतेष्वेव प्रकरणेषु लक्षयेत् KāmSū. 251. 12 (4. 2) (JayaMa. अन्तःपुराणां चेति तत्स्थस्त्रीणामेवाभिधानम्); राजा … अलंकृतश्च … सर्वाण्यन्तःपुराणि … पश्येत् KāmSū. 251. 18 (4. 2); स्वैरेव पुत्रैरन्तःपुराणि कामचारैर्जननीवर्जमुपयुज्यन्ते वैदर्भकाणाम् KāmSū. 301. 17 (5. 6); 294. 21 (5. 5); 296. 5 (5. 6); वैवाहिकैः कौतुकसंविधानैः … आसीत् पुरं सानुमतोः … अन्तःपुरं चैककुलोपमेयम् KumāSaṁ. 7. 2; चपलोऽयं बटुः कदाचिदिमामस्मत्प्रार्थनामन्तःपुरेभ्यो निवेदयेत् Śāk. 2. 18 (10); (दुःष्यन्तः) दाक्षिण्येन ददाति वाचमुचितामन्तःपुरेभ्यः Śāk. 6. 5 = SaraKaṇṭhā. 632. 9; अन्तःपुराणां मञ्चाश्च तथान्ये परिकल्पिताः ViṣṇuP. v. 20. 27; BrahmP. 193. 26; अन्तःपुराण्यपि … तस्याभिलषितम् अन्ववर्तन्त HarṣaC. 152. 2; अन्तःपुराणां विहितव्यवस्थः … सर्वा नृपस्यानुकरोमि वृत्तिम् Nāgā. 4. 1; PriyDa. 3. 3; अस्याः सर्वाण्यन्तःपुराण्याहूय सद्य एव सेवां दत्तवान् DaśKuC. 78. 4; तौ वारयितुमुद्युक्ता वज्रजङ्घस्य सूनवः। सर्वमन्तःपुरं चैव PadmP. (Ra.) 101. 30; प्रवेशितस्त्वयात्मायं यदैवानर्थसंकटे। तदैवान्तःपुरमिदं तव स्वीकृतमाधिना RāmC. 24. 108; अन्तःपुरं कृतानन्दं संप्रापच्चेलनान्तिकम् BṛKathāK. 10. 99; 19. 48; महीपतिः … पौरमन्तःपुरं चैव दानादिभिरमानयत् BṛKathāŚloSaṁ. 5. 82; क्षुद्रगणिकागणमप्यन्तःपुरमिति … चिन्तयद्भिः ग्रामेयकैः TilaMañ. 118. 21; हन्ति … अन्तःपुरं तथा वाली AśvaCi. 4. 32; स्वां पुरीं स विसिष्माय राजा त्वन्तःपुरं तथा BrahmP. 16. 22; अनङ्गप्रभा …। राज्ञो हरिवरस्यान्तःपुराणां प्राप मुख्यताम् KathāSaSāg. ix. 2. 263; राजा … बहुदासीपरीवारम् … अन्तःपुरं सहाचालीद्देहच्छायेव चक्रिणः TriṣaŚaPuC. ii. 4. 40; उग्रसेनस्य पुत्री … सार्धमन्तःपुरेण। तत्रायाता क्रीडितुम् NemiNir. 11. 1; (नृत्यशालायाम्) वामतोऽन्तःपुराणि स्युः (सभापतेः) SaṁgīRa. iv. 395. 4 (7. 1342); तस्याः पादद्वयाङ्गुष्ठसंपदः पुरतस्तव। इदमन्तःपुरं सर्वमङ्गारादपि हीयते MalliC. 5. 139; प्रभोः प्रमाणमादेश इति … श्रुतमन्तःपुरेण तत् SamarāSaṁ. 4. 501; 1. 116; (कोऽपि) अन्तःपुराणाम् आभरणानि … स्वर्णकारपार्श्वात् कारयति PurāPraSaṁ. 113. 20; अन्तःपुरस्य वृत्तिर्लक्ष्यैतेष्वेव तु प्रकारेषु KandaCū. iv. 2. 49; **2B** queen सर्वैरन्तःपुरैः सार्धं प्रीत्या प्राप्तेषु राजसु। यज्ञो दुर्योधनस्य … वर्तते PañcRā. 1. 2; तन्मध्ये कस्यचिद्राज्ञोऽन्तःपुरम् … जलक्रीडां करोति PañcT. 1. 62 (16) (3. 5); Pañcā. 39. 21; देवि, तव कारणात्सर्वमन्तःपुरं त्यजामि ĀścaCū. 5. 27 (5); यदीदृशमिदं रूपं स्याद्वनेऽन्तःपुरेण किम् RāghPāṇ. (Dha.) 7. 86; सः … स्थानं कुब्जाम्रकं गतः। अन्तःपुरेण सहितः VarāP. 126. 187; (राजा आह) सहान्तःपुरेण … मकरध्वजपूजार्थं व्रजिष्यामि YaśasCam. ii. 249. 14; गङ्गाकूले … शर्यातिरायातः स्नातुमन्तःपुरैः सह BhaviP. 45B. 27 (i. 19. 5); अन्तःपुराणि सर्वाणि रुमा तारा तथैव च। … साधु साध्विति चाब्रुवन् PadmP. v. 35. 41; तस्यैकाभूदनिर्वृतिः। नोदपद्यत यत्पुत्रो बहुष्वन्तःपुरेष्वपि KathāSaSāg. xii. 26. 6; करितुरगसमृद्धां सार्धमन्तःपुरेण क्षितिपतिरथ सर्वां शत्रुलक्ष्मीं गृहीत्वा। … राजधानीं विवेश VikraDeC. 15. 86; (नरेश्वरः) अन्तःपुरैः कुमारैश्च …। समन्वितः … सहयातान् … यथास्थानं निवेशयेत् Mānaso. iv. 4. 798; iv. 15. 1539; नृपोऽपि … मातृगृहाणि गन्तुं कथंचिदन्तःपुरमादिदेश Surath. 2. 9; वसन्तोत्सवे राजान्तःपुरेण सह आरामे क्रीडनाय गतः VetāPañ. (Śi.) 29. 44; (राजोवाच) स्वामिनी च भव मम चैवान्तःपुराणाम् BallāC. 24. 5; 102. 4; (चित्रसेनः) पुत्रस्य पुरस्यान्तःपुरस्य च … पप्रच्छ कुशलं नृपः CitraPaC. 499; **2C** supervisor of the harem, chamberlain अन्तःपुरपुरद्वारद्रव्यधान्यपरिग्रहान्। देहेयुस्तांश्च हन्युर्वा ArthŚā. iii. 162. 8 (12. 2) (comm. तत्तत्पालकान्); **2Di** wife or consort पुरारातेरन्तःपुरमसि SaundL. 95; नवेन्दुमौलेरन्तःपुरं दिशतु मङ्गलमादराद् वः ŚāraTi. 1. 2; छन्दःकन्दलमन्दिरमन्तःपुरमैन्दुशेखरं वन्दे LalitāStaRa. 182; महायोगपीठे निषण्णं

पुरारेरथान्तःपुरं नौमि नित्यम् DevīBhuSt. 2; अत्रत्यैः किलार्जुनसकाशाद्विष्णोरन्तःपुरमाच्छिन्नम् JayaMa. 130. 10 (*on* 2. 5); यस्य च ... सौभाग्यमेवान्तःपुरमरक्षत् TilaMañ. 15. 1; EI. xxv. 58. 29; अन्तःपुरेण शंभोरलंक्रिया कापि कल्प्यते काञ्च्याः MūkaPañ. 4. 34; **2Dii** housewife, cf. **अन्तःपुरप्रसिद्ध; 3** the word *antaḥpura* ठोऽन्तःपुराद् रूढौ। अन्तःपुरशब्दात्तत्र भवे ठप्रत्ययो भवति रूढौ विषये ŚākaṭāVyā. iii. 1. 128; SiddhaHe. vi. 3. 140 [Kośas give *antaḥpura* as the synonym of the following words : *avarodha*, AmaK. 6. 15; Vaija. 161. 36; AbhidhāCin. 727; ŚabdaRa. (Vā.) 1721; ŚabdaRa. (Su.) 3. 249; *avarodhana*, AmaK. 615; AbhidhāCin. 727; ŚabdaRa. (Vā.) 1721; ŚabdaRa. (Su.) 3. 249; KalpaK. 16. 67; *parāviddha*, Vaija. 161. 36; *vṛṣa*, Vaija. 161. 36; *śuddhānta*, AmaK. 615; AbhidhāCin. 727; ŚabdaRa. (Vā.) 1721; *stryagāra*, AmaK. 615; KalpaK. 16. 67; also they give *antaḥpura* as the meaning of the following words - *a*, NānārthaMa. 12; *avarodha*, NānārthāSaṁ. iii. 7. 16; *vṛṣanā*, NānārthāSaṁ. i. 151. 1276; *śuddhānta*, Liṅgānu. (He.) 119. 11; NānārthSaṁ. 86. 26; NānārthāSaṁ. ii. 29. 213; MediK. 69. 163; NānārthaMa. 768; ParaNā. 2331; ViśvaLoK. 148. 173]

अन्तःपुरक (antaḥpura-ka) *n.* inner apartment of a royal palace or harem बाह्या न च प्रवेश्या अन्तःपुरके कदाप्यविज्ञाताः (स्त्रियः) KandaCū. iv. 2. 59 [ŚabdaRa. (Su.) 3. 249 gives *antaḥpuraka* as a meaning of *āntarveśmika*]

अन्तःपुरकदम्बक (antaḥpura-kadambaka) *n.* group or host of queens (सः) द्वारि संभाषणव्यग्रमन्तःपुरकदम्बकम्। तेनोपदिष्टमज्ञासीच्छ्रुत्वान्ध इव नामभिः BṛKathāMañ. 14. 370.

अन्तःपुरकन्या (antaḥpura-kanyā) *f.* maiden in the harem नाटिका ...। उत्पाद्य चरितं च नायकं च नृपतिमन्तःपुरकन्याम् ... अधिकृत्य प्राप्यत्वेन अभिसंधाय कर्तव्या AbhinBhā. ii. 435. 10 (*on* 18. 58); Kāvyānu. (He.) 383.14.

अन्तःपुरकानन (antaḥpura-kānana) *n.* (pleasure-) grove of the harem ततोऽन्तःपुरवासिन्यस्तस्यान्तःपुरकाननम्। रम्यं संदर्शयामासुरङ्गनाः काममोहिताः DevīBhāP. i. 17. 59.

अन्तःपुरकान्तामूर्धन् (antaḥpurakāntā-mūrdhan) *m.* head of inmates of harem सा चान्तःपुरकान्तामूर्ध्नि कृता भूभुजा विलासवती। शुशुभे श्रीरिव ... तन्वी KalāVi. 4. 31.

अन्तःपुरकामिनी (antaḥpura-kāminī) *f.* (beautiful) lady in the harem पुत्रकाम्यन्तीभिरन्तःपुरकामिनीभिर्विधीयमानविविधव्रतविशेषम् ... राजकुलमव्रजत् (पार्थिवः) TilaMañ. 65. 6; कदाचिदन्तःपुरकामिनीभिरासेवितः सादरमच्युतेन्द्रः। ... जगाद Raghunā. 6. 22.

अन्तःपुरकुटी (antaḥpura-kuṭī) *f.* cottage of the form of covert विजहार मुनिर्गिरौ। ... एकदा प्राप कन्दराम्। ... सुगुप्तां वनदेवीनामन्तःपुरकुटीमिव YogVā. v. 51. 51.

अन्तःपुरकुरङ्गाक्षी (antaḥpura-kuraṅgākṣī) *f.* deer-eyed lady in the harem अन्तःपुरकुरङ्गाक्ष्यः कमला इव रेजिरे Rāṣṭrau. 18. 57.

अन्तःपुरकृत्य (antaḥpura-kṛtya) *n.* activity in the case of harem स राजा जडमतिः सर्वाण्यपि राज्यप्रयोजनानि अन्तःपुरकृत्यानि च शिथिलीकृत्य तत्परः संवृत्तः Pañcā. 103. 21.

अन्तःपुरकृशोदरी (antaḥpura-kṛśodarī) *adj.* (*f.*) beautiful lady (*lit.* having slender belly) in the harem क्षणमुपजातान्तर्बाष्पोदन्तः, पुनरन्तःपुरकृशोदरीणां निवासतरुस्कन्धावरोहकाशैरिवोत्संगदेशैः ... विनोद्यमानः ... सुखेनाहमासांचक्रे YaśasCam. ii. 181. 5.

अन्तःपुरगत (antaḥpura-gata) *adj.* [*f.*- ā] **1A** being or present in the harem अन्तःपुरगतं ह्येनं स्त्रियः क्लीबाश्च सर्वशः। वर्तमानं यथावच्च कुत्सयेयुरसंशयम् MahāBhā. iv. 120* (54); अन्तःपुरगतो वाली श्रुत्वा शब्दममर्षणः। निष्पपात सह स्त्रीभिः Rāmā. iv. 11. 28; पूर्वाह्णे धर्मकार्याणि कृत्वा धर्मेण धर्मवित्।... शेषं दिवसभागार्धमन्तःपुरगतोऽभवत् Rāmā. vii. 42. 27; रक्षेदायुक्तकुशलमन्तःपुरगतं नृपम् NītiSā. 7. 43; BṛKathāŚloSaṁ. 3. 66; स यर्ह्यन्तःपुरगतो विषूचीनं समन्वितः। मोहम् ... याति जायात्मजोद्भवम् BhāgP. iv. 25. 55; अन्तःपुरगता देवी ... गिरिजा चिन्तयामास मनसा परमेश्वरम् SkandP. i (1). 34. 145; दत्ताभयान्मुकुन्दादीन् विसृज्यान्धकसूदनः। अन्तःपुरगतो रेमे देव्या सह SkandP. i (3B). 17. 18; तं शब्दम् ... शुश्रावान्तःपुरगतो वाली मधुमदाकुलः RāmāMañ. 181. 21; **1B** living in the harem तवानुयाने काकुत्स्थ ...। अन्तःपुरगता नार्यो नन्दन्तु Rāmā. ii. 98. 12; बालौ मनोज्ञरूपौ तौ ...। अन्तःपुरगतौ सर्वबन्धुभिः कृतपालनौ PadmP. (Ra.) 25. 30; TilaMañ. 315. 21; तया (धम्मदिन्नया) किलान्तःपुरगतयैव प्रव्रज्यार्थं बुद्धाय दूतः प्रेषितः Sphuṭā. iv. 37. 14 (*on* 4. 26); **1C** pertaining or belonging to the harem भिक्षुक्यश्चारणा दास्यो मालाकाराः कलाविदः। अन्तःपुरगतां वार्तां निर्हरेयुरलक्षिताः NītiSā. 13. 45; YuktiKa. 10. 14; **2** staying in the palace प्रत्युत्पन्ने वा कारणे यद्यदुपपद्येत तत्तदमित्रेऽन्तःपुरगते गूढसंचारः प्रयुञ्जीत ArthŚā. iii. 178. 9 (12. 5)

अन्तःपुरगा (antaḥpura-gā) *adj (f.)* visiting the harem सरसा जनपदयोषाः प्रीत्यपदेशेन चार्धमासादौ। वैदर्भान्तःपुरिका अन्तःपुरगाः प्रकुर्वन्ति प्रीतिदायम् KandaCū. v. 5. 41.

अन्तःपुरगामिनी (antaḥpura-gāminī) *adj.* (*f.*) visiting the harem प्राज्ञा तु प्रज्ञया युक्ता या त्वन्तःपुरगामिनी। विप्रश्निका चेक्षणिका दैवज्ञा सा च कथ्यते KośaKaTa. 1. 4833.

अन्तःपुरगृह (antaḥpura-gṛha) *n.* house or abode in the sanctum sanctorum योऽन्तःपुरगृहं गन्धैः सुगन्धैः प्रविलेपयेत्। ... तस्य पुण्यम् BhaviP.245 B. 20 (i. 164. 19)

अन्तःपुरग्रीव (antaḥpura-grīva) *n.* corridor of the harem (जननीजनः) माङ्गलिक्यपाणिरन्तःपुरग्रीवे तिष्ठति BālRā. 10. 100 (9)

अन्तःपुरचकोर (antaḥpura-cakora) *m.* Greek partridge (said to feed on moon-beams) belonging to the harem इह युवतिवदनकान्तिभिराप्यायिततुन्दपरिमृजः शेते। ... अन्तःपुरचकोरः AnargharaRā. 7. 110.

अन्तःपुरचर (antaḥpura-cara) *adj.* [*f.* - ā, - ī] **A** who is the inmate of the harem आचख्युस्तस्य संहृष्टाः स्त्रियः ... अन्तःपुरचराः MahāBhā. iv. 63. 6; श्रुत्वा चैवाप्रियाख्यानं राममातुस्तदप्रियम्। अन्तःपुरचरा नार्यः ... नाभ्यागमंस्तत्र कौसल्याया निवेदितुम् Rāmā. ii. 391* (2); ii. 98. 12; अन्तःपुरचरा नार्यस्तथा राजकुमारकाः। पौराः पुराङ्गनाश्चापि सर्वे ताभ्यां विमोहिताः SkandP. iv. 58. 129; ŚivaP. ii (5). 5. 57 (226B. 8); (used as noun) inmate of the harem अन्तःपुरचरैर्द्विजैः पवित्रैः सहितो विभुः। सदा नारायणो देवो यस्याश्रक्रे कथां मुदा SkandP. iv. 18. 24; अन्तःपुरचरैः सार्धं यो न मन्त्रं समाचरेत्। न कलत्रैर्नरेन्द्रस्य स भवेद् राजवल्लभः Pañcā. 8.32; **B** being or present in the harem राघवः ...। संध्यामुपास्य विधिवत् ...। प्रवृत्तायां रजन्यां तु सोऽन्तःपुरचरोऽभवत् Rāmā. vii. 36. 61; ViṣṇuDhaP. ii. 151. 38; अन्तःपुरचरो रामः कामं निर्वृतिमाप्तवान् RāmāMañ. 466. 26; **C** staying in the harem एतस्मिन्नन्तरे प्राप्तस्सह कृष्णेन नारदः। अन्तःपुरचरां देवीं रुक्मिणीं प्राह हर्षयन् ViṣṇuP. v. 27. 25; अन्तःपुरचरा नारीः ... ददौ ... श्रीनिवासाय SkandP. ii (1). 8. 35; दासदासीसहस्रकम्। अन्तःपुरचरीर्नारीर्नृत्यगीतविशारदाः। ददौ SkandP. ii (1). 39. 13; अन्तःपुरचरं वृद्धं दण्डपाणिम् ...। उवाच राजा हृष्टात्मा शब्देनापूरयन् दिशः SkandP. v (3). 26. 83; अन्तःपुरचरीः प्रैष्याश्चकार परितोषिताः BṛKathāŚloSaṁ. 2. 19; विदूषकः। अन्तःपुरचरो राज्ञां नर्मामात्यः प्रकीर्तितः NāṭaLaRaK. 2200; BhāvPra. (Śā.) 281. 21 (9); VīraMi. (Lakṣaṇa.) 222. 11.

अन्तःपुरचर (antaḥpura-cara) *m.* attendant of the harem अथान्तःपुरचरलक्षणम्। विष्णुधर्मोत्तरे VīraMi. (Lakṣaṇa.) 222. 8.

अन्तःपुरचराध्यक्ष (antaḥpuracarādhyakṣa) *m.* chief or superintendant of the attendants of the harem अन्तःपुरचराध्यक्षो वैरभूतैर्निराकृतैः। संसर्गं न व्रजेद् भृत्यो राज्ञो गुह्यं च गोपयेत् AgniP. 221 (1). 3.

अन्तःपुरचरावृत (antaḥpuracarāvṛta) *adj.* surrounded by the attendants of the harem (महीपतिः) क्षुभितानामिवाश्रौषीत् स निर्घोषमुदन्वताम् ... प्रासादतलमारोहदन्तःपुरचरावृतः BṛKathāŚloSaṁ. 3. 9.

अन्तःपुरचारिका (antaḥpura-cārikā) *f.* female attendant of the harem सोऽपि वत्सेश्वरः ... विरचितां नाम भेजेऽन्तःपुरचारिकाम् KathāSaSāg. ii. 6. 65; iii. 4. 193; संमृज्य शोधनीभिश्चत्वरवेदीतलेषु रम्येषु। रचयन्ति रङ्गवल्लीरन्तःपुरचारिका एताः Jīvān. 41. 7.

अन्तःपुरचारिणी (antaḥpura-cāriṇī) *f.* **A** inmate of the harem अन्तःपुरचारिणीनां बहिरनिष्क्रमो, बाह्यानां चाप्रवेशः KāmSū. 252. 24 (4. 2); **B** wife सा ... नैवान्तःपुरचारिणी समभवत् किं तु प्रविष्टा मनः GopāKeCan.135.12; **C** female attendant of the harem ताश्चान्तःपुरचारिण्यः नियोज्यास्तेषु कर्मसु BhāvPra. (Śā.) 292. 16 (10) [ParaNā. 2015 gives *antaḥpuracāriṇī* as the synonym of *asiknī*, *dūtikā* and *sañcārikā*]

अन्तःपुरचारिन् (antaḥpura-cārin) *m.* **A** male attendant of the harem नान्तःपुरपुरंध्रीभिर्न चान्तःपुरचारिभिः। न च द्वेष्यैर्महीशस्य संगच्छेत विशारदः PāṇḍaC. 10. 14; **B** one living in the harem निखिलोऽपि परिष्क्रियाकलापो जगृहेऽन्तःपुरचारिणा जनेन Acyutarā. 2. 23; तच्च निवेदितमन्तःपुरचारिणा महाराजस्यासन्नपरिजनेन द्रष्टव्यमिति JānaPa. 6.3 (7); तस्मादन्तःपुरचारिणः पङ्गुयुग्मात् तत्संचारयतः पुरुषाद्य प्रवृत्तिमुपलब्धुं शक्या Jīvān. 108. 3.

अन्तःपुरचारिवारवनिता (antaḥpuracāri-vāravanitā) *f.* harlot moving about in the harem द्यूतेनाद्य जिता निशा कमलया देवी प्रसाद्याद्य च। इत्यन्तःपुर-

चारिवारवनिताविज्ञापनानन्तरम् (विद्वान् ते समस्ये अपूरयत्) PrabhāC. 144.24.

अन्तःपुरचिन्ता (antaḥpuracintā) *f.* **i** name of a section or topic in the Bṛhatsaṁhitā इति ... बृहत्संहितायामन्तःपुरचिन्तायां स्त्रीप्रशंसा नाम चतुःसप्ततितमोऽध्यायः BṛSaṁ. 74. 20 (colophon); **ii** name of a section or topic in the Agnipurāṇa वक्ष्येऽन्तःपुरचिन्तां च धर्माद्याः पुरुषार्थकाः AgniP. 223. 1; **iii** name of a section or topic in the Viṣṇudharmottarapurāṇa इति ... अन्तःपुरचिन्ता नाम द्विषष्टितमोऽध्यायः ViṣṇuDhaP. ii. 62 (colophon)

अन्तःपुरचेटिका (antaḥpura-ceṭikā) *f.* female servant or attendant of the harem एत्य फलं साक्षाद्राज्ञेऽन्तःपुरचेटिकाः(?का)। अदर्शयदिदं देव्यै स्वप्ने शंभुरदादिति KathāSaSāg. xviii. 1. 42; SamarāSaṁ. 4. 376.

अन्तःपुरचेटी (antaḥpura-ceṭī) *f.* female attendant or servant in the harem अथ भीतां वियोगार्तां प्राणत्यागोन्मुखीमिह। एत्यान्तःपुरचेट्यो मां सान्त्वयन्त्योऽब्रुवन्निदम् KathāSaSāg. xiv. 2. 131.

अन्तःपुरचेष्टित (antaḥpura-ceṣṭita) *n.* activity in the harem विभूतिगुणसंभोगवीर्यान्तःपुरचेष्टिते। नपः(?नृपः) स्वचरितेषु स्यादिष्टार्थस्संस्तवे सदा। ... प्रशस्यते BhāvPra. (Śā.) 227. 5 (8)

अन्तःपुरजन (antaḥpura-jana) *m.* **A** inmate of the harem अन्तःपुराणि सर्वाणि शान्तां दृष्ट्वा तथागताम् (v. l. अन्तःपुरजनश्चापि दृष्ट्वा शान्तामुपागताम्) (मुमुदे पूजयेच्चैनाम्) Rāmā. i. 10. 28; i. 309* (97); राजपुत्रि तस्मिन्कलिङ्गहतकावस्कन्दे विद्रुतेष्वितस्ततोऽन्तःपुरजनेषु दिष्ट्या दृष्टाम् ... तामहं गृहीत्वा वत्सराजान्तिकं प्रस्थितः PriyDa. 4. 7 (37); **B** attendant in the harem राजनियमः। उचितोऽन्तःपुरजनः कञ्चुकिप्रभृतिः तद्व्यतिरिक्तो बाह्यजनोऽत्र चेटदासादिः प्रवेशकादौ कार्य इत्यर्थः AbhinBhā. ii. 431. 17 (*on* 18. 49); Kāvyānu. (He.) 382. 24.

अन्तःपुरजनाध्यक्ष (antaḥpurajanādhyakṣa) *m.* superintendent or custodian of the harem, head-chamberlain अन्तःपुरजनाध्यक्षैर्वैरिदूतैर्निराकृतैः। संसर्गं न व्रजेद्राजन्विना पार्थिवशासनात् MatsyaP. 216. 9.

अन्तःपुरजरतीजन (antaḥpura-jaratījana) *m.* host of old female attendants in the harem आचारकुशलेनान्तःपुरजरतीजनेन क्रियमाणावतरणकमङ्गलाम् ... विलासवतीं ददर्श (तारापीडः) Kād. 68. 16.

अन्तःपुरज्येष्ठा (antaḥpura-jyeṣṭhā) *adj.* (*f.*) eldest or chief of queens षोडशान्तःपुरज्येष्ठा पुण्या नगरदेवता। मम प्रवासदुःखार्ता माता कुशलिनी ननु SvapnVā. 6. 9.

अन्तःपुरतस् (antaḥpura-tas) *adv.* from the harem अरे दुष्टा गदत पण्डितानन्तःपुरतः स्ववृत्तम् Nāṭa. 27. 13.

अन्तःपुरत्व (antaḥpura-tva) *n.* the state of being the harem यस्य रणान्तःपुरे ...। रणस्यान्तःपुरत्वमारोप्यमाणं शब्दोपात्तम् KāvyPra. 597. 6.

अन्तःपुरत्वारोप (antaḥpuratvāropa) *m.* superimposition of the state of being the harem रणस्यान्तःपुरत्वारोपः श्रौतो मण्डलाग्रलताया नायिकात्वम् ... अर्थसामर्थ्यादवसीयते Kāvyānu. (He.) 301.11.

अन्तःपुरदण्ड (antaḥpura-daṇḍa) *m.* control over, i.e. charge of the harem राजावरोधभोग्यानां भाण्डाभरणवाससाम्। सद्योऽन्तःपुरदण्डेषु किराता योजिता नृपैः BhāvPra. (Śā.) 293. 7 (10)

अन्तःपुरदर्शन (antaḥpura-darśana) *n.* name of the seventh canto of Sundarakāṇḍa in the Rāmāyaṇa इति श्रीरामायणे सुन्दरकाण्डे (Add. अन्तःपुरदर्शनम्) सप्तमः सर्गः Rāmā. v. 7 (colophon)

अन्तःपुरदासी (antaḥpura-dāsī) *f.* maid servant in the harem मुण्डजटिलकुहकप्रतिसंसर्गं बाह्यदासीभिरन्तःपुरदासीनां प्रतिषेधयेत् (राजा) ManuBh. ii. 44. 21 (*on* 7. 153); RājTa. (Ka.) 5. 445.

अन्तःपुरदास्यादि (antaḥpuradāsy-ādi) *adj.* maid servant etc. (employed) in the harem युक्तानां नियुक्तानां स्त्रीणामन्तःपुरदास्यादीनाम् ManuBh. ii. 38. 19 (*on* 7. 125)

अन्तःपुरदाह (antaḥpura-dāha) *m.* act of setting the harem on fire रत्नावलीवृत्तान्तवर्णने ईप्सितार्थप्रतीघाते बाभ्रव्येण प्रस्तुते तस्य प्रतिघातोऽन्तःपुरदाहेन AbhinBhā. iii. 55. 9 (*on* 19. 93)

अन्तःपुरद्वय (antaḥpura-dvaya) *n.* pair of queens (आसीत्) कस्यापि राज्ञोऽन्तःपुरद्वयम्। एकया महे गन्तुकामया निजाभरणपेटिका कस्याश्चिन्निजसख्याः समर्पिता PurāPraSaṁ. 114. 1.

अन्तःपुरद्वार् (antaḥpura-dvār) *f.* [Loc.] **i** at the door of the harem प्रातश्च ददृशे राज्ञा देवसेनेन तत्र सः। स्वसुतान्तःपुरद्वारि स्थितश्छिन्नच्युतो भुजः KathāSaSāg. iii. 4. 285; गुर्जरधरित्र्याम् ... श्रीश्रीमहमूदविजयराज्ये राज्ञोऽतःपुरद्वारि EI. iv. 299. 8; **ii** at the door of the inner chamber अभिधानान्तरमन्तकारेरन्तःपुरद्वारि कृताधिकारम् ... ननाम सा नन्दिनमानताङ्गी YātrāPra. 1. 56.

अन्तःपुरद्वार (antaḥpura-dvāra) *n.* door of the harem आसाद्य भवनद्वारं (v. l. आसाद्यान्तःपुरद्वारम्) पित्रे स प्रत्यहारयत् MahāBhā. iv. 63. 49; ii. 16. 37; स तदन्तःपुरद्वारं समतीत्य जनाकुलम्। प्रविविक्तां ततः कक्ष्यामाससाद पुराणवित् Rāmā. ii. 14. 1; ii. 13. 17; सुमन्त्रोऽन्तःपुरद्वारं ययौ तूर्णं महीपतेः RāmāMañ. 62. 21; शतमन्युः ... समागम्य ... अन्तःपुरद्वारम् NīlaVi. 17. 11.

अन्तःपुरद्वारगत (antaḥpuradvāra-gata) *adj.* **A** located at, i.e. attached to the entrance or door of the harem अन्तःपुरद्वारगतं परिघं गृह्य चातुलम्। वधाय तेषां चिक्षेप नानायुधविशारदः HariVaṁ. 108. 21; **B** present at the entrance of the harem अन्तःपुरद्वारगतैर्वेत्रजर्जरपाणिभिः। ... स चापि दृष्टस्तैस्तत्र नरो दिव्यवपुर्धरः। ... पुरुषास्ते ... कन्यान्तःपुररक्षकाः ŚivaP. ii (5). 52. 58 (285B. 4)

अन्तःपुरधनाध्यक्ष (antaḥpuradhanādhyakṣa) *m.* superintendent of the harem and that of the treasury अन्तःपुरधनाध्यक्षैः ...। संसर्गं न व्रजेद्राम विना पार्थिवशासनम् ViṣṇuDhaP. ii. 25. 9.

अन्तःपुरध्वंसकारिन् (antaḥpuradhvaṁsa-kārin) *adj.* destroyer of the harem मर्त्योऽप्यन्तःपुरध्वंसकारी विध्वंसकः स्वसुः। शत्रुर्ममायं वध्योऽद्य स्वाम्यकामः किलैष नः KathāSaSāg. xiv. 2. 166.

अन्तःपुरनतभ्रू (antaḥpura-natabhrū) *adj.* (used as noun) beautiful lady (*lit.* having curved eyebrows) in the harem अभिषिक्तोऽतिशुशुभे शंभुः समधिकोज्ज्वलः। तमन्तःकरणैर्भेजुरन्तःपुरनतभ्रुवः ParamāKā. 44. 32 (? 31)

अन्तःपुरनाद (antaḥpura-nāda) *m.* sound or din (of the wailing arising) from the harem ततस्तमन्तःपुरनादमुत्थितं समीक्ष्य वृद्धास्तरुणाश्च मानवाः। स्त्रियश्च सर्वा रुरुदुः समन्ततः Rāmā. ii. 51. 30.

अन्तःपुरनिकेतान्तर् (antaḥpuraniketāntar) *adv.* inside the quarters of the harem सोऽन्तःपुरनिकेतान्तर्वरस्त्रीपरिवारितः। वेत्रिण्या दर्श्यमानाध्वा रत्नादर्शगृहं ययौ TriṣaŚaPuC. i. 6. 717.

अन्तःपुरनिरुद्धा (antaḥpura-niruddhā) *adj.* (*f.*) imprisoned within the harem अन्तःपुरनिरुद्धया पूर्वदेहदयितया सहैव रत्यागतः प्रद्युम्नः AvantiKa. 125.7.

अन्तःपुरनिर्यूह (antaḥpura-niryūha) *m.* pinnacle or turret of the harem अन्तःपुरनिर्यूहे निराकृतमहाजने। आसीनाय स मे वृत्तं युष्मद्वृत्तमवर्तयत् BṛKathāŚloSaṁ. 20. 317.

अन्तःपुरनिवासिन् (antaḥpura-nivāsin) *adj.* [*f.* - ī] **i** staying in the harem ब्रह्मदत्तस्य ... अन्तःपुरनिवासिनी। पूजनी नाम शकुनी MahāBhā. xii. 137. 5; **ii** living or residing in the harem अन्तःपुरनिवासिन्यः स्त्रियः सर्वगुणान्विताः ... सर्वासामैश्वर्यं कुरु जानकि Rāmā. v. 18. 30; मागधी तु नरेन्द्राणामन्तःपुरसमाश्रया (v. l. नराणां चेवान्तःपुरनिवासिनाम्)। चेटानां राजपुत्राणां श्रेष्ठिनां चार्धमागधी NāṭyaŚā. 17. 51; भक्ष्यैरुच्चावचैर्भोज्यैरन्तःपुरनिवासिनः। ... राजा तोषयेत् SkandP. ii (4). 10. 28; अनुजग्मुश्च तम् ...। अन्तःपुरनिवासिन्यः स्त्रियः सर्वाः स्वलंकृताः BrahmP. 44. 23; तं दृष्ट्वा सुन्दरं साम्बं सर्वा चुक्षुभिरे स्त्रियः। न स दृष्टः पुरा याभिरन्तः पुननिवासिभिः (?°पुरनिवासिनीभिः) BhaviP. 126A. 28 (i. 73.26)

अन्तःपुरनिवेश (antaḥpura-niveśa) *m.* place or region of the harem बहुमहिषीसहस्रशोभितोऽन्तःपुरनिवेश इव ... स्थाण्वीश्वराख्यो जनपदविशेषः HarṣaC. 146. 11 (Bālabodhinī अन्तःपुरनिवेशोऽन्तःपुरस्थानम्)

अन्तःपुरनूपुरनिनाद (antaḥpuranūpura-nināda) *m.* jingling sound of the anklets of the ladies in the harem कदान्तःपुरनूपुरनिनादसंगतान्गृहकलहंसकाननुसरन् ... आयासयिष्यति धात्रीम् (तनयः) Kād. 63. 2.

अन्तःपुरपति (antaḥpura-pati) *m.* head-chamberlain of the harem सक्ता गुणवती राजन्नन्तःपुरपतेरिति BṛKathāMañ. xiv. 1. 280; परस्य रक्षितावद्यं न रक्षस्यात्मनः कथम्। यः सुरक्षितनामायमन्तःपुरपतिर्युवा। तत्सक्ता हि त्वदीयैषा राज्ञी गुणवरा किल KathāSaSāg. vii. 5. 27.

अन्तःपुरपरिचय (antaḥpura-paricaya) *m.* name of a chapter of Sundarakāṇḍa in the Rāmāyaṇamañjarī (*lit.* acquaintance with the harem) इत्यन्तःपुरपरिचयः RāmāMañ. 243. 21.

अन्तःपुरपरिच्छद (antaḥpura-paricchada) *m.* retinue of ladies or inmates in the harem यश्च सिंहासनं दद्यान्महारत्नान्वितं नृपः। ... कुलत्रिंशकसंयुक्तः सान्तःपुरपरिच्छदः। समस्तभृत्यसंयुक्तः शिवलोके महीयते ŚivU. 6. 92.

अन्तःपुरपरिजन (antaḥpura-parijana) *m.* attendant of the harem प्रातर्विधेयकारितया च परिगृहीतेष्वन्तःपुरपरिजनेषु ... मयूरकाख्यं किंनरमिथुनं पुरस्तात् ... पटं निचिक्षेप UdaySuKa. 98. 9.

अन्तःपुरपरिसर (antaḥpura-parisara) *m.* [Loc.] in the surrounding area or vicinity of the harem किमेतासामन्तःपुरपरिसरे केवलमभूदसूर्यपश्यत्वं त्वदरिसुदृशामुत्कलपते Ekāva. 6. 2 ½ (59) (172. 5)

अन्तःपुरपरीक्षा (antaḥpura-parīkṣā) *f.* test or examination (of the loyalty) of the queens नृपस्त्वन्तःपुरपरीक्षायै मित्रं प्राह भोः यदि नाम मम शरीरं रक्षसे तदाहं परीक्षां करोमि PurāPraSaṁ. 6. 16.

अन्तःपुरपरीवारजन (antaḥpura-parīvārajana) *m.* retinue of attendants of the harem अन्तःपुरपरीवारजनोऽप्येत्य ननाम ताम् (पुष्पमालाम्) PārśvC. 6.949.

अन्तःपुरपर्यन्त (antaḥpura-paryanta) *m.* [Loc.] at the extremity or boundary of the harem अथान्तःपुरपर्यन्ते श्रुत्वा विक्रोशतां स्वनम्। निर्गत्य पृष्ट्वा तत्रस्थान् प्रविश्य प्राह गोमुखः BṛKathāMañ. xiv. 1. 389.

अन्तःपुरपाल (antaḥpura-pāla) *m.* guard or chamberlain of the harem राज्ञा तथेति प्रतिपन्नेऽन्तःपुरपालैर्विज्ञप्तम् Pañcā. 51. 11.

अन्तःपुरपुरंध्रि (antaḥpura-purandhri) *f.* **A** matron in the harem संचारय चामराण्यन्तःपुरन्ध्रिनिःश्वसितैः HarṣaC. 261. 14; **B** married woman in the harem तस्य चास्ति ...प्रेयसी ...प्रधानान्तःपुरपुरन्ध्रिषु विजयरेखा नाम UdaySuKa. 95. 27.

अन्तःपुरपुरंध्रिका (antaḥpura-purandhrikā) *f.* married woman in the harem उपेन्द्रविदलितस्य कंसासुरस्य सर्वतो रुदतीनामन्तःपुरपुरन्ध्रिकाणामनणुकज्जलकलापकालीकृतैरश्रुवारिभिरापूरितेव ...यमुनाभिधाना महासिन्धुरुत्तरां दिशमाश्रिता UdaySuKa. 54. 28.

अन्तःपुरपुरंध्रिकालंकार (antaḥpurapurandhrikālaṅkāra) *m.* ornament of a married woman in the harem अन्तःपुरपुरंध्रिकालंकारविकृतकायानां शम्भलीनाम् ...नूपुरनादेन विनोद्यमानमानसः सुभगकंदर्पाभिधस्य सौधस्य ...सप्तमं तलमध्यारूढोऽस्मि YaśasCam. ii. 188. 6.

अन्तःपुरपुरंध्रिजन (antaḥpura-purandhrijana) *m.* host of married women in the harem विधेहि ...अन्तःपुरपुरंध्रिजनेन सार्धम् ...पुराणवारुणीपानोत्सवम् TilaMañ. 61. 11.

अन्तःपुरपुरंध्रिसार्थ (antaḥpura-purandhrisārtha) *m.* host of married women in the harem अदयशस्त्रपातविद्राविताखिलदस्युलोकश्च शोकलम्बालकं सबालकमादाय तदीयमन्तःपुरपुरन्ध्रिसार्थमर्थभारं च भूयः स्वशिबिराभिमुखोऽभवम् TilaMañ. 137. 5.

अन्तःपुरपुरंध्री (antaḥpura-purandhrī) *f.* married woman in the harem समाहूय ...। अन्तःपुरपुरंध्रीश्च शुद्धान्तवरयोषितः। ...यथास्थानं निवेशयेत् Mānaso. iv. 1. 5; iv. 4. 824; iv. 7. 1109; अन्तःपुरपुरंध्रीणां नूपुरध्वनिपूरितः। गिरौ निर्झरझात्कारश्चकार श्रवणोत्सवम् NemiNir. 8. 12; नान्तःपुरपुरंध्रीभिर्न चान्तःपुरचारिभिः। न च द्वेष्यैर्महीशस्य संगच्छेत विशारदः PāṇḍaC. 10. 14; एतत् प्रियं प्रियम्। यतः कुहूदिने पर्वोपवासे पौषधस्थिताः। अन्तःपुरपुरंध्र्यो मे पक्षादौ पारणाकृतः PrabhāC. 26. 3.

अन्तःपुरपुरंध्रीजन (antaḥpura-purandhrījana) *m.* host of married women in the harem काश्यपीश्वरः ...निखिलान्तःपुरपुरंध्रीजनवन्द्यमानपादपद्मां पद्मां तैस्तैः सतीजनप्रह्लादवचनैः ...उपचर्य ...प्रावासयत् YaśasCam. ii. 366. 7.

अन्तःपुरपुरःसर (antaḥpura-puraḥsara) *adj.* led by the attendants of the harem कशिपुः ... सुतरां प्रमदान्वितः। निर्ययावर्घपाद्येन सोऽन्तःपुरपुरःसरः PadmP. (Ra.) 108. 28.

अन्तःपुरपृच्छा (antaḥpura-pṛcchā) *f.* inquiry by the inmates of the harem युष्माभिः प्रतिगण्डभैरवरणे प्राणाः कथं रक्षिता इत्यन्तःपुरपृच्छया यदरयो लज्जावशं प्रापिताः ...सोऽयं शिङ्गमहीपतिः RasāSu. 6. 2 (1. 34)

अन्तःपुरप्रचार (antaḥpura-pracāra) *m.* **1** conduct or behaviour of the inmates in the harem मध्यन्दिनेऽर्धरात्रे वा ...। चिन्तयेद् धर्मकामार्थान् ...। दूतसंप्रेषणं चैव कार्यशेषं तथैव च। अन्तःपुरप्रचारं च प्रणिधीनां च चेष्टितम् ManuSm. 7. 153 (*but* Apte gossip of the harem); **2** act of moving within the harem बलिः ...धराधीश्वरम् ...राज्यमन्तःपुरप्रचारैश्चर्यमात्रसद्मतः पद्मतोऽभ्यर्थ्य ... अग्निहोत्रमारेभे YaśasCam. ii. 319. 23.

अन्तःपुरप्रचार (antaḥpura-pracāra) *adj.* moving, i.e. present in the harem अन्तःपुरप्रचारेषु देवपूजापरेषु च। ...व्यग्रेष्वन्येषु कार्येषु कुर्याद् वैरिषु घातनम् Mānaso. ii. 20. 1235; SūktiRa. 150. 11.

अन्तःपुरप्रचारादि (antaḥpurapracārādi) *adj.* conduct or behaviour etc. of the inmates in the harem किं पुनस्तन्मन्त्रणीयम्। उक्तं च दिक्प्रचार° ... °कुमारचिन्तान्तःपुरप्रचाराद्यनेकविधं च BālaKrī. i. 193. 19 (*on* 1. 340)

अन्तःपुरप्रचारिन् (antaḥpura-pracārin) *adj.* moving, i.e. present in the harem सहेलमन्तःपुरप्रचारिभिः ...कुब्जवामनकिरातकञ्चुकी(?कि)भिः कृतेन विकृतालापनर्तकैतवेन विकास्यमानलोचनः (अहम्) YaśasCam. ii. 27. 10.

अन्तःपुरप्रतीहार (antaḥpura-pratīhāra) *m.* door-keeper of the harem कथमयमन्तःपुरप्रतीहारो रत्नापीड इत एवाभिवर्तते KaṁVa. 4. 7(2)

अन्तःपुरप्रदीप (antaḥpura-pradīpa) *m.* lamp (burning) inside the harem घूर्णमानेष्वन्तःपुरप्रदीपेषु ... देवी यशोमती ...उदतिष्ठत् HarṣaC. 178. 12.

अन्तःपुरप्रदेश (antaḥpura-pradeśa) *m.* area or region of the inner apartment or harem वाजिनिवेशनम्। अन्तःपुरप्रदेशस्य कार्यं दक्षिणतश्च तत् SamarāSū. 33. 18.

अन्तःपुरप्रधर्षक (antaḥpura-pradharṣaka) *adj.* who attacks the royal palace अन्तःपुरप्रधर्षकम् ...दुर्गराष्ट्रदण्डकोपकं वा शिरोहस्तप्रादीपिकं घातयेत् ArthŚā. ii. 169. 5 (4. 11)

अन्तःपुरप्रधाना (antaḥpura-pradhānā) *adj. (f.)* prominent or chief among queens अन्तःपुरप्रधाने च तस्याभूतामुभे प्रिये। सुभद्रोमे TriṣaŚaPuC. iv. 2. 195.

अन्तःपुरप्रलाप (antaḥpura-pralāpa) *m.* name of a sub-section in the Rāmāyaṇamañjarī (*lit.* lament in the harem) इत्यन्तःपुरप्रलापः RāmāMañ. 393.19.

अन्तःप्रज्वलिताग्नि (antaḥprajvalitāgni) *m.* fire burning inside संदंशेन गृहीत्वान्तःप्रज्वलिताग्निमध्यमुपनीय ... ऊर्ध्वं वर्धयेत् RaseCin. 8. 32 (90. 17)

अन्तःप्रणव (antaḥ-praṇava) *m.* (inarticulate) sacred syllable '*om*' (ringing) within अन्तर्बहिश्चोभयात्मकत्वात्त्रिविधो ब्रह्मप्रणवः। अन्तःप्रणवो व्यावहारिकप्रणवः NāraPaU. 8. 1.

अन्तःप्रणवनाद (antaḥpraṇava-nāda) *m.* sound of the (inarticulate) sacred syllable '*om*' (ringing) within अन्तःप्रणवनादाख्यो हंसः प्रत्ययबोधकः PāśuBraU. 2. 3.

अन्तःप्रतप्त (antaḥ-pratapta) *adj.* heated inwards अन्तःप्रतप्तमरुसैकतदह्यमानमूलस्य चम्पकतरोः क्व विकासचिन्ता ŚārṅgaPa. 1002; Subhāṣi. 802.

अन्तःप्रतिक्रिया (antaḥ-pratikriyā) *f.* internal, i. e. oral treatment or remedy द्विविधा प्रतिक्रिया चैषां भवति अन्तःप्रतिक्रिया बाह्यप्रतिक्रिया च Hastyāyur. 120. 14 (1. 17)

अन्तःप्रतिबिम्बित (antaḥ-pratibimbita) *adj.* **A** reflected inside असौ हिरण्यवर्णासु तास्वन्तःप्रतिबिम्बितः ŚāliC. 2. 133; पौराः शुक्रदिने भान्ति यत्रान्तःप्रतिबिम्बिताः। राज्ञेव निकटं नीताः RājTa. (Śrī.) 1(7). 260; **B** reflected, i. e. existing within चराचरं जगत्सर्वं यस्यान्तःप्रतिबिम्बितम्। तस्मै युगादिदेवाय ... नमः KumāPraPra. 40. 12.

अन्तःप्रतिभास (antaḥ-pratibhāsa) *m.* flashing in the mind (उत्प्रेक्षा वस्तुसाम्येऽपि तात्पर्यगोचरो मतः) तात्पर्यं पदार्थव्यतिरिक्तवृत्ति वाक्यार्थजीवितभूतं वस्त्वन्तरमेव गोचरो विषयस्तद्विदामन्तःप्रतिभासः VakroJī. 199. 3.

अन्तःप्रतिष्ठ (antaḥ-pratiṣṭha) *adj.* **A** existing or abiding within न केवलमन्तःप्रतिष्ठं पुरुषमपीत्यपेरर्थः Bhām. 190. 16 (*on* i. 2. 26); **B** abiding, i. e. hiding inside अन्तःप्रतिष्ठशशकवीच्छ(क्ष?)कजनावेष्ट्यमानकण्ठीरवः ...। बभूव महान् ... मृगयासंरम्भः UdaySuKa. 44. 3.

अन्तःप्रतिष्ठत्व (antaḥpratiṣṭha-tva) *n.* the state of existing or abiding within अन्तःप्रतिष्ठत्वं माध्यस्थ्यं तेन साक्षित्वं लक्षयति Bhām. 191. 19 (*on* i. 2. 28); अन्तःप्रतिष्ठत्वेन सह समुच्चयः सूत्रगतापिशब्दार्थः VedāntKa. 146. 14 (*on* i. 2. 26)

अन्तःप्रतिष्ठत्वमात्र (antaḥpratiṣṭhatva-mātra) *n.* mere existence or abidance within अन्तःप्रतिष्ठत्वमात्रं हि परस्यापि संभवति ŚrutaPra. iB. 343. 23 (*on* i. 2. 27)

अन्तःप्रतिष्ठान (antaḥ-pratiṣṭhāna) *n.* existence or abidance within शब्दादिभ्योऽन्तःप्रतिष्ठानाच्च न BrahmSū. i. 2. 26; Bhām. 189. 17 (*on* i. 2. 24); न परमेश्वरो वैश्वानरो भवितुमर्हति। कुतः। शब्दादिभ्योऽन्तःप्रतिष्ठानाच्च BrahmSūBh. (Śaṅ.) 134. 5 (*on* i. 2. 26); अन्तःप्रतिष्ठानं जाठरापरिग्रहे व्याख्याय ... आह PrakaVi. 213. 25; (वैश्वानरस्य) पाचकत्वेनान्तःप्रतिष्ठानं च प्रतीयते BrahmSūBh. (Ma.) 13A. 9 (*on* i. 2. 26); वैश्वानरपुरुषस्य ... मूर्धादिचिबुकान्तास्तेष्वन्तःप्रतिष्ठानात् पुरुषेऽन्तःप्रतिष्ठितत्वम् VedāntKa. 147. 2 (*on* i. 2. 26); अग्निशब्दनिर्देशसहितम् अन्तःप्रतिष्ठानं विवक्षितम् ŚrutaPra. iB. 343. 22 (*on* i. 2. 27); (नेह वैश्वानरशब्देन परमात्मा वक्तुं शक्यः) अन्तःप्रतिष्ठानाच्च, विशेषतः औदर्याग्नेर्लिङ्गात् VedāntKau. 72. 19 (*on* i. 2. 27); विरुद्धधर्माः शब्दादयोऽन्तःप्रतिष्ठानं च AṇuBh. 69. 13 (*on* i. 2. 26); तस्य ... पुरुषेऽन्तःप्रतिष्ठितं वेदेत्यन्तःप्रतिष्ठानाच्च GoviBh. 38. 116 (*on* i. 2. 27) [residence in the interior, MW.; Apte]

अन्तःप्रतिष्ठानमात्र (antaḥpratiṣṭhāna-mātra) *n.* mere existence or abidance within अत एव पुरुषमपि चैनमधीयत इति सूत्रखण्डं नान्तःप्रतिष्ठानमात्रपरिहारपरम् ŚrutaPra. iB. 345. 9 (*on* i. 2. 27)

अन्तःप्रतिष्ठानश्रवण (antaḥpratiṣṭhāna-śravaṇa) *n.* mention of the

existence or abidance within अन्तःप्रतिष्ठानश्रवणाद्य न वैश्वानरः परमात्मा, किं तु जाठराग्निः VedāntPāSau. 72. 8 (*on* i. 2. 27)

अन्तःप्रतिष्ठानसहचर (antaḥpratiṣṭhāna-sahacara) *adj.* accompanied, i.e. complimented by the existence or abidance within भूततृतीयस्य तु पुरुषेऽन्तःप्रतिष्ठितत्वं तदेकदेशभूतजाठरद्वारकमिति वक्तव्यम्, अतोऽन्तःप्रतिष्ठानसहचरैर्हेतुभिर्जाठरभावः शङ्कितः ŚrutaPra. iB. 343. 30 (*on* i. 2. 27)

अन्तःप्रतिष्ठानादिलिङ्ग (antaḥpratiṣṭhānādi-liṅga) *n.* indicatory mark in the form of existence or abidance within (the body) etc. तथान्तःप्रतिष्ठानादिलिङ्गसहकृतोऽग्न्यादिशब्दो जाठरपक्षपाती प्रतिभाति PrakaVi. 210. 22.

अन्तःप्रतिष्ठानोपन्यास (antaḥpratiṣṭhānopanyāsa) *m.* mention of existence or abidance within शब्दादिभ्य इत्यादिसूत्रखण्डं जाठरशङ्कामात्रपरम् … अन्तःप्रतिष्ठानोपन्यासात् ŚrutaPra. iB. 343. 25 (*on* i. 2. 27)

अन्तःप्रतिष्ठित (antaḥ-pratiṣṭhita) *adj.* [*f.* - ā] **Ai** established or installed inside पूजयामश्च भगवन्तमन्तःप्रतिष्ठितमस्य देवतायतनस्य देवम् TilaMañ. 157. 3; स्फाटिकप्रासादानामन्तःप्रतिष्ठिताः … वन्दमानो जिनानाम् … प्रतिमाः … निर्जगाम (समरकेतुः) TilaMañ. 226. 2; अपश्यं च तत्रान्तःप्रतिष्ठितम् … अम्बिकानाथम् UdaySuKa. 65. 22; तत्र चान्तःप्रतिष्ठितोऽस्ति देवश्चन्द्रकेतुनामा महेश्वरः UdaySuKa. 103. 29; **Aii** stationed inside बहिर्मण्डपमगच्छम्। सोऽपि शून्य एव केवलमन्तःप्रतिष्ठितं क्षेत्रपालमालोक्य तस्यापि वाक्योपहारमकरवम् UdaySuKa. 61. 13; **B** existing or abiding within स यो हैनमग्निं वैश्वानरं पुरुषविधं पुरुषेऽन्तःप्रतिष्ठितं वेद BrahmSūBh. (Śrī.) i. 389. 3 (*on* i. 2. 27) [residing inside, MW.]

अन्तःप्रतिष्ठितत्व (antaḥpratiṣṭhita-tva) *n.* the state of existing or abiding within पुरुषेऽन्तःप्रतिष्ठितत्वं केवलं तस्य स्यात् BrahmSūBh. (Śaṅ.) 135. 14 (*on* i. 2. 26); 137. 3 (*on* i. 2. 28); अन्तःप्रतिष्ठितत्वं प्रादेशमात्रत्वं च न … परब्रह्मणः संभवतः Bhām. 189. 20 (*on* i. 2. 24); अन्तःप्रतिष्ठितत्वं वैश्वानरस्यामनन्ति वाजसनेयिनः VedāntKau. 72. 20 (*on* i. 2. 27); 76. 3 (*on* i. 2. 33); तदेतेभ्यो हेतुभ्योऽन्तःप्रतिष्ठितत्वमपि न भगवद्धर्मः AṇuBh. 69. 17 (*on* i. 2. 26)

अन्तःप्रतिष्ठितत्ववचन (antaḥpratiṣṭhitatva-vacana) *n.* statement regarding the state of existing or abiding within जाठराग्न्यपरिग्रहे … अन्तःप्रतिष्ठितत्ववचनं तावन्न विरुध्यते BrahmSūBh. (Śaṅ.) 137. 7 (*on* i. 2. 28)

अन्तःप्रतिष्ठितत्ववत् (antaḥpratiṣṭhitatva-vat) *adv.* like the state of existing or abiding within अन्तःप्रतिष्ठितत्ववत्पुरुषत्वमपि वैश्वानरमुद्दिश्य विधेयम् VedāntKa. 146. 14 (*on* i. 2. 26)

अन्तःप्रतिष्ठितत्वोक्ति (antaḥpratiṣṭhitatvokti) *f.* statement regarding the state of existing or abiding within एवमन्तःप्रतिष्ठितत्वोक्त्यनुरोधेन … द्युमूर्धत्वादिकमत्र ग्राह्यम् ŚivārkaMaDī. i. 389. 33 (*on* i. 2. 27)

अन्तःप्रतिहतातपा (antaḥpratihatātapā) *adj.* (*f.*) which has obstructed the rays of the sun (from entering) inside प्राविशत् पुरीम् … चित्रध्वजपताकाग्रैरन्तःप्रतिहतातपाम् BhāgP. i. 11. 13.

अन्तःप्रतिहारम् (antaḥpratihāram) *adv.* in the middle of the 'part' (of a Sāman) अन्तःप्रतिहारं स्तोभान् प्रतिहर्ता ब्रूयात् LāṭyāŚS. vi. 10. 25 (comm. प्रतिहारस्यान्तर्वर्तन्ते प्रतिहारमध्ये); DrāhyŚS. xviii. 3. 9 [within the syllable forming a *pratihāra*, pw; MW.]

अन्तःप्रतिहारसीमन् (antaḥ-pratihārasīman) *f., n.* boundary, i. e. the threshold of the door in the inner apartment or harem प्रविष्टमन्तःप्रतिहारसीमनि प्रतीक्ष्य जामातरमिन्दुशेखरम्। … रमा चकार पाद्यम् ŚivLī. 11. 84.

अन्तःप्रतीघात (antaḥ-pratīghāta) *m.* internal disturbance, i. e. pain उदना(?उदान)विप्रतिपत्तावन्तःप्रतीघाततृष्णाश्लेष्माभिषण्णशिरोरोगमन्याग्रहकण्ठस्वरश्रोतोऽक्षिविकाराः … संभवन्ति Hastyāyur. 388. 24 (3. 6)

अन्तःप्रत्याहृति (antaḥ-pratyāhṛti) *f.* restraint within अन्तःप्रत्याहृतिवशाच्चैत्यं चेन्न विभावितम्। मुक्त एव न संदेहो महासमतया तया AnnaU. 5. 90.

अन्तःप्रदीपिका (antaḥ-pradīpikā) *f.* **A** light or lamp inside (the house) धूपराजयः। अन्तःप्रदीपिकालोकचकितध्वान्तसंनिभाः MadhuVi. 1. 59 (comm. अन्तः गृहाभ्यन्तरेषु याः प्रदीपिकाः); **B** female servant in the inner apartment, MadhuVi. 1. 59 (comm. प्रदीपिकाः … अन्तर्गृहस्थशुद्धान्तपालिका इति च गम्यते)

अन्तःप्रदेश (antaḥ-pradeśa) *m.* interior region अहं तु … अन्तःप्रदेशे गृहैकदेशे स्थित्वा। … प्रादुर्भविष्यामि DaśKuC. 154. 26.

अन्तःप्रदेशक (antaḥpradeśa-ka) *n.* interior region, inside चतुष्कं नवकं कुर्याद्दिवमन्तःप्रदेशके MānaSā. 9. 221.

अन्तःप्रदेशस्थ (antaḥpradeśa-stha) *adj.* existing or abiding inside, i. e. within अन्तःप्राणे येन क्रियते – अन्तःप्रदेशस्थस्य प्राणस्य त्यागग्रहणे येन क्रियते Bhāsk. ii. 241. 18 (*on* iii. 1. 11)

अन्तःप्रपाका (antaḥ-prapākā) *adj.* (*f.*) having ripeness, i.e. ripening inside कफादन्तःप्रपाकां तां विद्यादनुशयीम् SuśruS. ii. 13. 24.

अन्तःप्रपाकिनी (antaḥ-prapākinī) *adj.* (*f.*) having ripeness, i.e. ripening inside पादस्यानुशयीं तां तु विद्यादन्तःप्रपाकिनीम् RugVi. 55.20.

अन्तःप्रबोधवत् (antaḥprabodha-va(n)t) *adj.* having inner awareness or realisation (पुमान्) गलितद्वैतनिर्भासो मुदितोऽन्तःप्रबोधवान्। सुषुप्तमन(?ना) एवास्ते AkṣU. 36.

अन्तःप्रभ (antaḥ-prabha) *adj.* having inner, i.e. intrinsic brilliance अन्तःप्रभोऽतिरागा मणिरत्नगुणाः समस्तानाम् BṛSaṁ. 82. 3.

अन्तःप्रभत्व (antaḥprabha-tva) *n.* the state of having inner, i.e. intrinsic brilliance रत्नं धार्यमिदं नृपैः। … अन्तःप्रभत्वं वैमल्यं सुसंस्थानत्वमेव च AgniP. 245. 7.

अन्तःप्रभा (antaḥ-prabhā) *f.* inner, i.e. intrinsic brilliance पण्डितः। स धर्मस्य वेदार्थं सूर्यस्यान्धः(v. l. °न्तः)प्रभामिव MahāBhā. iii. 34. 23.

अन्तःप्रमातृमयी (antaḥpramātṛ-mayī) *adj.* (*f.*) of the nature of inner cogniser मातरोऽन्तःप्रमातृमय्यः परमेशशक्तयः ताश्च प्रमातृत्वादेव सिद्धाः ParāTri. 248. 12.

अन्तःप्रमार्जन (antaḥ-pramārjana) *n.* internal cleansing क्षारः … दुष्टव्रणेषु बहुशः प्रकोपिषु प्रयुज्यते। … अन्तःप्रमार्जनेन तु गुल्मगरोदराग्निसादशूलानाहाश्मरीशर्करादिषु AṣṭāSaṁ. i. 190. 3 (1. 39)

अन्तःप्रमोद (antaḥ-pramoda) *m.* inner delight कान्तामन्तःप्रमोदादभिसरति मदभ्रान्ततारश्चकोरः MālaMā. 9. 176.

अन्तःप्रमोदजनन (antaḥpramoda-janana) *adj.* producing, i.e. causing the inner delight or bliss मुने व्रतमिदं. पुण्यं श्रुतम् …। अन्तःप्रमोदजननम् SkandP. ii(2). 45. 1.

अन्तःप्रमोदानुभाव (antaḥpramodānubhāva) *m.* experience or expression of the feeling of inner delight (श्लिष्यन्ते चासितेक्षणाः) निश्चलीकृते अन्तःप्रमोदानुभावादीक्षणे याभिस्ताः SaraKaṇṭhā. 545. 17.

अन्तःप्रयत्न (antaḥ-prayatna) *m.* internal effort (of articulation) संवृतोऽकारः। इत्येषोऽन्तःप्रयत्नः ĀpiŚi. 3. 12; 8.6.

अन्तःप्रयोग (antaḥ-prayoga) *m.* [Loc.] in the middle of the procedure (of a sacrifice) अन्तःप्रयोगेऽप्येकतन्त्रत्वं यथोत्पन्नाया एव हि दक्षिणाभेदयुक्तायाः क्रतुमध्य इव बहिरपि प्रयोगः ŚāstrDī. 832. 7 (*on* xi. 4. 3); MayūMāli. 832. 7 (*on* xi. 4. 3); राजसूयप्रकरणपाठादन्तःप्रयोग एकः। … तस्मात् बहिष्प्रयोगे तन्त्रम् अन्तःप्रयोगे भेदः NyāyMāVi. 653. 28 (*on* xi. 4. 3)

अन्तःप्रयोगकर्तव्यता (antaḥprayogakartavya-tā) *f.* the state of being what is necessary to be done in the middle of the procedure (of a sacrifice) कपालेषु श्रपयतीति विधिः श्रपणस्यान्तःप्रयोगकर्तव्यतासिद्ध्यर्थः स्यात् VidhiRa. 9 (59.20)

अन्तःप्रयोगम् (antaḥprayogam) *adv.* in the middle of the procedure (of a sacrifice) न हि दर्शपूर्णमासयोरन्तःप्रयोगं श्रपणीयस्य पुरोडाशस्य प्रकृतिद्रव्योपादानाकाङ्क्षायाम् …अतण्डुलपिष्टाबस्थयोरपेक्षणं गौरवदोषेण परित्यज्यते ŚivārkaMaDī. ii. 276. 23 (*on* ii. 2. 40)

अन्तःप्रयोगसंबद्ध (antaḥprayoga-sambaddha) *adj.* connected with the middle of the procedure (of a sacrifice) 'यूपस्य स्वरुं करोती' ति तदन्तःप्रयोग-संबद्धं स्वरुकार्यमञ्जनं कर्तुं यमुपादत्ते तं यूपादिति ŚābaBh. 2171. 15 (*on* xi. 3. 9)

अन्तःप्रयोगा (antaḥ-prayogā) *adj.* (*f.*) which falls in the middle of the procedure (of a sacrifice) 'यूपस्य स्वरुं करोती' ति स्वकालैवास्योत्पत्तिः। न खल्वेषाप्यन्तःप्रयोगैव ŚābaBh. 2170. 22 (*on* xi. 3. 8)

अन्तःप्ररूढ (antaḥ-prarūḍha) *adj.* **A** grown inside अन्तःप्ररूढस्य …पारिजातकतरोः …शाखाततिभिः समन्ततः स्थगितम् …रम्भागृहमपश्यत् (समरकेतुः) TilaMañ. 228.9; TārāŚa. 19; **Bi** grown, i.e. developōed in the mind उदीर्णमाकर्ण्य तमापतन्तमन्तःप्ररूढेन भयेन मूढः Surath. 2. 59; काचिदन्तःप्ररूढस्य कुतूहलमहीरुहः। कुसुमेनोद्गतेनेव स्मितेनाकलिता बभौ TārāŚa. 10; **Bii** deep-rooted in the mind (जगत्सत्यतानिश्चयः) निश्चयोऽन्तःप्ररूढः संपन्नोऽभ्यसनं विना। नाशमायाति लोकेऽस्मिन् न कदाचन YogVā. iv. 31. 20.

अन्तःप्ररूढार्ति (antaḥprarūḍhārti) *f.* distress grown, i.e. developed in the mind मन्त्रिष्वन्तःप्ररूढार्तिचिन्तानिष्प्रतिपत्तिषु। …भजतीवार्जवं वक्रे शठे शाठ्यमिवोज्झति RāmC. 28. 66.

अन्तःप्रलीन (antaḥ-pralīna) *adj.* dissolved or absorbed inside (the body) अन्तःप्रलीनं विषं प्रनष्टं विषं हतम् GāruU. 624.28.

अन्तःप्रवर्तित (antaḥ-pravartita) *adj.* which has circulated, i.e. filled the inside (of the body) अथ प्लाविनी - अन्तःप्रवर्तितोदारमारुतापूरितोदरः। पयस्यगाधेऽपि सुखात्प्लवते HaṭPra. 2. 69 (comm. अन्तः शरीरान्तः प्रवर्तितः पूरितः)

अन्तःप्रवर्धमान (antaḥ-pravardhamāna) *adj.* increasing excessively in the mind अन्तःप्रवर्धमानध्यानधैर्यधनंजयावधूतहिमसमयप्रत्यूहव्यूहस्य (सुदत्तस्य) ... विभान्ति विभावर्यः YaśasCam. i. 62. 3.

अन्तःप्रविश्य (antaḥ-praviśya) *ger.* having entered inside, i.e. being inside अन्नाद्यम् ... शर्कराकीटपाषाणैः केशैर्यद्याप्युपद्रुतम्। ... एतैर्दूषितं अन्तःप्रविश्याभक्ष्यतां नीतम् CaturCin. iii(1). 609. 17.

अन्तःप्रविष्ट (antaḥ-praviṣṭa) *adj.* [*f.* –ā] **Ai** who has entered inside प्रासादसंस्थो भगवन्तमन्तःप्रविष्टमश्रौषमनुग्रहाय Saund. 5.8; भगवान् ... ऋक्षबिलं प्रविवेश। अन्तःप्रविष्टश्च धात्र्याः ... वाणीं शुश्राव ViṣṇuP. iv. 13. 41; संपतद्भूरिनारीसंबाधेऽन्तःप्रविष्टा कतिचन रसिकाः स्वेष्टमापूरयन्ते RasSa. 81; 107 (2); अन्तःप्रविष्टस्य भवतः सजग्धिकादिभिः सत्कारैः श्रमापनोदमभिलषामि RasSa. 128 (5); **Aii** which has entered inside अधोमुखी ... अपत्यदर्शनौत्सुक्यादन्तःप्रविष्टेनौत्सुक्यादन्तःप्रविष्टेनेव मुखकमलेनैवं प्रीयमाणा ददर्श गर्भम् HarṣaC. 181. 12; (क्षोणीपतितनयः) मल्लिकामुकुलदामभिस्तुहिनकरमयूखैरिव श्यैतमादातुमन्तःप्रविष्टैर्जटालीकृतसकलक्षणम् ... वासभवनं विवेश TilaMañ. 174. 14; अवयविनां सच्छिद्रत्वाद् वह्नेः सूक्ष्मावयवैरन्तःप्रविष्टैरवयवेष्ववष्टब्धेष्वपि पाको न विरुध्यते SiddhāMu. 61. 5 (*on* 106); **Bi** which has gone inside, i.e. which is drawn back वमतोऽन्तःप्रविष्टायां जिह्वायां कवलग्रहाः। स्निग्धाम्ललवणैर्हृद्यैर्यूषक्षीररसैर्हिताः CaraS. viii. 6. 54 (1941 Ed.); **Bii** which has penetrated or pierced inside भाति स्म काचन ...। अन्तःप्रविष्टभरसंभृतपुष्पबाणनाराचगर्भमकरन्दमिवोद्गिरन्ती HarVi. 23. 18; सः। शोकेन शङ्कुनेवान्तःप्रविष्टेन व्यबाध्यत TriṣaŚaPuC. i. 6. 463; 'मनसि सप्तशल्यानि' ... सुन्दरत्वेनान्तःप्रविष्टानामपि व्यथाहेतुत्वात् AlaṅkāSa. 163. 7; **C** who abides within मम ... प्रकृत्या इदं धार्यते जगत् अन्तःप्रविष्टया GītāBh. (Śaṅ.) 216.5 (*on* 7.5); तया विलसितेष्वेषु गुणेषु गुणवानिव। अन्तःप्रविष्ट आभाति विज्ञानेन विजृम्भितः BhāgP. i. 2. 31; शास्ता जनानां सर्वात्मेति प्रशासितृत्वरूपात्मत्वेन सर्वेषां जनानामन्तःप्रविष्टः VedāSaṁ. 82. 3; आनन्दमयस्य यददृश्यत्वमुक्तं तद्यान्तःप्रविष्टमिति वाक्ये कस्यचिदन्तःप्रविष्टस्य सहैव सन्तं न विजानन्ति देवा इत्युच्यते TattvPrakā. 21B. 4 (*on* i. 1. 20); किमयमन्तःप्रविष्टः परमात्मा उतान्यः NyāySu. (Ja.) 146A. 13 (*on* i. 1. 7); 'स एष' इति ... तस्यान्तःप्रविष्टसर्वान्तर्यामिपुरुषत्वाभिधानात् ŚivārkaMaDī. i. 532. 9 (*on* i. 4. 15); **D** which has disappeared or hidden inside अन्तःप्रतिष्ठ(?विष्ट)शशकवीच्छ(क्ष?)कजनावेष्ट्यमानकण्ठी(रवः) ... बभूव महान् ... मृगयासंरम्भः UdaySuKa. 44.3; अन्तर्गतम् अन्तःसलिलसरस्वतीवदन्तःप्रविष्टमित्यर्थः। तत्र ... तर्पयेत् VīraMi. (Tīrtha.) 412. 3; **E** which is turned inwards सैवाकनिष्ठामूलम् अन्तःप्रविष्टाङ्गुष्ठमिथःस्पृष्टनखा संनिरोधिनी (मुद्रा) NityoNi. 71. 25.

अन्तःप्रविष्टचोर (antaḥpraviṣṭa-cora) *m.* thief, i.e. Māyāvādin who has entered inside (the camp of Brahmavādins) अन्तःप्रविष्टचोरवधार्थमेवैष आरम्भः AṇuBh. 124. 13 (*on* ii. 1. 14)

अन्तःप्रविष्टतिग्मांशु (antaḥpraviṣṭa-tigmāṁśu) *adj.* (used as noun) (one) inside whom the Sun has entered अनलः ... तत्तेजः शांभवं बिभ्रत्स तदा दिवसेष्वपि। अन्तःप्रविष्टतिग्मांशुरिव सप्तार्चिराबभौ KathāSaSāg. iii. 6. 85.

अन्तःप्रविष्टत्व (antaḥpraviṣṭa-tva) *n.* **A** the state of being one who abides within देहं प्रति नियन्तृतया अन्तःप्रविष्टत्वं वा आत्मत्वम् ŚrutaPra. iA. 158. 18 (*on* i. 1. 1); **B** the state of being what has entered in the heart आद्ये उदाहरणे नयनयोर्हृदयगतप्रियवीक्षणायान्तःप्रविष्टत्वोत्प्रेक्षणायां बाह्यवस्तुग्रहणशक्त्यभावो निमित्तम् CitraMī. 92. 1.

अन्तःप्रविष्टदिनकरातप (antaḥpraviṣṭa-dinakarātapa) *m.* heat of the Sun, i.e. sunshine which has entered inside (सिंहलेन्द्रसूनुः) अन्तःप्रविष्टदिनकरातपकणिकाकलापेनेव निःपतता विराजमानः ... शनकैर्न्यषीदत् TilaMañ. 207.3.

अन्तःप्रविष्टनिष्ठता (antaḥpraviṣṭaniṣṭha-tā) *f.* the state of being related to one who abides within समुद्रस्थत्वब्रह्माण्डवीर्यत्वादिविष्णुलिङ्गानामन्तःप्रविष्टनिष्ठतयोपदेशादन्तः प्रविष्टकर्तारमित्यन्तः श्रूयमाणो विष्णुरेव TattvPrakā. 22A. 1 (*on* i. 1. 20)

अन्तःप्रविष्टमन्थाद्रि (antaḥpraviṣṭa-manthādri) *m.* mountain Mandara (functioning) as churning stick which has entered, i.e. sunk inside अन्तःप्रविष्टमन्थाद्रिमन्थनध्वानशङ्कया। मध्येजलधि यादोभिः ... सर्वतोऽपि च। ... श्रूयमाणः ... विदधे बाहुबलिना सिंहनादः TriṣaŚaPuC. i. 5. 598.

अन्तःप्रविष्टहिमवत् (antaḥpraviṣṭa-himava(n)t) *m.* the mountain Himālaya which has entered inside (the ocean) अस्ति ... मैनाकमन्वेष्टुमन्तःप्रविष्टहिमवतेव महता खातवलयेन वेष्टिता ... अयोध्येति यथार्थाभिधाना नगरी TilaMañ. 8. 3.

अन्तःप्रविष्टापरभुजद्वय (antaḥpraviṣṭāparabhujadvaya) *adj.* having another pair of arms concealed inside अपरे तु ... मनसा देवताध्यारोपणप्रतारणात् ... अन्तःप्रविष्टापरभुजद्वयमिवात्मबाहुयुगलं संभावयन्ति Kād. 108. 13.

अन्तःप्रवृद्ध (antaḥ-pravṛddha) *adj.* grown or increased excessively in the heart अन्तःप्रवृद्धमकरध्वजपावकस्य शङ्के विभिद्य हृदयं निरगुः स्फुलिङ्गाः SubhāRaK. 20. 1.

अन्तःप्रवेश (antaḥ-praveśa) *m.* **A** penetration or passing inside (अन्त्रभेदवन्तं पुरुषम्) महाबलाः। भवत्यन्तःप्रवेशस्तु यथा निर्धुनुयुस्तथा। तथान्त्राणि विशन्त्यन्तः SuśruS. iv. 2. 59; श्लेष्मणि ... स्तब्धे बहिः शीतोपचारः ... ऊष्मणोऽन्तःप्रवेशेन कफविलयनायेति AṣṭāSaṁ. i. 75. 8 (1. 12); सच्छिद्राण्येवावयविद्रव्याणि तत्र यदि नाम महतस्तेजोऽवयविनो नान्तःप्रवेशोऽस्ति NyāyKa. 109. 5; **Bi** act of entering in or inside (concrete item) तत्रावश्यं वलयकुलिशोद्घट्टनोद्गीर्णतोयं (v.l. जनितसलिलोद्गारमन्तःप्रवेशात्) नेष्यन्ति त्वां सुरयुवतयो यन्त्रधारागृहत्वम् MeghDū. 61; सौरभालोभनाभिः स्वाभोगेऽन्तःप्रवेशोऽप्यशिथिलनिबिडः कोशभावान्न दत्तः Subhāṣi. 934; अयं महाकेतुश्चिरमत्रागत्य तिष्ठति कुतोऽस्यान्तःप्रवेशं नानुमन्यसे RasSa. 154 (2); **Bii** act of entering inside (abstract item, mind etc.) न चार्थाकार एवायं ज्ञानारूढः प्रतीयते। न हि सोऽन्तःप्रवेशाय पर्याप्तो नार्थहानये ŚlokaVār. 5(3). 35 (279.4); तापं ददानोऽपि खलप्रवादो नान्तःप्रवेशं महतः प्रयाति PadyaVe. 762; **Biii** act of entering inside, i.e. incorporation or coalecence वक्षःस्थलार्धमभृतोन्नतमिन्दुमौलिः। अन्तःप्रवेशपरिमण्डललक्ष्यमाणगौरीपयोधरमिवाच्छतया परीतम् HarVi. 21. 54; **C** act of abiding within, pervasion आप्नोति सर्वकार्याणि कारणात्मतया विराट्। ततोऽप्यन्तःप्रवेशाय तस्मादित्यभिधीयते TaiUBhāVā. 95.22(2); ब्रह्म स्वभावत एव ... जगदुत्पत्तिस्थितिसंहारान्तःप्रवेशनियमनादिलिलं प्रतिपाद्य ... क्षेत्रज्ञावस्थायाम् ... अचिद्रूपार्थाकारतयानुसंधानं च प्रतिपादितम् BrahmSūBh. (Rā.) 69.7 (*on* i. 1. 1); आदिशब्देन सृष्ट्याद्यौपयिकमन्तःप्रवेशनियमनादि गृह्यते ŚrutaPra. iA. 4. 17 (*on* i. 1. 1); iB. 76. 22 (*on* i. 1. 1)

अन्तःप्रवेशकाम (antaḥpraveśa-kāma) *adj.* desirous of entering inside (the body) सहस्राक्षः ...। अन्तःप्रवेशकामोऽसौ ... दित्याः कुक्षिं समाविशत् BrahmP. 124. 55.

अन्तःप्रवेशकारिन् (antaḥpraveśa-kārin) *adj.* which makes entry, i.e. enters into (the body) बहिर्निर्गमकारी हि प्राणः अन्तःप्रवेशकारी त्वपानः Bhāsk. ii. 272. 16 (*on* iii. 2. 19)

अन्तःप्रवेशकुशल (antaḥpraveśa-kuśala) *adj.* expert in entering inside (the body) अनिशं नष्टचेष्टानां शवानामिव भूभुजाम्। अन्तःप्रवेशकुशलो यो वेताल इवाभवत्। ... विटो लोष्टधराभिधः RājTa. (Ka.) 7. 1075.

अन्तःप्रवेशकृत् (antaḥpraveśa-kṛt) *adj.* which makes entry, i.e. enters into (the body) वायुः ...। प्राणादिभेदात् पञ्चात्मा शरीरं व्याप्य तिष्ठति। ... ष्ठीवनक्षवथूद्गारनिश्वासान्तःप्रवेशकृत् BhāvPra. (Śā.) 183.20 (7)

अन्तःप्रवेशन (antaḥ-praveśana) *n.* **Ai** act of drawing inside (one of the nine types of gestures of pupil of eye) (एतानि नवकर्माणि ताराकर्म ... शृणुध्वम्) ज्ञेयः प्रवेशोऽन्तःप्रवेशनम् NāṭyaŚā. 8. 99; **Aii** act of drawing inside (one of the lip-movements relating to erotic sentiment) संदष्टश्च समुद्रश्च कर्माण्यधरजानि च। ... अधरस्य ...। अन्तःप्रवेशनं चैव विनिगूहितमुच्यते। ... उपाङ्गाश्रयमेव नृत्यम् ViṣṇuDhaP. iii. 25. 72; **B** sexual intercourse अन्तःप्रवेशनेच्छं निर्भरपरिरम्भणं यस्मिन्। ... तत्सुरतं प्रस्तुतम् KuṭṭaMa. 378 (comm. अङ्गानाम् अपरस्य अङ्गेषु प्रवेशने इच्छा यत्र तादृशम्); **Ci** act of entering into the mind इन्द्रियशक्तीनां ज्ञानमन्तःप्रवेशनात् ŚivDṛ. 5. 89; **Cii** act of entering inside (the body) मनोजवत्वं भूतानां क्षणादन्तःप्रवेशनम्। ... मारुतं कवयो विदुः ŚivaP. vii. 38.26 (596A. 16); 'तदनुप्रविश्य सच्च त्यच्चाभवात्' इत्यत्रापि शरीरशरीरिभावनिबन्धनं तत्तच्छब्दवाच्यत्वमवगम्यते। अन्तःप्रवेशनेन प्रशासनादीनामर्थसिद्धत्वात् ŚrutaPra. ii. 152. 9 (*on* i. 4. 22); **D** inclusion under गुणानां लक्षकत्वेन न तत्त्वेऽन्तःप्रवेशनम् PañcDa. 9. 72.

अन्तःप्रवेशनार्थम् (antaḥpraveśanārtham) *adv.* for the sake of entering inside ते गूढशस्त्रैस्तीक्ष्णैः सह प्रविष्टा मध्यमकक्ष्यायामात्मविचयमन्तःप्रवेशनार्थं दद्युः ArthŚā. ii. 187. 2 (5.1)

अन्तःप्रवेशमात्र (antaḥpraveśa-mātra) *n.* mere act of entering inside तत्र न तन्तोर्लयः, किंतु बहिष्ठस्यान्तःप्रवेशमात्रम् AdvaiSi. 763. 14.

अन्तःप्रवेशयत् (antaḥ-praveśayat) *adj.* causing to enter in, i.e.

swallowing in निगिरन्नन्तःप्रवेशयन्निति हेमाद्रिस्मृतिचन्द्रिकाकाराभ्यामपि व्याख्यातम् VīraMi. (Āhnika.) 112.11.

अन्तःप्रवेशसहचारिता (antaḥpraveśasahacāri-tā) *f.* the state of being what accompanies or shares the act of abiding within श्रूयते ह्यन्तःप्रवेशसहचारितया प्रशासनादिकम् ŚrutaPra. ii. 152. 10 (*on* i. 4. 22)

अन्तःप्रवेशित (antaḥ-praveśita) *adj.* **A** which is stored inside कुसुमशेखरः ... अन्तःप्रवेशितप्रभूतधान्याम् ... काञ्चिनगरीमकरोत् TilaMañ. 82. 16; **B** who is caused to, i.e. allowed to enter बाधां करोति सुतरामयमङ्गनानामन्तःप्रवेशित इति प्रथितोऽयमर्थः RasSa. 155; **C** which is placed or turned inwards महामुद्रा योनिमुद्रा। ... महामुद्रापदस्यान्तःप्रवेशिताङ्गुष्ठसंहताञ्जलिपरत्वेन ... व्याख्यानात् SetuBa. 333. 22.

अन्तःप्रवेशिन् (antaḥ-praveśin) *adj.* [*f.*– ī] **i** who is entering inside (the harem), i.e. who has access into (the harem) तदलाभाच्च शोकमन्तःप्रवेशिनीभिश्च दूतीकल्पं सकलमाचरेत् KāmSū. 298. 25 (5.6); KandaCū. v. 6. 18; अन्तःप्रवेशिनीभिश्चेति। बाह्याभिरन्तःपुरप्रवेशनशीलाभिः स्त्रीभिः ... दूतीकल्पम् (सकलमाचरेत्) JayaMa. 299. 11 (*on* 5.6); **ii** which is entering inside or passing through (the window) उचितमुचितं जालेष्वन्तःप्रवेशिभिरायतैः कियदवयवैरेषामालिङ्गिताङ्गुलिलङ्गिमा NaiṣC. 19. 53.

अन्तःप्रशान्तपदावस्थिति (antaḥpraśāntapadāvasthiti) *f.* act of abiding in inner peaceful condition यदा यदा बहिर्मुखं रूपं स्वरूपे विश्राम्यति, तदा तदा बाह्यवस्तूपसंहारः, अन्तःप्रशान्तपदावस्थितिः PratyabhiHṛ. 20. 2 (8)

अन्तःप्रशान्तामर्षाग्नि (antaḥpraśāntāmarṣāgni) *m.* fire of wrath extinguished within श्यामायमानं बाष्पेण ...। अन्तःप्रशान्तामर्षाग्निशेषधूमलतात्विषा। आननस्य ... लिखितस्येव ...। तं वीक्ष्य नोचितं किंचिदाचेरुस्ते नराधमाः RājTa. (Ka.) 8. 1336.

अन्तःप्रश्न (antaḥ-praśna) *m.* type of a figure of speech wherein the answer is hidden in the question तं हि प्रश्नोत्तरं विदुः। अन्तःप्रश्नबहिःप्रश्नबहिरन्तःसमाह्वयैः। ... प्रश्नैस्तदपि षड्विधम् SaraKaṇṭhā. 303. 1; Kāvyānu. (He.) 272. 23.

अन्तःप्रश्नोत्तर (antaḥpraśnottara) *n.* type of a figure of speech wherein the answer is hidden in the question अन्तःप्रश्नोत्तरं यथा - काहमस्मि गुहा वक्ति प्रश्नेऽमुष्मिन्किमुत्तरम्। कथमुक्तं न जानासि कदर्थयसि यत्सखे AlaṅkāŚe. 10. 1 (45)

अन्तःप्रसन्ना (antaḥ-prasannā) *adj.* (*f.*) **A** clear inside अमथितोदधिजलसंपदमिवान्तःप्रसन्नाम् ... कन्यकां ददर्श Kād. 131. 13; **B** tranquil or calm in the mind, Kād. 131. 13.

अन्तःप्रसर्पिन् (antaḥ-prasarpin) *adj.* flowing in the middle or in between भारतम् ... खण्डितम् ... समुद्रस्य तोयेनान्तःप्रसर्पिणा ParaS. 26. 26.

अन्तःप्रसव (antaḥ-prasava) *adj.* [*f.*–ā] **A** who is about to deliver a child, pregnant तामन्तःप्रसवां दृष्ट्वा विप्रः प्राह बृहस्पतिः HariVaṁ. 20. 37; ViṣṇuP. iv. 6. 20; AgniP. 273. 11; BallāC. 51. 14; SkandP. v (1). 28. 89; BrahmP. 9. 26; **B** (*fig.*) who is impregnated (with evil) व्यापादमन्तःप्रसवं सपत्नम् ... जघान Saund. 17. 39.

अन्तःप्रसाद (antaḥ-prasāda) *m.* **A** inner propitiousness or joy पादान्तप्रणते प्रिये प्रकटयत्यन्तःप्रसादं प्रिया ŚṛṅgāTi. (Ru.) 1. 159; **B** inner tranquility or serenity कर्तुं तावत्कतकरजसां कीर्तिरन्तःप्रसादं गाढाश्लेषः परमसुहृदां कोऽपि सर्वातिरिक्तः RasSa. 236.

अन्तःप्रसुप्त (antaḥ-prasupta) *adj.* who has slept inside अन्तःप्रसुप्ताच्युतशरीरद्युतेव दत्तसंस्काराभिः ... निम्नगाभिसारिकाभिर्गाढमुपगूढम् ... अम्भोनिधिमपश्यम् TilaMañ. 120. 17; अम्भोनिधेर्विशति गर्भमसाविदानीम्। अन्तःप्रसुप्तहरिनाभिसरोजबोधकौतूहलीव भगवानरविन्दबन्धुः PrasaRā. 2. 32.

अन्तःप्रसूत (antaḥ-prasūta) *adj.* delivered, i.e. appeared inside सततमन्तःप्रसूतलक्ष्मीनिमित्तमाहितेन कौसुम्भेनेव वाससा चिह्नितं द्वारमादधानैः सुवर्णभवनैः ... अलंकृता शोभते समन्तादाभोगलक्ष्मीः UdaySuKa. 21. 18.

अन्तःप्रसृत (antaḥ-prasṛta) *adj.* (used as noun) (that) which is spread inside मलं पायुतो विसृजन्। स्वयमेवैति जुगुप्सामन्तःप्रसृतं च नो वेत्ति PraboSu. 120.

अन्तःप्रसृप्तदहन (antaḥprasṛpta-dahana) *adj.* having the fire spread inside जनकः ... हृदि नित्यानुषक्तेन सीताशोकेन तप्यते। अन्तःप्रसृप्तदहनो जरन्निव वनस्पतिः UttaRāC. 4. 2.

अन्तःप्रस्फुरत् (antaḥ-prasphurat) *adj.* **1** blooming, i.e. spreading inside पित्तशूली ... मृद्वीं शय्याम् ... शीते वेश्मन्यहतां सोपधानां सेवेतान्तःप्रस्फुरत्पद्मपत्राम्। KāśyaS. 346A. 32; **2** shining or glittering from inside जृम्भकैरन्तःप्रस्फुरदारकूटकपिल(ज्योति)ज्वलद्दीप्तिभिः ... अवस्तीर्यते VakroJī. 227. 14.

अन्तःप्रस्यन्दिन् (antaḥ-prasyandin) *adj.* flowing or trickling inside पर्वतानामभिज्ञातोद्देशानां बिलगुहोपत्यकालयनगूढखातेष्वन्तःप्रस्यन्दिनः ... रसाः काञ्चनिकाः ArthŚā. i.199. 1 (2. 12) (comm. मध्यप्रस्राविणः)

अन्तःप्राकारभित्ति (antaḥprākāra-bhitti) *f.* wall of the inner rampart अन्तःप्राकारभित्तिसमन्ततो निर्मितानामतिरम्याकृतीनाम् ... आयतनं ददर्श (समरकेतुः) TilaMañ. 215. 3.

अन्तःप्राण (antaḥ-prāṇa) *m.* **1** inner vital air or life-breath अन्तःप्राण उपष्टम्भको गृहस्येव स्तम्भादिलक्षणः BṛĀraUBh. 215. 13 (*on* ii. 1. 1); या वहति तत्र समये नाडी ...। अन्तःप्राणे प्रविशति यायाद्वैनयिकवेषेण ŚārṅgaPa. 2558; (त्यागो ग्रहणमिति द्वयम्) अन्तःप्राणे येन क्रियते ... तत् वागिन्द्रियम् Bhāsk. ii. 241. 17 (*on* iii. 1. 11); **2** inner strength or talent (of a character) जवस्थिरत्वं रेखा च भ्रमरी दृष्टिरश्रमः। मेधा श्रद्धा वचोरीतिरन्तःप्राणा दश स्मृताः Bharatakośa 791.

अन्तःप्राणभू (antaḥprāṇa-bhū) *f.* place of inner life- breath वक्त्रगात्रजा इति ... न हि यथा बाष्पादीनामन्तःप्राणभुवि कण्ठरोधादिरूपं लक्ष्यते AbhinBhā. iii. 154. 13 (*on* 22. 4)

अन्तःप्राणसर्वस्व (antaḥprāṇa-sarvasva) *n.* the whole of inner life-breath, inner vital air in its entirety अन्तःप्राणसर्वस्वरूपोन्मेषोत्तरैकरूपैरपि अन्तःकरणवेद्यदेशीयास्फुटप्रायभेदांशभासमानभावराशिभिः ... प्रसृता ज्ञानशक्तिः ऊ इति ParāTri. 168. 7.

अन्तःप्राणावरोध (antaḥprāṇāvarodha) *m.* restraining or holding of life-breath inside अन्तःप्राणावरोधव्युपरतसकलज्ञानरुद्धेन्द्रियस्य। ... शंभोर्वः पातु ... समाधिः Mṛcch. 1.1; SubhāRaK. 4. 28.

अन्तःप्राणिन् (antaḥ-prāṇin) *m.* insect or earth-worm (*lit.* living or existing inside) अणुप्राण्यु(v.l.अन्तःप्राण्यु pw.)पपन्नां च ... परित्यजेन्मृदः ViṣṇuP. iii. 11.17.

अन्तःप्राणिपिपीली (antaḥprāṇi-pipīlī) *adj.* (*f.*) containing earth-worms and ants मृदम्। ... अन्तःप्राणिपिपील्याम्(?°लीम्) ... परित्यजेत् BrahmVaiP. iv. 75. 74.

अन्तःप्राण्यवपन्ना (antaḥprāṇy-avapannā) *adj.* (*f.*) mixed with, i. e. containing earth-worms अन्तःप्राण्यवपन्नां च हलोत्खातां च ...। परित्यजेन्मृदं नैताः सकलाः शौचसाधनम् ViṣṇuP. iii. 11. 16 (Wai Ed.); VīraMi. (Āhnika.) 49. 20; (मृदम्) अन्तःप्राण्यवपन्नां अन्तर्मध्ये प्राणिभिरवपन्नां संबद्धाम् (त्यजेत्) VīraMi. (Āhnika.) 50. 9.

अन्तःप्राण्यवपर्णक (antaḥprāṇyavaparṇa-ka) *adj.* containing earth-worms and fallen leaves क्रीडास्थलं महारण्यम् ... स्थानमन्तःप्राण्यवपर्णकम्। ... एतत्सर्वं परित्यज्य ... मूत्रं च परिवर्जयेत् BrahmVaiP. i. 26. 22.

अन्तःप्राण्यवपर्णा (antaḥprāṇy-avaparṇā) *adj.* (*f.*) containing earth-worms and fallen leaves अन्तःप्राण्यवपर्णाम् ... मृदं त्यजेत् BrahmVaiP. i. 26. 38.

अन्तःप्रापित (antaḥ-prāpita) *adj.* which is caused to enter in अन्तःप्रापितकूर्मनक्रमकरो नाम्भोनिधिः स्पन्दते JānaPa. 1. 30.

अन्तःप्रीतिकारिन् (antaḥprīti-kārin) *adj.* causing pleasure in the heart प्रियाहारादिदानेन हन्तान्तःप्रीतिकार्यभूत्। ... नृपः RājTa. (Ka.) 8. 1284.

अन्तःप्रेमन् (antaḥ-preman) *n.* love in the heart, inner love विरहविदितमन्तःप्रेम विज्ञाय कान्तः पुनरपि वसु तस्मादेत्य मे दास्यति RasMañ.43.

अन्तःप्रेमभरालसा (antaḥpremabharālasā) *adj.* (*f.*) indolent due to the intensity of love in the heart निद्राति ... अन्तःप्रेमभरालसां प्रियतमामङ्गे दधानो हरः RasMañ. 1.

अन्तःप्रौढकलङ्कतुच्छ (antaḥprauḍhakalaṅka-tuccha) *adj.* empty through or devoid of the spot or mark increased inside अन्तः प्रौढ(?अन्तःप्रौढ)कलङ्कतुच्छम् ... परिस्तीर्यते ... इन्दोर्महः AnarghaRā. 7.72 (comm. अन्तर्मध्ये उपचितकलङ्केन तुच्छं शून्यम्); SubhāRaK. 29. 22.

अन्तःप्रौढाग्नि (antaḥprauḍhāgni) *m.* (*fig.*) fire fully developed inside अन्तःप्रौढाग्निसंशुष्यत्प्रभं शुष्कमुदाहृतम् । ... एते दृष्टिविकाराः BhāvPra. (Śā.) 123. 9 (5)

अन्तःप्लवन (antaḥ-plavana) *n.* plunging into, i.e. merging within सर्वतो विशुद्धस्य प्रतिनियतदेशविशुद्धेरन्तःप्लवनात् समन्ततोऽपि प्रकाशेत TattvPradī. (A.) 61. 4 (*on* 1. 47)

अन्तःप्लुष्यमाण (antaḥ-pluṣyamāṇa) *adj.* being scorched from inside

पश्यान्तःप्लुष्यमाणः प्रविशति सलिलं सत्वरं गृध्रसंघः SubhāRaK. 44. 1; SūktiMu. 94. 6.

अन्तःफलक (antaḥ-phalaka) *n.* inner slab महेन्द्रनीलैर्मणिभिर्विनद्धं महीतलम् ... सौवर्णमन्तःफलकं प्रक्लृप्तम् VarāṅgaC. 2. 65.

अन्तःफलद्रवा (antaḥ-phaladravā) *f.* a cucumber (*lit.* containing juice of fruit inside) क्षेत्रकर्कटिका ... पथ्या पाण्डुफला ...। मध्यपीतफला सैव चिक्कणान्तःफलद्रवा KalpaK. 150. 164.

अन्तक (ánta-ka) *m.* [AltGr.II. 1. 1105; DEBRU. 144; 526; 533] **1Ai** name of a royal sage **ii** name of some members in the family of Viśvāmitras **iii** name of a seer **B** name of a Nāga **Ci** name of a king **ii** name of a king in the Śuṅga dynasty **Di** name of a person **ii** name of the son of Śvaphalka and Gāndinī **E** name of a demon **2Ai** Death (deified) **ii** name of a messenger of Death **iii** Kali **Bi** name of a son of Mṛtyu (perhaps one of the Pitṛs who milked Svadhā, having Yama as calf) **ii** name of one of the Pitṛs **Ci** god of death, i. e. Yama **ii** name of a messenger of Yama **iii** guardian deity, master or lord of southern direction, i. e. Yama as one of the Dikpālas **iv** southern direction (identified with is guardian deity) **D** one who causes dissolution, the annihilator **E** death **3A** name of an exorcising rite *(abhicāra)* **B** name of a weapon **4Ai** epithet of Agni **ii** epithet of Garuḍa **iii** epithet of Viṣṇu **iv** epithet of Śiva **v** deity in Śrāddha **vi** Saturn **vii** Sun **B** one of the presiding deities of different worlds, i.e. Lokeśa or Lokapāla **Ci** banner of Indra **ii** one of the Kṣetrapālas **D** lord or master of nether-world or hell **5A** name of a disease **B** name of a type of fever **6Ai** (Astron., Astrol.) presiding deity of an auspicious moment (*muhūrta*) in the night **ii** presiding deity of the thirteenth day (of lunar fortnight) **iii** presiding deity of the tenth day (of lunar fortnight) **iv** name of the twenty third *yoga* (conjunction)(which causes diseases) **v** presiding deity of the fourth day (of lunar fortnight) **B** constellation Bharaṇī **7** type of material or substance (used in the particular process of prepering mercury) **8** name of the mysterious sound *ā* **9** name of a country **10** constituent part **11** the word *antaka* **1Ai** name of a royal sage (*lit.* destroyer of foes) याभिरन्तकं जसमानमारणे ... जिजिन्वथुः। ... ताभिरू षु ऊतिभिरश्विना गतम् ṚV. i. 112. 6 (Sāy. शत्रूणामन्तकरमेतत्संज्ञं राजर्षिम्); **1Aii** name of some members in the family of Viśvāmitras (of Kuśikagotra) विश्वामित्रान् व्याख्यास्यामः ... अन्तकाः ... इत्येते कुशिकाः BaudhŚS. iii. 443. 5; **1Aiii** name of a seer (of the hymn beginning with the expression *manonnā*) मनोन्ना इति मन्त्रस्य अन्तक ऋषिः BhaviP. 390A.36 (ii(2).21(?20).46); **1B** name of a Nāga (belonging to the family of Kauravyas) कौरव्यकुलजान् नागान् शृणु ... धूर्तकः पातपातरौ (v.1. प्रातरान्तकौ) MahāBhā. i. 52.12; **1Ci** name of a king (loyal to Śalya) शल्यस्य प्रेष्यतां शीघ्रं ये च तस्यानुगा नृपाः। ... हार्दिक्यायाहुकाय (v.1. °यान्तकाय) च MahāBhā. v. 4. 12; **1Cii** name of a king in the Śuṅga dynasty (वसुंधरा) शुङ्गान् गमिष्यति। ... भवितापि ... नृपः। वसुमित्रः ...। ततोऽन्तकः MatsyaP. 272. 29; **1Di** name of a person शाकल्यो ग्रन्थकर्ता च ...। अन्तकोऽन्तमनुप्राप्तस्तस्मात् कोऽन्योऽपरः प्रभुः MahāBhā. xiii. 95 *(4); **1Dii** name of the son of Śvaphalka and Gāndinī (गान्दिनी) सुषुवे तस्माच्छ्वफल्कात् ... गृध्रमोजास्तथान्तकः HariVaṁ. 24. 10; **1E** name of a demon सुरेशेन श्वेतकिर्नाम भूपतिः। रक्षितस्त्वन्तकं दग्ध्वा VāmaP. 83. 21; दक्षान्धकान्तकपुरत्रययज्ञहर्ता लोकत्रयान्तककरः प्रहसंस्तदाह LiṅgaP. i. 97. 17; ŚivaP. ii (5). 24. 27 (249A. 13); (महेश्वरम्) अन्तकान्धककन्दर्पकाल-कूटादिनिग्रहम्। गायन्तो मधुरं तस्य गन्धर्वा ययुरग्रतः Gaṅgāva. 4. 60; **2Ai** Death (deified and sometimes identified with Mṛtyu or Kāla) विद्म ते स्वप्न जनित्रं देवजामीनां पुत्रोऽसि यमस्य करणः। अन्तकोऽसि मृत्युरसि AV. vi. 46.2; xvi. 5. 1; AV. (P.) xvi. 1. 1; KauśiSū. 55. 17; 58. 3; AVPari. 32 (1). 9; 37 (2). 1; BṛSarvaAnu. 6. 1 (8. 1); 9. 22 (16. 5); मृत्यवे मृगयुमन्तकाय श्वनिनम् VājaS. 30. 7; VājaS. (K.) 34. 1; TaiBr. III. iv. 3. 1 (BhaṭṭaBhā. प्राणापहारिणे); मृत्यवे गोव्यच्छमन्तकाय गोघातम् VājaS. 30. 18; VājaS. (K.) 34. 3; 39. 9; संवत्सरः ...। एष उऽ एवान्तकः। एष हि मर्त्यानामहोरात्राभ्यामायुषोऽन्तं गच्छत्यथ म्रियन्ते तस्मादेष एवान्तकः स यो हैतमन्तकं मृत्युं संवत्सरं वेद ŚatBr. X. iv. 3. 2; ते देवाः। एतस्मादन्तकान्मृत्योः संवत्सरात् प्रजापतेर्बिभयां चक्रुः ŚatBr. X. iv. 3. 3; X. iv. 3. 11; पलाशपर्णेन जुहोति यमाय स्वाहान्तकाय स्वाहा HirPiMe. ii. 6. 5; अलं तस्य ... भीमसेनः ...। लोकस्य समुदीर्णस्य निधनायान्तको यथा MahāBhā. ii. 18. 6; यथा प्रविश्यान्तरमन्तकस्य काले मनुष्यो न विनिष्क्रमेत MahāBhā. iii. 120. 14; विदितौ हि तवात्यन्तं क्रुद्धाविव यमान्तकौ। भीमार्जुनौ MahāBhā. v. 135. 20; अभवदार्जुनिः। अन्तकः सर्वभूतानाम् MahāBhā. vii. 44.1; कृत्वा तु रूपम् ...। कालान्तकाभ्यां प्रतिमं तदानीम् MahāBhā. viii. App. I. 30 (51); महाहिः काल एव सः। अन्तकः सर्वभूतानां देहिनां सर्वहार्यसौ MahāBhā. xi. 6. 7; मृदु वस्तु हिंसितुं मृदुनैवारभते प्रजान्तकः RaghuVa. 8. 45; स्वभाववैपरीत्यं तु प्रकृतेश्च विपर्ययः। कथयन्ति मनुष्याणां सदासन्नौ यमान्तकौ MārkP. 43. 34; पञ्च धर्माः पुराणे तु रुद्रेण समुदाहृताः। यमशुक्रपुरोगैश्च पितृकालान्तकैः ... ते धर्माः पर्युपासिताः VāyuP. i. 10. 67; संहर्ता सर्वलोकानां कालो मृत्युमयोऽन्तकः BrahmāṇḍP. i. 26. 39; कमलशवलालिबलेऽमाले दिशमन्त-केऽविशमे Kāvyālaṅ. (Ru.) 4. 12; उपोषितश्चतुर्दश्यां कृष्णपक्षे समाहितः। ... मृत्यवे चान्तकाय च। ... प्रत्येकं तिलसंयुक्तान् दद्यात् सप्तोदकाञ्जलीन् KūrmaP. 694. 14 (2. 34); यश्चाभिहन्यते दुष्टैर्भूतै रात्रावथो दिवा। प्रकृतैर्विकृतैर्वापि तस्यासन्नौ यमान्तकौ SkandP. i (2). 55. 88; विशन्ति वा वशाद् वाथ योगाद् योगबलान्विताः। ... न यमो नान्तकः क्रुद्धः ...। विशन्ते तद् द्विजाः सर्वे योगस्यामिततेजसः BrahmP. 238. 25; मन्त्री ...। स्वस्य भर्तुर्विवेशादौ नगरीमन्तकस्ततः RājTa. (Ka.) 4. 304; भट्टिर्नष्टो भारवीयोऽपि नष्टः ... भब्भापङ्क्तावन्तकः संनिविष्टः BhojPra. 75. 24; प्रतिधावन्तमिवान्तकं प्रभुः। ... व्यदारयत् Yādavā. 9. 27; **2Aii** name of a messenger of Death मृत्यो ते माता तस्य ते अन्तकः ... ते दूतः KauśiSū. 135. 9; **2Aiii** Kali पिण्डम् ... निनयेदन्तकास्पदम् PauṣkS. 27. 401; 43. 195; समेयिवान्रघुवृषभः स्वसैनिकैः स्वमन्दिरं शिथिलधृतिर्निवर्तितः। मनोगतं गुरुमृषिशापमुद्वहन्क्षयानलं जलधिरिवान्तकास्पदम् RaghuVa. Add. after 9. 82 (NANDARGIKAR Ed.); **2Bi** name of a son of Mṛtyu (perhaps one of the Pitṛs who milked Svadhā, having Yama as calf) विराड् वा इदमग्रं आसीत् ... सोदक्रामत् सा पितृनागच्छत् तां पितर उपाह्वयन्त स्वध एहीति। तस्यां यमो राजा वत्स आसीत् ...। तामन्तको मार्त्यवोऽधोक् AV. viii. 10. 23; AV. (P.) xvi. 135. 3; BṛSarvaAnu. 6. 10 (8. 13); **2Bii** name of one of the Pitṛs पितृभिः श्रूयते चापि पुनर्दुग्धा वसुंधरा।... यमो वैवस्वतस्तेषामासीद्वत्सः ... अन्तकश्चाभवद्दोग्धा HariVaṁ. 6. 21; MatsyaP. 10. 19; BrahmāṇḍP. i. 36. 209; SkandP. vii (1). 336. 152; BrahmP. 4. 102; पितरः पूज्याः ...। यमश्च धर्मराजश्च मृत्युश्चैव तथान्तकः BṛParāSm. 2. 195; **2Ci** god of death, i. e. Yama शं नो मित्रः शं वरुणः शं विवस्वां छमन्तकः AV. xix. 9. 7 (Sāy. सर्वेषां प्राणिनाम् अन्तम् अवसानं करोति); अन्तकाय त्वा परि ददामि ĀpaManPāṭha. ii. 3. 20; MantrBr. i. 6. 21; HirGS. i. 6. 5; ĀgniveGS. i. 1. 3 (9. 13); श्वोभावा मर्त्यस्य यदन्तकैतत् सर्वेन्द्रियाणां जरयन्ति तेजः KāṭhU. 1. 26; यमयज्ञम् ...। मासि मासि तु कर्तव्योऽन्तकाय बलिस्तथा HirPiMe. ii. 6. 1; नाग्निस्तृप्यति काष्ठानाम् ...। नान्तकः सर्वभूतानाम् MahāBhā. i. 1189 *(2); v. 40. 6; vii. 169. 43 xiii. 38. 25; ŚatTrayī. 571; Hitopa. 2. 103; PañcaRā. (Nā.) i. 14. 99; Pañcā. 18. 31; SūktiRa. 54. 7; ŚārṅgaPa. 1498; SiṁhāDvā. 31. 10; ततस्त्वध्यापयामास ...। तदस्त्रं पाण्डवश्रेष्ठं मूर्तिमन्तमिवान्तकम् MahāBhā. iii. 41. 18; अन्तकः शमनो मृत्युस्तथाग्निर्वडवामुखः। कुर्युरेते क्वचिच्छेषं न तु क्रुद्धो धनंजयः MahāBhā. iv. 45. 25; भैमसेनिः ...। तमापतन्तमुद्वीक्ष्य कालसृष्टमिवान्तकम् MahāBhā. vi. 87. 24; vii. 7. 11; स पाण्ड्यः ...। कर्ण-स्यानीकमवधीत् परिभूत इवान्तकः MahāBhā. viii. 15.5; मया ...। कुपितेनान्तकेनेव प्रजाः सर्वा जिघांसता MahāBhā. viii. 46. 10; viii. 810 *(2); पाण्डवः ...। अतिष्ठत रणे वीरः क्रुद्धरूप इवान्तकः MahāBhā. ix. 9. 24; योधान् ... प्राच्छिनत्स वरासिना। रुधिरोक्षितसर्वाङ्गः कालसृष्ट इवान्तकः MahāBhā. x. 8. 39; अनागतानि कार्याणि कर्तुं गणयते मनः। ... स्मयते नूनमन्तकः MahāBhā. xiv. App. I. 4 (2204); (कैकेयी) तेन वाक्येन संहृष्टा तमभिप्रायमात्मनः। व्याजहार महाघोरमभ्यागतमिवान्तकम् Rāmā. ii. 10. 20; सा ददर्श विमानाग्रे रावणम् ... व्यात्ताननमिवान्तकम् Rāmā. iii. 30. 6; पश्यामि ... रामं पाशहस्तमिवान्तकम् Rāmā. iii. 37. 15; अन्तको रामरूपेण हत्वा नयति वालिनम् Rāmā. iv. 19. 11; वर्जयेद्वज्रमुत्सृष्टं वर्जयेदन्तकश्चिरम् Rāmā. v. 19. 19; तमन्तकमिव क्रुद्धं समरे प्राणहारिणम्। हनूमन्तमभिप्रेक्ष्य राक्षसा विप्रदुद्रुवुः Rāmā. vi. 44. 24; vi. 55. 31; पर्वस्वपि च विन्यस्ता लोकपाला महौजसः। धनदो वरुणश्चैव पाशहस्तस्तथान्तकः Rāmā. vi. 3080 *(2); तद्युगे तत्कुलीनश्च राजसूयमपि क्रतुम्। आहरिष्यति राजेन्द्र श्वेतग्रहमिवान्तकः HariVaṁ. 115. 41; 57. 16; स्वकर्मदक्षश्च यदान्तको जगत् ... विकर्षति BuddhaC. 11. 61; यमाहवे क्रुद्धमिवान्तकं स्थितं जघान फेनावयवेन वासवः Saund. 9. 19; क्षेत्रे च पापतस्तेषां संक्षिपत्यन्तकस्य च PauṣkS. 36. 88; ऋषिप्रभावान्मयि नान्तकोऽपि प्रभुः प्रहर्तुम् RaghuVa. 2. 62; स रामसायकः। ... द्वारतामगमदन्तकस्य RaghuVa. 11. 18; जपेन्मन्त्रवरं रात्रौ निशान्ते चान्तकः स्वयम्। विह्वलीभूत आयाति JayāS. 29. 133; न यस्य जन्मने धाता यस्य चान्ताय नान्तकः। स्थितिकर्ता न चान्योऽस्ति ViṣṇuP. v. 7. 52; v. 18. 56; (पुमान्) महारोगैः ...। शरैरिवान्तकस्योग्रैश्छिद्यमानासुबन्धनः ViṣṇuP. vi. 5. 39; दृष्ट्वा मेऽपत्यसंततीः।

स्वल्पैरेव ममाहोभिरन्तको न सहिष्यति MārkP. 109. 35; सर्वेषामेव भूतानां यस्मादन्तकरो भवान्। तस्मात्त्वमन्तकः प्रोक्तः MatsyaP. 213. 6; ViṣṇuDhaP. ii. 40.5; भवतीम् ...। अन्तकस्य पुरीमत्र प्रापयिष्यामि BrahmāṇḍP. iii. 22. 80; सः ... नान्तक इवाकस्मादपहृतजीवनः VāsaDa. 28. 2; यस्मिन् ... पराभवं प्राप्त इवान्तकोऽपि। ... स भीष्मः Kirātā. 3. 19; अन्तकः पर्यवस्थाता जन्मिनः संततापदः Kirātā. 11. 13; 16. 6; भूतानि भर्त्रा धनुरन्तकस्य। भिन्नाकृतिं ज्यां ददृशुः Kirātā. 17. 24; (देवः)अङ्गीकृत इवान्तकेनाप्रतिपत्तिरासीत् HarṣaC. 227. 9; अन्तकस्य पृथौ तत्र शयनीय इवाहवे। दशनव्यसनादीयुर्मत्कुणत्वं मतङ्गजाः ŚiśuVa. 19. 71; अन्तकस्यान्तको नु स्याद्भास्करो नु तनूनपात्। ... आविर्बभूव तद्देशे केसरी PadmP. (Ra.) 17. 230; न कश्चिन्म्रियते तावद्यावदास्त इहान्तकः BhāgP. i. 16. 8; भगवांस्तु गदावेगम् ...। अवञ्चयत्तिरश्चीनो योगारूढ इवान्तकम् BhāgP. iii. 18. 15; vi. 10. 15; वक्षस्ताडनमन्तकस्य ...। कर्मेदं मृदुलस्य तावकपदद्वन्द्वस्य किं वोचितम् ŚivāL. 64; अक्रोधि बोधितसुरासुरचक्रवालसंहारदुर्धरपराक्रममन्तकेन HarVi. 7. 39; 43. 79; मन्दो मनुरन्तकोऽश्विनौ द्वौ द्यौरेवं तपतीत्यपत्यजातम् RāmC. 14. 52; हिंसाधिकारं दधुरन्तकस्य ... नृशंसाः RāmC. 17. 23; 27. 23; नान्तको न वरुणः ... आभिमुख्यमभजन्मम युद्धे RāmC. (App. 2) 40. 71; अन्तकोऽपि ... स यमेव भयार्तः। पश्यति प्रकुपितं प्रहरन्तं स्वप्नदर्शनकृपाणतलेषु RāghPāṇ. (Dha.) 10. 34; 18. 5; शिष्टं दुष्टमनार्यमार्यमखिलं लोकं निहन्त्यन्तकः SubhāRaSaṁ. 296; द्वारि क्षिप्तं यदैन्द्रे दशवदनशिरः किंकरैरन्तकस्य BālRā. 9. 58; MahāN. 9. 93; यमस्य नाम्नि दातव्याः सप्तसप्तजलाञ्जलीः। यमाय धर्मराजाय मृत्यवे चान्तकाय च NīlaP. 488; BhaviP. 884A. 16(iv. 193.52); SamaMā. 1. 39; ĪśānŚiP. i. 47. 25; प्रोवाच ... वसिष्ठः ...। प्रहर्तुमिच्छसि यदि तं निवारय चान्तकम् VāmaP. 60. 46; अहम् ... पतञ्जवस्यात्मजेन गजशल्कनाम्ना ... पलिशदेशाश्रयिणा तेनान्तकेनेवावलोकितः YaśasCaṁ. ii. 180. 2; श्रीमान् जटाचोळभीमनृपतिः ... अभिना[न]वान्तकः EI. xxi. 33. 33; यद्वैरिणां रणमुखे शरणप्रदायी नैवास्ति कश्चिदमुमन्तकमन्तरेण RāmāCam. 1. 20; हनूमता सोऽपि हतः सुरान्तकः पुरान्तकेनेव यथा पुरान्तकः RāmāCam. 6. 61; अदृश्यत छत्रमिवान्तकस्य NavaSāC. 17. 23; राक्षसास्तम् ...। ददृशुर्विश्वसंहारविश्वरूपमिवान्तकम् RāmāMañ. 126. 2; नरः ... मर्मविद्भिर्महारोगैः ...। शरैरिवान्तकस्योग्रैश्छिद्यमानास्थिबन्धनः। ... घुरघुरायते BrahmP. 233. 39; अन्तकः ... सैन्यमेककवलं चकार VikraDeC. 5. 7; रे संप्रत्यपवित्रमत्र पथिकाः सारम्भमुज्जृम्भते चूतो दूत इवान्तकस्य कलिकाजालस्फुरत्पल्लवः SubhāRaK. 8. 35; किं तृप्यति ...। अन्तको जन्तुभिः किं वा किमेधोभिर्हुताशनः TriṣaŚaPuC. i. 1. 296; i. 4. 398; आकृष्टासिरलक्षि सः। तन्मृत्युवाचनायत्तपत्रः साक्षादिवान्तकः PariPar. 5. 24; अन्तकस्य स तत्कालमतिथित्वं गमिष्यति PariPar. 9. 9; अप्यन्तकं स्थाम निकारयेत् स निकारयेस्तं यदि नात्मदण्डैः DvyāśraKā. 2. 89; 7. 120; नात्र कोऽपि समरिप्सत कोपात्सोऽन्तकेऽप्यविनये यदशिक्षत् DvyāśraKā. 8. 37; 18. 100; एवं संधामनुसृतवतस्तर्जनीवान्तकस्य ŚrīKaC. 21. 43; दन्तिनां श्रुतिपुटैरनेकशो नर्त्यमानतनुभिर्व्यतन्यत। ... अन्तकस्य नवतालवृन्तता ŚrīKaC. 22. 29; सोऽन्तकः स्पृशति प्रजास्वसमये न कंचन PṛthvīVi. 9. 7; ताटका। ... पुरीं प्रविष्टा। ... तत्किं दशरथस्य। ... न हि नहि अन्तकस्य PrasaRā. 2. 2 (13); प्रजासंजनितत्रासं निग्रहीतुमिवान्तकम्। ... प्रतस्थेऽथ प्रजापतिः PāṇḍaC. 6. 249; बद्धपानोत्सवेऽन्तके। उद्यतालायितं तस्मिन् समरेऽस्थिच्छिदारवैः PāṇḍaC. 13. 472; कोदण्डेन प्राप्य क्रुद्धो यथान्तको दण्डेन। क्षपयेयं तामेकः कुरुपृतनाम् YudhiVi. 6. 25; नाप्यन्तको जगति जन्तुभिरेति तृप्तिम् PañcaSā. 2. 33; वसिष्ठः ... ददर्शाथ जामदग्न्यम् ...। धनुःपरशुपाणिं च साक्षात्कालमिवान्तकम् AdhyāRā. i. 7. 7; यः स्वायुषोऽवधिमवैति स्वदेहनिष्ठं यस्यान्तको भवति मित्रतयातिवश्यः RājTa. (Śrī.) 2. 90; राजधानी ममेयम्। ... सुता मे च भृत्याः। इत्येवान्तः कलयति नृपो यावदेत्यन्तकस्तम् RājTa. (Śrī.) 3. 562; 4. 94; एकतो दिवसान् बाला गणयत्येकतोऽन्तकः। न विद्मः प्रथमं कस्य यास्यामो वयमन्तिकम् Subhāṣi. 1245; येऽपि नास्तीति मन्यन्ते तदैश्वर्यकदर्थिताः। दिनैः कतिपयैरेव तान्समीकुरुतेऽन्तकः Subhāṣi. 3272; भ्रातुरन्तकस्य पत्तनेऽभिपत्तिहारिणी ... मां पुनातु StavMā. 287. 25; अन्तकाय नमः VīraMii. (Āhnika.) 375. 3; अन्तकोऽपि हि जन्तूनामन्तकालमपेक्षते KaliViḍ. 51; न वान्तकः कविंमन्यान्नयते तन्मदंहसा Gaṅgāva. 1. 29; आदिश्य च ततः शतमन्युरन्तकमग्रतः सेनामुखे NīlaVi. 19. 20; अन्तकं यद्धतं नेतुमन्तकोऽन्यो न विद्यते NīlaVi. 21. 15; 82. 5; प्रहर्ता च प्रहर्तॄणामन्तकस्यापि चान्तकः JānaPa. 6. 58; **2Cii** name of a messenger of Yama यमाय नमो धर्मराजाय नमः ... अन्तकाय नमः ...। इति यमदूताः AVPari. 43 (5). 44; **2Ciii** guardian deity, master or lord of southern direction, i. e. Yama as one of the Dikpālas इन्द्रान्तकाप्पतीन्दुभ्यः सानुगेभ्यो बलिं हरेत् ManuSm. 3. 87; तस्य पुत्रः ... धनदवरुणेन्द्रान्तकसमप्रभावः EI. vi. 298. 9; ix. 29. 10; xii. 34. 9; **2Civ** southern direction (identified with its guardian deity) इन्द्रादीशानपर्यन्तं चान्तकात् पावकान्तम्। ... सूत्रमेवं परिव्रजे(व्राजये)त् MānaSā. 6. 49; निर्ऋत्यन्तकयोर्नीचम् ...। अर्गलं नाम तद् वास्तु VāstuVi. 2. 14; राक्षसान्तकयोर्मध्ये महिमां मध्यतो यजेत् LiṅgaP. ii. 27. 56; **2D** one who causes dissolution, the annihilator तदन्तकोऽप्येति विनाशकाले। अणीयरूपम् MahāBhā. v. 44. 22; दशाननाविक्षितराघवाणाम् ...। भस्मापि शिष्टं न कथं क्षणेन भ्रूभङ्गपातेन धिगन्तकस्य ViṣṇuP. iv. 24. 147; पितामहः। एको ब्रह्मान्तकश्चैव पुरुषश्चेति BrahmāṇḍP. ii. 3. 81; सर्वाणि कर्माणि रिपुघातिनः। श्रोतुमिच्छामहे सम्यग्वद कृष्णस्य धीमतः। ... युगान्तेष्वन्तको यश्च यश्च लोकान्तकान्तकः BrahmāṇḍP. ii. 72. 39; भगवान् ...। स एव सर्वभूतानां स्रष्टा पालयितान्तकः AhirbuS. 33. 15; त्वमन्तकः स्थावरजंगमानां त्वया जगत् प्राणिति देव विश्वम् Kirātā. 18. 35; स्वयमपि जगतामन्तकस्यान्तकोऽहम् VeṇīSaṁ. 3. 354; Dhvanyā. 211. 6 (*on* 2. 9); Loc. 81. 24 (*on* 2. 10); SaraKaṇṭhā. 126. 5; AuciViCa. 16 (68); SūktiRa. 58. 7; PadyaVe. 136; (त्वम्) संवर्तकोऽन्तकश्चैव संवर्तकबलाहकः VāmaP. 47. 126; भोक्तारं भोजनं याति सृष्टिं चाप्यन्तकः स्वयम् YogVā. iv. 10. 29; रुद्र त्वं प्राणानामाश्रयोऽन्तकश्चासि TattvPrakā. 113A. 1 (*on* ii. 3. 13); त्रिजगत्प्रलयारम्भकृतोंकार इवान्तकः VetāPañ. (Śi.) 7. 2; **2E** death दातारो यज्ञशीलाश्च न तरन्ति जरान्तकौ MahāBhā. xii. 28. 47; प्रसूतः पुरुषो लोके श्रुतवान् बलवानपि। न जयत्यन्तकं कश्चिन्नाजयन्नापि जेष्यति Saund. 15. 60; (पुरे) यौवनान्तं वयो यस्मिन्नान्तकः कुसुमायुधात् KumāSaṁ. 6. 44; देहो रोगनिधिर्जरावशगतो लीनान्तकाधिष्ठितः BhagAjju. 7. 3; प्राणिनामन्तकमपि न जानीषे BhagAjju. 90. 8; आयामाक्षेपकस्तम्भा स्रावजेऽभ्यधिकं रुजा। यानस्थानासनाशक्तिर्वैकल्यमथवान्तकः AṣṭāHṛ. ii. 4. 49; कंचातः किन्न (better किंचातः किन्नु) नागादलछुपुरपतिः कक्कराजोऽन्तकस्य (भयम्) EI. iii. 180. 56; वपुर्व्यसनमस्यति प्रसभमन्तको जीवितम् ... तथापि बत मोहिनो दुरितसंग्रहं कुर्वते SubhāRaSaṁ. 324; त्वया दुःखं न कर्तव्यं कदाचन। मृताः पुत्रास्तव शुभे को लम्भेदन्तकं नरः ĀdiP. 21. 44; अन्तकं विरहिणीषु सुधांशुं स्तौत्यमुं तु विरलो हि विवेकः ŚrīKaC. 11. 54; Subhāṣi. 1121; धर्मो निरवकाशोऽयं सावकाशः सदान्तकः। बलाबलं स्वयं तेषु विचारय सुलक्षणे ŚāliC. 3. 33; **3A** name of an exorcising rite (*abhicāra*) संदंशानुस्तोमाविषुवज्रौ श्येनाजिरौ मृत्य्वन्तकौ क्षुरवपिशीर्षच्छिदौ महः श्येनश्चाभिचरणीयाः ŚāṅkhāŚS. xiv. 22. 4; **3B** name of a weapon या निर्वृतिस्तनुभृतां तव पादपद्मध्यानाद्भवज्जनकथाश्रवणेन वा स्यात्। सा ब्रह्मणि स्वमहिमन्यपि नाथ मा भूत्किं त्वन्तकासिलुलितात्पततां विमानात् BhāgP. iv. 9. 10; **4Ai** epithet of Agni अग्निम् ...। उवाच वचनम् ...। त्वं कर्ता चान्त एव च (v.l. कर्ता चान्तक एव च) MahāBhā. i. 7. 18; (अग्नेः नामानि) भस्मक्षयान्तकहरज्वलनाग्निहुताशनाः MṛgendraT. i. 13. 126; **4Aii** epithet of Garuḍa गरुडं वाग्भिरस्तुवन्। ... देवाः ...। त्वमुत्तमः ... त्वमन्तकः सर्वमिदं ध्रुवाध्रुवम् MahāBhā. i. 20. 12; **4Aiii** epithet of Viṣṇu जीवः ... अन्तकः (इति ... केशवस्य ... नाम्नां सहस्रम्) MahāBhā. xiii. 135. 68; विष्णुः ... एषोऽन्तकः पुरा भूत्वा ...। जघानैकार्णवे घोरे तावुभौ मधुकैटभौ HariVaṁ. 38. 18; नमस्ते ... जनार्दन ...। त्वमिन्द्रः ... त्वमन्तकः BṛNāraP. 11. 36; **4Aiv** epithet of Śiva त्वं नेताप्यन्तको मतः। ... नाम्नामष्टसहस्रेण स्तुतवान् वृषभध्वजम् VāyuP. i. 30. 236; शिवाय रुद्ररूपाय ... नमः ... तारकायान्तकाय च LiṅgaP. ii. 21. 17; मनो वै रुद्र ओतं च प्रोतं चेति प्रतीयते। न चैतच्छ्रुतीनां विष्णुविषयत्वम्। अन्तकः कृत्तिवासाः पिनाकीत्यादिरुद्रलिङ्गात् TattvPrakā. 42A. 12 (*on* i. 3. 1); **4Av** deity in Śrāddha अन्तकः ... श्राद्धे देवः AgniP. 359. 14; **4Avi** Saturn नमस्ते रौद्रदेहाय नमस्ते चान्तकाय च। ... शनैश्चर नमोऽस्तुते SkandP. vi. 174. 78; **4Avii** Sun अनन्तः (v.l. अन्तकः) कपिलो भानुः ... सूर्यस्य ... नाम्नामष्टशतम् BrahmP. 33. 42; **4B** one of the presiding deities of different worlds, i.e. Lokeśa or Lokapāla अथ लोकेशमन्त्राणां शास्त्राणां लक्षणं शृणु। ... शिखिनश्चान्तकस्यैव द्वे बीजे परिकीर्तिते JayāS. 7. 70; शिखरत्रयं च मेरौ ...। तेषामधः शतमखज्वलनान्तकानां रक्षोऽम्बुपानिलशशीशपुराणि चाष्टौ Golā. 184, 24 (1. 36) (comm. इन्द्रादिलोकपालानां पुराणि); **4Ci** banner of Indra इन्द्रध्वजस्य ... मन्त्रानेतान् पठेत् ...। त्वमन्तकः सर्वहरः BṛSaṁ. 43. 54; **4Cii** one of the Kṣetrapālas सिद्धेयश्चैव वलिकः ... विघ्नहारी तथान्तकः। ... नौमि स्वःक्षेत्रपालकान् SkandP. i (2). 62. 27; **4D** lord or master of nether-world or hell पुण्यकर्मफलं स्वर्गो नरकस्तद्विपर्ययः। तयोर्द्वावधिपौ धात्रा कृतौ शतमखान्तकौ SkandP. iii (3). 21. 26; **5A** name of a disease चतुर्विधो भवेद्दोषो वातरक्तसमुद्भवः। गन्धदोषेण जायन्ते नामान्येषां पृथक्पृथक्। क्षुद्रतश्चान्तको घोरः अथवान्या मसूरिका HārīS. iii. 34. 2; **5B** name of a type of fever रुद्रस्य क्रोधजो ह्येष नामभिर्बहुभिर्ज्वरः। अन्तकः सर्वभूतानां क्षयं नयति दारुणः Hastyāyur. 56. 17 (1. 9); ज्वरगणे ... प्राक्संधिगोऽथान्तकः BhāvPra. (Bhā.) 8 (1). 492; हिक्काश्वाससदाहमोहसहिता देहेऽतिसंतप्तता वैकल्यं च वृथा वचांसि मुनिभिः संकीर्तितः सोऽन्तकः BhāvPra. (Bhā.) 8 (1). 501; अन्तर्दाहो दण्डपातोऽन्तकश्च। ... भेदा एते संनिपातज्वरस्य

अन्तकाल (anta-kāla) *m.* **1A** time of death, last stage (of life) वैवस्वतो व्यापृतः सत्रहेतोस्तेन त्विमे न म्रियन्ते मनुष्याः। तस्मिन्नेकाग्रे कृतसर्वकार्ये तत एषां भवितैवान्तकालः MahāBhā. i. 189. 7; अन्तकालमिव प्राप्तं मेनिरे वीक्ष्य सैनिकाः MahāBhā. vii. 164. 116; शक्तिं सोऽक्षिपद्गिरिजात्मजः ...। तारकस्यान्तकालाय अभाग्यस्य दशामिव SkandP. i (2). 32. 169; ऋषङ्गुः ...। अन्तकालं ततो दृष्ट्वा पुत्रान्वचनमब्रवीत् VāmaP. 39. 18; महतामन्तकालोऽपि पर्वणे न पुनः शुचे TriṣaŚaPuC. iv. 1. 865; अन्तकालदुष्कर्मविपाकताडनायाः वैरिणि स्वामिनीतयेत्युक्तकरणे संबन्धः Kāvyānu. (He.) 262. 6; वियोगिनीनाम् ... पुंस्कोकिलेनाधिजगेऽन्तकालः ŚrīKaC. 6. 32; यद्वान्तकालः प्राणस्य वियोगोऽस्तु प्रसिद्धितः। तस्मिन्कालेऽपि न भ्रान्तेर्गतायाः पुनरागमः PañcDa. 2. 105; अन्तकोऽपि हि जन्तूनामन्तकालमपेक्षते KaliViḍ. 51; [Loc.] at the time of death, at the last stage (of life) इममात्मानमन्तकाले सर्वे प्राणा अभिसमायन्ति BṛĀraU. iv. 3. 38 (Śaṅ. मरणकाले); यदन्तकाले भूतानाम् एक एव नयत्यसून्। तेनासुनीतिरुक्तोऽयम् BṛDe. 2.54; अन्तकाले च संवासं यया गन्तासि कान्तया। ... सैव त्वामनुयास्यति MahāBhā. i. 109. 29; i. 189. 8; नीडं शकुन्ता इव जातपक्षाश्छन्दांस्येनं प्रजहत्यन्तकाले MahāBhā. v. 35. 35; v. 43. 3; v. 44. 16; एषा ब्राह्मी स्थितिः पार्थ ...। स्थित्वास्यामन्तकालेऽपि ब्रह्मनिर्वाणमृच्छति MahāBhā. vi. 24. 72 = BhagGī. 2. 72 (Śaṅ. अन्त्ये वयस्यपि ब्रह्मनिर्वाणम् ... मोक्षम् ... गच्छति); अन्तकाले च मामेव स्मरन्मुक्त्वा कलेवरम्। यः प्रयाति स मद्भावं याति MahāBhā. vi. 30. 5 = BhagGī. 8. 5 (Śaṅ. मरणकाले); (भीमसेनः) बहुभिः समयोधयत्। अन्तकाले प्रजाः सर्वा दण्डपाणिरिवान्तकः MahāBhā. vi. 296* (8); viii. App. I. 37 (5); रावणस्यान्तकाले च रथेनैन्द्रेण राघवः। निजघान दुराचारं रावणम् MahāBhā. xii. 228* (8); xii. 63. 21; xii. 207. 25; xii. 210. 13; xii. 210. 25; शृणु नामसमुद्देशम् ...। इदं ज्ञात्वान्तकालेऽपि गच्छेद्धि परमां गतिम् MahāBhā. xiii. 17. 18; xiii. App. I. 13 (27); xiii. App. I. 15 (4270); अन्तकाले न युक्तं हि अपत्यादिपरिग्रहम् MahāBhā. xv. 89* (4); (भरतम्) अभिपेतुस्ततः सर्वे तस्यामात्याः शुचिव्रतम्। अन्तकाले निपतितं ययातिमृषयो यथा Rāmā. ii. 71. 10; ii. 98. 51; (चकार ... स्वरम्। सदृशं राघवस्यैव) रावणस्य प्रियं कुर्वन्नन्तकाले निशाचरः (मारीचः) Rāmā. iii. 813*; iii. 819* (1); आ अन्तकाले मनुष्याः किमपि पश्यन्ति Avimā. 4. 12 (13); 4. 12 (21); नागरीयोषितां मध्ये देवकी पुत्रगर्द्धिनी। अन्तकालेऽपि पुत्रस्य द्रक्ष्यामीति मुखं स्थिता VisṇuP. v. 20. 29; BrahmP. 193. 28; कुलनिष्ठानां कौलिकानां महात्मनाम्। ददामि परमं ज्ञानं चान्तकाले न संशयः KulārT. 2. 75; अन्तकाले तु पुरुष आगते गतसाध्वसः। छिन्द्यादसङ्गशस्त्रेण स्पृहाम् BhāgP. ii. 1. 15; i. 18. 4; सोऽन्तकाले प्राप्ते सत्यात्मानमात्मनः प्राप्तिद्वारं याचते ĪśopBh. 18. 17 (*on* 15); एका सुषुम्ना नाम (नाडी)। तया अन्तकाले हृदये आत्मानं वशीकृत्य योजयेत् KāṭhUBh. 179. 12 (*on* 6. 16); (योगाच्चलितमानसः। ... कां गतिं कृष्ण गच्छति) अन्तकाले च चलितं मानसं मनो यस्य सः चलितमानसः GītāBh. (Śaṅ.) 205. 15 (*on* 6. 37); 235. 17 (*on* 8. 6); छन्दांसि अन्तकाले मरणकाले एनम् ... प्रजहन्ति ... न पुरुषार्थाय भवन्तीत्यर्थः SanatBh. 240. 9 (*on* 2. 5); नायाति प्रत्यगात्मा प्रजननसमये नैव यात्यन्तकाले ŚatŚlo. 28; भवाम्भोनिधिं ते वितीर्त्वान्तकाले हरेरालयं शाश्वतं प्राप्नुवन्ति PāṇḍuA. 9; यदावर्णयत्कर्णमूलेऽन्तकाले शिवो राम रामेति रामेति काश्याम्। तदेकम् ... भजेऽहम् ŚrīRāmaBhuSt. 3; न कार्यान्तकाले मनागप्युपेक्षा Subrahma. 22; न तपत्यन्तकाले TaiUBhāVā. 192. 6 (2); अन्यारब्धेऽप्यन्तकाले विद्यास्त्विति चेत् तन्न IṣṭaSi. 75. 20; ब्रह्मनाडी ... तयैवान्तकाले निर्गमनं भवति सोऽयं ब्रह्मपथ उच्यते BrahmSūBh. (Bhā.) 232. 9 (*on* iv. 2. 16); देहे देहभृतां वर। अन्तकाले स्मरन्मां च मद्भावं यात्यसंशयः AgniP. 380. 16; अन्तकाले च कृष्णेति स्मृत्वा मामेति SkandP. ii (5). 15. 39; v (1). 32. 69; अन्तकाले तु संप्राप्ते ... प्राणापानेष्ववस्थितः ...। स जीवः नाभ्यधिष्ठानश्चाल्यते मातरिश्वना VisṇuDhaP. ii. 116. 7; बुद्धिर्बलाच्चलति मे किमहं करोमि। जानन्नपि प्रतिमुहूर्तमिहान्तकाले कान्तेति वल्लभतरेति ममेति धीरा CaurPañ. 27; अन्तकाले समायाते लुब्धकोऽपि शिवाय वै। उपहारप्रदानाय दृष्टवान्पार्श्वतो घटम् PadmP. iv. 106. 32; जगाम स मुनिः ... तारकेश्वरम्। यत्रान्तकाले भगवाञ्ज्ञानं तत्संप्रयच्छति SaurP. 6. 8; 38. 7; अन्तकाले महद्रूपं समास्थाय निजं खलः (छायादैत्यः)। चूर्णयामास वृक्षान् GaṇeP. ii. 93. 33; ii. 115. 32; अन्तेऽन्तकाले यं यं वापि भावं स्मरन् कलेवरं त्यजति तं तं भावमेव मरणानन्तरमेति GītāBh. (Rā.) 413. 7 (*on* 8. 6); तद्भार्या चान्तकाले सा स्नुषायै तदवोचत KathāSaSāg. iii. 5. 34; कथयति भगवान् इहान्तकाले ... प्रबोधम् PraboCan. 2. 13 (25. 16); 5. 16 (92. 6); करोतीत्यन्तकालेऽपि पश्चात्तापं जडो जनः TriṣaŚaPuC. iii. 1. 76; iv. 6. 54; राजन्नेकावताराणामन्तकालेऽपि नाकिनाम्। तेजःक्षयादिच्यवनलिङ्गान्याविर्भवन्ति न PariPar. 1. 266; संस्कारमात्मोचितमन्तकाले प्रवर्तयन्ती कृपयेव वात्या PṛthvīVi. 6. 7; आत्मानमन्तकाले सर्वे प्राणा अभिसमागच्छन्ति VedāntKa. 531. 13 (*on* iv. 2. 4); निष्क्रमणस्यान्तकाले पुरुषेण कर्तुमशक्यत्वात् स्मृत्यविभ्रंशेन तत्सौकर्यायानुदिनं स्मरणं कार्यम् ŚrutaPra. ii. 495. 16 (*on* iii. 3. 31); अन्तकाले तु यच्चित्तेऽभूदिदं सुकुलेन किम् PārśvC. 7. 741; अन्तकाले विशत्येष जङ्गमाजङ्गमं जगत् Hastyāyur. 56. 19 (1. 9); वेदान्तसंसिद्धं सदद्वैतं न बाध्यते। अन्तकालेऽप्यतो भूतविवेकान्निर्वृतिः स्थिता PañcDa. 2. 109; प्रत्यासन्ने चान्तकाले तेन पद्यमिदम् ... श्रुतम् PuruṣPa. 160. 2; अन्तकालेऽपि दृष्ट्वा त्वां मुक्तोऽहं रघुसत्तम AdhyāRā. iii. 8. 35; अन्तकाले जीवोपगमश्रवणात् तन्निवेश इति वाच्यम् ŚivārkaMaDī. ii. 452. 23 (*on* iv. 2. 4); ब्रह्मन् मद्भक्तियुक्तो यद्यन्तकालेऽर्चिषा व्रजेत्। उत्सवो जायते भूयानूर्ध्वलोकनिवासिनाम् BṛBrahmaS. iii. 3. 19; विश्वं कृष्णाद्वितीयं भयचकितधिया ध्यायतश्चान्तकाले। ज्योतिर्ज्योतिःस्वरूपे भगवति विशति KaṁVa. 6. 45; कृष्णः कृष्णः कृष्ण इत्यन्तकाले जल्पन् जन्तुर्जीवितं यो जहाति। आद्यः शब्दः कल्पते तस्य मुक्त्यै RasiJī. Add. after 1391 (F. N. 5) (60. 24); राजपुत्री ... अन्तकाले कोपमनालोच्य मृत्वा ईशानेन्द्रस्य कलत्रं जातम् KathāK. 85. 19; **1B** time of end or destruction यन्माब्रवीत् विदुरो द्यूतकाले त्वं पाण्डवाञ्जेष्यसि चेन्नरेन्द्र। ध्रुवं कुरूणामयमन्तकालः MahāBhā. iii. 48. 40; iii. 225. 24; viii. 362* (1); **1C** time of annihilation or dissolution प्राप्तोऽन्तकालो लोकानाम् HariVaṁ. 61. 20; शब्दस्यापा(न्या?)र्थबोधकत्वं दृष्टम् - यथा कलिमार्यादिशब्दानां द्रविदा(डा?)र्यदेशयोर्यथाक्रममन्तकालवर्षोपसर्गाद्यभिधायिनां तन्न प्राप्नोति, नियतशक्तिकत्वात् TattvSaṁPañ. 710. 11 (*on* 2653-55); [Loc.] at the time of annihilation or dissolution रुद्रः ... संचुकोचान्तकाले संसृज्य विश्वा भुवनानि गोपाः ŚvetāU. 3. 2 (Śaṅ. प्रलयकाले); AŚiraU. 5; VaṭuU. 317. 3; निघ्नन्तमेकं कुरुयोधमुख्यान् काले महाकक्षमिवान्तकाग्निः (v. l. अग्निर्महाकक्षमिवान्तकाले) MahāBhā. iii. 120. 10; iii. 187. 32; v. 97. 19; अद्यैव पश्य दुर्धर्षं पात्यमानं महाव्रतम्। (भीष्मम्) तारापतिमिवापूर्णमन्तकाले यदृच्छया MahāBhā. vi. 102. 69; vii. 64. 54; क्रुद्धो महेष्वासस्तत्सैन्यं प्राद्रवच्छरैः। अन्तकाले यथा क्रुद्धः सर्वभूतानि प्रेतराट् MahāBhā. viii. 10. 16; viii. 54. 7; (द्रौणिः) क्रोधामर्षविवृतास्यो लोहिताक्षो बभौ बली। अन्तकाले यथा क्रुद्धो मृत्युः किंकरदण्डभृत् MahāBhā. viii. 530* (2); विष्णुः ...। अन्तकाले जगत्पीत्वा कृत्वा तोयमयं वपुः। लोकमेकार्णवं चक्रे HariVaṁ. 30. 10; VāyuP. ii. 35. 15; आश्रित्य तमसो वृत्तिमन्तकाले तथा पुनः। रुद्रस्वरूपो भगवानेकांशेन भवत्यजः VisṇuP. i. 22. 28; आदिदेवोऽसि देवानाम् ...। सर्गस्थित्यन्तकालेषु त्रिधा भेदेन तिष्ठसि MārkP. 106. 48; यस्त्वन्तकाले व्युप्तजटाकलापः ... नृत्यति ... तमसह्यतेजसम् ... करालदंष्ट्राभिरुदस्तभागणं स्यात् BhāgP. iv. 5. 10; अन्तकाले स्वयम् ... परमेश्वरः। तमोगुणं समाश्रित्य रुद्रः संहरते जगत् KūrmaP. 47. 8 (1. 4); स भगवान् ...। अन्तकाले हरो भूत्वा जगत् संहरते पुनः VisṇuDhaP. i. 2. 18; यः ... संहरत्यन्तकाले कस्तस्यान्यो भवति सदृशः श्रीमहाकालमूर्तेः EI. xxv. 175. 3; सर्वमन्तकाले कालाग्निसूर्य उस्रैरनुज्ञाता ह्ययमात्मास्य सर्वस्य स्वात्मानं ददाति NṛsiṁhoTāU. 2; अन्तकाले च संप्राप्ते कालो भूत्वातिदारुणः। त्रैलोक्यं नाशयाम्येकः BrahmP. 56. 42; 238. 21; प्रधानम् ...। अष्टौ विकारानपि चादिकाले सृष्ट्वा समश्नाति तथान्तकाले ŚivaP. vii. 10. 47 (513A. 5); अन्तकाले त्वमेवैकः संकर्षणमुखात्पुनः। उत्थायानलरूपेण त्रैलोक्यं प्रतपिष्यसि BṛBrahmaS. i. 2. 88; **2** the word *antakāla* 'अन्तकाले च मामेव' इत्युक्तचरमदेहावसानसमये ... अन्तकालशब्दस्य चरमदेहावसानपरत्वं स्मृतिप्रसिद्धम् ŚrutaPra. ii. 625. 22 (*on* iv. 3. 15)

अन्तकालज्ञा (antakāla-jñā) *adj.* (*f.*) aware of the time of dissolution or annihilation लोकानामन्तकालज्ञा काली नयनशालिनी। उपतस्थे महात्मानं निद्रा HariVaṁ. 40. 8.

अन्तकालतीक्ष्णांशुकोटि (antakālatīkṣṇāṁśu-koṭi) *f.* crores of Suns at the time of annihilation तस्यान्तः काञ्चनं धाम कालाग्नेस्तावदेव हि। यत्रान्तकालती-

क्षणांशुकोटितेजास्तथाविधैः। रुद्रैरास्ते MṛgendraT. i. 13. 10.

अन्तकालनिद्रा (antakāla-nidrā) *f.* sleep at the time of death or last stage (of life) स राजा ... अन्तकालनिद्रोदयादीषन्निमिषितस्य ... नयनयुगलस्य ... प्रभाप्रवाहेण ... क्षीरसागरमुद्रिरन्तम् ... वैमानिकमपश्यत् TilaMañ. 37. 10.

अन्तकालप्रवृद्ध (antakāla-pravṛddha) *adj.* increased at the time of death अन्तकालप्रवृद्धस्य रजसस्तु फलं फलसाधनकर्मसङ्गिकुले जन्म GītāBh. (Rā.) 593. 16 (*on* 14. 16); 593. 19 (*on* 14. 16)

अन्तकालय (antakālaya) *m., n.* abode of the god of death हनूमन्तं न पश्यामि स मन्ये पुण्यवान् गतः। प्रत्यानेतुमसूनेषां सशरीरोऽन्तकालयम् RāmC. 35. 71; दमयन्त्यपि शापवह्निना गमयामास तमन्तकालयम् Nalābhyu. 7. 65.

अन्तकालयप्राप्त (antakālaya-prāpta) *adj.* who has reached the abode of the god of death भो व्याधिसिन्धो। तव पितुः आतुरान्तकस्य अन्तकालयप्राप्तस्य कुशलम् Hāsyārṇa. 1. 33 (3)

अन्तकालशिखिन् (antakāla-śikhin) *m.* fire (blazing) at the time of annihilation आलिलिङ्गुरथ ...। ताम् ... पुरीमरेः तेऽन्तकालशिखिनः कपिव्रजाः RāmC. 29.7.

अन्तकालशिखिलोल (antakālaśikhi-lola) *adj.* shaking, i.e. blazing like the fire at the time of annihilation तद्विलोक्य हरिसैन्यमन्तिकादन्तकालशिखिलोलमापतत् RāmC. 29.14.

अन्तकालसमय (antakāla-samaya) *m.* advent of the time of annihilation संह्रादयन्तश्च तथा निर्घाताश्चापतन्क्षितौ। यथान्तकालसमये सुघोराः स्युस्तथा नृप MahāBhā. ix. 45.62.

अन्तकालसमुद्भव (antakāla-samudbhava) *adj.* arising at the time of death तस्य तं मतिसंमोहनमन्तकालसमुद्भवम्। तातस्य समतिक्रान्तं प्रत्याहर्तुं त्वमर्हसि Rāmā. ii. 2225* (1)

अन्तकालाग्निधूम (antakālāgni-dhūma) *m.* smoke produced from the fire at the time of annihilation विकटकरटिभारभ्रष्टभूपृष्ठरन्ध्रादुदित इव समन्तादन्तकालाग्निधूमः EI. ii. 185. 18.

अन्तकालान्तकोपम (antakālāntakopama) *adj.* resembling the god of death at the time of annihilation तमन्तकमिव क्रुद्धमन्तकालान्तकोपमम्। ये ये ददृशिरे तत्र विसंज्ञाः प्रायशोऽभवन् MahāBhā. viii. 15. 29.

अन्तकालापद् (antakālāpad) *f.* calamity in the form of the time of death क्षणादेव त्यजत्यन्तकालापदि ततोऽधमम्। स्वजनस्तु ममत्वस्यानुरूपं चेष्टते सदा SamarāSaṁ. 9.86.

अन्तकालार्कदीप्ता (antakālārka-dīptā) *adj.* (*f.*) blazing like the Sun at the time of annihilation शक्तिम् ... समायान्तीमन्तकालार्कदीप्ताम्। छित्त्वा त्रिधा पातयामास भूमौ MahāBhā. v.182. 6.

अन्तकालार्कधाम्नी (antakālārka-dhāmnī) *adj.* (*f.*) lustrous or blazing like the Sun at the time of annihilation शक्तिम् ... समायान्तीमन्तकालार्कदीप्ताम् (v. l. °र्कधाम्नीम्)। छित्त्वा त्रिधा पातयामास भूमौ MahāBhā. v.182. 6.

अन्तकालार्करूपा (antakālārka-rūpā) *adj.* (*f.*) of the form of the Sun at the time of annihilation शक्तिम् ... समायान्तीमन्तकालार्कदीप्तां (v.l.°र्करूपाम्)। छित्त्वा त्रिधा पातयामास भूमौ MahāBhā. v.182. 6.

अन्तकाश (antakāśa) *adj.* belonging to the southern direction सौम्यान्तकाशं बलनं ग्रहस्य युक्तायनांशस्य तु कोटिजीवा KaraṇaKu. 4. 15 (21)

अन्तकाशादितस् (antakāśādi-tas) *adv.* as beginning from the southern direction अन्तकाशादितश्चाथ नैर्ऋत्यान्तं तु शङ्कवः। रोपणीयाः JayāS. 24.53.

अन्तकाश्रिता (antakāśritā) *adj.* (*f.*) inhabited by the god of death आसन्नराक्षसा दुष्टा दक्षिणाप्यन्तकाश्रिता KathāSaSāg. iii. 4. 59.

अन्तकासिलुलित (antakāsi-lulita) *adj.* tossed up by the sword of the god of death सा ... किं त्वन्तकासिलुलितात्पतितां विमानात् BhāgP. iv. 9. 10.

अन्तकास्पद (antakāspada) *n.* **A** abode of Kali समेयिवान्रघुवृषभः स्वसैनिकैः स्वमन्दिरं शिथिलधृतिर्निवर्तितः। मनोगतं गुरुमृषिशापमुद्वहन्क्षयानलं जलधिरिवान्तकास्पदम् RaghuVa. Add. after 9. 82 (NANDARGIKAR Ed.) (Vallabha. कलेर्निलयम्); **B** abode of the god of death (पिण्डम्) निनयेदन्तकास्पदम् PauṣkS. 27. 401; दुष्कृतिनो नराः ...। प्रयान्ति सांप्रतं ते वै विमानैरन्तकास्पदम् PauṣkS. 36.96.

अन्तकास्त्र (antakāstra) *n.* name of a missile presided over by Yama अन्तकास्त्रं ससर्ज ... भण्डदानवः BrahmāṇḍP. iii. 29. 66.

अन्तकाह्वानसंज्ञावस्त्र (antakāhvānasañjñā-vastra) *n.* cloth signaling the summons of Death दूरतोऽप्यन्तकाह्वानसंज्ञावस्त्रमिवाथ तम्। भृशमुद्भ्रमयामास दण्डं तक्षशिलापतिः TriṣaŚaPuC. i. 5. 674.

अन्तकाह्वानाक्षर (antakāhvānākṣara) *n.* letter of the summons of Death हर्षः ... अन्तकाह्वानाक्षरैरिव सभयभिषग्दृष्टैररिष्टैराविष्टम् ... पितरमद्राक्षीत् HarṣaC. 218. 14.

अन्तकि (antaki) *m.* wind वायौ ... अन्तकिः क्षिपणुर्मेको ध्वजः Abhidhā-Cin. App. to 1107 (3) (439. 14)

अन्तकुल (anta-kula) *n.* family of low caste 'इहैव' प्रत्यक्षे मानुष्यके भवे ... प्रत्याजायत इति संबन्धः, केषु कुलेषु ... 'यानि इमानि' ... प्रत्यक्षाणि भवन्ति, तद्यथा अन्तकुलाणि वरुटछिंपकादीनां प्रान्तकुलानि ... अनीश्वराणि कृपणकुलानि SthānṬ. 420B. 6.

अन्तकृत् (anta-kṛt) *adj.* **1Ai** who or which causes or brings about an end (to life), who or which destroys or kills पूर्णप्रतिज्ञ एवायं शत्रूणामन्तकृत्तथा MahāBhā. ix. App. I. 2 (17); वैरं शतगुणं पश्य ममेदं जीवितान्तकम् (v.l. °कृत्)Rāmā. iii. 60. 34; नीपानामन्तकृन्नृपः HariVaṁ. 15. 28; अपस्मार इति प्रोक्तस्ततोऽयं व्याधिरन्तकृत् SuśruS. vi. 61. 3; सेतुर्येन महोदधौ विरचितः क्वासौ दशास्यान्तकृत् ŚatTrayī. 848; (कल्किः) प्रवृत्तचक्रो बलवान् म्लेच्छानामन्तकृद्बली VāyuP. ii. 36. 109; BrahmāṇḍP. i. 31. 84; LiṅgaP. i. 40. 56; (कालः) आविशत्यप्रमत्तोऽसौ प्रमत्तं जनमन्तकृत् BhāgP. iii. 29. 39; तथान्तकृद्दशादङ्गात् मुनीनन्तकृतो दश। तीर्थं प्रति विदामासुः MahāP. 34. 142; इदं शरभाकारम् ... रूपं पिनाकिनः ...। पठेत् प्रतिष्ठाकालेषु शिवसंनिधिकारणम्। चोरव्याघ्राहिसिंहान्तकृतो राजभयेषु च LiṅgaP. i. 96. 125; पूर्वशत्रुर्जातः खलु तवान्तकृत् ĀdiP. 21. 37; भस्मसादभवद्दैत्यो दुष्टचेष्टितमन्तकृत्। मुकुन्दोऽपि स्थितस्तत्र GaṇeP. ii. 39. 23; केसरीवान्तकृत्तेऽसौ राजकुञ्जर नान्यथा PāṇḍaC. 2. 258; 1.423; अतिधारानिषुनस्य वर्षतः शुचिनामुना। शङ्के द्वेषो भवेन्नोचेत्कथमस्यायमन्तकृत् HammīMaKā. 13. 209; छिद्रम् ... शङ्खे ...। अत्यायतं चातिह्रस्वं कृशं स्थूलं नृपान्तकृत् ŚilpaRa. ii. 3. 3; भूतानामन्तकृत्कालः कालोऽन्यः कलनात्मकः SiddhāTaVi. 2. 11; (used as noun) (one) who is a destroyer or killer मन्द जातः खलु तवान्तकृत् BhāgP. x. 4. 12; **1Aii** which cures कल्कं वालुकयन्त्रपाचितमिदं सर्वज्वरस्यान्तकृत् RasRaSa. 12. 44; **1Aiii** who removes राजा श्रीगुहिलान्वयामलपयोराशौ स्फुरद्दीधितिध्वस्तध्वान्तसमूहदुष्टसकलव्यालावलेपान्तकृत्। श्रीमानित्यपराजितः EI. iv. 31.4; **1B** who meets with death, i. e. who dies नास्तीह दुष्कृतकृताम् ... काचिद्विशेषगतिरन्तकृतां हि काश्याम् SkandP. iv. 30. 94; जन्मनैकेन मुच्यन्ते काश्यामन्तकृतो जनाः SkandP. iv. 32. 120; स सूरिः ...। क्षपकश्रेणिमारूढोऽन्तकृत्केवल्यजायत PariPar. 6. 167; अन्तकृत् केवलीभूय राजर्षिः प्राप निर्वृतिम् MalliC. 7.968; **1C** who destroys, who ruins भृत्यः सुज्ञेश्चित्रथोऽप्यास्थानद्विजभूः शठः। प्रातिलोम्याद्वहेर्भर्तुर्मन्त्रैरासीच्छ्रियोऽन्तकृत् RājTa.(Ka.) 8.1620; **2** who causes annihilation or dissolution चतुर्मुखस्तु ब्रह्मत्वे कालत्वे चान्तकृद्भवः BrahmāṇḍP. i. 4. 17; (ब्रह्मणः तनुः) तामसी चान्तकृद् या तु तदंशो विष्णुरुच्यते BrahmāṇḍP. ii. 3. 85; स रुद्रः ...। एको हि भगवान्नाथः प्रभवश्चान्तकृत् BrahmāṇḍP. iii. 2. 283; लोकानामन्तकृत्कालः SūrySi. 1. 10; यः समस्तादिरेको नो यस्यान्तो योऽन्तकृत्तं नतोऽस्मि SkandP. iv. 95. 61; प्रपालयेद् रुद्रवपुस्तथान्तकृद्गदाधरो जयतु VarāP. 7. 36; अहम् ... जगद् व्याप्य व्यवस्थितः। ... आदिमध्यान्तकृत्सदा BhaviP. 230A.9 (i. 154.15); स हि सर्वलोकध्वान्तान्तकृद्दिरिशहस्तपवित्रितात्मा Subhāṣi. 578; **3** who bestows the fruit, i.e. result (prescribed by the Veda) वेदान्तकृद् वेदानामिन्द्रं यजेत ... इत्येवमादीनामन्तः फलम् ... अन्तकृत् फलकृत् वेदोदितफलस्य प्रदाता चाहमेवेत्यर्थः GītāBh. (Rā.) 604.20 (*on* 15.15); **4** (Jain.) who causes the end or cessation (of worldly existence) परमजिनपदानुरक्तधीः भजति पुमान् य इमं क्रियाविधिम्। सः ... जननजरामरणान्तकृद् भवेत् MahāP. 39.210; मरुदेव्यथ। अन्तकृत्केवलित्वेन प्रपेदे पदमव्ययम् TriṣaŚaPuC. i. 3. 530.

अन्तकृत् (anta-kṛt) *m.* **1** Death वर्जयेद् वज्रमुत्सृष्टं(v.l. अन्तकृन्मर्त्यं) वर्जयेदन्तकश्चिरम् Rāmā. v. 19. 19; **2** annihilator एको ब्रह्मान्तकृच्चैव पुरुषश्चेति ते त्रयः VāyuP. ii. 5. 98; अव्यक्ताज्जायते तस्य मनसा यद्यदिच्छति। चतुर्मुखस्य ब्रह्मत्वे कालत्वे चान्तकृद्भवेत् BhaviP. 130 A. 17 (i. 77. 7): **3** god of death, i.e. Yama नृपः प्रवसन्। पुरुहूतदिशं यदि वान्तकृतः पुरुहूतयमप्रतिमो भवति YogYā. 4. 34; परिभवं स्वं शङ्कमानोऽन्तकृद्द्रष्टुं न क्षमते प्रजाः EI. ii. 42.10; **4** (Jain.) one of the thousand and eight epithets of Jina (*lit.* causing end or cessation of worldly existence) नाम्नामष्टसहस्रेण तोष्टुमः ...। अन्तकृत् कान्तगु कान्तः MahāP. 25. 168.

अन्तकृत (anta-kṛta) *adj.* who has caused the end or cessation (of worldly existence or life) अन्तो भवस्य कृतो येन सोऽन्तकृतः ... परिनिर्वृतः कर्मकृतविकारविरहात् स्वस्थीभूतः SthānṬ. 36A. 7 [NānārthaSaṁ. 6.59 gives *antakṛta* as the meaning of *anvaya*]

अन्तकृत्किंकरकर्मन् (antakṛtkiṅkara-karman) *n.* action of the servant(s)

of the god of death, i.e. Yama किं छिद्रकर्णस्त्रुवकर्णपञ्चकर्णान्तकृत्किंकरकर्मघोरात्। रणादमी नीवृत एव मर्मवित्कण्टकेभ्यो निरुपानहो नु DvyāśraKā. 6. 66.

अन्तकृत्केवलिन् (antakṛt-kevalin) *adj.* (used as noun) (one) who possesses the absolute knowledge causing the end or cessation (of worldly existence) अन्तकृत्केवली भूत्वा ... मुक्तिरामामवाप सः BṛKathāK. 57. 155; अन्तकृत्केवली भूत्वा निर्वाणं गतवानसौ BṛKathāK. 139. 170.

अन्तकृत्य (anta-kṛtya) *n.* **A** last deed or act उदात्तमित्यन्तकृत्यं संचिन्त्य कितवा इव। राज्ये भजन्ते दीव्यन्तः क्षत्रियास्त्रासहीनताम् RājTa. (Ka.) 7. 1404; **B** last rite, i.e. funeral rite कृत्वा तस्यान्तकृत्यं निखिलमपि यथा युक्तिकोपप्रकम्पः। वेगादागादमुत्र स्वयमथ यवनैकावनोऽह्लावदीनः HammīMaKā. 11. 103.

अन्तकृत्सिद्ध (antakṛt-siddha) *m.* epithet of Jina (*lit.* Siddha who has caused an end or cessation of worldly existence) अन्तकृत्सिद्धेभ्यो नमो नमः MahāP. 40. 25(6)

अन्तकृद्दश (antakṛddaśa) *m.* title of a sacred Jaina text, pw.

अन्तकृद्दशा (antakṛd-daśā) *f.* (pl.) (Jain.) name of the eighth of the twelve sacred Aṅga texts of the Jainas (containing ten chapters) अधिकृतशिवान्तसुकृताः स्मरतोद्यैरन्तकृद्दशाः SiddhāĀSta. 17.

अन्तकेन्द्र (anta-kendra) *n.* last house, i.e. tenth mansion सौम्येष्वाद्यन्तकेन्द्रेषु परेष्वायधनत्रिषु। प्रभञ्जनो महायोगः शत्रुपादपभञ्जनः VasiS. 37. 210.

अन्तकेवलिन् (anta - kevalin) *adj.* who possesses the absolute knowledge causing the end (of worldly existence) विद्युन्माल्यभिधानः ... सुरः। ... च्युत्वायमत्रैव पुरे सप्तमेऽहन्यतो दिनात्। ऋषभेभ्यस्य तनयो जम्बूर्भाव्यन्तकेवली PariPar. 1.469; cf. **अन्तकृत्केवलिन्.**

अन्तकेश (antakeśa) *n.* name of phallus-emblem of Someśvara (*lit.* annihilating lord) सोमेश्वरस्य यल्लिङ्गमन्तकेशमुदाहृतम्। मह्यास्सागरसंयोगे तल्लिंगमुपलिङ्गकम् ŚivaP. iv. 1. 35 (350B.13)

अन्तकेश्वर (antakeśvara) *m.* name of the phallus - emblem of Siddhaliṅga (*lit.* lord of annihilation) अन्तकेश्वरसंज्ञं च लिङ्गं तद्वद्रदिक्स्थितम् SkandP. iv. 68. 69.

अन्तकोग्रव्याल (antakogravyāla) *m.* fierce serpent in the form of Death उत्पत्त्यध्वन्यशरण उरुक्लेशदुर्गेऽन्तकोग्रव्यालान्विष्टे विषयमृगतृष्यात्मगेहोरुभारः। ... पादौकस्ते शरणद कदा याति कामोपसृष्टः BhāgP. iv. 7. 28.

अन्तकोट (antakoṭa) *n.* name of some product of the carpenter's craft फेलिकानि पि क्रियन्ति अन्तकोटान्यपि क्रियन्ति अन्यानि च नानाप्रकाराणि वर्धकिभाण्डानि क्रियन्ति MaVastuAva. ii. 465.2 [DBHS.]

अन्तकोटरपुष्पी (antakoṭarapuṣpī) *f.* the plant *Convolvulus Argenteus* नीलिनी छगलान्त्री स्यादन्तकोटरपुष्प्यपि। ... स्यान्नीलपुष्पा तिलोपमा ParyāMu. 17.20; cf. **अण्डकोटरपुष्पी, अन्तःकोटरपुष्पी.**

अन्तकोटा (antakoṭā) *f.* name of some product of the carpenter's craft सुदर्शना या तत्र सर्वशोभना आसन्दिका या ... अन्तकोटा वा ... तं गृह्णामीति MaVastuAva. ii. 465. 13 [DBHS.]

अन्तकोठरपुष्पी (antakoṭharapuṣpī) *f.* the plant *Convolvulus Aargenteus* नीलिनी छगलान्त्री स्यादन्तकोटर(v.l. °कोठर) पुष्प्यपि। ... स्यान्नीलपुष्पा तिलोपमा ParyāMu. 17. 20; cf. **अण्डकोटरपुष्पी, अन्तःकोटरपुष्पी.**

अन्तकोपगमनोत्सव (antakopagamanotsava) *m.* festival (in the form) of approaching of the god of death अन्तकोपगमनोत्सवोचितप्रक्रियाविधिविशारदा इव। तेनुरन्त्रततिभिः पतत्रिणस्तोरणानि रणसीमशाखिषु RāmC. 29. 67.

अन्तकोपम (antakopama) *adj.* [*f.*–ā] **A** who resembles Death निषादान्बलवानुपागमद्बुभुक्षितः काल इवान्तको महान् (v.l. अन्तकोपमः) MahāBhā. i. 24. 10; राक्षसीगणः। नानाप्रहरणो घोरः समेयादन्तकोपमः Rāmā. v. 28. 22; केशवः। जग्राह वैष्णवं सोऽस्त्रं व्यादितास्यान्तकोपमम् HariVaṁ. 112.26; **Bi** who resembles the god of death, i.e. Yama जघ्निवान्कार्तवीर्यस्य सुतानेकोऽन्तकोपमः MahāBhā. iii.117.7; तत एनं महाबाहुर्बाहुभ्याममरोपमः (v.l. अन्तकोपमः)। ... भीमो निष्पिपेष महीतले MahāBhā. iii. 154.58; प्रविश्यैव तु राजेन्द्र क्षत्रियेन्द्रान्तकोपमः सत्यश्रवसमादत्त MahāBhā. vii. 44.3; vii.169.43; तमन्तकमिव क्रुद्धमन्तकालान्तकोपमम्। ये ये ददृशिरे तत्र विसंज्ञाः प्रायशोऽभवन् MahāBhā. viii. 15. 29; व्यादिदेश खरः क्रुद्धो राक्षसानन्तकोपमान् Rāmā. iii. 18. 17; अङ्गदेनैष संयातु लक्ष्मणश्चान्तकोपमः Rāmā. vi. 4. 16; vi. 21. 31; सकलत्राः सपुत्राश्च शस्त्रवन्तोऽन्तकोपमाः। ... विविषुर्गृहाणि ... ते MatsyaP. 131.2; दण्डकेतुः ...। पशुपक्षिमृगादीनां जन्तूनामन्तकोपमः BṛNāraP. 37. 31; निर्दहन्सर्वभूतानि ववृधे सोऽन्तकोपमः PadmP. v. 38. 103; मौनव्रतादिनियमच्छन्नक्रौर्योऽन्तकोपमः। करोत्यभ्यन्तरान् भिन्नान् मल्लः परमदाम्भिकः RājTa. (Ka.) 7. 1469; चौरोऽहमभवं पुरा। धनुर्बाणधरो नित्यं जीवानामन्तकोपमः AdhyāRā. ii. 6. 67; **Bii** which is resembling (the body of)) the god of death द्रौणिः कोपमयासीत् तन्वा च भयंकरोऽन्तकोपमयासीत् YudhiVi. 7. 136.

अन्तकोपान्तवर्तिन् (antakopānta-vartin) *adj.* being (always) in the vicinity of the god of death स्थाणौ कण्डूं विनीय प्रतिमहिषरुषेवान्तकोपान्तवर्ती। ... वरुणमुपगतः ... महिषः CaṇḍīŚ. 8.

अन्तकोरग (antakoraga) *m.* serpent in the form of Death यः कश्चनेशो बलिनोऽन्तकोरगात् प्रचण्डवेगाद् अभिधावतो भृशम्। भीतं प्रपन्नं परिपाति ... तमीमहि BhāgP. viii. 2. 33.

अन्तकोश (antakośa) *m.* name of a former Buddha स्निग्धगात्रः परमार्थसत्त्वः ... सुगन्धकायः अनन्तकोशः (v.l. अन्तकोशः) ... तेजगुप्तराजा MaVastuAva. i. 141. 11; cf. **अनन्तकोश.**

अन्तक्रिया (anta-kriyā) *f.* **i** (Buddh.) act of removing (sorrow) (दुःखस्य पर्यन्तमपश्यमानः प्रयुज्यते चैव करोति चैव) दुःखस्य पर्यन्तं न पश्यति ... दुःखस्यान्तक्रियायै सत्वानां करोति MaYānaSū. 96.1 (14.41 (7)); नाहमेकधर्ममप्यपरिज्ञायाप्रहाय दुःखस्यान्तक्रियां वदामि Sphuṭā. i. 4. 25 (*on* 1.1); **ii** (Jain.) act of causing the end or cessation (of worldly existence) अन्तो – भवान्तस्तस्य क्रिया अन्तक्रिया भवच्छेद इत्यर्थः SthānṬ. 98B. 10; अन्तक्रिया – भवस्यान्तकरणम् SthānṬ. 180B.5.

अन्तक्षण (ant-kṣaṇa) *m.* **A** moment of extreme limit or culmination अन्तक्षणप्राप्तानि क्षितिपवनपाथस्तेजोबीजानि ... नियतचरमोत्पादानामवनिजलानलाङ्कुराणां कारणं भवद्भिरभ्युपेयन्ते TātpaṬ. (Vā.) 556. 11 (*on* iii. 2. 14); **B** last moment (of life), moment of death अन्तक्षणस्त(?ण्णं त)तो भिक्षोः स्मर्यमाणः स चेतसाम्। विकासहेतुतां प्राप स्वस्थस्य मनसः पुनः RājTa.(Ka.) 8.2297; [Loc.] at the last moment (of life), at the moment of death हिरण्यवर्णां वसुधां तस्मिन्नन्तक्षणेऽपि सा। दृष्ट्वा मामब्रवीत् वत्से गृह्यताम् SamaMā. 1. 31; तैर्दयिताविलापः ... आकर्ण्यतेऽन्तक्षणे RājTa. (Ka.) 8.359; 8. 3329; राज्यं तृणमिव त्यक्त्वा ... संन्यासोऽन्तक्षणे मया। गृहीतस्तत्प्रभावेण जातोऽहं लान्तकाधिपः TriṣaŚaPuC. i. 1. 404.

[1] **अन्तग** (anta - ga) *adj.* [P. iii. 2.48; JaineVyā. 106.17 (*on* ii. 2. 46); CāndraVṛ. *on* i. 2.35; KāśiVṛ. *on* iii. 2.48; KātanVṛ. *on* iv. 3.47; PrakriKau. ii. 526.9; SiddhāKau. 495B.18 (*on* iii. 2.48)] **1Ai** who goes beyond or crosses the boundary or frontier (of the country) अथर्त्विजां वरणं विज्ञायते ब्राह्मणा ऋत्विजः ... न परिखातिक्रान्ता नान्तगा नान्त्यजाः BaudhŚS. i. 36. 8; ऋत्विजां धर्मः ... नान्तगं याजयेत् BaudhŚS. iii. 197.8; **1Aii** who traverses to the end (of earth) वीरान् ...। धरासमुद्रशैलानामन्तगान्प्रहिणोम्यहम् Bhaṭṭi. 7. 27; **1Bi** which exists at the end नवांशास्तथादिमध्यान्तगाश्चराद्येषु। सूतौ कुलमुख्यकरा द्वादश भागाः स्वराश्याद्याः Sārā. 3.13; शक्तिः स्वान्तः ... स्वयमत्रिः। साक्षो वाली तेऽन्तगयोगेश्वरिशब्दो वर्मास्त्रान्ते ठाविति गौरीमनुरुक्तः ĪśānŚiPa. i. 23. 48; **1Bii** which occurs at the last portion (of verse) आदिमध्यान्तगैः प्रासैरेकाद्यैश्च पदे पदे। छन्दोभिर्बहुभिर्गेया ओव्यः SaṁgīRa. ii. 333.5 (4.306); **2** who has reached the ends (of both the Vedas), i.e. who knows thoroughly well ब्राह्मे धनुषि चाचार्यं वेदयोरन्तरं (v.l. अन्तगम्) द्वयोः। युधि धुर्यम् ... द्रोणं मोहाद्युधा पार्थ यज्जिगीषसि तन्मृषा MahāBhā. v. 158. 14; v. App.I. 11 (7); यत्नेन भोजयेत् ... बह्वृचं वेदपारगम्। शाखान्तगमथाध्वर्युं छन्दोगं तु समाप्तिकम् ManuSm.3. 145; त्वमन्तगः सच्चरितो गुणानां त्वं पारगो ज्ञानमहार्णवस्य Rāvaṇā. 10.32; **3** which strikes or hits the end, i.e. aim or target दूरगैरन्तगैर्बाणैर्भवानत्यन्तगः श्रियः। अपि संक्रन्दनस्य स्यात् क्रुद्धः किमुत वालिनः Bhaṭṭi. 6.110 (comm. लक्ष्यपातिभिः); **4** who stays at the border or boundary मन्त्रविद्यागणस्यान्तः कुलशक्तिं निवेशयेत्। पूर्वयाम्यापरोदक्षु माहेश्यादिचतुष्टयम्। इन्द्राणीपूर्वकं तद्वदैशादिदल अन्तगम् MālinīT. 11.11; शुकाद्यद्वारविन्यासे पादान्तस्थान् यजेत् सुरान्। तथा प्राकारविन्यासे यजेद् द्वात्रिंशदन्तगान् PañcaRā. (Ha.) i. 13.8; आदिर्मातृकाप्रथमोऽकारस्तस्यान्तगः आकारः पौरुषेयः पुरुषसंबन्धी महापाशः SetuBa. 158. 8; **5** (used as noun) (one) who has reached the final stage of life, i.e. who becomes ascetic गुर्वाचार्यान्तगेषु विषये मर्यादातिक्रमे सति अन्तं चरममाश्रमं गच्छति Subodhi. 91.24 (*on* 2. 212); **6** (used as noun) (one) who causes destruction or loss अन्तं नाशं गच्छतीत्यन्तगः। गुर्वाचार्याणामन्तगो गुर्वाचार्यान्तगो द्रोही Subodhi. 91.27 (*on* 2.212); BālamBha. ii. 305. 16 (*on* 2.212)

[2] **अन्तग** (anta - ga) *adj.* which has a long syllable at the end षड्लोऽन्तगुर्नीरटितः ह्लादोऽष्टलघुरन्तगः SaṁgīRa. iii. 257.5 (6.150)

अन्तगण (antagaṇa) *m.* the plant *Baleria Caerulea* (ह्रस्ववृक्षवर्गः) अर्गाटोऽन्तर्गलो (v.l. °गणो(?)) मतः ParyāMu. 16. 12.

अन्तगत (ánta - gata) *adj.* [*f.* - ā] **1A** which exists at the end (of a plant)

अ॒ग्निरथौ॒र्षधी॒रन्त॑गता दहति TaiS. I. v. 9. 1; **1B** which occurs at the end (of a sentence) विकारमन्यद्यदतोऽनुसंहितं तदाचरेदन्तगताद्ययोस्तु न ṚPrāti. 11. 21; नान्तगतं परेण CaturA. (Śau.) 4. 112; **2A** which has come to an end, i.e. exhausted, dissipated दुग्धानीव वै तर्हि छन्दांसि यातयामान्यन्तगतानि तान्येव तद्रसेनाप्याययन्ति PañcBr. iv. 9. 17; येषां त्वन्तगतं पापं जनानां पुण्यकर्मणाम्। ते ... भजन्ते माम् MahāBhā. vi. 29.28 = BhagGī. 7.28 (Śaṅ. समाप्तप्रायं क्षीणम्); SkandP. i (1). 31. 29; नरस्य पाप्मा हि तदा निवर्तते यदा भवत्यन्तगतं तमस्तनु Saund. 9.3; येषां त्वन्तगतं पापं स्वर्गाद्वा ये समागताः। ... धर्ममेकं भजन्ति ते SkandP. i (2). 51.36; **2B** which has come to an end, i.e. which is completed भूमिस्पृश एवाकुर्वन्। अन्तगतमिव सामासीत् JaimiBr. 1. 123; श्यामः सरोमश्रवणः किरीटी त्वक्पत्रनिर्यासफलैर्बिभर्ति। भाण्डानि ... संचारयन्त्यन्तगतो घटस्य Bṛhajjā. 27. 33; साधूनां परिवृत्तिश्च विद्यादन्तगते युगे BrahmP. 230. 14; **3** who has come near (benefits) स यदैवान्तगत इव श्रियै मन्येताथ हैनेन यजेत JaimiBr. 2.315; **4** who has reached the limit or boundary गुहां प्रविष्टोऽन्तगतोऽपि वा क्षितेः। ... पुरुषो महात्मनां न जातु मुच्येत कथंचनाहतः MahāBhā. iv. 280*(6); स्वरेण पुर्यन्तगताथ बाला सा ... अतितरामरोदीत् VāsuVi. 3.42.

अन्तगतत्व (antagata-tva) *n.* the state of occurring at the end तस्य (यमकस्य) आदिमध्यान्तगतत्वेन बहवो भेदाः PratāYaBhū. 342. 8; वस्तुतस्तु धर्मस्यादिमध्यान्तगतत्वेऽपि चमत्कारवैलक्षण्याभावात् (दीपकस्य) त्रैविध्योक्तिरापातमात्रात् RasGaṅ. 437. 15.

अन्तगतारिसैन्य (antagatārisainya) *n.* army of enemy which has reached the limit or boundary, i.e. fled राक्षसमालोक्य ... भृशमेवासीदन्तर्ग(?ग)-तारिसैन्यं सुभैरवासीदं तम् YudhiVi. 7.129 (comm. पतत् अरिसैन्यम्)

अन्तगति (ánta-gati) *adj.* who causes an end, i.e. destroys यो॒ धेन्वनडु॒ह्योरश्रीयादन्तगतिरिव त॒ँ हाद्भुतमभि॒जनितोर्जाया॒यै गर्भं नि॒रबधीदिति पापमकत् ŚatBr. III. i. 2. 21; सर्वा॒श्यमिव ह त॒दन्तगतिरिव सा ŚatBr. (K.) IV. i. 2. 12.

अन्तगमन (anta-gamana) *n.* **1** act of reaching to the end, i.e. completing आरब्धस्यान्तगमनं द्वितीयं बुद्धिलक्षणम् Tantrākhyā. 105.26; PañcT. 3.58 (319.7); Pañcā. 197.16; दृढकारी। यत्करोति तदवश्यं समापयति ...। तदुक्तं 'प्रारब्धस्यान्तगमनम्' ManuBh. i. 412.14 (*on* 4.246); यदोक्तं समयो नायं याम इत्यवधीरितम्। आरब्धस्यान्तगमनं तद्युक्तमधुना तव RājTa. (Śrī.) 1(1).136; **2** act of perishing or dying, i.e. death प्रायः ... अन्तगमने AmaK. 2642.

अन्तगर्भ (anta-garbha) *adj.* having the foetus inside, i.e. carrying the embryo within स शापरोषाद्रुद्राण्या अन्तगर्भो हुताशनः। बहून् वर्षगणान् गर्भं धारयामास VāyuP. ii. 11.27.

अन्तगल (anta-gala) *adj.* having long and short syllables (respectively) at the end सर्वगुर्मो मुखान्तर्लौ यरावन्तगलौ सतौ VṛttaRa. 1.7.

अन्तगामिन् (anta-gāmin) *adj.* **1** who approaches death, i.e. who is about to die उवाच रक्षः। दिष्ट्यासि मे राघव दृष्टिमार्गं प्राप्तोऽन्तगामी विपरीतबुद्धिः। अस्मिन् क्षणे यास्यसि मृत्युदेशम् Rāmā. vi. 47. 91; **2** existing or present inside नाभौ हृदि च विन्यस्य व्यापकान् (वर्णान्) दशधातुषु। त्वगसृङ्मांसमेदोऽस्थिमज्जाशुक्रान्तगामिषु। ... न्यसेदेवं समाहितः TantrRā. 15. 83.

अन्तगिरम् (antagiram) *adv.* inside the mountain गिरिनदीपौर्णमासी ... इत्येवमन्ताद्वा टो भवति। गिरेरन्तरन्तगिरम्। अन्तर्गिरि JaineVyā. 282.2 (*on* iv. 2. 112)

अन्तगिरि (anta-giri) (= antarā-giri) *m.* **1** name of a mountain (near Rājagṛha, seat of Yaṣṭīvana) भगवान् ... तत्रैव विहरति अन्तगिरिस्मिं यष्टीवने उद्याने MaVastuAva. iii. 441.15; iii. 442.3; iii. 443.14; **2** name of a people, DBHS.

अन्तगु (anta-gu) *adj.* (metrical unit in prosody) having a long syllable at the end वर्णगणो वर्णैस्त्रिभिरष्टविधश्च सः। मस्त्रिगुः पूर्वलो यः स्यान्मध्यलो रोऽन्तगुस्तु सः SaṁgīRa. ii. 224. 13 (4.57)

अन्तगुरु (anta-guru) *adj.* (metrical unit in prosody) having a long syllable at the end त्रिकोंऽशः परिकल्पितः। ... जकारो गुरुमध्यस्तु सकारोऽन्त-गुरुस्तथा NāṭyaŚā. 14. 85; (पञ्चहाश्च) पञ्च लघवश्च गणसंज्ञा भवन्ति। पञ्च लघवस्त्वष्टविधाः। तद्यथा त्र्यक्षरास्त्रय आदिमध्यान्तलघवः। चतुरक्षराश्चत्वार, आदिद्वितीयतृतीयान्तगुरवः Jānāśra. 1. 39; (सप्तम्या बहुलम्) अन्तगुरुः, अन्तेगुरुः CāndraVṛ. *on* v. 2.11; (वसुधास्) वसुधा इत्यनेनान्तगुरोस्त्रिकस्य ससंज्ञा परिभाष्यते MṛtaSaṁ. 3. 13 (*on* 1. 4); त्रिगुरुः प्राग्गुरुर्मध्यगुरुरन्तगुरुस्तथा। ... मभजाः ... संज्ञिताः SuvṛTi. 1.7; अन्तगुरुआदिगुरुसर्वलघून् त्रीन् अस्माद्राशेः पातयेत् ChandaśCū. 8.7(8); इन्द्रवज्रोपेन्द्रवज्रयोरन्तगुरोः प्रागधिकलघुना इन्द्रवंशावंशस्थे भवतः KāvyKaVṛ. 11.6(1.2); राम वाल वाम इत्यादिशब्दानामादौ अतिगुरुशब्दोऽन्तगुरुशब्दश्च प्रयोज्यः KāvyKaVṛ. 51.12 (3.1); सोऽन्तगुरुः कथितः (गणः) ChandoMa. 1.8, ŚārṅgaPa. 2064.

अन्तगुरु (anta-guru) *m.* preceptor of old age, old preceptor किं खेचरो गोषुचरो नु विष्णुः ...। सोऽतर्क्यताभस्मनिमीढकर्मा मध्येगुरूनन्तगुरूंश्च धिन्वन् DvyāśraKā. 6. 14.

अन्तगुर्वक्षराढ्य (antagurvakṣarāḍhya) *adj.* (metrical unit in prosody) containing a heavy or long syllable at the end 'विद्यात् सगणमपि च वायुं सोऽन्तगुर्वक्षराढ्यः ĪśānŚiPa. i. 3. 66.

अन्तगोचर (anta-gocara) *adj.* relating to, i. e. occurring at the end (of a quarter) स्यात् पादपदवर्णानामावृत्तिः संयुतायुता। यमकं भिन्नवाच्यानामादि-मध्यान्तगोचरम् Vāgbhaṭā. 4. 22; Kāvyāda. 3.1; AgniP. 342.15.

अन्तग्रह (anta-graha) *m.* (the heresy of) holding extreme view अन्तग्राहाच्छीलव्रतपरामर्शः AbhidhKoBh.305.3 (*on* 5.33)

अन्तग्रहण (anta-grahaṇa) *n.* **1** mention or use of the word *anta* (in the aphorism) सनादिष्वन्तग्रहण उक्तम् Vār.1 *on* P. iii.1.32; MahāBh. ii. 41. 21 (*on* iii. 1.32); अनेकान्तग्रहणे कोपधग्रहणं सौसुकाद्यर्थम् Vār.1 *on* P. iv. 2. 141; अन्तग्रहणाद्वा नलोपे Vār. 6 *on* P. viii.1.17; MahāBh. iii. 372.6 (*on* viii. 1. 17); नलोपेऽन्तग्रहणं पदाधिकारस्य विशेषणत्वात् Vār. 1 *on* P. viii.2.7; MahāBh. iii. 394. 6 (*on* viii. 2.7); अनितेरन्तग्रहणं संबुद्ध्यर्थम् Vār.1 *on* P.viii. 4.20; MahāBh. iii. 459.13 (*on* viii. 4.20); सोऽयमेवं सिद्धे सति यदन्तग्रहणं करोति तज्ज्ञापयत्याचार्यः सूत्रान्तादेव दशान्तादेवेति MahāBh. i. 186. 2 (*on* i. 1. 72); i. 318. 24 (*on* i. 4.14); ii. 381.7 (*on* v. 2. 46); iii. 462.22 (*on* viii. 4.36); (समासान्ताः) अन्तग्रहणं किमर्थम् MahāBh. ii. 437.16 (*on* v. 4.68); iii. 278.17 (*on* vii. 2. 2); iii. 419.14 (*on* viii. 2.90); अन्तग्रहणमौपदेशिकप्रतिपत्त्यर्थम् KāśiVṛ. *on* i. 1. 39; *on* i. 1. 24; पदसंज्ञायामन्तग्रहणमन्यत्र संज्ञाविधौ प्रत्ययग्रहणे तदन्तविधेः प्रतिषेधार्थम् KāśiVṛ. *on* i. 4.14; KātanVṛ. *on* i. 3. 1; *on* ii. 1. 75; *on* iii. 2. 44; *on* iv. 4. 51; अन्तग्रहणादादिभूतेनान्येन दण्डेन भवितव्यम् ManuBh. ii. 221.14 (*on* 8.359); (वदव्रजहलन्तस्याचः) अन्तग्रहणं तु विस्पष्टार्थम् Pradī. vi. 100.12 (*on* vii. 2.3); सुप्तिङन्तं पदं इत्यत्रान्तग्रहणमकृत्वा संज्ञाविधौ प्रत्ययग्रहणे तदन्तविधिर्ना-स्तीत्यप्यज्ञापयित्वा तरप्तमपौ पितौ घ इति क्रियताम् PariVṛ. (Sī.) 56.3; 56.18; 109.2; 163.13; विनाप्यन्तग्रहणं तदन्तस्यैव संज्ञासिद्धावप्यन्तग्रहणमन्यत्र Prasā. i. 39.13; i. 73.13; i. 87.14; i. 187.16; i. 214.6; i. 235.12; i. 315.10; अन्तग्रहणे तु कृते समुदायस्यान्ते तिशब्दोऽस्तीति तत्र निषेधो न स्यात् Prasā. i. 843. 13; (प्रनङ्क्ष्यति) 'नशेः षान्तस्य' इत्यन्तग्रहणात् (णत्वं न) Prasā. ii. 245.8; मसिति। उत्तमपुरुषबहुवचनस्य इकार आगमः स्यात्। आगमत्वमन्तग्रहणात् Prasā. ii. 706.19; येन विधिस्तदन्तस्य ग्रहणमित्यनेनैवान्तलाभादन्तग्रहणं व्यर्थं स्यात् GuruCandr. ii. 211.18; LaCandr. 508.26; (नशेः षान्तस्य) अन्तग्रहणं भूतपूर्वप्रतिपत्त्यर्थम् SiddhāKau. 405A. 24 (*on* viii. 4.36); संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणाभाव-ज्ञापनार्थमन्तग्रहणम् LaŚabdeŚe. i. 51. 1; 'अह्नोऽदन्तात्' इत्यन्तग्रहणाज्ज्ञापकादत्र ... वर्णग्रहणे तदन्तग्रहणं नास्ति LaŚabdeŚe. ii. 115.11; ii. 303.9; तदन्तविधिनैव सिद्धेऽन्तग्रहणं स्पष्टार्थम् LaŚabdeŚe. ii. 486.1; **2** (the heresy of) holding extreme views, belief in permanence सत्कायदृक् ततोऽन्तग्रहणम् AbhidhK. 5. 33; सत्कायदृष्टेरन्तग्राहदृष्टिः प्रवर्तते। आत्मनः शाश्वतोच्छेदान्तग्रहणात् AbhidhKoBh. 305.1 (*on* 5.33)

अन्तग्रहणनिवृत्ति (antagrahaṇa-nivṛtti) *f.* termination of mention, i.e. continuation of the word *anta* अन्तग्रहणनिवृत्तौ तु क्रमप्राप्तत्वादादेरेवोदात्तत्वं सिध्यति Pradī. vi. 217.13 (*on* vii. 3.78)

अन्तग्रहणसामर्थ्य (antagrahaṇa-sāmarthya) *n.* power or force of mentioning or using of the word *anta* अन्तग्रहणसामर्थ्याद्यश्च संप्रति षान्तो यश्च भूतपूर्वस्तस्य सर्वस्य षान्तात्पदादिति लब्धेऽर्थेऽन्तग्रहणसामर्थ्यात् णत्वनिषेधः Pradī. vii. 227.22 (*on* viii. 4.36); अन्तग्रहणसामर्थ्यात्केवलस्य सनादेर्धातुत्वाभावेन NyāySu. (So.) 45.25 (*on* i. 2.7); अन्तग्रहणसामर्थ्यादत्यन्तमात्रस्य ग्रहणं विज्ञास्यते Prasā. i. 214. 9; तस्य हि पदे परतोऽन्तो यः षकारस्ततः परस्यं नस्य णो नेत्यर्थः। अन्तग्रहणसामर्थ्यात् LaŚabdeŚe. ii. 178.3.

अन्तग्रहणसिद्धि (antagrahaṇa-siddhi) *f.* accomplishment (of the purpose) of the mention of the word *anta* येन विधिस्तदन्तस्येत्यन्तग्रहणसिद्धौ अन्तग्रहणं व्यर्थं स्यात् LaCandr. 508.26.

अन्तग्रहणाधिकार (antagrahaṇādhikāra) *m.* governing rule of the mention of the word *anta* 'अनुदात्ते च' इत्येतदेव ज्ञापकम्—इहान्तग्रहणाधिकारस्य Pradī. v. 154 B.34 (*on* vi. 1. 162)

अन्तग्रहणानुवृत्ति (antagrahaṇānuvṛtti) *f.* continuation of the mention

of the word *anta* अन्तग्रहणानुवृत्तावपि श्रमो लोपे दोषो नास्तीति भावः Pradī. v.153B.15 (*on* vi.1.161); अन्तग्रहणानुवृत्त्या मितोऽप्यन्तावयवत्वम् PariVṛ. (Sī.) 11.1; अस्य धातोरित्यत्रान्तग्रहणानुवृत्तिज्ञापकतापरकैयटस्तु चिन्त्यः LaŚabdeŚe. ii. 943.7.

अन्तग्राहदृष्टि (antagrāha-dṛṣṭi) *f.* the heresy of holding extreme views, belief in permanence or annihilation अन्तग्राहदृष्टिविगतेन अनन्तमध्यधर्मधातुप्रवेशज्ञानेन GaṇḍVyū.369.24; अन्तग्राहदृष्टिः कतमा ... । मध्यमाप्रतिपन्निर्याणपरिपन्थकर्मिका AbhidhSa. 7.10; क्लेशानां प्रभेदः ... स्याद्दशविधः सत्कायदृष्टिरन्तग्राहदृष्टिः ... विचिकित्सा च Yogācā. 161.16; दृष्टयः पञ्च सत्कायमिथ्यान्तग्राहदृष्टयः। दृष्टिशीलव्रतपरामर्शाविति पुनर्दश AbhidhK. 5.3; सत्कायदृष्टेरन्तग्राहदृष्टिः प्रवर्तते AbhidhKoBh. 305.1 (*on* 5.33); रागो द्वेषो मानोऽविद्या सत्कायदृष्टिरन्तग्राहदृष्टिश्चेति कामावचराः षट् AbhisaAlaṅĀ.94.16; अन्तर्ग्रा(?ग्रा)हदृष्टिः MahāVyu. 104.35 [DBHS.]

अन्तग्ल (anta-gla) *adj.* having final syllable as either long or short सर्वादिमध्यान्तग्लौ त्रिकौ म्नौ भ्यौ ज्रौ स्तौ JayaChand. 1.2; Chandonu. 1. 2; ChandaśCū. i. 2. 4.

अन्तच् (antac) *Gr.* suffix *anta* जॄ°...°नन्दिभ्योऽन्तच् SaraKaṇṭhā. (Gr.) ii. 2. 138.

अन्तचक्र (anta-cakra) *n.* reading of omens and augury, Apte; cf. **अन्तरचक्र**.

अन्तचतुष्टय (anta-catuṣṭaya) *n.* group of the last four त्रियामां रजनीं प्राहुस्त्यक्त्वाद्यन्तचतुष्टयम्। नाडीनां तदुभे संध्ये दिवसाद्यन्तसंज्ञिते। इति। अत्र नाडीनामाद्यन्तचतुष्टयमित्यन्वयः VīraMi. (Āhnika.) 15.10.

अन्तचर (anta-cara) *adj.* **1** being continued or practised till the very end एतदन्तं तन्त्रतरमन्तचरमिदं भवति NidāSū. 103.18 (6.7); **2** wandering up to the end or border (of the earth) आगता वानरा घोरा दैत्यदानवसंनिभाः। ... पृथिव्यम्बु(v.l. °न्त)चराः Rāmā. iv. 39. 5 [completing or finishing (as a business etc.), Apte]

अन्तचार (antacāra) *m.* name of a country or its people खशिकाश्च तुखाराश्च (v.l. खाशीराश्चान्तचाराश्च) ... मया देशाः संकीर्तिताः MahāBhā. vi. 10. 66 [borderer, PW.; name of a work, pw.]

अन्तचारिन् (anta-cārin) *adj.* wandering, i. e. begging (for alms) in the vicinity सत्त्वपुरुषः ... स च भिक्षुरेवेति तत्स्वरूपप्रतिपादनाय दृष्टान्तदार्ष्टान्तिकसूत्रे पञ्च मच्छेत्यादिके आह ... अन्तचारी पार्श्वचारीति तृतीयः SthānṬ. 342 A.6.

अन्तचिकीर्षा (anta-cikīrṣā) *f.* **i** desire to terminate or remove ततो महात्मा यक्षेन्द्रः प्रत्युवाचानुगामिनः। ... शापस्यान्तचिकीर्षया MahāBhā. v. 193.45; **ii** desire to cause the end (of life), i.e. desire to kill धृष्टद्युम्नं तदायान्तं द्रोणस्यान्तचिकीर्षया। परिवव्रुः ... पाञ्चालाः MahāBhā. vii. 145. 3.

अन्तचिह्न (anta-cihna) *n.* sign or symptom of (approaching) death अरिष्टं सूत्यगारेऽन्तचिह्ने तक्रे शुभेऽशुभे AnekāSaṁ. 3.143.

अन्तचुम्बनव्याज (antacumbana-vyāja) *m.* pretext of a last, i. e. parting kiss काप्यन्तचुम्बनव्याजादभिज्ञानं प्रियानने। ... नापश्यद्युधिरैस्तदा PāṇḍaC. 13. 1064.

अन्तच्छन्दस् (anta-cchandas) *n.* metre (employed) at the end (of a Sāman or verse) अन्तच्छन्दसी अन्त इति, तेऽयं न सर्वान्ते नासवनच्छन्दोऽन्तेऽचिकीर्षीत् NidāSū. 118.3 (7.3); वारवन्तीयमन्तसाम, अन्तच्छन्दसि NidāSū. 126.9 (7.9) (*but* Viśva. पूर्वपदछन्दोविशेषः)

अन्तज (anta-ja) *adj.* last born, Apte.

अन्तजन (anta-jana) (=antarjana) *m.* [enumerated in the *naḍādigaṇa*, GaṇPā. 125.79] **1** name of a person नड इत्येवमादिभ्यः ... गोत्रापत्ये फक् प्रत्ययो भवति ... नड। चर। ... अन्तजन। इत्वरा KāśiVṛ. *on* iv. 1.99 (*but* Viśva. ऋषिविशेषः); **2** people of the inside, family, household शुद्धोदनस्त्वरितु पृच्छति काञ्चुकीयं दौवारिकं तथपि चान्तजनं समन्तात् LaliVi. 11. 26 [DBHS.]

अन्तजननी (anta-jananī) *adj.* (*f.*) causing annihilation or dissolution (of the universe) (परेशस्य) यस्य च त्रिविधा मूर्तिर्विधातुस्सृष्टिकर्मणि। सृष्टिस्थित्यन्तजननी ब्रह्मविष्णुहराभिधा ŚivaP. ii (3). 33. 39 (162 B.13)

अन्तज्ञ (anta-jña) *adj.* who knows the end, i.e. final result अथाब्रवीत्तदा वृष्णीन् श्रुत्वैवं मधुसूदनः। अन्तज्ञः MahāBhā. xvi. 2. 13.

अन्तज्ञा (anta-jñā) *f.* name of a goddess (*lit.* who knows the end) अन्तज्ञा विश्वरूपा च ...। प्रधानदेवताभिस्तु रक्षाहोमं समारभेत् SkandP. ii(4). 12. 101.

अन्ततन्त्रतर (antatantra-tara) *adj.* superior procedure or manner of performance of the concluding part तत्र खलु गोस्तन्त्रं करोति। एतदन्ततन्त्रतरम् NidāSū. 89. 7 (5.8)

अन्ततम (anta-tama) *adj.* the very last, the last one अमितदक्षिणः खलु पृष्ठशमनीयो भवति। अथाप्येष सत्राणामाद्यन्तेषु दृष्टो भवति। अयमु खल्वन्ततम इति NidāSū. 96.16 (6.1)

अन्ततस् (anta-tás) (=antaśas, antamaśas) *adv.* [enumerated in the *cādigaṇa*, GaṇRa. 1.12 (26.27)] **1Ai** at the end (of circumference) **ii** at the end (of the verse or Sāman) **B** at the end or completion (of action, religious performance or event) **Ci** at the end-portion **ii** at the border or boundary **D** at the extremity, at the outer edge (of tongue, lips or palate) **E** in the final process of argument or analysis, ultimately **2** finally, lastly, at the very end **3A** from the end, from the last portion **B** from the upper end or tip **4** at the two or both ends, i. e. in the beginning and end **5A** at least **B** even, to the extent of **6** up to the extreme end **7** from the end or last part, i.e. in the reverse order **8A** at the inner side or edge **B** within **C** inside **9** afterwards, subsequently **10** with certainty, definitely **11** (even) so much as, (once) in fact, up to *nirvāṇa* **12** very near **13** the word *antatas* **1Ai** at the end (of circumference) ब्रह्मापरं युज्यतां ब्रह्म पूर्वं ब्रह्मान्ततो मध्यतो ब्रह्म सर्वतः AV. xiv. 1.64; **1Aii** at the end (of the verse or Sāman) स्वरेण वै देवेभ्योऽन्ततोऽन्नाद्यं प्रदीयते स्वरेणैव तद्देवेभ्योऽन्ततोऽन्नाद्यं प्रयच्छति PañcBr. vii. 3.26 (Sāy. सामान्ते); षडन्ततो निष्केवल्ये षड्वा ऋतवः संवत्सरः संवत्सरस्यैवाप्त्यै KauṣīBr. 26. 16 (128. 19); परास्तुभ्योभयतो बार्हतमुच्चैरन्ततो निदध्यात् ŚatBr. XI. iv. 2. 12; एते आनुदेशिक्यौ संहिते यज्ञेन कर्मणा चरिते भवतोऽन्ततो निधनसामान्यादन्तःसामिकानि निधनानि संप्रसारयन्ति SaṁhiUBr. 3.1; पुरस्तादुक्थ्यस्यावनीयः। मध्यतोऽन्ततो वा ĀpaŚS. xiii. 16. 2; पश्चादग्नेर्दर्भेषु प्राङासीनः प्रत्यङ्ङासीनाय तत्सवितुरिति सावित्रीं त्रिरन्वाह पच्छोऽर्धर्चशः सर्वामन्ततो यश्च मेधाकामः स्यात् KāṭhGS. iv. 1. 20; आस्तारपङ्क्तिरादितः प्रस्तारपङ्क्तिरन्ततः ṚPrāti. 16. 40; आत्मनो मुखे मृत्योरास्ये जुहोमीत्यन्ततः GautDS. iii. 6. 6; मात्रिकं वा द्विमात्रं वा स्वर्यते यदिहाक्षरम्। तस्यान्ततोऽर्धमात्रां वै मात्राधिक्यं तथैव सा ŚaiśiŚi. 195; नान्ततः प्रणवन्यासं फलकामस्य कीर्त्यते ParaS. 6. 39; नमस्यामनमस्या नित्यशोऽपि शाखाभेदेन प्रथमतो मध्यतोऽन्ततश्च पठितः BhāṭṭCan. 113. 5 (*on* xvi. 3. 1); **1B** at the end or completion (of action, religious performance or event) यं कामयेत भूयोऽस्यान्नं स्यादित्यन्तेसु तस्य व्युदूह्योप दध्यादन्तत एवास्मा अन्नमवरुन्धे भूयोऽस्यान्नं भवति TaiS. V. vii. 10. 3; गृहे गोविकर्तस्य चेत्यन्ततं एवास्मात्तेन रुद्रं निरवदयते MaiS. iv. 3. 8 (iv. 48. 7); रौद्रौ वै प्रतिहर्ता यन्मध्यतः प्रतिहर्त्रे दद्यान्मध्यतो रुद्रमन्ववनयेत्तस्मादन्ततः प्रतिहर्त्रे देयम् MaiS. iv. 8. 3 (iv. 111. 1); GopBr. ii. 3. 19 (205.10); ĀpaŚS. xiii. 6. 2; यदि कामयेत देवतां यज्ञयशसेनाहुत्यापर्ययेमित्यृचमन्ततः कुर्यात् देवतामेव यज्ञयशसेनाहुत्यार्पयति KāṭhS. 18. 19 (i. 279. 18); KapiKaS. 29.7 (135.5); अन्ततः पितृभ्यो नमस्क्रियते AitBr. 13. 13 (389); नाराशंसं वै तृतीयसवनमथ कस्मादच्छावाकोऽन्ततः शिल्पेष्वनाराशंसीः शंसतीति AitBr. 28. 8 (726); 37. 6 (923); 37. 7 (926); अनिधनमन्ततो भवति स्वर्गस्य लोकस्यानतिपादाय PañcBr. vii. 3. 23; यज्ञमभिसमुब्जितो यदेते अन्ततो भवतो यज्ञस्यारिष्ट्यै PañcBr. viii. 5. 16; यमध्वर्युरन्ततो ग्रहं गृह्णीयात्तस्यासुमवनयेत् PañcBr. ix. 9.6 (*but* Sāy. समीपे नाराशंसशोषणे समीपकाले); स्वरेण हि देवेभ्योऽन्ततोऽन्नाद्यं प्रदीयते स्वरेणैव तद्देवेभ्योऽन्ततोऽन्नाद्यं प्रयच्छति PañcBr. xi. 5. 26 (Sāy. अहरवसाने); यदग्निं स्विष्टकृतमन्ततो यजत्येष ह वै देवेभ्यो हविः प्रयच्छति KauṣīBr. 3. 6 (12. 10); शान्तिरेवैषा भेषजमन्ततो यज्ञे क्रियते KauṣīBr. 3. 6 (12. 14); 3. 7 (12. 24); यन्महेन्द्रमन्ततो यजत्यन्तं वै श्रेष्ठी भजते तस्मादेनमन्ततो यजति KauṣīBr. 5. 5 (20. 17); 5. 8 (22. 13); 8. 6 (38. 6); 16. 7 (72. 14); 27. 2 (131. 1); GopBr. ii. 1. 23 (160. 15); यदग्निं कव्यवाहनमन्ततो यजत्येतत् स्विष्टकृतो वै पितरस्तस्मादेनमन्ततो यजति KauṣīBr. 5. 7 (21. 15); GopBr. ii. 1.25 (162. 10); इन्द्रस्य त्वा जठरे सादयामीति नाभिमन्ततोऽभिमृशति KauṣīBr. 6. 14 (27. 19); अत उ हैके वनस्पतिमावाहयन्त्यन्तत आवाह्यस्तृतीयसवने ह्येनं यजन्ति KauṣīBr. 12. 7 (56. 21); (इदम्) अन्ततः क्रियते प्रजननायैव TaiBr. I. ii. 6. 2; अग्निष्टोमन्तत आहरति TaiBr. I. viii. 10. 3; TaiBr. III. viii. 18. 7; प्र प्रतिष्ठायाश्च्यवेत द्विपदा अन्ततो जुहोति प्रतिष्ठित्यै TaiBr. III. ix. 12. 3; यद्यन्ततो यज्ञस्यानुव्याहरेत्। तं प्रति ब्रूयादप्रतिष्ठितो दरिद्रः क्षिप्रेऽमुं लोकमेष्यसीति ŚatBr. I. vi. 1. 18; मिथुनात्प्रजायमाना अन्ततो यज्ञस्य प्रजायन्ते तदेना एतदन्ततो यज्ञस्य ŚatBr. I. ix. 2. 5; वारुणमन्तत आलभते। तदेनं सर्वस्माद्वरुणपाशात्सर्वस्माद्वरुण्यात्प्रमुञ्चति ŚatBr. III. ix. 1. 21; IV. ii. 2.5; अन्ततो हारियोजनं ग्रहं गृह्णाति ŚatBr. IV. v. 5. 11; वात्सप्रमेवान्ततः कुर्यात् ŚatBr. VI. vii. 4. 15; एषोऽग्नेर्युदुत्तमा चितिरन्ततस्तदग्नेराशिषो निराह ŚatBr. VIII. vi. 1. 22; उपांशु हि रेतः सिच्यतेऽन्ततो भवत्यन्ततो हि रेतो धीयते ŚatBr. IX. v. 1. 56; IX. iv. 2. 16; यजमानात्माहुतिमन्ततो

अन्तरदिशा (antara-diśā) *f.* intermediate quarter or region भूम्या आखूनालभतेऽन्तरिक्षाय पाङ्क्रान्दिवे कशान्दिग्भ्यो नकुलान्बभ्रुकानवान्तरदिशाभ्यः (v. 1. °अन्तरदिशाभ्यः PW.) VājaS. 24. 26; cf. **अवान्तरदिशा.**

अन्तरदृग्ग्रह (antaradṛg-graha) *m.* planet at zenith -distance (measured from ecliptic or vernal equinox with reference to equator) बिम्बीयध्रुववृत्तावधि स्वगोलसंधेर्भवृत्तेऽन्तरदृग्ग्रहः विषुवद्वृत्ते तु तद्विषुवांशाः SiddhāTaVi. (ŚeṣaVā.) 30. 17.

अन्तरदृश् (antara-dṛś) *adj.* who observes or follows the middle course न चातिप्रणयः कार्यः कर्तव्योऽप्रणयश्च ते । उभयं हि महादोषं तस्मादन्तरदृग्भव Rāmā. iv. 22. 23 [knowing or understanding the difference or distinction, Vācaspatya; realizing the Supreme Soul, Apte]

अन्तरदेश (antara-deśa) *m.* region in the middle, mid-region तस्मिन्नेवान्तरदेशे गन्धर्वा अन्वैच्छन् मित्रमुखाः JaimiBr. 3. 382.

अन्तरद्रि (antaradri) *adv.* inside the mountain स्वयं च संनह्य बलान्यमुष्मिन्नेवं छलेनाविशदन्तरद्रि HammīMaKā. 11. 23.

अन्तरद्रोणी (antara-droṇī) *f.* valley between (the mountains) अतिलुब्धकराजासहाश्शैलानामन्तरद्रोणीः प्रजासंश्रयिष्यन्ति ViṣṇuP. iv. 24. 94; सर्वा ह्येकशिला भूमिर्वृक्षवीरुद्विवर्जिता । आप्लुता पादमात्रेण ह्युदकेन समन्ततः । इत्येता ह्यन्तरद्रोण्यो नानाकाराः प्रकीर्तिताः VāyuP. i. 37. 30; शैलमुख्यानामन्तरेषु यथाक्रमम् । सन्ति चैवान्तरद्रोण्यः सरांस्युपवनानि च LiṅgaP. i. 49. 58; शैलानामन्तरद्रोण्यः सिद्धचारणसेविताः BrahmP. 18. 53; BṛBrahmaS. ii. 4. 59.

अन्तरद्वार (antara-dvāra) *n.* interior gate or entrance (अयोध्या नाम नगरी) सुविभक्तान्तरद्वारा सुविभक्तमहापथा । शोभिता राजमार्गेण जलसंसिक्तरेणुना Rāmā. i. 230 *(2); (मल्लिः) अन्तरद्वारमार्गेण निर्ययौ त्रिदशान्वितः MalliC. 7. 1149.

अन्तरद्वितय (antara-dvitaya) *n.* pair of distances (called Ādya and Anya) इष्टघटिकाभिः । गुणिताः स्वभुक्तलिप्ताः षष्टिहृताः प्रागृणं धनं पश्चाद् । आद्यवदन्तरमन्यं प्राक् पश्चाद्यान्तरद्वितयम् BrāhmSphuSi. 10. 53.

अन्तरद्वितीयसमयकृत (antaradvitīya-samayakṛta) *n.* difference of time occurring at the second unit (of time) immediately next to the first unit (of time), JainaL.

अन्तरद्विष् (antara-dviṣ) *m.* enemy in the mind, inner enemy धामाष्टानां धीगुणानां षण्णां जेतान्तरद्विषाम् । गुणानामतिपञ्च्चां भूश्चतुर्णां छन्दसामसौ DvyāśraKā. 1. 182; अव्याद्व्याहतं भव्यान् स श्रीमानार्यरक्षितः । समूलघातमाहन्ति धर्मो यस्यान्तरद्विषः PrabhāC. 9. 2.

अन्तरद्वीप (antara-dvīpa) *m.* **1A** island in the middle (of the water), subcontinent संप्रतिजाते खलु पुनर्महामौद्गल्यायन बोधिसत्वे अन्तरद्वीपे चन्दनवनं प्रादुर्भवे बोधिसत्वस्य उपभोगपरिभोगमागच्छे बोधिसत्वस्यैव तेजेन MaVastuAva. i. 221. 6; ii. 23. 11; देहा विदेहा कुरवः कौरवाश्चामरावराः । अष्टौ तदन्तरद्वीपाः AbhidhK. 3. 56; भूषणं सर्वद्वीपानां पञ्चशैलो नाम दक्षिणस्य सलिलराशेरन्तरद्वीपः TilaMañ. 266. 12; भवन्ति चान्तरद्वीपाः षट्पञ्चाशदमी यथा । ... प्रथमोऽस्त्यन्तरद्वीप एकोरुरिति नामतः TriṣaŚaPuC. ii. 3. 684; विदिक्षु पूर्वोत्तराद्यासु लवणसमुद्रं त्रीणि त्रीणि योजनशतान्यवगाह्य उल्लङ्घ्य ये शाखाविभागा वर्तन्ते ... एतेषु शाखाविभागेषु अन्तरे मध्ये समुद्रस्य द्वीपाः ... अन्तरद्वीपाः SthānṬ. 227A. 7; क्व चाश्रमो महर्षीणाम् ... क्व चायमन्तरद्वीपे निवासो जनवर्जिते MalliC. 2. 316; **1Bi** (group of seven) distinct islands (to the south of India) अथाप्यन्येऽन्तरद्वीपा भारतात् सप्त दक्षिणाः Vaija. 36. 12; **1Bii** (group of) distinct islands (in terms of space) अन्तरं परस्परविभागस्तत्प्रधाना द्वीपा अन्तरद्वीपाः SthānṬ. 227A. 7; **2** name of a people or country जनाः ... धानदाः सरकाश्चैव ... । अन्तरद्वीपगान्धारास्तथावन्तिसुरास्तथा YogVā. iii. 36. 58.

अन्तरद्वीपक (antaradvīpa-ka) *m.* island in the middle (of the waters), subcontinent पञ्चालसिंहः ... पर्यटंश्च कदाचिदेकत्र ... अन्तरद्वीपकेऽवतीर्य ... विशश्राम UdaySuKa. 52. 5; 97. 13; 140. 17; ऐशान्यादिविदिक्ष्वन्तर्द्वीपाश्च हयकर्णकः । ... तावदायामविष्कम्भा अन्तरद्वीपका इमे TriṣaŚaPuC. ii. 3. 692.

अन्तरद्वीपज (antaradvīpa-ja) *adj.* born in a subcontinent म्लेच्छास्तु शाका यवनाः ... मर्त्या येषु न जानन्ति धर्म इत्यक्षराण्यपि । धर्माधर्मोज्झिता म्लेच्छा अन्तरद्वीपजा अपि TriṣaŚaPuC. ii. 3. 684.

अन्तरद्वीपसदृशी (antaradvīpa-sadṛśī) *adj.* (*f.*) similar to a subcontinent स्वयंप्रभा ... अन्तरद्वीपसदृशी तस्याः श्रोणी च विस्तृता TriṣaŚaPuC. iv. 1.425.

अन्तरधरा (antara-dharā) *f.* land in between the mountains, valley भौमव्यन्तरमर्त्यभास्करसुरश्रेणीविमानाश्रिताः स्वर्ज्योतिः कुलपर्वतान्तरधरारन्ध्रप्रबन्धस्थितीः। वन्दे तत्पुरपालमौलिविलसद्रत्नप्रदीपार्चिताः YaśasCam. ii. 380.11.

अन्तरधा (antara-dhā-) (= antara-hā-) III. U. to disappear अथ खलु भिक्षवः शिखी महाब्रह्मा शक्रश्च देवानामिन्द्रस्तथागतं तूष्णीभूतं विदित्वा सार्धं तैर्देवपुत्रैर्दुःखिता दुर्मनास्तत्रैवान्तरधायिषुः LaliVi. 290. 16 [DBHS.]

अन्तरधिकरण (antaradhikaraṇa) *n.* name of the seventh topic in the first chapter of Brahmasūtra (which deals with the Brahman who is within the Sun and the eye) अन्तरधिकरणम्। अन्तस्तद्धर्मोपदेशात्। 'य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते' इति श्रुतौ आदित्यमण्डलान्तर्वर्तित्वेन श्रूयमाणः पुरुषः परमात्मा जीवो वा इति विचारपरमधिकरणम् VedāntSā. (Rā.) 41. 1 (*on* i. 1. 21); परब्रह्मणः ... तात्त्विकत्वपर्यन्तस्य सगुणश्रुत्या। निर्धर्मकत्वश्रुत्या शुद्धब्रह्मसिद्धेश्च। तदुक्तमन्तरधिकरणे कल्पतरुकृद्भिः AdvaiSi. 720.3; अन्तरधिकरणे 'य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते' इति श्रुतौ प्रतिपादितस्य रूपस्य परमेश्वरत्वनिर्णयाच्च LalitāSaBh. 81. 14 (*on* 116)

अन्तरनर्मद (antara-narmada) *m.* **1** inhabitant of the Narmadā valley जनपदाः ... वासिक्याश्चैव ये चान्ये ये चैवान्तरनर्मदाः। भारुकच्छाः समाहेयाः सह सारस्वतैस्तथा ... इत्येते अपरान्ताः MatsyaP. 114. 50; BrahmāṇḍP. i. 16. 61; **2** country on the banks of the Narmadā river, western country, MatsyaP. 114. 50; BrahmāṇḍP. i. 16. 61.

अन्तरनाडिका (antara-nāḍikā) *f.* difference of a particular measure of time (*ghaṭikā*) ज्ञातुं यदा भाभिमता ग्रहस्य तत्कालखेटोदयलग्नलग्ने। साध्ये तयोरन्तरनाडिका यास्ताः सावनाः स्युर्द्युगता ग्रहस्य GrahaGa. 142. 29 (13. 11)

अन्तरनाडी (antara-nāḍī) *f.* difference of a particular measure of time (*ghaṭikā*) अतीत्योन्मीलनादिन्दोः ... स्वस्थानम् ... पश्चादेवं वापि निमीलनात्। तयोरन्तरनाडीभिर्हन्याद् भूपरिधिं स्फुटम् SūrySi. 1. 64 (comm. अन्तरे क्रियमाणे या नाड्यस्ताभिः)

अन्तरनिदर्शन (antara-nidarśana) *n.* indication of interval (of notes) तुल्यश्रुत्यन्तरत्वादन्तरनिदर्शनमपि श्रुतिनिदर्शने प्रोक्तम् NāṭyaŚā. 28. 33 (7)

अन्तरनिभृत (antara-nibhṛta) *adj.* concealed inside असावन्तरनिभृतभ्रान्तशरभः शरस्तम्बनिकुरम्बः TilaMañ. 184. 1.

अन्तरनिर्गत (antara-nirgata) *adj.* who has come out from inside or inner chamber पृच्छत्यन्तरनिर्गतानवसरं मौनव्रतान्सेवकः SevyaSev.53.

अन्तरनिर्मग्ना (antara-nirmagnā) *adj.* (*f.*) sunk or lost in the intervening distance or cleavage स्तनावालोक्य तन्वङ्ग्याः शिरः कम्पयते युवा। तयोरन्तरनिर्मग्नां दृष्टिमुत्पाटयन्निव Avalo. 101. 15 (*on* 4. 53)

अन्तरनिवासिन् (antara-nivāsin) *adj.* living inside or in inner chamber (of the house) अग्राम्यैर्वर्तयन्ति स्म रसैश्चैव स्वयंकृतैः। कुटुम्बिन ऋद्धिमन्तो बाह्यान्तरनिवासिनः VāyuP. i. 61. 96.

अन्तरनिविष्टा (antara-niviṣṭā) *adj.* (*f.*) placed, i. e. included under चतुःषष्टिर्मूलकलाः। आस्वेवान्तरनिविष्टानामन्तरकलानामष्टादशाधिकानि पञ्चशतान्युक्तानि JayaMa. 32. 8 (*on* 1. 3)

अन्तरनुप्रवेश (antar-anupraveśa) *m.* subsequent entrance, i. e. pervasion inside दर्शयति च श्रुतिः परस्यैव ब्रह्मणो देहादिषूपाधिष्वन्तरनुप्रवेशम् BrahmSūBh. (Śaṅ.) 589. 10 (*on* iii. 2. 21)

अन्तरनुप्रवेशन (antar-anupraveśana) *n.* subsequent entrance, i.e. pervasion inside आत्मशब्देन शरीरादिकोशपरंपरया चान्तरनुप्रवेशनेन सर्वेषामन्तः प्रत्यगात्मानं निरधारयत् BrahmSūBh. (Śaṅ.) 251. 9 (*on* i. 4. 14)

अन्तरनुभव (antar-anubhava) *m.* inner experience ननु विच्छिन्नदेशोऽनुभूयते स्वप्नेऽपि जागरण इव न तदन्तरनुभवाश्रयत्वे स्वप्नार्थस्योपपद्यते PañcPā. 10. 22 (*on* i. 1. 0)

अन्तरनुभवैकविषय (antaranubhavaika-viṣaya) *m.* object of only inner experience अन्तरनुभवैकविषयपरमानन्दम् ... उमासहितं परं ब्रह्म सर्वात्मकं मुक्तिसाधकम् ŚivārkaMaDī. ii. 355. 2 (*on* iii. 3. 39)

अन्तरनुभाव (antar-anubhāva) *m.* inner feeling ननु विच्छिन्नदेशोऽनुभूयते स्वप्नेऽपि जागरण इव न तदन्तरनुभ(v.l.भा)वाश्रयत्वे स्वप्नार्थस्योपपद्यते PañcPā. 10. 22 (*on* i. 1. 0)

अन्तरनुष्ठानसंभव (antaranuṣṭhāna-sambhava) *m.* possibility of performance in the intervening time प्राचीनपशुसंस्काराणां यज्ञीयपशुद्वारा यागार्थत्वनिर्वाहायावघातादिवदन्तरनुष्ठानसंभवात् VaiyāBhū. 92. 12 (*on* 22)

अन्तरनुसंधान (antar-anusandhāna) *n.* inner or internal connection, i.e. unification (of cognition) भेदितानां चान्तरनुसंधानेनाभेदनं न स्यात् PratyabhiVi. i. 49. 7 (*on* i. 1. 1); स चायं स्वतन्त्रः। स्वातन्त्र्यं च अस्य अभेदे भेदनम्, भेदिते च अन्तरनुसंधानेन अभेदनम् PratyabhiVi. i. 53. 2 (*on* i. 1. 1)

अन्तरनेमिभाग (antaranemi-bhāga) *m.* portion of inner or internal circumference तद्देशयोरन्तरनेमिभागा गजेन्दवोऽङ्काश्च लवास्तदर्धे। भागास्त्रयस्तत्त्रिलवेऽथ चैवं बिम्बीयभागान् दिवि कल्पयित्वा SiddhāTaVi. 345. 23.

अन्तरन्तःपुरम् (antarantaḥpuram) *adv.* inside the harem अन्तरन्तःपुरमपि ... त्वमलक्षितः PariPar. 3. 244; अन्तरन्तःपुरं नीत्वा राकेशस्तमभोजयत्। अपीप्यत्तद्भगिन्या च प्रतीत्यै मदिरामपि HammīMaKā. 13. 81.

अन्तरन्तर् (antár-antar) *adv.* **A** within the self or soul (*lit.* into the interior) यदन्तरन्तरिति गृह्णात्यन्तस्त्वात्मन्दधऽइत्येवैतदाह ŚatBr. IV. i. 2. 16; ŚatBr. (K.) V. i. 2. 9; अन्नादिभिः पञ्चभिः कोशजालैः शिरःपक्षपुच्छात्मकैरन्तरन्तः। निगूढे महायोगपीठे निषण्णं पुरारेरथान्तःपुरं नौमि नित्यम् DevīBhuSt. 2; **B** deep inside अनङ्गमुक्तः स च तीक्ष्णबाणः ...। ददाह तस्यास्तनुमन्तरन्तः VarāṅgaC. 19. 41; कूर्मो यथाङ्गानि निजे शरीरे स्पृष्टे पुनः संहरतेऽन्तरन्तः VarāṅgaC. 31.28; उपासीनश्चितिरेवं विद्वान् ...। पूर्वपूर्वप्रहाणेन ह्यन्तरन्तः प्रपद्यते TaiUBhāVā. 91. 17 (2); घटादेरारम्भादन्तरन्तस्तेजःकणानुप्रवेशकृतपाकोपपत्तेः NyāyMañ. ii. 12. 8; **C** down below सः ... आसाद्य ... उष्णीकृतामन्तरन्तः ... अमरधुनीम् NīlaVi. 9; **D** in between or at intervals हारावली ...। बध्नाति केशनिचयं श्लथमाल्यबन्धं स्थाने निवेशयति भूषणमन्तरन्तः VasaTi. 17. 22.

अन्तरन्तस्थ (antar-antastha) *adj.* containing semivowel within असाविति नामास्य दधाति घोषवदाद्यन्तरन्तस्थं द्व्यक्षरं चतुरक्षरं वापि वा षडक्षरं कृतं कुर्यान्न तद्धितम् ŚāṅkhāGS. i. 24. 4; ĀśvaGS. i. 15. 5; BaudhGS. ii. 1. 26; KāṭhGS. iii. 10. 2; KauṣīGS. i. 16. 9; BhārGS. 1. 26 (27. 12); ĀpaGS. vi. 15. 9; MānGS. i. 18. 1; VārāGS. 3. 1; HirGS. ii. 4. 10; ĀgniveGS. ii. 1. 5 (50. 21); PāraGS. i. 17. 2; GobhiGS. ii. 8. 14; JaimiGS. 1. 9 (8. 8); MahāBh. i. 4. 23 (*on* i. 1. 0); पिता नाम कुर्यात् ... घोषवदाद्यन्तस्थम् (v.l. °दाद्यन्तरन्तस्थम्) ŚaṅkhaLiDS. 21; कुर्यात् पितापत्यस्य नाम च। ... मङ्गल्यमन्तरन्तस्थम् AṣṭāSaṁ. ii. 172. 21 (6. 1); TantrVā. 215. 23 (*on* i. 3. 18)

अन्तरन्धतमस (antar-andhatamasa) *adj.* having deep darkness of nescience within अनुलेपमाल्यवसनाभरणैर्हरिमन्तरन्धतमसेभहरिम्। न्यवसद् गिरौ परिचरन् ... कमिता धरणेः Acyutarā. 5. 43.

अन्तरन्ध्रयुज् (antarandhra-yuj) *adj.* possessing a hole, i.e. an opening at the end चतुष्पान्मकरो दीर्घस्थूलवक्त्रद्विरोष्ठकः। सूची सूक्ष्ममुखो दीर्घसमदण्डान्तरन्ध्रयुक् चक्रव्यूहः ŚukraNī. 4 (7). 280.

अन्तरपतित (antara-patita) *adj.* **A** (used as noun) (that) which falls, i. e. remains between (the purchaser and seller), i. e. difference between purchase and sale क्रेतृविक्रेत्रोरन्तरपतितमदायादन्यं भवति ArthŚā. ii.126. 9 (4. 2); **B** fallen between, i. e. intervening किंतु तद्वृत्तस्य मे वैशंपायनदुःखात् स्फुटनं हृदयस्य अग्रतो दृष्टिलग्नं सर्वमेवान्यदन्तरयति (v.l. सर्वमेवान्यदन्तरपतितम् Cal. Ed.) Kād.137.16.

अन्तरपत्र (antara-patra) *n.* internal leaf (of decoration) सप्तभागोच्छ्रिता जङ्घा मेखला चार्धभागिका। भागेनान्तरपत्रं स्यात् SamarāSū. 55. 18; अस्मिन्नन्तरपत्रे तु सूत्रं दत्त्वा सुताडितम्। त्रिगुणेन लिखेत् तेन SamarāSū. 55. 20; 56. 200; 57. 26.

अन्तरपत्रक (antarapatra-ka) *n.* internal leaf (of decoration) द्विगुणां च तथा जङ्घामुच्छ्रायेणास्य कल्पयेत्। मेखलामर्धभागेन भागेनान्त(र)पत्रकम् SamarāSū. 56. 133; द्विपदा मेखला प्रोक्ता द्व्यंशे चान्तरपत्रके SamarāSū. 57. 27; म(ध्य?)-लुच्छाद्यानि (वायार्धं?) भागोच्छ्रायान्यनुक्रमात्। त्रीणि कुर्वीत युक्तानि शुभैरन्तरपत्रकैः SamarāSū. ii. 70. 16 (57); ii. 92. 19 (57)

अन्तरपद (antara-pada) *n.* **1** square root of difference कोटिकृतेश्छेदाप्त्योस्संक्रमणे श्रुतिभुजौ भुजकृतेर्वा। अथवा श्रुतीष्टकृत्योरन्तरपदमिष्टमपि च कोटिभुजे GaṇiSāSaṁ. 6. 97½; **2** the word *antara* एकैकव्यवधानार्थकत्वेन सामञ्जस्येऽन्तरपदस्य मध्यार्थकत्वमाश्रित्य तथाव्याख्यानस्य सुतरामयोगः SetuBa. 340. 27.

अन्तरपदार्थ (antarapadārtha) *m.* referent or meaning of the word *antara* (निरवद्या निरन्तरा) अवकाशावधिभेदच्छिद्राण्यन्तरपदार्थाः तैर्विरहिता निरन्तरा। अन्तरमवकाशावधिपरिधानान्तर्धिभेदतादर्थ्ये ... इत्यमरः LalitāSaBh. 63. 21 (*on* 96)

अन्तरपद्मासन (antara-padmāsana) *n.* type of Deśīlāsya wherein lotus-seat is formed उत्प्लुत्य गगने पद्भ्यां बद्ध्वा पद्मासनं पुनः। ... व्योम्नि

पद्मासनं बद्ध्वा कृत्वा तस्य (?च) विच्युतिम्। तथैवोपविशत्युर्व्यां यत्र सम्यक् सुशिक्षितः। (अन्तरपद्मासनम्) NṛttaRa. 6. 115.

अन्तरपद्रव्य (antar-apadravya) *n*. bad (additional) object (situated) inside एनमन्तरपद्रव्यदुराभाकरम्बितं स्फटिकमिव कश्मलमवलोकयामि TripuDi. 4. 1(4)

अन्तरपरिधि (antaraparidhi) *adv*. inside the enclosing sticks मेक्षणं चानुप्रहृत्याप उपस्पृश्य जुहूमद्भिः पूरयित्वा ... सकृदन्तरपरिधिसंक्षाळनं निनयति ĀgniveGS. i. 7. 3 (43. 17)

अन्तरपरिस्फुरण (antara-parisphuraṇa) *n*. manifestation, i.e. cognition of difference चिदचित्स्वरूपं संकीर्णमन्तरपरिस्फुरणेन शून्यम् SaṁkṣeŚā. 1. 198 (i. 157. 26)

अन्तरपरोक्षानुभव (antar-aparokṣānubhava) *m*. internal direct consciousness जागरणेऽपि प्रमाणज्ञानादन्तरपरोक्षानुभवान्न विषयस्यापरोक्षता भिद्यते PañcPā. 10. 24 (*on* i. 1. 1); अन्तरपरोक्षानुभवावगुण्ठित एव जागरणेऽप्यर्थोऽनुभूयते PañcPā. 11. 1 (*on* i.1.1)

अन्तरपाट (antarapāṭa) *n*. name of a village प्रायच्छच्छल्लिपाटकं ग्रामं। भानोरन्तरपाटं ग्रहणे EI. ii. 179. 30.

अन्तरपाट (antarapāṭa) *m*. name of a musical composition (to be played on a musical instrument) अन्तरोऽन्तरपाटश्च ...। अङ्गपाटश्च पैसारस्त्रिचत्वारिंशदित्यमी। उक्ताः श्रीकरणाग्रण्या प्रबन्धा वाद्यसंश्रयाः SaṁgīRa. iii. 428. 5 (6. 947); अन्तरं वादयित्वा चेदनिबद्धस्य वादनम्। क्रियतेऽन्तरपाटः स्यात्तदा निःशङ्कसंमतः SaṁgīRa. iii. 450. 8 (6. 1000)

अन्तरपात (antara-pāta) *m*. intermediate musical stroke, beat occurring in between शम्या तालो ध्रुवश्चैव संनिपातस्तथैव हि। ...निष्क्रामश्च प्रवेशश्च द्विकलौ परिकीर्तितौ। एषामन्तरपातास्तु पातसंज्ञाः प्रकीर्तिताः BhāvPra. (Śā.) 195. 16 (7)

अन्तरपातित (antara-pātita) *adj*. kept at a distance or apart (for beating time) रौद्रे सोऽथ स्वभावजः। ... पादैस्त्वन्तरपातितैः। ... गतिरेवं प्रकर्तव्या NāṭyaŚā. 12. 53.

अन्तरपान (antara-pāna) *n*. consuming (medicinal decoction) between (meals) भोजनान्तरपानाभ्यां दोषशेषं शमं नयेत् CaraS. vii. 12. 66 (comm.काषायपानम्); तत्रामेऽन्तरपानं तु कट्वम्ललवणैर्युतम् पाचनं शस्यते AṣṭāSaṁ. ii. 162. 9 (5.6)

अन्तरपानक (antarapāna-ka) *n*. consuming (medicinal decoction) between (meals) वातज्वरपरीताङ्गः पिबेदन्तरपानकम् AṣṭāSaṁ. ii. 180. 17 (6. 2); ii. 185. 21 (6. 2); स्त्रोतोविशोधनं प्रातस्तस्मिन्नन्तरपानकम्। विदध्याच्छागलं मूत्रं पानाभ्यङ्गौ च वर्जयेत् AṣṭāSaṁ. ii. 186. 11 (6. 2); धात्र्याः पयः शोध्यं पित्तश्लेष्महरौषधैः। शृतशीतं च शीताम्बुयुक्तमन्तरपानकम् AṣṭāHṛ. vi. 2. 71.

अन्तरपार्श्वतस् (antarapārśva-tas) *adv*. from the inner side इदानीं संप्रवक्ष्यामि साचिसूत्रस्य लक्षणम्। अपाङ्गात्कर्णपाल्याश्च स्तनस्यान्तरपार्श्वतः Mānaso. iii. 1. 384.

अन्तरपुरुष (antara-puruṣa) *m*. person (present) within, i.e. embodied soul स योऽतः ... सर्वेषां भूतानामन्तरपुरुषः स म आत्मेति विद्यात् AitĀ. iii. 2. 4 (35); पूरयत्यन्तरित्यन्तरपुरुषं अभिप्रेत्य Nir. 2. 3 (45. 15)

अन्तरपूजा (antara-pūjā) *f*. worship in the mind, mental worship, Vācaspatya.

अन्तरपूरुष (antara-pūruṣa) *m*. person (present) within, i.e. embodied soul मन्यन्ते वै पापकृतो न कश्चित्पश्यतीति नः। तांस्तु देवाः प्रपश्यन्ति स्वस्यैवान्तरपूरुषः ManuSm. 8. 85; ViṣṇuDhaP. iii. 327. 32; ŚukraNī. 4 (5).205.

अन्तरपौष्टिक (antara-pauṣṭika) *adj*. (used as noun) (rite)which promotes internal growth शान्तिकम् ऋक्षु पूर्वाह्णे यजुःष्वन्तरपौष्टिकम्। विन्यस्तम् MārkP. 102.17.

अन्तरप्रक्रान्त (antara-prakrānta) *adj*. gone over, i.e. described in the earlier (portion) अनेनान्तरप्रक्रान्तेन मार्गेण चौरनिग्रहं कुर्वाणः (राजा) यशः ... अश्नुते ManuBh. ii. 215. 12 (*on* 8. 343)

अन्तरप्रतिपत्ति (antara-pratipatti) *f*. knowledge (obtained) in the middle, intermediate knowledge तस्य जीवस्य यज्ञादिकर्तुरन्तरप्रतिपत्तौ अन्तरे मध्ये मुख्यप्रतिपत्तेर्मोक्षलक्षणाया अर्वाग् योग्यशरीरनिष्पत्त्यर्थम् AṇuBh. 168. 16 (*on* iii. 1. 1)

अन्तरप्रदेश (antara-pradeśa) *m*. intermediate space, i.e. middle corridor तच्छालानासिकं वापि कर्तव्याकृतिनासिका। अन्यान्तरप्रदेशे तु क्षुद्रनासीं(सि) प्रभूष्यते MānaSā. 33.271.

अन्तरप्रभव (antara-prabhava) *m*. person born of a lower, i.e. mixed caste भगवन्सर्ववर्णानां यथावदनुपूर्वशः। अन्तरप्रभवाणां च धर्मान्नो वक्तुमर्हसि ManuSm. 1. 2 (ManvaMu. संकीर्णजातीनाम्); अन्तरप्रभवाणां च स्वपितुर्गृहमिष्यते MatsyaP. 254. 32; वर्णेतरा अन्तरप्रभवा अनुलोमादयः BālaKrī. i. 6. 13 (*on* 1. 1); वर्णग्रहणं चात्र प्रदर्शनार्थम्। नान्तरप्रभवव्युदासार्थम् ManuBh. i. 82. 18 (*on* 2. 25); अन्तरप्रभवाश्चानुलोमप्रतिलोमाः ManuBh. ii. 332. 28 (*on* 10. 4); हनने चान्द्रायणम् ...। अन्तरप्रभवानां च सूतादीनां चतुर्द्विषट्। इति तदावृत्तिविषयम् Mitā. 450. 23 (*on* 3. 262); BālamBha. iii. 159. 4 (*on* 3. 262); तत्तद्वर्णनियतान् धर्मान् उपलक्षणं चैतद् अन्तरप्रभवधर्ममाश्रमधर्मांश्चेत्यपि ManvaVi. 117. 25 (*on* 2. 25)

अन्तरप्रलय (antara-pralaya) *m*. intermediate dissolution प्राकृता दैनंदिनी स्यादन्तरप्रलयादनु। जायते यत्रानुदिनं नित्यसर्गो हि संमतः AgniP. 20. 8; इत्येष कल्पसंहारो अन्तरप्रलयो द्विजाः। नैमित्तिकः BrahmP. 232. 11.

अन्तरप्रवेशिता (antara-praveśitā) *adj*. (*f*.) placed or thrust in between उत्तरदक्षिणयोरन्योन्यमवनिमण्डलादनुभागकलहादङ्गमि(भिग)तयोर्दिशोर्निवारयितुमन्तरप्रवेशितां भुजलतामिव महोदधेः ... अत्रभवतीमवाप्तोऽस्मि रेवेत्यपरनामवतीं नर्मदाम् UdaySuKa. 59. 12.

अन्तरप्रश्न (antara-praśna) *m*. question within (another question) अन्तरप्रश्नो भवति त्रिगुणमविवेकिविषय इत्यादिना ... प्रधानमुपलभ्यमानं महदादि च त्रिगुणमविवेक्यादीति च कथमवगम्यते SāṁkhyaKāBh. 10. 30 (*on* 14)

अन्तरप्रसादगानादि (antara-prasādagānādi) *adj*. pleasing song etc. (sung) at the interval अत्रुटितेन ह्यङ्गेन तावत्समासाभिनयो नो शक्यः कर्तुम्। काक्वादयोऽन्तरप्रसादगानादयश्च Loc. 139. 26 (*on* 3. 6)

अन्तरप्रस्तरान्वित (antaraprastarānvita) *adj*. consisting of internal entablature (प्रस्तरम्) अथवा चोर्ध्वतले सर्वे (सर्वस्मिन्) वेदिं कुर्यात्समञ्चकम्। कमलाख्य(क्ष)मिति प्रोक्तमन्तरप्रस्तरान्वितम् MānaSā. 24. 9; उन्नतौ कूटकोष्ठौ चेदन्तरप्रस्तरान्वितौ। एतद् गान्धारमित्युक्तमष्टाश्रं वा गलं शिरः (सौधम्) MayaMa. 21. 59.

अन्तरप्रस्तरोपेत (antaraprastaropeta) *adj*. consisting of internal entablature हारान्तरस्य मध्ये तु कुड्यं कुम्भलतान्वितम्। ... उन्नतं कोष्ठकं यदि। अन्तरप्रस्तरोपेतमेतद् विपुलसुन्दरम् MayaMa. 20. 10; 20. 12; 20. 13.

अन्तरप्राणजन्मन् (antaraprāṇa-janman) *adj*. arising from intervening digits of time अस्तकालविलग्नेन्द्वोरन्तरप्राणजन्मना। कालेन लग्नशीतांशू कृत्वा भूयोऽन्तरासवः। पूर्वकालेन ते योज्याः MaBhāsk. 6. 29 (comm. तथा च तद् वाक्यम् लग्नेन्द्वोरन्तरकला इह प्राणा विवक्षिताः)

अन्तरप्रेक्षक (antara-prekṣaka) *adj*. looking for weak point ततो देवैः सहस्राक्षो ज्ञात्वा तस्यास्तमुद्यमम्। दित्याश्चैवं महाभागा अन्तरप्रेक्षकोऽभवत् PadmP. ii. 25. 8.

अन्तरप्रेक्षिन् (antara-prekṣin) *adj*. **1** looking for opportunity or occasion स निश्चयं पापः कृत्वा दुर्योधनस्तदा। नित्यमेवान्तरप्रेक्षी भीमस्यासीन्महान्मनाः MahāBhā. i. 119. 28; अस्य बाणानपरानिन्द्राशनिसमस्वनान्। भारद्वाजोऽन्तरप्रेक्षी प्रेषयामास संयुगे MahāBhā. vii. 93. 5; **2** looking for weak point कलिः ...। स नित्यमन्तरप्रेक्षी निषधेष्ववसच्चिरम् MahāBhā. iii. 56. 2; दृष्ट्वा ततस्तं युधि संप्रहारं परस्परस्यान्तरप्रेक्षिणो ये। ... विस्मयमभ्यगच्छन् MahāBhā. viii. App. I. 39 (10); कुमारस्यान्तरप्रेक्षी बभूव बलवृत्रहा MahāBhā. xii. 31. 26; xii. 31. 29; नैर्ऋतो नरको नाम ... दितिनन्दनः। तव चैवान्तरप्रेक्षी जहि तम् HariVaṁ. 91. 35; देवान्सर्वान्विजित्याजौ बकभ्राता रणोत्कटः। आडिर्नामान्तरप्रेक्षी सततं चन्द्रमौलिनः MatsyaP. 156. 12; **3** looking for the absence स रामस्यान्तरप्रेक्षी रावणस्तदनन्तरम्। आससाद ततः सीताम् Rāmā. iii. 853 *(1); रक्षसामन्तरप्रेक्षी तस्थावाश्रित्य काननम् Rāmā. v. 125 *(1)

अन्तरप्रेप्सु (antara-prepsu) *adj*. **1** desirous of obtaining an opportunity or occasion दुर्योधनस्तदा। नित्यमेवान्तरप्रेक्षी (v.l. °प्रेप्सुः) भीमस्यासीत् MahāBhā. i. 119. 28; यद्मामन्तरप्रेप्सुर्विचक्रो दानवो हतः HariVaṁ. 105. 8; **2** desirous of obtaining weak point कलिः ... स नित्यमन्तरप्रेक्षी(v.l. °प्रेप्सुः) निषधेष्ववसच्चिरम् MahāBhā. iii. 56. 2; उभौ ... अन्योन्यस्यान्तरं प्रेप्सू (v. l. °न्यमन्तरप्रेप्सू) MahāBhā. iv. App. I. 11 (5); भ्रातरौ बलिनां वरौ। अन्योन्यस्यान्तरप्रेप्सू प्रचक्रातेऽन्तरं प्रति MahāBhā. ix. 56. 11; त्वम् ...। राघवस्यान्तरप्रेप्सुस्तथैनं नाभिपद्यसे Rāmā. iii. 57. 17; तस्याश्चैवान्तरप्रेप्सुरभवत्पाकशासनः HariVaṁ. 3. 105; ViṣṇuP. i. 21.36.

अन्तरफल (antara-phala) *n*. result, area in the form of distance or difference स्पष्टं पश्यति यस्मात् मध्यादूनाधिकं स्वकक्षायाम्। तस्मात्तदन्तरफलमृणं धनं वा ग्रहे मध्ये BrāhmSphuSi. 14. 12 (comm. स्फुटमध्यग्रहयोरन्तरं फलम्)

अन्तरबद्धलक्षा (antarabaddha-lakṣā) *adj.* (*f.*) whose attention is fixed inside or inwards बाह्येऽपि परिजने जातानुतापा विपक्षवर्गेऽपि भावितप्रीतिः प्राङ्मुखीभूय सादरमन्तरबद्धलक्षा कृताञ्जलिरवदम् TilaMañ. 306. 7.

अन्तरबाहु (antara-bāhu) *m.* inner arm, i. e. the forefoot (of an animal) अष्ठीव्युगुहभोगप्रत्यङ्गसगुहान्तरबाहुग्रीवाविभागापस्करे ... मर्मणां सप्तोत्तरशतम् Hastyāyur. 501. 18 (3. 20)

अन्तरबाह्यतस् (antarabāhya-tas) *adv.* as internal, i. e. superstratum and as external, i. e. substratum पृथिव्यादिषु यः पूर्वं व्याख्यातोऽन्तरबाह्यतः। आत्मैव स इति ज्ञेयः BṛĀraUBhVā. ii. 5. 35.

अन्तरभक्त (antara-bhakta) *adj.* (medicine) consumed at the intervening time (between morning and evening meals) न ह्यप्राप्तातीतकालमौषधं यौगिकं भवति तस्य त्वेकादशधावचारणम्। तद्यथा। अभक्तम् ... अन्तरभक्तं सामुद्गम् ... निशि च AṣṭāSaṁ. i. 122. 15 (1. 23); अन्तरभक्तं यत्पूर्वाह्णभक्ते जीर्णे मध्याह्ने भेषजमुपयुज्यते तस्मिंश्च जीर्णे पुनरपराह्णे भोजनम् AṣṭāSaṁ. i. 123. 3 (1. 23); अन्तरभक्तमौषधमथाग्निकरं परिपीयते KalyāKā. 20. 19; cf. **अन्तरपान**, **अन्तरपानक.**

अन्तरभजिता (antara-bhajitā) *adj.* (*f.*) divided by the difference विलिप्तास्तयोः। भुक्त्योरन्तरभजिताश्च घटिका यातैष्यकाः स्युः क्रमात् GrahaLā. 2.8.

अन्तरभवक्रम (antarabhava-krama) *m.* order of birth in the intermediate class (of gods) श्रुतिः ... तथा त्रयस्त्रिंशतीं वितरदन्तरभवक्रमेण कतम एको देव इति प्राणा इति प्राणैकरूपतां देवानां दर्शयति ŚaṅkaVi. (Ā.) 252. 15.

अन्तरभवत् (antara-bhavat) *adj.* occurring in between, intermediate अष्टाष्टाङ्गुलवृद्धितोऽन्तरभवद्योनिप्रभेदेष्वथ। ... प्रासादेषु विशिष्टजातिषु निजेष्टं कारयेत् TantrSa. 2. 1.

अन्तरभवदेह (antarabhava-deha) *m.* body produced in the intermediate state of existence (between death and rebirth) अन्तराभवदेहकल्पनायाः प्रमाणाभावादन्तरभवदेहमनुप्रविश्य विज्ञानसंतानः परलोकं गच्छतीति मन्यते BrahmSūBh. (Bhā.) 122. 14 (*on* ii. 2. 25); cf. **अन्तराभव.**

अन्तरभाव (antara-bhāva) *m.* existence in between मध्ये त्वन्तरान्तरे। अन्तरेणान्तरभावे ŚabdaRa. (Su.) 6. 107.

अन्तरभावदृष्टि (antarabhāva-dṛṣṭi) *f.* view of existence of distinction or difference लोकानितो व्रजतमन्तरभावदृष्ट्या पापीयसस्त्रय इमे रिपवोऽस्य यत्र BhāgP. iii. 15. 34.

अन्तरभावना (antara-bhāvanā) *f.* subtractive composition अन्यज्यासाधने सम्यगियं ज्याभावनोदिता। समानभावना चैका तथान्यान्तरभावना Golā. 283. 7 (16. 23); योगान्तरभावनया भुजज्यासंबन्धस्य तुल्यत्वात् SiddhāTaVi. 66. 15; भुजज्याकोटिज्यात्रिज्याचापानामन्तरभावनयावश्यं चापान्तरतुल्यत्वदर्शनात् SiddhāTaVi. 66. 24.

अन्तरभावनाजनित (antarabhāvanā-janita) *adj.* arisen from, i. e. determined through a subtractive composition एते योगान्तरभावनाजनिते कनिष्ठे सिद्धे त्रिज्यावर्गवर्गक्षेपे क्षेपघातस्य क्षेपकत्वेनोक्तत्वात् SiddhāTaVi. 65. 7.

अन्तरभावनार्थम् (antarabhāvanārtham) *adv.* for the sake of subtractive composition दोर्ज्यां च कोटिज्यां प्रकल्प्य अन्तरभावनार्थं न्यासः SiddhāTaVi.89.7.

अन्तरभावनोक्त (antarabhāvanokta) *adj.* stated in subtractive composition तद्विघ्नघातस्यर्णत्वं प्रकल्प्य यद्यानीयते तर्ह्यन्तरभावनोक्तमपि स्पष्टमुत्पद्यते SiddhāTaVi. 69. 7.

अन्तरभाषा (antara-bhāṣā) *f.* kind of singing a melodious composition कतमान्तरभाषा वै कतमा स्यादनुक्रमात् BṛDeśī. 105. 1; रागविवेकाख्येऽध्याये वक्ष्यामहे ... ततोऽप्यन्तरभाषाश्च रागाङ्गाण्यखिलान्यपि SaṁgīRa. i. 139. 3 (1 (1). 38); चतस्रोऽन्तरभाषाः स्युः शार्ङ्गदेवस्य संमताः SaṁgīRa. ii. 13.4 (2 (1). 43); रागान् उद्दिशामि क्रमात् ... तथैवान्तरभाषाख्या रागाङ्गाख्याः CaturDa. 5. 19.

अन्तरभाषिका (antara-bhāṣikā) *f.* kind of singing a melodious composition भाषा चैव विभाषा च तथा चान्तरभाषिका तिस्रस्तु गीतयः प्रोक्ताः BṛDeśī. 82. 15; ग्रामरागोद्भवा भाषाभ्यश्च विभाषिकाः। विभाषाभ्यश्च संजातास्तथा चान्तरभाषिकाः BṛDeśi. 105. 11; ककुभे ... एकान्तरभाषिका। शालवाहनिका SaṁgīRa. ii. 11. 1 (2 (1). 23); भाषाविभाषयोरन्तरुत्पन्नान्तरभाषिका Bharatakośa.

अन्तरभिलाप (antar-abhilāpa) *m.* utterance of sounds within, i.e. unbroken self-expression प्रत्यवमर्शश्च आ(v. l. अ)न्तराभिलापात्मकशब्दनस्वभावः PratyabhiVi. i. 252. 3 (*on* i. 5. 13)

अन्तरभिशामन (antar-abhiśāmana) *n.* internal appeasement or calming योग एष कथितो विमुक्तिदश्चित्तवृत्तिविनिरोधनं हि यत्। तच्च बाह्यविषयान्निवर्तनाच्चेत-सोऽन्तरभिशामनं मतम् Vidvanmo. 7. 1.

अन्तरभू (antara-bhū) *f.* **1** interior region इदृशं तत्र गत्वैव द्रक्ष्यसे मां पितामह। नीलाद्रेरन्तरभुवि कल्पन्यग्रोधमूलतः SkandP. ii (2). 1. 38; **2** region under the earth अन्तरभूकृतवासाननयोः ... चारणवर्गानहर्निशं कलये LalitāStaRa.39.

अन्तरभू (antara-bhū) *adj.* existing inbetween or in the middle अकूबा-(पा?)रायेति प्रणवनमसोरन्तभुवाणुना आवाह्य ... यजतु TantrSa. 1.77 (comm. मध्यस्थेन)

अन्तरभूत (antara-bhūta) *adj.* existing within सर्वान्तरस्य परमात्मनो ह्यन्तरभूतं तत्त्वान्तरमसंभावितम् ŚrutaPra. ii. 35. 17 (*on* i. 3. 13)

अन्तरभूमि (antara-bhūmi) *f.* **A** intermediate floor or distance युतदृष्टि-गृहौच्च्यहता ह्यन्तरभूमिर्दृगौच्यसंगुणिता BrāhmSphuSi. 19. 17 (comm. गृहस्य नरस्य च मध्ये यान्तरभूमिः); **B** middle region मुक्ताजालकलापान्तर्गतास्वन्तरभूमिषु। कचत्यपगतस्पन्दं तोये श्रोतुमिवास्थिते। आसीत् ... ध्वनिः YogVā. vi (1). 1. 9; **Ci** inner ground, inner pedestal अन्तरभूमौ ...। आसीनम् ... अभिनव-सिन्दूरगौरमहमीडे LalitāStaRa. 71; **Cii** inner chamber, sanctum sanctorum द्वारं समुद्घाट्य ... विवेशान्तरभूमिभागम् ŚaṅkaDigVi. (Mā.) 16.81.

अन्तरभेदभाज् (antarabheda-bhāj) *adj.* having various internal divisions, i.e. branches विद्या विदर्भेन्द्रसुताधरोष्ठे नृत्यन्ति कत्यन्तरभेदभाजः NaiṣC. 7.41.

अन्तरभ्युपगमकल्प (antarabhyupagama-kalpa) *adj.* of the nature of consciousness within प्रकाशस्य ... य आत्मा जीवितभूतः सारस्वभावः ... अन्तरभ्युपगमकल्पः ... असौ विकल्पो न भवति PratyabhiVi. i. 302. 6 (*on* i. 6. 1) (Bhāsk. स्वात्मनि यः स्वात्माङ्गीकारः तद्रूपः)

अन्तरभ्रम (antara-bhrama) *m.* inner circle गृहीत्वा सूत्रमानं तु ... त्रिस्थं पुनरेव हि। संस्पृशेत् संगमं यद्वै त्वरातुर्येऽन्तरभ्रमे PauṣkS. 8. 113.

अन्तरम् (ántaram) *adv.* **1A** within यदन्तरं तद्बाह्यं यद्बाह्यं तदन्तरम् AV. ii. 30. 4; यथा वै प्रजा एवं वैश्वदेवं तद्यथान्तरं जनता एवं सूक्तानि AitBr. 13. 7 (369) [KośaKaTa. 2. 2957]; **1B** between ह(हृ)न्नाभ्योरन्तरं गुल्मः पाकं गच्छति पैत्तिकः BhelaS. 136. 6 (6. 5); वसध्वमेवान्तरमद्रिमुख्ययोर्हिमा-द्रिकालञ्जरयोः पुलिन्दाः VāmaP. 76. 25; जानुनोरन्तरं द्वावपि पाणी ... समदेशौ ... अवस्थितौ बद्ध्वा CaturCin. iii (1). 1206. 16; **2** afterwards कुपिता मलाः। अपस्माराय कुर्वन्ति वेगं किंचिदथान्तरम् CaraS. vi. 10. 13 (1941 Ed.); RugVi. 21. 8 (comm. उत्तकालेभ्योऽर्वागपि); **3** without, except पूर्वोक्ताद्दैवाद्यर्चनशिष्टाद् ब्राह्मणकामनादिनिमित्ताद् अन्तरं यद् भक्षणं (मांसस्य) सोऽविधिः ManuBh. i. 436. 22 (*on* 5. 33); **4** near मणिमालां परिज्ञाय स राजपुरुषैर्बलात्। नृपतेरन्तरं नीतः BṛKathāMañ. 15. 211; व्याघ्रीपार्श्वमुपैति रङ्कुतनयः सर्पोऽन्तरं बर्हिणः। ... चण्डातपे भूतले PadyaVe. 518.

अन्तरमञ्जरी (antara-mañjarī) *f.* internal flower-bud or parallel line विजयभद्रस्य ... लक्षणम् ...। त्रिपदाः कलशास्तेषां मध्यगान्तरमञ्जरी SamarāSū. 57. 195.

अन्तरमणिसंयुक्ता (antaramaṇi-saṁyuktā) *adj.* (*f.*) consisting of, i.e. studded with gems or beads in between नक्षत्रमालेति। अन्तरमणिसंयुक्ता मणिसोपानं सुवर्णगुलिकैर्वा BṛSaṁ. 81. 35.

अन्तरमण्डल (antara-maṇḍala) *n.* interior or inner orb विस्तारं त्रिगुणं चैव पृथिव्यन्तरमण्डलम् MatsyaP. 124. 17.

अन्तरमन्मथा (antara-manmathā) *adj.* (*f.*) having Cupid, i. e. love in the mind क्रीडाशुकं हरहरेति शनैः प्रवृत्तौ यत्नेन पाठयितुमन्तरमन्मथापि। ... अवोचत् BhikṣāKā. 22. 6.

अन्तरमल (antara-mala) [w. r. for **अन्तरदल**], ŚilpaRa. ii. 24. 87.

अन्तरमात्यकोप (antaramātya-kopa) *m.* wrath of officer in the (king's) palace अन्तरमात्यकोपश्चान्तःकोपात् ArthŚā. iii. 12. 3 (8. 2); मन्त्र्यादिवर्जानामन्तर-मात्यानामन्यतमकोपोऽन्तरमात्यकोपः ArthŚā. iii. 62. 6 (9. 3) (comm. दौवारिकान्त-र्वंशिकादयः)

अन्तरमान (antara-māna) *n.* **1** dimension equal to the difference नृपसेना-पतिगृहयोरन्तरमानेन कोशरतिभवने BṛSaṁ. 53. 14; **2** intermediate measurement युक्तमन्तरमानं स्यात्पृथक्पादोनमङ्गुलम् ... दण्डे तु स्यात्मितिर्मुनेः SaṁgīRa. iii. 353. 14 (6. 630)

अन्तरमार्ग (antara-mārga) *m.* **1** act of looking out for defect or weakness अन्तरं च प्रहारेषु तर्कयन्तौ महाद्युती। राजन्नन्तरमार्गस्थौ स्थितौ MahāBhā. vi. 48. 54; **2** inner path (तौ) पुनरन्तरमार्गस्थौ माण्डलानि विचेरतुः MahāBhā vii. 14. 27; ix. 11. 19; **3A** type of dramatic performance (indicating mutual distinction) येऽपि चान्तरमार्गास्तु तन्त्रीवाक्करणैः कृताः। तेषु सूची प्रयोक्तव्या भाण्डेन सह ताण्डवे NāṭyaŚā. 4. 329; अन्तरं परस्परवैलक्षण्यं मान्यते (मृग्यते) येनोपायेन सोऽन्तरमार्गः AbhinBhā. i. 204. 14 *(on* 4. 318); **3B** concordance of fundamental or basic notes, a type of Jāti अन्तरमार्गस्य लक्षणं यथा जातिषु क्वचिद्वा अनंशो विनाल्पः BṛDeśī. 59. 17; ग्रहांशतारमन्द्राश्च ...। एतान्यन्तरमार्गेण सह लक्ष्माणि जातिषु SaṁgīRa. i. 180. 3 (1 (7). 30); न्यासादिस्थानमुज्झित्वा मध्ये मध्येऽल्पतायुजाम्। स्वराणां या विचित्रत्वकारिण्यंशादिसंगतिः। ... कृता सान्तरमार्गः स्यात् प्रायो विकृतजातिषु SaṁgīRa. i. 191. 4 (1 (7). 53); **4** dense or difficult path दधुर्वनभुवोऽन्तरमार्गगतां श्रियम् HarVi. 3. 47 (comm. गहनः प्रदेशः। तद्गतां श्रियम्)

अन्तरमार्गण (antara-mārgaṇa) *n.* concordance of fundamental or basic notes अन्तरमार्गणमित्यन्तरमार्गणस्य(र्गस्य) लक्षणम् AbhinBhā. iii. 49.7 *(on* 28. 75)

अन्तरमार्गत्व (antaramārga-tva) *n.* the state of being the concordance of fundamental or basic notes कार्मारव्यां भवन्त्यंशा निषादरिपधैवताः। बहवोऽन्तरमार्गत्वादनंशाः परिकीर्तिताः SaṁgīRa. i. 252. 3 (1 (7). 101)

अन्तरमार्गप्रयोग (antaramārga-prayoga) *m.* use of the concordance of fundamental or basic notes कार्मारव्यां गान्धारस्य सर्वस्वरसंगत्या बहुत्वेनान्तरमार्गप्रयोगः BṛDeśī. 59. 20.

अन्तरमितानन्द (antar-amitānanda) *adj.* having boundless or unlimited joy in the heart एतस्मिन्पुनरन्तरेऽन्तरमितानन्दः स भैमीनलावाराद्धुं व्यधित स्मरः श्रुतिशिखावन्दारुचूडं धनुः NaiṣC. 17. 221.

अन्तरमिति (antara-miti) *f.* measurement of distance मूलकाग्रजनिते किल वेधे ...। लम्बके भुवि तदन्तरभूमिर्बाहुरन्तरमितिस्त्विह कोटिः SiddhāTaVi. 405. 7.

अन्तरमित्र (antar-amitra) *adj.* having enemies inside or in the inner circle कलत्रगर्ह्यन्तःशल्ययोः कलत्रगर्ह्युन्मुच्य कलत्रं युध्येत नान्तःशल्यमन्तरमित्रम् ArthŚā. iii. 36. 10 (8. 5) (comm. अन्तर्गतशत्रुकम्)

अन्तरमुक्तकुसुमस्रज् (antaramukta-kusumasraj) *f.* garland of flowers suspended in the middle तुहिनतरुविनिर्मितवलीकान्तरमुक्तकुसुमस्रक्सौरभाधिवास्यमानसुरतावसानिकोपकरणवस्तुनि यन्त्रसुन्दरमन्वदिशम् YaśasCam. ii.29.2.

अन्तरमुख (antara-mukha) *n.* kind of surgical instrument (*lit.* having an opening in the middle) शस्त्राणि षड्विंशतिर्भवति। दन्तलेखन° ... °अन्तरमुख° ... नखशस्त्राणि AṣṭāSaṁ. i. 170. 19 (1. 34)

अन्तरमूर्धन् (antara-mūrdhan) *m.* top summit or peak परमो ध्रुवः। एक एव भ्रमत्येष मेरोरन्तरमूर्धनि MatsyaP. 127. 28.

अन्तरमूल (antara-mūla) *n.* square-root of the difference (between two numbers) इष्टवर्गीकृतराशिद्वयात् इष्टघ्नादन्तरमूलादिष्टानयनसूत्रम् GaṇiSāSaṁ. 5. 280½ (1); तज्ज्या मध्यज्या स्यात् सोदयजीवाहता गभज्याप्ता। फलमध्यज्याकृत्योरन्तरमूलं स दृक्क्षेपः ĀryaSi. 6. 5 (94); स्वाबाधाभुजकृत्योरन्तरमूलं प्रजायते लम्बः Līlā. 164; इनावनीव्यासवियोगखण्डं भुजोऽर्ककर्णः श्रवणश्च कोटिः। तद्वर्गयोरन्तरमूलमेवं जात्यं हि भूभानयनप्रसिद्ध्यै SiddhāTaVi. 277. 22.

अन्तरमूलभक्ता (antaramūla-bhaktā) *adj. (f.)* divided by the square-root of the difference (between two numbers) कुखण्डकार्कश्रवणौ तु यौ स्तस्तद्वर्गयोरन्तरमूलभक्ता। तयोर्हतिश्चावनिखण्डहीना स्याद्योजनैः पृष्ठदृगौच्यमानम् SiddhāTaVi. 165. 3; तद्वर्गयोरन्तरमूलभक्ता नतासुजाता किल कोटिजीवा SiddhāTaVi. 365. 20.

अन्तरमृताङ्कुरिका (antar-amṛtāṅkurikā) *f.* sprout of nectar, i. e. bliss in the heart संतोषामोदमधुरा प्रथमोदेति भूमिका। ... अन्तरमृताङ्कुरिकेव सा AkṣU. 28.

अन्तरमृत्तिका (antara-mṛttikā) *f.* soil or mud intervened i.e. separated (by water) मूत्रोत्सर्गे शुद्धिरेषा पुरीषस्याप्यनन्तरम्। ... पञ्चापाने मृत्तिकाः स्युस्तथैवान्तरमृत्तिकाः PāraS. 2. 46; तिस्रो मृदो लिङ्गशौचे ग्राह्याः सान्तरमृत्तिकाः। ... सान्तरा जलेन व्यवहिताः VīraMi. (Āhnika.) 54. 15.

अन्तरम्बुस्थ (antarambu-stha) *adj.* remaining inside or underneath the water विरेजुरन्तरम्बुस्थाः सौवर्णमणिभूषिताः। ... मीनयूथाः सहस्रशः VāyuP. i. 39. 16.

अन्तरम्भोधि (antar-ambhodhi) [w. r. for **अन्तराम्भोधि**], PāṇḍaC. 18. 79.

अन्तरय (antaraya-) *denom.* **1A** to obstruct **B** to go between, i.e. to interfere or to interrupt **2** to cause to move aside, to separate **3** to cover or to conceal, to hide (pass.) to be covered or concealed **4Ai** to cause to disappear, to submerge **ii** to overcome, to surpass, to eclipse **B** (pass.) to be crossed over **C** to cause to lose, to remove **5** to delay **1A** to obstruct अहोरात्राभ्यामेव तदसुरानन्तर्यन्ति (v. l. अन्तरयन्ति) KauṣīBr. 12. 4 (53. 5); यद्वैवैना नान्तर्यन्ति (v. l. °न्तरयन्ति) नेदच्युतं यज्ञस्य प्रियं देवानामन्तरयामेति KauṣīBr. 23. 4 (105. 5); यद्यान्तरयते शोकमानन्दैकस्वभावतः BṛĀraUBhVā. iv. 3. 1351; श्रान्तमन्तरयामास मार्गवाहनिरङ्गदम्। रुन्धानस्त्रिशिरःसेनां तामनन्तां कृतान्तवत् RāmC. 35. 10; स्वभावस्वच्छानां विपदपि सुखं नान्तरयति SubhāRaK. 21. 28; **1B** to go between, i.e. to interfere or to interrupt निर्भिन्नहृदयावेगः शिशुजनेनाप्युकम्पितोऽस्मि। भवतु तावदन्तरयामि UttaRāC. 6. 30 (3); हा कटु साध्विति वादैरन्तरयति परसुभाषितश्रवणम् KuṭṭaMa. 72; नो चेत्कथं नीतिशास्त्रकथां स्ववाञ्छाभिरन्तरयति Hitopa. 3. 114 (2); विस्तरतस्तु कथ्यमाना पराणि कार्यान्तराण्यन्तरयिष्यति TilaMañ. 114.7; स्वयमुक्तसाधुवादैरन्तरयति गायना गीतम् KalāVi. 7. 7; क्रियामन्तरयति व्यवधत्त इति क्रियान्तरः SiddhāKau. 584B. 20 (*on* iii. 4. 57); भवतु। किमनया वृथासंवादकथनया। प्रस्तुतकार्यसाधनार्थमिमां तावद् अन्तरयामि Jīvān. 33. 4; **2** to cause to move aside, to separate यस्याहमस्मि न तमन्तरयामि KātyŚS. iv. 7. 18; अधुनान्तरयसि मामिति कोपादिव वारबाणमभिरामम्। ...वल्गन्त्या हन्ति हार उच्छलितः KuṭṭaMa. 900 (comm. सावकाशं करोषि); हरिचन्दनोऽसौ श्रीवासमन्तरयति स्वकरेण मन्दम् CaitaCan. 257. 9 (10); **3** to cover or to conceal, to hide स च वराकः ... शरज्ज्योत्स्नामन्तरयति AvantiKa. 74. 8; गुञ्जास्रजं गोपकुमारवीराः। मुक्ताफलैरन्तरयांबभूवुः Yādavā. 5. 27; 13. 82; अस्त्रान्तरैरन्तरयांचकार दशाननः संनिहितावसानः। मुहूर्तमस्त्राणि रघूद्वहस्य मन्दक्रुधः काम इवेश्वरस्य RāmC. (App. 1) 39. 56; सौमित्रिरिन्द्रारिमवेक्ष्य तद्गीर्बद्धक्रुधं रोपितरोषचापम्। विभीषणं तत्क्षणमादरेण स्वविग्रहेणान्तरयांचकार RāmC. (App. 2) 39. 42; बिभर्ति गर्तान् मध्नाति, वृक्षान् स्थगयति स्थलीः। गिरीनप्यन्तरयति ... वारिधिः TriṣaŚaPuC. ii. 6. 343; (pass.) to be covered or concealed अन्योन्यदूरपरिषक्तविशालसान्द्रशाखाशतैस्तरुभिरन्तरयांबभूवे। उद्भूतघोरविरहज्वरलङ्घितस्य चन्द्रातपः स खलु दाशरथेरपथ्यः RāmC. 2. 104; **4Ai** to cause to disappear, to submerge यियासितस्तस्य महीध्ररन्ध्रभिदापटीयान्पटहप्रणादः। जलान्तराणीव महार्णवौघः शब्दान्तराण्यन्तरयांचकार ŚiśuVa. 3. 24; सुरसुन्दरीणां मञ्जूनि मञ्जीरझणत्कृतानि शब्दान्तराण्यन्तरयांबभूवुः Rāgh. 17. 52; **4Aii** to overcome, to surpass, to eclipse महोक्षाः ...। दर्पस्य देहा इव योगसिद्धा दन्तावलानन्तरयांबभूवुः Yādavā. 5. 63 (comm. युद्धे तिरश्चक्रुः); पौराः प्रहर्षोपनतैः प्रणादैः अम्भोनिधेरन्तरयन्ति घोषान् Yādavā. 18. 115 (comm. तिरस्कुर्वन्ति); **4B** (pass.) to be crossed over तैर्वैजयन्ती वनराजिराजिभिर्गिरिप्रतिच्छन्दमहामतङ्गजैः। बह्व्यः प्रसर्पञ्जनतानदीशतैर्भुवो बलैरन्तरयांबभूविरे ŚiśuVa. 12. 29; **4C** to cause to lose, to remove उद्दिश्य च किमालम्बनमुदयसुन्दरीकृतामस्य मन्मथ(व्य)थामन्तरयामि UdaySuKa. 123. 25; अमुना रसान्तरेण राज्ञः सुदूरमन्तरयामि प्रस्तुतमनङ्गपीडाकरं रसम् UdaySuKa. 125. 4; अयि देव देव, किंनु प्रश्रयेण मम भक्तिमन्तरयसि TripuDi. 2. 8 (13); प्रकृतरसान्तरं के नान्तरयन्तु उभयथैव भगवत आह्निकविगमः CaitaCan. 249. 18 (10); हन्त न किमु मन्थरयसि संततमभिजल्पम्। दन्तरोचिरन्तरयति संतमसमनल्पम् StavMā. 266. 27; **5** to delay क्षणं च देवस्य महावीरसंवादगोष्ठीयमृष्यमूकयात्रामन्तरयिष्यति AnargharRā. 5. 31 (1); अन्तरयति तन्मनसामाहारादिक्रियोचितं कालम् KuṭṭaMa. 959; प्रयाणव्यापारं तुहिनपतनेनान्तरयति Subhāṣi. 1846.

अन्तरयण (antar-ayaṇa) *n.* [P. viii. 4. 25; JaineVyā. 415. 28 (*on* v. 4. 108); PadMañ. *on* KāśiVṛ. *on* P. i. 4. 65 (603. 19); Prasā. i. 679. 25; SiddhāKau. 576B. 21 (*on* viii. 4. 25)] **1** obstacle, obstruction वेश्मान्तर्हणनं कोपान्मम शत्रोः करिष्यतः। मा कार्षीरन्तरयणम् Bhaṭṭi. 9. 103; अयननकारस्य चान्तःशब्दादुत्तरस्य णकारादेशो भवति अदेशाभिधाने। अन्तरयणं वर्तते। अन्तरयणं शोभनम् KāśiVṛ. *on* viii. 4. 25; **2** act of going between, i.e. interfering अन्तरयनतां जहौ सुराष्ट्रा येनान्तरयणवारिणा जनानाम्। सोऽन्तर्हणनात्कथं ह्युपेक्ष्यः DvyāśraKā. 4. 31 (comm. जनानामन्तरयणं मध्ये गमनम्)

अन्तरयत् (antarayat) *adj.* **1A** making intermediate space भर्तृगोत्रेण नाम्ना च मातुः कुर्यात्सपिण्डनम्। तूष्णीं दम्पतिपिण्डाभ्यां कुशैरन्तरयन् पितॄन् BṛhaspaSm. 329. 28; **1B** causing to move aside, separating दारानन्तरयद्भिरात्मवपुषा नष्टं च विद्याधरैः BālRā. 8. 47; **2** covering or concealing, hiding तमुपेत्य जगाद मारुतिर्मरुतां शृण्वति सादरं गणे। गुरुशस्त्रहतान्वलीमुखानखिलानन्तरयन् स्ववर्ष्मणा RāmC. 33. 65; दशवदनस्तदा दशदिगन्तरमन्तरयन्। समरमुखे सखेलपदचङ्क्रमतो विदधे RāmāCam. 6. 49; अधरे विनिवेश्य वंशनालं

विवराण्यस्य सलीलमङ्गुलीभिः मुहुरन्तरयन् KṛṣṇaKa. 2. 14; **3A** keeping away, i.e. warding off नृपस्यान्तरयन्वैरिप्रहतिं बाणवंशजः। निहतस्तत्र शृङ्गारसीहः सादी शसस्यकः RājTa. (Ka.) 8. 528; **3B** going between, i.e. interfering or interrupting ध्यानादन्तरयन्सनन्दनमुखान् विस्मापयन्वेधसम्। ... बभ्राम वंशीध्वनिः VidaMā. 1. 27.

अन्तरयन (antarayana) *m*. [P. viii. 4. 25] name of a country or region णो भवति ... वेति व्यवस्थितविभाषाभिसंबन्धादिह न भवति। अन्तरयनो देश इति JaineVyā. 415. 28 (*on* v. 4. 108); अयनं च। ... अदेश इत्येव। अन्तरयनो देशः KāśiVṛ. *on* viii. 4. 25; SiddhāKau. 576B. 21 (*on* viii. 4. 25); अन्तःशब्दात् परस्यादेशे णत्वं स्यात् ... देशे तु अन्तरयनो देशः Prasā. i. 679. 25.

अन्तरयनता (antarayana-tā) *f*. the state of being that which has (easy) access in the middle अन्तरयनतां जहौ सुराष्ट्रा DvyāśraKā. 4. 31 (comm. अन्तर्मध्ये सुस्थत्वेन आप्यते गम्यते यस्यां सान्तरयनी तद्भावं जहौ)

अन्तरयुक्त (antara-yukta) *adj*. added to the difference अन्तरयुक्तं हीनं तद्गुणकारद्वयं दलितम् Āryabh. 2. 24 (41); योगेऽन्तरयुक्तोने दलिते संक्रमणराशी स्तः ĀryaSi. 15. 21 (149); श्रुतिवर्गाद्विगुणाद्भुजकोटिवियोगस्य कृत्योनात्। पदमन्तरयुक्तोनं द्विष्ठं दलितं भुजः कोटिः ĀryaSi. 15. 59 (161); तयोर्धनर्णयोरन्तरयुक्तो ज्यापंचमांशः स्फुटो ज्यापंचमांशः स्यात् SiddhāTaVi. 86. 21.

अन्तरयुत (antara-yuta) *adj*. added to the difference योगोऽन्तरयुतहीनो द्विहृतः संक्रमणमन्तरविभक्तं वा BrāhmSphuSi. 18. 36.

अन्तरयोग (antara-yoga) *m*. association of distance कथा ह्यन्तरयोगेन स्थिता रत्नावली यथा PadmP. (Ra.) 26. 45.

अन्तरयोजन (antara-yojana) *n*. intervening particular measure of distance (equal to four Krośas or nine miles) अन्तरयोजनानि। इन्द्रैर्विभक्तानि लवाश्च तेषां ज्या दृग्ज्यका सा सुधियावगम्या SiddhāTaVi. 371. 8; 373. 8; अन्तरयोजनानि ज्ञात्वा ...। दिग्भागकान् यो वदति ध्रुवं सः SiddhāTaVi. 372. 2.

अन्तरयोजनगण (antarayojana-gaṇa) *m*. multitude of intervening particular measures of distance (equal to four Krośas or nine miles) याम्योत्तरनगराक्षांशान्तरगुणितः कुमध्यमः परिधिः। वतनाप्तस्तत्पुरयोरन्तरयोजनगणो भवति ĀryaSi. 1. 59 (40)

अन्तररचित (antara-racita) *adj*. arranged, i.e. placed in between इदमपि चान्तररचितं रक्तांशुकमावयोः संध्या ViddhaŚā. 4. 11.

अन्तरर्थ (antar-artha) *m*. internal object रागादिवृद्धिः पुष्ट्यादेः [कदा]चित् सुखदुःखजा। तयोश्च धातुसाम्यादेरन्तरर्थस्य संनिधेः। एतेन संनिपातादेः स्मृतिभ्रंशादयो गताः PramāVār. 2. 75.

अन्तरर्थविशेषजा (antararthaviśeṣa-jā) *adj*. (*f*.) arising from a particular internal object एतेन संनिपातादेः स्मृतिभ्रंशादयो गताः। विकारयति धीरेव ह्यन्तरर्थविशेषजा PramāVār. 2. 76.

अन्तरर्ध (antar-ardha) *m*., *n*. interior half or portion चक्राब्जेऽत्र विकारवर्गपदवत् क्षेत्रेऽन्तरर्धेऽभितो वीथीक्षेत्रशरद्विभागसहिते वृत्तीकृतेऽर्धीकृते। बाह्यार्धे दहनांशनेमिपरिशिष्टं स्यादरक्षेत्रकम् ŚilpaRa. ii. 28. 37.

अन्तरर्पित (antar-arpita) *adj*. fixed in the mid-region चतुर्णामेव सुव्यक्तमराणामन्तरर्पितैः। ... गतप्रत्यागताक्षरैः SāhiSā. 2. 152.

अन्तरलग्न (antara-lagna) *adj*. attached or stuck in the middle or in between मौर्वीशरण्यान्तरलग्नमूर्तिः शरावली देव भवत्प्रयुक्ता YaśasCam. i. 600. 9.

अन्तरलग्न (antara-lagna) *n*. the intermediate sine संपीड्यान्तरलग्नासूनेवं स्यात् कालसाधनम् SūrySi. 3. 50.

अन्तरलङ्घन (antara-laṅghana) *n*. act of crossing the intermediate region स लाभहानिं प्रकरोति पुंसो मृत्युप्रदः श्वान्तरलङ्घनेन ŚārṅgaPa. 2631.

अन्तरललज्जिह्वा (antara-lalajjihvā) *adj*. (*f*.) having the lolling tongue inside दंष्ट्राचन्द्रकलाङ्कुरान्तरललज्जिह्वां महाभैरवीं पश्यन्त्या इव मे मनः कदलिकेवाद्याप्यहो वेपते PraboCan. 4. 1 (65. 12)

अन्तरलाभ (antara-lābha) *m*. **1** acquisition, i.e. winning of the heart धन्यं तद् भुवनत्रयस्य परमं ज्योतिर्मयं लोचनं येनालम्भि तवान्तरं त्वमपि वा यस्यान्तरं लब्धवान्। अत्रान्तरलाभस्य परस्परनिबन्धनत्वम् AlaṅkāRa. 56. 31; **2** advantage of being in the intermediate space दिष्ट्यायमावयोरन्तरलाभः JānaPa. 3. 15 (5)

अन्तरलिप्ता (antara-liptā) *f*. **A** division of intermediate distance or space ग्रहयोरन्तरलिप्तास्तथैव भक्ताः स्वभुक्तिगुणाः BrāhmSphuSi. 9. 6 (comm. ग्रहयोरन्तरलिप्ताः (ग्रहयोरन्तरकलाः)); **B** division of intervening time अन्तरलिप्ताः स्वोदयविलग्नयोर्लब्धघटिकाभिः BrāhmSphuSi. 9. 16.

अन्तरलिप्तिका (antara-liptikā) *f*. intervening minutes, temporal difference दिवौकसोरन्तरलिप्तिकौघाद्गत्योर्वियोगेन हृताद्यदैकः। वक्री जवैक्येन दिनैरवाप्तैर्याता तयोः संयुतिः SiddhāŚi. 155. 6 (16. 3); KaraṇaKu. 8. 2 (30)

अन्तरलेशशून्य (antaraleśa-śūnya) *adj*. devoid of slight bit of distance, i. e. separation आसन्नमप्यन्तरलेशशून्यं मिथो न तृप्तिं मिथुनं तदूहे ŚivLī. 12. 20.

अन्तरवक्षार (antar-avakṣāra) *adj*. having secretion inside हस्तिनः ... अनवगाहमानाः ... अन्तरवक्षाराश्चान्धीभवन्ति ArthŚā. iii. 49. 5 (9. 1)

अन्तरवक्षार (antar-avakṣāra) *m*. secretion inside हस्तिनः ... अन्तरवक्षाराश्च(v. l. °राद्या KANGLE Ed.)न्धी भवन्ति ArthŚā. iii. 49. 5 (9. 1)

अन्तरवचारिन् (antar-avacārín) *adj*. [P. vi. 2. 139] who comes within, i.e. who strays inside without permission, i.e. who misbehaves यदनुपरिक्रामं जुहुयादन्तरवचारिणं रुद्रं कुर्यात् TaiS. V. iv. 3. 4; यदभिघारयेत्। अन्तरवचारिणं रुद्रं कुर्यात् TaiBr. I. vi. 10. 1.

अन्तरवच्छेद (antar-avaccheda) *m*. [Inst.] **A** through the internal limitation घटस्यापरोक्षत्वं सुखादिवन्नान्तरवच्छेदेन ... किंतु बहिरवच्छेदेन SiddhāTa. 9. 19; 9. 22; **B** through the internal parts of the body द्विजातयो ब्राह्मणक्षत्रियवैश्या यथासङ्ख्यमन्तरवच्छेदेन हृत्कण्ठतालुगामिनीभिः शुध्यन्ति VīraMi. 46. 18 (*on* 1.21)

अन्तरवत् (antara-va(n)t) *adj*. having distinction, i. e. being distinctive or specific प्रेत्यैतयोरन्तरवान्विशेषो यो वै पुण्यं चरते यश्च पापम् MahāBhā. xii. 74. 25.

अन्तरवत् (antara-vat) *adv*. like inwards सर्वमन्त(:)स्थितं भाति तत्प्रभाववशात् स्फुटम्। बहिरन्तरवच्चापि यस्मादेतदधीश्च PauṣkS. 27. 178.

अन्तरवभासन (antar-avabhāsana) *n*. manifestation within एकद्रव्यपर्यायस्यास्खलितस्यान्तरवभासनात् TattvPradī. (A.) 214. 2 (*on* 2. 60)

अन्तरवयव (antar-avayava) *m*. inner limb or part स्त्री शूद्रश्च ओष्ठप्रान्तगाभिरिति शङ्खवचनमेवात्र लिखितम्। अन्ततोऽन्तरवयवेन। एवं चापां भक्षणमेव विवक्षितम् VīraMi. 46. 23 (*on* 1. 21); निष्कुला करोति दाडिमम्। निर्गतं कुलमन्तरवयवानां समूहो यस्मादिति SiddhāKau. 325B. 22 (*on* v. 4. 62); अन्तरवयवानां बहिष्करणं निष्कोषणम् LaŚabdeŚe. ii. 405. 5.

अन्तरवयवस्पर्शिन् (antaravayava-sparśin) *adj*. touching the inner limb or part यो हि अन्तरवयवस्पर्शी तस्य वेदनप्रसङ्गः। बहिरालिङ्गनस्पर्शोऽपि सुखरूप एव PramāVāBh. 126. 13.

अन्तरवर्ग (antara-varga) *m*. squareroot of the difference (between two numbers) राश्योरन्तरवर्गेण द्विघ्ने घाते युते तयोः। वर्गयोगो भवेत् Līlā. 6. 135.

अन्तरवर्जित (antara-varjita) *adj*. devoid of distance or gap (in between) मञ्चस्य स्तम्भमादाय बभञ्जासे परः कपिः। क्षुद्रभङ्गैर्नभस्तस्य व्याप्तमन्तरवर्जितैः PadmP. (Ra.) 6. 441; मधुः ... प्रच्छादयितुमुद्युक्तः शरैरन्तरवर्जितैः। ... दशरथात्मजम् PadmP. (Ra.) 89. 94.

अन्तरवर्जितम् (antaravarjitam) *adv*. without any interval (of time), immediately तस्मिन् दशाननोक्ताभिः स्त्रीभिरन्तरवर्जितम्। सीता प्रसाद्यते वस्त्रगन्धालंकारपाणिभिः PadmP. (Ra.) 46. 163.

अन्तरवर्ण (antara-varṇa) *m*. **A** balance in the account book यच्चाग्राद्यस्यान्तरवर्णे नीव्या वर्धेत ... तदष्टगुणमध्यक्षं दापयेत् ArthŚā. i. 147. 5 (2.7); **B** intermediate, i. e. secondary colour मूलवर्णाः समाख्याताः पञ्च ...। एकद्वित्रिसमायोगात् ...। संख्यैवान्तरवर्णानां लोके कर्तुं न शक्यते ViṣṇuDhaP. iii. 27. 9.

अन्तरवर्तिदारुब्रह्मन् (antaravarti-dārubrahman) *n*. wooden (image of) Brahman that is at a distance अन्तःस्थनन्दतनयोऽन्तरवर्तिदारुब्रह्मेति केवलमियानुभयोर्हि भेदः CaitaCa. 144. 5(6)

अन्तरवर्तिन् (antara-vartin) *adj*. [*f*. - ī] **Ai** who remains in between (two contrasts), i. e. indecisive तद्वाशु क्रियतां राजन् प्राप्तिर्वाप्यधिगम्यताम्। जीवितं ह्यातुरस्येव दुःखमन्तरवर्तिनः MahāBhā. iii. 34. 43; **Aii** existing between (two points of time), intervening (time) आद्यसृष्टिक्षणो यस्तु संजिहीर्षाक्षणश्च यः। यत्स्थैर्यकरणं नाम तयोरन्तरवर्तिनाम्। नानारूपैर्मदीयैः सा स्थितिशक्तिः परा मम LakṣmīT. 12. 49; भुवि चक्रयेव वज्रयेव दिवि विश्रुतः। तयोरन्तरवर्ती ... आर्षभिः TriṣaŚaPuC. i. 5. 202; **B** lying, i. e. drawn in between चला विभूतिः क्षणभङ्गि यौवनं। कृतान्तदन्तान्तरवर्ति जीवितम् EI. xii. 263. 28; (सामान्यचित्रे) परपादस्फिजा गूढः प्रकोष्ठो नैव दृश्यते। पूर्वेण पक्षसूत्रेण पृष्ठपार्श्वं

सुघट्टितम्। तेनैव घटिता रेखा स्फिजोरन्तरवर्तिनी Mānaso. iii. 1. 670; **C** being in the intermediate region or mid-air इन्द्रः ... शरान् ... चिक्षेप च यमद्विषि। ... दशवक्त्रोऽपि तान् बाणैराच्छित्तान्तरवर्तिनः PadmP. (Ra.) 12.319 (BJP. Ed.); **D** being included within, i.e. constituting a part मनसश्चापि वाचश्च वर्गणा याः प्रकीर्तिताः। तासामन्तरवर्तिन्यो वर्गणा या व्यवस्थिताः। ताः सूक्ष्मा इति विज्ञेया: VarāṅgaC. 26. 21; **E** existing within किमयमक्ष्यादित्यमण्डलान्तर्वर्ती(v.l. °न्तरवर्ती) पुरुषः ... जीव एव आहोस्वित्तदतिरिक्तः परमात्मा BrahmSūBh. (Rā.) 211. 2 (*on* i. 1. 21)

अन्तरवर्त्मन् (antara-vartman) *n.* middle or central path or line (separating half bodies of Śiva and Gaurī) ललाटलेखावलिभङ्गमुच्चकैः समासजन्त्यान्तरवर्त्मनि भ्रुवा। मनोरथारूढहरेक्षणक्रिया सविभ्रमोत्क्षेपदशा निवेद्यते HarVi. 21. 41.

अन्तरवलम्ब (antar-avalamba) *m.* inner perpendicular स्तम्भौ रज्ज्वन्तरभूहतौ स्वयोगाहतौ च भूगुणितौ। आबाधे ते वामप्रक्षेपगुणोऽन्तरवलम्बः GaṇiSāSaṁ. 6. 180½.

अन्तरवष्टम्भ (antar-avaṣṭambha) *m.* obstruction of (the ascertainment of the reality of) inner Self चलिताचलितेनान्तरवष्टम्भेन मे मतिः। दरिद्रा छिन्नवृक्षस्य मूलेनेव विडम्ब्यते YogVā. i. 30. 9 (comm. आत्मतत्त्वनिश्चयावलम्बनम्)

अन्तरवसुधा (antara-vasudhā) *f.* ground, i.e. region between (two Śāla-trees) (सालयोः) अनयोरन्तरवसुधाः प्रणुमः प्रत्यग्रपुष्परागमयीः LalitāStaRa. 37.

अन्तरवस्थापन (antar-avasthāpana) *n.* insertion, i.e. use in the middle रसान्तरस्य ... अन्तरालेऽवस्थापने द्वितीयोऽपि निवर्तते। यथा ... शान्तरसप्रधाने वर्णने प्रस्तुते ... अद्भुतस्यान्तरवस्थापनेन RasGaṅ. 58. 14.

अन्तरवस्थित (antar-avasthita) *adj.* (also used as noun) **1** (one) abiding within अपि प्रयोक्तुरात्मानं शब्दमन्तरस्थितम्। प्राहुर्महान्तमृषभं येन सायुज्यमिष्यते। तस्माद्यः शब्दसंस्कारः सा सिद्धिः परमात्मनः VākyaP. 1.132; अधिदैवतमधिलोकमधिवेदमधियज्ञमधिभूतमध्यात्मं च कश्चित् अन्तरवस्थितो यमयिता अन्तर्यामीति श्रूयते BrahmSūBh. (Śaṅ.) 118. 18 (*on* i. 2. 18); VedāntKau. 65. 2 (*on* i. 2. 19); AṇuBh. 63.7 (*on* i. 2.18); अद्य हि त्वां नमस्यामि ...। सर्वभूतेषु चालक्ष्यं बहिरन्तरवस्थितम् AdhyāRā. iv. 6. 63; **2** final syllable (*lit.* existing at the end) निष्कुलादन्तरवस्थितस्य निष्कोपणे डाज् भवति CāndraVṛ. *on* iv. 4. 46 [Nānārthā-Saṁ. ii. 49. 25 gives *antaravasthita* as the meaning of *antastha*]

अन्तरवस्थिति (antar-avasthiti) *f.* abidance within शरीरान्तःस्थितस्य शरीरिण एकत्वादयमेकः पुरुष इति व्यवहारवत् अन्तरवस्थितिनिबन्धनाः प्रकार्यैक्यविषया अभेदव्यवहाराः ŚrutaPra. ii. 151. 14 (*on* i. 4. 22)

अन्तरवस्राविन् (antar-avasrāvin) *adj.* [*f.* - iṇī] **A** flowing inwards or towards the inner region अथ मुख्यामुखां याचति तस्यामन्तरवस्राविणी (better °स्राविण्यौ) द्वे स्रुवाहुती जुहोति BaudhŚS. ii. 30. 15; **B** which makes (the offering) flow down towards the inner region or inwards अर्कपर्णनाज(जा)क्षीरेण ... जुह्वति स यद्यहैनं (यदुहैनं) करिष्यन् भवत्यथैतस्यार्कपर्णस्य पुटमन्तरवस्राविणं कृत्वोदङ् तिष्ठन् मुखदघ्ने धारयन्नाह BaudhŚS. ii. 422. 1; ii. 48. 10.

अन्तरवह्निमत् (antaravahni-ma(n)t) *adj.* possessing fire inside, i.e. having burning sensation within (the stomach) वायुस्त्वधोगतपथं प्रविरुह्य मूलं वातात्मको (शूलो) भवति चान्तरवह्निमांश्च HārīS. iii. 7. 3.

अन्तरवातवृष्टि (antaravāta-vṛṣṭi) *f.* (torrents of) rain accompanied by intervening wind शिलाशयां तामनिकेतवासिनीं निरन्तरास्वन्तरवातवृष्टिषु। व्यलोकयन्नुन्मिषितैस्तडिन्मयैः ... क्षपाः KumāSaṁ. 5. 25.

अन्तरवाद्य (antara-vādya) *n.* intervening (music played on) instrument अथान्तरवाद्यानि। अनुबन्धः ... तत्रानुबन्धसंज्ञमन्तरवाद्यं यथा धोणाधोक्लघे इति NāṭyaŚā. 34.238-239 (AbhinBhā. गानपरिक्रमं विना च यद् वाद्यं तदुत्तत्त(दन्त)रवाद्यम्)

अन्तरवासक (antara-vāsaka) *n.* different abode धन्या सैव जनन्यतः परतरां भद्रामभद्रामथो न मन्येऽन्तरवासकेऽपि वसतो मातेति यद् गीः सताम् ŚāliC. 6. 211[inner garment (of a Buddhist monk), MW.]

अन्तरवासिन् (antara-vāsin) *adj.* **Ai** inhabitant or dweller (of an island) कुमाराख्यः परिख्यातो द्वीपः ...। ब्राह्मणाः क्षत्रिया वैश्याः शूद्रास्त्वन्तरवासिनः। ... कर्मभिः कृतपावनाः VāmaP. 13. 12; **Aii** residing in, being inside आयुः ...। रोगैरापीयते रौद्रैः ...। प्रस्नुवानैरविच्छेदं तुच्छैरन्तरवासिभिः। दुःखैरावृश्च्यते क्रूरैर्घुणैरिव जरद्द्रुमः YogVā. i. 14. 18; **B** existing inside (the body), i.e. inborn, YogVā. i. 14. 18.

अन्तरापत्ति (antarāpatti) *f.* a (repeated) offence performed during probation (*parivāsa*) and concealed स पारिवासिक एव संघावशेषामापत्तिमापन्नः अन्तरापत्तिम् ... प्रतिच्छन्नाम् GiMs. iii (3). 34. 15 [DBHS.]

अन्तरापत्या (antarāpatyā) *f.* a pregnant woman, PW.; pw.; MW.

अन्तरापथ (ántarā-patha) *adj.* being on the way or within the way, Practical Vedic Dictionary.

अन्तरापथिका (ántarāpathikā) *f.* grape द्राक्षा ... अन्तरापथिका माता भवेन्मधुफला KośaKaTa. 1. 4173.

अन्तरापरमध्य (antarāpara-madhya) *n.* [Loc.] in the interior of the hind part अन्तरापरमध्ये मर्म सप्ताङ्गुलप्रमाणम् Hastyāyur. 503. 14 (3. 20)

अन्तरापरिकल्पित (antarā-parikalpita) *adj.* assumed or postulated in the middle (as an intermediate category) किमन्तरापरिकल्पितेन सामान्येन Śarka. 4.13.

अन्तरापरिनिर्वापिन् (antarā-parinirvāpin) *adj.* (used as noun) (one) attaining *nirvāṇa* in the intermediate state of existence (between death and rebirth, i.e. before the soul can be reborn in a new existence) अनागमी ... पञ्चधा वेदितव्यः। तत्रोपपत्तिसंयोजनप्रहाणादभिनिर्वृत्तिसंयोजनाप्रहाणादन्तराभवमभिनिर्वर्तयन्नेवाभिनिर्वृत्ते चान्तराभवे मार्गसंमुखीभावेन दुःखान्तप्राप्तावन्तरापरिनिर्वापी AbhisaAlaṅĀ. 42. 23.

अन्तरापरिनिर्वायिन् (antarā-parinirvāyin) *adj.* attaining *nirvāṇa* in the intermediate state (between death and rebirth, i.e. before the soul can be

reborn in a new existence) (महामौद्गल्यायनः) सो पश्यति ... अन्तरापरिनिर्वायी अनावर्तिकधर्मा अस्मिं लोके अव्यवकीर्णा सर्वबालपृथग्जनेषु MaVastuAva. i. 33. 6; अन्तरापरिनिर्वायी कतमः। उपपत्तिसंयोजने प्रहीणे अभिनिवृत्तिसंयोजने अप्रहीणे अन्तराभवमभिनिर्वर्तयन्नेव यो मार्गं संमुखीकृत्य दुःखस्यान्तमनुप्राप्नोति AbhidhSa. 90. 9; अन्तरापरिनिर्वायी योऽन्तराभवे परिनिर्वाति AbhidhKoBh. 358. 21 (*on* 6. 37); अनन्तरा(v.l. अन्तरा)परिनिर्वायी MahāVyu. 46. 7 [DBHS.]

अन्तरापरिनिर्वृति (antarā-parinirvṛti) *adj.* (used as noun) (one) who attains *nirvāṇa* in the intermediate state of existence (between death and rebirth, i.e. before the soul can be reborn in a new existence) अन्तरा परिनिर्वृतिरस्येत्यन्तरापरिनिर्वृतिः AbhidhKoBh. 358. 20 (*on* 6. 37)

अन्तरापातिन् (antarā-pātin) *adj.* **A** occurring or befalling on the way अन्तरापाति हि श्रेयः कार्यसंपत्तिसूचकम् KathāSaSāg. v. 2. 71; **B** coming in between युक्तैः शौण्डिकपूरुषैः परिभवः स्यादन्तरापातिभिः RasSa.54.

अन्तरापिण्डपतन (antarā-piṇḍapatana) *n.* act of falling down of the rice ball on the way दाहसंशयान्तरापिण्डपतनयोस्तु पुनस्त्रिरात्रे सप्तरात्रे वा ... करणमवसेयम् BālaKrī. i. 238. 5 (*on* 2. 109-111)

अन्तरापीठ (antarā-pīṭha) *n.* seat in the middle वासुकिं दण्डकस्थाने बद्ध्वा...। तत्फणामन्तरापीठं कृतवान्मणिमण्डितम् BhaviP. 800B. 27 (iv. 133. 33)

अन्तरापीडितात्मन् (antarāpīḍitātman) *adj.* whose soul is tormented within मित्रः ... भूयो भूयोऽभ्येति पत्रान्तरालेऽत्युष्णैरुस्रैरन्तरापीडितात्मा GopāKeCan. 73. 5.

अन्तरापूरण (antar-āpūraṇa) *n.* act of filling (of breath) inside, inhaling स च द्वाभ्यां प्रकाराभ्यां बाह्यस्यान्तरापूरणेन पूरितस्य वा तत्रैव निरोधेन ... प्राणायामः चित्तस्य स्थितिमेकाग्रतायां निबध्नाति RājMār. 16. 7.

अन्तरापूर्णता (antarāpūrṇa-tā) *f.* state of being full in the middle अहम् ... इह सागरमुखे ... विहरामि ... महासागरस्य ... अन्तरापूर्णतां च अनुविचिन्तयन् GaṇḍVyū. 52. 1 [DBHS.]

अन्तरापेक्षिन् (antarāpekṣin) *adj.* seeking, i.e. looking for opportunity or occasion शक्तेनापि सदा नरेन्द्रविदुषा कालान्तरापेक्षिणा वास्तव्यम् ... क्षुद्रेऽपि पापे जने Pañcā. 220. 14.

अन्तराप्रतिफलत् (antarā-pratiphalat) *adj.* reflecting inside (जैत्रसागरसरः) अन्तराप्रतिफलद्रणपूर्वस्तम्भनामपुररम्यतरश्रि। यज्जहास विपुलाङ्कविलासिद्वारकं किल सरिद्धृदयेशम् HammīMaKā. 6. 3.

अन्तराप्रसारित (antarā-prasārita) *adj.* spread, i.e. veiled in the middle विभावरीवधूवदनदर्शनायासीदतो निशीथिनीनाथस्यान्तराप्रसारितसितदुकूलमुखपटप्रसर इव ... दृष्टिपथमवतरति ... किरणजाले YaśasCam. ii. 12. 8 (comm. प्रसारितः तिरस्करणीकृतः)

अन्तराप्रेर्य (antarā-prerya) *adj.* to be moved or driven from inside (यन्त्रम्) अन्यत्स्यादन्तरा(त्प्रे?)र्यं द्वितीयं मध्यमं त्विदम् SamarāSū. 31. 15.

अन्तराबद्धमौन (antarābaddha-mauna) *n.* silence adopted within प्रज्ञा यातु प्रसादं प्रतिदिनमवधूयान्तराबद्धमौनम् ĀścaCū. 7. 36.

अन्तराबोध (antarābodha) *m.* non-apprehension within बुद्धस्यान्तराबोधो नास्तीति धीव्यवहारारोहः NayaVi. 245. 9 (*on* i. 1. 8)

अन्तराभक्त (antarā-bhakta) *n.* type of medicine (*lit.* taken between (two meals)) तत्राभक्तम् ... अन्तराभक्तं सभक्तं सामुद्गम् ... औषधकालाः SuśruS. vi. 64. 65 (comm. तेष्वौषधकालेष्वभक्तादिकं दशप्रकारमौषधं योज्यम्); अन्तराभक्तं नाम -- यदन्तरा पीयते पूर्वापरयोर्भक्तयोः SuśruS. vi. 64. 73.

अन्तराभग्नपोतत्व (antarābhagnapota-tva) *n.* the state of being one whose boat is broken in the middle (of a voyage) अहम् ... अन्तराभग्नपोतत्वादेकाकीह समागमम् SamarāSaṁ. 5. 176.

अन्तराभर (antarā-bhará) *adj.* [DEBRU. 66] fulfilling, i.e. satisfying the inner needs or wants स नः शुक्रश्चिदा शकद्दानवाँ अन्तराभरः। इन्द्रो विश्वाभिरूतिभिः ṚV. viii. 32. 12 [bringing close to, procuring, PW.; pw.; MW.; bringing into the midst, APTE]

अन्तराभव (antarā-bhava) *m.* intermediate state of existence (between death and rebirth) आयुषोऽन्ते प्रहायेदं क्षीणप्रायं कलेवरम्। संभवत्येव युगपद्योनौ नास्त्यन्तराभवः MahāBhā. iii. 181. 24; आकाशमप्रतिसंख्यानिरोधो निर्वाणं भो गौतम कृतकमकृतकम् अस्त्यन्तराभवो नास्त्यन्तराभव इति LaṅkāSū. 3. 61 (49) (72.7); तत्राशुभकारिणोऽन्तराभवोऽभिनिर्वर्तते AbhidhSa. 42. 21; स पुनरन्तराभवः सकलेन्द्रियः Yogācā. 19. 3; नरकादिस्वनामोक्ता गतयः पञ्च तेषु ताः अक्लिष्टाव्याकृता एव सत्त्वाख्या नान्तराभवः AbhidhK. 3. 4; द्वाविंशतिविधं कामेष्वाक्षिपत्यन्तराभवः। दृष्टधर्मफलं तच्च निकायो ह्येक एव सः AbhidhK. 4. 53; 'चतसृभिर्योनिभिः पञ्च गतयः संगृहीता न तु पञ्चभिर्गतिभिश्चतस्रो योनयः। किमसंगृहीतम् अन्तराभवः AbhidhKoBh. 114. 14 (*on* 3. 4); 123. 2 (*on* 3. 12); अन्तराभवोपपत्तिभवप्रतिसंध्यवस्थायां तानि प्रथमतो लभ्यन्ते Sphuṭā. ii. 22. 8 (*on* 2. 14); उपपत्तिसंयोजनप्रहाणादभिनिर्वृत्तिसंयोजनाप्रहाणादन्तराभवमभिनिर्वर्तयन्नेवाभिनिर्वृत्ते चान्तराभवे मार्गसंमुखीभावेन दुःखान्तप्राप्तावन्तरपरिनिर्वापी AbhisaAlanĀ. 42. 22; MahāVyu. 245. 1272 [DBHS.]

अन्तराभव (antarā-bhava) *adj.* existing in the intermediate state of existence (between death and rebirth) उपपादुकाः। अन्तराभव (देवाश्च) AbhidhK. 3. 9; मनोमयः संभवैषी गन्धर्वश्चान्तराभवः निर्वृत्तिश्च AbhidhK. 3. 40; कैश्चिदिष्यते अस्त्यन्यदन्तराभवं शरीरं सूक्ष्मम् ManuBh. i. 32. 11 (*on* 1. 55)

अन्तराभवक्षण (antarābhava-kṣaṇa) *m.* moment of the intermediate state of existence (between death and rebirth) कामावचरान्मरणचित्ताद्रूपावचरः प्रथमोऽन्तराभवक्षण इत्येवमादि विजातीयोदाहरणं निष्यन्दफलविवेचनार्थम् Sphuṭā. ii. 156. 21 (*on* 2. 58)

अन्तराभवदेह (antarābhava-deha) *m.* **A** (subtle) body existing in the intermediate state of existence अन्तराभवदेहस्तु निषिद्धो विन्ध्यवासिना Ślokavār. 5(17). 62 (704. 3); अन्तराभवदेहो हि स्वच्छत्वात् नोपलभ्यते। निष्क्रामन् प्रविशन् वापि नाभावोऽनीक्षणादपि PramāVāBh. 89. 21; अन्यैस्तु अन्तराभवदेहो नेष्यते ManuBh. i. 32. 11 (*on* 1. 55); **B** embodied soul existing in the intermediate states of existence (between death and rebirth) गन्धर्वस्तु नभश्चरे। पुंस्कोकिले गायने च मृगभेदे तुरंगमे। अन्तराभवदेहे च AnekāSaṁ. 3. 693.

अन्तराभवदेहक (antarābhavadeha-ka) *m.* embodied soul existing in the intermediate state of existence गन्धर्वो रागभेदे तुरंगमे। पुंस्कोकिले गायके वा चान्तराभवदेहके ŚabdaRaSaK. 319.17.

अन्तराभवदेहकल्पना (antarābhavadeha-kalpanā) *f.* assumption of the body existing in the intermediate state of existence अन्तराभवदेहकल्पनायाः प्रमाणाभावात् अन्तरभवदेहमनुप्रविश्य विज्ञानसंतानः परलोकं गच्छति BrahmSūBh. (Bhā.) 122. 14 (*on* ii. 2. 25)

अन्तराभवपूर्विका (antarābhava-pūrvikā) *adj.* (*f.*) preceded by the intermediate state of existence (between death and rebirth) याश्च तदन्वया दशावस्था इति। अन्तराभवपूर्विका इत्यर्थः Sphuṭā. iv. 61. 11 (*on* 4.53)

अन्तराभववेदनीय (antarābhava-vedanīya) *adj.* to be experienced in the intermediate state of existence (between death and rebirth) कललवेदनीयं नियतं यावदन्तराभववेदनीयं नियतम् Sphuṭā. iv. 61. 10 (*on* 4.53)

अन्तराभवशरीर (antarābhava-śarīra) *n.* body existing in the intermediate state of existence मरणकाले चान्तराभवशरीरसंचरणं तच्चास्तिकेन चित्प्रतिबन्धेन सदपि न गृह्यते TantrVā. 380. 10 (*on* ii. 1. 5)

अन्तराभवसंयोजन (antarābhava-saṁyojana) *n.* fetter or bond of intermediate state of existence (between death and rebirth) अनागामिन इति विशेषणं पृथग्जनानामन्तराभवसंयोजनस्यात्यन्ताप्रहाणात् Sphuṭā. iii. 77. 6 (*on* 3. 41)

अन्तराभवसंग्राह्य (antarābhava-saṅgrāhya) *adj.* (used as noun) (that) which is to be accumulated in the intermediate state of existence (between death and rebirth) परिणामं कालसंस्थानं भूतभावेन्द्रियेषु च। अन्तराभवसंग्राह्यं ये कल्पेन्ति न ते बुधाः LaṅkāSū. 3. 44 (65. 20)

अन्तराभवसंचार (antarābhava-sañcāra) *m.* motion or movement (of soul) in the intermediate state of existence (between death and rebirth) अन्तराभवसंचारस्तद्भावाज्ञानकारणे (कल्पनीये) TantrVā. 379. 13 (*on* ii.1.5)

अन्तराभवसत्त्व (antarābhava-sattva) *m.*, *n.* embodied soul existing in the intermediate state of existence अन्तराभवसत्त्वेऽश्वे गन्धर्वो दिव्यगायने AmaK. 2600; AnekāSa. 101; Vaija. 241. 24; ViśvaPra. 107. 11; DharK. 1691; AnekāK. 551; NānārthSaṁ. 31. 6; NānārthāSaṁ. ii. 102. 639; MediK. 112. 11; NānārthMa. 1772.

अन्तराभवसंतति (antarābhava-santati) *f.* continuity known as the intermediate state of existence (between death and rebirth) नात्मास्ति स्कन्धमात्रं तु क्लेशकर्माभिसंस्कृतम्। अन्तराभवसंतत्या कुक्षिमेति प्रदीपवत् AbhidhK. 3. 18 (AbhidhKobh. अन्तराभवसंज्ञिकया संतत्या)

अन्तराभवसंभव (antarābhava-sambhava) *adj.* born in the intermediate state of existence (between death and rebirth) जरजाण्डजसंस्वेदाद्या अन्तराभवसंभवाः। सत्त्वकाया यथा चित्रा गत्यागत्यां विभावयेत् LaṅkāSū. 10. 845 (162. 25)

अन्तराभवसिद्ध (antarābhava-siddha) *m.* semi-divine being existing in the intermediate state of existence गन्धर्वो मृगभेदे ... अन्तराभवसिद्धे च

VisvaLoK. 235.9.

अन्तराभवस्थ (antarābhava-stha) *adj.* remaining in the intermediate state of existence (between death and rebirth) अन्तराभवस्था स्ते तम् ... दृष्ट्वैवमूचुः इत्युच्यन्ते अन्तराभवस्था अद्राक्षुरिति Sphuṭā. iii. 11. 9 (*on* 3. 6)

अन्तराभविक (antarā-bhavika) *adj.* of or belonging to the intermediate state of existence (between death and rebirth) अन्तराभविकाः स्कन्धाः यथैवेच्छन्ति तार्किकाः LaṅkāSū. 10. 730 (155. 13); 10. 844 (162. 24) [DBHS.]

[1]अन्तराभाव (antarā-bhāva) *m.* intermediate state of existence अन्तराभावः संसारश्च युक्तः YogBh. 191. 1 (*on* 4. 10); TattvVai. 191. 10 (*on* 4. 10)

[2]अन्तराभाव (antarābhāva) *m.* absence of difference स्फुटक्रान्त्यभावः बिम्बगतकदम्बवृत्ते ध्रुववृत्ते वा स्वस्वशरक्रान्त्योर्विभिन्नदिग्गतयोरन्तराभावात् SiddhāTaVi. (ŚeṣaVā.) 47. 9.

अन्तराभास (antarā-bhāsa) *m.* act of shining or manifestation within ज्ञाने वाप्यन्तराभासः स्थित एवेति निश्चितम् ĪśvaPraSū. i. 6. 8.

अन्तराभासमय (antarābhāsa-maya) *adj.* of the nature of shining or manifestation within यो बहिराभासो नीलादेः अन्तराभासमयस्य स नैसर्गिक एव PratyabhiVi. i. 338. 5 (*on* i. 6. 10)

अन्तराभासमान (antarā-bhāsamāna) *adj.* appearing or manifesting in between (noun and verb) धात्वर्थेऽसाधारणधर्मरूपे भावे व्युत्पत्तिवैचित्र्येण नीलनौकाभस्मादेः साक्षादेवान्वयः। प्रथमाया अन्तराभासमानार्थकत्वाभावात् VyutpaVā. 136. 21.

अन्तराभासवर्ग (antarābhāsa-varga) *m.* class of things that shine or manifest within ननु अन्तराभासवर्गस्य बहिराभासनं यदि सर्वत्रास्ति कस्तर्हि स्मरणादौ आभासभेदः PratyabhiVi. i. 335. 2 (*on* i. 6. 9)

अन्तराभाससमर्थन (antarābhāsa-samarthana) *n.* establishment or justification of the shining or manifestation within अन्तराभाससमर्थनेन 'अन्तःकृतानन्तविश्वरूपः' इत्यपि निरूपितम् PratyabhiVi. i. 397. 2 (*on* i. 8. 1)

अन्तराभाससंभव (antarābhāsa-sambhava) *m.* possibility of shining or manifestation within अस्माच्च अन्तराभाससंभवसमर्थनप्रसङ्गागतात् आभासभेदविचारात् शास्त्रे यत् प्रयोजनं मुख्यतया अभिसंहितम् ... तद् अनायाससिद्धम् PratyabhiVi. i. 341. 1 (*on* i. 6. 11)

अन्तराभासिन् (antarā-bhāsin) *adj.* shining or manifesting within प्रमातारमपेक्ष्य अन्तराभासिनो भावाः PratyabhiVi. ii. 162. 1 (*on* ii. 4. 6)

अन्तराभीष्टरस (antarābhīṣṭarasa) *m.* desired sentiment in the middle (of plot) इतिवृत्तवशायातां त्यक्त्वाननुगुणां स्थितिम्। उत्प्रेक्ष्याप्यन्तराभीष्टरसोचितकथोन्नयः VyaktiVi. 135. 28.

अन्तराभोजननिषेध (antarābhojana-niṣedha) *m.* prohibition of eating in between (morning and evening) अन्तराभोजननिषेधो मूलफलादेरन्यत्र VīraMi. (Āhnika.) 462. 24.

अन्तराभ्यधिकम् (antarābhyadhikam) *adv.* distinctly over a space (of fourty cubits) धिष्ण्या कृशाल्पपुच्छा धनूंषि दश दृश्यतेऽन्तराभ्यधिकम् BrSaṁ.33.6.

अन्तरामध्य (antarā-madhya) *m., n.* [Loc.] in the middle of the interior, i.e. in the inner part अन्तरापरमध्ये (v.l. अन्तरामध्येऽपरमध्ये) मर्म सप्ताङ्गुलप्रमाणम्, तत्र गाढं विद्धो मूत्रसङ्गमवाप्नोति Hastyāyur. 503. 14 (3.20)

अन्तरामय (antar-āmaya) *m.* **A** inner disease सिंहे मे मन्युर्व्याघ्रे मेऽन्तरामयः BaudhŚS. i. 39. 1; i. 46. 6; **B** name of a disease (of an elephant) आमयाः। ... भूतानिलात्मकाः ... । तथैकाङ्ग्रहः कूटश्चान्तरामय एव च। हस्तग्रहोऽथ रात्र्यन्ध इत्यमी कीर्तिताः क्रमात् Hastyāyur. 51. 21 (1.7)

अन्तरामरण (antarā-maraṇa) *n.* **A** death in the meanwhile यद्यपि (प्रायश्चित्ते) द्वादशवार्षिके न मरणान्तं तथापि दैवोपपत्तिपतितेऽन्तरामरणे सामिकृते प्रायश्चित्ते शुद्ध्यभावात् प्रत्यवायो न निवर्तते ManuBh. ii. 392. 26 (*on* 11. 76); **B** death in the middle, i. e. untimely death अन्तरामरणं जह्यादानन्दारोग्यमृच्छति अन्तरामरणं जह्यादित्यपमृत्युं नाप्नोतीत्यर्थः CaturCin. ii (1).965.6.

अन्तरामर्शन (antarā-marśana) *n.* stroking inside (the garments of a woman by a man), DBHS.

अन्तरामिलित (antarā-milita) *adj.* met on the way दैवाद्वणिक्सार्थेनान्तरामिलितेन सा। सह गत्वा पुरं प्राप KathāSaSāg. ix. 6.327.

अन्तरामृतसूतक (antarā-mṛtasūtaka) *n.* impurity casused by death or birth occurring in the middle (of Śrāddha) श्राद्धविघ्ने समुत्पन्ने अन्तरामृतसूतके। अमावास्यां प्रकुर्वीत ...। अन्तरामृतसूतके श्राद्धप्रयोगमध्ये पाकोपक्रमात् प्राक् मृतके सूतके वा जाते CaturCin. iii (1). 311. 18.

अन्तरामृत्यु (antarā-mṛtyu) *m.* death in the middle, i.e. untimely death कुरुबाह्योऽन्तरामृत्युः AbhidhK. 3. 85.

अन्तरामोद (antar-āmoda) *m.* delight in the heart सत्कविवचसामन्तरामोदमनोहरत्वेन परिस्फुरदेतत् साहित्यम् VakroJī. 27. 1.

अन्तराम्बर (antarāmbara) *n.* interior space or cavity कल्पतरुकामदोग्ध्रीचिन्तामणिधनदशङ्खानाम्। रचितो रजोभरपयस्तेजःश्वासान्तराम्बरैरेषः (राजा) Kuval. 125 (4)

अन्तराय (antarāya-) *denom.* to come in between, to intervene यो अ॒द्य दे॑वं सूर्य॒ त्वां च॒ मां चा॑न्तरा॒यति। दु॒ष्वप्न्यं॑ तस्मि॒ञ्छम॑लं दुरि॒तानि॑ च मृज्महे AV. xiii. 1. 58.

अन्तराय (antarāya) *m.* [Liṅgānu. (Ha.) 23. 1; Liṅgānu. (He.) 5. 8] **1Ai** obstacle (to activity) **ii** obstacle (to a person) **iii** hindrance (to the concentration of or control over mind) **iv** hindrance, impediment or obstacle in general **v** obstacle personified **B** (spatial) blockage, interference **C** (temporal) intervention, interruption, break **D** omission, leaving **E** obstruction, bar (to union) **F** trouble, danger, calamity, difficulty **2** (Jain.) obstacle to knowledge etc., one of the eight types of action (*karman*) considered as a variety (of four kinds) of bondage **3** the word *antarāya*

1Ai obstacle (to activity) तं हेन्द्रोऽनुख्यायैवेक्षां चक्रेऽहमु त्वा तद्यातये यन्मा यज्ञक्रतोरन्तरायः BaudhŚS. ii. 357. 11; ii. 358. 4; न तपवर्गानिमित्ताभावात् प्रधानलोपेऽन्तराये वा निर्वपेद् व्यापाद्येत् AVPrāyaścitta. 4. 2; करिष्यामि इदं ग्रीष्मवसन्तयोः। इति बालश्चिन्तयति अन्तरायं न बुध्यते MahāBhā. xiii. App. I. 15 (4073); कर्मसु धर्मचारिणां त्वमन्तरायो भवसि RaghuVa. 3. 45; आपाद्यते न व्ययमन्तरायैः ... तपस्तत् RaghuVa. 5. 5; चीर्णं तपो यत्तु जलाश्रयेण तस्यर्द्धिरेषा तपसोऽन्तरायः ViṣṇuP. iv. 2. 123; दैवाद्वा ... अन्यैरन्तरायैर्महीपतिः। यदि न प्राप्नुयादेव होममण्डपम् ...। ततः कथम् ... निवर्त्यन्ते महाग्रहाः AhirbuS. 46. 1; यो दानस्यास्य कश्चित्कृतजगदवधेरन्तरायं विदध्यात् ... गतिमतिविषमान्धर्महीनः स यायात् EI. xx. 44. 19; प्राचीमेतां भुवनरचनामन्यथा निर्मिमाणे कार्पण्योक्तीस्त्वयि रचितवानन्तरायं महेन्द्रः AnarghaRā. 1. 32; यद्यन्तराया यथा व्रजेयुस्तथा तान् निरस्य ध्यायेदेवं सर्वत्र PārāSū. 43. 14; बलिः ... विष्णवे दातुं सर्वमुद्युक्तोऽभवत् तस्यान्तरायायाभवत्तस्य गुरुः PārāSū. 96. 3; °प्राप्तवेगान्तरायः। ... तरणिः ... जग्राह ... कालंजराद्रिम् EI. i. 127. 18; दर्शनस्पर्शसंकल्पसंसर्गत्यक्तभोजिताः ... प्राशप्रत्यूहकारकाः। अतिप्रसङ्गहानाय तपसः परिवृद्धये। अन्तरायाः स्मृताः YaśasCam. ii. 334.18; उत्तापकत्वं हि सर्वकार्येषु सिद्धीनां प्रथमोऽन्तरायः NītiVā. 10. 133; वानरसेना कथं तरेदिममन्तरायं वितन्वन्तमुदन्वन्तम् RāmāCam. 5. 9 (4); भाविनोऽनुभवस्य क्रीडारविन्दरजःप्रक्षेपणेनान्तरायः AlaṅkāRa. 21 (8); सप्तर्षीणां कृपणभणितौ कापि दाक्षिण्यकक्षा यस्मिन् सृष्टिं घटयति नवामन्तरायं वितेने MudriKu. 4. 7; नागगणद्वियोगं स दूतधर्मे ...। पयोधिपाने मुनिरन्तरायं दुर्वारमप्यौर्वमिवौर्वशेयः NaiṣC. 6. 2; 10. 14; मन्यन्ते ... प्रौढसीमन्तिनीनां लीलामानग्रहमपि रतेरन्तरायं युवानः PavaDū. (Dh.) 25; कृशोदरि चिरादासीदनुरागो मम त्वयि। हन्तायमन्तरायोऽभूत् पाण्डवैः पाणिपीडनम् PāṇḍaC. 6. 975; श्रीवीरजिनपार्श्वेऽभून्मम चेतः सदैव हि। गमनं तत्र न प्राप्तमन्तरायेण केनचित् RauhiC. 335; प्रकृतस्य विधातुम् अन्तरायं स्वयमेतस्य शुभस्य न क्षमं वः Yādavā. 15. 82; अस्य धर्मकार्यस्यान्तरायं परिहाय ... द्वयोरेकतरं किमप्यङ्गीकुरु KumāPraPra. 61. 25; तव सकलकार्येषु अन्तरायो नास्ति SiṁhāDvā. 24. 3 (27); प्राज्ञया यदुपक्रान्तं कार्यं गुरु दिवौकसाम्। अन्तरायानतिक्रम्य तद्धि सिद्ध्यति सांप्रतम् PārvPa. 5. 10; वीरव्रतस्य ददतोऽङ्कपालिकां मास्मान्तरायमिह कार्षुरेतके HammīMaKā. 12. 39; उपांशुयाजस्य ... न कश्चिदधिकारानुप्रवेशेऽन्तरायः VidhiRa. 5 (26. 23); काशीं प्रति यातुम् ... अभवज्जनकाङ्क्षिपद्मसेवानियमातिक्रमभीतिरन्तरायः YātrāPra. 2. 85; बाणः ...। जानीते दशमुखकण्ठलुण्ठने यो मत्प्रत्यागमनविलम्बमन्तरायम् Rāgh. 12. 30; सपर्यासमाप्तिपर्यन्तमुपवेशनरूपस्यासनस्यान्तराया भौमादयः SetuBa. 309. 13; कार्तान्तिकशिरोमणिः स्वयं कंचिदन्तरायं पिशुनयंस्तस्याः पतिगृहगमनं निवारयति Mukundā. 51 (5); गच्छ गच्छ कन्दुकविहारस्य किमन्तरायोऽसि VasaTi. 18. 16; **1Aii** obstacle (to a person) यदाश्रौषं चास्मदीयान्महारथान् व्यवस्थितानर्जुनस्यान्तकाय (v.l. अन्तरायम्) ... तदा नाशंसे विजयाय संजय MahāBhā. i. 1. 131; रोगाः ... प्रादुर्भूतो मनुष्याणामन्तरायो महानयम् CaraS. i. 1. 16; पापं नास्ति न चान्तरायमिह भोः सर्वार्थसिद्धस्य ते LaliVi. 7. 71; न खलु नरकवासो धीमतां सर्वकालं विमलविपुलबोधेरन्तरायं करोति MaYānaSū. 87. 23; स्याद्रक्षणीयं यदि मे न तेजस्त्वदीयमन्तर्गतमन्तरायः RaghuVa. 14. 65; वासुदेवे मनो यस्य जपहोमार्चनादिषु। तस्यान्तरायो मैत्रेय देवेन्द्रत्वादिकं फलम् ViṣṇuP. ii. 6. 43; BrahmP. 22. 41; ŚārṅgaPa. 691; तवापि यदि भक्षणायोपस्थितस्यान्तर एकोऽप्यन्तरायः स्यात्। तदहमपि न शक्नोमि गोयुगमपहर्तुम् PañcT. (Kos.) 3. 198 (183. 3); Pañcā. 207. 16; (दृढव्रतः) अन्तरायैरधृष्यश्च

साधकः … उच्यते PāraS. 28. 36; इष्टान् भोगान् भुञ्जते भूमिदेवाः … अन्तरायेण मुक्ताः PadmP. (Ra.) 3.338;आः क एष पापोऽस्माकमन्तरायः संवृत्तः MālaMā. 5. 175; हस्ते करिष्यति … त्रैयम्बकं किमपि कार्मुकमन्तरायः AnargharRā. 3. 8; 4. 25 (4); तस्यान्तरायो मैवाभूः संन्यस्ताखिलकर्मणः BhāgP. i. 13. 55; गृहिभिस्सह सांगत्यमन्तरायो विरागिणाम् TāpaVa. 3. 4; यस्तु करोति राम स्त्रीचेतसां स्वीकरणं मनुष्यः। तस्यान्तराया न भवन्ति किंचित्स्त्रीद्वारमासाद्य ViṣṇuDhaP. ii. 62. 38; सागराः …। अनुष्ठानवतां नित्यमन्तराया भवन्ति ते BṛNāraP. 8. 75; क्षत्रियकुलाचारमाचरन्त्या ममाधुना। मा स्म भूरन्तरायस्त्वम् TriṣaŚaPuC. iv. 5. 124; परासुः परतो बन्धुर्निर्यन्त्रैः पादयन्त्रणा। वीराणामन्तरा-योऽभून्न रिपूनभिगच्छताम् Surath. 10. 63; पूर्वे जन्मनि यश्चक्रे ददतामदतां स्वयम्। श्रेयश्च कुर्वतामन्तरायः स इह भुज्यते PārśvC. 3. 795; पलायनपरस्य मे नियतमन्तरायो महान् Ekāva. 6. 5 (34) (180. 10); त्रैलोक्यरक्षणपटोर्मम तारकेऽस्मिन् वेधो वरः किमु महानयमन्तरायः PārvPa. 2. 3; कर्तुं दिग्जयमुद्यतस्य … अश्वानां गतिभङ्गतामुपनयन् …। वारांराशिरसावजायत तमां यस्यान्तरायः कवेर्वाचां वाच्यविचारभास्वररुचां गोष्ठीशठानामिव HammīMaKā. 3. 80; स्ववंश्येभ्यो नरेन्द्राणामन्तरायो विलोक्यते RājTa. (Jo.) 583; कलिस्तयोः। अन्तरा वर्तमानस्तमन्तरायं किलाकरोत् ParamāKā. 53. 26; **1Aiii** hindrance (to the concentration of or control over mind) व्याधिस्त्यानसंशयप्रमादालस्याविरतिभ्रान्तिदर्शनालब्धभूमिकत्वानवस्थितत्वानि चित्तविक्षेपास्तेऽन्तरायाः YogSū. 1. 30; ये तावदन्तराया व्याधिप्रभृतयस्ते तावदीश्वरप्रणिधानान्न भवन्ति YogBh. 34. 8 (*on* 1. 29); 35. 1 (*on* 1. 30); YogSā. 19. 3 (1); मद्गतो योगमभ्यस्येदन्तरायैरधर्षितः ParaS. 30. 125; कुयोगिनो ये विहता ह्यन्तरायैः … ते … भूयो युञ्जन्ति योगम् BhāgP. xi. 28. 29; समाधेरन्तरायाः के सर्वमेतन्निरूप्यताम् SarvaVeSāSaṁ. 794; अन्तराया वक्ष्यमाणास्तदभावश्च TattvVai. 34. 18 (*on* 1. 29); RājMār. 13. 23; अस्मिंश्च विवेकवाहिनि चित्ते येऽन्तरायाः प्रादुर्भवन्ति तेषां हेतुप्रतिपादनद्वारेण त्यागोपायमाह RājMār. 80. 9; विषयेषु विचित्रेषु जन्तोर्विषयलोलता। अन्तराया इति ख्याताः LiṅgaP. i. 9. 12; सप्तलोकाधिपत्यम् … सिद्धयश्चाणिमाद्याः। एतत्सर्वम् … तत्व(त्त्व)ज्ञानामृत[सजुषां योगि]नामन्तरायः EI. xxv. 181. 41; अष्टैश्वर्यगुणा योगस्यान्तराया भवन्ति हि ĪśānŚiPa. ii. 67. 93; षडिन्द्रियस्य षट् सिद्धयः … प्रत्ययसमाधेरुपसर्गाः अन्तरायाः YogSā. 56. 8 (3); **1Aiv** hindrance, impediment or obstacle in general विरोधिकारणमन्तरायः। तद्यथा सस्यस्याशनिः AbhidhSa. 29. 1; मारो न पुनः शक्नोत्यन्तरायं कर्तुम् MaYānaSū. 30. 2; युवा। बुद्धा … अन्तरायमखिलं स्नेहात् BhāvŚ. 92; अगन्तुकामतामार्गविभ्रमो मार्गसंशयः। इत्यन्तराया मोक्षस्य गमनेऽतस्त्रिदेशना AbhidhK. 5. 44; बह्वन्तराययुक्तस्य धर्मस्य त्वरिता गतिः PañcT. (Kos.) 3. 102 (166. 8); प्रायेण सत्यपि हितार्थकरे विधौ हि श्रेयांसि लब्धुमसुखानि विनान्तरायैः Kirātā. 5. 49; निर्वाणमपि मन्येऽहमन्तरायं जयश्रियः Kirātā. 11. 69; को वान्तरायो हृदयस्य येन सहस्रधा न दलति HarṣaC. 224. 4; शङ्खचूड न मे … परार्थसंपादनामनोरथस्यान्तरायं कर्तुमर्हसि Nāgā. 4. 16 (3); मित्रगणः … सर्वथान्तरायं करिष्यति DaśKuC. 19. 3; अन्तरायो भवत्येव लोके विष्णुपदाप्तये। देवतान्तरसेवा ĀdiP. 5. 15; नारीर्घटयितुमलं कामिभिः काममासन् प्रालेयांशोः सपदि रुचयः शान्तमानोऽन्तरायाः ŚiśuVa. 9. 87 (comm. कोप एवान्तरायो याभिस्ताः); अप्राप्तेरस्य कालस्य त्वन्तरायेण केनचित्। निर्वाहणीयो ह्यपरः कालः PāraS. 12. 22; अन्तरायमतिक्रम्य सिद्धिं व्रजति वैष्णवः ParaS. 12. 62; ननु वाक्यात्प्रथममर्थप्रतिपत्तिः ततस्तदर्थविषयं वक्तृज्ञानम्, अतः कथं वक्तृज्ञानेऽन्तरायः TātpaṬ. (U.) 86. 11 (*on* 2. 168); राजर्षे यदि शुल्कसंस्थैव केवलमन्तरायस्तन्न किंचिदेतत् AnargharRā. 3. 25 (2); क्रोधहर्षलोभमोहादयोऽन्तरायाः उपद्रवाः SanatBh. 229. 8 (*on* 1. 34); अद्य यूयमन्तरायः संवृत्ताः ĀścaCū. 5. 34 (6); अधीयमानमतिसंभ्रमवेपमानविस्रस्तबाहुलतया बुबुधेऽन्तरायम्। प्रस्थानमङ्गलविधानमपि प्रवीरः HarVi. 40. 59; वचोऽर्थप्रतिबोधस्य पदार्थाज्ञानमेव तु। … अन्तरायः BṛĀraUBhVā. ii. 4. 108; मुक्तौ तमोऽतिरेकेण नान्तरायोऽन्य इष्यते BṛĀraUBhVā. iv. 4.559; बाहुल्याद्यान्तरायाणां तत्सिद्धिरपि दुर्लभा SkandP. ii (9). 1. 3; काञ्च्यां च तावन्मया गन्तव्यम्। अन्तरा च यदि कश्चिदन्तरायो न भवति TilaMañ. 171. 15; अदातुः प्रियालापोऽन्यस्य लाभस्यान्तरायः NītiVā. 1. 17; मदीयाङ्गहतान्तरायो मुक्त्यङ्गनासंगमने यतस्व YaśasCam. i. 154. 2; विधास्यन्ते … मन्त्रिणो मनीषितस्यान्तरायम् YaśasCam. ii. 70. 8; मा गर्वमुद्वह … कान्तस्वहस्तलिखिता मम मञ्जरीति। अन्यापि किं न सखि भाजनमीदृशीनां वैरी न चेद्भवति वेपथुरन्तरायः SaraKaṇṭhā. 77. 5; 582. 2; 719. 8; SāhiDa. 136. 2; न मेऽन्तरायो न च कर्मलोपः … एवं विदित्वा गणनाथतत्त्वम् … प्रयान्ति HerU. 391. 9 (13); हरिश्चन्द्रोऽस्माकं श्रेयसामन्तरायः संवृत्तः CaṇḍaKau. 2. 20 (5); (रथस्य) चक्रमरक्षि तेन पुरःसरेणाङ्गिरसा मुनीनाम्। सुरद्रुहामैन्द्रपदाधिरोहे सदैव यत्संततिरन्तरायः ŚrīKaC. 20. 34; दैविको वान्तरायोऽस्तु RājTa. (Ka.) 8. 2649; वर्षारात्रिविभूतिभिस्तव सखि क्षीणोऽन्तरायः क्षणात् SaduktiKa. 112. 31; मेरोः … आसनस्वर्णकूटस्थि[त]सुरविटप[स्कंध]दोलाधिरूढस्वर्गस्त्रीवर्गगीरान्यनुदिनमभवन्यद्यशांस्यंतरायः EI. xii. 195. 134; ईश्वरप्रणिधानात्प्रत्यगात्माधिगमः अन्तरायस्य रोगादेरप्यभावः VedāntKa. 107. 24 (*on* i. 1. 5); मुक्तिर्हि नाम परमः पुरुषार्थ एकस्तामन्तरायमवयन्ति यदन्तरङ्गाः Subhāṣi. 94; प्रजाया अभीष्टत्वेऽपि तदुत्पादनंव्यासङ्गेन भगवदानन्दानुभवेऽन्तरायो भविष्यति AṇuBh. 291. 9 (*on* iii. 4. 35); यदपि हि भवेदन्तरायस्तथापि त्वं तन्वीनां करकिशलये यापयेर्याममात्रम् BhramaDū. 51; यौवनम् … अत्युत्कृष्टमिति मानादिभिरन्तरायैः … भवत्या मुधा गमयितुमसांप्रतम् RasGaṅ. 475. 9; तत्रान्तरे पतिरभूत्पुनरन्तरायः संगृह्यते तदपि हन्त मनोरथो मे Mukundā. 23; शान्तिं भजामि (किंतु) कुटिलं धनुरन्तरायः MahāN. 4. 51; अवितर्कितः कोऽप्यन्तरायः समापतितः RasSa. 147 (4); **1Av** obstacle personified तर्जनहुंकार इवान्तरायाणाम् … नरपतेः शिश्राय श्रुतिम् … मध्याह्नशङ्खध्वनिः NalaCam. 5. 56 (3); श्रम किमन्तरायोऽसि NalaCam. 6. 47 (5); **1B** (spatial) blockage, interference नान्तरापो(v.l. °यो VIŚVA.) देवयजनं च पथा व्यवेयात् KāṭhŚS. 17. 24; अस्य खलु ते … कृष्णसारस्यान्तरायौ तपस्विनौ संवृत्तौ Śāk. 1. 9 (3); दाहप्रेम्णा सरसबिसिनीपत्रमात्रान्तरायस्ताम्यन्मूर्तिः श्रयति बहुशो मृत्यवे चन्द्रपादान् MālaMā. 3. 112; भृशकृशमहरिष्यदेव तस्या वपुरपसव्यसमीरणो रयेण। यदि न समजनिष्यतोज्झिहानस्तनजघनस्थलगौरवान्तरायः ŚrīKaC. 7. 35; समाख्यायाः स्थानप्रकरणवाक्यलिङ्गश्रुतिभिः पञ्चभिः श्रुत्यर्थं प्रत्यन्तरायः प्रतीयते VedāntKa. 433. 8 (*on* iii. 3. 15) (comm. व्यवधानम्); NyāyMāVi. 663. 10 (*on* xi. 4. 18); यः स्तनोत्तुङ्गभूषामन्योन्याङ्ग्व्यतिकरविधेरन्तरायं विवेद। सः … पतिः … वदति HaṁsDū. (Vā.) 104; यस्तु अन्तरायेऽपि औदुम्बरी स्पृष्टा इति प्रयोगः स संयुक्तसंयोगेन गौणः MīmāKau. i. 17. 23 (*on* i. 3. 3); सौभाग्यवल्लीमयडोरकं मे प्रियोऽन्तरायं कलयत्यतीव PadyaVe. 334; **1C** (temporal) intervention, interruption, break कथायां क्रियमाणायामन्तरायं करोति यः। तेन पापेन लिप्येऽहं यद्यहं नागमे पुनः MahāBhā. xiii. App. I. 20 (157); वैश्वदेवहोमे स्विष्टकृदन्तानां देवतानां कस्याश्चिदन्तराये न होमाधिकारनिर्वृत्तिः ManuBh. i. 237. 27 (*on* 3. 60); नूनं जनेन पुरुषे महति प्रयुक्तमागः परं तदनुरूपफलं प्रसूते। कृत्वा रघूद्वहगतेः क्षणमन्तरायं यद्भार्गवः परगतेर्विहतिं प्रपेदे RāmāCam. 1. 115; रे रे दुर्जीव किमेवममुना प्रश्नादिनिरर्थकालापकोलाहलेन जनयस्यन्तरायमुपस्थिताहवमहोत्सवस्य UdaySuKa. 78.20; गानवाद्येऽन्तरायोऽभूत्तथा गव्यादिकं हृतम् ĀdiP. 24. 27; 23. 16; शरीरपातमात्रान्तरायो ब्रह्मसंपत्तिलक्षणो मोक्षः BrahmSūBh. (Rā.) 174.1 (*on* i. 1.7); दृप्तारिदेहे समरोपमर्दसूत्रावशेषस्थितहारदाम्नि। यज्ञोपवीतभ्रमतो बभूव यस्य प्रहर्तुः क्षणमन्तरायः VikraDeC. 1.78; 18.88; दर्शनपालः प्रतिक्षणम्। अत्यद्भुतैरन्तरायैरायुःशेषेण रक्षितः RājTa. (Ka.) 7.1495; अस्तु वाध्ययनस्यान्तरायं कः कुरुते सुधीः PrabhāC. 12.14; यदि निद्रा मध्ये प्रबोधैरत्पैर्व्यवधीयेत, नदी च बहुस्रोतोयुक्ता द्वीपैः … तदा तैरन्तरायैर्निमित्तेषु भिद्यमानेषु नैमित्तिका मन्त्रा आवर्त्याः NyāyMāVi. 663.10 (*on* xi. 4.18); नृपस्य निष्पन्ददृशो मुहूर्तमानन्दबाष्पोऽभवदन्तरायः MadhuVi. 2. 31; आघारवाक्ये तु पूर्वपक्षे ऊर्ध्वतादीनां मध्ये यस्यैव दैवादन्तरायस्तद्युक्तस्यैव कर्मण आवृत्तिः MīmāKau. iii (2). 206.11 (*on* ii. 2. 16); **1D** omission, leaving नित्यो वा स्यादर्थवादस्तयोः कर्मण्यसंबन्धाद्भङ्गित्वाद्यान्तरायस्य MīmāSū. iv. 4. 11; अनित्यो हि अन्तरायः ŚābaBh. 1274. 21 (*on* iv. 4. 11); जगतीमन्तर्गच्छतीति अन्तराये षडहतृतीयं जागतं दर्शयति ŚābaBh. 1952. 11 (*on* x. 5. 12); न चेद्दग्वचनमस्ति अन्तरायः कार्यः ṬupṬ. 43. 9 (*on* iv. 4. 11); अनित्यस्य चान्तरायस्यार्थेनेति पूर्वं नित्यवद्विधानम् TantrRa. 212. 16; अन्तरायो निमित्तम् NyāyMāVi. 257. 24 (*on* iv. 4. 5); द्वादशाहे द्वितीयस्य त्रिरात्रे प्रथमत्वतः। जागतस्यान्तरायाच्च विध्यन्तो दशरात्रगः NyāyMāVi. 552. 8 (*on* x. 5. 4); **1E** obstruction, bar (to union) न प्रेम नव्यं सहतेऽन्तरायम् ViddhaŚā. 3. 5; (अये प्रियतम) गतेनैव पर्याप्तमन्तरायेण YaśasCam. ii. 47. 2 (comm. एतावता कालेन यदहं नागता तेनैव पूर्णम्); देवीभ्यां कथमप्यभिन्नतनुताशिल्पेऽन्तरायः कृतः EI. i. 307. 2; आलिङ्ग्य गाढमधरं न पिबामि यावत् तावच्चकार हतदुर्विधिरन्तरायम् ŚṛṅgāBhū. 45; नाघ्रातमाननपयोरुहमप्यमुष्या हन्ताधुनैव कथमापतितोऽन्तरायः Mukundā. 186; **1F** trouble, danger, calamity, difficulty न खल्वेवंविधोऽयमनेकविधोऽन्तरायः संपद्यते UdaySuKa. 57. 15; ओषधिः सम्यग् गृहीता मिश्रिता परैः। औषधैर्यच्छति बलमन्तरायात् च रक्षति ĪśānŚiPa. i. 52. 122; राजा शक्तो गमयति रहश्चिन्तयन्नन्तरायान् PavaDū. (Dh.) 60; शान्तोऽन्तरायः KarpūC. 31; (राक्षसाः) अन्तरायं मुनीनां ते पश्यन्तोऽनुचरन्ति हि AdhyāRā. iii. 2. 21; पौरुषं कृत्वा एषोऽन्तरायो हन्यते KathāK. 107. 28; अहमप्युपायेनान्तरायं हनिष्यामि KathāK. 108. 27; धीराः ख्यातास्त इह भुवने येऽन्तराये न मन्दाः PavaDū. (Vā.) 18; **2** (Jain.) obstacle to knowledge etc., one of the eight types of action (*karman*) considered as a variety (of four kinds) of bondage (प्रकृतिबन्धः) आद्यो ज्ञानदर्शनावरणवेदनीयमोहनीयायुष्कनामगोत्रान्तरायाः TattvārthāSū. 8. 5; तदेकं कर्मसामान्यात् भेदादष्टकमुच्यते … अन्तरायोऽष्टमः स्मृतः VarāṅgaC. 4. 4; अन्तरायो मुनेरस्य जातः संशुद्धचेतसः BṛKathāK. 127. 98; (जगद्गुरुः)

अन्तरायांश्च पञ्चेति घातिशेषमनाशयत् TriṣaŚaPuC. i. 3. 395; भिन्दन्तमन्तर-कारणमन्तरायम् ... वीरं नमामि MahāViSt. (J.) 14; चरमसमये ... अन्तरायं पञ्चविधं क्षपयित्वा केवली भवति SthānṬ. 178B. 13 (F.N.); अन्तरायो दानलाभ-वीर्यभोगोपभोगयुक् MalliC. 3. 186; (जीवः) बन्धकस्त्वन्तरायस्य बन्धः सौम्य भवेदिति SamarāSaṁ. 9. 503; द्वात्रिंशदन्तरायाः स्युः ṢaḍdarSa. (Rā.) 26; दानादीनां विघ्ननिदानत्वमन्तरायस्य स्वभावः SarvaDaSaṁ. 3. 301; **3** the word *antarāya* शरीरपातमात्रान्तराय इति। अन्तरायशब्देन विलम्बो लक्ष्यते ŚrutaPra. iB. 181. 15 (*on* i. 1. 7) [Kośas give *antarāya* as the synonym of the following words : *pratyūha*, AmaK. 2288; AbhidhāRaMā. 2. 246; Vaija. 192. 4; ParaNā. 1611; KośaKaTa. 2. 656; KalpaK. 241. 62; *vighna*, AmaK. 2288; Liṅgānu. (Ha.) 17. 12; 23. 10; AbhidhāRaMā. 2. 246; Vaija. 192. 4; ŚabdaRa.(Vā.) 3450; ParaNā. 1611; KośaKaTa. 2. 656; KalpaK. 241. 62; *vyavāya*, AbhidhāRaMā. 2. 246; ParaNā. 1611;KośaKaTa. 2. 656; also they give *antarāya* as the meaning of the following words : *gaḍa*, AnekāSaṁ. 2. 113; ViśvaPra. 43. 1; DharK. 564; MediK. 43. 9; ViśvaLoK. 91. 6; ŚabdaRaSaK. 96. 18; *gaṇḍaka*, ViśvaPra. 13. 133; MediK. 7. 81; KośaKaTa. 2. 3646; ŚabdaRaSaK. 13. 13; comm. *on* TrikāŚe. iii. 3. 18; *vyāghāta*, ViśvaPra. 66. 118; MediK. 68. 52; ViśvaLoK. 148. 172; ŚabdaRaSaK. 152. 14; also they give *antarāya* in the sense of *vighna*, AbhidhāCin. 1509]

अन्तराय (antarāya) *n.* (Jain.) obstacle to knowledge etc., one of the eight types of action (*karman*) considered as a variety (of four kinds) of bondage (प्रकृतिबन्धः) सोऽष्टविधः ... ज्ञानावरणं दर्शनावरणं वेदनीयं मोहनीयम् आयुष्कं नाम गोत्रम् अन्तरायमिति TattvāBh. *on* 8. 5; अन्तरायं निहन्ति स्म कर्म चावरणद्वयम् BṛKathāK. 105. 284; सहेतुसमधीः सर्वमन्तरायं द्वयातिगः YaśasCam. ii. 391. 15; मोक्षमार्गप्रवृत्तानां तद्विघ्नकरं विज्ञानमन्तरायं कर्म Bhām. 456. 18 (*on* ii. 2. 33); विलयं प्रयान्ति सहसा सहान्तरायेण कर्माणि YogŚā. 11. 22; दानादिलब्धयो येन न फलन्ति विबाधिताः। तदन्तरायं कर्म स्याद्भाण्डागारिकसंनिभम् TriṣaŚaPuC. ii. 3. 475; i. 3. 583; चत्वारिघातिकर्माणि ज्ञानावरणीयमोहनियमान्तरायम् PrakaVi. 546. 20; यस्तु कोऽप्यजयस्तत्रान्तरायं कर्म कारणम् PārśvC. 1. 153; 2. 944; 3. 49; द्वात्रिंशदन्तरायाणि बुबुधे च बुधेश्वरः PrabhāC. 112. 14; गुरुर्मे ... शंकराचार्यनामा ... अखिलकर्माण्यन्तरायाणि हत्वा दिशतु परमतत्त्वोद्धारमोक्षम् ŚaṅkaVi. (Ā.) 281. 13.

अन्तरायक (antarāya-ka) *m.* **i** obstacle or hindrance to knowledge etc. उपचारप्रकारेण जातं ज्ञात्वान्तरायकम्। ... सर्वतोऽभूत् पराङ्मुखः PadmP. (Ra.) 120. 44; **ii** obstacle (to the attainment of Yoga) योगस्य ... आधिव्याधि-विपर्यासप्रमादालस्यविभ्रमाः। अलाभः सङ्गितास्थैर्यमेते तस्यान्तरायकाः YaśasCam. ii. 392. 24.

अन्तरायक (antarāya-ka) *n.* (Jain.) obstacle to knowledge etc., one of the eight types of action (*karman*) कर्माष्टधा ज्ञानदर्शनावरणे तथा मोहनीयं वेद्यमायुर्नामगोत्रान्तरायकम् PārśvC. 3. 32; दानलाभयोर्वीर्यस्य तथा भोगोपभोगयोः प्रत्यूहकरणात् पञ्चविधं कर्मान्तरायकम् PārśvC. 3. 38.

अन्तरायकर (antarāya-kara) *adj.* [*f.*– ī] causing obstacle or hindrance अन्योऽन्यं तुल्यजातीयः ख्यात्यर्थः सर्वतो महान्। अन्तरायकरस्तस्मात्परिज्ञायैनमुत्सृजेत् MaYānaSū. 170. 16 (19. 55); धिगियं वैरिणी रात्रिर्धिगियं च मतिर्मम। अन्तरायकरी स्वामिपादपद्मावलोकने TriṣaŚaPuC. i. 3. 373; अन्नमाश्रित्य तिष्ठन्ति पातकानि महान्त्यपि। एकादश्यां यतो विष्णोरन्तरायकरं हि तत् BṛBrahmaS. iv. 5. 34.

अन्तरायकरण (antarāya-karaṇa) *n.* **i** act of causing obstacle विरता-विरतानां चान्तरायकरणं मुहुः। अचारित्रगुणाख्यानं तथा चारित्रदूषणम् TriṣaŚaPuC. iii. 7. 104; **ii** act of causing interruption यथा ... पाकसंपत्तिस्तथा यतितव्यम् अन्तरायकरणेन वा क्रमिकनिक्षेपेण वा पात्रभेदेन वा BhāṭṭDī. i. 290. 8 (*on* iii.3.15)

अन्तरायकर्तृ (antarāya-kartṛ) *adj.* agent of obstacle (to activity) यच्छब्दो वान्तरायकर्त्रोरध्वर्युयजमानयोः सामानाधिकरण्येन प्रयुज्येत NyāyMāVi. 258. 4 (*on* iv. 4. 5)

अन्तरायकर्मन् (antarāya-karman) *n.* action causing obstacle to knowledge etc., one of the eight types of action (*karman*) किं वान्तरायकर्म स्याज्जनितं जन्मान्तरे। जातं वायुकुमारस्य फलदानपरायणम् PadmP. (Ra.) 16.27.

अन्तरायकारण (antarāya-kāraṇa) *n.* cause of obstacle or impediment असौ विघट्य हठादुद्भटं सुभटभुजपरिघसंघट्टमन्यदप्यचिन्त्यमन्तरायकारणमान-यत्यर्थजातम् UdaySuKa. 85. 24.

अन्तरायकारिन् (antarāya-kārin) *adj.* who causes impediment or hindrance तदा अतुलभुजबलप्रथितोपक्रमे दृप्ते तस्मिन्नेऽस्मिन्नन्तरायकारिणि कार्यसिद्धिर्नो नातिनिरपाया MahāViC. 5 App. A. 58 (6) (282. 2)

अन्तरायकृत् (antarāya-kṛt) *adj.* causing obstacle to knowledge etc. क्रुधा प्रोचे मुनिर्नायं कृत्येषु विदुरो नृपः। न चाहमपि विज्ञोऽस्मि विज्ञस्त्वं योऽन्तरायकृत् PārśvC. 3. 734; निर्यातो मोक्षसौख्याय त्वं मा भूरन्तरायकृत् PārśvC. 3. 1085.

अन्तरायकृन्तन (antarāya-kṛntana) *adj.* destroyer of obstacle अचिन्त्य-रूपमन्तहीनमन्तरायकृन्तनम्। ... तमेकदन्तमेव तं विचिन्तयामि संततम् GaṇePañ.5.

अन्तरायक्षय (antarāya-kṣaya) *m.* decay or loss of obstacle to knowledge etc., one of the eight types of action (*karman*) अन्तरायक्षयादेव लाभो भवति नान्यथा TriṣaŚaPuC. iv. 5. 259.

अन्तरायक्षयतस् (antarāyakṣaya-tas) *adv.* due to the decay or loss of obstacte to knowledge etc., one of the eight types of action (*karman*) अन्तरायक्षयतश्च सर्वान् कैवल्यमुत्पाद्य विदन्ति भावान् VarāṅgaC. 10. 22.

अन्तरायजनित (antarāya-janita) *adj.* [*f.* - ā] produced from obstacle सा चास्या स्थेमबहुलता सांसिद्धिकी वा वक्ष्यमाणव्याधिस्त्यानाद्यन्तरायजनिता वा TattvVai. 3. 10 (*on* 1. 1); न चान्तरायजनितवैगुण्यध्वंसस्य क्लृप्तत्वेन तं प्रत्येवार्थवादिकस्य जनकत्वस्य कल्पनयोपपत्तौ द्वारीभूतादृष्टांशकल्पने गौरवम् BhāṭṭDī. ii. 144. 8 (*on* iv. 4. 5)

अन्तरायण (antarāyaṇa) [w. r. for **अन्तरापण**], PW.

अन्तरायतमोपह (antarāyatamopaha) *adj.* who destroys the darkness in the form of obstacle लक्ष्मीम् पक्ष्मळयत्वाद्यमन्तरायतमोऽपहम्। ... वन्दे चन्द्रकलाकल्पम् महस्त्रितयलोचनम् EI. viii. 309. 3.

अन्तरायतरु (antarāya-taru) *m.* tree in the form of obstacle or hindrance प्रसीददनवद्यविद्यामन्दाकिनीप्रवाहविनिर्मूलितनिखिलसुखान्तरायतरवः स्वस्य रोषतोषयोः समतामानिन्यिरे भूमिभुजः YaśasCam. i. 217. 2 (comm. विघ्नवृक्षाः)

अन्तरायतस् (antarāya-tas) *adv.* due to the intervention स्वप्नादिमन्त्र आवर्त्यो नो वाद्योऽस्त्वन्तरायतः NyāyMāVi. 663. 4 (*on* xi. 4. 18)

अन्तरायता (antarāya-tā) *f.* **i** the state of being obstacle (to the attainment of Yoga) भक्तियोगस्य तत्सर्वमन्तरायतयार्भकः। ... हृषीकेशं स्मयमान उवाच BhāgP. vii. 10. 1; **ii** the state of being obstacle to knowledge etc. चिकित्सनीय एवाहो महामुनिरयं मया। औषधानामसामग्री किं तु यात्यन्तरायताम् TriṣaŚaPuC. i. 1. 745; कथं ह्ययं व्रजतु जनोऽन्तरायताम् Rāgh. 16. 35.

अन्तरायत्व (antarāya-tva) *n.* **i** the state of being an obstacle (to a person) स्नानार्थं भोजनार्थं वा गच्छतो ब्राह्मणस्य यः। समायात्यन्तरायत्वं तमाहुर्ब्रह्मघातकम् BṛNāraP. 14. 29; **ii** the state of being obstacle (to the attainment of Yoga) एकापि भाव्यमानेयमवान्तरविभेदतः। अन्तरायत्वमभ्येति तत्र कुर्यान्न संस्थितम् MālinīT. 13. 57.

अन्तरायदर्शन (antarāya-darśana) *n.* observation of omission 'द्विरात्रे यत्प्रथमं तद्द्वितीयं यद्द्वितीयं तत्तृतीयं जगतीमन्तर्गच्छती'ति पार्ष्टिकस्तृतीयस्य जागतस्यान्तरायदर्शनात् ŚāstrDī. 719. 12 (*on* x. 5. 4)

अन्तरायदोष (antarāya-doṣa) *m.* **A** flaw in the form of obstacle सत्त्वानामावरणं तत्प्रतिपक्षोऽग्रयानसंभाषा। सर्वान्तरायदोषप्रहाणमेषां ततो भवति MaYānaSū. 83. 11 (12. 20); **B** defect or imperfection caused by the obstacle (to the attainment of Yoga) यद्यन्तरायदोषेण दूष्यते चास्य मानसम् ViṣṇuP. vi. 7.34.

अन्तरायध्वंस (antarāya-dhvaṁsa) *m.* **i** destruction of obstacle (to a person) तत्राप्यन्तरायध्वंसस्य मोक्षत्वेऽपि पुरुषार्थत्वाविरोधः SāṁkhyaPraBh. 151. 28 (*on* 6. 21); श्रवणादुत्तरेषां मनननिदिध्यासनादीनाम् अन्तरायध्वंसस्यात्यन्तिकत्व-रूपदार्ढ्यार्थं नियमः SāṁkhyaPraBh. 152. 8 (*on* 6. 23); **ii** destruction of obstacle (to the attainment of Yoga) योगादेवान्तरायध्वंसो भवतीति योगशास्त्रस्यापि सिद्धान्तः SāṁkhyaPraBh. 153. 7 (*on* 6. 28)

अन्तरायध्वंसमात्र (antarāyadhvaṁsa-mātra) *n.* mere destruction of obstacle नन्वन्तरायध्वंसमात्रं चेन्मुक्तिस्तर्हि श्रवणमात्रेणैव तत्सिद्धिः स्यात् SāṁkhyaPraBh. 151. 33 (*on* 6. 22)

अन्तरायध्वस्ति (antarāya-dhvasti) *f.* destruction of obstacle मुक्तिरन्तराय-ध्वस्तेर्न परः (पदार्थः) SāṁkhyaPraSū. 6. 20.

अन्तरायनिवृत्ति (antarāya-nivṛtti) *f.* cessation or disappearance of obstacle अभिव्यक्तिर्मताथापि कादाचित्की न सर्वदा। तदन्तरायसद्भावादव्यक्तिः स्यात्सदा ध्रुवम्। अन्तरायनिवृत्तौ च व्यपेक्षा वः प्रसज्यते BṛĀraUBhVā. iv. 4. 341.

अन्तरायनिष्ठ (antarāya-niṣṭha) *adj.* existing in, i.e. dependent on

omission देवतापदसमभिव्याहृतस्य अन्तरायनिष्ठनिमित्तत्वाप्रतिपादकत्वात् BhāṭṭDī. ii. 143. 19 (*on* iv. 4. 5)

अन्तरायनुद् (antarāya-nud) *adj.* which removes the obstacle विघ्नप्रशमनाय तालाख्यमुद्रामभिधत्ते तालस्त्रिराहतिः पाण्योः साट्टहासोऽन्तरायनुत् MṛgendraT. ii. 5. 17.

अन्तरायनेमि (antarāya-nemi) *f.* rim or periphery of (a wheel destroying) obstacle सः ... कुमारश्रमणमनोभिरिवासंजातमदनफलसङ्गैर्निखिलभुवनभद्रान्तरायनेमिभिः ... भूरिभिः पारासरिभिः ... उपास्यमानपादमूलः ... उद्यानमपश्यत् YaśasCam. i. 92. 3 (*but* comm. विघ्नस्य खण्डने ... चक्रधारासदृशैः)

अन्तरायपञ्चक (antarāya-pañcaka) *n.* aggregate of five (kinds of) obstacles ज्ञानावरणचतुष्कदर्शनावरणत्रयसंज्वलनचतुष्कान्तरायपञ्चकपुंवेदलक्षणानां सप्तदशप्रकृतीनाम् एकद्वित्रिचतुःस्थानकरसा बन्धमधिकृत्य प्राप्यन्ते JñānBiPra. 3.24.

अन्तरायपरंपरा (antarāya-paramparā) *f.* series of obstacles or hindrances क्व चेयं धर्मान्तरायपरंपरायां दैवस्य महती निघ्नता YaśasCam. i. 146.2.

अन्तरायपरिहार (antarāya-parihāra) *m.* avoidance or removal of obstacle अन्तरायपरिहाराय तथा सेचनमपि प्रतिपत्तेरपेक्षितत्वात् TantrRa. 68. 11; अस्य धर्मकार्यस्यान्तरायपरिहाराय ध्वजारोपं यावदजिह्मब्रह्मसेवा अथवा मद्यमांसनियमो द्वयोरेकतरं किमप्यङ्गीकरोतु नृपतिः PrabaCin. 84. 12.

अन्तरायप्रतिहत (antarāya-pratihata) *adj.* affected by obstacles, i.e. sins अन्तरायप्रतिहतैर्दुःखादवाप्यत इति दुर्गः ViṣṇuSaNāBh. 106. 4 (*on* 96)

अन्तरायप्रमथन (antarāya-pramathana) *n.* churning, i.e. destruction of obstacle तज्जन्म रामनामा ... पापचारान्तरायप्रमथनरुचिरः ... तैस्तैस्समुचितचरितैः पूर्व्ववन् निर्व्वभासे (Read निर्ब्बभासे) EI. xviii. 108. 9.

अन्तरायबीज (antarāya-bīja) *n.* seed or cause of obstacle or calamity प्रकर्षवाचिना प्रशब्देन भक्तिश्रद्धातिशयपूर्वकं नमस्कारमाचष्टे स हि धर्मोत्पादकस्तिरयत्यन्तरायबीजं नापरः NyāyKa. 2. 4.

अन्तरायभूत (antarāya-bhūta) *adj.* [*f.* – ā] **i** who has become an obstacle (to a person) मयणल्लदेवी हृदयादर्शसंक्रान्ततद्बाधा स्वयमेव पश्चाद् व्याघुटन्ती अन्तरान्तरीभूतेन(v.l. अन्तरान्तरायभूतेन) श्रीसिद्धराजेन विज्ञप्ता PrabaCin. 57. 16; **ii** which has become an obstacle (to the attainment of Yoga) वत्स स्फुरति ते परं चापरं च ब्रह्म। आयुष्मन्, निरुध्यन्तामन्तरायभूताश्चित्तवृत्तयः AmṛUda. 3. 17 (7)

अन्तरायमात्र (antarāya-mātra) *n.* mere obstacle or hindrance or obstacle सकलविषयभोगविरक्तं ब्रह्मानन्दैकप्रेप्सुम् ... प्रति लोकविशेषप्राप्तिः ... न फलं तु स्वेप्सितफलप्राप्तौ अन्तरायमात्रम् PūrvottaVāNaMā. 246. 18.

अन्तराययुक्त (antarāya-yukta) *adj.* associated with or full of impediments स्थैर्यं सर्वेषु कृत्येषु शंसन्ति नयपण्डिताः। बह्वन्तराययुक्तस्य धर्मस्य त्वरिता गतिः Pañcā. 190. 20.

अन्तरायरहिता (antarāya-rahitā) *adj.* (*f.*) devoid of or free from obstacle का लक्ष्मीः पदमुन्नतम् ... किं तद् गौरवमन्तरायरहितापूर्वैव गुर्वी स्थितिः SūktiMu. 98.29.

अन्तरायरूप (antarāya-rūpa) *adj.* of the form of obstacle (to the attainment of Yoga) स च भगवानीश्वरः प्रसन्नः सन् अन्तरायरूपान् क्लेशान् परिहृत्य समाधिं संबोधयति RājMār. 39. 2.

अन्तरायरूपत्व (antarāyarūpa-tva) *n.* the state of being of the nature of obstacle अपिशब्देनाश्रमधर्माणां तथात्वं किमु वाच्यं यतो ज्ञानतत्साधनवैराग्यादीनामप्यन्तरायरूपत्वं स्मर्यते AṇuBh. 291. 12 (*on* iii. 4. 36)

अन्तरायवाक्यवत् (antarāyavākya-vat) *adv.* like sentence indicative of omission अत्राप्यन्तरायवाक्यवदभरणवाक्यस्यार्थवादत्वान्नित्या वैश्वानरेष्टिः NyāyMāVi. 258. 21 (*on* iv. 4. 6)

अन्तरायविधुर (antarāya-vidhura) *adj.* devoid of or free from obstacle श्रीमदानन्दतीर्थो मुनिः ... स्वयमन्तरायविधुरोऽपि ... अवश्यं करणीयं शिष्यान् ग्राहयितुं ग्रन्थादौ निबध्नाति NyāySu. (Ja.) 1A. 12 (*on* i. 1. 0)

अन्तरायविरह (antarāya-viraha) *m.* [Inst.] without any obstacle or hindrance कर्मारम्भे प्रारब्धस्यान्तरायविरहेण परिसमाप्तिं कामयमाना अभीष्टदेवतानमस्कारपूर्वकं प्रेक्षावन्तः प्रवर्तन्ते NyāyVārPari. 24. 6.

अन्तरायविवर्जिता (antarāya-vivarjitā) *adj.* (*f.*) devoid of any hindrance योऽसौ विभीषणः ख्यातः ...। अलङ्घ्यवचनं तस्य कुरुते खेचराधिपः। तयोर्हि परमा प्रीतिरन्तरायविवर्जिता PadmP. (Ra.) 48. 241.

अन्तरायविहत (antarāya-vihata) *adj.* affected by obstacle or hindrance तस्यैवमन्तरायविहतयोगारम्भणस्य राजर्षेर्भरतस्य ... कालः ... आपद्यत BhāgP. v. 8. 26.

अन्तरायशङ्का (antarāya-śaṅkā) *f.* doubt regarding obstacle यद्वा कस्यचिदङ्गस्यान्तरायशङ्कापरिहारार्थम् ... पूर्वपक्षेऽभिषेचनीयारम्भे परिगणनीयानि विदेवनादीनि सिद्धान्ते तु राजसूयारम्भः MayūMāli. 396. 3 (*on* iv. 4. 2)

अन्तरायशत (antarāya-śata) *n.* hundreds of obstacles विमुक्तकल्पं मन्वानः समृद्धादात्मनः पदात्। अन्तरायशतं चक्रे ततो भीतः पुरंदरः PadmP. vi. 174.22.

अन्तरायशून्य (antarāya-śūnya) *adj.* devoid of interruption एकघनशोकसंविच्चर्वणेऽपि लोके स्त्रीलोकस्य हृदयविश्रान्तिरन्तरायशून्यविश्रान्तिशरीरत्वात् (सुखस्य) AbhinBhā. i. 282. 8 (*on* 6.31); Kāvyānu. (He.) 77. 6.

अन्तरायश्रवण (antarāya-śravaṇa) *n.* act of hearing, i.e. mention of an obstacle अर्थवादमात्रमन्तरायश्रवणमिति नित्य एव स्यात् ŚāstrDī. 398. 6 (*on* iv. 4. 5)

अन्तरायसदृश (antarāya-sadṛśa) *adj.* similar to an interruption कुरङ्गीदृशः। उन्मीलत्कुचकाञ्चनाब्जमुकुलं यूनां मुहुः पश्यतां बाह्वोरन्तरमन्तरायसदृशा मन्ये निमेषा अपि NalaCam. 3. 30.

अन्तरायसमाधान (antarāya-samādhāna) *n.* act of redressing of omission (of deities) विनैव संयोगेन दधिग्रहस्य ग्रहणम् अन्तरायसमाधानं त्वस्य प्रयोजनम् ŚābaBh. 1274. 23 (*on* iv. 4. 11)

अन्तरायसंभव (antarāya-sambhava) *m.* **i** arising or possibility of obstacle प्रमातृप्रमेये हि प्रमाणोपक्षीणवृत्तिनी प्रमायां न व्याप्रियेते। तेनान्तरायसंभवान्नावश्यम् ... प्रमा भवति TātpaṬ. (Vā.) 24. 22 (*on* i. 1. 1); निश्चयश्च शास्त्रोपायकमेवेदं निःश्रेयसमित्याकारो, न त्ववश्यंभाविप्रयोजनाकारः कृष्यादाववग्रहादिवदत्राप्यन्तरायसंभवात् NyāyVārPari. 39. 7; हितं सुखसाधनं दुःखसाधनमहितम्। तयोर्यथासंख्यं प्राप्तिपरिहारौ ... योग्यग्रहणं क्वचिदन्तरायसंभवेन ... चेष्टात्वस्य प्रयोजकत्वमादर्शयितुम् Kiraṇā. 131. 20; **ii** possibility of intervention (in time) यत्किंचिद्व्यापाराभिप्रायेऽन्तरायसंभवात् हस्ताद्यव्याप्तिः KhaṇḍanKhā. 503. 15.

अन्तरायसहस्र (antarāya-sahasra) *n.* thousands of obstacles परमेश्वरभक्तिर्नाम ... अनेकगुणाधिकोऽन्तरायसहस्रेणाप्यप्रतिबद्धः ... प्रेमप्रवाहः NyāySu. (Ja.) 17B. 13 (*on* i. 1. 1)

अन्तरायहत (antarāya-hata) *adj.* affected by obstacle (to the attainment of Yoga) पूर्वं त्यक्तैस्सरोऽम्भोभिर्हंसा योगं पुनर्ययुः। क्लेशैः कुयोगिनोऽशेषैरन्तरायहता इव ViṣṇuP. v. 10. 9; तत्र जन्मनि तमेव पौर्वदेहिकं योगविषयं बुद्धिसंयोगं लभते। ... संसिद्धौ यतते। यथा नान्तरायहतो भवति तथा यतते GītāBh. (Rā.) 356. 6 (*on* 6. 43)

अन्तरायहीन (antarāya-hīna) *adj.* devoid of obstacle or hindrance स मनुः ... निजमन्तरमन्तरायहीनं चरितं ते कथयन् सुखं निनाय Nāray. iii. 14. 1 (comm. शारीरमानसदैविकभौतिकाः क्लेशाः प्रजापालनोपरोधाः तद्रहितम्)

अन्तरायहेतु (antarāya-hetu) *m.* cause of calamity or danger अन्तरायहेतुः प्राणातिपातस्तस्यायुषो भवतीति वेदितव्यम् AbhidhKoBh. 254. 6 (*on* 4. 84)

अन्तरायात (antar-āyāta) *adj.* passing between (teacher and pupil) अनध्यायम् ...। पश्वाद्यैरन्तरायातैरहोरात्रं विदुर्बुधाः BṛParāSm. 6. 360.

अन्तरायातिग (antarāyātiga) *adj.* who has overcome or removed all impediments तयोर्नौ (लक्ष्मीनारायणयोः) ... पदमुत्तमम्। ... क्लेशेन महता सिद्धैरन्तरायातिगैः क्रमात्। ... अवाप्यते LakṣmīT. 17. 11.

अन्तरायानुपहत (antarāyānupahata) *adj.* not affected by obstacle ततो मां प्रणिधानेनाभ्यासेन दृढभूमिना। अन्तरायानुपहतं ज्ञात्वा तुष्टोऽब्रवीद्धरः SkandP. i (2). 9. 34.

अन्तरायान्तर (antarāyāntara) *n.* another obstacle मुक्त्यैकात्म्यस्य चाज्ञानं नान्तरायान्तरं यतः। विधितन्त्रस्य कार्यत्वान्नाज्ञाने प्रभविष्णुता BṛĀraUBhVā. ii. 4. 150.

अन्तरायान्विता (antarāyānvitā) *adj.* (*f.*) construed with the (meaning of) obstacle देवतायाश्चान्तरायान्विताया नित्यायाः स्वरूपेण निमित्तत्वायोगात् BhāṭṭDī. ii. 143. 20 (*on* iv. 4. 5)

अन्तरायापहारक (antarāyāpahāraka) *adj.* which removes the obstacle or impediment शंभोः ... ऐश्वर्यमष्टधा ...। प्रतापो दुःसहश्चास्त्रमन्तरायापहारकम् AgniP. 74. 61.

अन्तरायाब्धि (antarāyābdhi) *m.* ocean (in the form) of obstacle जम्भारिमौलिमन्दारमालिकामधुचुम्बिनः। पिबेयुरन्तरायाब्धिं हेरम्बपदपांसवः KundaMā. 1.1.

अन्तरायाभाव (antarāyābhāva) *m.* absence, i.e. removal of obstacle (to the attainment of Yoga) ततः प्रत्यक्चेतनाधिगमोऽप्यन्तरायाभावश्च YogSū. 1. 29; YogBh. 106. 10 (*on* 2. 32); TattvVai. 34. 15 (*on* 1. 29)

अन्तरायाम (antar-āyāma) *m.* **i** name of a disease caused by morbid wind in the body (*lit.* internal convulsion or spasm) मन्ये संश्रित्य वातोऽन्तर्यदा

नाडीः प्रपद्यते। मन्यास्तम्भं तदा कुर्यादन्तरायामसंज्ञितम्। अन्तरायम्यते ग्रीवा ...। इत्युक्तस्त्वन्तरायामः CaraS. vi. 28. 45 (1941 Ed.); बाह्यायामान्तरायामौ विद्यादाक्षेपकौ तथा BhelaS. 44. 1. (1. 26); AṣṭāSaṁ. i. 301. 3 (3. 15); मन्ये संस्तभ्य वातोऽन्तरायच्छन् धमनीर्यदा। ... अन्तरायाम इत्येषः AṣṭāHṛ. iii. 15. 24; अशीतिर्वातजा रोगाः कथ्यन्ते मुनिभाषिताः। ... बाह्यायामोऽन्तरायामः ŚārṅgaS. i. 7. 106; **ii** name of a disease (of an elephant) वातैस्सहितास्त्रयः स्कन्दा भवन्ति। तेऽन्तरायामबहिरायामव्याविद्धस्कन्दा इति त्रयः। तेषामेकः कृच्छ्रसाध्योऽन्तरायामः Hastyāyur. 75. 17 (1. 10); सौवीरकस्तु यः प्रोक्तः ... नागेभ्यः ... दापयेदन्तरायामे रोगेषु कफजेषु च Hastyāyur. 660. 5 (4. 18)

अन्तरायार्थवाद (antarāyārthavāda) *m.* explanatory or commendatory passage regarding intervention प्रकरणपाठस्य पाक्षिकत्वपरिहारार्थमन्तरायार्थवादस्यैव तदौचित्यात् BhāṭṭDī. ii. 144. 12 (*on* iv. 4. 5)

अन्तरायिक (antarāyika) *adj.* connected with hindrance, causing obstacle or obstruction यथा कर्मस्वकज्ञानबलमेवं ये वा पुनर्मया श्रावकाणामन्तरायिका धर्मा आख्याता इत्येतद्वैशारद्यम् AbhidhKoBh. 414. 5 (*on* 7. 32); संप्रजानन् मृषावादः ख[लु आयुष्मन्तः अन्तरायिको धर्म उक्तो भगवता। तस्मात् ... आपत्तिराविष्कर्तव्या ...] PrātiSū. 7. 9 [DBHS.]

अन्तरायिकधर्म (antarāyika-dharma) *m.* obstructive conditions अन्तरायिकधर्मानन्यथात्वनिश्चितव्याकरणवैशारद्यम् MahāVyu. 8. 3; 281. 123 [DBHS.]

अन्तरायिकधर्मवैशारद्य (antarāyikadharma-vaiśāradya) *n.* excellence or expertise regarding obstructive conditions (to religious life) चत्वारि वैशारद्यानि। ... अन्तरायिकधर्मवैशारद्यं कतमत्। ध्यानं निश्रित्य परार्थमारभ्य सर्वाकारान्तरायिकधर्मप्रतिज्ञाप्रतिष्ठापनसमृद्धौ यः समाधिः प्रज्ञा शेषं पूर्ववत् AbhidhSa. 98. 10.

अन्तरायिणी (antarāyiṇī) *adj. (f.)* having an obstacle, obstructed विक्रमादित्यः कीर्तिवर्मा तदात्मजः। येन चालुक्यराज्यश्रीरन्तरायिण्यभूद् भुवि EI. xii. 152. 23; xii. 275. 37; xii. 311. 30.

अन्तरायित (antarāyita) *adj.* led to obstruction भुजमूलपुलकवितरणरतकान्तकैतवान्तरायितयुवतिपुष्पावचितिनि (उद्याने) YaśasCam. i. 99. 6 (comm. अन्तरायं प्रापिता)

अन्तरायीभवत् (antarāyī-bhavat) *adj.* becoming or functioning as an obstacle कार्याणां सुरकार्याणामन्तरायीभवन्स्वयम्। न स्थाता चिररात्राय वत्स वां कलिरप्ययम् ParamāKā. 72. 55.

अन्तरायीभू (antarāyī-bhū-) I. P. to become an obstacle (to an activity) गवां तृष्णाभिभूतानां पानार्थमभियायिनाम्। अन्तरायीभवेद्यस्तु तमाहुर्ब्रह्मघातकम् BṛNāraP. 14. 28; स्वामिन् साधय कार्यमात्मनि हितं नात्रान्तरायीभवाम्यद्वैते हि सुखे प्रियस्य मुदिताधीनाः कुलीनाः स्त्रियः VasaViKā. 14. 46.

अन्तरायीभूत (antarāyī-bhūta) *adj.* **i** (non-obstacle) who has become an obstacle मयणल्लदेवी ... अन्तरान्तरीभूतेन (v.l. अन्तरायीभूतेन) श्रीसिद्धराजेन विज्ञप्ता PrabaCin. 57. 16; KumāPraPra. 42. 9; **ii** (non-obstacle) which has become an obstacle (to the attainment of Yoga) जपलक्षणेन च स्वाध्यायेनेष्टदेवतादर्शनादि ततश्चान्तरायीभूतक्लेशोन्मूलनकृतः समाधिलाभः Vidvanmo. 7. 55 (13)

अन्तरायुधिन् (antar-āyudhin) *m.* warrior who is in between chief warrior सोऽन्तरायुधिनं हत्वा राजपुत्रमरिंदमः। गुरुभारसहस्कन्धे नागस्यासिमपातयत् MahāBhā. vi. 50 .36 (JñānDī. प्रधानयोधम्; BhārBhāDī. गजारूढयोधम्)

अन्तरायोत्कर्षाभाव (antarāyotkarṣābhāva) *m.* absence of the excess of impediments तदलमत्र कालव्यालावलोकनकरप्रस्थानेन। मा हि कार्षीरन्तरायोत्कर्षाभावम् ... आवयोः YaśasCam. ii. 287. 19.

अन्तरायोधनम् (antarāyodhanam) *adv.* in the battle ये तत्र निहता राजन्नन्तरायोधनं प्रति। यथाकथंचित्ते राजन्संप्राप्ता उत्तरान्कुरून् MahāBhā. xi. 26. 17.

अन्तरायोनिजात (antarāyoni-jāta) *adj.* born in the womb of lower or mixed caste पुंश्चलः पापयोनिर्वा (v.l. अन्तरायोनिजातो वा) यः कश्चिदिह लक्ष्यते। स तस्यामेव सुचिरं मतङ्ग परिवर्तते MahāBhā. xiii.29.6.

अन्तराय्य (antar-āyya) *adj.* [P. vi. 1. 214] to be stepped in between न प्र॒वर्ग्यं॑ चादि॒त्यं चा॒न्त॒रे॑यात्। यद॒न्त॒रे॒यात्। दु॒श्चर्मा॑ स्यात्। तस्मा॒न् नान्त॒राय्य॑म्। आ॒त्मनो॑ गोपी॒थाय॑। वेणु॑ना करोति TaiĀ. v. 3. 2 (599. 7)

अन्तरारम्भशेष (antarārambha-śeṣa) *m.* balance remaining from the undertaking (given up) in the middle विक्षेपव्याधितान्तरारम्भशेषः च व्ययप्रत्ययः ArthŚā. i .140. 4 (2. 6); i. 232. 2 (2. 15)

अन्तराराम (antar-ārāma) *adj.* having bliss or joy within योऽन्तःसुखोऽन्तरारामस्तथान्तर्ज्योतिरेव यः। स योगी ब्रह्मनिर्वाणं ब्रह्मभूतोऽधिगच्छति MahāBhā. vi. 27. 24 = BhagGī. 5. 24; विद्वान् ... जीवन्मुक्तः ... ब्रह्मानन्दमनुभूय ... अन्तरारामोऽन्तर्ज्योतिः ... अवतिष्ठते ŚvetāUBh. 114. 6 (*on* 1. 11); अन्तराराम इति ... स्वगुणैः सुखवर्धकः ... स्वगुणैरपहतपाप्मत्वज्ञानानन्दादिभिः ... आत्मैव सुखवर्धक इत्यारामशब्देनोपचर्यते GītāBh. (Rā.) 315. 8 (*on* 5. 24)

अन्तरारिव्रज (antarāri-vraja) *m.* group of internal enemies जित्वान्तरारिव्रजम् ... कुरु करक्रोडस्थमिष्टं सुखम् SindūPra. 95.

अन्तरारूढशूर (antarārūḍha-śūra) *m.* soldier mounted or seated in the middle युक्तम् ...। अन्तरारूढशूरेण खेटकद्वयधारिणा। ईदृग्गुणयुतं नागमारोहेद् विजयोद्यतः Mānaso. ii. 20. 1199.

अन्तरार्गला (antarārgalā) *f.* inner bolt आसीद्दुरुत्तरारक्तनिमग्नैवान्तरार्गला PāṇḍaC. 13. 164.

अन्तरार्थ (antarārtha) *m.* meaning, i.e. mention of the interval उत्पत्तेस्तु निवेशः स्याद् गुणस्यानुपरोधेनार्थस्य विद्यमानत्वाद्विधानादन्तरार्थस्य नैमित्तिकत्वात्तदभावेऽश्रुतौ स्यात् MīmāSū. x. 8. 66; तदर्थत्वादन्तरार्थत्वाद् द्विपुरोडाशायामेव भविष्यतीति। तन्न। तत्प्रधानत्वात्। पौर्णमासी प्रधानतः अन्तरार्थो गुणतः ŚābaBh. 2092. 12 (*on* x. 8. 64)

अन्तरार्थत्व (antarārtha-tva) *n.* the state of being the meaning, i.e. mention of the interval द्विपुरोडाशायां स्यादन्तरार्थत्वात् MīmāSū. x. 8. 62; ŚābaBh. 2091. 23 (*on* x. 8. 62)

अन्तरार्द्रता (antar-ārdratā) *f.* **1** moisture in the interior अनिशान्तवैरदहनेन विरहितवतान्तरार्द्रताम्। कोपमरुदभिहतेन भृशं नरकात्मजेन तरुणेव जज्वले ŚiśuVa. 15. 50; **2** softness of the heart, i.e. politeness, ŚiśuVa. 15. 50.

अन्तरार्ध (antarārdha) *m.* half of the difference बाह्वोर्या स्यादन्तरार्धस्य जीवा दोःकोट्योः स्यादन्तरार्धस्य सा ज्या SiddhāTaVi. 88. 23.

अन्तराल (antarāla) *n.* [DEBRU. 288; 865] **1Ai** space or region in between, intermediate space or region or gap [Loc.] **i** at the intermediate space or region, in the gap **ii** between (two entities) **iii** between (noun and affix) **iv** in the midst, among [Inst.] through or by the intermediate space **ii** distance between (the holes or bridges on musical instrument) **B** intermediate point (of articulation) **C** [Loc.] at the (spatial) limit **D** middle corridor [Loc.] in the middle corridor **E** intermediate quarter or point of compass [Loc.] in the intermediate quarter or point of compass **F** middle, centre [Loc.] **i** at the middle or centre **ii** in the middle of the way **G** intermediate space (between heaven and earth) or ether or atmosphere or sky [Loc.] in the intermediate space (between heaven and earth) or in the ether or atmosphere **H** [Loc.] on the way **2A** essence, core **B** interior or inner space of circle [Loc.] in the interior or inner space of circle [Inst.] through the interior or inner space of circle **C** interior or inner side [Loc.] at the interior or inner side **D** inside, i.e. heart or mind [Loc.] in the heart or mind **E** [Loc.] in the interior region **F** [Loc.]within **3A** intervening time, period in between, interval, leisure [Loc.] **i** at the intervening time, at the interval **ii** in the meantime, meanwhile **iii** in the middle, abruptly, midway [Inst.] with interval or leisure **B** juncture of two periods **4** difference (of ideas) [Loc.] regarding the difference (of ideas) **5** intermediate position, interim state [Loc.] in the intermediate position, at interim state **6** type of local dance *(deśīnṛtta)* **7** type of hall *(maṇḍapa)* **8** the word *antarāla* **1Ai** space or region in between, intermediate space or region or gap आग्नेयेनाष्टाकपालेनान्तरालं प्रतिपद्यते ĀpaŚS. xxii. 11. 21; HirŚS. xvii. 5. 13 (437. 14); ĀpaŚS. xix. 12. 2; यथार्थं हविर्धानयोः। अन्तरालं कुरुतः HirŚS. vii. 5. 13 (699. 4); अपरेणाहवनीयम् ... हविर्धाने स्थापयित्वाभिमन्त्रयतो यावदर्थमेतयोरन्तरालम् VaikhāŚS. 14. 6; आग्न्याधेयिके विहारे गार्हपत्याहवनीययोरन्तराले विज्ञायते ĀpaŚuS. ii. 4. 1; HirŚuS. i. 2. 1; i. 2. 4; नेमिनाभ्योरन्तरालं द्वात्रिंशद् वा विभज्य विपर्यासं भागानुद्धरेत् BaudhŚuS. 5. 22; (आचार्यान्तेवासिनोः) तदन्तरालानुपलब्धेरहेतुः NyāySū. ii. 2. 26; दिक्षु चैवान्तरालानि लाञ्छ्य पूर्वोक्तलाञ्छनैः PauṣkS. 3. 56; संसारे ... द्वे गती पण्डितानाम् ... मुग्धाङ्गनानाम् ... स्थूलोपस्थस्थलीषु(स्थान्तराले) ŚatTrayī. 88; (यूपैकादशिन्यां यूपानाम्) तेषामन्तराले यथाकामी न नियमः श्रूयते SaṅkarKā. i. 4. 47 (AOR. Ed.); SaṅkarKāBh. 52. 7 (*on* i. 4. 47); (शब्दः) येन संप्रदीयते यस्मै च तयोरन्तरालेऽवस्थानमस्य केन लिङ्गेनोपलभ्यते NyāyBh. 138. 2 (*on* ii. 2. 26); विनतेन चान्तराले फलकच्छेदार्धसूत्रसमे PañcSi. 13. 32; ऋषीणां सिच्यमानानामन्तरालं समाश्रितः GobhiSm. 1. 147; मण्डपे प्रस्तरस्योर्ध्वे कर्णहर्म्यादिमण्डितम्। यत्तन्नामान्तरालं चोर्ध्वे नासिकाजालपञ्जरं वापि MānaSā. 19. 105;

यदि कुमारीपुरप्रवेशाभ्युपायं नावबुध्यसे ननु बन्धनागारभित्तेर्व्यामत्रयमन्तरालमारामप्राकारस्य DaśKuC. 60. 21; परिवर्ज्य च। अन्तरालानि विप्रेन्द्र तदुच्छ्रायमथाचरेत् PāraS. 15. 78; PauṣkS. 42. 77; क्षिपेत् ... सूत्रात्सूत्रादन्तरालं षोडशाङ्गुलसंमितम् PāraS. 16. 121; इदं च ते लङ्काकिष्किन्धयोरन्तरालं निशाचरशवैरलंकरिष्यते MahāViC. (App. B) 6. 17(1) (300. 7); यमवाय्वन्तराले च कुर्वीतोलूखलालयम् VāstuVi. 4. 19 (42. 10); चतस्रः षड् वा दशनपदपङ्क्तयो निष्पाद्याः। तासां चान्तरालानि संमूर्छितरक्तत्वात्ताम्राणि भवन्ति JayaMa. 128. 7 (*on* 2. 5); NavaSāC. 17. 41; कूर्परांसशब्देनोभयसामीप्यं तयोरन्तरालं गृह्यते AbhinBhā. ii. 62. 13 (*on* 9. 154); ii. 409. 8 (*on* 18. 5); विश्वसृजा तेन ते समतलमभ्युदयास्तशैलयोरन्तरालमखिलेनाह्ना लङ्घयन्ति UdaySuKa. 124. 23; वेष्टकः ... प्राकारस्तस्य बाह्यतः। एतयोरन्तरालं च राजमार्गेण संमितम् SamarāSū. 10. 50; नीलशैलनिषधावधी च तावन्तरालमनयोरिलावृत्तम् Golā. 183. 31 (21. 28); YaśasCam. i. 369.1; ii. 31. 1; भ्रमभित्त्योरन्तरालं शिलाभिर्निचितं विधाय PrabaCin. 87.12; KumāDeC. 26. 32; अग्निप्रकरणे अन्तरालस्याचोदितत्वात् तद्विधेर्न प्रकरणे व्यवस्थितिः स्यात् MīmāKau. ii. 128. 12 (*on* ii. 4. 26); कुशमयऋषिप्रतिमानानाम् अन्तरालं मध्यम् आश्रितः VīraMi. (Āhnika.) 188. 23; रन्तुकारन्तुकयोः चत्वारिंशत्क्रोशात्मकमन्तरालं कुरुक्षेत्रस्य पूर्वमर्यादा VīraMi. (Tīrtha.) 464. 22; पशुशीर्षाद्युपधाने यदन्तरालमुत्पद्यते तत्पूरणार्थमपि कतिपया इष्टका निर्मातव्याः BhāṭṭCan. 37. 17 (*on* xiv. 1. 4); 37. 21 (*on* xiv. 1. 4); [Loc.] **i** at the intermediate space or region, in the gap दिनेष्टका उपदधाति ... तासामन्तरालेष्वेतेषामेव दिनानां मुहूर्तेष्टका उपदधाति BaudhŚS. ii. 418. 13; ii. 419. 4; एके लेखान्तरालेषु सिकता निवपन्ति BaudhŚS. ii. 420. 1; यूपेषु ग्राम्यान्पशून्नियुनक्त्यन्तरालेष्वारण्यान् धारयन्ति VārāŚS. III. iv. 3. 23; कटाँस्तेजनीश्च प्रवर्तं छदिषामन्तरालेष्वन्ववस्यन्ति HirŚS. vii. 5. 27 (701. 9); vii. 7. 21 (721. 25); पक्षाग्रयोस्तिस्रस्तिस्रोऽध्यर्धा उदीचीः। तासामन्तरालेष्वेकैकामर्धेष्टकां प्राचीम् BaudhŚuS. 3. 59; नेम्यामन्तरालेषु द्वे द्वे (इष्टके) BaudhŚuS. 5. 35; 5. 36; वसिष्ठकश्यपयोः अन्तराले अरुन्धत्यै कल्पयन्ति HirGS. ii. 19. 4; ĀgniveGS. i. 2. 2 (15. 6); समिध्यमानवतीं समिद्धवतीं चान्तरेण धाय्याः स्युर्द्यावापृथिव्योरन्तराले समर्हणात् MīmāSū. v. 3. 4; कान्ताकुचान्तराले शीते लोके तु भाग्यवान् पुरुषः ŚatTrayī. 766; 844; नापरे न परे तीरे नान्तराले तयोः स्थिता। अध्वनां समताज्ञानात् प्रज्ञापारमिता मता AbhisaAlaṅ. 3. 1; अवतिष्ठमानो हि दातृप्रतिग्रहीत्रोरन्तराले उपलभ्येतेति इति सूत्रार्थविरोधः NyāyVār. 302. 18 (*on* ii. 2. 27); लब्धस्पर्शं भूव्यधादव्यथेन स्थित्वा किंचिद्दन्तयोरन्तराले। ... जित्वोत्तस्थे नागमन्येन ŚiśuVa. 18. 47; अब्दादित्ययोः अन्तराले वायुः निवेशयितव्यः BrahmSūBh. (Śaṅ.) 824.14 (*on* iv. 3. 2); AṇuBh. 334. 16 (*on* iv. 3. 2); वक्त्रेन्दोरन्तराले कृतवसतिरिवाभाति नक्षत्रराजिः ViṣṇuPādāSt. 36; देशिन्यङ्गुष्ठानन्तराङ्गुलिः। तस्याङ्गुष्ठस्य चान्तराल इत्यर्थः BālaKrī. i. 38. 23 (*on* 1. 19); बहिरष्टसु कोणेषु द्वितीयार्णादि संलिखेत्। अन्तरालेषु विलिखेदाद्यं वृत्तद्वयान्तरा(न्) TantrRā. 10. 56; वृत्तं त्र्यस्रं पुनर्वृत्तं षडस्रं वृत्तयुग्मकम्। ... अत्र विन्यसेत्। एकं मध्ये बहिः कोणेष्वन्तरालेषु च क्रमात्। त्रयं त्रयं समालिख्य ... स्थापयेत् TantrRā. 23. 70; भजत बलसमूहाः खर्वदूर्वास्थलानि ... कुसुमितलतिकानामन्तरालेष्वमूनि NalaCam. 6. 75; न च शङ्खवर्तिना तेनान्तराले शब्द आरब्धव्यः NyāyKa. 60. 12; अन्तराले तथा मृत्युर्न भूमौ कुशसंस्तरे DevīBhāP. iii. 12. 70; अन्तराले किमिति नोपलभ्यते ĀtmaTaVi. 401. 5; हारच्छायां वहति कुचयोरन्तराले मृणाली SubhāRaK. 11. 22; नीलोत्पलदलोपमे दृक्सरस्योरन्तराले तयोः पालीव नासिका TrīṣaŚaPuC. ii. 3. 62; अन्तराले तयोर्नद्योरवात्सुः केऽपि तापसाः PariPar. 12. 70; त्रिकोणे देवः तस्य षडस्रस्यान्तराले श्रीश्रीपत्यादिचतुर्मिथुनानि ... इन्द्राद्याः पूज्याः ParaśuKS. 2. 8 (81. 13); तत्र अष्टसु कोणेषु अष्टस्वन्तरालेषु च दशोत्तरशताक्षरीविद्यायाः षोडशवर्णान् ... संलिख्य ParaśuKS. 11. 3 (309. 9); अमृन्मयीनां पशुशीर्षादीनाम् अन्तराले उपधानार्थाः काश्चिदन्या इष्टका उत्पाद्याः SaṅkarKāBh. 57. 4 (*on* ii. 1. 5); अतोऽन्तराले त्वनुपातमायुरारस्य वक्रे द्विगुणीकृतं स्यात् JātaPā. 10. 46; अथान्तराले नद्यस्ति पुरस्योपवनस्य च PārśvC. 3. 257; वृषभो वृषभासुरं तं शिशुं पदानामन्तराले निधाय गोधनम् ... प्रेरयामास PrabaCin. 110. 8; देशानुरोधाद्वधूवरयोरन्तराले जवनिका दत्ता PrabaK. 74. 10; इतरेतराभावस्याकाशत्वेऽपीतरेतभावस्य तत्तद्वस्तुगतत्वेन तेषामन्तराल आकाशप्रतीतिर्न स्यात् BrahmSūBh. (Rā.) 489. 7 (*on* ii. 2. 23); किं मम मस्तकम् एतस्य शृङ्गयोरन्तराले माति न वा Bharaṭ. 16A. 9; संप्रदीयमानं गवादि दातृप्रतिग्रहीत्रोरन्तराल उपलभ्यते न च वेदादि गुरुशिष्ययोरन्तराले उपलभ्यत इति नाध्यापनं संप्रदानमिति चेत् अन्तरालेऽपि तत्रस्थपुरुषश्रोत्रेण तदुपलम्भात् ... शब्दस्य नित्यता Upask. 133. 9 (*on* ii. 3. 33); साहबदीनेन गज्ञणपुरात्समागत्य पृथ्वीराजं लाहउरमून्धउरयोरन्तराले निहत्य ढिल्ली गृहीता PurāPraSaṁ. 135. 2; नन्दगोपः ... शिबिरं वृन्दावनराजधान्योरन्तराले निवेशितवान् KaṁVa. 5. 2 (9); अन्तरा शृङ्गयोरन्तराले VīraMi. (Saṁskāra.) 972. 6; अराणामन्तरालेषु बहिर्वलयवर्तिषु। एकैकाक्षरसंयुक्तं छन्दसानुष्टुभा कृतम् SāhiSā. 2. 154; 2.150; **ii** between (two entities) अन्तराले तु शेषाः स्युरुपास्यादौ च काण्डत्वात् BhaktiSū. (Śā.) ii. 2. 3; पूर्वन्यस्तानां दक्षिणस्तम्भानां दक्षिणभित्तेश्चान्तराले स्तम्भत्रयम् AbhinBhā. i. 66. 14 (*on* 2. 92); श्यावाश्वाधिकरणे 'रुक्मललाटो दक्षिणा' इत्यस्य 'स ब्रह्मणे देयः' इत्यस्य चान्तराले 'स ह्यनिरुक्तः' इति वाक्यान्तरं पठितम् NyāyMāVi. 528. 18 (*on* x. 3. 19); दशानने सा तृणवन्निरास्था जगाद कृत्वा तृणमन्तराले Rāgh. 13. 35; तमआकाशयोरन्तरालेऽक्षराव्यक्तमहद्भूतादितन्मात्रेन्द्रियाणि क्रमेण बोध्यानि GoviBh. 147. 8 (*on* ii. 3. 12); **iii** between (noun and affix) प्रकृतिप्रत्यययोः स्वार्थवृत्तयोरेव नैरन्तर्यादन्तराले संबन्धोऽवगम्यमानो भवति TantrVā. 533. 7 (*on* ii. 2. 23); अन्तराले तु पाञ्चालीवैदर्भ्योर्यावतिष्ठते। सावन्तिका समस्तैः स्याद् द्वित्रैस्त्रिचतुरैः पदैः SaraKaṇṭhā. 156. 24; Ekāva. v. 13. 2; अन्तराले वृत्करणं रधादिसमाप्त्यर्थं न तु पुषादिपरिसमाप्त्यर्थम् Pradī. iii. 101B. 10 (*on* iii.1. 52); **iv** in the midst, among इति वादिनमश्रोषीन्निकषा निकषासुतम्। अन्तराले प्रमीलानां मौलिमुन्नम्य जाम्बवान् RāmC. 35. 76; श्यामच्छवीनामियन्तराले प्रादुर्भवन्ती कदलीदलानाम् (सीता) PrasaRā. 2. 13; काष्ठानामन्तराले किमपि विसरतस्त्वत्प्रतापानलस्य। प्रायः संघुक्षणानि प्रणयति नितरां माकराज क्षितीन्द्र YātrāPra. 6. 69; [Inst.] through or by the intermediate space करैस्ताः। पस्पर्श क्षणमनिलाकुलीकृतानां शाखानामतुहिनरश्मिरन्तरालैः ŚiśuVa. 8. 3; तरुणवारिदानामन्तरालेन नीयमानैः ... खेचरनरेन्द्रवृन्दमद्राक्षम् TilaMañ. 153. 1; भुजाकोट्यन्तरालेन पङ्क्तिभेदान् प्रकल्पयेत् VāstuVi. 11. 6; अन्यथा सान्तरत्वेऽन्तरालेन प्रविशति पावके क्वथ्यमानाः क्षीरनीरादयो नोर्ध्वं ध्मापयेरन् Kiraṇā. 188. 2; तेनान्तरालैस्त्रिभिरङ्गुलीनामुदीतमध्यत्रिवलीविलासा NaiṣC. 10. 128 (comm. त्रिभिरन्तरालैरवकाशैः); विहरति विधुर्वक्त्रपिण्डान्तरालेन EI. ii. 446. 46 (F. N. 60); प्राचीनावीती ... अङ्गुष्ठतर्जन्योरन्तरालेन ... निवपेत् BālamBha. i. 352. 9 (*on* 1. 103); **1Aii** distance between (the holes or bridges on musical instrument) रन्ध्रे दण्डान्तरालं विदध्यात् सयवाङ्गुलम्। ... यन्मेढकशिरोमध्यादुपक्रम्यान्तरं भवेत्। सारीमस्तकमध्यानाम् ...। आद्यान्तरं तत्र यवाधिकम् ...। द्वितीयमन्तरालं तु चतुरङ्गुलमुत्तरम् SaṁgīRa. iii. 290. 13 (6. 295); चतुर्दशाङ्गुलो वंशः ...। त्रियवान्यन्तरालानि पृथक् स्थानेषु मूलतः SaṁgīRa. iii. 331. 3 (6. 468); वंशस्वरूपम् ... सप्त रन्ध्राणि कल्पयेत्। ... अन्तिमं वायुरन्ध्रं स्यादन्तरालानि सप्त च। पृथगर्धाङ्गुलानि SaṁgīRa. iii. 341. 6 (6.532); **1B** intermediate point (of articulation) सैषा ज्ञापकाभ्यामुदात्तानुदात्तयोर्मध्यमेकश्रुतिरन्तरालं ह्रियते MahāBh. i. 210. 10 (*on* i. 2. 33); मुखस्य च नासिकायाश्च अन्तरालं स्थानान्तरमेवानुनासिकस्य दर्शयति Pradī. i. 236A. 10 (*on* i. 1. 8); एकमङ्गुलं वर्णेनावष्टभ्यते। एकं चान्तरालं चाध्वमानम् ChandaśCū. 8. 17 (3); **1C** [Loc.] at the (spatial) limit (मनो नाम महाशालः सर्वरत्नविचित्रितः) मनशालस्यान्तराले सप्तयोजनदूरतः। बुद्धिशाल इति ख्यातः BrahmāṇḍP. iii. 35. 25; प्राच्यां दिश्येतावदन्तराले शब्द इति ŚāstrDī. 140. 5 (*on* i. 1. 6); **1D** middle corridor त्रिभूलहर्म्यान्तं तद्द्वयोर्मूलदेशके। अन्तरालं प्रकुर्वीत पार्श्वे सोपानसंयुतम् MānaSā. 23. 11; तत्समं चान्तरालं स्यात् मध्यकोष्ठं गुणांशकम्। तस्मात्तु कूटयोर्मध्ये चान्तरालं प्रकल्पयेत्। अन्तरालं विशेषेण पञ्जरादिविभूषितम् MānaSā. 33. 153; [Loc.] in the middle corridor अन्तराले तु सर्वत्र विदध्यादन्धकारिकाम् SamarāSū. ii. 92. 8; **1E** intermediate quarter or point of compass दक्षिणस्याश्च पूर्वस्याश्च दिशोर्यदन्तरालं दक्षिणपूर्वा KāśiVr. *on* ii. 2. 26; PrakriKau. i. 596. 4; Prasā. i. 180. 13; i. 596. 16; नरपतिप्राभृतीकृताप्रमेयहयवाहिनीखरखुरोत्खातधूलीधूसरितदिगन्तरालात् EI. xviii. 320. 23; iv. 249. 28; xiv. 327. 27; xv. 297. 22; xviii. 305. 27; अर्धश्यामोपलार्धस्फटिकमिव दिशामन्तरालं विधत्ते कालिन्दीजह्नुकन्यामिलदमलजलस्यन्दसंदोहमैत्रीम् PrasaRā. 2. 33; अत्र 'न प्राचीमग्रतः शंभोः' इति रुद्रयामले निषेधात् नान्तरालं प्राची, किंतु प्रसिद्धैव NirṇaSi. 244. 15; उत्तरस्या अपरस्याश्चान्तरालं वायवी दिक् BālamBha. i. 87. 14 (*on* 1. 24½) [AbhidhāRaMā. 1. 102; KalpaK. 375. 55]; [Loc.] in the intermediate quarter or point of compass दिङ्नामान्यन्तराले P. ii. 2. 26; JaineVyā. i. 3. 88; PrakriKau. i. 596. 2; SiddhāKau. 195B. 8 (*on* ii. 2. 26); SaraKaṇṭhā. (Gr.) iii. 3. 15; SiddhaHe. iii. 1. 25; अर्घ्यमाचमनं चापि पञ्चगव्यं घृतं दधि। क्षीरं मधूष्णतोयं च अन्तरालेषु वै क्रमात् PāraS. 14. 278; घोषयेद्रारुडं तालमन्तराले तु वै दिशाम् PāraS. 16. 530; ककुभामन्तरालेषु समन्तात् सैन्धवं न्यसेत्। सपुष्पाक्षततोयेन शिवाय विनिवेदयेत् ŚivU. 6. 76; पूर्वेशानदिशोरन्तराले मत्स्यमुत्पाद्य तेनैव प्रकारेण पश्चिमवायव्ययोरन्तराले मत्स्यं कुर्यात् CaturCin. i. 129. 4; **1F** middle, centre कोलाहलोद्दालतलान्तरालम् (एते नपुंसके। ... अन्तरालं मध्यम्) Liṅgānu. (Ha.) 46. 4; [Loc.] **i** at the middle or centre संनिवेशविशेषात्तु दुरुक्तमपि शोभते। नीलं पलाशमाबध्यमन्तराले स्रजामिव Kāvyālaṅ. (Bhā.) 1. 54; SaraKaṇṭhā. 103. 8; जलधेरजायत ... शशाङ्कद्वयं तत्रैकं परिगृह्य पङ्कजभुवा भित्त्वान्तराले विधुम्। तत्राद्येन लवेन शंकर उपातस्थे तदन्येन तु क्षामाङ्ग्या विदधे ललाटमपरं श्यामं

नभस्यत्यजत् PadyaVe. 255; **ii** in the middle of the way तं सेनानीरानिलिः सालजालैर्बाणलीनामन्तराले ततान RāmC. 30. 18; चैत्रः ... न च ... देशान्तरे वर्तितुमर्हति। यदि हि तस्यान्यत्र भागा भवेयुः इह कृत्स्नो नोपलभ्येत। भवन्वान्तराले विच्छेदादन्यो भवेत् Kāśi. iii. 175. 24 (*on* 5(7). 46-47); कृष्णसर्पः ... बालकस्य पर्यङ्कान्तिकमागमत्। अथ नकुलः ... अन्तराले संनिपत्य ... तं खण्डशः कृत्वा दूरतश्चिक्षेप Pañcā. 260. 13; **1G** intermediate space (between heaven and earth) or ether or atmosphere or sky अंशवः प्रांशवो वः क्रान्ताकाशान्तरालाः ... कृच्छ्राणि ... हरन्तु SūryaŚ. 7; भिन्नं भासारुणस्य क्वचिदभिनवया विद्रुमानां त्विषेव त्वङ्गन्नक्षत्ररत्नद्युतिनिकरकरालान्तरालं क्वचिच्च SūryaŚ. 35; पटहध्वानबधिरिताशेषदिगन्तरालं शस्त्राशस्त्रि ... जन्यमजनि DaśKuC. 3. 6; अन्तरालमवलम्ब्य शोभते वासरक्षणदयोः क्षणं जगत् RāmC. 2. 39; गच्छ गच्छ ननु वेत्सि समन्तादन्तरालमिदमीदृशमेव RāmC. 16. 44; अन्तराले संयोगसमवायवृत्त्यभावादव्यपदेश्यानीति। अन्तरालमिति आकाशं वा दिग्द्रव्यं वा स्तिमितवेगमूर्तद्रव्याभावो वा NyāyKa. 317. 15; ज्वलितहुतभुजो धर्म्मकालेऽन्तरालाद् भंगश्रीडां वहन्तः EI. xxii. 123. 12; आलिम्पन्ती सकलककुभाम् अन्तरालं विशालम्। ... व्यसरत् ... क्वापि लावण्यसिन्धुः ŚrīKaC. 7. 63; कोऽयमाक्रन्दः स्यन्दननिनादं मन्दयन्निव दिवः पृथिव्योरन्तरालमालम्बते PārthPa. 20. 12; छत्त्रैरावृतमन्तरालमखिलम् ... व्याप्ता च वीरैरखिला धरा SimhāDvā. 178. 3; वरुणहरिदन्तरालमुपरुन्धति संध्यारागे YātrāPra. 1. 103 (5); तयोर्द्ध्वाधरमन्तरालं सर्वत्र तत्खान्त्यफलज्यकाख्यम् SiddhāTaVi. 115. 1; असौ पट्टाभिषिक्तो भुवमपि निखिलं पालयें (Read पालयञ्) जैत्रयात्राराम्भै(म्भे)संजृम्भमाणोद्धटपटहरवाचांतरोदोंतराले EI. iii. 153. 61; [Loc.] in the intermediate space (between heaven and earth) or in the ether or atmosphere गन्तासि विलयम् ... लोकयोरुभयोर्भ्रष्टो ह्यन्तराले व्यवस्थितः MahāBhā. xii. 12. 32 (*but* BhārBhāDī. पिशाचयोनौ); यद्यप्यपरिच्छिन्नदेशानि सामान्यानि भवन्ति ... स्वविषयसर्वगतानि। अन्तराले च संयोगसमवायवृत्त्यभावादव्यपदेश्यानि PadārthaSaṁ. 314. 21; द्यावापृथिव्योरन्तराले समर्हणात् ŚābaBh. 1322. 15 (*on* v. 3. 3); अभ्युक्षितोऽसि सलिलैर्न बलाहकानां चाषाग्रपक्षसदृशं भृशमन्तराले Mṛccha. 9. 19; रेजे ...। भिन्नेऽन्तराले पवमानन्नुन्नस्तमालनीलस्तडितेव मेघः NavaSāC. 17. 41; पातालोकादाकृष्टमन्तराले विमुक्तममृतकुण्डमिव विस्तीर्य जगत्यामास्थितम् ... तडागमद्राक्षीत् UdaySuKa. 129. 12; (सरः ... अभ्यपश्यत्) परागपुञ्जेन भुजंगलोकमिवान्तराले कपिलेन जुष्टम् DaśāvaC. 7. 90; कुन्तैर्नीलोत्पलानां वनमिव ककुभाम् अन्तराले सृजन्तः। पादाताः संचरन्तु PraboCan. 4. 25; बीजमनुत्तमम्। अन्तरिक्षान्निपततोऽन्तरालेऽपि समाददे। तस्यार्धममरैः TriṣaŚaPuC. i. 3. 672; स्थित्वा सभाभ्यां पादाभ्यामुत्प्लुत्य भ्रामयेद्यदि। सर्वाङ्गमन्तराले स्यादुत्प्लुतभ्रमरी त्वसौ AbhinDa. 292; **1H** [Loc.] on the way गगनतलान्महारयण पतन्तं पुरुषं कंचिदन्तराल एव ... अहमवलम्ब्य शनैरवनितले निक्षिप्य ... तं भृगुपतनकारणमपृच्छम् DaśKuC. 19. 15; नौ सुकृतपरिणामादन्तराल एव चक्षुर्विषयोऽसि MahāvīC. 7. 24 (12); आश्रिते च तस्मिन्कुलालचक्रवत्प्रवृत्तवेगस्य अन्तराले प्रतिबन्धासंभवात् भवति वेगक्षयप्रतिपालनम् BrahmSūBh. (Śaṅ.) 791. 10 (*on* iv. 1. 15); भवाब्धिपारं प्रतियातुमुद्यतान्। आशाग्रहो मज्जयतेऽन्तराले ViveCū. 81; यथैव शमादयो यावज्जीवमनुवर्तन्ते विदुषामपवर्गप्राप्तये तथाश्रमकर्माणीति नान्तराले परित्यागः BrahmSūBh. (Bhā.) 207. 25 (*on* iii. 4. 26); उपक्रम्य त्वन्तराले त्यक्तुं न लभ्यते NyāyMañ. ii. 90. 16; उत्तरेऽर्थे कृतार्थत्वं नान्तराले कृते परम् RāghPāṇ. (Dha.) 18. 4; यस्योद्योगे व(ब)न्धुनां प्र[स]रति रजसि व्याप्त[भे]दो[न्तराले] EI. i. 127. 15; किमित्यसावसमानपौरुषः ... अकृतसमरसमाप्तिरन्तराल एव गतवान् UdaySuKa. 81. 1; कङ्कालकसहायोऽहमन्तराल एव तमागच्छन्तमपहस्तयामि UdaySuKa. 86. 29; न जाने निजं स्थानमनुगच्छतो मे कियच्चिरमन्तराले विलम्बोऽयमेवं समभूत् UdaySuKa. 139. 29; कठोरहृदयः शशी। अन्तराले पतित्वैव तां क्रीणाति स्म धेनुकाम् TriṣaŚaPuC. ii. 5. 23; शशक आह। स्वामिन् ... पञ्चशशकैः सहाहं प्रेषितः। ततश्चान्तराले महतः क्षितिविवरान्निर्गत्य एकेन सिंहेनाभिहितः Pañcā. 43. 3; कस्मिन्नप्यवसरे क्वापि ग्रामे यियासुरन्तरालेऽजाव्रजं व्रजन्तमालोक्य PrabaCin. 69. 31; सातवाहनः ... गृहान्निरगमत्। अन्तराले शूद्रकेणावलोक्य सप्रश्रयं प्रणतः ViviTīKa. 61. 17; PrabaK. 69. 6; ततः स मठिकामागच्छन् अन्तराले बुभुक्षापीडितश्चिन्तयति Bharaṭ. 8B. 7; आविर्मिथः कलकलारवमन्तरालेऽप्याद्यन्तयोस्तटवती महतीरतारीत् Acyutarā. 10. 29; अयम् ... मामधिरूढां वहन्नन्तराले पातयित्वा पलायितुमुपक्रमते ŚṛṅgāSar. 104 (7); **2A** essence, core दिश्यैशान्यां वा मधुरस्वररिष्टव्याहरणं जलगोत्रसाभूतं तल्लिङ्गानामन्तरालं बालानां श्रुत्वा दृष्ट्वा वर्षतीति ब्रूयात् AVPari. 65 (2). 9; **2B** interior or inner space of circle मध्यतो बाह्यसूत्रस्य बहिस्थानं च पौष्करः। ... बहिस्थानां तु वृत्तानामन्तरालं तु यत्स्मृतम्। ... अन्तर्गतं हि वृत्तस्य ...। एकस्मिन् बहुधा व्यूह्य त्वन्तरालेषु चान्तिमम् PauṣkS. 7. 37; आद्यं त्रिकोणं चक्रं भवति। द्वितीयमन्तरालं भवति TripuTāU. 536. 18; यत्तु एकस्मान्मण्डलाद्द्वितीयं द्वात्रिंशदङ्गुलानीत्युक्तं तदन्तरालस्य मण्डलसंमिलितस्य परिमाणमिति वेदितव्यम् Aparā. 707. 27 (*on* 2. 106); मण्डलानि तेषामन्तरालानि च प्रत्येकं षोडशाङ्गुलपरिमाणानि कार्याणीत्यर्थः SmṛtiCan. iii. 261. 5; क्षेत्रसूत्रस्य तृतीयांशपरिमितमन्तरालं विहाय स्तम्भा निवेशनीयाः CaturCin. i. 123. 10; उदयनः ... नतधनुर्मयमन्तराले ... चत्वारि चक्षुषि चकासति मण्डलानि AmṛUda. 2. 19; [Loc.] in the interior or inner space of circle इन्दुबिन्दुद्वयस्याग्निः साग्निः सर्गे वियल्लिखेत्। संवर्तैः सर्गिभिर्बाह्ये वेष्टयेच्चान्तरालयोः ĪśānŚiPa. i. 52. 91; [Inst.] through the interior or inner space of circle तत्र नवममण्डलपरिमिताङ्गुलप्रमाणकं विहायाष्टभिर्मण्डलैः अष्टभिश्चान्तरालैः प्रत्येकं षोडशाङ्गुलिप्रमाणेन अङ्गुलीनां षट्पञ्चाशदधिकं शतद्वयं संपद्यते VyavaNi. 158. 12; **2C** interior or inner side अन्तरालानि पद्मानां वराहार्णेन पूरयेत् JayāS. 32. 77; आकृतिनियमाद्धान्तरालानि SaṅkarKā. ii. 1. 6 (AOR. Ed.); चेदिच्छसि ... हितैषिगणैः विचार्य ... नरशतैर्यथेष्टदृष्टान्तरालं सरः क्रियेत DaśKuC. 126. 8; 121. 19; अण्डकपालाददितिसुतप्रसूतिपूतान्तरालादुपासितुमायातगणपतिविलोकनप्रहितनयनेन ... पितामहेन YaśasCam. i. 483. 4 (comm. पवित्रम् अन्तरालं मध्यं यस्य ब्रह्माण्डार्धस्य); सकलसमयसंभवविप्रसूनस्तिमितहस्तपल्लवान्तरालाद्घनपालात् ... इत्याकर्ण्य ... बलिमपृच्छत् YaśasCam. ii. 316. 22; ii. 301. 8; न च पर्वतस्य सवितुश्चान्तरालमवगतम् NyāyRa. 772. 14 (*on* 6. 168); श्रद्धेयमागमदृशो विदुरन्तरालं बालाग्रभागपरिपाटि सहस्रसूक्ष्मम् CaṇḍaKau. 2. 30 (*but* comm. व्यवधानम्); प्रोक्ता लुमाः ... अन्तराले क्रमेण स्युः पञ्चान्याः परिकीर्तिताः SamarāSū. 30. 132; (शालायाः) अन्तरालं च कुर्वीत शृङ्गं तच्च चतुष्पदम् SamarāSū. 57. 21; चतुरश्रा भवन्ति इति आकृतिनियमात् विहितत्वाच्च मृण्मयीनामसामर्थ्यप्राप्तान्यन्तरालानि केन वार्यन्ते SaṅkarKāBh. 57. 10 (*on* ii. 1. 6); दीर्घदर्शिन्या बुद्ध्या विमृश्य भ्रमतीभित्तौ अन्तरालं शिलाभिर्निचितं विधाय ... ध्वजाधिरोपं मन्त्री कारयामास KumāPraPra. 101. 4; अन्तरालस्य दीर्घं स्याद् द्विदण्डं तस्य वेशनम् ŚilpaRa. i. 39. 6; [Loc.] at the interior or inner side येषामज्ञानमूढं प्रचरति न मनो गूढशास्त्रान्तराले ते विद्वच्चक्रवाले परुषमपरुषं साट्टहासं हसन्तु ŚatTrayī. 699; गृहराजस्यान्तराले भित्तौ खचितदण्डकाः। रत्नप्रदीपा भास्वन्तः BrahmāṇḍP. iii. 36. 43; (व्रीहियवाः) बालैः ... स्थविरैर्वा भक्षिता अन्तराले शीर्यन्ते अनेकत्वादन्नादानाम् ChāndoUBh. 304. 4 (*on* v. 10. 6); तद्ध्यन्तराले शरीरस्यात्मनश्चात्मवद्वर्तत इत्यन्तरात्मा MuṇḍaUBh. 332. 2 (*on* ii. 1. 9); संफुल्लनवनवपुष्पशेखराङ्के निःशङ्कं मधु पपुषीभिरन्तराले। कान्तानाम् ... चेतो रामाभिः ... जह्रे HarVi. 17. 80; अन्तराल एव गच्छन्हेलया समकालमेव प्रधावितैः शकलीकृत्य कवलितो महाकायैर्जलचरैः (पट्टवारणः) TilaMañ. 244. 16; (यत्र च) रक्तोत्पलनालान्तरालमृणालवलयाकुलशकोटेन (?शकटेन) ... सुन्दरीजनेन सह रमन्ते कामिनः YaśasCam. i. 106. 2; मुमोचैकं द्वितीयं त्वानेतुं भूयोऽविशद् नदीम्। अन्तराले गतस्तावददतिपूरेण पातितः PārśvC. 2. 803; रङ्गमण्डपे। अन्तराले धृतं स्थालं ससंघेन महीभुजा KumāDeC. 25. 4; ध्वनीनां च पूरितान्तरालत्वाच्छब्दोऽप्यन्तरालेऽनवगम्यमानो विच्छिन्न इव भासते YuktiSneha. 139. 28 (*on* i. 1. 6); एते स्युः पञ्चाशाः आसन् बहवोऽन्तराले च Gurvā. 486; **2D** inside, i.e. heart or mind एतन्मन्त्रस्य जापी ... सर्वज्ञः ...। दर्शनादेव सर्वेषामन्तरालस्य पूरकः BrahmāṇḍP. iii. 38. 42; नैतच्चित्रं सखिभिरखिलैरन्तरालं प्रविष्टो यद्गोविन्द स्वयमयमघं मोक्षयस्येकमेव StavMā. 180. 5; [Loc.] in the heart or mind सदान्तराले रसचर्वणां कुर्वतामपि विशेषतोऽभिनयेन ताण्डवमाकलयितुं चेतः प्रवर्तते GopāKeCan. 44. 20; **2E** [Loc.] in the interior region दुर्व्वारारिवे(वि)दारिणा हरिखुरक्षुन्ना(ण्णा)न्तराले भृशम् ... क्षिप्ता ... येन समरक्षेत्रे यशोवी(बी)जवत् EI. xiv. 301. 31; **2F** [Loc.] within नैषां पञ्चशः पञ्चशः साधारणो धर्मोऽस्ति, येन पञ्चविंशतेरन्तराले पराः पञ्च पञ्च संख्या निविशेरन् BrahmSūBh. (Śaṅ.) 245. 8 (*on* i. 4. 11); इन्द्रियाणि ... इत्यादिलिङ्गेभ्यः तयोरपि कस्मिंश्चिदन्तराले क्रमेणोत्पत्तिप्रलयावुपसंग्राह्यौ BrahmSūBh. (Śaṅ.) 444. 8 (*on* ii. 3. 15); ननु प्राणशब्दवाच्यस्य महतः खाद्यार्थानां चान्तराले सेन्द्रियवर्गं मन एकत्र श्रूयते अन्यत्र मनश्च बुद्धिश्च ŚrutaPra. ii. 355. 21 (*on* ii. 3. 17); नाना ह्येतानि पञ्चविंशतितत्त्वानि· नैषां पञ्चशः पञ्चशः साधारणो धर्मोऽस्ति। येन पञ्चविंशतेरन्तराले पञ्च पञ्च संख्या निविशेरन् NyāySu. (Ja.) 194A. 10 (*on* i. 4. 3); **3A** intervening time, period in between, interval, leisure उपांशुयाजः पौर्णमास्या अवयवो विधीयते। उपांशुयाजस्याप्यन्तरालं गुणः ŚābaBh. 2092. 14 (*on* x. 8. 64); मुमुदिषमाणारविन्द॰ ... ॰सिन्दूरितनीरदेवतासीमन्तान्तराले प्रभातकाले YaśasCam. ii. 355. 18; न हि द्वादशाहे प्रायणीयोदयनीययोरन्तरालं नवभिरनीकैः पूरितं भवति किंतु दशभिः ŚāstrDī. 738. 6 (*on* x. 5. 25); अन्तरालसंयुक्ततया दर्शपूर्णमासयोरेष नियमः चोद्येत। तस्यावधिराग्रयणविधेरन्तरालस्य कार्यं भवति SaṅkarKāBh. 126. 21 (*on* iii. 1. 25); इध्माबर्हिःसंपादनस्य मुष्टिनिर्वापस्य चान्तरालं सांनाय्यपात्राणां देश उक्तः NyāyMāVi. 146. 13 (*on* iii. 3. 11); पूरयितव्यमन्तरालं नवधा विभज्य NyāyMāVi. 568. 10 (*on* x. 5. 25); पौर्णमास्यादिनामकत्वाङ्गीकारादुपांशुयाजस्य फलसंबन्धाङ्गीकारः ततो

अन्तरालस्य पौर्णमास्यामिवामावास्यायामपि सत्त्वात् ... न प्राबल्यसिद्धिः MīmāKau. iii (2). 191. 17 (*on* ii. 2. 17); सूर्याय स्वाहेत्यादिदशभिर्मध्ये अन्तरालं त्यक्त्वा अद्भ्यः स्वाहेति पञ्चभिः त्यक्त्वा VīraMi. (Āhnika.) 409. 5; तदेवान्तरालं प्रायणीयोदयनीययोरप्यन्तरालम् MayūMāli. 736. 11 (*on* x. 5. 25); [Loc.] **i** at the intervening time, at the interval उदवसानीययेष्ट्वा ... यजमानः आस्ते ... आग्नेय्याग्नावैष्णव्या वान्तरालेषु ŚāṅkhāŚS. xiv. 6. 6; अथान्तरस्यां पञ्चदश पूर्वपक्षस्य रात्रीः ... तासामन्तरालेष्वेतासां रात्रीणां पञ्चदश मुहूर्तानुपदधाति ĀpaŚS. xix. 12. 4; xix. 12. 6; xix. 12. 8; HirŚS. xxiii. 2. 15 (812. 1); अनर्हतो राजन्यस्य पर्वस्वग्निहोत्रं जुहुयान्नान्तराले VārāŚS. I. v. 3. 10; HirŚS. iii. 7. 19 (357. 8); ऋतौ तु संनिपातो दारेणानुव्रतम्। अन्तरालेऽपि दार एव HirŚS. xxvii. 1. 17 (132. 10); ĀpaDS. ii (1). 1. 18; पर्वण्येव राजन्यस्याग्निहोत्रं भवत्यहरहर्नित्यं ब्राह्मणेभ्योऽन्नं दीयते तदेतदन्तरालेऽस्याग्निहोत्रं भवति VaikhāŚS. 2. 9; सायं प्रातश्च भुञ्जीत नान्तराले MahāBhā. xiii. 107. 87; बहूनि कर्माणि क्रमशः कस्मात् संयोगबहुत्वात् एकस्तु संस्कारोऽन्तराले कर्मणोऽपेक्षाकारणाभावात् PadārthaSaṁ. 302. 13; असतश्चान्तराले याञ्छब्दानस्तीति मन्यते। प्रतिपत्तुरशक्तिस्सा ग्रहणोपाय एव सः VākyaPa. 1. 86 (comm. असतः शब्दानन्तराले मध्येऽस्तित्वेन मन्यन्ते); अर्वाक्तोऽस्मिन्नन्तराले पुनरेवंविधे योगे चक्रवर्तिजननेनाजनि जगति कश्चिदपरः HarṣaC. 184. 7; प्रथमं ताम्रोष्ठीमपश्यम्। अतिष्ठद्य सा सद्य एव मम हृदये। न मयान्येन वान्तराले दृष्टा DaśKuC. 103. 19; भेषजम् ... उपगतमति योगायोपकल्पते। शरीरं च पिपासाभ्रमक्लमोपद्रवाय। तस्मात्साधारणेष्वेव तदन्तरालेषु वमनादीनि योजयेत् AṣṭāSaṁ. i. 122. 9 (1.23); अनागतं तथा सर्वमन्तराले किमस्ति मे ParaS. 30. 57; यत्रैवान्तराले निमित्तं क्षीणं तत्रैवापहारः प्रसज्येत TantrVā. 371. 10 (*on* ii. 1. 5); अङ्गानि च तावतः कालादनुत्कृष्यमाणानि प्रयोक्तव्यानीति यत्र क्वचनान्तराले क्रियेरन् TantrVā. 473. 15 (*on* ii. 2. 3); पूर्वं गृहपतेर्दीक्षा, उत्तरं ब्रह्मण इत्येतावदाह। अन्तराले तु यदि पदार्थसहस्रमपि करोति नास्ति पूर्वोत्तरबाधः ṬupṬ. 48. 15 (*on* v. 1. 1); न हि विदुषः संपरेतस्य विद्यया ब्रह्म संप्रेप्सतः अन्तराले सुकृतदुष्कृताभ्यां किंचित्प्राप्तव्यमस्ति BrahmSūBh. (Śaṅ.) 662. 19 (*on* iii. 3. 27); अध्यक्षस्याप्यन्तराल उपसंख्यातत्वात् BrahmSūBh. (Śaṅ.) 804. 2 (*on* iv. 2. 5); प्राक् सुषुप्तिप्रतिपत्तेः एतस्मिन्नन्तराल एषः देवः ... स्वप्ने महिमानम् ... अनुभवति PraśnaUBh. 273. 18 (*on* 4. 5); अन्तराले त्वविज्ञानं मूर्छितवदेवेत्यदोषः ChāndoUBh. 306. 13 (*on* v. 10 .6); अन्तरा जातिभेदश्चेन्निर्निमित्तः कथं भवेत्। अन्तराले क्रियाभेदाद् गोत्रेणार्थो न कस्यचित् PramāVāBh. 11. 25; सर्गसंहारयोरन्तराले तु जगतः स्थित्यवस्थायामस्मात्कर्मण इदमस्य संपद्यतामितीच्छा भवति प्रजापतेः NyāyMañ. i. 185. 12; तत्रान्तराले मुण्डितशिरोदर्शनमेव बाधकम् NyāyMañ. ii. 33. 26; अतश्च स्वाध्यायाध्ययन-विवाहयोरन्तराले व्याकरणादिशास्त्रश्रवणं वेदार्थज्ञानार्थं लभ्यते ManuBh. i. 204. 9 (*on* 3. 2); न च वास्त्यन्तरालेऽत्र सा दशा या हि केवला ŚivDṛ. 3. 88; कथमन्तराले संयोज्य तापसमपास्तकरुणेन विधिना समूलमुद्धृतस्तरुस्कन्द इव मे मन्दभाग्यस्यानन्दः TilaMañ. 271. 22; ज्याविभक्तस्येषोऽन्तराले क्रमशो बहूनि कर्माणि भवन्ति ... एकस्तु संस्कारोऽन्तराले ... संस्कारमारभते न कर्ममात्रं वेगाभावात्। न चान्तराले नोदनं नाप्यभिघातः NyāyKa. 303. 11; नूनमन्तराले किंचिद्विधित्सितम्। ... अन्तराले चाविहितानां नाजामित्वेन प्रशंसावकल्पते ŚāstrDī. 133. 4 (*on* ii. 2. 4); अन्तराल एव स्तोकमुच्यसे UdaySuKa. 16. 18; यत्कर्तव्यमवश्यतः। ... कर्मणामन्तरालेषु प्रोषिते चापि भर्तरि। स्वयं वै तदनुष्ठेयम् BhaviP. 33A. 5 (i. 12. 20); इह चावग्रहेहयोरन्तराले अभ्यस्तेऽपि विषये संशयज्ञानमस्त्येव PramāMī. 21. 18 (*on* i. 1. 27); न च दर्शपूर्णमासाभ्यामन्यदेवं लिङ्गं किंचिदन्तराले कर्म विद्यते SaṅkarKāBh. 126. 21 (*on* iii. 1. 25); पुरोडाशयोरन्तराले किंचिद्विधित्सितम् NyāyMāVi. 84. 4 (*on* ii. 2. 4); अन्तराल एवादृष्टोत्पत्त्ययोगात् NyāySu. (Ja.) 288B. 2 (*on* ii. 1. 4); कुमाराः क्रीडन्ति ... तिष्ठन्ति पर्वताः ... पूर्वत्रान्तराले क्रियान्तरसद्भावादुत्तरत्र पर्वतादिस्थितेस्तु सर्वदाभावात् Prasā. ii. 6. 15; विकृतावपि प्राकृतधर्मानुवादेन विधीयमानयोर्धर्मयोरन्तरालेऽपूर्वमप्यङ्गं केवलं पठ्यते MīmāNyāPra. 223. 32; अन्तराले अनृतौ ब्राह्मणवचनाच्च संवेशनम् VīraMi. (Āhnika.) 563. 2; पौर्वापर्यस्यान्तरालेऽनेकपदार्थानुष्ठानेऽपि अविरोधेन MayūMāli. 408. 10 (*on* v. 1. 2); **ii** in the meantime, meanwhile दश विषयानैश्वर्यं प्राप्यापि भोक्तुं न लभते अन्तरालेऽपि म्रियत इति यावत् MāṭhVṛ. 65. 8 (*on* 48); अवनीशः ... लतां गृहीत्वा स्वयमन्तराले कूपाच्छनैरूर्ध्वमथारुरोह VarāṅgaC. 12. 49; कार्तिकाश्विनयोर्विष्णोर्यावदुत्थानकं तव। म्रिये यद्यन्तरालेऽहं व्रतभङ्गो न मे भवेत् AgniP. 204. 5; अदत्त्वा यदि मृत्युः स्यादन्तरालेऽपि पाण्डव। सफेनिलैर्मुखै रौद्रैर्म्रियन्ते नीचदुःखिताः BhaviP. 742A. 24 (iv. 95. 10); अन्तराले विचारः क्रियते Pradī. iv. 40B. 1 (*on* iv. 1. 13); धाराधरोऽखण्डधारमन्तराले ववर्ष च PariPar. 12. 139; ब्रूते ... करिष्यामि ... व्यामोहप्रसरावरोधनविधिम् ... नो जानाति हरिष्यतीह हतकः कालोऽन्तराले VairāŚ. (Pa.) 36; अभिनवनलिनी॰... भ्रमति मधुकरोऽयमन्तराले श्रयति न पङ्कजिनीं कुमुद्वतीं वा ŚārṅgaPa. 819; राजा ... यावत्कण्ठे खड्गं करोति तावद् देवतान्तराले खड्गं धृत्वाब्रवीत् SiṁhāDvā. 49. 0 (32); ऊषरप्रदेशे बीजमुप्तं फलमददन्तराल एव विनश्यति ManvaMu. 439. 18 (*on* 10. 71); पौर्णमासीमारभ्यामावास्यापर्यन्तं प्रयोगस्यापरिसमाप्त्या अन्तराले यत्र क्वाप्यङ्गान्यनुष्ठीयन्ताम् MayūMāli. 807. 4 (*on* xi. 2. 2); **iii** in the middle, abruptly, midway इहैव कथमकस्मादन्तराले भूतयोनेः रूपमुपन्यस्येत् BrahmSūBh. (Śaṅ.) 129. 19 (*on* i. 2. 23); पूर्वोत्तरयोर्हि ग्रन्थभागयोर्ब्रह्मैव निर्दिश्यमानमुपलभामहे, इहैव कथमकस्मादन्तराले वायुं निर्दिश्यमानं प्रतिपद्येमहि BrahmSūBh. (Śaṅ.) 214. 14 (*on* i. 3. 39); स (अन्तेवासी) यदा परिभाष्येयन्तं कालं त्वद्गृहे मया शिल्पविद्याशिक्षया वस्तव्यमित्यास्ते, अन्तरालेऽपि कृतविद्यः स्यात् तदापि हि कृतं पारिभाषिकं कालं गुरोर्गृहे निवसेत् BālaKrī. i. 266. 17 (*on* 2. 188); यत्परतन्त्रा प्रकृतिर्बन्धकारणं संभवेत् तस्मादेव संयोगविशेषादौपाधिको बन्धः ... इति स्वसिद्धान्तमनेनैव प्रसङ्गेनान्तराल एवावधारयति SāṁkhyaPraBh. 13. 3 (*on* 1. 19); [Inst.] with interval or leisure अन्तर्लताभवनमन्तरालैरवतरत्सु भास्करकरेषु TilaMañ. 253. 15; BṛBrahmaS. ii. 3. 22; **3B** juncture of two periods मीनमेषयोः। गण्डान्तमन्तरालं स्याद्घटिकार्धं मृतिप्रदम् NāraS. 29. 39; यदन्तरालं पितृसार्पधिष्ण्ये मूलेन्द्रयोरश्विनपौष्णयोश्च। भसंधिगण्डान्तमिति VasiS. 32. 64; तिथिनक्षत्रलग्नानामन्तरालं च रुक्प्रदम्। गण्डान्तं त्रिविधं तेषाम् VasiS. 37. 82; भौजङ्गपैत्रंदरपौष्णभानां तदग्रभानां च यदन्तरालम् VasiS. 42. 120; **4** difference (of ideas) भवति च इदमस्तमितोदेष्यदुभयविकल्पज्ञानान्तरालवर्ति उन्मेषप्रतिभादि, शब्दागमगीतं निर्विकल्पकम् ... उभयोश्च ज्ञानयोरन्तरालमनपह्नवनीयम् ... तच्च संविदात्मकमेव ParāTri. 106. 3; बोद्धा बुद्धिः फलं च स्थिरतदितरताद्यन्तरालं च बुद्धेः TattvMu. 3. 59; [Loc.] regarding the difference (of ideas) प्रथममुभयोरपि निश्चितयोर्वादप्रवृत्तावन्तराले बलादापतति युक्तिद्वयोपनिपातवतः संशयः NyāyMañ. ii. 149. 32; **5** intermediate position, interim state यदीन्द्रियबुद्धिमभिप्रेत्योच्यते, तदासिद्धम् ... तत्रानुपलक्षणात् स्पष्टस्यापि च द्वितीयस्यानुयायिनः। तद्भावे च व्यक्तिद्वयान्तरालमप्याप्लुवतः कथं तदनुगमः HetuBiṬ. 30. 18; [Loc.] in the intermediate position, at the interim state हन्ति स्वैः किरणैस्तमिस्रमारणं कृत्वान्तराले रविः AnargharāRā. 1. 37; न च अतोऽन्यत् अन्तराले विवक्षितम् BṛĀraUBh. 235. 18 (*on* ii. 1. 15); 316. 4 (*on* ii. 4. 12); 346. 5 (*on* ii. 5. 19); VedāntKa. 96. 24 (*on* i. 1. 4); अप्राप्य परमात्मानमन्तराले व्यवस्थितिः BṛĀraUBhVā. i. 4. 1713; नैव मुक्तः पुमानिति। नाममात्रावशेषोऽसावन्तरालेऽवतिष्ठते BṛĀraUBhVā. iii. 2. 42; न चात्रान्तराले पञ्चसंख्यानिवेशनिमित्तमन्यतमं यत् पश्यामः BrahmSūBh. (Bhā.) 76. 10 (*on* i. 4. 11); ब्रह्मणो भूतानां चान्तराले ज्ञानमनसी स्याताम् BrahmSūBh. (Bhā.) 133. 21 (*on* ii. 3. 15); VedāntSā. (Rā.) 200. 1 (*on* ii. 3. 16); VedāntDī. 120. 13 (*on* ii. 3. 16); VedāntPāSau. 220. 2 (*on* ii. 3. 15); GoviBh. 149. 5 (*on* ii. 3. 14); प्रकाशयोरन्तराले तद्व्यापारः NyāyMañ. ii. 6. 22; येऽन्तराले वर्तमानास्तेषां विद्यायामधिकारः VedāntKau. 372. 21 (*on* iii. 4. 36); मासदेवलोकयोरन्तराले संवत्सरः संनिवेशयितव्यः VedāntKau. 413. 9 (*on* iv. 3. 2); एकाङ्गानुवादेन विधीयमानयोरङ्गयोरन्तराले विहितत्वं संदंशः ArthSaṁ. 57. 7; नामरूपयोरन्तराले तत्कार्यस्पर्शरहित एव वर्तते BrahmSūBh. (Śrī.) ii. 246. 10 (*on* iii. 2. 14); तत्रार्चिरादिके मार्गे छन्दोगा मासादित्ययोरन्तराले संवत्सरमधीयते BrahmSūBh. (Rā.) 745. 7 (*on* iv. 3. 2); मुमुक्षूणां ब्रह्मानुभव एक एवोद्देश्यं फलम्। न त्वन्तराले भवदपि वसुभावादिकम् ŚivārkaMaDī. ii. 380. 20 (*on* iii. 3. 58); रसान्तरस्याविरोधिनः संधिकर्तुरिवान्तरालेऽवस्थापने द्वितीयोऽपि निवर्तते RasGaṅ. 58. 11; जातिः ... भिन्नापि सा सर्वगता व्यक्तिमात्रनिष्ठा वा। अन्तरालेऽनुपलब्धेर्नाद्यः BhāṭṭCin. i. 18. 5 (*on* i. 1. 4); **6** type of pose in local dance *(deśīnṛtta)* अन्तरालमितं तज्ज्ञैः चतुरश्रं तथा स्मृतम् NṛttaRa. 5. 31; **7** type of hall *(maṇḍapa)* चकार पंचायतनान्तराले बालेन्दुमौलिस्थितमानसो यः EI. i. 284. 45; **8** the word *antarāla* अन्तरालसंयुक्तो विधिः ŚāstrDī. 133. 2 (*on* ii. 2. 4); उत्पत्तिवाक्येऽन्तरालपदवैयर्थ्यापत्तेः MīmāKau. iii (2). 188. 12 (*on* ii. 2. 10); भूगृहषोडशारयोर्मध्यपरत्वेनान्तरालपदं प्राञ्चो व्याख्यन् SetuBa. 334. 28; 335. 3; अन्तरालपदं कालविधायकम् MayūMāli. 132. 14 (*on* ii. 2. 4); अन्तरालशब्देन दिगेव प्रत्यासत्तेः LaŚabdeŚe. ii. 109. 3 [Kośas give *antarāla* as a synonym of the following words : *antara*, Vaija. 17.7; ParaNā. 1542; *antarā*, KośaKaTa. 1. 619; *abhyantara*, AmaK. 156; Vaija. 17.7; AbhidhāCin. 1460; KalpaK. 375.55; *abhyantarā*, KośaKaTa. 1. 619; *avakāśa*, Vaija. 17. 7; *pada*, Vaija.17.7; *vicāla*, KośaKaTa. 1. 619; also they give *antarāla* as the meaning of the following words : *abhyantara*, ŚadbaRaSaK. 285.5; *pratimāna*, TrikāŚe. iii. 3. 246; *madhya*, Vaija. 235.63; also they give *antarāla* in the sense of *madhya*, ŚabdaRa.(Śu.) 6. 60; and *vicāla*, AbhidhāCin. 1460]

अन्तराल (antarāla) *m.* **1** lower, i.e. mixed caste (born of parents of different castes) अनुलोमादनुलोम्यां जातोऽन्तरालः VaikhāDS. iii. 11. 2; **2** intermediate space धिष्ण्यानां द्विप्रादेशो विष्कम्भस्तथान्तरालाः BaudhŚuS. 1. 102; अन्तरालाश्च वसवो दिग्विदिग्भेदकारकाः। अन्तरालस्य बाहल्यं गृहविस्तारतो विदुः ŚilpaRa. ii. 31. 44; **3** person (priest) sitting in the middle परमप्रकृतेरारभ्य त्रीन् पञ्च वा अन्तरालाननुक्रम्य अग्नेऽयमहमस्मि ब्राह्मण भारत इति सामर्थ्यादामन्त्रितपदैः वच्छब्देन व्रियेरन् वंशाविच्छेदस्याचिख्यासितत्वात् SaṅkarKāBh. 169.20 (*on* iii.4. 6)

अन्तराल (antarāla) *adj.* [*f.* - ā] (also used as noun) **1** lower, i.e. mixed caste (born of parents of different castes) कुक्कुटकः ... कुशीलवः ... श्वपाकः। इत्येतेऽन्ये चान्तरालाः ArthŚā. ii. 44. 3 (3.7); य आचारः पारंपर्यक्रमागतः। वर्णानां सान्तरालानां स सदाचार उच्यते ManuSm. 2. 18 (ManvaVi. संकरजाताः); अन्तरालाः संकरजातयः VīraMi. (Tīrtha.) 40. 2; VīraMi. (Paribhāṣā.) 56. 2; अन्तरालाः विजातीयमातापितृजन्याः असवर्णा इति यावत् BālamBha. i. 284. 9 (*on* 1. 94); **2** intervening उपसंहृतिम्। प्राकृतामन्तरालां च तामप्येष वदामि ते ViṣṇuP. vi. 2. 40; **3** intermediate तिथिमध्यान्तरालानामसूनामुत्क्रमज्यया। विषुवज्ज्याहता भाज्या त्रिमौर्व्यालब्धदिक्क्रमः LaBhāsk. 4. 15; भोगेच्छा नोपभोगेन भोगिनां जातु शाम्यति। लवणेनान्तरालेन तृष्णा प्रत्युपजायते DṛṣṭāKaŚ. 3.

अन्तरालक (antarāla-ka) *n.* **A** middle corridor शालाकूटद्वयोर्मध्ये शेषांशं चान्तरालकम् MānaSā. 25. 10; **B** intermediate space उपरिष्टाद्दिगूर्ध्वं स्यादधस्तादधरा स्मृता। अन्तस्त्वभ्यन्तरं प्रोक्तमन्तरं चान्तरालकम् RājNi. 418. 22; यदि वीक्षेत पादयोरन्तरालकम्। दक्षिणेन समावृत्य पश्यन्पृष्ठं जयं वदेत् Mānaso. iv. 7. 1057; [Loc.] in the intermediate space रथ्याग्रमूले वा मध्ये वा चान्तरालके। ... कुर्यादथ देवालयम् MānaSā. 9. 256; 15. 113; न्यसेन्मुद्रादशकं साधकोत्तमः। पुरा सव्ये च वंशे च वामे चैवान्तरालके SetuBa. 299. 5.

अन्तरालकरण (antarāla-karaṇa) *n.* act of performing at the interval जामि वा एतद्यज्ञस्य क्रियते ... तद्यान्तरालकरणादेवाजामित्वगुणेन ... प्रशिशंसिषितम् ŚāstrDī. 133. 4 (*on* ii. 2. 4)

अन्तरालकल्पना (antarāla-kalpanā) *f.* assumption of intermediate position or stage न तु अन्तरालकल्पनायां प्रमाणमस्ति BṛĀraUBh. 621. 4 (*on* iv. 4. 6)

अन्तरालकाल (antarāla-kāla) *m.* intervening time or period, interval पुरोडाशद्वयोपलक्षित इवान्तरालकालः पुरोडाशापाये TantrRa. 297. 3; यागस्वरूपस्य तर्हि पुरोडाशद्वयोपलक्षितस्येवान्तरालकालस्य ... विषयविलयः NyāyRaMā. 111. 13; उदयास्तमययोरन्तरालकालमनुमाय कालाख्येन लिङ्गेनानुमिते धर्मिण्यात्मनि ज्ञानाभावानुमानोपपत्तेः TattvPradī. (Ci.) 55. 16; उभयपक्षपञ्चम्योरन्तर इति भाद्रपदकृष्णपञ्चम्याः परस्तादाश्विनशुक्लपञ्चम्याः पूर्वमन्तरालकाल इत्यर्थः CaturCin. iii (1). 199. 20; किं पुरोडाशावन्तरालकालस्य विशेषणभूतौ उत लक्षणभूतौ NyāyMāVi. 618. 7 (*on* x. 8. 19); उदयास्तमययोरन्तरालकालमनुमाय तत्कालमहं ज्ञानाभाववान् अवस्थाविशेषवत्त्वात् AdvaiSi. 557. 1; उपांशुयाजोत्पत्तिवाक्यश्रुतोऽन्तरालकालः पौर्णमासीरूपतां प्रापितो भवति ŚivārkaMaDī. i. 144. 19 (*on* i. 1. 3); अथवा तत्रैवान्तरालकालोपांशुत्वविशिष्टयागविधिः इतरे तस्यैवार्थवादाः MīmāKau. iii (2). 182. 2 (*on* ii. 2. 9); अभ्युदयशिरस्कत्वार्थमन्तरालकालो विधीयते MīmāKau. iii (2). 188. 13 (*on* ii. 2. 10); अन्तरालकालस्य पूर्वोत्तरभाविपुरोडाशद्वयनिरूपकत्वात् BhāṭṭDī. iv. 128. 12 (*on* x. 8. 17); [Loc.] in the intervening time पूर्वापरयोः कर्मणोरन्तरालकाल इति यावत् CaturCin. iii. (1). 302. 21; उत्पत्तिवाक्यं पौर्णमासीरूप एवान्तरालकाले उपांशुयाजं विदधाति VidhiRa. 5 (26. 19); देहद्वयम् ... अन्तरालकालेषु तु सह वृत्त्यभावैः कूटस्थचैतन्येनैव भास्यते SiddhāLeSaṁ. 154.4; अन्तरालकाल एव विष्वादियागविधेः पर्यवसानाद् अन्तरालपदमप्यनुवादकमेव MayūMāli. 132. 15 (*on* ii. 2. 4); प्राप्तेऽन्तरालकाले नित्यप्राप्त्योर्दर्शपूर्णमासयोर्द्रव्यनियमविधिपरत्वे संभवति BhāṭṭCan. 74. 1 (*on* xv. 1. 15)

अन्तरालकालत्व (antarālakāla-tva) *n.* the state of being the intervening time पौर्णमासीकालस्यैवान्तरालकालत्वेनावगमेनोत्पत्त्यवगतकालसंबन्धस्यात्रापि तुल्यत्वात् MayūMāli. 791. 6 (*on* x. 8. 18)

अन्तरालकालनैरपेक्ष्य (antarālakāla-nairapekṣya) *n.* lack of expectancy for intervening time विध्यभावेऽन्तरालवाक्याद्यत्र पुरोडाशद्वयान्तरालम् ... प्राप्नुयात् ... पौर्णमासीकालस्यान्तरालकालनैरपेक्ष्यप्रतीतेः MīmāKau. iii (2). 192. 6 (*on* ii. 2.12)

अन्तरालकालमात्र (antarālakāla-mātra) *n.* intervening time only अन्तरालकालमात्रं त्विह यागत्रयानुवादेन विधीयते MīmāKau. iii (2). 183. 14 (*on* ii. 2. 9)

अन्तरालकालरूप (antarālakāla-rūpa) *adj.* of the nature of the intervening time अन्तरालकालरूपगुणोपबन्धस्तत्र झटिति कर्मचोदनाप्रतीतेः ... कर्मविधानम् MīmāKau. iii (2). 188. 23 (*on* ii. 2. 11)

अन्तरालकाललाभ (antarālakāla-lābha) *m.* obtainment or knowledge of intervening time अजामित्वकीर्तनबलादेव विष्वादिवाक्येष्वन्तरालकाललाभात्तेष्वपि विधिः संगच्छते MayūMāli. 133. 8 (*on* ii. 2. 4)

अन्तरालकालवत् (antarālakāla-vat) *adv.* like the intervening time अन्तरालकालवदुपांशुत्वगुणस्यापि विशेषणत्वात्तद्विशिष्टकर्मण उपांशुयाजनामकत्वम् NyāyMāVi. 84. 7 (*on* ii. 2. 4); 618. 8 (*on* x. 8. 19)

अन्तरालकालवत् (antarālakāla-va(n)t) *adj.* possessing or consisting of intervening time अन्तरालकालवति पौर्णमासे एवोपांशु यष्टव्यं न तद्रहिते दर्शे BālamBha. i. 249. 5 (*on* 1. 89)

अन्तरालकालविधान (antarālakāla-vidhāna) *n.* injunction of (mere) the intervening time 'तावब्रूता'मिति वाक्यं पौर्णमासीपदयुक्तमन्तरालकालविधानसामर्थ्यपरामर्शात् प्रागेवोपांशुयाजे पौर्णमासीकालयोगं बोधयति ŚivārkaMaDī. i. 146. 7 (*on* i. 1. 3)

अन्तरालकालविधि (antarālakāla-vidhi) *m.* injunction of (mere) the intervening time विष्णुरुपांशु यष्टव्यः ... इति श्रुते अन्तरावाक्ये ... देवतोपांशुत्वविशिष्टयागानां समुदायसिद्ध्यर्थमनुवाद एव। तत्प्रयोजनं च अन्तरालकालविधिस्त्रयाणामेषाम् BhāṭṭDī. i. 116.23 (*on* ii. 2. 4); अर्थवादस्यैवान्तरालकालविध्युन्नायकता भवेत् MīmāKau. iii (2). 188. 11 (*on* ii. 2. 10); असौ (उपांशुयाजः) अन्तरालकालविध्यन्यथानुपपत्त्यैव प्राप्यते MīmāKau. iii (2). 189. 17 (*on* ii. 2. 12)

अन्तरालकालसंयुक्त (antarālakāla-saṁyukta) *adj.* (used as noun) (that) which is connected with the intervening time अन्तरालकालसंयुक्तस्य पुनर्विस्पष्टजाम्युपक्रमवाक्यविधानार्हत्वात् TantrVā. 483. 9 (*on* ii. 2. 10)

अन्तरालकालसंयोग (antarālakāla-saṁyoga) *m.* connection with the intervening time यदन्तरालकालसंयोगेन विधास्यते तस्याजामिकरत्वं प्रशंसा TantrVā. 483. 3 (*on* ii. 2. 10); न हि विष्वादिसंयुक्तेष्वन्तरालकालसंयोगोऽस्ति TantrVā. 483. 7 (*on* ii. 2. 10)

अन्तरालकालस्तुत्यर्थम् (antarālakālastutyartham) *adv.* for the sake of eulogy of the intervening period अन्तरालकालमात्रं त्विह यागत्रयानुवादेन विधीयते। तद्यान्तस्या(?न्त)रालकालस्तुत्यर्थम् MīmāKau. iii (2). 183. 14 (*on* ii. 2.9)

अन्तरालकालावच्छिन्न (antarālakālāvacchinna) *adj.* delimited by the intervening period अन्तरालकालावच्छिन्नस्यैव तस्याङ्गतया इतरस्यानङ्गत्वात् द्विपुरोडाशायामेवोपांशुयाजकरणम् BhāṭṭDī. iv. 128. 15 (*on* x. 8. 17)

अन्तरालकृत् (antarāla-kṛt) *adj.* occupying the intermediate region रत्नमालान्तरमयः शाल्मलश्चान्तरालकृत्। तस्यापरेण रजतो महानस्तो गिरिः स्मृतः MatsyaP. 122. 14.

अन्तरालक्रिया (antarāla-kriyā) *f.* intermediate action अन्तरालक्रियाणामवश्यंभाविनीसहकारित्वस्यायोगात् VākyaPa. 75. 11 (*on* 3 (9). 82); अन्तरालक्रियास्तु नान्तरीयकत्वादव्यवधायिकाः Prasā. ii. 6. 17.

अन्तरालग (antarāla-ga) *adj.* **A** being at the intermediate space दक्षिणोत्तरगात् सूत्रात् तेन पश्चिमतो भवेत्। अत्यष्टयङ्गुलमानान्ते ब्रह्मवाय्वन्तरालगे VāstuVi. 4. 19 (42. 2); **B** existing in the middle शुचिराजहंसयुगलान्तरालगम् ... त्रिजगद्गुरोर्वदनमैक्षताच्युतः NemiC. 12. 21.

अन्तरालग (antarālaga) *n.* type of jump in dance (Utplutikaraṇa) उद्वाहितमुरो बाढं जङ्घोपान्ते च मस्तकम्। कुर्याच्चेदलगस्यान्ते तदा स्यादन्तरालगम् NṛttaRa. 5. 66; विधायालगमुत्तानोरःस्थलो भुवि चेत् पतेत्। शिरसा पृष्ठतः श्रोणेः संस्पर्शादन्तरालगम् Nṛtyā. 1377; (उत्प्लुतिपूर्वाणि करणानि ...। अलगं त्रीणि कूर्मोर्ध्वान्तरपूर्वालगानि च) कूर्मालगमूर्ध्वालगमन्तरालगमिति त्रीणि comm. *on* SaṁgīRa. iv. 241. 13 (7. 751)

अन्तरालगडु (antarāla-gaḍu) *m.* hump (arising) in the midway तथैव परमार्थाभेदवतोर्धर्मयोः साध्यधर्मिणि वृत्तेः किमन्तरालगडुना कृतकत्वादिना व्यतिरेकवता उपगतेन HetuBiṬ. 42. 11.

अन्तरालगण (antarāla-gaṇa) *m.* group of beings in the interior space कल्पयेद् गर्भरचनां पूर्वोक्तद्रव्यसंचयैः ...। अन्तरालगणं गार्भं कुर्याद्वाह्वीकरञ्जितम्। अलंकृत्य च सौवर्णैरुपरिष्टाच्च रूप्यकैः PāraS. 12. 188.

अन्तरालगत (antarāla-gata) *adj.* **A** exisitng in the interior or inner space अन्तरालगतं गर्भं कुर्याद्वाह्वीकरञ्जितम्। अलंकृत्य च सौवर्णैरुपरिष्टाच्च रूप्यकैः PauṣkS. 30. 50; **B** existing in between (eyes) निध्याय किं भवत्या नासाचाम्पेयमन्तरालगतम्। नयनमधुव्रतमिथुनं न कदापि मिथः समागमं भजते YātrāPra. 3. 115.

अन्तरालगरुत् (antarāla-garut) *m., n.* wing in the intermediate space हरितालपिञ्जरितदिग्वधूमुखैश्च्युतमन्तरालगरुतां लवैर्लवैः PṛthvīVi. 9. 81 (comm. अन्तराले मध्ये गरुतां सूक्ष्मसूक्ष्माणां पक्ष्मणामिवांशैरंशैश्च्युतं पतितम्)

अन्तरालगलित (antarāla-galita) *adj.* suspending from the intermediate space काश्चित्पयोधरान्तरालगलितमुक्तालताः ... हर्म्यतलानि ललनाः समारुरुहुः Kād. 83. 14.

अन्तरालगुण (antarāla-guṇa) *m.* interval as the accessory विधीयमानयागोऽन्तरालगुणविशिष्टोऽभिधीयते ŚāstrDī. 791. 15 (*on* x. 8. 19); न ह्यन्तरालगुणविशिष्टं विधेयं विष्ण्वादिवाक्येषु प्रतीयते NyāyMāVi. 84. 4 (*on* ii. 2. 4)

अन्तरालगुणक (antarālaguṇa-ka) *adj.* having the interval as the accessory अन्तरालगुणक उपांशुयाज इति। न ह्यन्तरालं गुणत्वेन विधीयमानं पश्यामः ŚābaBh. 2092. 20 (*on* x. 8. 65)

अन्तरालगुणता (antarālaguṇa-tā) *f.* the state of having the interval as the accessory न हि पौर्णमासीविशेषे यत्रान्तरालमित्यन्तरालगुणता विधीयते ŚābaBh. 2094. 3 (*on* x. 8. 69)

अन्तरालगुणानुसार (antarālaguṇānusāra) *m.* [Inst.] in accordance with the interval as the accessory पुरोडाशद्वयान्तरालो नोपांशुयाजविध्युपादेयः ... अनुपादेयान्तरालगुणानुसारेण तत्रैव प्रधानविधिरित्येकपुरोडाशायामवहितत्वात् MayūMāli. 791. 17 (*on* x. 8. 19)

अन्तरालगुणार्थत्व (antarālaguṇārtha-tva) *n.* the state of being meant for the sake of the interval as the accessory द्विपुरोडाशायां स्यादन्तरालत्वात् (v.l. अन्तरालगुणार्थत्वात् Pandit Ed.) MīmāSū. x. 8. 62.

अन्तरालगुणालाभ (antarālaguṇālābha) *m.* non-obtainment of the interval as the accessory पौर्णमास्याम् ...। तत्रैकपुरोडाशायामन्तरालगुणालाभेन वैगुण्याद्द्विपुरोडाशायामेव स्यात् ŚāstrDī. 791. 13 (*on* x. 8. 19)

अन्तरालघटित (antarāla-ghaṭita) *adj.* arranged in the interspace वन्दनमालान्तरालघटितघण्टागणेन द्वारदेशेन विराजमानम् ... सूतिकागृहमपश्यत् Kād. 71. 2 (comm. तस्या अन्तराले मध्ये मध्ये घटितो घण्टागणो यस्य)

अन्तरालचतुष्क (antarāla-catuṣka) *n.* group of four corners or points of the intermediate space पूर्वदक्षपश्चिमोत्तरेष्वन्तरालचतुष्के चोर्ध्वमधश्च दश मुद्रा न्यसेत् SetuBa. 85. 11.

अन्तरालचर (antarāla-cara) *m.* one that moves, i.e. flies in the sky सौरसेनो नाम नृपतिः ... बल्लवेन रहसि बिलस्थलजलान्तरालचरतरसमानाययन्नपि ... मांसभक्षणक्षणं नावाप YaśasCam. ii. 332. 3.

अन्तरालचारिन् (antarālacār-in) [*f.* - iṇī] *adj.* **i** wandering or moving in the intermediate space तत्र संयमं कृत्वा सिद्धानां द्यावापृथिव्योरन्तरालचारिणां दर्शनम् YogBh. 157. 17 (*on* 3. 32); **ii** moving, i.e. being in between (love and coyness) (कनकलेखा) रागलज्जान्तरालचारिणी चरणाग्रेण धरणीतलम् ... लिखन्ती DaśKuC. 121. 16.

अन्तरालज (antarāla-ja) *adj.* [*f.*-ā] **1** arisen from the difference स्वशीघ्रोच्चात्पुनस्साध्यः सिद्धयोरन्तरालजम्। अर्धीकृत्य सकृत्सिद्धे पूर्ववत्परिकल्पयेत् MaBhāsk. 4. 48; **2** arisen in between नाड्योऽन्तरालजाः MaBhāsk. 6.40.

अन्तरालजलधि (antarāla-jaladhi) *m.* sea in the intermediate space (between heaven and earth) तद्विष्णोः पदमन्तरालजलधेराधारतो भूतलात्पारं द्यामुपगन्तुमुद्यमवतां सेतूभवत्पातु वः SaduktiKa. 34. 13.

अन्तरालजलपूर्णा (antarāla-jalapūrṇā) *adj.* (*f.*) full of water inside समचतुरश्रा वापी ... पतिताग्रे विच्छिन्ना तया घना सान्तरालजलपूर्णा GaṇiSāSaṁ. 7. 36; 7. 40½.

अन्तरालजात (antarāla-jāta) *adj.* born or living in the ether or sky (मुनिकुमारयुगलम्) यमावासप्रदेश°...°अन्तरालजातजन्तुजनितभुजप्रयासैः ... महाभैरवं नाम तद्देवतायतनमानिन्ये YaśasCam. i. 145. 2 (comm. श्येनगृध्रश्यामलिकाचटकपारापतादयः)

अन्तरालतारतम्यदर्शन (antarālatāratamya-darśana) *n.* observation of degree (of distance) of intermediate space अत्र खेटस्य धनुःशतत्रयरूपमन्तरालम्बनलभ्यं ग्रामादिपरिमाणतारतम्येनान्तरालतारतम्यदर्शनात् DaṇḍaVi. 277. 23.

अन्तरालत्रय (antarāla-traya) *n.* triad of intermediate spaces अन्तरालत्रयं त्रिस्थं बहिः पत्राष्टगामिव। ... मातृकाम् ... योजयेत् TantrRā. 8. 44.

अन्तरालत्व (antarāla-tva) *n.* **1** the state of being in the middle (of action) सामिधेनीनामन्तरालत्वेन संस्तवादन्तराले विधानमवसीयते Kāśi. i. 29. 28 (*on* 1. 58); **2** the state of being the intermediate space नाकाशस्य नामरूपयोर्निर्वहितुरन्तरालत्वमाह Bhām. 277. 2 (*on* i. 3. 41); VedāntKa. 193. 12 (*on* i. 3. 41); न च न रूपादिसाक्षात्कारोऽस्ति स्वप्नदृशस्तस्मादुभयोर्लोकयोरस्यान्तरालत्वम् Bhām. 543. 4 (*on* iii. 2. 1); **3** the state of being intervening time अन्तरालत्वेनान्तरालोपस्थितिपूर्वकविधिप्रवृत्तावेवोपक्रमावगतं स्वरसं भवति MayūMāli. 133. 9 (*on* ii. 2. 4)

अन्तरालदशा (antarāla-daśā) *f.* **A** intermediate state, position in between स्वप्नजाग्रतोरन्तरालदशामापन्न इव सचमत्कारम् CaitaCan. 114. 7 (5); **B** intervening time or period येन समग्रचिन्तामणिमधीत्य किंचित्कालोत्तरं पुनश्चिन्तामणिमध्येष्यते तत्रान्तरालदशायामप्ययं चिन्तामणिमधीत इति प्रयोगापत्तिः VyutpaVā. 202. 30.

अन्तरालदिश् (antarāla-diś) *f.* intermediate quarter सः (भगवान्) ... आकाशं दिशश्चान्तरालदिग्भिः सहाष्टौ ... निर्मितवान् ManvaMu. 8. 9 (*on* 1.13)

अन्तरालदेश (antarāla-deśa) *m.* **A** intermediate space or region वेगाख्यं संस्कारजमपि कर्म न सहसा शरमन्तरालदेशेन च लक्ष्येण च योजयति TātpaṬ. (Vā.) 120. 23 (*on* i. 1. 3); अन्तर्वेदी बहिर्वेदीति शब्दाभ्यामेकोऽन्तरालदेशो लक्ष्यते ŚivārkaMaDī. i. 67. 21 (*on* i. 1. 1); तत्रापि तादृशप्रयोगात्तत्रान्तरालदेशस्यैवाभावात् तदनुमानासंभवः LaCandr. 700. 16; बहूनां ग्रामाणामन्तरालदेशे घातापहारौ भवतः VīraMi. 723. 27 (*on* 2. 271); **B** interior or inner region, region inside यस्य च सुकृतिनः ... आ ... अचलदरीसंदोहवदमृतापगाप्रवाहापहसितयशःफेनपटलपाण्डुरोपलान्तरालदेशात् ... गायन्ति गुणविजृम्भितानि जनपदगोप्यः YaśasCam. i. 87. 5; **C** intermediate quarter इन्द्रायेत्यादि अन्तरालदेशे प्रतिदिशं बलिदानम् VīraMi. (Āhnika.) 409. 7.

अन्तरालदेशकाल (antarāladeśakāla) *m.* intermediate space and intervening time चैतन्यस्य निरतिशयवेगितया अन्तरालदेशकालाग्रहणाभिमानोऽलातचक्रगतक्रमवद् देशभेदसंयोगविभागाग्रहणाभिमानवत् ĀtmaSi. 62. 11.

अन्तरालदेशानुमान (antarāladeśānumāna) *n.* inference of inter-mediate space वेद्यन्तर्बहिर्देशयोरन्तरालदेशानुमानम् LaCandr. 700. 13.

अन्तरालद्रोणी (antarāla-droṇī) *f.* wooden tavern in the form of intermediate space (of rib) उर्वीपतिः ... अतिकृशतया कायस्य दूरदर्शितोन्नतीनां पर्शुकानामन्तरालद्रोणीषु निद्रायमाणशिशुसरीसृपम् ... साक्षादिवाधर्मक्षेत्रमुरःप्रदेशं दर्शयन्तम् ... वेतालमद्राक्षीत् TilaMañ. 47. 6.

अन्तरालद्वय (antarāla-dvaya) *n.* pair of intermediate spaces अन्तरालद्वये पकारं मातृकां च विलिख्य ParaśuKS. 11. 7 (310. 20); 11. 7 (310. 23)

अन्तरालनिरत (antarāla-nirata) *adj.* resting in the interior तटीध्रन्ध्रान्तरालनिरतैश्च सपत्नजातैः। शौर्ये जगत्त्रयपुरीप्रथिते तवेत्थं को नाम विक्रमपराक्रमवानिहास्तु YaśasCam. i. 189. 7.

अन्तरालनिर्णय (antarāla-nirṇaya) *m.* conclusion or decision about the interior or inside तत्र वैषम्यं त एव जानते। ... एकरेखापक्षरेखात्रयपक्षयोः ... एकपुरोडाशायां बहुपुरोडाशायामिव चान्तरालनिर्णयस्य संभवात् SetuBa. 334.27.

अन्तरालनिलीन (antarāla-nilīna) *adj.* lying, i.e. situated in the midst इन्द्रदत्तश्रेष्ठी ... वत्सतरतानकसंतानपरिवृतम् अनेकचन्द्रकान्तोपलान्तरालनिलीनमरुणमणिनिधानमिव तं जातमुपलभ्य ... अपत्योत्पत्तिमहोत्सवमकार्षीत् YaśasCam. ii. 340. 9.

अन्तरालनिष्पत्ति (antarāla-niṣpatti) *f.* accomplishment during interval दुःखमेव जन्मोत्पत्तिः। न, सुखस्याप्यन्तरालनिष्पत्तेः NyāySū. iv. 1. 56.

अन्तरालनृत्यत्कुण्डलिविसर (antarālanṛtyat-kuṇḍalivisara) *adj.* **A** having masses of serpents (or peacocks or variegated deers) dancing inside वेत्रपुटभेदनाधीशतिरुवेङ्कटनृपतिनन्दनः ... अन्तरालनृत्यत्कुण्डलिविसरैः हिमवच्छिखरैरिव शुभ्रैः विभ्राजमानैः विदारितारियूथैः हूणयोधैः ... प्रविश्य ĀnandRa. 8. 0 (41) (comm. कुण्डली सर्पो मयूरः चित्रवर्णमृगो वा); **B** having multitudes of the Indian soliders wearing dangling ear-rings in the middle, ĀnandRa. 8. 0 (41) (comm. कुण्डलधारिणः भारतीययोधाः ...। मध्ये मध्ये भारतीययोधैरप्यन्वितैरिति भावः। भारतीयानां हि कर्णाभरणधारणं लक्षणम्)

अन्तरालपतित (antarāla-patita) *adj.* [*f.*- ā] **1A** fallen, i.e. occurring in between पूर्वापरीभूतावयवसमाहारात्मको भुज्यादिक्रियासमूहोऽन्तरालपतिताभिर्हाससंकथनादिक्रियाभिरतीतानागतलक्षणानां व्यवधानम् VākyaPa. 75. 3 (*on* 3 (9). 82); **1B** fallen in, i.e. caught in the difference (of ideas) काङ्क्षन्ती मुहुरात्मपक्षविजयम् ... अन्तरालपतिता मन्दोदरी वर्तते AnargharRā. 6. 27; धावन्ती मुहुरन्तरालपतिता मन्दोदरी सुन्दरी MahāN. 8. 22; **2** fallen, i.e. being in the ether or sky वन्ध्यास्तेऽपि तदन्तरालपतिता ये भृङ्गभङ्गीजुषः Mugdhopa. 64; **3** falling in, i.e. included in अवयवसंज्ञा इति। विशिष्टावधिपरिच्छिन्नस्य समुदायस्यान्तरालपतिता गत्यादिसंज्ञाभाजोऽवयवा भवन्ति तेषां संज्ञा Pradī. ii. 282A. 24 (*on* i. 4. 56)

अन्तरालपथ (antarāla-patha) *m.* intermediate, i.e. aerial path अहम् ... त्वरितमन्तरालपथेन यामि यावदेकत्र मध्याह्नतरणितीव्रातपेन विह्वला ... स्थिता

UdaySuKa. 136. 5.

अन्तरालपरता (antarālapara-tā) *f.* the state of being intended to convey the intermediate space रथाक्षेण विमिमीत इत्यस्यान्तरालपरतयैव सार्थक्याद्रथाक्षमात्राणि यूपान्तरालानि कार्याणि BhāṭṭCan. 34. 18 (*on* xiii. 4. 23)

अन्तरालपरत्व (antarālapara-tva) *n.* the state of being intended to convey the intermediate space वचनान्तरस्याप्यन्तरालपरत्वावश्यंभावादुभयोः परिणामयोर्विकल्पः BhāṭṭCan. 34. 21 (*on* xiii. 4. 24)

अन्तरितान्तरिक्षा (antaritāntarikṣā) *adj. (f.)* **1** which has concealed or covered the sky सिंहीसुतो दशनपट्टविघट्टनोत्थधूमच्छटा भुजगनायकभोगदीर्घाः। ग्रासीकृतस्य शशलक्ष्मभृतः कलङ्कलेखा इवोदगिरदन्तरितान्तरिक्षाः HarVi. 34. 12; **2** which has entered the sky, i.e. which has acquired space क्षणादन्तरितान्तरिक्षा वात्या ...। अलातचक्रप्रतिमानकार्षीत् बाणाशनीन् बाणघनप्रसूतान् Yādavā. 20. 38 (F. N. अन्तरितं संजातावकाशम् अन्तरिक्षं गगनं यस्यास्सा)

अन्तरितार्थ (antaritārtha) *m.* objects or individuals separated or distanced in respect of time, JainaL.

अन्तरिताहारचित्त (antaritāhāracitta) *adj.* whose thought or intention of taking food has vanished or is lost अहं दाहेनानङ्गदहनजनितेनान्तरिताहारचित्तः। ... अतर्कयम् DaśKuC. 123. 9.

अन्तरिताहिमदीधिति (antaritāhimadīdhiti) *adj.* which has concealed or covered the Sun ददतमन्तरिताहिमदीधितिम् ...। जलदकालमबोधकृतं दिशामपरथाप रथावयवायुधः ŚiśuVa. 6. 41.

अन्तरिति (antár-iti) *f.* act of warding off, driving away or expelling धूरसि ध्वर्व ध्वर्न्तमित्याह ... रक्षसामन्तरित्यै MaiS. iii. 7. 8 (iii. 86. 14); iii. 8. 8 (iii. 106. 11); इदमहं रक्षोऽधमं तमो नयामीत्याह ... रक्षसामन्तरित्यै MaiS. iii. 10. 1 (iii. 129. 19); iv. 3. 4 (iv. 43. 20) [exclusion, MW.; intervention, Practical Vedic Dictionary]

अन्तरितैकपुत्रा (antaritaikaputrā) *adj. (f.)* who is deprived of her only son त्वत्कारणादन्तरितैकपुत्राः प्रतीच्छ मातृरिह सान्त्वनाभिः RāmC. App. I. 38.12.

अन्तरित्य (antar-itya) *adj.* [*f.* - ā] ought to be omitted तस्मादु हैतत् सामैतस्मादह्नो नान्तरित्यम् JaimiBr. 2. 21; 3. 14; 3. 45; 3. 186; 3. 298; द्विपदष्षष्ठेऽहन् क्रियन्त इति प्रतिष्ठित्यै ... तस्मादेता अत्र नान्तरित्याः। ता एता भवन्ति अग्ने त्वं नो अन्तम इति JaimiBr. 3. 167.

अन्तरित्य (antarit-ya) *ger.* having excluded तमूचुः ब्राह्मणाः ... ज्येष्ठं भ्रातरमन्तरित्याभिषेचितम् Nir. 2. 10 (49. 15)

अन्तरिन्दुविगलत् (antarindu-vigalat) *adj.* which flows away from the Moon within अन्तर्वृत्तितयान्तरिन्दुविगलत्पीयूषमास्वादयेत् Vidvanmo. 7. 57.

अन्तरिन्द्रिय (antar-indriya) *n.* **A** internal organ of sense, i.e. the mind वासनारहितैरन्तरिन्द्रियैराहरन् क्रियाः। न विकारमवाप्नोषि खवत्क्षोभशतैरपि AnnaU. 5. 39; अणुसंयोगिमनोऽन्तरिन्द्रियम् TarkBhā. (K.) 66. 13; 79. 8; Tarkāmṛ. 3. 9; BhāṭṭCin. i. 16. 4 (*on* i. 1. 4); स गान्दिनीभूरथ ... देधे मुदाकुञ्चितमन्तरिन्द्रियम् DhātuKā. 1. 2; संकल्पादिहेतुः अन्तरिन्द्रियं मनः VedāntKau. 244. 3 (*on* ii. 4. 6); वागादिदशेन्द्रियाण्यन्तरिन्द्रियमेकं मनः ... इति सप्तदशकलाः सूक्ष्मशरीरे सन्ति VedāntKau. 406. 9 (*on* iv. 2. 15); मनोरूपमन्तरिन्द्रियं ज्ञातव्यम् ManvaMu. 53. 3 (*on* 2. 92); मनस एवान्तरिन्द्रियस्य करणत्वस्यापि कल्पनात् SiddhāLeSaṁ. 185. 3; मनोऽपि नानाप्रतिजीवभेदात्सुखादिकग्राहकमन्तरिन्द्रियम् Vidvanmo. 4. 18; दशबाह्येन्द्रियाण्येकमन्तरिन्द्रियं मन इत्येकादशेत्यर्थः GoviBh. 113. 12 (*on* ii. 2. 1); **B** internal organ महदहंकारमनांस्यन्तरिन्द्रियाणि SāṁkhyaTaPra. 174. 10; कर्तृत्वकरणत्वाभ्यां विक्रियेतान्तरिन्द्रियम् PañcDa. 3. 8 (*but.* comm. अन्तःकरणम्)

अन्तरिन्द्रियग्राह्यत्व (antarindriyagrāhya-tva) *n.* the state of being knowable through the internal organ बुद्ध्यादीनां षण्णामन्तरिन्द्रियग्राह्यत्वम् SarvaDaKau. 57. 10.

अन्तरिन्द्रियचतुष्क (antarindriya-catuṣka) *n.* group of four internal organs (विश्ववैश्वानरौ) मनोबुद्ध्यहंकारचित्ताख्येनान्तरिन्द्रियचतुष्केण क्रमात् संशयनिश्चयाहंकार्यचैत्तांश्च सर्वानेतान् स्थूलविषयाननुभवतः VedāntSā. (Sa.) 16.19.

अन्तरिन्द्रियजन्य (antarindriya-janya) *adj.* to be produced by the internal organ, i.e. the mind बाह्यान्तरिन्द्रियजन्यप्रत्यक्षाविषयोऽपि परमेश्वरः ... साक्षात्कारविषयो भवति ŚivārkaMaDī. i. 425. 8 (*on* i. 3.12)

अन्तरिन्द्रियधारण (antarindriya-dhāraṇa) *n.* concentration of the internal organ, i.e. the mind अद्वितीयवस्तुन्यन्तरिन्द्रियधारणं धारणा VedāntSā. (Sa.) 31.10.

अन्तरिन्द्रियनिग्रह (antarindriya-nigraha) *m.* control of the internal organ, i.e. the mind अन्तरिन्द्रियनिग्रहः शमः VedāntPari. 356. 1; अन्तरिन्द्रियनिग्रहोऽप्यावश्यकः BālamBha. ii. 215. 30 (*on* 2. 135-136)

अन्तरिन्द्रियमनःकृत (antarindriyamanaḥ-kṛta) *adj.* effected or produced by the mind which is an internal organ सुखादिसंवेदने–अन्तरिन्द्रियमनःकृते

सुखादिज्ञाने Bhāsk. ii. 83. 18 (*on* ii. 3. 2)

अन्तरिन्द्रियविशिष्ट (antarindriya-viśiṣṭa) *adj.* distinguished or qualified by the internal organ, i.e. the mind धीमहि ध्यायेम ... शरीरान्तरिन्द्रियविशिष्टास्मदर्थस्योद्भूतावयवभेदत्वेन बहुत्वेन ... बहुवचनम् BālamBha. i. 92. 25 (*on* 1. 24½)

अन्तरिन्द्रियवृत्ति (antarindriya-vṛtti) *f.* function of the internal organ, i.e. the mind, mental psychosis तत्राद्वितीयवस्तुनि विच्छिद्य विच्छिद्य अन्तरिन्द्रियवृत्तिप्रवाहः ध्यानम् VedāntSā. (Sa.). 31. 12.

अन्तरिन्द्रियव्यापार (antarindriya-vyāpāra) *m.* operation of the internal organ, i.e. the mind विद्याविरोधिनामन्तरिन्द्रियव्यापाराणामुपरमः शमः ŚivārkaMaDī. ii. 399. 24 (*on* iii. 4. 27)

अन्तरिमिथुनवत् (antarimithuna-va(n)t) *adj.* having sexual intercourse during or in the middle (of performance) बौधायनमते यावज्जीविकान्येव चातुर्मास्यानि कर्तव्यानि अन्तरिमिथुनवन्ति ViraMi. (Samaya.) 277. 30.

अन्तरिलम् (antarilam) *adv.* in the middle of (the invocation of sacrificial formula called) *ilā* अन्तरिलं चतुरवानिति ŚāṅkhāŚS. i. 12. 3 (comm. अन्तरिलम् इलामध्ये इलोपह्वानसंज्ञकस्य निगदस्य मध्ये चतुरवानिति उच्छ्वसिति)

अन्तरिष् (antar-iṣ-) VI. P. to seek among, to wish, to long for अन्तरिच्छन्ति तं जने रुद्रं परो मनीषया ṚV. viii. 72. 3.

अन्तरी (antar-ī-) IV. Ā. (rarely P.) **1A** to go between (heaven and earth) हिरण्यपाणिः सविता विचर्षणिरुभे द्यावापृथिवी अन्तरीयते ṚV. i. 35. 9; VājaS. 34. 25; VājaS. (K.) 33. 1 (19); ते हि द्यावापृथिवी विश्वशंभुव ऋतावरी रजसो धारयत्कवी। सुजन्मनी धिषणे अन्तरीयते देवो देवी धर्मणा सूर्यः शुचिः ṚV. i. 160.1 (Sāy. द्यावापृथिवी अन्तः ... अन्तराले ... ईयते ... गच्छति); KauṣīBr. 21. 2 (93. 11); अन्तर्दूतो रोदसी दस्म ईयते होता निषत्तो मनुषः पुरोहितः ṚV. iii. 3. 2; रथीरन्तरीयते साधदिष्टिभिर्जीरो दमूना अभिशस्तिचातनः ṚV. iii. 3. 6 (Sāy. अन्तः द्यावापृथिव्योर्मध्ये ईयते गच्छति); स होता सेदु दूत्यं चिकित्वाँ अन्तरीयते। विद्वाँ आरोधनं दिवः ṚV. iv. 8. 4; KāṭhS. 12. 15 (i. 178. 1); द्वा जना यातयन्नन्तरीयते नरा च शंसं दैव्यं च धर्तरि ṚV. ix. 86. 42; **1B** to go in between (two races) अन्तर्ह्यग्न ईयसे विद्वान् जन्मोभया कवे। दूतो जन्येव मित्र्यः ṚV. ii. 6. 7; इह त्वं सूनो सहसो नो अद्य जातो जाताँ उभयाँ अन्तरग्ने। दूत ईयसे ṚV. iv. 2. 2; iv. 7. 8; **2Ai** to exclude, to keep away देवा ह वाऽअस्यां यज्ञं तन्वाना इमां यज्ञादन्तरीयुः ŚatBr. III. ii. 3. 1; ŚatBr. (K.) IV. ii. 3. 1; (नाभानेदिष्ठो वालखिल्यो वृषाकपिरेवयामरुत्) यदेषामन्तरीयात् तद्यजमानस्यान्तरीयात् GopBr. ii. 6. 9 (256. 10); **2Aii** to omit, to drop तप्तं चेत् कर्म(गुणो) त्वन्तरीयात् सर्वप्रायश्चित्तं हुत्वा मोद्विजेत् AVPrāyaścitta. 4. 2; **2B** to deprive of यस्मिन्वासिष्ठो ब्राह्मणः स्यात्त्(?) दक्षिणाया नान्तरीयात् GopBr. ii. 3. 9 (195. 12); **3** (pass.) to be covered with प्राक् च लोभादिह स्पर्शः कुशैरेवान्तरीयते। वेष्टितैषा (औदुम्बरी) कुशैः पूर्वं वाससा परिवेष्ट्यते TantrVā. 107. 16 (*on* i. 3. 4)

अन्तरी (antarī) *f.* **A** (Arch.) fillet, moulding of the pedestal, base or frieze तत् पट्टिकैकभागेन भागाभ्यामन्तरी भवेत् VāstuVi. 9. 14; दशा: पादुकजागतेकुमुदतत्पट्यन्तरीषु प्रतौ (स्युः) TantrSa. 2. 84; एकेनालिङ्गपट्टं स्यादन्तरी चैकभागिनी ŚilpaRa. i. 18. 14; i. 19. 65; i. 30. 2; **B** name of a particular ornamental design of the altar उत्सेधे द्व्यंशितेऽधोवधि गुणरशनान्तर्यथाष्टाद्रिषड्भागेऽशैः कम्पाब्जकम्पाः शशिकरशशिभिः शेषतोऽधो गलं च TantrSa. 2. 37; **C** string or chord, cf. **अन्तरीयुक्त**.

अन्तरी (antarī) *adj.* (*f.*) how much less (a woman) superior (to Māyā) न विद्यते कन्य मनुष्यलोके ... मायाय देवीय समा कुतोऽन्तरी (better कुतोत्तरी) प्रतिरूप सा LaliVi. 3. 12 [DBHS.]

अन्तरीकर्तुम् (antarī-kartum) *inf.* to take to heart, i.e. to bear पादावेव नोत्सहेते मे। ... क्षणमपि विलम्बमन्तरीकर्तुमक्षमाः क्षामतया मा यासिषुः प्राणाः Kād. 306. 19.

अन्तरीकृ (antarī-kṛ-) VIII. P. to consider as another, PW.

अन्तरीकृत (antarī-kṛta) *adj.* **1** separated, distanced away कर्णिका निचयश्चान्तं? प्रत्यंशं रचयेत्ततः। अङ्गणे ... °पैतैः सुसमैरन्तरीकृतैः। ... शुक्तिकैरष्टकैः शुभैः PauṣkS. 29. 107; 29. 156; स्यात्तुर्यास्त्रायतं मध्ये वेदीनां तत्र पञ्चकम्। परितः पञ्चहस्तं च हस्ते हस्तेऽन्तरीकृतम् JayāS. 20. 134; PāraS. 15. 151; (स्तम्भौ) (प्रसिद्धयज्ञदारूत्थौ) द्विहस्तेनान्तरीकृतौ PāraS. 20. 42; **2** limited, i.e. divided नावच्छिन्नं हि देशेन न कालेनान्तरीकृतम्। अतस्सर्वगतत्वाद्वै सर्वतःपात्प्रभुः स्मृतः JayāS. 4. 77; **3A** intervened समभ्यसेत्। योगं निशावसाने च विश्रमैरन्तरीकृतम् JayāS. 22. 73; PāraS. 9. 178; (पथ्यम्) उभयमप्येकद्व्यन्तरीकृतम् एकद्वित्रिदिवसैरन्तरीकृतेन विजातीयभोजनेन व्यवहितम् BhojanKu. 200. 4; **3B** interposed दर्भकाण्डद्वयेनाथ मध्ये मध्येऽन्तरीकृते। वर्मणा क्षालनात् ...। कुण्डभित्तिगणं सर्वं प्रोत्थितैः परिभूषयेत् PāraS. 7. 31.

अन्तरीकृत्य (antarīkṛt-ya) *ger.* **1A** having placed together, i.e. having brought closer or nearer to one another खरावन्तरीकृत्य सँवपति MānŚS. 111.9; **1B** having interposed, having inserted अनभिभाष्यैनां वस्त्रमन्तरीकृत्यातिक्रमिष्यामस्तावत् Ubhayābhi. 8. 22; (यः ... नैरन्तर्ये तु विरोधी स रसान्तरव्यवधानेन प्रबन्धे निवेशयितव्यः) शान्तो रसस्तस्य विरुद्धो मलयवतीविषयः शृङ्गारस्तदुभयविरुद्धमद्भुतमन्तरीकृत्य ... निबद्धः Loc. 176. 22 (*on* 3. 26); **2Ai** having covered शरीरमेतेषां न स्पृश्य काष्ठैः अन्तरीकृत्य रज्जुभिः बद्ध्वा समुद्रगां नदीं नीत्वा वालुकप्रदेशे श्वभ्रं खनति VaikhāGS. 5. 8; संन्यासिनोऽनाहिताग्नेर्देहे मृतं पुत्रोऽन्यो वा तृणैरन्तरीकृत्य ... नद्यास्तीरे ... अवटं खनति VaikhāDS. iii. 8. 1; **2Aii** having taken or put in the middle, i.e. having surrounded मृगसहस्राणि ...। अन्तरीकृत्य देवेशं स्थितानि HariVaṁ. App. I. 31 (362); **2B** having left अन्यतममन्तरीकृत्य दोषोदकमल्पाल्पमवसिञ्चेत् SuśruS. iv. 14. 18; **3A** having considered as another पिशाचौ ...। ततस्तावुचतुर्विष्णुमन्तरीकृत्य केशवम् HariVaṁ. App. I. 31 (436); **3B** having considered, having kept in mind धैर्यधना भूत्वा भव त्वं कालकाङ्क्षिणी। निमित्तमन्तरीकृत्य किंचिदेव शुचिस्मिते BrahmāṇḍP. ii. 30. 45; कमन्तरीकृत्यायं सुराविभ्रमः PādaTā. 34. 5; सः ... राक्षसः ... त्वद्रूपधारी त्वामेव तावत्कालिकयादृच्छिकसंनिधानमन्तरीकृत्य मे तिरोभूतः AdbhuDa. 4. 1 (3); **4** having omitted, having passed over तीर्थं तदन्तरीकृत्य स्रुवो रामकराच्युतः। निपपात BrahmāṇḍP. ii. 58. 18.

अन्तरीक्ष (antar-īkṣa) (= antarikṣa, DvirūK. (P.) 7. 3; ŚabdaBhePra. (Pu.) 3.3; ŚabdaBhePra. (Ma.) 1. 6; DvirūK. (H.) 6; ŚabdaRa. (Su.) 2. 54; KalpaK. 3. 23) *n.* **1A** sky आपो द्यौः पृथिवी वायुरन्तरिक्षं (v.l. °रीक्षं) दिशस्तथा ... संभूतं लोकसाक्षिकम् MahāBhā. i. 1. 34; आधाररूपा पुनरस्य कण्ठे विभ्राजते विद्युदिवान्तरिक्षे (v.l. °रीक्षे) MahāBhā. iii. 112. 3; iii. 195. 16 (v.l.); iii. 75. 111 (v.l.); iii. 105. 1 (v.l.); vi. 51. 22 (v.l); vii. 151. 20 (v.l.); ix. 57. 49 (v.l.); xiii. 15. 18 (v.l.); नरेन्द्रः ... मार्गं प्रपेदे सदृशानुयात्रश्चन्द्रः सनक्षत्र इवान्तरीक्षम् BuddhaC. 3. 9; 6. 57; अराजकं नैव रराज राष्ट्रम् ... अनुत्थिते चन्द्र इवान्तरीक्षम् Saund. 1. 60; अव्यक्तरसं तोयमन्तरीक्षान्महीगतम्। तेषु तेषु प्रदेशेषु रसं तं तं नियच्छति SuśruS. v. 3. 23; तिमिराख्यः स वै दोषः ...। चन्द्रादित्यौ ... अन्तरीक्षे ... पश्यति SuśruS. vi. 7. 17; RugVi. 59. 40; तं मातरो देवमनुव्रजन्त्यः ... मुखैः ... °गौरैः पद्माकरं चक्रुरिवान्तरीक्षम् KumāSaṁ. 7. 38; RaghuVa. 16. 83 (v.l.); जलधरविवृद्धहनुना विजृम्भितमिवान्तरिक्षेण (v.l. °रीक्षेण) Mṛcch. 5. 51 (445); श्रद्धेयनिर्झरजलव्यपदेशमस्य (अद्रेः) विष्वक्तटेषु पतति स्फुटमन्तरीक्षम् ŚiśuVa. 4. 25; ईश्वर उवाच भूर्लोके नैव संलग्नमन्तरीक्षे ममालयम् KūrmaP. 314. 17 (1. 31); अन्तरीक्षं खगानीकैरग्निजिह्वैः समावृतम् VarāP. 200. 9; धावन्ति ये वातमिवान्तरीक्षे दीर्घास्तु ते वातमृगाः प्रदिष्टाः YuktiKa. 211. 16; 98. 7; सर्वेषां सिद्धियोगानामधिष्ठानं तवोदरम्। मन्येऽन्तरीक्षं विस्तीर्णम् LiṅgaP. i. 21. 72; भारतस्यान्तरीक्षस्य कालस्य च हरेरपि अप्रमेयाणि चत्वारि भावः सीमा गतिः क्रिया BṛDharmaP. i. 30. 29; i. 36. 128; व्याप्यान्तरीक्षककुभौ ... संवीक्षते विरहिणः क इह ध्रियन्ते ... विद्युदुरुदीपिकयेव मेघः SaduktiKa. 175.5; अनीलान्तरगः भूम्यादावसंलग्नः सन्नन्तरीक्षे गच्छति CaturCin. ii (2). 1007. 22; कर्पूरीयन्ति भूमौ ... हंसीयन्त्यन्तरीक्षे ... रश्मयः शीतरश्मेः PadyaVe. 574; **1B** air, ether अन्तरिक्षे (v.l. °रीक्षे) च वागुक्ताप्रतिमा मानुषी किल Rāmā. ii. 110. 30; निदध्यात्। अन्तरीक्षं दर्विरक्षतेति द्वितीयं पितामहाय ViṣṇuSm. 73. 18; प्रच्युतः स्वर्गादप्राप्तो मेदिनीतलम्। स्थितश्चासीदन्तरि (v.l. °री Wilson's Ed.) क्षे सः MatsyaP. 35. 4; अन्तरीक्षे वागुच्चैः प्राह BṛNāraP. 15. 79; पातु ... ईश्वरः स्वयम्। जले स्थले चान्तरीक्षे PāñcaRā. (Nā.) i. 5. 20; ii. 5. 30; **1C** one of the three types of world (identified with Bhuvas) भूर्लोकोऽयं स्मृता भूमिमन्तरीक्षं दिवः स्मृतम् MārkP. 79. 8; पृथिव्यामन्तरीक्षे वा ये च स्वर्लोकवासिनः। सर्वे ... उपतस्थुः प्रजापतिम् VāyuP. i. 30. 98; तीर्थानि वद मे ब्रह्मन् ... दिवि भुव्यन्तरीक्षे च यानि सन्ति BṛDharmaP. i. 5. 1; **1D** intermediate space between heaven and earth अहमाहवनीयोऽग्निरन्तरीक्षं च दक्षिणः VṛGautaSm. 604. 8 (15); अन्तरीक्षं तु यन्नाभिः ... तं वन्दे विश्वरूपिणम् BṛNāraP. 18. 25; **1E** mid-region, cf. **अन्तरीक्षगत 2**; **2** one of the eight types of pentroof (in temples) अनन्तं चान्तरीक्षं च ... अष्टधालुपाः। देवानां हर्म्यके MānaSā. 18. 87; **3** mineral mica, talc अभ्रकमभ्रम् ... अन्तरि(v.l. °री) क्षमाकाशम् RājNi. 289. 8 [ViśvaPra. 163. 12 gives *antarīkṣa* as the meaning of *diva*, Kośas give *antarīkṣa* in the sense of the following words : *ākāśa*, ŚabdaRa. (Su.) 2. 54; *kha*, NāmŚil. 1762]

अन्तरीक्ष (antarīkṣa) *m.* **1A** name of an Ādya god अन्तरीक्षो वसुहयो ह्यतिथिश्च ... आद्या ह्येते VāyuP. ii. 1. 59; **1B** one of the epithets of Lord Śiva पृथिव्यै चान्तरीक्षाय पृथिवीव्यापिने नमः LiṅgaP. i. 18. 8; **2** type of world ब्रह्मान्तरीक्षवाय्वग्निवरुणभूमयो लोकाः DīpKa. 88. 7 (*on* 3 .145)

अन्तरीक्षकबरीभार (antarīkṣa-kabarībhāra) *adj.* having the braid of hair in the form of the middle region जीयात् ... मन्दारस्तबकोऽन्तरीक्षकबरीभारस्य गौरीपतेः ... रविः SaduktiKa. 3. 25.

अन्तरीक्षग (antarīkṣa-ga) *adj.* [*f.*–ā] **1Ai** present or existing in the sky समसर्पत्ततो भूतं किंचिदेव विशां पते (v.l. किंचिदप्यन्तरीक्षगम्) MahāBhā. viii. 17. 71; iii. 50. 19; **1Aii** traversing or crossing the sky शिबिकामन्तरि(v.l. °री)क्षगाम् ... स्वयमास्थाय राघवः। स्वप्ने चाद्य मया दृष्टा सीता Rāmā. v. 25.10; vi. 3249* (1) (v.l.); ये चात्र विघ्नकर्तारो भुविदिव्यन्तरीक्षगाः ... अपसर्पन्तु ते सर्वे **1C** persent or existing in one of the three types of world (identified with Bhuvas) TantrSā. (K.) 40. 4; **2** belonging to the atmosphere, atmospheric देशिकेन्द्रः ... उत्सारयेद् विघ्नान् अस्त्रादृभिश्चान्तरीक्षगान् ŚāraTi. 4. 9.

अन्तरीक्षगत (antarīkṣa-gata) *adj.* **Ai** traversing or crossing the sky राघवः ... अन्तरि (v.l. °री°) क्षगतं रथम्। ददर्श Rāmā. ii. 4. 7; **Aii** going or jumping in the sky अन्तरि(v.l. °री°) क्षगता दिव्यास्त इमे हरयो ध्रुवम् Rāmā. iii. 4. 11; vi. 41. 30 (v.l.); वीरभद्रः ... अन्तरीक्षगतस्याशु चिच्छेदास्य शिरो महान् VāyuP. i. 30. 157; **B** remaining or floating in the mid-region अब्रवीत् विभीषणः। अन्तरि(v.l.°री)क्षगतः ... राक्षसाधिपम् Rāmā. vi. 10. 13; अन्तरीक्षगतो वत्सो यावद्भूमिं न यास्यति। गोस्तावत् पृथिवी ज्ञेया VṛGautaSm. 574. 20 (10); **C** stationed or present in the intermediate space between heaven and earth देवदानवगन्धर्वाः किंनराश्च महोरगाः। अन्तरी(v.l.°री)क्षगतो सर्वे द्रष्टुकामास्त-दद्भुतम् VṛGautaSm. 574. 20 (10)

अन्तरीक्षगमन (antarīkṣa-gamana) *n.* act of soaring to the sky प्रागन्तरीक्षगमनात्स्वमपत्यजातमन्यद्विजैः परभृताः किल पोषयन्ति Śāk. 5. 22.

अन्तरीक्षचर (antarīkṣa-cara) *adj.* [*f.*-ā] moving about in the sky किंकरा नाम राक्षसाः। अन्तरि(v.l. °री)क्षचरा घोराः MahāBhā. ii. 3. 26; Rāmā. vi. 57. 11 (v.l.); अन्तरीक्षचरा देवी ... शकुनी ते प्रसीदतु SuśruS. vi. 30. 10; ब्रह्मपातो निवसति राक्षसः ...। अन्तरीक्षचरैर्घोरैर्यातुधानशतैर्वृतः VāyuP. i. 47. 16.

अन्तरीक्षदिव्योत्थ (antarīkṣadivyottha) *adj.* arising from the intermediate space and the heaven (वास्तुकर्मारम्भे) भौमस्य तु दिनं वर्ज्यं करणं विष्टिसंज्ञितम्। क्षित्यन्तरीक्षदिव्योत्थैरुत्पातैर्भयपीडितम् PañcaRā. (Ha.) i. 11. 7.

अन्तरीक्षदेवलिपि (antarīkṣadeva-lipi) *f.* kind of script कतमां मे भो उपाध्याय लिपिं शिक्षापयसि ... भौमदेवलिपिं अन्तरीक्षदेवलिपिम् LaliVi. 10. 5 (9) [DBHS.]

अन्तरीक्षद्विरेफा (antarīkṣa-dvirephā) *f.* river Ganges (*lit.* female bee between heaven and earth) (नदीपर्यायेषु गङ्गानामानि) अन्तरीक्षद्विरेफा comm. *on* NāmMā. 71.

अन्तरीक्षनगरी (antarīkṣa-nagarī) *f.* city in the heaven वाराणसीति वसुधातलभोगभिन्नां यामन्तरीक्षनगरीं मुनयो वदन्ति CaṇḍaKau. 2. 30.

अन्तरीक्षभव (antarīkṣa-bhava) *adj.* arising from the atmosphere (अनध्यायः) निर्वात (?निर्घात) अन्तरीक्षभव उत्पातध्वनिः ... अहोरात्रम् DīpKa. 19. 1 (*on* 1. 145)

अन्तरीक्षलोक (antarīkṣa-loka) *m.* one of three types of world (sometimes identified with Bhuvas) व्यूहमूर्तिर्विराट् ... तस्य ... अन्तरीक्षलोको घ्राणम् ŚaṅkaVi. (Ā.) 56. 15; एकमात्रप्रणवमुपासीनस्य मनुष्यलोकं द्विमात्रमुपासीन-स्यान्तरीक्षलोकं फलं प्रोच्य ... आह GoviBh. 45. 17 (*on* i. 3. 13)

अन्तरीक्षसवर्ण (antarīkṣa-savarṇa) *adj.* having colour which is similar to that of the sky, i.e. blue अन्तरि(v.l. °री)क्षसवर्णास्तु ... राजानम् ... ते हयाः संख्ये समावहन् MahāBhā. vii. 22. 40.

अन्तरीक्षस्थापन (antarīkṣa-sthāpana) *n.* act of placing in the mid-region अभिध्यानादिना विषादेरन्तरीक्षस्थापने अदृष्टवदात्मसंयोगो मन्त्रादिरेव वा प्रतिबन्धकः Upask. 225. 7 (*on* v. 1. 7)

अन्तरीक्षेचर (antarīkṣe-cara) *adj.* moving or living in the atmosphere अन्तरीक्षेचरा देवाः ... घोषमुदीरयेन्सुः MaVastuAva. i. 40. 14; i. 129. 15; ii. 138. 12; अन्तरीक्षेचरा देवाः ... तथागतम् ... मानयन्ति MaVastuAva. ii. 348. 16 [DBHS.]

अन्तरीक्ष्य (antarīkṣ-ya) *adj.* aerial, atmospheric, Apte.

अन्तरीणा (antar-īṇā) *adj.* (*f.*) inner, internal शर्मकर्म। अथ वलयमणीनां रश्मिसंभिन्नमुद्राम्। जनयतु पुनरुक्तां शृङ्खलामन्तरीणाम् TripuMāPūSt. (Sā.)19.

अन्तरीप (antarīpa) *n.* [P. vi. 3. 97; MahāBh. i. 131. 12 (*on* i. 1. 54); i. 171. 21 (*on* i. 1. 67); iii. 173. 4 (*on* vi. 3. 97); KāśiVṛ. *on* i. 1. 54; MugdhaBo. 6. 70 (62. 16); PāṇiTaVāNaMā. 82. 8; SiddhāKau. 209B. 16 (*on* vi. 3. 97); PrakriKau. i. 464. 3; LaŚabdeŚe. ii. 156. 4; Liṅgānu. (Pā.) 106. 23; Liṅgānu. (Śāk.) 118. 20; Liṅgānu. (Vā.) 9. 23; Liṅgānu. (He.) 82. 11; ParaNā. 3599; KalpaK. 472. 97] **1** island (अस्मिन् समुद्रे) सन्त्यन्तरीपमिव दुर्गनिवेशनानि MahāP. 58. 177; 7. 152; अस्याधिगच्छति न कोऽपि तलं जलानामस्यान्तरीपमवनिः परितोऽयमेव (सिन्धुः) RāmC. 25. 58; मुनिः ... ददर्श चात्यद्भुतमन्तरीपम् SkandP. ii (9). 4. 8; iv. 50. 53; द्वीपानि सर्वाणि सहान्तरीपैः स्वच्छायया क्रान्ततलानि कृत्वा। सध्यङ् फणावन्निवहोऽम्बरेऽसौ Rāvaṇā. 19. 49; अथो माधवाब्धेः स्मरेदन्तरीपं तु मध्ये त्रिकोणम् ĪśānŚiPa. i. 23. 4; सरोगृहान्तरे चाभूज्ज्ञिनायतनमुच्चकैः। संसाराब्धेरन्तरीपमिवाक्रान्तं न तेन यत् PariPar. 3. 69; (जम्बुद्वीपः) विष्वग्वृतः परिजनैरयमन्तरीपैस्तेषामधीश इव राजति NaiṣC. 11. 84; 7. 73; दैवात् फलकमासाद्यान्तरीपं प्राप्य सुन्दरि ... मे द्वितीया त्वं भविष्यसि MalliC. 2. 321; वारां निधेर्महादुर्गमन्तरीपमवाप सः MalliC. 8. 486; शुद्धाशयाः श्वेत इवान्तरीपे। निराशिषो नित्यमिहाश्रयन्ते ... निवृत्तिधर्मम् Yadavā. 6.17; 11. 26; यूथाधिनाथाः ...। तरीपथेनैव तदन्तरीपमगुः Raghunā. 9. 13; परिप्लावयिष्यते च स (महागिरिः) निःशेषमिदमन्तरीपम् NīlaVi. 76. 2; 50. 3; अन्तरीपात् ... आगतेषु ... प्राह कलशः ParamāKā. 40. 5; अमृतजल-धिमध्योल्लासिरत्नान्तरीपप्रसृमरकिरणालीकल्पितोद्यानशोभे (देवि) TripuMāPūSt. (Sā.) 1; KhadgaŚ. 38; **2** portion of land stretching out into the sea, peninsula अन्तरीपं यदन्तर्वारिणः AmaK. 489; KapaK. 346. 21 (comm. अन्तरमपामन्तरीपम्) [Kośas give *antarīpa* as a synonym of *dvīpa*, AbhidhāRaMā. 3. 48; Vaija. 156.33; AbhidhāCin. 1078; ParyāŚaRa. 1876; ŚabdaRa. (Vā.) 636; ParaNā. 804; KośaKaTa. 1. 2240]

अन्तरीप (antarīpa) *m.* [P. vi. 3. 97; KāśiVṛ. *on* vi. 3. 97; JaineVyā. 313. 22 (*on* iv. 3. 202); CāndrVṛ. *on* i. 1. 9; *on* v. 2. 113; enumerated in the *dhūmādigaṇa*, GaṇPā. 124. 40; JaineVyā. 190. 9 (*on* iii. 2. 105); CāndrVṛ. *on* iii. 2. 41; GaṇRa. 5. 329 (367); enumerated in the *kacchādigaṇa*, GaṇRa. 5. 328 (366)] island मग्नस्य पत्तनस्यास्यावशेषः ... अन्तरीप इवायं ते प्रासादः प्रेक्ष्यतेऽधुना TriṣaŚaPuC. ii. 6. 356; जलधेरधिष्ठातृदैवतम् ... क्वचित् क्वचित् पयांस्यपहृत्यान्तरीपान् प्रादुश्चकार PrabaCin. 118. 17.

अन्तरीपपति (antarīpa-pati) *m.* lord of the island एनम् ... अन्तरीपपतिः ... व्याहरत् ... निजवृत्तम् Raghunā. 8. 15.

अन्तरीपप्रभु (antarīpa-prabhu) *m.* lord of the peninsula द्वीपान्तरीपप्रभवः परापानुपेश्वरा लाटसखाय एयुः। सूनोस्तवाग्रे DvyāśraKā. 6.84.

अन्तरीपप्राय (antarīpa-prāya) *adj.* similar to an island, almost an island तस्यान्तरीपप्रायस्योपरिष्टात्करिवर्ष्मणः। निषद्य वायसश्चक्रे विष्वग्दिगवलोकनम् PariPar. 2. 399.

अन्तरीपभू (antarīpa-bhū) *f.* region of island स्वामिंस्त्वमेव संसारपारावारान्त-रीपभूः PāṇḍaC. 11. 245.

अन्तरीपभूप (antarīpa-bhūpa) *m.* king of the island अवहत्संमदमन्तरीपभूपः Raghunā. 8. 23.

अन्तरीपभ्रम (antarīpa-bhrama) *m.* illusion of (being) an island निर्यन्नाराचधाराचयखचितपतन्मत्तमातङ्गजातं जातं यस्यारिसेनारुधिरजलनिधा-वन्तरीपभ्रमाय SaduktiKa. 214. 10.

अन्तरीपान्तर (antarīpāntara) *n.* interior of an island कदम्बवनकाननम् ... अभिशोभते ... अन्तरीपान्तरे Vidvanmo. 8. 111.

अन्तरीपोदर (antarīpodara) *n.* interior of the peninsula अन्तरीपोदरेषु स्वच्छा वेणिमर्द(?र्मद)यति मनः शारदीनां नदीनाम् SaduktiKa. 178. 31.

अन्तरीभूत (antarī-bhūta) *adj.* **1** who has been, i.e. existed within सुव्यक्तो रन्तरी(?सुव्यक्तमन्तरी)भूतमात्मानं खे पुरोदितम्। ध्रियै घृतविधिम् PauṣkS. 22. 74; **2** what is included प्रमीयमाणो हि कर्मभूतो विषयः सामग्र्यन्तरीभूतत्वात् सामग्र्येव NyāyMañ. i. 12. 13; **3** who has been, i.e. come near मयणल्लदेवी ... अन्तरान्तरीभूतेन श्रीसिद्धराजेन विज्ञप्ता PrabaCin. 57. 16.

अन्तरीभूत्वा (antarī-bhūtvā) *ger.* [irr.] having been involved प्रस्तुता याः कथाः पुरा। सुदूरमन्तरीभूत्वा रामस्य ... ता एव श्रोतुमिच्छामि ViṣṇuDhaP. ii. 1. 5.

अन्तरीय (antar-īya) *adj.* [enumerated in the *gahādigaṇa*, KāśiVṛ. *on* iv. 2. 138; GaṇRa. 5. 317 (356); Pradī. iii. 223. 17 (*on* iii. 3. 18)]

1A belonging to the inner or intermediate position द्वादशाहप्रभृतीनि सत्राणि। किमेकं स्थानमन्तरीयमिति वा NidāSū. 161. 4 (9. 6); **1Bi** belonging to the inner circle द्वितीयावरणे चैव अन्तरीये ...। देवताश्चान्तरे पूज्याश्चतुर्विंशतिसंख्यया PauṣkS. 3. 84; **1Bii** belonging to the inside श्री अह्मदावादवास्तव्य° ... °वाग्वरदेशस्थान्तरीयनगरनौतनभद्रप्रासादोद्धरणधारः EI. ii. 72. (30)4; **2** lower (garment) शिवा मा तनूराविश इत्यन्तरीयं वासः परिधाय HirGS. i. 10. 5; i. 9. 10; तानन्तरीयेण वाससा समवास्तृणोत् (नलः) MahāBhā. iii. 58. 13; अनेकमूल्यं रतनं स दद्यात्। बद्धान्तरीये वसनान्ति ग्रन्थिं दत्वा च तस्येह भवेत तुष्टः SaddhaPuṇ. 135. 28; **3** (used as noun) (that) which obstructs (salvation) दर्शनावरणीयं ज्ञानावरणीयं मोहनीयम् अन्तरीयम् इति चत्वार्येतानि घातिकर्माण्युच्यन्ते BrahmSūBh. (Bhā.) 125. 25 (*on* ii. 2. 33); VedāntKau. 204. 10 (*on* ii. 2. 33); अन्तरीयं तु कर्म मोक्षमार्गप्रवृत्तानां मोक्षविघ्नकरं ज्ञानम् SarvaDaKau. 35. 21; **4** inrariably associated with, cf. **अन्तरीयार्थदर्शन.**

अन्तरीय (antar-īya) *n.* **1** under or lower garment निर्ज्ञातं तस्य भवतीदमन्तरीयमिदमुत्तरीयमिति MahāBh. i. 93. 17 (*on* i. 1. 36); (नलस्य) तस्यान्तरीयमादाय जग्मुः सर्वे विहायसा (शकुनाः) MahāBhā. iii. 58. 13; v. 150. 20; SaddhaPuṇ. 136. 4; पृथुमणिमेखलांशुजालं संजज्ञे युतकमिवान्तरीयमूर्वोः Kirātā. 7. 14; गलितनीवि निरस्यन्नन्तरीयम् ... सस्वजे दयितया हृदयेशः Kirātā. 9. 48; 10. 54; (ची)नांशुकान्तरीयाणामपि अन्तःपुरसुन्दरीणाम् ... राजवृषो रतानि ... अनुबभूव AvantiKa. 26. 4; TantrVā. 107. 14 (*on* i. 3. 4); लज्जालुतोत्तरीयेण नान्तरीयेण केवलम् RāghPāṇ. (Dha.) 18. 4; LakṣmīT. 39. 17; BṛBrahmaS. i. 8. 106; विचित्रवर्णरुचिरेणान्तरीयेण रोचितः ... बाहुबलिः TriṣaŚaPuC. i. 3. 363; i. 4. 228; अन्तरीयमधोवासः SmṛtiCan. ii. 269. 8; CaturCin. iii (1). 979. 21; iii (1). 515. 19; VīraMi. (Āhnika.) 94. 4; मिथोऽपि स्पर्धया वर्धमानत्वादिव संयते। दृढं चोलान्तरीयाभ्यां स्तनश्रोणीप्रबिभ्रती ... नर्तकी HammīMaKā. 13. 15; आसञ्जयन्नृपरविश्वशयितस्य रङ्गे कंसद्विषो वपुषि काञ्चनमन्तरीयम् EI. iii. 13. 13; सुभ्रुवा(?°वः) ... अन्तरीयमगलन्निरितम्बतः VasaViKā. 8. 57; संछादितं मेखलयान्तरीयम् Yādavā. 12. 84; 13. 46; कार्ष्णादीन्युत्तरीयाणि शाणादीन्यन्तरीयाणि BālamBha. i. 151. 10 (*on* 1. 29); सरयमपसरन्तीं तां परित्यागशङ्काकुलमिव पदयोर्यत्प्राग्रहीदन्तरीयम् TārāŚa. 66; (भवस्य) ईषद्रुधिरार्द्रं गजचर्म चान्तरीयम् Manmatho. 1. 17 (423. 24); **2** inner circle or territory अमुं प्रभावलीदेशमन्तरीयान्तरादपि। आस्थावन्तः किलास्थातुमिभ्यास्ते ते समाययुः ParamāKā. 70. 27 [Kośas give *antarīya* as a synonym of the following words: *adho'ṁśuka*, AbhidhāCin. 673; KalpaK. 52. 290; *adho'mbara*, ParaNā. 2274; *upasaṁvyāna*, AbhidhāRaMā. 2. 391; AbhidhāCin. 673; ParaNā. 2274; *nivasana*, AbhidhāRaMā. 2. 391; AbhidhāCin. 673; ParaNā. 2274; *paridhāna*, AbhidhāRaMā. 2. 391; AbhidhāCin. 673; ParaNā. 2274; KośaKaTa. 5368; KalpaK. 52. 290; *parīdhāna*, KalpaK. 52. 290 and they give *antarīya* in the sense of the following words: *adho'ṁśuka*, AmaK. 1307; ParyāMu. 22. 13; Vaija. 168. 121; ParyāŚaRa. 698 *and* NānārthSaṁ. 5. 44 gives *antarīya* as the meaning of *aṁśuka*]

अन्तरीयक (antarīya-ka) *adj.* **1** appearing apart from, i.e. unnecessary or non-concomitant ज्ञानस्यैव परा काष्ठा वैराग्यम्। एतस्यैव हि नान्तरीयकं कैवल्यम् YogBh. 21. 3 (*on* 1. 16); नान्तरीयकः सामर्थ्यप्रापितसंनिधानः कर्ता स्थित एव प्रयोजकव्यापारेण बाह्यप्रयोगसिद्ध्यर्थमेव विषयीक्रियते ŚṛṅgāPra. (Bho.) 97. 26; योऽयं धात्वादिरूपः समुदायस्तदर्थः स उपदेशः न तु नान्तरीयकावान्तरसमुदायार्थ इत्यन्त्यस्य समुदायापेक्षायां प्राधान्याद्धात्वादेरेव ग्रहणमिति भावः PadMañ. *on* KāśiVṛ. *on* P. i. 3. 3 (395. 15); **2** intermediate न च वाच्यं कर्मणामेव स्वानुष्ठातृपुरुषसमीहितानि संपादयतामन्तरा नान्तरीयकं तनुभुवनादिकार्यनिर्माणम् ĀgaPrā. 13. 2.

अन्तरीयकता (antarīyaka-tā) *f.* the state of appearing apart from, i.e. unnecessaryness or non-concomitance नगरं व्रजतः पुंसो वृक्षमूलादिसंगमः। नान्तरीयकतामेति यथा खेदनिवारिणः। प्रस्थितस्य तथा मोक्षः PadmP. (Ra.) 6. 302; (ग्रामं गच्छन् वृक्षमूलान्युपसर्पति) न चात्रापि यावद् ग्रामं गच्छन्निति न प्रयुज्यते तावन्नान्तरीयकता न प्रतीयते PadMañ. *on* KāśiVṛ. *on* P. i. 4. 50 (569.5); सुखदुःखफला कर्माशयः तदर्थं जन्मायुषी नान्तरीयकतया प्रसूते YogSūVṛ. *on* 2. 13 (F. N.)

अन्तरीयकत्व (antarīyaka-tva) *n.* the state of appearing apart from, i.e. unnecessaryness or non-concomitance नान्तरीयकत्वादत्र पुँल्लिङ्गेन निर्देशः क्रियते MahāBh. ii.144.13 (*on* iii.3.18); ii.245.21 (*on* iv.1.92); कश्चिदन्नार्थी शालिकलापं सतुषं सपलालमाहरति नान्तरीयकत्वात् MahāBh. ii.144.16 (*on* iii.3.18); ii.172.23 (*on* iii.4.21); ii.245.23 (*on* iv.1.92); कश्चिन्मांसार्थी मत्स्यान्सशकलान्सकण्टकानाहरति नान्तरीयकत्वात् MahāBh. ii. 144.17 (*on* iii.3.18); ii. 172.24 (*on* iii.4.21); ii.245.25 (*on* iv.1.92); (समानकर्तृकयोः पूर्वकाले) नान्तरीयकत्वादत्र द्विवचनेन निर्देशः क्रियते MahāBh. ii.172.21 (*on* iii.4.21); ii. 172.25 (*on* iii.4.21); लिङ्गसंख्यादिस्तु प्रत्ययार्थस्य नान्तरीयकत्वेनाप्युपादानसंभवाद्विवक्षाविवक्षे उच्येते ManuBh. i.464.23 (*on* 5.89)

अन्तरीयत्व (antarīya-tva) *n.* the state of being the under or lower garment मन्ये धाराचतुरतुरगोत्खातरेणुप्रतानः सद्यो लग्नः स्तनकलसयोरन्तरीयत्वमेति PavaDū. (Dha.) 56.

अन्तरीयपश्चिमाञ्चल (antarīya-paścimāñcala) *m., n.* hinder border or hem of lower or under garment कक्षा ... अन्तरीयपश्चिमाञ्चले AnekāSaṁ. 2. 547.

अन्तरीयवस्त्र (antarīya-vastra) *n.* lower or under garment अन्तरीयवस्त्रदशासंगोपनं नीविः CaturCin. iii (1).1459.1.

अन्तरीयसिचयप्रान्त (antarīyasicaya-prānta) *m.* hem or border of lower or under garment सीता ... नेत्राब्जे मलिनान्तरीयसिचयप्रान्तेन निर्मार्जती। ... मासाननैषीदसौ JānaPa. 6.2.

अन्तरीयहरण (antarīya-haraṇa) *n.* removing of lower or under garment अन्तरीयहरणे कृतत्वरं राघवम् ... अङ्गना।... संरुरोध JanaHa. 8.11.

अन्तरीयायमान (antarīyāya-māna) *adj.* behaving or functioning as space आत्मन्यारादन्तरीयायमाने विस्तारस्स्यात् कीदृशो वा Acyutarā. 7. 12.

अन्तरीयार्थदर्शन (antarīyārtha-darśana) *n.* perception of an object invariably associated with another तद्विदो नान्तरीयार्थदर्शनं चापरं विदुः Kāvyālaṅ. (Bh.) 5. 11.

अन्तरीयुक्त (antarī-yukta) *adj.* possessed of the string or chord अन्तरीयुक्तस्तन्त्रीयुक्तः पटहः पणवः ... एते चर्मावनद्धभेदाः AbhinBhā. i.165.10 (*on* 4. 250)

अन्तरीयैकदेश (antarīyaika-deśa) *m.* part of lower or under garment नान्तरीयैकदेशस्य कल्पयित्वोत्तरीयताम् (उपस्पृशेत्) GobhiGS. i.2.21 (comm. अधः परिधानमन्तरीयम् ... तस्य ... एकदेशस्यावयवस्य); VīraMi. (Āhnika.) 93.18.

अन्तरीर्ष्यालु (antar-īrṣyālu) *adj.* jealous or envious at heart अन्तरीर्ष्यालुनापि प्रहासपूर्वं प्रतिपादितं देवेन MudriKu. 4. 4 (17)

अन्तरीरित (antar-īrita) *adj.* pushed inside अन्तरीरितसमीरसुता सा पार्श्वयोरथ पृथक्पतिताभ्याम्। राक्षसी विकटवप्रनिभाभ्यां व्याप दूरमुदधिं द्विदलाभ्याम् RāmC. 16.108.

अन्तरुक्थ्य (antar-ukthya) *adj.* consisting of liturgical sacrifice within गोतमस्तोममन्तरुक्थ्यं कुर्वन्ति ĀśvaŚS. II.iii.6.1; कथमु खल्वन्तरुक्थ्यो भवति BaudhŚS. iii.255.10; एतदन्तरुक्थ्यम् LāṭyāŚS. iv. 5. 16; DrāhyŚS. viii.1.16; पूर्वश्चतुष्टोमोऽन्तरुक्थ्यस्तस्मिन्नग्निष्टोमचमसानुन्नीय त्रिषु पात्रेषूक्थ्यं विगृह्य तैः सह प्रचरेत् Kāṭhakaśrautasūtrasaṅkalana 30. 6.

अन्तरुच्चारण (antar-uccāraṇa) *n.* act of whispering or muttering in (the ear) स्वेष्टेश्वरस्वेष्टमन्त्रस्यान्तरुच्चारणधाराप्रवाहोऽत्र स्वाध्यायः PārāSū. 40.29.

अन्तरुच्छेदन (antar-ucchedana) *n.* act of uprooting, i.e. destruction of buffer king परस्यान्तरुच्छेदनमर्थोऽनर्थानुबन्धः ArthŚā. iii. 91. 7 (9.7)

अन्तरुटजम् (antaruṭajam) *adv.* inside the hut मुनिः। ... वल्कलचीर्यन्तरुटजं प्राविशद्द्रुतम् PariPar. 1.247.

अन्तरुत्थ (antar-uttha) *adj.* arisen inside, i.e. internally produced दण्डारणिप्रकृतिरग्निरिवान्तरुत्थस्तापं तनोति हि महानुभयोर्विमर्दः RāghPāṇ. (Dha.) 11.34.

अन्तरुत्पन्न (antar-utpanna) *adj.* **A** produced or originated in the body शरीरमन्तरुत्पन्नैर्व्याधिभिर्विविधैरिदम्। दीर्यते TriṣaŚaPuC. iv. 7.372; **B** arisen inside अन्तरुत्पन्नकृमिकुलजनितां कण्डूतिं निरोद्धुमपारयन्पुरुषो व्याकुलतां कलयति SyādvāMañ. 10(33)

अन्तरुदक (antar-udaka) *adj.* **A** (territory) which is inside water एकायने वा शैलस्तम्भवाटकञ्जनान्तरुदके वा स्वभूमिबलेनाभिहन्युः ArthŚā. iii.171.8(12.4) (comm. अन्तरुदके च प्रदेशे); **B** under water जटिलव्यञ्जनमन्तरुदकवासिनं वा ... वरुणं नागराजं वा सत्त्रिणः क्रमाभिनीतं राज्ञः कथयेयुः ArthŚā. iii.186.11 (13.2)

अन्तरुदन्वत् (antarudanvat) *adv.* inside the ocean अलिमलिने व्योम्नि पतन्तो रश्मयोऽभिनवशीतमरीचेः। दधति तुलामन्तरुदन्वत्सान्द्रविद्रुमलताविपिनानाम् ChandaśCū. 3.56 (11) (comm. अलिमलिने इत्यत्र अन्तरु[द]न्वति समुद्रमध्ये)

अन्तरुदर (antar-udara) *n.* interior of the belly कुक्षिस्तुन्देऽन्तरुदरपार्श्वयोरपि दृश्यते NānārthaSaṁ. i.23.34.

अन्तरुदरम् (antarudaram) *adv.* inside the belly, i.e. in the interior निमग्नेन क्लेशैर्मननजलधेरन्तरुदरं मयोन्नीतो लोके ललितरसगङ्गाधरमणिः RasGaṅ.2.7.

अन्तरुदासीन (antar-udāsīna) *adj.* internally indifferent or neutral अन्तःशत्रुरन्तर्मित्रोऽन्तरुदासीन इति तेऽप्यनुजीविसखिसुहृदश्च Bārhas. 3.24.

अन्तरुदित (antar-udita) *adj.* arisen in the heart or mind नागाः संतापमन्तरुदितं प्रशमय्य तोयैः MahāP.29.143; एषोऽस्मीति... तत्त्वमसीति शान्तं ज्योतिरनन्तमन्तरुदितानन्दं समुद्योतते PraboCan. 6. 28 (115. 2)

अन्तरुद्बुद्ध (antar-udbuddha) *adj.* awakened or arisen in the heart of mind यः खलु लोके ... रामादेरन्तरुद्बुद्धं रत्यादिकं बहिः प्रकाशयन् कार्यमित्युच्यते स काव्यनाट्ययोः पुनरनुभावः SāhiDa.143.11.

अन्तरुद्भिन्न (antar-udbhinna) *adj.* **A** burst forth in the heart or mind लज्जा ह्यन्तरुद्भिन्नमान्मथविकारजुगोपयिषारूपा मदनविजृम्भैव Loc.211.18 (*on* 3.38); **B** arisen in the heart or mind स्वामिन्युन्मोक्तुकामेऽप्यनुचितमिदमित्यन्तरुद्भिन्नचिन्तः ... यः सन्तापं ताटकाया व्यधित युधि तमेवाश्रये रामबाणम् RāmBāSta.5.

अन्तरुद्यद्विषा (antar-udyadviṣā) *adj.(f.)* having poison arising from inside भोगाङ्गभङ्गीमिमामानन्दाश्रुविमिश्रसुन्दरदृशा श्रीश्रेणिकेनेक्षिताम्। बाष्पापूर्णदृशा चकोरकवरेणेवान्तरुद्यद्वि(द्वि)षां श्रीशालिः ... संभावयामासिवान् ŚāliC.5.167.

अन्तरुद्रिक्ता (antar-udriktā) *adj.(f.)* prominent internally केवलं देवतासु ज्ञानमुद्रा अन्तरुद्रिक्ता क्रियामुद्रा बहिः ParāTri. 223.12.

अन्तरुद्वेग (antar-udvega) *m.* inner despair अस्य धैर्यादवदतोऽप्यन्तरुद्वेग उच्चकैः।... बलाद् बाष्पेण सूच्यते TriṣaŚaPuC. i.2.83.

अन्तरुन्मेषलक्षण (antarunmeṣa-lakṣaṇa) *adj.* of the nature of inner manifestation एतत्पक्षे बहिरन्तरुन्मेषलक्षणयोरीश्वरसदाशिवयोरेतत् प्रदत्वं स्वारसिकं भवति LalitāSaBh. 80.32(*on* 115)

अन्तरुपप्लव (antar-upaplava) *m.* **1** nescience within अदर्शनाज्जगत्यस्मिन्नेकस्यापि तदात्मनः। अस्तीयमपि यात्वन्तरुपप्लवसमुद्भवा PramāVār. 3. 362; **2** internal derangement मिथ्याबुद्धिर्न सर्वैव प्रधानार्थानुसारिणी। साधर्म्यनिरपेक्षापि काचिदन्तरुपप्लवात्। अन्यत्र गतचित्तस्य द्विचन्द्रादिमतिर्यथा TattvSaṁ. 668.

अन्तरुपवीतलक्षण (antarupavīta-lakṣaṇa) *adj.* characterised by sacred thread (in the form of knowledge) within मुमुक्षोः ... अन्तरुपवीतलक्षणं तु बहिस्तन्तुवदव्यक्तमन्तस्तत्त्वमेलनम् Parabrahmopaniṣad 1 (528.3)

अन्तरुपष्टम्भक (antarupaṣṭambha-ka) *adj.* (vital force) which supports (the body) from within प्राणो वा ... अन्तरुपष्टम्भकः BṛĀraUBh. 212. 4 (*on* i.6.3)

अन्तरुपसत्क (antarupasat-ka) *adj.* consisting of the Upasad-ceremony inside दैक्षस्य संवत्सरस्य द्वादशावशिष्य राजानं क्रीणीयात् सोऽन्तरुपसत्कः BaudhŚS. iii.262.4.

अन्तरुपात्तभुक्ति (antarupātta-bhukti) *adj.* (used as noun) who has obtained enjoyment internally, i.e. by valition दौर्विध्यदग्धमनसोऽन्तरुपात्तभुक्तेश्चित्तं यथोल्लसति ते स्फुरितोत्तरङ्गम् YaśasCam. i. 268.9 (comm. संकल्पेन गृहीतभोजनस्य)

अन्तरुपासन (antar-upāsana) *n.* act of worshipping or contemplating within ब्रह्मणः अन्तरुपासनं स्वाराज्यफलं प्रस्तूयते TaiUBh. 200.17 (*on* 1.5)

अन्तरुपासना (antar-upāsanā) *f.* internal contemplation स भगवान् एतमेव मस्तकसीमानं विदार्य एतया द्वारा सुषुम्नया हृदयं प्राप्त इत्यन्तरुपासनयोच्यते TattvPrakā. 28A.13 (*on* i.1.31)

अन्तरुप्त (antar-upta) *adj.* sown inside अपामन्तरुप्तं बीजमज त्वया PrabhāC.103.16.

अन्तरुल्लसत् (antar-ullasat) *adj.* **i** appearing within, i.e. in the consciousness अन्तरुल्लसदच्छाच्छभक्तिपीयूषपोषितं भवत्पूजोपयोगाय शरीरमिदमस्तु मे Stotrā.17.26 (comm. अन्तः संवित्पदे उल्लसता); **ii** appearing within अन्तरुल्लसता संमदेन सपदि प्रहसितेक्षणकपोलपालिः ... अतिसत्वरैः पदैरागत्य (सः) UdaySuKa.51.6.

अन्तरुष्ण (antar-uṣṇa) *adj.* having heat inside (the body) शीतार्दितोऽन्तरुष्णश्च ज्वरेण म्रियते नरः HārīS. ii.4.11.

अन्तरुष्मपक्व (antaruṣma-pakva) *adj.* cooked by the heat inside (the atom) अनवस्रावितो विशदोऽन्तरुष्मपक्व ओदनश्चरुः Aparā.573.10 (*on* 1.293); तथा पाकं कुर्यात् यथा मण्डगालनव्यतिरेकेणान्तरुष्मपक्वम् ... अन्नं भवति HārLa.166.11.

अन्तरुष्मपक्वत्व (antaruṣmapakva-tva) *n.* the state of being cooked by the heat inside (the atom) अनवस्रावितान्तरुष्मपक्वत्वमात्रवाचित्वे वा सूपशाकादेरपि चरुत्वापत्तेः NyāySu. (So.) 1328.4 (*on* iii.3.38)

अन्तरुष्मपक्वौदन (antaruṣmapakvaudana) *n.* rice cooked by the heat inside (the atom) याज्ञिकाः ... अन्तरुष्मपक्वौदने चरुशब्दमुपचरन्ति ŚāstrDī. 656.22 (*on* x.1.10)

अन्तरुष्मप्रपाटित (antaruṣma-prapāṭita) *adj.* split apart by the heat inside स्थावरत्वेऽपि पृथिव्यामुप्तबीजानि जलसेकानुपदं सुसंस्कारसामग्रीवशादन्तरुष्मप्रपाटितान्युच्छूनत्वमासाद्य BṛNāraP. 30. 1(2)

अन्तरुष्य (antar-uṣyá) *m.* secret residence अ॒ग्ने ... त्वा॒ य॒मो अ॑चिकेत् ... द॒शा॒न्त॒रु॒ष्या॑द॒ति॒रोच॑मानम् ṚV. x. 51.3 (Sāy. अन्तरुष्यं गूढमावासस्थानम्); द्वादशो ह वा अन्तरुष्याः (v.l. °रुष्यात्) स्वर्गो लोकः KauṣīBr.8.9 (40.14) [an intermediate resting place, MW.]

अन्तरुहा (anta-ruhā) *f.* grass, pw.

अन्तरूढ (antar-ūḍha) *adj.* **1** borne in the mind रविनन्दन स्थगय चन्द्रमसं मम पश्य संप्रति सुधेति सखे। अयमन्तरूढकलुषः क्षिपति स्मरबाणवर्त्मसु विषं विषमम् RāmC. 26. 13; **2** carried inside सः ... ददर्श ... अन्तरूढम् ... नरम् BṛKathāMañ. xvi.1.623.

अन्तरूप (anta-rūpa) *n.* **i** symbol of the end तृतीयस्याह्नो रूपम् ... यद् त्रिवद् यदन्तरूपम् AitBr. 21.1(544); GopBr. ii.6.11(260.14); स्थितवत् तदन्तरूपम् KauṣīBr.20.4 (92.1); यथा वै सोदर्कमेवं सप्रभृत्यन्तरूपम् KauṣīBr. 20. 4(92.15); तस्य तदेवान्तरूपं यद्भूतानुवादि KauṣīBr. 21.4(94.24); 22.4 (98.26); **ii** form or nature of destruction सृष्टिस्थित्यन्तरूपेण सृष्टिस्थित्यन्तकारिणि ... नमोऽस्तुते BrahmVaiP. iv. 27.173.

अन्तरूप(anta-rūpa) *adj.* [*f.*–ā] of the form or nature of destruction आदिमध्यान्तरूपोऽसि ... भवान् VarāP. 113.39; सृष्टिस्थित्यन्तरूपा या ... तामालिङ्ग्य वसन्तम् ... वृन्दावनेश्वरम् ... ध्यायेत् PadmP.iv.77.15.

अन्तरूरु (antar-ūru) *m.* inner (side of the) thigh कदलीगर्भमिव चान्तरूरुमीक्षे PādaTā. 35.22.

अन्तरूष्माञ्चित (antarūṣmāñcita) *adj.* distinguished by warmth or heat from inside अन्तरूष्माञ्चितान्यपि। व्यञ्जनानि बटोर्जिह्वा ... समसेवत YātrāPra. 2.48.

अन्तरे (antare-) I.P. to step in between, to cross, to intervene य॑द्वा॑विद्वा॒ना॒न्त॒रे॑ति तं॑च्छिद्रं॑ MaiS. i.11.9 (i.171.2); धि॒ष्णि॑या वा ए॒ते न्यु॑प्यन्ते। यद् ब्र॒ह्मा। यद्धोता॑। यद॑ध्व॒र्युः ... तान्। यद॑न्त॒रे॑यात् यज॑मानस्य प्रा॒णान्थ्सं॑कर्षेत् TaiBr. III. iii.8.1; यं कामयेतापशु स्यादिति वत्समस्यान्तरियात्। पशवो वै वत्सः। पशुनेवास्यान्तरेति JaimiBr. 3.113; न प्र॑व॒र्ग्यं॑ चादि॒त्यं चा॒न्त॒रे॑यात्। यद॑न्त॒रे॑यात्। दु॒श्चर्मा॑ स्यात् TaiĀ.v.3.1 (599. 4)

अन्तरेक्षण (antarekṣaṇa) *n.* act of looking for fault or weakness परेषामन्तरैष(v.l. °रेक्ष)णे। आनृण्यमाप्नोति MahāBhā. iii.33.53.

अन्तरेखा (anta-rekhā) *f.* last line खातं भागम् ...। सोपवीतं च विहितमन्तरेखाश्रयस्थिते PauṣkS.41.14; आद्यन्तरेखे अभिवर्ध्य षट्कोणं कुर्यात् SetuBa.29.20.

अन्तरेचर (antare-cara) *adj.* wandering, i.e. staying inside तथागतं तत्र न जज्ञिरे जनाः बहिश्चरा वाप्यथवान्तरेचराः MahāBhā. iv.10.13.

अन्तरेण (ántareṇa) *ind.* [P.ii.3.4; JaineVyā. 65.21 (*on* i.4.3); CāndraVyā. ii.1.50; ŚākaṭāVyā.i.3.100; SiddhaHe. ii.2.33; MugdhaBo. 5.7(47.7); enumerated in the *sarvādigaṇa*, GaṇPā.254.46; KāśiVṛ.*on* i.1.37; SiddhāKau. 106B.10 (*on* i.1.37); enumerated in the *cādigaṇa*, GaṇRa. 1. 8 (25)] **1** (used as *adv.*) **A** on the way **Bi** in the interval **ii** in the meantime **Ci** within (the place) **ii** inside **D** without (vision) **E** after, at a later time, afterwards **F** from left (used as *prep.*) **2Ai** between (two points of space) **ii** between (two verses or words) **iii** between (two units of time) **iv** between (two persons etc.) **B** within **C** inside, in the middle **D** in, among **3A** without, in the absence of **B** excepting, excluding, apart from **4** through **5** with reference to, regarding, about **6** nearby, next to **7** the word *antareṇa* **1** (used as *adv.*) **A** on the way व॒हा॑मि स्म पू॒ष॒ण॒म॒न्त॑रेण ṚV. x.33.1; त॒तो॒ऽत्व॒न्त॒रेण निदध्या॒त् ŚatBr.(K.) I.iii.1.10; **1Bi** in the interval तद् यथा व्राजबाहुभ्यां परिजिग्रहीष्य(?ष)न्नन्तरेणातिमुच्येत तादृक् तद् यत् संधौ जुहोति KauṣīBr. 2.9 (8.6); अथ ह स्मैता॒नेवा॒न्त॒रेणा॒लभन्ते ŚatBr. VI.ii.1.39; **1Bii** in the meantime सर्पिष्मान्नन्तरेण भवति समष्ट्यै JaimiBr. 2. 159; स ह तथैव पल्ययमानो मृगान् प्रसरन्नन्तरेणैवोच्चैःश्रवसं कौपेयमधिजगाम JaimiUBr. iii.29.3; **1Ci** within

(the place) नन्वत्रान्तरेण शुश्रुम ŚatBr.I.vi.4.11; ŚatBr.(K.) II. vi.2.8; समारोप्य वा अन्तरेण वा कृत्वाग्नीन् हरन्ति ĀgniveGS. iii. 5.3 (142.16); BaudhPiMe. i.4.7; **1Cii** inside स यद्यपि राजान्तरेण स्यान्नैव तमुपेयात् ŚatBr. II.iv.1.6; ŚatBr.(K.) I.iv.2.3; I.iv.2.7; **1D** without (vision) अन्तरेण मयाज्ञप्तश्चिरकारी ह्युदारधीः MahāBhā. xii. 258.50; **1E** after, at a later time, afterwards अन्यं मृगं आणापेहि यो एतस्या मृगीये अन्तरेण MaVastuAva. i.362.5; i.365.3; नापि सो पुण्यस्कन्धम् अन्तरेण शक्यं क्षपणाय MaVastuAva.ii.362.8; ममान्तरेण त्वं सत्पुरुष अनुत्तरां सम्यक्संबोधिमभिसंभोत्स्यसे LaliVi.5.0(9); मा भायथा(v.l. °थ) भिक्षव निर्वृते मयि भविष्यथ बुद्ध ममोत्तरेण (v.l. ममान्तरेण) SaddhaPuṇ.18.6 [DBHS.]; **1F** from left प्रदक्षिणक्रियायां तु देवागारस्य वैष्णवः। ... देवं चान्तरेण न लङ्घयेत् ParaS.29.61; (used as *prep.*) **2Ai** between (two points of space) (with Acc.) अन्तरेमे यातुधाना अन्तरेण किमीदिनः AV.(P.) i.65.2; अग्निः ... अवमो विष्णुः परमस्तदन्तरेण सर्वा अन्या देवताः AitBr. 1.1(6); 5.4(131); 29.3(736); अन्तरेण गार्हपत्याहवनीयौ होष्यन् संचरेत AitBr.32.11(833); ŚatBr.(K.) IV. i.3.19; यदसंनयन् पुरोडाशावन्तरेणोपांश्वाज्यस्य यजत्यजामिताया: KauṣīBr. 3.6(12.8); 3.7(12.17); एतद्ध वै मृत्योरास्यं यदेते पदे अन्तरेण KauṣīBr. 14. 2(62.9); 18. 9 (82.5); स यदेते देवते अन्तरेण। तथ्स्वर्ग सीव्यति TaiBr.III.x.11.7; देवासुरा ह संयत्ता आसँस्तानन्तरेण गोतमः शश्राम ṢaḍviBr. i.1.24; iii.1.4; अन्तरेणाहवनीयं च गार्हपत्यं च प्राङ् तिष्ठन्नप उपस्पृशति ŚatBr.I.i.1.1; ता नान्तरेण संचरेयुः ŚatBr. I.i.1.21; ŚatBr.(K.) II.i.1.14; वृत्रो ह वा इदं सर्वं वृत्वा शिश्ये। यदिदमन्तरेण द्यावापृथिवी ŚatBr. I.i.3.4; उद्धते प्रऽउग्ये फलके भवतः। तदन्तरेण तिष्ठन्त्सुब्रह्मण्यः प्राजति ŚatBr. III.iii.4.9; III.iv.4.15; III.v.1.21; III.v.2.18; (वपाम्) तामन्तरेण यूपं चाग्निं च हरन्ति ŚatBr. III.viii.2.20; III.viii.3.10; III.ix.3.3; IV.v.2.8; (अग्निः) अथ यदन्तरेण संचरति तदन्तरिक्षलोकात् ... खनति ŚatBr. VI. iii.1.37; अथान्तरेणोदचमसं निनयति ŚatBr.VII.ii.1.17 (Sāy. स्वात्मन इष्टकानां च मध्ये); VII.iii.1.1; VII.iii.1.27; VII.iv.2.38; या एतदन्तरेणेष्टका उपधीयन्ते सैवैकशततमी विधा ŚatBr.X.ii.6.11; XI.v.7.2; XI.vi.1.7; XI.vi.1.13; अग्निहोत्रं जुह्वतोऽन्तरेणाग्नी युक्तं वा वियायात् ŚatBr. XII.iv.1.2-4; उभे दिशावन्तरेण विदधाति ŚatBr. XIII.viii.1.5; यावती क्षुरस्य धारा यावद्वा मक्षिकायाः पत्रं तावानन्तरेणाकाशः ŚatBr. XIV.vi.3.2; BṛĀraU. iii.3.2; BṛĀraUBh. 399.2 (*on* iii.3.2); अन्तरेण स्तनौ वा भ्रुवौ वा निमृज्ज्यात् ŚatBr. XIV. ix. 4.5; BṛĀraU. vi.4.5; BṛĀraUBh. 800.9 (*on* vi.4.5); तस्माच्छिरश्चाँसौ चान्तरेणोपेनितमिव ŚatBr.(K.) IV.iii.2.15; य देतत्सोपेनितमिव भवति तस्मात्पिप्पलं च वृक्षं चान्तरेणोपेनितमिव ŚatBr. (K.)IV.vii.1.10; एनम् आहरन्ति। तमन्तरेणाग्नीन् निधाय... जुहोति JaimiBr.1.47; 1.51; तत् तच्छन्दन्नाद्या अन्तरेण नदीरसृजत एतस्य पाप्मनोऽनन्वागमाय JaimiBr.3.345; द्वौ वा इमौ लोकावद्धातमाविव दृश्येते य उ एते अन्तरेणाकाशः सोऽन्तरिक्षलोकः AitĀ.i.2.3(6); iii.1.2(5); यथासौ द्यावापृथिव्योरन्तरेणाकाशः ŚāṅkhāĀ. 7.4(27.5); 7. 13 (29.10); अन्तरेण तालुके। य एष स्तन इवावलम्बते। सैन्द्रयोनिः TaiĀ. vii. 6. 1 (729.12); TaiU.1.6; TaiUBh.204.10(*on* 1.6); आज्यभागावन्तरेणाहुतीः प्रतिपादयेत् MuṇḍaU. i.2.2; MuṇḍUBh. 314.17 (*on* i.2.2); ĀpaŚS. ii.18.8; BhārGS. 1. 4(4.12); HirGS. i.2.17; ĀgniveGS. i.1.1(4.17); JaimiGS. 1. 3(4.1); यदिदमन्तरेण एनदुपयन्ति पर्यास इवैष दिवस्पृथिव्योरिति ĀrṣeU.2.1; अन्तरेणाङ्गुष्ठमङ्गुलीश्च स्वयं द्वितीयमाददीत ĀśvaŚS. I. i. 7. 4; I. iv. 4. 2-3; I. iv. 13. 6; I. iv. 15. 11; तावन्तरेणेतरे दीक्षिताः ĀśvaŚS. I. v.2.5; अन्तरेण घृतयाज्ये दक्षिणे मार्जालीये पित्र्या (अन्वायातयेयुः) ĀśvaŚS. II.iii.2.17; आमन्त्रितो होतान्तरेणोत्करं प्रणीताश्च प्रतिपद्य दक्षिणेन प्रपदेन बर्हिराक्रमणम् ŚāṅkhāŚS. i.4.1; ii.8.2; पथिकृतेऽन्तरेण विहारं चक्रीवति वृत्ते नियतातिपत्तौ च ŚāṅkhāŚS. iii.4.2; v.13.2; यद्येनं राजा पिताचार्यो वान्तरेणाग्नीन्स्याच्छदिर्दर्शे नैनमाद्रियेत ĀpaŚS. vi.25.6; viii.2.15; यत्रापो देवयजनं चान्तरेण पन्था अभिविधावेत्तस्मिन् याजयेत् ĀpaŚS. x.20.11; बृहन्नसीति ते अन्तरेण ग्रावाणमुपांशुसवनं दक्षिणामुखं संस्पृष्टं पात्राभ्याम् ĀpaŚS. xii.1.9; xii.1.15; xii.13.9; समिध्यमानवतीं समिद्धवतीं चान्तरेण पृथुपाजवत्यौ धाय्ये दधाति ĀpaŚS. xix.18.3; विहारं च गां चोपसृष्टामन्तरेण मा संचारिषु इति संप्रेष्यति VārāŚS. I. ii.2.11; HirŚS.i.3.10(96.23); उत्तरमंसं स्वयमातृण्णा-या(?म)न्तरेण संचरेत् VārāŚS. II. i.7.14; अन्तरेणापराग्नी गत्वापरेणाहवनीयं प्राङ् तिष्ठन्नग्निमीक्षमाणोऽप उपस्पृश्य व्रतमुपैति KātyŚS. ii.1.11; आग्नीध्रः प्रथमोऽन्तरेण चात्वालोत्करावुदङतिक्रामति VaikhāŚS.10.13; क्रीते राजनि सुब्रह्मण्य उत्तरेण सोमवहनं गत्वान्तरेणेषे शमीशाखां पलाशशाखां वा सपलाशां पाणौ कृत्वावतिष्ठेत LāṭyāŚS.i.2.17; i.4.7; अन्तरेण सक्थ्णो शम्याद्दषदुपले यच्च नादेक्ष्यामः LāṭyāŚS. viii.8.29; DrāhyŚS. xiii. 4. 30; (प्रेतम्) दक्षिणा शिरसं निपात्य अन्तरेण गार्हपत्याहवनीयौ ... आहवनीये जुहोति KauṣīGS. v.1.7; v.3.5; v.8.3; स्विष्टकृदाज्यभागा अन्तरेणावापः KāṭhGS. iv.7.10; अग्निं स्विष्टकृतं चान्तरेण (यथोपदेशं देवताः) ĀpaGS.iii.7.25; दक्षिणेन हस्तेनान्तरेण जानुनी प्राङासीन आघारौ जुहोति MānGS. ii.2.13; इध्मादेवोद्धृत्य दक्षिणं परिधिमग्निं चान्तरेण उत्तरं परिधिं चाग्निं चान्तरेण प्रणीताप्रणयनेऽनूयाजार्थं चादधाति ĀgniveGS. i.6.1(36.9); अन्तरेण अग्न्याचार्यौ माणवकोऽञ्जलिकृतोऽभिमुख आचार्यमुदगग्रेषु दर्भेषु GobhiGS. ii.10.17; iii.7.10; अन्तरेण चात्वालोत्करौ यज्ञस्य तीर्थम् BaudhDS.i.7.15; नाग्निं ब्राह्मणं चान्तरेण व्यपेयात् VāsiDS.12.28; मामेव हि सदाकार्षीन्मन्त्रिणं मधुसूदनः। अन्तरेण सुभद्रां च त्वां च तात धनंजय MahāBhā. i. App.I. 114 (449); iv. 5.4; अन्तरेण सौमनसं विद्युत्प्रभं च देवकुरवः JaineVyā. 65. 21 (*on* i. 4. 3); अन्तरेण त्वां च मां च कमण्डलुः KāśiVṛ. *on* ii. 3.4; मृणालसूत्रामलमन्तरेण स्थितश्चलच्चामरयोर्द्वयं सः ŚiśuVa. 3.3; दृश्यं दृश्यं च निपुणं द्वयमन्तरेण निक्षिप्तया दृगदृशोः क्रियते विभागः SaṁkṣeŚā. 1.199 (i.157.23); अन्तरेण नीलं निषधं च विदेहाः ŚākaṭāVyā. i.3.100; अन्तरेण जलाध्वा स्याद् भद्रपार्श्वज(ला?शा)लयोः SamarāSū. 69.46; तत्तं निहन्तुमवनीं दिवमन्तरेण ... न हि संप्रति कश्चिदीशः DvyāśraKā.2.108; **2Aii** between (two verses or words) तत्र होतान्तरेणागुरेत AitBr. 9.4 (248); यदर्धर्चावन्तरेण तदिदमन्तरिक्षम् KauṣīBr. 11.1 (49.13); छन्दांस्यन्तरेण गर्ता इव KauṣīBr. 11.4(50. 14); GopBr. ii.3.11(197.17); व्याह्वयन्ते गायत्रीश्च जगतीश्चान्तरेण KauṣīBr. 17.9(78.8); 23.6(105.23); यान्येतदन्तरेण यजूँषि क्रियन्ते ŚatBr. X. ii.6.12; ऐळं च निधनवद्यान्तरेण स्वारं क्रियते JaimiBr. 1.307; अथावपनमेते अन्तरेणैन्द्रीनां दशतीनाम् ... यावतीरावपन्तेतावन्त्यूर्ध्वमायुषो वर्षाणि जीवन्ति AitĀ. I. v. 2. 7; iii.1.5. 2; त्रिष्टुभावन्तरेण ...वृद्धवत्यः प्रतिपदो भवन्ति ŚāṅkhāĀ.2.7(7.14); 7.12(29.5); अन्तरेण पर्वणी VājaPrāti. 1. 138; समिध्य-मानवतीं समिद्धवतीं चान्तरेण धाय्याः स्युः MīmāSū.v.3.4; ŚābaBh.1322.14 (*on* v.3.4); **2Aiii** between (two units of time) (with Acc.) यां च रात्रीमजायेऽहं यां च प्रेतास्मि तदुभयमन्तरेणेष्टापूर्तं मे लोकं सुकृतमायुः प्रजां वृञ्जीथा यदि ते द्रुह्येयमिति AitBr.39.1(937); न स्वाहाकृतीश्च वपां चान्तरेण वाचं विसृजेत KauṣīBr.10.5(47.20); 11.8(52.19); स सम्मार्ष्टि ... अथोपरिष्टात्तूष्णीं त्रिः ... तस्मादुपरिष्टात्तूष्णीं त्रिस्तद्यदेतदन्तरेण कर्म क्रियते ŚatBr. I. iv.4.15; तद्यदन्तरेणाहुती एतत्कर्म क्रियते ŚatBr.V. ii. 2. 18; V. iii. 3. 15; V. iv. 4. 24; X. iv. 1. 16; ŚatBr. (K.) II. iv. 2. 6; VI. ii. 3. 12; VII. ii. 3. 14; समिधमादधाति सा प्रायणीया ... सोदयनीयाथ या अन्तरेण सत्र्या एवास्य ताः ŚatBr.XI. iii.3.2; एतौ वैश्वानरौ यन्निदाघश्च शिशिरश्च। तद् यद् अन्तरेण वर्षा व्यवहिताश्शान्त्या एव JaimiBr. 1.313; 1.361; तस्मादेतावन्तरेणान्यो न दीक्षेत GopBr. i.4.2(94.2); i.4.5 (95.2); (उद्भिद्बलभिदौ) अर्द्धमास एनावन्तरेण स्यान्मासो वा संवत्सरो वा LāṭyāŚS.ix.4.11; x.14.12; अन्तरेण हविषी विष्णुमुपांश्वैतेरयिणः ĀśvaŚS. I. i. 3. 12; I. i. 5. 31; II. ii. 7. 10; तावन्तरेण व्यूळ्हो दशरात्रः ĀśvaŚS. II. v. 1. 6; विदूरेष्वपि कर्मस्वन्तरेण प्रथमां परिधानीयां च संतानार्थोऽर्धर्चेन काङ्क्षति ŚāṅkhāŚS. i.1.25; अन्तरेणाग्रयणोक्थ्यौ प्राकृतं सोममभिषुत्य ... महिमानौ गृह्णाति ĀpaŚS. 13. 20; प्रगृह्यं चर्चायामितिना पदेषु ... पदावृत्तौ चान्तरेण VājaPrāti.4.20; मार्गशीर्षे तैषं चान्तरेण दीर्घकालां यात्रां यायात् ArthŚā. iii.48.4(9.1); शीतोष्णयोर्वृष्टिशीतयोश्चान्तरेण साधारणौ वसन्तजलदात्ययौ AṣṭāSaṁ.i. 121.8(1.23); परशुं द्विधाभवनं चान्तरेण कर्तृव्यापारः ... उपलभ्यते BhāvanāVi. 164.2; संध्यांशयोरन्तरेण यः कालः शतसंख्ययोः। तमेवाहुर्युगं तज्ज्ञाः BhāgP.iii.11.20; **2Aiv** between (two persons etc.) (with Gen.) प्रेङ्खयोरन्तरेण न गच्छेत् BaudhDS.ii.3.35; SuśruS. iv. 24. 92; स्वामिभृत्ययोः। अन्तरेण न गन्तव्यम् CāṇaNīDa. 7. 5; न गच्छेत् ... दम्पत्योरन्तरेण BhāvPra. (Bhā.) 5. 268; **2B** within (with Acc.) ते हि इदमन्तरेण सर्वं हविर्यदिदं किंच AitBr. 5.30(124); तदिमेऽएवान्तरेण सर्वे कामाः ŚatBr. II. iii.4.16; ŚatBr.(K.) I. iv.1.13; अन्तरेण वै योनिं गर्भः संचरति ŚatBr. III.i.3.28; VII.iv.2.22; VIII.ii.1.9; एतदन्तरेण प्राणः संचरति ŚatBr.X.iv.1.17; **2C** inside, in the middle (with Acc.) अन्तरेण परिश्रितः प्राचीम् ... कृषति ŚatBr.VII.ii.2.9; VII.iii.1.20-23; अन्तरेण परिश्रितः प्राञ्चं नयन्ति ŚatBr. VII.iii.2.11; VIII.v.1.13; IX.i.2.25; शतं शतं रथाह्वान्यन्तरेण तानि येऽविद्वाँस उपयन्ति ŚatBr. XII.ii.3.12; XII.v.1.17; XII.v.2.2; (सोमम्) तन्नान्तरेण संचरेत् ŚatBr.(K.) IV.iii. 4. 21; तद् यद् उक्थान्यन्तरेण भवन्ति JaimiBr. 2.7; एकस्मिन्नुपरि तपत्युषर्बुधेऽहर्नाथेऽन्यानथ चतुरः स्थितोऽन्तरेण Surath.12.39; (with Gen.) अथ यत् संनयन्त्सांनाय्यस्यान्तरेणोपांश्वाज्यस्य यजति तस्योक्तं ब्राह्मणम् KauṣīBr. 3.6(12.9); (निबोधत) सीतान्तस्याचलेन्द्रस्य कुमुदस्यान्तरेण च द्रोण्याम् ... रम्यां तत्र सुरोचनीम् VarāP.79.1; **2D** in, among (with Acc.) (सूक्तानि) तान्यन्तरेणावापम् (क्षेपकसूक्तम्) आवपेरन् GopBr. ii.6.1(244.6); (वधूम्) अथैनामन्तरेण भ्रूमुखे दर्भेण संमार्ष्टि BaudhGS. i.1.26; अवशिष्टानि (पात्राणि) अन्तरेण सक्थिनी

मङ्गणभूमिमार्जनकृतामन्तर्गतोऽहं कियान् AlaṅkāMañ. 103. 8; (used as noun) (one) who is incorporated प्रमादादन्तर्गतस्य वधेऽपि न शुद्धिः BālamBha. iii. 139. 10 (*on* 3. 248); **1F** counted or enumerated in चन्दनपुरिचतुराशित्या(रशीत्य)न्तर्गतपिप्पलालं नाम ग्राम[:*] EI. xxv. 30. 13; सीहरखी द्वादशान्तरगत गोवट्टणाभिधानो ग्रामः EI. iii. 56. 40; वटनगरिकाख्यचतुरशीत्यन्तर्गतलीलाग्रामी EI. x. 87. 41; बेलुवोलत्रिशतान्तर्गतहिरियहंदिगोलनामग्रामः EI. iii. 219. 16; vi. 97. 42; **1G** constituting, i.e. forming a part of (the year) एवमयम् (ग्रामः) ... नन्दनसंवत्सरान्तर्गतपुष्यमास उत्तरायणमहापर्व्वणि ... प्रतिपादितः EI. xviii. 250. 68; मया ... प्रवर्त्तमानखरसंवत्सरान्तर्गतज्येष्ठशुद्धदशम्याम् ... ब्राह्मणेभ्यः (Read ब्राह्मणेभ्यः) षट्छतान्यग्रहाराणाम् ... दत्वा EI. vii. 40. 45; शार्व्वरिसं[वत्सरा]न्तर्गतवैशाखवहुलपञ्चन्याम् (Read बहुलपञ्चम्याम्) ... ना[ग]पुरन[न्दि]वर्द्धनान्तर्गततालपु[रू]षकनामा ग्रामः ... दत्तः EI. v. 195. 48; सिद्धार्थसंवत्सरान्तर्गतचैत्रमासमदनत्रयोदश्याम् ... गङ्गधारायां विनिर्मापितमिदं काव्यम् YaśasCam. ii. 419. 11; EI. iv. 285. 57; प्रवर्तमानकीलकसंवत्सरान्तर्गतज्ये(ज्यै)ष्ठपौर्ण्णमास्याम् ... एतद्ग्रामत्रयादिकम् ... समदात् EI. iii. 300. 42; रक्ताक्षिसंवन्सरान्तर्ग[त]वैशाखपौर्ण्णमास्याम् ... माडदूरुनामग्रामः ... दत्तः EI. xii. 313. 65; क्षयसंवत्सरान्तर्गतकार्त्तिकसु(शु)द्धपञ्चदस्या(श्या)म् ... महाब्राह्मणाय आमदेवैयाय ... वोडनिभट्ट(ट्ट)क्षेत्रम् ... प्रतिपादितम् EI. xii. 263. 33; xxv. 60. 56; सिद्धार्थसंवत्सरांतर्गतज्येष्ठपौर्णमास्यां स(श)निदिने ... विङ्गमहास्थानसर्वनमस्यसा(शा)सनं खंभराजेन दत्तं(त्तम्) EI. xxii. 190. 2; सकनृपकालातीतसंवत्सरान्तर्गतदशशतय(त्र)अष्टत्यधिके EI. iii. 305. 1; श्रीगण्डरादित्यदेवः ... पराभवसंवत्सरान्तर्गताषाढशुक्लचतुर्थ्याम् ... एतत्सर्व्वम् ... दत्तवान् EI. xxiii. 31. 29; iii. 215. 3; [वृ]षस[म्व]स[त्स]रांतर्गतपुष्ये मासि ... जीर्नोधारो (Read जीर्णोद्धारः) कारित(तः) EI. xxiii. 276. 1; वर्त्तमानविरोधकृत्संवत्सरान्तर्गतज्येष्ठामावास्यायाम् ... बेलुवोलत्रिशतान्तर्गतहिरियहंदिगोलनामग्रामः ... दत्तः EI. iii. 219. 14; वर्त्तमानपरिधाविसंवत्सरान्तर्गतमार्ग्गशीर्षपौर्णमास्याम् EI. vi. 97. 44; श्रीरामचन्द्रदेवः ... साधारणसंवत्सरांतर्गतभाद्रपदशुक्लैकादश्याम् ... चतुरो ग्रामान् ... महामंडलीक(Read माहामण्डलिक) पुरुषैनायकाय ... प्रादात् EI. xxv. 211. 34; **1H** coming under (the jurisdiction or territory of) श्रीमहाराजव्याघ्रसेनः सर्व्वानवे(Read सर्वानेवे)क्षरक्याहारान्तर्गतपुरोहितपल्लिकाप्रतिवासिनो (Read°वासिन)स्समाज्ञापयति EI. xi. 221. 8; अस्माभिरन्तर्न्नर्मदाविषयान्तर्गतशोणव्याग्रामः ... प्रतिपादितः EI. x. 74. 4; ix. 298. 18; xi. 180. 25; vi. 298. 19; v. 39. 10; viii. 232. 16; xii. 202. 14; xxii. 185. 42; xxii. 108. 48; viii. 187. 38; iii. 109. 54; vi. 245. 45; vi. 31. 38; ix. 32. 50; ix. 36. 49; vii. 40. 50; v. 196. 53; iv. 286. 62; xxiii. 31. 29; xxv. 60. 65; xxiii. 274. 9; iii. 216. 15; एतान्ग्रामान् ... सीमान्तग्गतैव्वस्तुभिः (Read सीमान्तर्गतैर्वस्तुभिः) सहितान् ... भुञ्जानाम् ... न केनचि[त्का]चिद्बाधा कत्तव्या (Read कर्तव्या) EI. iv. 169. 118; xvi. 14. 27; xx. 131. 20; iii. 215. 6; xvi. 276. 14; xvi. 275. 14; xxv. 211. 34; **2A** entered in, i.e. controlled अपामापोऽग्निरग्नौ वा व्योम्नि व्योम न लक्षयेत्। एवमन्तर्गतं यस्य मनः स परिमुच्यते MaiU. 6. 34; अन्तर्गतैरचपलैर्वशस्थायिभिरिन्द्रियैः। अविक्षिप्तेन मनसा चङ्क्रम्यस्वास्व वा निशि Saund. 14. 25; चित्तमन्तर्गतं शुद्धं वदनं सत्यभाषणैः KumāPraPra. 61. 8; **2B** turned inwards अभ्यस्तेऽपि नितम्बभारफलके खेदालसेयं गतिः किंचित् संवलितार्धपक्ष्मविरलालोका दृशोऽन्तर्गताः SūktiMu. 39. 6; Subhāṣi. 1102; Prasā. i. 603. 9; **3A** existing in (the body or part of the body) स तथान्तर्गतेनैव शूलेन व्यचरन्मुनिः MahāBhā. i. 101. 21; ततः स नृपतिर्विद्वान् रक्षन्नात्मानमात्मना। बलवत् पीड्यमानोऽपि रक्षसान्तर्गतेन ह। ददर्श MahāBhā. i. 166. 19; चुक्रोधेन्द्राय पवनः ...। प्रचारं स तु संगृह्य प्रजास्वन्तर्गतः प्रभुः। गुहां प्रविष्टः Rāmā. vii. 35. 49; तत्रावजिते पित्तेऽपि शरीरान्तर्गताः पित्तविकाराः प्रशान्तिमापद्यन्ते CaraS. i. 20. 16; मध्ये नार्यामन्तर्गतायाम् (वामम्) ... पुरुषेऽन्तर्गते (दक्षिणं) वृत्तमुन्नतम् ... उदरं भवति BhelaS. 4. 5 (87. 8); स्याद् रक्षणीयं यदि मे न तेजस्त्वदीयमन्तर्गतमन्तरायः RaghuVa. 14. 65; यानीह शुषिराणि स्युर्देहेष्वन्तर्गतानि वै। वायोः संचरणार्थानि भीमा सा प्रोच्यते तनुः BrahmāṇḍP. i. 10. 71; दृश्यतां च तावच्छरीरयन्त्रम् ... रक्तस्य तिरस्कारोऽन्तर्गताः प्रभञ्जनाः AvantiKa. 40. 20; अन्तर्गता न दोषाय बहिःस्था दोषहेतवः ... मलाः ParaS. 12. 30; अन्तर्गतोऽर्थो रजसा तनीयान्। गुणेन कालानुगतेन विद्धः सूष्यंस्तदाभिद्यत नाभिदेशात् BhāgP. iii. 8. 13; प्राणस्य ... भोक्तृत्वं नोपपद्यते। देहस्यान्तर्गतः प्राणः स्थूणावद्देहभृत्सदा BṛĀraUBhVā. ii. 1. 158; शरीरान्तर्गताः सर्वे रोगा विनश्यन्ति ŚāṇḍU. 411. 1 (1. 14); AdbhuSāg. 547.10; पथि ... वार्यलभमानस्य स्वेदोऽन्तर्गतो नेत्रावरोधी भवति Hastyāyur. 146. 11 (1.18); देयो बस्तिः समन्वितः। ... पाकलेषु बहिर्दाहे दाहे चान्तर्गते तथा Hastyāyur. 604. 8 (4. 5); पुंसां पेश्यः पुरस्ताद्याः प्रोक्ता मेहनमुष्कजाः। स्त्रीणामावृत्य तिष्ठन्ति फलमन्तर्गतं हि ताः BhāvPra. (Bhā.) 3.148; **3B** present within निवर्तते तथा तर्षः पापमन्तं गतं (v.l. अन्तर्गतं) यथा MahāBhā. xii. 197. 6; कर्मणा मनसा वाचा विष्णुमेव यजन्ति ते। अन्तर्गतः स भगवान् सर्वसत्त्वशरीरगः। ... नारायण इति श्रुतः MahāBhā. xii. 333. 25; अभ्यन्तरगताय (v.l. अन्तर्गताय) देवाय स्वमनुष्ठेयमकालक्षेपार्हं निवेदयामि Śāk. 5. 1(1); अस्यान्तर्गतमायत्तं स्वरव्यञ्जनसंमितम्। तदशेषं मया दत्तम् MārkP. 23. 55; सप्ताक्षरं महामन्त्रं विष्णुं नारायणं प्रभुम्। सर्वे मन्त्रास्तदन्तस्थास्तेषामन्तर्गतश्च सः JayāS. 11. 35; सच्च मूर्तं त्यच्च अमूर्तम् अभवत्। मूर्तामूर्ते ह्यव्याकृतनामरूपे आत्मस्थे अन्तर्गतेन आत्मना व्याक्रियेते TaiUBh. 261. 10 (*on* 2. 6); देहस्त्रीपुत्रमित्रानुचरहयवृषाः ...। एते जीवन्ति येन व्यवहृतिपटवो येन सौभाग्यभाजस्तं प्राणाधीशमन्तर्गतममृतममुं नैव मीमांसयन्ति ŚatŚlo. 5; सूत्रमन्तर्गतं येषाम् ... ते च यज्ञोपवीतिनः NāraPaU. 3. 81; BrahmaU. 168. 9; परमात्मस्वरूपो हंसः। अन्तर्बहिश्चरति हंसः। अन्तर्गतोऽनवकाशान्तर्गतसुपर्णस्वरूपो हंसः PāśBraU. 1 (523.15); अनाहतस्य शब्दस्य तस्य शब्दस्य यो ध्वनिः। ध्वनेरन्तर्गतं ज्योतिर्ज्योतिषोऽन्तर्गतं मनः MaṇḍBrU. 5. 1 (352. 9); YogŚiU[1]. 6. 21; चतुर्थी (मूर्तिः) ... निष्कला सकला सा तु ...। अन्तर्गता च लोकानां न च कर्मफलं गता BhaviP. 230A. 20 (i. 154. 21); तं वासुदेवं शरणं प्रपद्ये। अन्तर्गतो लोकमयः सदैव भवत्यसौ स्थावरजङ्गमानाम् PadmP. ii. 98. 58; शुक्तावन्तर्गतस्य तेजोंऽशस्य ... रजतावयवत्वमुपपन्नम् ŚrutaPra. iB. 32. 28 (*on* i. 1. 1); आकाशवत् त्वं सर्वत्र बहिरन्तर्गतोऽमलः AdhyāRā. i. 5. 56; कर्मैव स्वमार्गेण जीवं बुद्ध्यादिलिङ्गशरीरबन्धं नयति ... अतः कर्मणा जगत्युत्पद्यमाने किमन्तर्गतेनेश्वरेण ŚaṅkaVi. (Ā.) 31. 12; यश्चेशिता ... अन्तर्गतो नाधिगतो विकारैः। ... वैराजसंज्ञः पुरुषो बभूव BṛBrahmaS. i. 1. 11; अन्तर्गतस्तथा त्वं च प्राकृतैर्नावलोक्यसे BṛBrahmaS. iii. 6. 36; शोणस्य नारिकेलस्य बालस्यान्तर्गतं जलम् BhojanKu. 121. 13; **3C** present in the mind or heart अन्तर्गतमभिप्रायं न ... इच्छसि। विवक्तुम् MahāBhā. xii. 125. 16; अन्तर्जात(v.l. °र्गत)मपि व्यक्तमाख्याति हृदयं हृदा Rāmā. i. 76.16; बलाद्धि विवृणोत्येव भावमन्तर्गतं नृणाम् Rāmā. vi. 11. 55; vi. 103. 1; स तपस्विमध्ये ... मनीषिमुख्यः। ... स्वं भावमन्तर्गतमाचचक्षे BuddhaC. 7. 44; एकं सुतं बालमनर्हदुःखं संतापमन्तर्गतमुद्वहन्तम्। तं राहुलं मोक्षय बन्धुशोकात् BuddhaC. 9. 28; वागङ्गमुखरागेण सत्त्वेनाभिनयेन च। कवेरन्तर्गतं भावं भावयन्भाव उच्यते NāṭyaŚā. 7. 3; तव वदनजनितकौतूहलेन स्मितेन निवेदित इवान्तर्गतो भावः Avimā. 1. 1 (4); न केवलं दरीसंस्थं भास्वतां दर्शनेन वः। अन्तर्गतमपास्तं मे रजसोऽपि परं तमः KumāSaṁ. 6. 60; अन्तर्गतं प्राणभृतां हि वेद सर्वं भवान्भावम् RaghuVā. 2. 43; त्वयात्मना। बाह्यान्तर्गतमालोच्यमालोच्यापररात्रिषु MārkP. 44. 23; भूपतिः ... तूष्णीमेवाभवत्। ... केवलं स्नेहगर्भेण दृष्टिपातमात्रेणान्तर्गतां प्रीतिमकथयत् HarṣaC. 124. 10; 156. 4; (हर्षः) अन्तर्गतेन शोकशिखिनाङ्गारतामिव नीयमानम् ... कुरङ्कम् ... अद्राक्षीत् HarṣaC. 212. 1; दृतिस्तरति यज्जलमेष नूनमन्तर्गतस्य मरुतः स किलानुभावः KalyāMaSt. 10; निजो रिपुः। दहत्यन्तर्गतश्चैव शुष्कं वृक्षमिवानलः NītiSā. 8. 65; Hitopa. 3. 57; भावमन्तर्गतं व्यक्तं सुप्तो मत्तश्च भाषते NītiSā. 13. 16; अनाविष्कुर्वन्नन्तर्गतां चेतोवृत्तिं लोकस्याप्रख्यापयन् BrahmSūBh. (Bhā.) 216. 16 (*on* iii. 4. 48); अन्तर्गतस्य कथयन् प्रमदस्य भासमास्यैरवोचदिति विस्फुरताधरैस्तम् RāmC. 36. 72; व्यञ्जनस्य योऽन्तर्गतः स्पर्शः स स्पर्शविशेषः JayaMa. 14. 7 (*on* 1. 2); प्रविष्टस्यान्तर्गतां चित्तवृत्तिम् ... प्रथयितुं प्रसादगानम् AbhinBhā. i. 270. 12 (*on* 6. 29); त्वमेव देव जानीषे भावमन्तर्गतं नृणाम् BrahmP. 109.51; ऋतुजेन च दग्धाहं वह्निनान्तर्गतेन ह GaṇeP. ii. 73. 59; मधुरिमरुचिरं वचः खलानाम् ... कथयति मोहहेतुमन्तर्गतमिव हालाहलं विषं तदेव KāvyPra. 695. 3; यद्यपि श्रियमाधत्ते भूषणानादरस्तव। तथाप्यन्तर्गतं मन्युमयं कथयतीव मे CaṇḍaKau. 1. 20; मा ते व्याहत विघ्नोऽत्रेत्युक्त्वा चित्रकृति स्थिते। रागमन्तर्गतं राज्ञो रोमोद्गम उदायत DvyāśraKā. 9. 121; महदादीनि तत्त्वानि ... संगृह्य। अंशैरुत्पादयामासुर्विराजं भुवनात्मकम्। तस्य चान्तर्गतं छिद्रं पञ्चाशत्कोटिविस्तृतम् SātvaT. 1. 32; प्रकृतज्ञानिनामन्तर्गतावाग्विषयः। मनसि लीयते न वेति संदेहः TattvPrakā. 206B. 5 (*on* iv. 2.1); अन्तर्गतं महद्वर्चो वरणीयं यतात्मभिः MahNirvāT. 9. 219; आकारैः ... अभ्युत्सहे बन्धुजनावलोकादन्तर्गतं शोकतमो निहन्तुम् Nalābhyu. 8. 39; क्षमाम् ... बाह्यमेव वहत्यसौ ... न चान्तर्गताम् HammīMaKā. 1. 98; अन्तर्गतस्य दहतो महतः स्मराग्नेर्दग्धस्य संक्षयवशादिव भस्मशेषम् Subhāṣi. 1084; सान्तर्गता दहति मां तरलायताक्षी Subhāṣi. 1294; खेदाग्निं विघटयितुमन्तर्गतमसौ लेभे ... यामुनतटीम् HaṁsDū. (Rū.) 3; KalpaK. 102. 117; चित्रमिदं नैपुण्यं दृग्भ्यामन्तर्गतं विजानाति ŚṛṅgāMañ. (A.) 10. 16; भगवति, तव न किंचित् प्राणिनामन्तर्गतमविदितमस्ति Jīvān. 28. 5; (जानामि–इत्यन्तःसंरम्भयोगोऽपि भाति) स च संरम्भः जानामीत्यन्तर्गतस्तिङ्वाच्यः स्पन्दः Bhāsk. i. 74. 9 (*on* i. 1. 4); (used as noun) (that) which is present in the mind or heart तेषामन्तर्गतं ज्ञात्वा देवानां स पितामहः कृत्या नार्योऽसृजत् MahāBhā. xiii. 40. 7; कर्तव्यस्य च पारम्यं प्रकृतस्य महामते। स्फुरत्यन्तर्गतं येषां मन्त्राराधनपूर्वकम् PauṣkS. 27. 53; देवोऽपि विष्णुस्त्रैकाल्यदर्शनसामर्थ्यात्

तस्यान्तर्गतं मत्वा स्वयमेव तत्सकाशमगमत् Tantrākhyā. 38. 18; PañcT. 1. 127 (52) (138. 1); तदहं प्रज्ञया तस्यान्तर्गतमाकर्षयामि PañcT. 4. 13 (5) (381.8); द्वाभ्यामन्तर्गतं पृष्टम् PadmP. ii. 14. 13; बालेऽवदत्तान् ... जानन्नन्तर्गतं तेषाम् GaṇeP. ii. 22. 19; त्वं चैत्र मित्रं यदि मन्मथस्य ... ज्ञातं तवान्तर्गतम् VikraDeC. 7. 56; को लोकस्य सखि स्वभावकुटिलस्यान्तर्गतं ज्ञास्यति SubhāRaK. 25. 12; SūktiMu. 48. 6; Subhāṣi. 1438; सा हि ... विलुम्पन्ती त्रय्यन्तवादवारवाणमवधूयान्तर्गतं प्रकाशयेत् ŚatDū. 184. 11; सत्यमिदमन्तर्गतमुद्गीर्णं भवता ŚatDū. 240. 20; **3Di** being inside, internal, inner विस्रब्धं प्रवदाम्यहम्। दुःखमन्तर्गतं यन्मे मनो दहति Rāmā. iv. 8.27; आकारैरिङ्गितैर्गत्या चेष्टया भाषितेन च। नेत्रवक्त्रविकारैश्च गृह्यतेऽन्तर्गतं मनः ManuSm. 8.26; ViṣṇuDhaP. ii. 65.37; Pañcā. 7.17; SūktiRa. 123.29; VetāPañ. (Śi.) 8.31; Subhāṣi. 2803; MādhavāĀ. 186; अन्तर्वणम् ... अन्तर्गतं वनम् ... इति विग्रहः JaineVyā. 412.27 (*on* v. 4.89); चित्तमन्तर्गतं दुष्टं तीर्थस्नानैर्न शुद्ध्यति JābālaDaU. 4.54; अहो धनुषि नैपुण्यं मन्मथस्य महात्मनः। शरीरमक्षतं कृत्वा भिनत्त्यन्तर्गतं मनः SubhāRaK. 13.8; VetāPañ. (Śi.) 27.14; इदं व्योमसरोमध्ये भाति चन्द्रसितोत्पलम्। मलिनोऽन्तर्गतो यत्र कलङ्को भ्रमरायते Subhāṣi. 1997; **3Dii** belonging to the inner soul तेषामन्तर्गतापीच्छा तद्वाक्यार्थविचारिभिः। ज्ञायते TantrVā. 718.15 (*on* iii.1.13); **3Ei** situated inside तद्यानियतमानेन समानं स्यात् परस्परम्। अन्तर्गतं हि वृत्तस्य PauṣkS. 7. 38; प्रभुः ...। सर्वदान्तर्गतस्यैव कुम्भस्य च यथोदकम्। तथा सर्वस्य जगतो बहिरन्तर्व्यवस्थितः JayāS. 4.87; अन्तर्गतैर्विप्र कलशैः स्नापयेत्क्रमात् PāraS. 14. 100; मनोयन्त्रस्य चलने कारणं वेदनं विदुः। प्रणालीदारुमेषस्य रज्जुरन्तर्गता यथा YogVā. ii. 19. 27; (मूलधाम्नः) दण्डेऽर्धेऽन्तर्गतं मण्डलम् (अष्टमूर्तीनां स्थानं स्यात्) TantrSa. 2. 73; **3Eii** being or remaining inside चित्रग्रीवोऽपि विवरद्वार्यवस्थित एवमाह। भद्र हिरण्य। इतस्तावदिति। तच्च श्रुत्वान्तर्गत एव हिरण्योऽब्रवीत्। को भवानिति Tantrākhyā. 55. 24; Pañcā. 128. 27; हिरण्योऽन्तर्गत एवापश्यत् Tantrākhyā. 57. 19; **3F** (used as noun) (that) which lies inside निष्कर्षो निष्कोषणम्। तद्यान्तर्गतस्य बहिर्निःसारणम् SiddhāKau. 369A. 11 (*on* vii. 2. 2); **4A** forgotten तमुवाचाथ राजर्षिर्द्विजं मित्रसहस्तदा। ... अन्तर्गतं तु तद्राज्ञस्तदा ब्राह्मणभाषितम्। ... ततोऽर्धरात्रे ... संस्मृत्य ब्राह्मणस्य प्रतिश्रुतम् MahāBhā. i. 166. 23 [AmaK. 2197; AnekāSa. 496; AnekāSaṁ. 4. 96; AbhidhāCin. 1495; Vaija. 210. 109; ViśvaPra. 70. 178; DharK. 1012; AnekāK. 360; NānārthSaṁ. 5. 46; NānārthāSaṁ. iii. 23. 11; MediK. 71. 79; ŚabdaRa. (Vā.) 3344; ViśvaLoK. 151. 193; ŚabdaRa. (Su.) 6. 79; KośaKaTa. 2. 544; 2. 5619; KalpaK. 220. 146; ŚabdaRaSaK. 159. 8]; **4B** disappeared रुद्राहिं पन्नगः प्राह ...। मूर्खोऽयं भूपतिर्यो वै तैलोष्णं यत्र दत्तवान्। इत्युक्त्वान्तर्गतो देहे BhaviP. 471B. 35 (iii (3). 7. 12); अहं लोकपितामहः। अन्तर्गतो मुनीन्द्राणां मानसानां प्रपश्यताम् ŚivaP. ii (2). 3. 77 (71A. 2); अयि सुन्दरि। ... अन्तर्गतो गोपालस्त्वया दृष्टः GopāKeCan. 133. 16; हा वैदेहि प्रेक्षणीयत्वमिन्दोः ... हृत्वा देवि क्व त्वमन्तर्गतासि Ragh. 10. 33; **4C** hidden, obscured अन्तर्गतैर्गुणैः किं द्वित्रा अपि यत्र साक्षिणो विरलाः। स गुणो गीतेर्यदसौ वनेचरं हरिणमपि हरति ĀryāSaŚa. 17; कस्यचित् कवचं स्रस्तं व्यस्तायां च शरैस्त्वचि। शौर्यमन्तर्गतं व्यक्तमासीदत्रस्यतस्ततः Surath. 10. 68; दिगीशाः। ... अद्राक्षुरपि तत्र ते ... पयस्तरङ्गपरिपूरितैरन्तर्गतैर्गिरिभिरभिशोभितम् ... दुग्धोदं नाम रत्नाकरम् NīlaVi. 48. 14; **5A** immersed in सागरान्तर्गताः केचित् Rāmā. vi. App. I. 67 (5); सः ...। विबुद्धः सलिले तस्मिन् विज्ञायान्तर्गतां महीम् MārkP. 47. 6; ततस्तु सलिले तस्मिन् विज्ञायान्तर्गते महत्। अनुमानादसंमूढो भूमेरुद्धरणं प्रति BrahmāṇḍP. i. 5. 8; i. 7. 5; विशुद्धसलिले तस्मिन्विज्ञायान्तर्गतं जगत् VāmaP. 43.31; (used as noun) (that) which is immersed in पार्थिवानि च भूतानि सागरान्तर्गतानि च Rāmā. v. 4* (9); **5B** entered in, i.e. reflected on दुर्ग्राह्यं हृदयं यथैव वदनं यद्दर्पणान्तर्गतम् ŚatTrayī. 259; आलोको ह्यगाधस्वच्छजलेनाप्रतिघातात् तदन्तर्गतान् पदार्थान् स्वयमन्तर्गतः प्रकाशयति ŚrutaPra. ii. 430. 13 (*on* iii. 2. 6); आघोषानुमितत्वदागममहाहर्षोल्लसद्देवकीवक्षोजप्रगलत्पयोरसमिषात् त्वत्कीर्तिरन्तर्गता Nāräy. x. 74. 7; अन्तर्गताहिरिपुरत्नरुचिच्छटानामभ्युद्गमेन परितो हरितोर्मिजालः। आश्चर्यमर्पयति चेतसि दृश्यमानः संजातबालतृणराजिरिवाम्बुराशिः RāmC. 25. 71; **5Ci** who has gone inside or entered एते च ... निद्रालसाधोरणाः काम्बोजाश्च करेणवश्च कथयन्त्यन्तर्गतान् स्वामिनः PādaTā. 13.6; एतस्मिन्नन्तरे प्रायाद् व्याधो विगतकल्मषः। मूर्धानं व्रणसंयुक्तं सरक्तं लिङ्गमस्तके। शंकरस्यादिकेशस्य ददृशेऽन्तर्गतस्तदा BrahmP. 169. 40; नान्तर्गता च वनिता न बहिर्गता च BhikṣāKā. 20. 11; **5Cii** which has gone inside यश्चान्तर्गतामपरिमितरिपुशस्त्रशल्यशङ्कुकीलितामिव निश्चलामुवाह राजलक्ष्मीम् HarṣaC. 175. 3; सर्वादृष्टिश्च संदिग्धा स्वादृष्टिर्व्यभिचारिणी। खलबिलान्तर्गतस्य बीजस्यासत्त्वदर्शनात् TarkBhā. (Mo.) 26. 15; अन्तर्लोम इति। अन्तरीपमित्यादि। अन्तर्गता आपोऽस्मिन् Prasā. i. 646. 8; अन्तरीपमित्यादेरन्तर्गताः प्रतिकूलाः संगताश्चापोऽस्मिन्निति विग्रहः LaŚabdeŚe. ii. 156. 4; **5D** placed or kept in भूतान्यालोक आकाशे परिच्छिन्नानि सर्वशः। पात्रे महति पात्राणि यथैवान्तर्गतानि तु BrahmāṇḍP. i. 19. 186; **6A** being in the middle or in between प्रकाशस्तु भवेत्सूर्य आह्लादस्सोम उच्यते। द्वयोरन्तर्गता संवित्ताभ्यामस्तोदयावपि JayāS. 6. 225; तेषामन्तर्गतौ ज्ञेयौ द्वौ वर्गाविन्द्रियात्मकौ JayāS. 16. 234; भ्रुवोरन्तर्गतां दृष्टिं विधाय सुदृढां सुधीः ŚivS. 4. 51; पुरस्यान्तर्गतौ कार्यौ घण्टामार्गौ तथापरौ SamarāSū. 10. 14; **6B** fixed in between कपालकुहरे जिह्वा प्रविष्टा विपरीतगा। भ्रुवोरन्तर्गता दृष्टिर्मुद्रा भवति खेचरी DhyānBiU. 80; YogŚiU. 5. 40; शृणुयाद्दक्षिणे कर्णे नादमन्तर्गतं सदा NādaBiU. 31; उभयोर्गवाक्षयोरन्तर्गतः प्रेक्षक इव ... एकोऽनुमीयते SyādvāMañ. 17 (106); **7** (Astrol.) being in the intermediate period (Antardaśā with respect to the Mahādaśā of a planet) विदेशवनसंचारो भानोरन्तर्गते रवौ JātaPā. 18. 62; **8A** turned inwards (in a dance position) उरुः पञ्चधा तत्र ...। वलितोऽन्तर्गते जानुन्यूरुः स्वैरगतौ स्त्रियाः SaṁgīRa. iv. 127. 5 (7. 358); **8B** (used as noun) one of the eight types of gestures or positions of heel उत्क्षिप्ता ... अन्तर्गता तथा। ... अष्टधा पादचारीस्थानेषु दृश्यते SaṁgīRa. iv. 178.1 (7. 517); Nṛtyā. 585; NṛtyaRaK. i. 3. 15 [Kośas give *antargata* as the synonym of the following words: *prasmṛta*, ŚabdaRa. (Vā.) 3344; *madhyaprāpta*, AnekāSa. 496; DharK. 1012; AnekāK. 360; also they give *antargata* in the sense of the following words: *antaḥpraviṣṭa*, NānārthāSaṁ. iii. 23. 11; *prāpta*, NānārthSaṁ. 5.46; ViśvaLok. 151. 193; *madhyaprāpta*, AnekāSaṁ. 4. 96; ViśvaPra. 70.178; MediK. 71. 179; ŚabdaRaSaK. 159.8; *madhyāpta*, KośaKaTa. 2.5619; *vismṛta*, NānārthāSaṁ. iii. 23. 11; and ŚabdaRa. (Su.) 6.79 gives *antargata* as the meaning of *prasmṛta* and *vismṛta*]

अन्तर्गतकामाग्निधूम (antargatakāmāgni-dhūma) *m.* smoke of fire of love present in the mind मलयवती। ... अथान्तर्गतकामाग्निधूमेनेवाविलेक्षणा। अश्रुधारां प्रमुञ्चन्ती संतापक्वथिताङ्गका KathāSaSāg. xii. 23.61.

अन्तर्गतगाढवैराग्य (antargata-gāḍhavairāgya) *n.* intense detachment or indifference (to worldly matters) present in the mind वक्तुर्बोधिसत्त्वस्यान्तर्गतगाढवैराग्यवासनाधिवासितचेतसः AuciViCa. 18 (25) (133. 1)

अन्तर्गतगुणत्व (antargataguṇa-tva) *n.* the state of being an inner or internal quality हतच्छायमित्यादीनामन्तर्गतगुणत्वेन क्रियाविशेषणत्वात् ... क्रियागुणयोगनिमित्तेयं विशेषत उत्तरा नाम दृष्टान्तोक्तिः साम्यभेदः SaraKaṇṭhā. 435.1.

अन्तर्गतगुरुशोक (antargata-guruśoka) *m.* excessive sorrow present in the mind or heart भूपालस्तामवादीत्। देवि किमर्थमन्तर्गतगुरुशोकभारमन्थरमशब्दं रुद्यते Kād. 60. 7.

अन्तर्गतगृह (antargata-gṛha) *n.* chamber which is inside, i.e. inner apartment तत्रान्तर्गतगृहे ... सर्वं परीक्षितमदनीयमन्नाद्यमद्यात् ManuBh. ii. 67.3 (*on* 7. 217)

अन्तर्गतचराचर (antargata-carācara) *adj.* consisting of movable and immovable, i.e. animate and inanimate (objects) within अन्तर्गतचराचरजगज्ज्ञालदर्शनमुद्दीपनम् RasGaṅ. 52.5.

अन्तर्गतचेतन (antargata-cetana) *adj.* having inner awareness or consciousness स राजा सस्मार मामन्तर्गतमानसः (v.l. ॰चेतनः)। तद्याहं चिन्तितं ज्ञात्वा गतवांस्तस्य दर्शनम् MahāBhā. xii. 31. 39.

अन्तर्गतजलच्छाया (antargata-jalacchāyā) *(f.)* whose shadow reflected on the water वैदेह्याः क्वापि गच्छन्त्या दीर्घिकातीरवर्त्मना। अन्तर्गतजलच्छाया मया सैवेति वीक्षिता KundaMā. 4. 14.

अन्तर्गतज्ञ (antargata-jña) *adj.* who knows what is in the mind (of others) तं बिभेदान्तर्गतज्ञः शूलेन शशिशेखरः SkandP. v(1). 3.14.

अन्तर्गतज्ञान (antargata-jñāna) *adj.* which includes or contians knowledge within अन्तर्गतज्ञानं यत्कर्म तत्ते प्रवक्ष्यामि GītāBh. (Rā.) 255. 7 (*on* 4. 16); तत्रान्तर्गतज्ञाने कर्मणि ज्ञानांशस्यैव प्राधान्यमाह GītāBh. (Rā.) 275. 1 (*on* 4.33); अन्तर्गतज्ञानेन कर्मणा जितमनसा यतमानेनायमेव समदर्शनरूपो योगोऽवाप्तुं शक्यः GītāBh. (Rā.) 351. 6 (*on* 6. 36); 585. 3 (*on* 13. 24); केचित् ... अन्ये ... सत्त्वोद्रेकाद्वशीकृत्य करणान्यधिकुर्वते। अथवान्तर्गतज्ञाने कर्मयोगेऽधिकुर्वते NyāyKu. 196. 8.

अन्तर्गतज्ञानता (antargatajñāna-tā) *f.* the state of being what includes or contains knowledge within अन्तर्गतज्ञानतयास्यैव ज्ञानयोगाकारतां प्रदर्श्य ... ज्ञानांशस्यैव प्राधान्यं चोच्यते GītāBh. (Rā.) 226. 2 (*on* 4. 1); 275. 1 (*on* 4.33)

अन्तर्गततमोऽपह (antargatatamo'paha) *adj.* which destroys or removes the ignorance present in the mind साधुसमागमः। ... य एकान्ततयात्यन्तमन्तर्गततमोऽपहः SkandP. i (2). 13. 7.

अन्तर्गतता (antargata-tā) *f.* **1** the state of being what is included or contained within ज्ञानं कर्मण्यन्तर्गततया कर्माकारं यः पश्येदित्युक्तं भवति GītāBh. (Rā.) 257.7 (*on* 4. 18); **2** the state of existing inside शरीरवतस्सर्वात्मना तस्मिन् शरीरेऽन्तर्गततया भाव्यमिति न नियमः ŚivārkaMaDī. i. 247. 20 (*on* i. 1.21)

अन्तर्गतत्व (antargata-tva) *n.* **A** the state of being included or contained within पूर्वचोद्य एवान्तर्गतत्वादिदमपि चोद्यभाष्यम् TātpaṬ. (Vā.) 17. 18 (*on* 1.74); **Bi** the state of being included (in the same class) नापि प्रयोगभेदः। अन्तर्गतत्वात्काम्ये नित्यप्रयोगस्य ṬupṬ. 112. 7 (*on* vi. 3. 1); **Bii** the state of being included (in the category) अन्तःकरणस्य मनसोऽपि मनोऽन्तर्गतत्वात् सर्वान्तरश्रुतेः KenUVāBh. 74. 15 (*on* 1. 4); प्रामाण्येऽपि वागमेऽन्तर्गतत्वान्न प्रमाणान्तरम् ŚāstrDī. 87. 16 (*on* i. 1. 5); **C** the state of being counted or enumerated न चान्येषां प्राप्तत्वेऽपि अष्टत्वादेरप्राप्तत्वाद्विध्युपपत्तिः तस्यापि द्वादशत्वेऽन्तर्गतत्वेन प्राप्तत्वात् MīmāKau. i. 256. 1 (*on* i.4. 17); द्वादशत्वेऽष्टत्वादीनामन्तर्गतत्वेन कपालादिवत्प्राप्तेः तत्प्रख्यनयेन ... सामानाधिकरण्यम् BhāṭṭCin. ii. 68. 11 (*on* i. 4.11)

अन्तर्गतदाहभाव (antargata-dāhabhāva) *adj.* who has the burning sensation, i.e. feeling of sorrow in the mind नृपः ...। एकान्ततः संस्मरति स्वबन्धून् कदाचिदन्तर्गतदाहभावः VarāṅgaC. 14. 96.

अन्तर्गतदुःख (antargata-duḥkha) *n.* sorrow in the mind सा च दृष्ट्वैव भर्तारं प्रत्युद्गम्य प्रणम्य च। ... देवी रामम् ...। अभिवीक्ष्य ... अब्रवीत्। दृष्ट्वान्तर्गतदुःखार्तं किमेतदिति विह्वला Rāmā.ii.595*(4)

अन्तर्गतदुःख (antargata-duḥkha) *adj.* who has the sorrow in the mind (राजा) चित्रकूटमगात्पुरम्। तत्र तस्योचितां भार्याप्राप्तिं वीक्ष्य कृतोत्सवे। राष्ट्रेऽन्तर्गतदुःखस्य दिनशेषो जगाम सः KathāSaSāg. xii. 27. 87.

अन्तर्गतदोषनिःसारण (antargatadoṣa-nissāraṇa) *n.* removal or curing of the disorders (of humours) in the body अन्तर्गतदोषनिःसारणात् धातुसाम्यं भवति MayūMāli. 276. 11 (*on* iii. 4. 16)

अन्तर्गतनञर्थक (antargatanañartha-ka) *adj.* having negative meaning included within, i. e. implied खपुष्पमिति समासः खे पुष्पं नास्तीति विग्रहानुसारादन्तर्गतनञर्थकस्सन्नभाववचनः MīmāKau. i. 277. 10 (*on* i. 4. 23)

अन्तर्गतनिर्दोषत्व (antargata-nirdoṣatva) *n.* internal faultlessness, i.e. (grammatical) correctness अत्र पुनरन्तर्गतनिर्दोषत्वं मुख्यमेवार्थमुपादाय युक्तिरित्येवोक्तम् NyāySu. (Ja.) 259A. 9 (*on* ii. 1. 2)

अन्तर्गतप्रत्यय (antargata-pratyaya) *adj.* (used as noun) (word) containing a suffix within 'घट चेष्टायाम्' ... 'स्तम्भु रोधने' इत्यादिधातुभ्यः पचाद्यजादिभिर्व्युत्पादनसत्त्वेनान्तर्गतप्रत्यये जातिविशेषलक्षणया नियतबोधः संभवत्येव VaiyāBhū. 178. 4 (*on* 33)

अन्तर्गतप्रभ (antargata-prabha) *adj.* having lustre in the middle वृत्तः ... अन्तर्गतप्रभः प्रभानुलेपी चेति मणिगुणाः ArthŚā. i. 184. 25 (2. 11) (comm. अन्तर्गतप्रभः मध्यभागेऽपि प्रभातरलः प्रभया स्वीयया संनिकृष्टमनुलिम्पतीति प्रभानुलेपी)

अन्तर्गतप्रमागूढ (antargatapramā-gūḍha) *adj.* concealed on account of the consciousness within अन्तःप्रणवनादाख्यो हंसः प्रत्ययबोधकः। अन्तर्गतप्रमागूढं ज्ञाननालं विराजितम् PāśBraU. 2. 3.

अन्तर्गतप्रहर्ष (antargata-praharṣa) *m.* inner joy ईषत्कुञ्चितनयनकपोलनिवेद्यमानान्तर्गतप्रहर्षम् ... मुखकमलं परिवर्त्य ... हसितम् Ubhayābhi. 13. 3.

अन्तर्गतप्राय (antargata-prāya) *adj.* almost included श्रुतेर्विनियोगसामर्थ्यात्मकस्य च लिङ्गस्य केवलपदप्रयोगाभावात् पदान्तरसंनिधेरवश्यंभावित्वाद्वाक्यमन्तर्गतप्रायमेवेति न साक्षाद्ग्रहणेन सूत्रितम् TantrVā. 830. 17 (*on* iii. 3. 11)

अन्तर्गतप्रार्थन (antargata-prārthana) *adj.* having inner longing (for honour) मम ... अन्तर्गतप्रार्थनमन्तिकस्थं जयन्तमुद्वीक्ष्य कृतस्मितेन। प्रमृज्य वक्षो हरिचन्दनाङ्कं मन्दारमाला हरिणा पिनद्धा Śāk. 7. 2.

अन्तर्गतप्रीति (antargata-prīti) *f.* inner regard, internal delight अन्तर्गतप्रीतिं स्फीतिमतीम् ... बिभ्रती। ... युष्मद्भक्तिरलं भनक्ति भविनामेनांसि हृद्वासिता PārśvanāSta. 10.

अन्तर्गतप्रीतिमनस् (antargataprīti-manas) *adj.* having the mind containing inner regard or delight (नृपात्मजः) स तस्य संप्रेक्ष्य गजेश्वरस्य जयं महान्तं रिपुमर्दनस्य। अन्तर्गतप्रीतिमनाः कृतज्ञो युवेश्वरो वाक्यमिदं जगाद VarāṅgaC.12.66.

अन्तर्गतप्रेमशंसिन् (atargataprema-śaṁsin) *adj.* telling, i.e. indicating love existing in the mind or heart नृपकुमारः ... सोऽपि किंचित्कृतप्रतिप्रणतिरन्तर्गतप्रेमशंसिना प्रीणयन्नमृतवारिच्छटाच्छेन विकसता दृष्टिविक्षेपेण मच्चित्तमीषद्वलितवदनस्तामवादीत् TilaMañ. 314. 18.

अन्तर्गतफलारम्भा (antargata-phalārambhā) *adj.* (*f.*) **1** having the beginning of the result hidden inside समापन्नसत्त्वास्ता रेजुः ...। अन्तर्गतफलारम्भाः सस्यानामिव संपदः RaghuVa. 10. 59; **2** having the appearance of the food grain formed within, RaghuVa. 10. 59.

अन्तर्गतबाष्पकण्ठ (antargatabāṣpa-kaṇṭha) *adj.* whose throat is (choked) with tears inside अथ व्यवस्थापितवाक्कथंचित्सौमित्रिरन्तर्गतबाष्पकण्ठः। औत्पातिकं मेघ इवाश्मवर्षं महीपतेः शासनमुज्जगार RaghuVa. 14. 53.

अन्तर्गतब्रह्मात्मचैतन्य (antargata-brahmātmacaitanya) *n.* consciousness of the nature of the Brahman existing within अग्न्यादीनामपि ज्योतिष्ट्वमन्तर्गतब्रह्मात्मचैतन्यज्योतिर्निमित्तमित्यर्थः MuṇḍUBh. 340. 9 (*on* ii. 2. 10)

अन्तर्गतभाव (antargata-bhāva) *m.* inner or internal feeling रक्ताक्षस्तस्यान्तर्गतभावं ज्ञात्वाब्रवीत् Pañcā. 212. 21.

अन्तर्गतमनस् (antargata-manas) *adj.* who has his mind turned inwards, i.e. introvert शोचन्नेव मुहुः क्रौञ्चीमुप श्लोकमिमं पुनः। जगावन्तर्गतमना भूत्वा शोकपरायणः Rāmā. i .2. 28 [engaged in deep thought, sad, perplexed, MW.]

अन्तर्गतमनोबुद्धि (antargata-manobuddhi) *f.* inner or internal mind and intellect गत्या स्खलत्पादादिकया अन्तर्गतमनोबुद्धिरूपेण परिणतमवधार्यते ManvaMu. 293. 15 (*on* 8. 26)

अन्तर्गतमन्यु (antargata-manyu) *adj.* who has anger present in the mind, i.e. who has not expressed one's own anger कस्याश्चिदन्तर्गतमन्योर्मानिन्याः केनचित् कृतागसा प्रसाद्यमानाया यत् ... उक्तं तदनुपपद्यमानतया समर्थनीयमेव VyaktiVi. 128.24.

अन्तर्गतमल (antargata-mala) *adj.* having dirt in the mind अन्तर्गतमलो दुष्टस्तीर्थस्नानशतैरपि न शुध्यति CāṇaNīDa. 11. 7.

अन्तर्गतमानस (antargata-mānasa) *adj.* who has his mind turned inwards, i.e. introvert स राजा सस्मार मामन्तर्गतमानसः MahāBhā. xii. 31. 39; नमोऽस्तु ... शान्तात्मनेऽन्तर्गतमानसाय Saund. 7. 22.

अन्तर्गतयाम्योत्तर (antargata-yāmyottara) *adj.* which exists between the southern and northern direction अतः स्थिरस्य भूमिपिण्डस्यान्तर्गतयाम्योत्तरं किल सुमेरुशृङ्गत्रयं वर्तते ŚaṅkaVi. (Ā.) 215. 14.

अन्तर्गतरजोविषय (antargatarajo-viṣaya) *adj.* referring to dirt or pollution hidden (inside) वचनं तज्जाह्नवीभिन्नगोदावर्यादिगङ्गान्तरपरमिति मदनरत्ने। अन्ये त्वन्तर्गतरजोविषयम् NirṇaSi. 86. 19.

अन्तर्गतरसा (antargata-rasā) *adj.* (*f.*) **A** having juice or sap inside बिभ्रतोऽन्तर्गतरसां कुसुमेषु रुचिं नवाम्। जटावल्कलभारस्ते तरोरिव न शान्तये DarpaDa. 3. 93; **B** having love in the mind or heart, DarpaDa. 3. 93; बहिर्व्याजामर्षप्रसरपरुषान्तर्गतरसा ... पूर्वा विजयते SubhāRaK. 19. 46.

अन्तर्गतलुपा (antargata-lupā) *f.* entablature or pent-roof turned inwards अकर्णकेन चार्धं वा यथायुक्ति यथारुचि। अन्तर्गतलुपां तिर्यगग्रबन्धमनिष्टदम् ŚilpaRa. i. 35. 15.

अन्तर्गतवर्षपर्वतद्रुम (antargata-varṣaparvatadruma) *adj.* containing divisions of earth, mountains and trees within स्वप्ने सप्तसागरपरिधिमन्तर्गतवर्षपर्वतद्रुमम् ... देवी जगद्गोलं जग्रसे AvantiKa. 158. 5.

अन्तर्गतवह्नि (antargata-vahni) *adj.* having fire, i.e. heat inside लोहे हुतभुग्व्याप्ते लोहान्तरताड्यमानेऽपि। तस्यान्तर्गतवह्नेः किं स्यान्निर्घातजं दुःखम् PraboSu. 134.

अन्तर्गतवासनात्मता (antargatavāsanātma-tā) *f.* the state of having the nature of impression (present) in the mind अङ्गस्याल्पो विकारोऽन्तर्गतवासनात्मतया वर्तमानं रत्याख्यं भावं भावयन् सूचयन् भावः Kāvyānu. (He.) 372.2.

अन्तर्गतविंशत्यादिसंख्या (antargata-viṁśatyādisaṁkhyā) *f.* number twenty etc. which are included (within hundred) शतादिसंख्यापरिच्छिन्नेषु वस्तुष्वन्तर्गतविंशत्यादिसंख्यापरिच्छिन्नवस्तुग्राहकं (यत्) तदनुमानान्न भिद्यते PrakaPañ.292.20.

अन्तर्गतविभक्तिलोपार्था (antargatavibhaktilopārthā) *adj.* (*f.*) meant for the elision of case-suffix which is included, i.e. appended शब्दानां पूर्वनिपातार्थातुपसर्जनसंज्ञा अन्तर्गतविभक्तिलोपार्था च NayaVi. 116. 9 (*on* i. 1. 5)

अन्तर्गतविश्ववीर्य (antargata-viśvavīrya) *n.* virility, i.e. the seed of the universe existing within अन्तर्गतविश्ववीर्यसमुच्छलत्तात्मकविसर्गविश्लेषानन्दशक्त्यैकघनं ब्रह्म ParāTri. 221. 10.

अन्तर्गतव्याल (antargata-vyāla) *m.* snake present, i.e. lying inside अन्तर्गतव्यालफणामणीनां प्रभाभिरुद्भासितभूषु भर्तः। ... गुहासु शेते Vāgbhaṭa.4.112.

अन्तर्गतशल्य (antargata-śalya) *m.* variety of a disease called Bhagandara (*lit.* fistula in the anus caused by internal splinter) यदंतदन्तर्गतशल्यनामकम्। भगन्दरं तच्च विदार्य यत्नतः KalyāKā. 13. 63.

अन्तर्गतशल्य (antargata-śalya) *adj.* **1** which has piercing splinters in the mind or heart, i.e. painful विरोधिचक्रं बहुधार्तराष्ट्रं चिन्ताभिरन्तर्गतशल्यमासीत् RāghPāṇ. (Ka.) 7.3 (comm. हृदयलग्नं शल्यं सव्यथमिवासीत्); **2** which has Śalya (the king of Madra) included in, RāghPāṇ. (Ka.) 7.3 (comm. अन्तर्गतः शल्यो मद्राधिराजो यत्र)

अन्तर्गतशव (antargata-śava) *adj.* having a dead body within (the territory) अन्तर्गतशवे ग्रामे वृषलस्य च संनिधौ। अनध्यायः ManuSm. 4. 108.

अन्तर्गतशीकर (antargata-śīkara) *m.* sprays or thin rain existing inside कदलीदण्डेन अन्तर्गतशीकरसिच्यमानमूलम् ... दन्तकाण्डमुद्वहन्तम् ... दर्पशातमपश्यत् HarṣaC. 104. 7 (Bālabodhinī अन्तर्गतैः शीकरैरम्बुकणैः)

अन्तर्गतशुक (antargata-śuka) *m.* parrot kept inside (a cage) (सः) मातङ्गकुमारीम् ... अन्तर्गतशुकप्रभाश्यामायमानं मरकतमिव पञ्जरमुद्वहता चाण्डालदारकेणानुगम्यमानाम् ... अतिशयरूपाकृतिम् ... ददर्श Kād. 10. 15.

अन्तर्गतशुद्धभाव (antargata-śuddhabhāva) *adj.* possessing a pure state in the mind अन्तर्गतशुद्धभावो विचित्रपञ्चेन्द्रियरागबन्धः। ... तस्थौ स रात्रिप्रतिमामभीक्ष्णम् VarāṅgaC. 31. 43.

अन्तर्गतसत्त्वजात (antargata-sattvajāta) *adj.* containing multitude of beasts inside वनं तदन्तर्गतसत्त्वजातं पाशैरवारुन्धत वत्सपालाः Yādavā. 5.15.

अन्तर्गतसमस्ताक्षर (antargata-samastākṣara) *adj.* which has all the letters included within, i.e. inclusive of all the syllables अन्तर्गतसमस्ताक्षराकारहकारात्मकप्रत्याहारवाच्यत्वमस्याः Bhāsk. i. 150. 17 (*on* i. 4. 1)

अन्तर्गतसमास (antargata-samāsa) *m.* compound with hidden, i.e. elided (ablative) inside केचित् नारायणपरं ब्रह्म इति वाक्ये नारायणात्परमिति (पदम्) अन्तर्गतसमासं वदन्ति ŚrutaPra. ii. 517. 11 (*on* iii. 3. 43)

अन्तर्गतसामर्थ्य (antargata-sāmarthya) *adj.* having hidden power or capacity inside यानि भुवनेष्वतर्क्य(v.l.°ष्वन्तर्गत)सामर्थ्यान्यायुधानि तानि रामे ब्रह्मर्षिभ्यः परिणमन्ति MahāvīC. 2. 4 (7)

अन्तर्गतस्पर्शरसा (antargata-sparśarasā) *adj. (f.)* having touch and dampness within तदेवानिलतां वेत्ति ... अन्तर्गतस्पर्शरसां पवनस्पन्दतामिव YogVā. iii. 61. 13.

अन्तर्गतस्रज् (antargata-sraj) *adj.* having, i.e. woven garlands inside प्रसाधकाः। तेऽस्य ... मौलिमन्तर्गतस्रजम्। प्रत्यूपुः RaghuVa. 17. 23.

अन्तर्गतस्वरम् (antargatasvaram) *adv.* with an obscure, i.e. choked voice अन्तर्गलं स्वरम् (v.l.अन्तर्गतस्वरम्) अलक्ष्यपदं चिरेण मेदश्च्याद् वदति दिग्धगलौष्ठतालुः SuśruS. vi. 53. 6; RugVi. 13. 4.

अन्तर्गतहरि (antargata-hari) *adj.* having Viṣṇu present in the mind ध्यायन्नारायणं देवं तस्थौ तत्रैव स द्विजः। तं दृष्ट्वान्तर्गतहरिं व्याधो भीत इवाग्रतः। ... वचनमब्रवीत् VarāP. 37. 13; SkandP. v(2). 25. 8.

अन्तर्गतहर्षभाव (antargata-harṣabhāva) *adj.* having the feeling of joy present in the heart भटः ... वसुधेन्द्रसिंहं ददर्श सोऽन्तर्गतहर्षभावः VarāṅgaC. 17.2.

अन्तर्गताकूत (antargatākūta) *n.* sub-division of Narma constituting one of the four types of Kaiśikī Vṛtti (*lit.* one having concealed intention) कैशिकी...। अस्याश्चत्वारो भेदाः। नर्म नर्मस्फोटः अन्तर्गताकूतं यथा ... शुद्धमन्तर्गताकूतं नर्म स्यात् NāṭaLaRaK. 1311.

अन्तर्गतात्मज्ञान (antargatātmajñāna) *adj.* having knowledge of the self existing within आत्मनिष्ठस्यापि ... अन्तर्गतात्मज्ञानानभिसंहितफलकर्मनिष्ठैव श्रेयसी GītāBh. (Rā.) 565. 7 (*on* 12. 12)

अन्तर्गतात्मज्ञानता (antargatātmajñāna-tā) *f.* the state of having the knowledge of the self existing within कर्मयोगस्य ... अन्तर्गतात्मज्ञानतया निरपेक्षत्वात् GītāBh. (Rā.) 210.2 (*on* 3.33); अन्तर्गतात्मज्ञानतया ... कर्मयोगस्य माहात्म्यम् ... पृच्छति GītāBh. (Rā.) 352. 1 (*on* 6. 36)

अन्तर्गतात्मज्ञानत्व (antargatātmajñāna-tva) *n.* the state of having the knowledge of the self existing within ज्ञानयोगाधिकारिणोऽपि कर्मयोगस्यान्तर्गतात्मज्ञानत्वात् ... ज्यायस्त्वम् GītāBh. (Rā.) 286. 2 (*on* 5. 1)

अन्तर्गतानन्दलाभ (antargatānanda-lābha) *m.* attainment of inner bliss अन्तर्गतानन्दलाभार्थं मुनिपुंगवाः। पितृमातृस्वरूपेण शिवलिङ्गं प्रपूजयेत् ŚivaP. i. 16. 94 (17B. 9)

अन्तर्गतानल (antargatānala) *adj.* which contains fire inside अन्तर्गतानलं चन्दनविटपमिव म्लायन्तम्... तमहमद्राक्षम् Kād. 154. 5.

अन्तर्गतामर्ष (antargatāmarṣa) *adj.* having fury existing in the mind शत्रुं पश्यन्तु मे पौराः ...। सिंहमन्तर्गतामर्षं यज्ञार्थमिव संयतम् PratiYau. 2. 10.

अन्तर्गतामित्रशल्य (antargatāmitra-śalya) *adj.* having darts or spikes in the form of enemies inside (बलम्) अनेकराज्यान्तरितमतिक्षिप्तं न युध्यते। अन्तर्गतामित्रशल्यमन्तःशल्यं हि न क्षमम् NītiSā. 14. 81 (comm. अमित्र एव शल्यम्)

अन्तर्गतायुधनिवहा (antargatāyudhanivahā) *adj. (f.)* having multitudes of weapons inside, i.e. stocked with weapons अन्तर्गतायुधनिवहाभिः ... आयुधशालाभिरुपेतम् ... राजकुलं विवेश Kād. 87. 5.

अन्तर्गतास्राक्ष (antargatāsrākṣa) *adj.* having eyes containing, i.e. full of tears वञ्चनानिहतं श्रुत्वा सुतमद्याहवे मम। मुखमन्तर्गतास्राक्षमन्धमन्धतरं कृतम् ŪruBha. 37.

अन्तर्गति (antar-gati) *f.* **1** motive, intention तेषामन्तर्गतं (v.l °तिम्) ज्ञात्वा देवानां स पितामहः। मानवानां प्रमोहार्थं कृत्या नार्योऽसृजत्प्रभुः MahāBhā. xiii. 40. 7; **2A** inclusion संदष्टकसमुद्रादेरत्रैवान्तर्गतिर्मता। आदौ मध्यान्तयोर्वा स्यादिति पञ्चैव तद्यथा Kāvyālaṅ. (Bh.) 2. 10; सर्वसाधनानां तद्व्यापारः कर्तुरिति तेषां भावनान्तर्गतिः तन्मुखेन साधनताप्युपपन्ना BhāvanāVi. 175.2; न तावदप्रमाणत्वं तेषां नाप्यक्षबुद्धिषु। शक्यतेऽन्तर्गतिर्वक्तुं न च लक्षणतुल्यता ŚlokaVār. 4. 3 (134. 4); अतिरिक्तं न गृह्यते। अस्ति त्वन्तर्गतिः TantrVā. 13. 17 (*on* i. 2. 7); वचनार्थम् ... अनाम्नातयोरेव प्रवरनाम्नोः प्रयोगात्र मन्त्रत्वनिरूपणायामन्तर्गतिः TantrVā. 419. 23 (*on* ii. 1. 34); (कः?क्व) पुनस्तस्यान्तर्गतिः Kāśi. iii. 212. 17 (*on* 5(9). 58); ग्रन्थकारस्तु विशेषलक्षणस्यान्तर्गतिं मत्वा सामान्यलक्षणत्वेनैव व्याचष्टे YuktiSneha. 72. 36 (*on* i. 1. 5); **2B** incorporation पटशुक्लयोरैक्यस्यापि तत्रान्तर्गतिः Nyāyāmṛ. 565B.1.

अन्तर्गति (antar-gati) *adj.* obscured, i. e. unexpressed अत्र ह्यन्तर्गतिरतिप्रबोधमात्रमुक्तं न त्वभिलाषशृङ्गारः Kāvyānu. (He.) 372. 22.

अन्तर्गतिप्राप्ति (antargati-prāpti) *f.* undersired occasion for inclusion आद्यार्थविषयं तावन्नेदं शाब्दोपमादिकम्। प्रत्यक्षेऽन्तर्गतिप्राप्तेर्वैफल्यं वा स्मृतेरिव TattvSaṁ. 1704.

अन्तर्गतेच्छ (antargateccha) *adj.* having desire or intention existing within देहाः प्रोक्ता येऽपि पृथक् पृथक्। भोग्यत्वेनात्मनां तेऽपि चैतन्यानुगताः सदा। तेषां चान्तर्गतेच्छानां वाक्यार्थप्रतिपादने। विवक्षा ... ज्ञायते शब्दशक्तितः TantrVā. 719. 15 (*on* iii. 1. 13)

अन्तर्गतैश्वर्य (antargataiśvarya) *n.* inner treasure, i.e. bliss स शिवो जगतः पिता।... कृपयान्तर्गतैश्वर्यं पूजकस्य ददाति ŚivaP. i. 16. 94 (17B.8)

अन्तर्गतोपमा (antargatopamā) *adj.* [*f.*–ā] having concealed, i.e. implied simile अपह्नुतिरभीष्टा च किंचिदन्तर्गतोपमा Kāvyālaṅ. (Bh.) 3.21; औदमध्यान्तविषयाः प्राधान्येतरयोगिनः। अन्तर्गतोपमा धर्मा यत्र तद्दीपकं विदुः Kāvyālaṅ-SāSaṁ. 1. 14.

अन्तर्गतौर्वविषवह्नि (antargataurvaviṣavahni) *m.* internal submarine fire of poison अन्तर्गतौर्वविषवह्निशिखाभितप्ता रत्नोज्ज्वलाः शितिरुचो ववलुः पयोधौ। कल्लोलभोगिपतयः HarVi. 22. 6.

अन्तर्गत्वा (antar-gatvā) *ger.* [irr.] having gone, i.e. having performed mentally सुमनःसेवनमन्तर्गत्वा बहु मन्वते रसेऽवनमन्तः (जनाः) YudhiVi. 2. 48. (comm. मनसा तद्विधाय)

अन्तर्गभीर (antar-gabhīra) *adj.* **A** deep inside नीरैरन्तर्गभीरैश्चटुलबककुलग्रासलीनैश्च मीनैः ... भाति ... चलच्चक्रवाकस्तटाकः PrabaCin. 102. 29; PurāPraSaṁ. 72. 2; **B** mysterious within तन्वीयम् ... अङ्गहारैरुपचरति चमत्कारमन्तर्गभीरम् LaṭaMe. 2. 21.

अन्तर्गम् (antar-gam-) I. P. to go between (so as to exclude) आ नो यज्ञे भजत मा नो यज्ञादन्तर्गतास्त्वेव नोऽपि यज्ञे भागः ŚatBr. I. vi. 1. 1; ते वै मा यज्ञान्मान्तर्गताहुतिं मे कल्पयत ŚatBr. I. vii. 3. 4 [Viśva.] [to include or comprise in, to vanish, disappear, Apte]

अन्तर्गम (antar-gama) *m.* inclusion उच्यते न द्वयादन्यत्प्रमाणमुपपद्यते। प्रमाणलक्षणायोगाद्योगे चान्तर्गमादिह TattvSaṁ. 1488 (Pañ. अन्तर्भावात्)

अन्तर्गम्भीर (antar-gambhīra) *adj.* **A** deep in the mind कंसेन सावज्ञमन्तर्गम्भीरमन्युना। उक्ते तमुद्धवः प्राह DaśāvaC. 8. 117; VīraMi. (Saṁskāra.)

120.1; **B** deep inside अन्तर्गम्भीरतान्धूकृतसलिलनिधिः ... अभूद् वीरसिंहः ViraMi. (Saṁskāra.) 120.1.

अन्तर्गर्ता (antar-gartā) *f.* interior of the ditch विस्तारे परिणाहे च गर्तां कृत्वा षडङ्गुलाम्। फणिवल्लीदलान्यन्तर्गर्तायां प्रक्षिपेन्नरः RasRaSa.12.61.

अन्तर्गर्तितनदीका (antargartitanadī-kā) *adj. (f.)* having a river dug inside नदीयन्त्रमन्तर्गर्तितनदीका परिखा SetuBa. 114. 29.

अन्तर्गर्भ (antar-garbha) *adj.* **Ai** having the foetus or embryo in the womb स शापदोषाद्ब्राण्या अन्तर्गर्भो हुताशनः। बहून्वर्षगणान् गर्भं धारयामास BrahmāṇḍP. ii. 10. 29; **Aii** having the shoot or enclosing stalk within नान्तर्गर्भे कुशच्छिन्ने कौशे प्रादेशसंमिते। 'नान्तर्गर्भे' गर्भे शिखारहिते CaturCin. iii (1). 636. 1; अन्तर्गर्भो यस्य तद् अन्तर्गर्भं द्वितीयं दलम् ViraMi. (Paribhāṣā.) 95. 22; **B** who is in the embryo अन्तर्गर्भं प्रजापतिम् ... अबिभः ... मृत्युः BṛĀraUBh. 26. 9 (*on* i. 2. 4) [inclosing young, pregnant, MW.; bearing young, pregnant, Apte]

अन्तर्गर्भ (antar-garbha) *m.* **1** inner core, i.e. inner consciousness अन्तर्गतेन नित्यविज्ञानस्वरूपेण आकाशवदप्रचलितात्मना अन्तर्गर्भभूतेन स बाह्यो बुद्ध्यात्मा तद्विलक्षणः KenUBh. 74. 16 (*on* 1. 4); **2** foetus or embryo (conceived) in the womb अविश्रान्तमनाः शून्यमायुराततमीहते। दुःखायैव विमूढोऽन्तर्गर्भमश्वतरी यथा YogVā. i. 14. 8.

अन्तर्गर्भगृह (antar-garbhagṛha) *m.* interior of the sanctum sanctorum अन्तर्गर्भगृहे विष्णोर्गर्भाद्वाननमण्डपे। प्रणिपातगणं कुर्यात् PauṣkS. 31. 65; PāraS. 6. 367.

अन्तर्गर्भशून्य (antargarbha-śūnya) *adj.* devoid of shoot or enclosing stalk within कुशपत्रद्वयमन्तर्गर्भशून्यं साग्रं प्रादेशप्रमाणं सर्वत्र पवित्रं विज्ञेयम् ViraMi. (Paribhāṣā.) 95. 23.

अन्तर्गर्भिणीन्याय (antargarbhiṇī-nyāya) *m.* a proposition within another like the foetus within the womb of a female, Apte.

अन्तर्गर्भित (antar-garbhita) *adj.* **i** pregnant with (meaning) प्राणः शरीरमस्येति बहुव्रीहिः ... अन्तर्गर्भितसर्वनामार्थवान् VedāntKa. 133. 6 (*on* i. 2. 1); **ii** contained within अन्तर्गर्भितोऽप्यार्थो विरोधः समुल्लसति RasGaṅ. 576.4.

अन्तर्गर्भिन् (antar-garbhin) *adj.* **1** having the shoot or enclosing stalk within अन्तर्गर्भो यस्य तत् अन्तर्गर्भं द्वितीयं दलं तद्विद्यते यस्य तदन्तर्गर्भिणं तृतीयम् ViraMi. (Paribhāṣā.) 95. 22; **2** the word *antargarbhin* अनन्तर्गर्भिणमिति। अत्रान्तःशब्दगर्भशब्दयोः कर्मधारये तदुत्तरं मत्वर्थीयेन्प्रत्यये च सति निष्पन्नस्यान्तर्गर्भिन्शब्दस्य नञ् समासे सति ViraMi. (Paribhāṣā.) 95. 13 [having a *garbha* inside, Apte]

अन्तर्गर्व (antar-garva) *m.* inner pride, pride within प्रागल्भ्ययुद्धेन यो ह्यन्तर्गर्वमखर्वयत्सुरपतेरुद्धृत्य गोवर्धनम् (सः) ... समकरोन्निजमूर्तीः ... भुवनेशः Vidvanmo. 8. 14.

अन्तर्गल (antar-gala) *m.* interior of the throat यस्य श्लेष्मा प्रकुपितस्तिष्ठत्यन्तर्गले स्थिरः ... जायतेऽस्य गलग्रहः CaraS. i. 18 .22 (1941 Ed.) [Kośas give *antargala* as the meaning of *argaṭa*, ViśvaPra. 39. 39; ViśvaLoK. 79. 33; also they give *antargala* as a synonym of *argāṭa*, ParyāMu. 16. 12]

अन्तर्गलगत (antargala-gata) *adj.* gone, i.e. staying inside the throat सोऽपि कुलीरस्तेन भक्षितोऽप्यन्तर्गलगत एव तस्य फणिनः प्राणानपाहरत् PañcT. (Kos.) 5. 89. (15) (256. 10)

अन्तर्गलम् (antargalam) *adv.* in the interior of the throat, inside the throat अन्तर्गलं स्वरमलक्ष्यपदं चिरेण मेदश्चयाद्वदति दिग्धगलौष्ठतालुः SuśruS. vi. 53. 6 (comm. गलस्यान्तरे); BhāvPra. (Bhā.) 8 (14?15). 7; इदम् ... अन्तर्गुरुशुक्रमप्यनाथमप्यन्तर्गलमसंभ(?व)मप्यनवस्थानम् ... अनर्थमूलम् AvantiKa.42.18.

अन्तर्गलित (antar-galita) *adj.* **1** dripping or trickling inwards or inside तन्वङ्ग्या गुरुसंनिधौ नयनयोर्यद्वारि संस्तम्भितं तेनान्तर्गलितेन मन्मथशिखी सिक्तो वियोगोद्भवः AmaŚ. 96 = ŚārṅgaPa. 3408 = Subhāṣi. 1091; **2** disappeared, i.e. void within अन्तर्गलितदृश्यं च क आत्मानमखण्डितम्। दृश्यासंपत्तये पश्यन् पुरो दृश्यं न पश्यति YogVā. iii. 79. 24.

अन्तर्गा (antar-gā-) II. P. [P. ii. 4. 45; ii. 4. 77; DhātuPā. 1. 998; MugdhaBo. 9. 13 (104. 23)] **1A** to cause to disappear, i.e. to pass or to destroy अर्देदिष्ट वृत्रहा गोपतिर्गा अन्तः कृष्णाँ अरुषैर्धामभिर्गात् RV. iii. 31. 21 (Sāy. अन्तर् अन्तर्धानं विनाशं गात् गमयतु); **1B** to exclude प्रजापतिर्वै देवेभ्यो यज्ञान् व्यकल्पयत् सोऽमन्यतात्मानमन्तरगामिति MaiS. iv. 7. 6 (iv. 100. 3); KāṭhS. 8. 13 (i. 97. 5); 29. 7 (ii. 175. 13); KapiKaS. 8. 1 (80. 9); 45. 8 (274. 9); GopBr. ii. 1. 7 (149. 11); अस्यामेव यज्ञं तन्वाना इमां यज्ञादन्तरगाम ŚatBr. III. ii. 3.3; मय्येव यज्ञं तन्वाना मां यज्ञादन्तरगात ŚatBr. III. ii. 3. 5; ŚatBr. (K.) IV. ii. 3. 3; मा नो यज्ञादन्तर्गात ŚatBr. III. vi. 2. 17; ŚatBr. (K.) II. vii. 1. 4; उप मा ह्वयस्व मा मा यज्ञादन्तर्गा ŚatBr. IV. iii. 2. 8; IV. iii. 2. 9; य एव मयि तन्वाना मां यज्ञादन्तरगुरिति तेषां ह यज्ञं मोहयां चकार ŚatBr. (K.) IV. ii. 3. 2; सा त्रिष्टुबुवाचोप त्वा यानीत्येभिस्त्रिभिरक्षरैर्मा मान्तर्गा उप मा सृजस्वेति...सा जगत्युवाचोप त्वा यानीत्यनेनैकेनाक्षरेण मा मान्तर्गा उप मा सृजस्वेति ŚatBr. (K.) V. iii. 3. 6-7; **1C** to omit तद्वैतदुवाच ब्राह्मण उपाकृते प्रातरनुवाके ब्रह्माणं भाषमाणं दृष्ट्वार्धमस्य यज्ञस्यान्तरगुरिति AitBr. 25. 8 (672); स यद्वदन्नास्ति विद्यादर्धं मेऽस्य यज्ञस्यान्तरगादिति GopBr. i. 3. 2 (66. 2); i. 3. 3 (66. 12); यदस्मिन्कर्मण्यन्तरगाम मन्त्रतः कर्मतो वा। अनयाहुत्या तच्छमयामि BaudhŚS. i. 32. 19; ĀpaŚS. iii. 11. 2; HirŚS. ii. 6. 7 (233. 9); VaikhāŚS. 7. 11; **2A** to separate प्राणादात्मानमन्तरगान्न जीविष्यति KauṣīBr. 12. 7 (56. 23); 13. 9 (61. 4); 23. 6 (106. 1); **2B** to deprive of उपप्रेत संयतध्वं मान्तर्गात भागिनं भागधेयात् ĀpaŚS. vi. 8. 11; **3** to obstruct, to shut एवं कुर्वन्तं प्राणं वाऽअयमन्तरगादध्वर्युः प्राण एनं हास्यतीति ŚatBr. III. viii. 2. 24; ŚatBr. (K.) IV. viii. 2. 18.

अन्तर्गा (antar-gā-) III. P. to go between यो दैव्यानि मानुषा जनूंष्यन्तर्विश्वानि विद्मना जिगाति RV. vii. 4. 1; MaiS. iv. 14. 3 (iv. 218. 5); KāṭhS. 7. 16 (i. 81. 2)

अन्तर्गाढ (antar-gāḍha) *adj.* entered deep in the mind or heart अन्तर्गाढविगूढमन्मथरसस्फारीभवद्गण्डया स्वैरं शारिविसारणाय निहितः स्वेदाम्बुगर्भः करः SaduktiKa. 146. 3.

अन्तर्गामिन् (antar-gāmin) *adj.* gone between or into, being in, included in, being in the interior, internal, hidden, secret, disappeared, perished, slipped out of the memory, forgotten, MW.; Apte.

अन्तर्गिर (antar-gira) *m.* name of a country (*lit.* region situated in the mountains) देशाः ... अन्तर्गिरबहिर्गिराः ... युञ्जन्तीहोढ्रमागधीम्। अन्येऽपि देशाः प्राच्याः ... तेषु प्रयुज्यते ह्येषा प्रवृत्तिश्चोढ्रमागधी NāṭyaŚā. 13. 45 (AbhinBhā. गिरीणामन्तर्ये भवास्तेऽन्तर्गिराः)

अन्तर्गिरम् (antargiram) *adv.* [P. v. 4. 112; JaineVyā. 282. 2 (*on* iv. 2. 112); CāndraVṛ. *on* iv. 4. 93; KāśiVṛ. *on* v. 4. 112; Nyās. ii. 179. 18 (*on* v. 4. 112)] in the mountains or hills स्वामी धनानाम् ... । अध्यास्तेऽन्तर्गिरम् Bhaṭṭi. 5. 87; अन्तर्गिरं गतान्। ... आह्वन्स्वकान् भटान् DvyāśraKā. 19. 110.

अन्तर्गिरि (antar-giri) *m.* **A** name of a country (*lit.* region situated in the mountains) अनुपश्येत राष्ट्रं च अन्तर्गिरिमहागिरिम् AVPari. 50 (1). 5; अन्तर्गिरिं च कौन्तेयस्तथैव च बहिर्गिरिम्। ... विजिग्ये MahāBhā. ii. 24. 2; अङ्गावङ्गाः ... अन्तर्गिरबहिर्गिराः (v.l.अन्तर्गि(?र्गि)रिबहिर्गिराः) ... युञ्जन्तीहोढ्रमागधीम् NāṭyaŚā. 13. 45; प्राच्यान्देशान्निबोधत। अन्धवाकाः सुजरका अन्तर्गिरिबहिर्गिराः VāyuP. i. 45. 122; MatsyaP. 114. 44; BrahmāṇḍP. i. 16. 53; अन्तर्गिरिबहिर्गिरीः। ... एते वै ... तेन देशाः शून्यीकृताः NīlaP. 139; PadmP. i. 6. 44; **B** name of a tribe or people (*lit.* residing in the mountains) दैत्येन्द्रो भक्षयामास मानवान्। ... मद्रान् अन्तर्गिरिबहिर्गिरीन् NīlaP.80.

अन्तर्गिरि (antargiri) *adv.* [P. v. 4. 112; JaineVyā. 282. 2 (*on* iv. 2. 112); CāndraVṛ. *on* iv. 4. 93; KāśiVṛ. *on* v. 4. 112] in the mountains or hills परिभ्रमन् ... पदातिरन्तर्गिरि ... मानसं दुनोति नः ... वृकोदरः Kirātā. 1. 34 (comm. गिरिष्वन्तः)

अन्तर्गिरिज (antargiri-ja) *adj.* who is born, i.e. lives in the mountains or hills कुम्भेऽन्तर्गिरिजान् सपश्चिमजनान् भारोद्वहांस्तस्करान् ... हन्यात् BṛSaṁ. 5.42.

अन्तर्गिर्य (antargirya) *m.* name of a particular region or country जनपदान्निबोध ...। अन्ध्राश्च बहवो राजन्नन्तर्गिर्यास्तथैव च MahāBhā. vi. 10. 48; प्राच्यान् देशान् निबोध मे। ... अन्तर्गिर्या बहिर्गिराः MārkP.57.42.

अन्तर्गुञ्जत् (antar-guñjat) *adj.* humming inside अन्तर्गुञ्जन्मधुकरमुखरेणामन्यमाणलोचनोत्पलामिव कर्णोत्पलेन ... मातरं ददर्श HarṣaC. 229. 2; गर्जत्पर्जन्यघोरस्तनितमविरतारम्भगम्भीरमन्तर्गुञ्जन् गुञ्जाभजृम्भाविवृतमुखविशद्विश्वदिक्चक्रवालः। ... गगनोत्सङ्गमङ्गं धुनोति MahāvīC. 5. 53.

अन्तर्गुडवलय (antarguḍa-valaya) *m.* (in anatomy) the sphincter muscle, MW.; Apte.

अन्तर्गुण (antar-guṇa) *m.* **1** inner quality or excellence तस्य हारप्रभा नाम्ना प्रिया हारप्रभास्ति च। दधानान्तर्गुणं दोषवर्जिता विशदाशया SamarāSaṁ. 6. 7; **2A** inner thread or string, SamarāSaṁ. 6.7; **2B** fibres inside

ब्रह्माण्डनरहृत्पद्मम् ... अन्तर्गुणगणाकीर्णं सुरन्ध्रैः सुषिरैर्वृतम् YogVā. iii. 25. 4 (comm. अन्तर्नालान्तर्गुणास्तन्तवः); **3** multitude of enjoyable objects of senses inside, YogVā. iii. 25. 4 (comm. अन्तर्नालान्तर्गुणाः ... भोग्यवस्तुगुणाश्च)

अन्तर्गुणदेवतोपासन (antarguṇadevatopāsana) *n.* meditation upon the deity possessing the inner quality or excellence फलं त्वविशिष्टमन्तर्गुणदेवतोपासनात् BrahmSūBh. (Bhā.) 191. 12 (*on* iii. 3. 39)

अन्तर्गुणसंक्रम (antarguṇa-saṅkrama) *m.* **1** insertion or progress of thread inside यशपालः ... पुरुषमणिः । स्वच्छत्वात्प्रतिबिम्बडम्बरमभूत्केषां न यत्राद्भुते । भित्त्वान्तर्गुणसंक्रमं विहितवान् क्लेशान् पुनः कश्चन MohaRāPa. 1. 6; **2** transfer of inner qualities, MohaRāPa. 1. 6.

अन्तर्गुणा (antar-guṇā) *adj. (f.)* **A** having inner, i.e. unmanifest nature अन्तर्गुणा भगवती परदेवतेति प्रत्यग्गुणेति भगवानपि भाष्यकारः SaṁkṣeŚā. 3. 221 (ii. 278. 23) (comm. गुणशब्दः स्वरूपपरः); **B** having excellence within तथाप्यन्तर्गुणामेव देवतां भजते VedāSaṁ. 124. 6.

अन्तर्गुप्त (antar-gupta) *adj.* concealed inside कूटान्यायुधानि बहिःकाष्ठादिमयान्यन्तर्गुप्तनिशितशस्त्राणि ManvaMu. 263. 20 (*on* 7. 90)

अन्तर्गुप्तता (antargupta-tā) *f.* the state of being concealed inside निखाततत्वेन, खनित्वान्तर्गुप्ततया स्थापितत्वेन BālamBha. ii. 272. 30 (*on* 2. 150-151)

अन्तर्गुम्फितगरल (antargumphita-garala) *adj.* which has poison placed, i.e. steeped inside अन्तर्गुम्भि(?म्फि)तगरलम् ... पुण्ड्रेक्षुसारतो मधुरम् । कथमिव सत्यं मन्ये खलवचनं गगनकुसुमगन्धनिभम् ŚṛṅgāBhū. 32.

अन्तर्गुरु (antar-guru) *m.* (Astrol.) Jupiter passing through the middle (of odd houses) आर्याणामपि कुरुते विनाशमन्तर्गुरुर्विषमसंस्थः । गण इव षष्ठे दृष्टश्च सर्वलघुतां गतो नयति BṛSaṁ. 104. 51.

अन्तर्गुरु (antar-guru) *adj.* having a long (syllable) in the middle आर्याणामपि कुरुते विनाशमन्तर्गुरुर्विषमसंस्थः BṛSaṁ. 104. 51; (सामान्यशब्दैः श्लेषः साध्यते) अन्तर्गुरुकृपणस्थितिः पक्षे कृपाणस्थितिः KāvyKaVṛ. 51. 9 (3. 1); प्रमद निकर विकर इत्यादिशब्दानामादौ अन्तर्गुरुशब्दः प्रयोज्यः KāvyKaVṛ. 51. 10 (3.1)

अन्तर्गुरुशुक्र (antar-guruśukra) *adj.* **1** having the (planet) Jupiter and the (planet) Venus inside, i.e. being favourable तच्चेदम् (तनुः) ... अन्तर्गुरुशुक्रमप्यनाथम् AvantiKa. 42. 18; **2** having thick or powerful semen inside, AvantiKa. 42. 18

अन्तर्गुहा (antar-guhā) *f.* **1** type of vein (सिरासंख्यामुखादीनि) अथ दशान्तरगु-(गुं)हाः दश बहिर्गुहाश्च (सिरा भवन्ति) BhelaS. 83. 28 (4.4); **2** inner or internal cave आकाशादि कारणम् ... कार्यं सृष्ट्वा ... तदनुप्रविष्टमिवान्तर्गुहायां बुद्धौ द्रष्टृ श्रोतृ मन्तृ विज्ञातृ इत्येवं विशेषवदुपलभ्यते TaiUBh. 261. 6 (*on* 2. 6)

अन्तर्गूढ (antar-gūḍha) *adj.* **Ai** concealed or hidden inside तं भावार्थम् ... अन्तर्गूढं क्षितिरिव नभोबीजमुष्टिं दधाना ... राज्ञी राज्यं विधिवदशिषत् RaghuVa. 19. 57 (comm. अन्तर्गूढमन्तर्गतं तं गर्भं दधाना); केलिद्यूतविधौ पणं प्रियतमे कान्तां पुनः पृच्छति । अन्तर्गूढविगाढसंभ्रमरसस्फारीभवद्रण्डया तूष्णीं शारिविसारणाय निहितः स्वेदाम्बुगर्भः करः SubhāRaK. 19. 47; **Aii** sown or scattered (as seed) under the ground, RaghuVa. 19. 57; **Aiii** underlying, i.e. suggested अन्तर्गूढानर्थानव्यञ्जयतः ... संदर्भस्य नदस्य च न रसः प्रीत्यै रसज्ञानाम् ĀryāSaŚa. Intro. 44*; **B** gone deep inside, i.e. accumulated for a long time पित्तेऽन्तर्गूढे विमार्गगे वा स्वेदः (उभयार्थकारी) AṣṭāSaṁ. i. 75. 5 (1. 12); **Ci** deeply rooted in the mind अन्तर्गूढदुरन्तमोहतिमिरप्राग्भारमुच्छेदयंश्चेतःसद्मनि योगिनां विजयते बोधप्रदीपो हरः SūktiMu. 1. 6; **Cii** deeply rooted, significant अन्तर्गूढं वचनमतुलं वायुतः संनिशम्य PavaDū. (Vā.) 90; **D** deep, i.e. top secret अन्तगढ(better अन्तर्गूढ) केवलज्ञानं प्राप्य मेतार्यमुनिर्मोक्षं जगाम KathāK. 89. 29 [being inward, APTE]

अन्तर्गूढकोपसंभारा (antargūḍha-kopasambhārā) *adj. (f.)* having excessive quantity of anger deeply rooted in the mind न तथाहमेवंविधावस्थमात्मानमनुचिन्तयामि यथान्तर्गूढकोपसंभाराया देव्या लोचनगोचरगतां तामेव तपस्विनीं सागरिकाम् Ratnā. 3. 3(1)

अन्तर्गूढघनव्यथ (antargūḍha-ghanavyatha) *adj.* which involves intense agony deeply rooted in the mind अनिर्भिन्नगभीरत्वादन्तर्गूढघनव्यथः । पुटपाकप्रतीकाशो रामस्य करुणो रसः UttaRāC. 3. 1.

अन्तर्गूढधैर्यानुभाव (antargūḍha-dhairyānubhāva) *adj.* whose character of resolution is deeply rooted in the mind अन्तर्गूढधैर्यानुभावः सुखमवनिमशेषां दोष्णि संग्रामराजः । ... फणकुल उरगाणामीशितेव न्यधत्त RājTa. (Ka.) 6. 368.

अन्तर्गूढप्रमा (antargūḍha-pramā) *f.* consciousness which is deep, i.e. top secret अन्तर्गूढप्रमा हंसः PāśBraU. 2. 5.

अन्तर्गूढभुजंगम (antargūḍha-bhujaṅgama) *adj.* having a serpent hidden inside अन्तर्गूढभुजंगमं गृहमिव ... °दुष्टजनैः ... अनार्यीकृतम् ... राज्ञां मनः PañcT. 1. 129 (142.1); Pañcā. 100. 3.

अन्तर्गूढम् (antargūḍham) *adv.* in a manner of concealing or hiding the mind or intention दीर्घं निःश्वस्यान्तर्गूढं स्तनवदनजघनरुचिरां निरीक्ष्य तथा पुनः पृष्ठे न्यस्तं देवेन्द्रेण प्रवरमणिकनकवलयं भुजंगविजृम्भितम् NāṭyaŚā.15.152.

अन्तर्गूढरसोदय (antargūḍha-rasodaya) *adj.* having the appearance, i.e. manifestation of sentiment hidden inside स नारिकेलपाकः स्यादन्तर्गूढरसोदयः PratāYaBhū. 69. 3.

अन्तर्गूढविरूढ (antargūḍha-virūḍha) *adj.* which has grown as hidden inside अन्तर्गूढविरूढनाभिनलिनप्राप्तास्यपङ्केरुहः क्रीडाक्रोड इवोद्दिधीर्षति पुनर्दंष्ट्राग्रलग्नां भुवम् CaṇḍaKau. 2. 8.

अन्तर्गूढविष (antargūḍha-viṣa) *adj.* having poison, i.e. weakedness deeply rooted in the mind अन्तर्गूढविषो बहिर्मधुमयश्चातीव मायापटुः । को नामायमपूर्वनाटकविधिर्यः शिक्षितो दुर्जनैः Tantrākhyā. 30. 26; Hitopa. 2. 150; Subhāṣi. 342; Pañcā. 74. 4 [having hidden poison within, MW.]

अन्तर्गूढाभिमानोक्ति (antargūḍhābhimānokti) *adj.* having words of self-respect deeply rooted in the mind (कविः) अन्तर्गूढाभिमानोक्तिरुदात्त इति गीयते RasāSu. 267. 14 (3. 146)

अन्तर्गृणत् (antar-gṛṇat) *adj.* muttering to one's own self रोषाद्धत हतेत्यन्तर्गृणद्भिः स्फुरिताधरैः । कटाक्ष्यमाणो विकटं कुमारैः ... सुवेगः ... निर्जगाम TriṣaŚaPuC. i. 5. 156.

अन्तर्गृह (antar-gṛha) *n.* [Liṅgānu. (Ha.) 15. 5] **1Ai** inner apartment of a royal palace, harem, female apartment (भीमः) तूष्णीमन्तर्गृहं गच्छेत्यभिधाय द्विजोत्तमम् MahāBhā. i. 1667* (1); अन्तर्गृहमाविश्य राजा दशरथस्तदा । सूतमाज्ञापयामास Rāmā. ii. 4. 3; अन्तर्गृहनित्यम् (v.l. अन्तर्गृहं नित्यम् Shamasastry's Ed.) अभ्यधिगन्तारम् ... शङ्केतेति शङ्काभिग्रहः ArthŚā. ii. 143. 6 (4.6); नार्यः ... । अन्तर्गृहादारुरुहुर्विमानम् Saund. 6. 35; उष्णैश्चान्तर्गृहैः सुखैः । मारुतप्रबलः शीघ्रं प्रशाम्यति मदात्ययः CaraS. vi. 24. 135; कंसः ... अन्तर्गृहम् ... प्रविवेश ViṣṇuP. v. 4. 17; BrahmP. 183. 11; स भुजंगमः । अन्तर्गृहे तां सुदतीम् ... अधारयत् MārkP. 23. 74; शिशोर्जातस्य ... चतुर्थे मासि स्नातालंकृतस्य ... धात्र्या सहान्तर्गृहान्निष्क्रमणं देवतागारप्रवेशनं च KāśyaS. 316B. 1; एषा हि प्रविश्यान्तर्गृहमुच्चैः प्रहसिता PadmPrā. 18. 3; (राजा) तस्मिन्नेवान्तर्गृह आत्मविनोदाय स्त्रीभिर्नवोढभार्यादिभिर्यथासुखं क्रीडेत ManuBh. ii. 68. 3 (*on* 7. 221); कथमन्तर्गृहं राज्ञां छद्मना प्रविशेत्पुमान् SkandP. iii (3). 9. 20; भुक्त्वा भुक्त्वा परित्यक्ताम् एकामेकां दिने दिने । अन्तर्गृहेषु संस्थाप्य पुनरन्याः स्त्रियो धृताः SkandP. iii (3). 15. 25; विशत्यन्तर्गृहं दुःखितः SaraKaṇṭhā. 632. 14; दारुपुत्रिका । कारयित्वा मयैकान्ते परिणीता ... । आनीय स्थापिता चान्तर्गृहे KathāSaSāg. xii. 7. 166; अन्तर्गृहस्य कोणे स्यादैशाने ... वास्तुमण्डलम् Mānaso. iii. 1. 73; ŚilpaRa. ii. 31. 124; चन्द्रचरणैरास्वादितान्तर्गृहे मात्रा साकमुपेत्य शेषरजनीभागः सुखं नीयताम् GopāKeCan. 138. 20; अन्तर्गृहं नयति वर्धितरोमहर्षम् ... पुरन्ध्रीः ... एष वातः SūktiMu. 63. 19; राजा ... सर्वसहितोऽन्तर्गृहं प्रविश्य ... मुदितो भुञ्जीत VīraMi. (Rājanīti.) 85. 9 [AnekāSa. 337; AnekāTi. 2. 75]; **1Aii** inner part or interior of the house सः (सर्वार्थसिद्धिः) ... । बहिःप्रयाणाय चकार बुद्धिमन्तर्गृहे नाग इवावरुद्धः BuddhaC. 3. 2; विडङ्गतण्डुलानां द्रोणम् ... मधूदकोत्तरं प्रावृषि भस्मराशावन्तर्गृहे चतुरो मासान् निदध्यात् SuśruS. iv. 27. 6; अन्यतमेन गृहपतिना बुद्धप्रमुखो भिक्षुसंघोऽन्तर्गृहे भक्तेनोपनिमन्त्रितः GiMs. iii (2). 128. 2; अनिन्दिरे ... दिवसकररुचोऽन्तं ध्वान्तमन्तर्गृहेषु ŚiśuVa. 11. 59 (comm. अन्तर्गृहेषु गर्भागारेषु); अन्तर्गृहे कृष्णमवेक्ष्य चोरं बद्ध्वा कवाटं जननीं गतैका KṛṣṇaKa. 2. 53; अखिलबल्लवीः पुलकयन्तमन्तर्गृहे ... भजे ... केशवम् StavMā. 29. 15; **1B** sanctum sanctorum (of a temple wherein the image of a deity is installed) पश्चादन्तर्गृहं शंभोः प्रविश्य सुसमाहितः । पञ्चपुष्पाञ्जलिं दद्यात् ब्रह्मभिः पञ्चभिः SaurP. 42. 22; **2** name of a sacred place of pilgrimage काश्यां स्थानानि चत्वारि । तेषामभ्यर्हितमन्तर्गृहम् BhasmJāU. 564. 20; ये चान्ये काश्याम् ... अन्तर्गृहे रेतो मूत्रं पुरीषं वा विसृजन्ति तदा तेन सिञ्चन्ते पितॄन् BhasmJāU. 566. 24; विश्वभर्तुर्भवनमन्तर्गृहम् TristhaSe. 101. 8; अन्तर्गृहं तु पूर्वादिषु गङ्गामध्यब्रह्मेश्वरगोकर्णेश्वरभारभूतेश्वरावधिकम् TristhaSe. 103. 29; अन्तर्गृहस्य यात्रा वै कर्तव्या प्रतिवासरम् TristhaSe. 285. 11; एवं च काशीवाराणसीअविमुक्तान्तर्गृहभेदेन क्षेत्रचातुर्विध्यात् VīraMi. (Tīrtha.) 176. 4; काश्यां तावत्काशीवाराणस्यविमुक्तमन्तर्गृहं

चेति चत्वारि स्थानानि बृहज्जाबालादौ आम्नातानि LalitāSaBh. 203. 22 (*on* 242) [Kośas give *antargṛha* as the synonym of the following words : *koṣṭha*, AmaK. 2415; AnekāK. 182; also they give *antargṛha* as the meaning of *koṣṭha*, Vaija. 231. 22; NānārthāSaṁ. i. 67. 290; NānārthaMa. 490; ŚabdaRa. (Vā.) 3799]

अन्तर्गृहगत (antargṛha-gata) *adj.* [*f.* - ā] **Ai** who has entered into the inner apartment अन्तर्गृहगतः स्थविरस्त्रीपरिशुद्धां देवीं पश्येत् ArthŚā. i. 101. 1 (1. 20); **Aii** which has happened or occurred in the inner apartment यथा निश्शूत्कारं श्वसितमपि चान्तर्गृहगतम्। ध्रुवं रामा रामं युवतिविपरीतं रमयति PādaTā. 30. 11; **B** who has entered into the sanctum sanctorum अन्तर्गृहगता देवी पुपूजे देवताः GaṇeP. ii. 82. 28.

अन्तर्गृहचर (antargṛha-cara) *adj.* roaming inside the house, domesticated अन्तर्गृहचरान्पुष्टान् ... शुनश्चोपानयद्बहून् Rāmā. ii. 1635*(1)

अन्तर्गृहचर (antargṛha-cara) *m.* spy (*lit.* staying in the interior of the house (of other kings or officials etc.)) अन्तर्गृहचरास्तेषां कुब्जवामनषण्डकाः ArthŚā. i. 61. 3 (1.2)

अन्तर्गृहत्व (antargṛha-tva) *n.* the state of being the sacred place of pilgrimage Antargṛha विश्वभर्तुर्भवनमन्तर्गृहत्वेन ख्यातम् VīraMi. (Tīrtha.) 176.3.

अन्तर्गृहनित्य (antargṛha-nitya) *adj.* who is always in the inner apartment or harem अन्तर्गृहनित्यम् अभ्यधिगन्तारम् ... शङ्केतेति शङ्काभिग्रहः ArthŚā. ii. 143. 6 (4. 6) (comm. गर्भगृहनित्योपविष्टम्)

अन्तर्गृहपरिच्छेद (antargṛha-pariccheda) *m.* demarcation of the sacred place of pilgrimage Antargṛha अन्तर्गृहपरिच्छेदश्च काशीखण्डे TristhaSe. 103.14.

अन्तर्गृहम् (antargṛham) *adv.* inside the house स मूषिकः। ... आजगाम स्वमालयम् ... अपश्यत्ततः कान्तामन्तर्गृहमचेतनाम् BṛKathāŚloSaṁ. 20. 384; अलिंजरः ... परीक्षितुम्। अन्तर्गृहं कपाटस्य पश्चाद्गूढतनुः स्थितः PrabhāC. 20. 29; तेजः सवितुः ... तदनु प्रविष्टमन्तर्गृहमन्यानर्थान् PraboSu. 117.

अन्तर्गृहमान (antargṛha-māna) *n.* measure of the sacred place of pilgrimage Antargṛha अन्तर्गृहमानमुक्तम् VīraMi. (Tīrtha.) 177. 24; 178. 17.

अन्तर्गृहयात्रा (antargṛha-yātrā) *f.* pilgrimage to the Antargṛha प्रतिचतुर्दशि पापक्षयार्थमन्तर्गृहयात्रापि कार्या TristhaSe. 249. 1; 285. 10.

अन्तर्गृहयात्रादि (antargṛhayātrādi) *adj.* pilgrimage to the Antargṛha etc. अन्तर्गृहयात्राद्यसमर्थस्य समर्थस्यापि वा तदकुर्वाणस्यैकाहारत्वादिधर्मविशिष्टमासवासाद्यावज्जीवकृतं मानसादिक्षुद्रपापं नश्यति TristhaSe. 105. 14; तत्राद्यातिक्रमे विशेषविहितमेवान्तर्गृहयात्रादिप्रायश्चित्तम् ... ज्ञेयम् TristhaSe. 123.26.

अन्तर्गृहस्थ (antargṛha-stha) *adj.* staying in the inner apartment or harem चन्द्रनामामृताख्यम् ... कृत्वा गेहम् ... तस्यैवान्तर्गृहस्थो वियुतपरिजनस्तत्पिबेन्निश्चितात्मा KalyāKā. 6. 58.

अन्तर्गृहस्थित (antargṛha-sthita) *adj.* present in the interior of the house जघान तं च तज्जारं खड्गेनान्तर्गृहस्थितम् KathāSaSāg. vi. 8. 183.

अन्तर्गृहादि (antargṛhādi) *adj.* interior of the house etc. यथाकाशं कस्यचिदनवकाशात् अन्तर्गृहादेर्निर्गतस्य सुखात्मकं शान्तं भवति SāṁkhyaKāBh. 23. 8 (*on* 38)

अन्तर्गृहादिकल्पना (antargṛhādi-kalpanā) *f.* construction of an inner part or interior of the house etc. तत्र पुर्याम् ... अन्तर्गृहादिकल्पनां कृत्वा ... आचार्यः ... सुखं चिरमास ŚaṅkaVi. (Ā.) 164. 6.

अन्तर्गृहाभ्यन्तरराजमान (antargṛhābhyantara-rājamāna) *adj.* shining inside the inner apartment भूमीरमणः ... अगात्पटागारम् ...। प्राकारचक्रप्रतिमानशिल्पपटावृति ...। अन्तर्गृहाभ्यन्तरराजमानसौवर्णमञ्चावलिसंविधानम् Raghunā.9.33.

अन्तर्गृहीत (antar-gṛhīta) *adj.* **A** held or fixed inside तयोस्तु नेत्रम् ... त्र्यङ्गुलपर्यन्तप्रवेशमूलच्छिद्रम् ... संनिविष्टकर्णिकं कर्णिकान्तःप्रतिबद्धसूत्रान्तर्गृहीताग्रपिधानघनचैलवर्ति ... कर्णिकाद्वयं कारयेत् AṣṭāSaṁ. i. 147. 4 (1. 28); **B** included within (itself) अकुलं भैरवात्म तेनाकुलमेवान्तर्गृहीतकलनाकं कुलशक्तेरत्रैव निवेशात् ParāTri. 164. 13.

अन्तर्गृहोत्तरद्वार् (antargṛhottaradvār) *f.* northern gate of the sanctum sanctorum (of the temple) भारभूतेश्वरं लिङ्गम् ...। अन्तर्गृहोत्तरद्वारि ध्यात्वा शिवपुरे वसेत् SkandP. iv. 55. 13.

अन्तर्गेह (antar-geha) *n.* **1** inner apartment, harem पार्थिवः ...। अन्तर्गेहं प्रविशति तदा मज्जनादिक्रियाश्च। प्रीतश्चक्रे PadmP. (Ra.) 29. 115; अनिर्गच्छन्नन्तर्गेहात् ... दर्शनं प्रादाद्भृत्यानाम् RājTa. (Ka.) 8. 833; शयनाच्छादनैरुष्णैश्चान्तर्गेहैः सुखप्रदैः ... प्रशाम्यति मदात्ययः BhāvPra. (Bhā.) viii. 20. 65; **2** name of a sacred place of pilgrimage वाराणस्यां कृतं पापमन्तर्गेहे प्रणश्यति। अन्तर्गेहे कृतं पापं पैशाचनरकावहम् SkandP. iv. 64. 68.

अन्तर्गोष्ठ (antar-goṣṭha) *m.* [AltGr. II. 1. 312] **1** [Loc.] in the cow-pen अन्तर्गोष्ठेऽग्निमुपसमाधाय भर्ता भार्यामभ्युदानयति MānGS. i. 10. 5; ii. 12. 9; अन्तर्गोष्ठे चटुल नटयन्नत्र नेत्रत्रिभागं निःशङ्कस्त्वं भ्रमसि VidaMā. 2. 53; **2** name of a deity who presides over the cow-pen बलिं हरति ... अन्तर्गोष्ठायेत्यन्तर्गोष्ठे MānGS. ii. 12. 9 [*but* MW. *adj.* being inside of the stable]

अन्तर्गोष्ठा (antár-goṣṭhā) *adj.* (*f.*) present inside the cow-pen प्रा॑तरे॑न्त॑र्गो॑ष्ठासु गो॑षु होतव्यम् MaiS. iv. 2. 11 (iv. 34. 17); भसदि गोनामभिस्तिस्र आहुतीः पशुकाम आकृतिहोमं जुहुयात्। यासामिन्द्र उदाजतम् इति चत्वार आकृतिहोमाः। तेषामेकैकेन प्रातरन्तर्गोष्ठासु गोषु जुहुयात् Gonāmika. 2. 28.

अन्तर्ग्रथिता (antar-grathitā) *adj.* (*f.*) woven or bound in the mind अन्तर्ग्रथितया देहे सर्वदुःखेदयानया। ... तृष्णया वाह्यते जनः YogVā. i. 17. 14 (comm. मनसि ... प्रोतया)

अन्तर्ग्रन्थ (antar-grantha) *m.* internal bondage or binding समिथ्यात्वास्त्रयो वेदा हास्यप्रभृतयोऽपि षट्। चत्वारश्च कषायाः स्युरन्तर्ग्रन्थाश्चतुर्दश YaśasCam. ii. 366. 26.

अन्तर्ग्रह् (antar-grah-) IX.P. to hold or to obstruct inside प्रजापतिः ... अथासुरान् दीर्घवंशेनान्तरगृह्णात् JaimiBr. 2. 150.

अन्तर्ग्राम (antar-grāma) *m.* interior of village अन्तर्ग्रामेषु ... प्रणेदुरशिवां शिवाः BhāgP. iii. 17.9; ŚivaP. ii (3). 15. 10 (139A. 6); मूत्रपुरीषयोः कर्म ...। अन्तर्ग्रामेऽपि गृहाद् दूरतो न कुर्यात् VīraMi. (Āhnika.) 23. 10.

अन्तर्ग्राम (antar-grāma) *adj.* situated in the interior of village नृपोत्तमः ...। सुवर्णभुक्तिकस्यान्तर्ग्रामं कासारकं ददौ BallāC. 113. 3.

अन्तर्ग्रामनगरचर्या (antargrāmanagara-caryā) *f.* act of wandering in the interior of a village and town रात्रौ स्पर्शाशङ्कयान्तर्ग्रामनगरचर्याप्रतिषेधः ManuBh. ii. 346. 15 (*on* 10. 54)

अन्तर्ग्राह (antar-grāha) *m.* crocodile (staying) inside (the water) अन्तर्ग्राहेण ग्रस्तस्तु यास्यामि निधनम् BrahmP. 35. 38.

अन्तर्ग्लान (antar-glāna) *adj.* exhausted or emaciated internally अन्तर्ग्लानो बहिःपीनः ... सर्वेऽप्येते परासुकाः BhelaS. 103. 8 (5. 6)

अन्तर्घटनागुणश्री (antarghaṭanāguṇa-śrī) *f.* **1** glory or beauty of the string that joins or connects (the pearls) internally स्वकान्तिकीर्तिव्रजमौक्तिकस्रजः श्रयन्तमन्तर्घटनागुणश्रियम्। कदाचिदस्याः ... नलोऽपि लोकादशृणोद् गुणोत्करम् NaiṣC. 1. 42; **2** glory or beauty of the string that binds the relationship in the mind (of Nala), NaiṣC. 1. 42.

अन्तर्घटित (antar-ghaṭita) *adj.* connected or latched from inside योगद्वयान्तर्घटितकवाटद्वितयं यदि। तद् युग्मं वामयोगान्तर्घटितं त्वेकं कवाटकम् ŚilpaRa. i. 22. 35.

अन्तर्घण (antar-ghaṇa) *m.* **A** name of a region or district in Vāhīka country (*lit.* strikng in the middle) घनान्तर्घणप्रघण° ... °संमदाः JaineVyā. ii. 3. 69 (Vṛ. अन्तर्हन्यतेऽस्मिन्निति अन्तर्घणो वाहीकेषु देशविशेषः); CāndraVṛ. *on* i. 3. 65; KātanVṛ. *on* iv. 5. 60; ŚākaṭāVyā. iv. 4. 18; अन्तःपूर्वाद्धन्तेरप् प्रत्ययो भवति घनादेशश्च भवति देशेऽभिधेये ... अन्ये णकारं पठन्ति। अन्तर्घणो देश इति KāśiVṛ. *on* iii. 3. 78; SiddhaHe. v. 3. 34; अन्तर्घनो देशे। बाहीकग्रामविशेषस्य संज्ञेयम्। अन्तर्घणः इति पाठान्तरम् SiddhāKau. 573A.5 (*on* iii. 3. 78); **B** open space or court-yard between the entrance door and the house तस्मिन्नन्तर्घने(v.l. °घणे) पश्यन् ... स्त्रियम् Bhaṭṭi. 7. 63 [name of a village, MW.]

अन्तर्घणराज (antarghaṇa-rāja) *m.* king of the region in Vāhīka country यमभीष्मवेश्मप्रघणे मुखेऽन्तर्घणराजम् ...। निदधत्सह प्राट रणप्रघाणे ... सः DyāśraKā. 12.66 (comm. अन्तर्घणाख्यदेशभेदनृपम्)

अन्तर्घन (antar-ghana) *m.* **A** name of a region or district in Vāhīka (*lit.* striking in the middle) अन्तर्घनो देशे P. iii. 3. 78; अन्तर्घनोद्घनौ देशात्याधानयोः Kātan. iv. 5.60; अन्तर्घनः संज्ञीभूतो वाहीकेषु देशविशेष उच्यते KāśiVṛ. *on* iii. 3. 78; अन्तर्हन्यते यस्मिन्योऽन्तर्घनो देशः KatanVṛ. *on* iv. 5.60; देशेऽन्तर्घनान्तर्घणौ। अन्तः पूर्वपदात् हतेः देशेऽर्थेऽच् घनघणौ आदेशौ निपात्येते। अन्तर्हन्यतेऽस्मिन्निति अन्तर्घनः। अन्तर्घणो वा देशः ŚākaṭāVyā. iv. 4. 18; SiddhaHe. v. 3. 34 [KośaKaTa. 2. 751]; **B** open space or court-yard between the entrance door and the house तस्मिन्नन्तर्घने पश्यन् ... स्त्रियम् Bhaṭṭi. 7. 63 (comm. अवकाशे) [name of a village, MW.]; cf. **अन्तर्घण.**

अन्तर्घनच्छद (antarghana-cchada) *m.* covering which is thick from inside (identified with mystic syllable *huṁ* and *hūṁ*) बाह्यावृतौ तदस्त्राणि

यजेदन्तर्घनच्छदम् MṛgendraT. iv. 1. 103 (comm. कवचाद्यावरणम्)

अन्तर्घनपानुज (antarghanapānuja) *m.* younger brother of the king of the region Antarghana अन्तर्घणराजमन्तर्घनपानुजं च। निदधत्सह प्राट रणप्रघाणे ... सः DvyāśraKā. 12. 66 (comm. अन्तर्घनदेशराजलघुभ्रातरम्)

अन्तर्घनाङ्गुल (antar-ghanāṅgula) *n.* particular measure of length which is less than fourty finger-breadth यत्तद् घनाङ्गुलं प्रोक्तं तेनाहुस्तस्य लक्षणम्। सार्धत्रयोदशमितं यत्र जातं घनाङ्गुलम्। ... दण्डं सुवर्तुलं लौहं कार्यं धान्यापसारकम्। ... तद्घाताङ्गुलनिघ्नं यत् तत् दन्तर्घनाङ्गुलम् (?तदन्तर्घनाङ्गुलम्) ŚilpaRa. ii. 33. 106.

अन्तर्घनीभवत् (antar-ghanībhavat) *adj.* becoming solidified inside धवलच्छत्रैरन्तर्घनीभवत्। तिमिरं नुनुदे भूयस्तत्काण्डमणिरोचिषा BrahmāṇḍP. iii. 17. 2.

अन्तर्घात (antar-ghāta) *m.* name of a region or country (*lit.* striking in the middle) अन्तर्हन्यतेऽस्मिन्निति अन्तर्घणो वाहीकेषु देशविशेषः ... अन्तर्घातोऽन्यः JaineVyā. 125. 27 (*on* ii.3. 69); अन्तःपूर्वाद्धन्तेरप् प्रत्ययो भवति घनादेशश्च भवति देशेऽभिधेये। ... देश इति किम् अन्तर्घातोऽन्यः KāśiVṛ. *on* iii. 3. 78; अन्तर्घनः। अन्तर्घणो वा देशः। अन्यत्र अन्तर्घातः ŚākaṭāVyā. iv. 4. 18; SiddhaHe. v. 3. 34; Prasā. ii. 658. 8 [a place between the entrance-door and the house, MW.]

अन्तर्घुणास्वादित (antarghuṇāsvādita) *adj.* relished or eaten up by insects or worms inside न प्राप्येत नरैर्गुवाकफलमप्यन्तर्घुणास्वादितम् YātrāPra. 8. 21.

अन्तर्ज (antar-ja) *adj.* **i** produced inside विद्राद्विसर्पमन्तर्जम् CaraS. vi. 21. 27 (1941 Ed.); (अर्शसः) यन्त्रशस्त्रेण मध्यास्तु अन्तर्जाश्चान्तरौषधैः HārīS. iii. 11. 22; **ii** born inside नीलङ्गुः कृमिरन्तर्जः AbhidhāCin. 1202 [bred in the interior (of the body, as a worm) MW.; born or bred in the interior (as a worm etc.) Apte]

अन्तर्जटापिहित (antarjaṭā-pihita) *adj.* hidden by the matted hair inside अन्तर्जटापिहितसोमसुरापगाय ... बटवे नमस्ते NavaSāC. 18. 16.

अन्तर्जठर (antar-jaṭhara) *n.* interior of the abdomen or stomach कुक्षिस्था अर्णवाः सप्त जठरे भुवनान्यथो ... यज्ञोऽन्तर्जठरे स्थितः VāmaP. 92. 20 [AmaK. 2415 and AnekāK. 182 give *antarjaṭhara* as the synonym of *koṣṭha* and NānārthaMa. 489 gives *antarjaṭhara* as the meaning of *koṣṭha*] [the stomach, MW.; Apte]

अन्तर्जठरम् (antarjaṭharam) *adv.* in the stomach, Apte.

अन्तर्जन (antar-jana) *m.* people of the inside or family or household शाक्यकन्या न कंचिद् दृष्ट्वा वदनं छादयति स्म श्वश्रूं वा श्वशुरं वा अन्तर्जनं वा LaliVi. 12. 33 (19); मारः ... सर्वमन्तर्जनं संनिपात्य ... अध्यभाषत् LaliVi. 21. 4 (25); सः ... अन्तर्जनम् ... समाश्वास्य ... महासमुद्रमवतीर्णः Divyāva. 186.16; कैनेय ऋषिः सरात्रमेवोत्थायान्तर्जनमामन्त्रयते GiMs. iii (1). 263. 15; तेन सैव गृहव्यापारे नियुक्ता। अन्तर्जनश्च सर्वोऽभिहितः। यो युष्माकं विशाखया दत्तेन परितुष्यति तेन स्थातव्यम् GiMs. iii. (2). 61. 5; MahāVyu. 188. 40 [DBHS.]

अन्तर्जनयत् (antar-janayat) *adj.* producing within अहं तु तेन तत्संबन्धि-नालापेन शब्दमयेनापि स्पर्शसुखमिवान्तर्जनयता ... मदनावेशमन्त्रेणेवावेश्यमाना ... आर्यामपश्यम् Kād. 149. 15.

अन्तर्जनसहाय (antarjana-sahāya) *adj.* assisted by the people of the inside or family or household स गृहपतिः ... वनखण्डमन्तर्जनसहाय उद्यानभूमिं निर्गतः Divyāva. 193. 1.

अन्तर्जनि (antar-jani) *adj.* (used as noun) (that) which is born or bred inside, i.e. worm कृमिरन्तर्जनिः ParaNā. 1087.

अन्तर्जनितकल्लोल (antarjanita-kallola) *m.* wave or ripple produced inside अन्तर्जनितकल्लोलैर्नृत्यमानमिवाभितः। आससाद भृगुश्रेष्ठस्तत्सरोवरमुत्तमम् BrahmāṇḍP. ii. 22. 67.

अन्तर्जनितजडिमन् (antarjanita-jaḍiman) *m.* dullness produced in the mind अन्तर्जनितजडिमकाकुव्याकुलं व्याहरन्ती। ... ध्यानलग्ना मृगाक्षी GītGo. vi. 12. 2 (Rasamañjarī अन्तश्चित्ते जनितो जडिमा जाड्यं यत्रैवं यथा स्यात्)

अन्तर्जनितदाह (antarjanita-dāha) *adj.* which has burning (sensation) produced in the mind or heart यस्य च हृदयस्थितानपि पतीन्दिधक्षुरिव प्रतापानलः ... रिपुसुन्दरीणामन्तर्जनितदाहो दिवानिशं जज्वाल Kād. 6. 10.

अन्तर्जन्मन् (antar-janman) *n.* inward birth, MW.

अन्तर्जन्मिक (antarjanm-ika) *adj.* arising or occurring within the life-time आजन्मिकं भवेऽथान्तर्जन्मिकं मध्यजन्मजम् KośaKaTa. 1. 45.

अन्तर्जप (antar-japa) *m.* muttering (of formulae to oneself) in the mind गृहाणान्तर्जपं मातः MahNirvāT. 5. 156.

अन्तर्जपविहीन (antarjapa-vihīna) *adj.* deviod of muttering (of formulae) in the mind प्राणायामः ...। अन्तर्जपविहीना ये ते त्वगर्भा इति स्मृताः ĪśānŚiPa. ii. 66. 50.

अन्तर्जम्भ (antar-jambhá) *m.* [Loc.] in between the jaws अग्नीषोमौ वाऽएतमन्तर्जम्भऽआदधते यो दीक्षते ... स हविर्वाऽएष भवति यो दीक्षते तदेनमन्तर्जम्भऽआदधाते ŚatBr. III. iii. 4. 21; III. vi. 3. 19 [the inner part of the jaws, MW.; Apte]

अन्तर्जम्भम् (antarjambhám) *adv.* in between the jaws अग्नीषोमौ वा एतमन्तर्जम्भमादधाते यो दीक्षते ... स हविर्ह्येनयोर्भवति तस्मादेनमग्नीषोमावन्त-र्जम्भमादधाते ŚatBr. (K.) IV. iii. 4. 14; IV. vi. 3. 14.

अन्तर्जल (antar-jala) *n.* **1A** interior or bottom of water अन्तर्जले देवगृहे वल्मीके ... न ग्राह्याः पञ्च मृत्तिकाः VāsiDS. 6. 17; SkandP. i (2). 41.134; VāmaP. 14.32; SmṛtiCan. ii. 243.1; तच्छिरश्चरणं मुक्त्वा पपातान्तर्जले MahāBhā. ix. 38.17; VāmaP. 39.12; प्रविष्टोऽन्तर्जले यस्तु प्राणांस्त्यजति ... याति यानेन तत्पथम् MahāBhā. xiv. App.I. 4 (819); xiv. App. I. 4 (3210); मृत्तिकाः सप्त न ग्राह्याः वल्मीके मूषिकस्थले। अन्तर्जले ... सुरालये AtriS. 321; YamaSm. 67; DakṣaSm. 2.44; अन्तर्जलादावसथात् ... वर्जयेत् ... मृदः MārkP. 34. 65; BrahmP. 221. 64; अन्तर्जलात् जलमध्यात् VīraMi. (Āhnika.) 49.22; **1B** middle of water अन्तर्जले वाघमर्षणम्। त्रिरावर्तयत् सर्वपापेभ्यो विमुच्यते GautDS. iii. 6. 11; BaudhDS. iv. 4. 2-3; iv. 4. 5-7; द्रुपदादिवेन्मुमुचानः ... त्रिरन्तर्जले पठन् BaudhDS. iv. 4. 4; BṛhaspaSm. 312. 22; BṛParāSm. 4. 105; नाघमर्षणात् परतरमन्तर्जले ŚaṅkhaLīDS. 106; YamaSm. 32; ŚaṅkhaSm. 12. 2; जप्त्वा ... अघमर्षणम् अन्तर्जले विशुध्येत दत्त्वा गां च पयस्विनीम् YājñaSm. 3.301; Mitā. 506. 20 (*on* 3. 301); DīpKa. 106. 11 (*on* 3. 302); VīraMi. (Āhnika.) 268. 23; उदीयुः पद्माः ...। अन्तर्जलावासविरूढशीतत्रस्ता वसन्तातपकाम्ययेव JānaHa. 3.4; द्रुपदां नाम गायत्रीं जजापान्तर्जले हरः VāmaP. 60. 18; अन्तर्जले ... अघमर्षणः ViṣṇuDhaP. ii. 124.12; NaraP. 58.70; अन्तर्जलादीनि जलमध्ये क्रियमाण्यघमर्षणादीनि VīraMi. (Paribhāṣā.) 85.23; 88.5; **1C** underneath of the water अपकृष्टो महाबाहुः ... अन्तर्जले ... उलूप्या कामयानया MahāBhā.i.206.13; दुर्योधनः ... अन्तर्जलात् समुत्तस्थौ MahāBhā. xi. 31. 35; BrahmāṇḍP. i. 7. 12; अन्तर्जले स सुष्वाप काष्ठभूतो महामुनिः MahāBhā. xiii. 50. 9; किं त्वमन्तर्जले वीर विगाहे ब्रूहि कारणम् Rāmā. V. 51* (6); महर्षिरन्तर्जले द्वादशाब्दं कालमुवास ViṣṇuP. iv. 2. 69; v. 19. 1; कथमन्तर्जलेऽगाधे न्यगृह्णाद्भगवानहिम् BhāgP. x.16.2; सा ... पाणिना द्विजम्। चकर्षान्तर्जलात् VāmaP. 22. 18; (तपः) सोऽन्तर्जले चक्रे SkandP. i (2). 14. 72; RāmāMañ. 490. 14; BṛKathāMañ. ix. 1.200; असाध्या तव विद्येयं साध्यतेऽन्तर्जले KathāSaSāg. xii. 25. 50; DaśāvaC. 8. 769; कालिन्द्याः ... अन्तर्जले मग्नस्य ... अहेः कुतोऽन्वेषणा SubhāRaK. 40. 1; Pañcā. 75.1; SūktiMu. 121. 11; SiṁhāDvā. 34. 2; अन्तर्जले संविशन् ... अनयत् कालं चिदं यः सुखम्। सः ... भृङ्गः ... कथं वर्तते AnyāŚ. (Nī.) 77; **1D** water inside माघं दाहं नयति दिविदः शान्तिमन्तर्जलेन SamaMā. 2.39; **2** island अन्तरीपं तु द्वीपमन्तर्जले AbhidhāCin. 1078; ParaNā. 804.

अन्तर्जल (antar-jala) *adj.* [*f.* - ā] **1** which is at the interior or bottom of water वल्मीकमूषिकोद्भूतां मृदं नान्तर्जलाम् ... आदद्यात् ViṣṇuP. iii. 11. 16; मृदमन्तर्जलाम् ... नादद्यात् BrahmVaiP. i. 26. 37; iv. 75. 73; **2** which is under water तपसा निर्ममे देवी ...। अन्तर्जलानि वेश्मानि VarāP. 92. 6; PadmP. v. 30. 8.

अन्तर्जलकार्य (antarjala-kārya) *n.* act (to be performed) in the middle of water (पञ्चविधं योगम् ... अनुस्मरेत् ... अन्तर्जले) अन्तर्जले अन्तर्जलकार्ये स्नानादौ VīraMi. (Paribhāṣā.) 88. 5.

अन्तर्जलगत (antarjala-gata) *adj.* [*f.* - ā] **A** standing in the middle of water अन्तर्जलगतोऽघमर्षणेन षोडश प्राणायामान् धारयित्वा ... देवयजनमुदानयति BaudhGS. iii. 3. 5; BaudhDS. ii. 10. 32; iii. 4. 7; अन्तर्जलगतोऽघमर्षणेन त्रीन् प्राणायामान् धारयित्वा ... दर्भैरासनानि कल्पयति BaudhGS. iii. 9.3; ĀgniveGS. ii. 6.2 (95. 14); BaudhDS. ii. 5. 12; आगन्तस्तु शरग्राही न पश्यति यदा जले। अन्तर्जलगतं सम्यक् तदा शुद्धिं विनिर्दिशेत् BṛhaspaSm. 88. 60; अन्तर्जलगतो भूत्वा पञ्च मन्त्रान् क्रमाज्जपेत् ParaS. 3. 86; व्याघ्रः ... हन्तुमुद्यतः। अन्तर्जलगतं विप्रम् VarāP. 37. 20; **B** being under water सः ... अन्तर्जलगतो भूत्वा चचार ... तपः SkandP. v (2). 25. 17; अन्तर्जलगताः पद्माः श्रोतुकामा इवोत्थिताः

KāvyMī. 82. 20; **C** being at the interior or bottom of water वापीकूपतडागेषु नाहरेद् बाह्यमृत्तिकाः। अन्तर्जलगता ग्राह्याः VīraMi. 35. 26 (*on* 1. 17)

अन्तर्जलचर (antarjala-cara) *adj.* **A** living in the water, aquatic त्वमाप्यन्तर्जलचरः कच्छपः संभविष्यसि MahāBhā. i. 25. 17; अन्तर्जलचरो महान्। निजग्राह जले ग्राहः कुन्तीपुत्रम् MahāBhā. i. 208. 9; SkandP. i (2). 1. 25; अन्तर्जलचरो मत्स्यः सोऽपि जालेन बाध्यते PadmP. ii. 81. 28; **B** moving under water आममीनाशनास्तत्र किराताः ...। अन्तर्जलचरा घोरा: Rāmā. iv. 39. 27; RāmāMañ. 205. 12; **C** standing in the middle of water अन्तर्जलचरं विप्रम् ... व्याघ्रो जिघृक्षति SkandP. v(2). 25. 19.

अन्तर्जलचारिन् (antarjala-cārin) *adj.* moving under water याते द्वारवतीं तदा मधुरिपौ ... सोत्कण्ठया तद्गीतम् ... राधया येनान्तर्जलचारिभिरन्तर्जलचरैरप्युत्कमुत्कूजितम् VakroJī. 106. 19; Kāvyānu. (He.) 88. 13; SaduktiKa. 43.17.

अन्तर्जलजप (antarjala-japa) *m.* muttering (of sacred formulae standing) in the middle of water अन्तर्जलजपं प्रकृत्यापि स एवाह SmṛtiCan. ii. 489. 5; विधेयं तीव्रनियमैः ... प्राप्यतेऽन्तर्जलजपात् BṛKathāMañ. ix. 2. 988; जलाभिमन्त्रेण तीर्थपरिकल्पनाचमनमार्जनान्तर्जलजपस्नानानि कुर्यात् VīraMi. 48. 10 (*on* 1. 22)

अन्तर्जलजपास्थित (antarjalajapāsthita) *adj.* devoted to the muttering (of sacred formulae standing) in the middle of water (सः) उदतिष्ठन्नदीतीरादन्तर्जलजपास्थितः BṛKathāMañ. ix. 2. 1004.

अन्तर्जलतल (antarjala-tala) *n.* surface of the bottom of water बलभद्रं ददर्श सः ... अन्तर्जलतले स्थितम् ViṣṇuP. v. 18. 38; BrahmP. 192. 38.

अन्तर्जलतलम् (antarjalatalam) *adv.* on the surface of the bottom of water सौवर्णकच्चोलके कुङ्कुमचन्दनकर्पूरं प्रक्षिप्य जले क्षेप्तुमारब्धवती नैगमगृहिणी। प्रमादान्निपतितं तदन्तर्जलतलम् ViviTīKa. 82. 3; 82. 6; PrabaK. 76. 14; 76. 18.

अन्तर्जलत्रिरावर्तन (antarjala-trirāvartana) *n.* triple repetition (of sacred formulae standing) in the middle of water द्रुपदा नाम सा देवी ...। अन्तर्जले त्रिरावर्त्य ... इत्येतत् ... स्तुतिमात्रम्। अन्यथा अन्तर्जलत्रिरावर्तनस्यापि संध्याप्रयोगान्तर्गत-त्वापत्तिः VīraMi. (Āhnika.) 282. 10.

अन्तर्जलदृष्टतारक (antarjaladṛṣṭa-tāraka) *adj.* possessing stars seen, i.e. reflected in the water अन्तर्जलदृष्टतारकम्। ... सरो नभःखण्डमिव व्यराजत SūktiMu. 106.6.

अन्तर्जलधि (antarjaladhi) *adv.* in the sea क्षमाभारे धुर्यः सः ... यः ... निमज्जन्तीमन्तर्जलधि वसुधामुत्तुलयति SubhāRaK. 36. 14; SaduktiKa. 226.33.

अन्तर्जलपाननिर्वापित (antarjalapāna-niravāpita) *adj.* extinguished or quenched by drinking of water inside अन्तर्जलपाननिर्वापितस्य संतापवह्नेरूर्ध्वमुल्लसितं धूमशिखाकलापमिव केशभारम् ... विरलीकुर्वाणः ... न्यषीदत् (सिंहलेन्द्रसूनुः) TilaMañ. 207. 4.

अन्तर्जलम् (antarjalam) *adv.* **1** under water अन्तर्जलमहं सर्वं वहमानोऽगमम् MahāBhā. xii. App. I. 17C (68); UttaRāC. 7. 3; मूर्खवायसः। पतितोऽन्तर्जलं मीनजिघृक्षुः PārśvC. 1. 306; **2** into water तच्छिरः ... पपातान्तर्जले (v.l. °लम्) MahāBhā. ix. 38. 17; गत्वा समुद्रं तेजस्वी विवेशान्तर्जलं हरिः HariVaṁ. 79. 12; MahāP. 28. 114; विधाता ... अन्तर्जलमाविवेश BhāgP. iii. 8. 19; BrahmP. 194. 28; वृकोदरः। ... सरोमध्यं ममज्जान्तर्जलम् PāṇḍaC. 8. 444; Nārāy. iii. 12. 8; **3** in the middle of water अन्तर्जलं जपसिद्धिः ManuBh. i. 451. 13 (*on* 11. 258); AgniP. 155. 8.

अन्तर्जलमानुषी (antarjala-mānuṣī) *f.* female human being who is (living) under water [शौरिः ... अस्त्वसिलता भूत्यै ... कालिंदीव ... यत्रा[न्त]र्जलमानुषीव कमला EI. ii. 276. 2.

अन्तर्जलमार्जन (antarjala-mārjana) *n.* act of cleaning in the middle of water तीर्थसंमार्जने तु ये। मन्त्रास्तैर्मन्त्रितं तोयं मूर्ध्नि ... क्षिपेत् ... तीर्थसंमार्जने स्नानाङ्गभूतान्तर्जलमार्जने VīraMi. (Āhnika.) 283. 17.

अन्तर्जलमृत्तिकाप्रतिषेध (antarjalamṛttikā-pratiṣedha) *m.* prohibition of (collecting of) mud from the bottom of water वापीकूपादिव्यतिरिक्तविषयोऽन्तर्जलमृत्तिकाप्रतिषेधः Aparā. 35. 20 (*on* 1. 17)

अन्तर्जलव्रत (antarjala-vrata) *adj.* observing the vow (by standing) in the middle of water अत्र सप्तजना नाम मुनयोऽन्तर्जलव्रताः ... दिवं गताः RāmāMañ. 181. 8.

अन्तर्जलशयनीय (antarjala-śayanīya) *n.* bed at the bottom of water मरकतमयमेदिन्यां भा[ति] प्रतिबिंबिता कृशांगीयम्। अन्तर्जलशयनीयं निषेवमाणेव EI. viii. 113. 62.

अन्तर्जलशिलारूढ (antarjalaśilārūḍha) *adj.* seated on a stone-slab at the bottom of water स्कन्दसरः ... अन्तर्जलशिलारूढैः ... मुनिभिः (उपलक्षितम्) ŚivaP. vii (2). 40. 7 (600 B. 3)

अन्तर्जलसंस्थित (antarjala-saṁsthita) *adj.* standing in the middle of water स्नात्वान्तर्जलसंस्थितः। अष्टोत्तरसहस्रं तु जपेत् पञ्चदशाक्षरीम् BrahmāṇḍP. iii. 8. 36.

अन्तर्जलसाध्य (antarjala-sādhya) *adj.* to be practised (standing) in the middle of water अन्तर्जलेऽन्तर्जलसाध्येऽघमर्षणजपादौ VīraMi. (Āhnika.) 268.23.

अन्तर्जलसुप्त (antarjala-supta) *adj.* who has slept under water जह्नुं तामारुरोह सः। या सान्तर्जलसुप्तस्य पुंसस्तस्य न्यकृत्यत KathāSaSāg. iii. 4. 310.

अन्तर्जलस्थ (antarjala-stha) *adj.* [*f.* - ā] **A** standing in the middle of water मन्त्री ... अन्तर्जलस्थश्च स्मरेन्मन्त्रम् JayāS. 9. 44; इयम् ... मुनिनान्तर्जलस्थेन शप्ता मर्त्यपदं गता BṛKathāMañ. viii. 1. 50; **B** being under water दीप्तान्यन्तर्जलस्थानि पृथिवीधरणानि MatsyaP. 163. 58; PadmP. v. 42. 149; **C** being at the bottom of water केचित् ... वाप्यादावन्तर्जलस्थां मृदमुपाददते VīraMi. 35. 27 (*on* 1. 17)

अन्तर्जलस्थान (antarjala-sthāna) *n.* act of standing in the middle of water एता दीक्षा नियमानन्यांश्चान्तर्जलस्थानचक्षुर्निमीलनादिकं सेवेत (वानप्रस्थः) ManuBh. i. 505. 13 (*on* 6. 29)

अन्तर्जलस्थित (antarjala-sthita) *adj.* **A** being under water भेकाः ... शशंसुस्तमग्निमन्तर्जलस्थितम् KathāSaSāg. iii. 6. 76; **B** standing in the middle of water नारदोऽन्तर्जलस्थितः। ... मामशपत् KathāSaSāg. iv. 2. 139.

अन्तर्जलस्नान (antarjala-snāna) *n.* bath in the middle of water एततीर्थपरिकल्पनं जलाभिमन्त्रणाचमनमार्जनान्तर्जलस्नानेषु त्रिरावृत्ताघमर्षणसूक्तविधिपरमिति केश्चिद्व्याख्यातम् SmṛtiCan. ii. 493. 9; असौ ... यदि तु ... अन्तर्जलस्नानं कर्तुं न शक्नुयात् ... आचमनमार्जनान्तर्जलस्नानानि कुर्यात् VīraMi. (Āhnika.) 227.12.

अन्तर्जलस्पन्द (antar-jalaspanda) *m.* internal motion of water समुद्रेऽन्तर्जलस्पन्दाः स्वभावादच्युता अपि वीचिवेगा भवन्तीव YogVā. iii. 15.3.

अन्तर्जलावारितमूर्ति (antarjalāvāritamūrti) *adv.* in a manner in which body is concealed under water बालापरिष्वङ्गसुखाय पत्युरन्तर्जलावारितमूर्ति यातुः विघ्नाय वैमल्यमपां बभूव JānaHa. 3. 38; SūktiMu. 67. 6.

अन्तर्जलाशय (antar-jalāśaya) *m.* [Loc.] in the interior of a water-reservior मूत्रोच्चारे कृते शौचं न स्यादन्तर्जलाशये SmṛtiCan. ii. 241. 4.

अन्तर्जलेचर (antarjale-cara) *adj.* who moves under water दैत्यः पञ्चजनो महान्। अन्तर्जलेचरः PadmP. vi. 231. 38.

अन्तर्जलेशय (antarjale-śaya) *adj.* **1** residing under water तस्य बृंहितशब्देन कूर्मोऽप्यन्तर्जलेशयः। उत्थितोऽसौ MahāBhā. i. 35.21; तस्मिन् सरसि दुष्टात्मा निगूढोऽन्तर्जलेशयः। आसीद् ग्राहः VāmaP. 85. 19; ViṣṇuDhaP. i. 194. 18; **2** staying, i.e. standing in the middle of water मुनयः ... केचिदन्तर्जलेशयाः ... कालं नयन्ति तपसा BrahmāṇḍP. i. 27.7; KūrmaP. 734. 18 (2. 38); LiṅgaP. i. 31. 24.

अन्तर्जलोद्भव (antarjalodbhava) *adj.* produced from the water inside (the Brahmāṇḍa) येऽमी समुद्राश्च तेऽपि चान्तर्जलोद्भवाः MatsyaP. 2.34.

अन्तर्जलोषित (antarjaloṣita) *adj.* lying under water कुम्भीनसी ... हृता मधुना ... मयि चान्तर्जलोषिते Rāmā. vii. 25. 25.

अन्तर्जलौघ (antarjalaugha) *m.* flow or stream of water inside यदि च विहरेत् पादचारेण गौरी। ... स्तम्भितान्तर्जलौघः सोपानत्वं व्रज पदसुखस्पर्शमारोहणेषु MeghDū. 60. [inner mass of water, MW.]

अन्तर्जलौघम् (antarjalaugham) *adv.* in the flow or stream of water अन्तर्जलौघमवगाढवतः कपोलौ हित्वा क्षणं विततपक्षतिरन्तरीक्षे ... रराज ... अलिगणो गजस्य ŚiśuVa. 5. 38. (comm. अन्तरे अभ्यन्तरे)

अन्तर्जल्प (antar-jalpa) *m.* **1** recitation in the mind धरसेनः ... अन्तर्जल्पसंकल्पितमन्त्रवाक्यः ... तद्विद्याराधनसमृद्धबुद्धिर्बभूव YaśasCam. ii. 289. 19; **2** utterance in the mind वाचकः शब्दः। स च संकेतकालेन दृष्टेन रूपेणैक्यमापादितोऽन्तर्जल्पाकारस्तथा प्रतिभासमानो वाच्यः DharmoPra. 48. 11; पूर्वापरमनुसंधाय शब्दसंयुक्ताकारा प्रतीतिरन्तर्जल्पाकारा वा कल्पना ... बालमूकादिनामन्तर्जल्पाकारं कल्पनाज्ञानमस्तीति कुतो निश्चेतव्यम् TarkBhā. (Mo.) 7. 19; धारणादिरहितानामेकेन्द्रियादीनां तु ... अन्तर्जल्पाकारा(?र)विवक्षितार्थवाचकशब्दसंसृष्टार्थज्ञानरूपं श्रुतज्ञानं क्षयोपशममात्रजनितं जात्यन्तरमेव JñānBiPra. 7.12.

अन्तर्जवनिक (antar-javanika) *adj.* which is behind veil or curtain अन्तर्जवनिकं पादाङ्गुष्ठं मल्लेर्निरीक्ष्य सः MalliC. 5. 104.

अन्तर्जवनिकासंस्थ (antarjavanikā-saṁstha) *adj.* (used as noun) (one) who as staying behind veil or curtain अन्तर्जवनिकासंस्थैश्चूलिकार्थस्य सूचना DaśRū. 1. 61; SāhiDa. 293. 13.

अन्तर्जाग्रद्विरहदहन (antarjāgrad-virahadahana) *adj.* having the fire of separation awake, i.e. ablaze in the heart आलोक्यैनम् ... प्रावृट्कालम् ... । अन्तर्जाग्रद्विरहदहनो जीवितालम्बनेऽलं न स्यादन्योऽप्यहमिव जनो यः पराधीनवृत्तिः NemiDū. 8.

अन्तर्जाड्य (antar-jāḍya) *n.* inner inertia, i.e. internal lethargy अन्तर्जाड्यं कामिनो यो विधत्ते। स व्याधुन्वन्नुत्पलानां रजांसि प्रौढामोदो यत्र वाति स्म वातः Rāgh. 10. 31.

अन्तर्जात (antar-jāta) *adj.* [*f.* – ā] **1A** bearing a child inside, i.e. pregnant गुर्वर्थे वा बालपुष्ट्यानुषङ्गाद् गावो दातुं देशकालेऽविशिष्टः। अन्तर्जाताः सुक्रयज्ञानलब्धाः MahāBhā. xiii. 70. 35; CaturCin. i. 447. 23; अन्तर्जाता गर्भिण्य इति CaturCin. i. 448.3; **1B** produced inside (the abdomen) वाय्वाकाशर्तुयुक्तो हि दैवतेष्वितरेषु तु। अन्तर्जातो जातवेदाः प्रभवायोपकल्पते BhelaS. 79. 28 (4. 3); **2** arisen in the mind तस्याश्च भर्ता द्विगुणं हृदये परिवर्तते। अन्तर्जातमपि व्यक्तमाख्याति हृदयं हृदा Rāmā. i.76.16; **3** innate, i.e. natural अन्तर्जाते विमलसलिले पुष्करे वा प्रयागे स्नात्वा ... संतर्प्येत् Vidvanmo. 7. 62.

अन्तर्जातरुष् (antarjāta-ruṣ) *f.* anger arisen in the mind सरोरुहाणि कुरुते दैन्यास्पदं सोऽयमित्यन्तर्जातरुषेव यस्य यशसा निस्तेजितश्चन्द्रमाः VasaViKā.2.50 (coloph. 4)

अन्तर्जातविमानना (antarjāta-vimānanā) *adj.* (*f.*) who has disrespect arisen in the mind ततो राज्ञा परित्यक्तां स तामुन्मादिनीं वणिक्। तत्सेनापतये प्रादादन्तर्जातविमाननाम् KathāSaSāg. iii. 1. 72.

अन्तर्जाति (antar-jāti) *f.* **1** internal class कुर्याच्चतुर्थबीजेन गोपनादिविभेदिना। अन्तर्जातियुतां सम्यगङ्गक्लृप्तिम् LakṣmīT. 33. 69; **2** inter caste, mixed caste प्रकृतीनां संभेदो मेलनं अन्तर्जातिः परस्परविरोधो वा BālamBha. ii. 343. 5 (*on* 2. 295)

अन्तर्जानु (antarjānu) *adv.* (with the hands kept) in between the knees अन्तर्जानु बाहू कृत्वा त्रिराचामेत् VārāGS. 6. 35; जले वाथ स्थले वान्तर्जानु न विवराङ्गुलीभिः गोकर्णाकृतिवत् करं कृत्वा ... जलम् (पिबेत्) ĀgniveGS. ii. 6. 1 (93. 3); अन्तर्जान्वविशेषेण तद्वदाचमनं भवेत् VāyuP. ii.17. 89; पादौ प्रक्षाल्य हस्तौ च अन्तर्जानु त्वपः स्पृशेत् BrahmāṇḍP. ii. 14. 106; अन्तर्जानु शुचौ देश उपविष्ट उदङ्मुखः। ... द्विजो नित्यमुपस्पृशेत् YājñaSm. 1. 18; ŚaṅkhaSm. 10.5; उपवीत्याचमेन्नित्यमन्तर्जानु BhaviP. 13B. 12 (i. 3.91); अन्तर्जानु जान्वोरन्तरा अरत्निं कृत्वेत्यर्थः SmṛtiCan. ii. 252. 21; अन्तर्जानु जानुनोर्मध्ये हस्तौ कृत्वा CaturCin. iii (1). 988. 11; VīraMi. (Āhnika.) 78.20; अन्तर्जानु जानुनोर्मध्ये यथा बाहू भवतस्तथा कार्याणीत्यर्थः VīraMi. (Paribhāṣā.) 93. 14; अन्तर्जानु मौनेनाशब्देन चातृप्तेर्भुञ्जीरन् BālamBha. i. 561. 10 (*on* 1.249)

अन्तर्जानु (antar-jānu) *adj.* (hands) kept in between the knees स्नातः कृतजप्योऽन्तर्जानुरुदङ्मुखो दिव्येन तीर्थेन देवानुदकेन तर्पयेत् ŚaṅkhaLiDS. 116.1; दक्षिणामुखोऽन्तर्जानुः पित्र्येण तीर्थेन पितॄन् यथाश्रद्धं यथाप्रकाशमुदकं दद्यात् ŚaṅkhaLiDS. 116. 70; शुचौ देशे ... अन्तर्जानुः ... आचामेत् ViṣṇuSm. 62. 5; वाग्यतः शुचिः। भुञ्जीतान्नं च तच्चितो ह्या(?ह्य)न्तर्जानुः सदा नरः MārkP. 34. 27; BrahmP. 221. 27; SkandP. i (2). 41. 156; अन्तर्जानुस्तथाचामेत्त्रिश्चतुर्वा पिबेदपः MārkP.34.67; BrahmP. 221. 66; पादौ प्रक्षाल्य हस्तौ तु अन्तर्जानुरुपस्पृशेत् VāyuP. ii. 17. 43; BhaviP. 214A. 5 (i. 143. 10); अन्तर्जानुरेव च। उपस्पृशेत् ViṣṇuDhaP. ii. 88. 7; अन्तर्जानुरिति जानुनोरन्तः कृतहस्त इत्यर्थः VīraMi. (Āhnika.) 360. 3.

अन्तर्जानुकर (antarjānu-kara) *adj.* having the hands kept in between the knees आ मणेर्बन्धनाद्धस्तौ पादौ चाजानुतः शुचिः। प्रक्षाल्याचामयेत् विद्वानन्तर्जानुकरो द्विजः BṛParāSm. 2. 30; अभीष्टदेवतां ध्यायन् ...। कृतोत्तरीयको नित्यमन्तर्जानुकरस्तथा CaturCin. i. 94. 15; शुचौ देशेऽन्तर्जानुकर उपविश्य VīraMi. (Rājanīti.) 62. 12; 379. 21.

अन्तर्जानुकरण (antarjānu-karaṇa) *n.* act of keeping (the hands) between the knees अन्तर्जानुकरणमपि यत्किंचित्कर्तृकं कर्तुरसामर्थ्ये सर्वकार्येषु प्राप्नुयात् VīraMi. (Śrāddha.) 337. 11.

अन्तर्जानुगत (antarjānu-gata) *adj.* kept in between the knees अन्तर्जानुगतं कृत्वा भुजयुग्मं द्विजोत्तम। ... तोयम् ... पिबेत् PāraS. 2.55.

अन्तर्जानुभ्रमि (antarjānu-bhrami) *f.* subvariety of dance called Tiripa (*lit.* moving around with the hands kept in between the knees) वामाङ्घ्रिप्रपदं पृष्ठे दक्षजानुश्च लापितम्। ... अन्तर्जानुभ्रमिः प्रोक्ता ग्राह्या नृत्यविशारदैः Bharatakośa.

अन्तर्जानूपविष्ट (antarjānūpaviṣṭa) *n.* [Inst.] in a manner of sitting with the hands kept in between the knees अन्तर्जानूपविष्टेन तद्वदाचमनं भवेत् BrahmāṇḍP. ii. 15. 62.

अन्तर्जालगत (antarjāla-gata) *adj.* caught inside the net, i.e. enclosed by a net अन्तर्जालगताः प्रमत्तमनसो मीनास्तडागे ... स्वस्थाश्चरन्त्यम्भसि Saund. 11. 61.

अन्तर्जाली (antar-jālī) *f.* trellis window or screen inside the net ऊर्ध्व(र्ध्वं) वस्त्रेण संनद्धां मध्ये कम्रा(म्रां) विभाजिताः(ताम्)। ... अन्तर्जलं(र्जालीं) विधायास्यां दम्पती विनिवेशयेत् Mānaso. iv. 8. 1192.

अन्तर्जृम्भितशोक (antarjṛmbhita-śoka) *m.* sorrow developed inside the mind पुरंदरः सुन्दरं समभिधत्ते। अन्तर्जृम्भितशोकग्रस्ताविस्पष्टवर्णपदम् KuṭṭaMa. 411 (comm. मनसि जृम्भितः विकसितः शोकः ... मनोविषादः)

अन्तर्ज्ञा (antar-jñā -) IX. P. to know internally or intuitively रामो यदन्तर्जानाति तद्वस्त्वित्येव सन्मुखात्। आकर्ण्य चित्तविश्रान्तिमाप्नोत्येव मुनीश्वरः YogVā. ii. 2. 11.

अन्तर्ज्ञाति (antar-jñāti) *f.* close relative स्वहस्तोयं श्रीवीतरागसूनो रणग्रहस्य श्रीदद्दपादांतर्ज्ञाति(Read °ज्ञातेः) लिखितमिदं संन्धिविग्रहाधिक्रित (Read °कृत) मात्रिभटेन EI. ii. 21. 10.

अन्तर्ज्ञान (antar-jñāna) *n.* internal or intuitive knowledge विज्ञानभावनाच्चैव मोक्षो न घटते क्वचित्। अन्तर्ज्ञानस्य बाह्ये च क्षणिकत्वस्य वेदनात् AnuVyā. 52A. 5 (*on* 3. 3)

अन्तर्ज्ञानक (antarjñāna-ka) *adj.* caused by, i.e. based on internal knowledge यथा समानधर्मत्वाविशेषेऽपि प्रत्यक्षाप्रत्यक्षविषयतयान्तर्ज्ञानको भेदः तथा समानधर्मत्वाविशेषेऽपि ज्ञातृस्तज्ज्ञेयतद्धर्मजन्योऽन्तर्ज्ञानको भेदः Kiraṇā.262.18.

अन्तर्ज्ञानकरण (antar-jñānakaraṇa) *n.* internal means or instrument of knowledge (अन्तःकरणत्वम्) सात्त्विकाहंकारोपादानकद्रव्यत्वे सति अन्तर्ज्ञानकरणत्वं तत्त्वम् VedāntRaMañ. 1. 3 (25. 12)

अन्तर्ज्ञाननिराकृत (antarjñāna-nirākṛta) *adj.* removed by internal knowledge अन्तर्ज्ञाननिराकृतस्य मोहान्धकारस्यापयानपदवीमिव ... रोमराजिम् ... बिभ्राणम् ... मुनिकुमारकमपश्यम् Kād. 140. 2.

अन्तर्ज्ञानवत् (antarjñāna-va(n)t) *adj.* possessing internal, i.e. intuitive knowledge प्रायोऽन्तर्ज्ञानवन्तोऽपि च बहुतमसा रौद्रचेष्टा हि रौद्राः Nārāy. x. 82. 7.

अन्तर्ज्योतिर्मयात्मन् (antarjyotirmayātman) *adj.* of the nature of consisting of light or consciousness within भावयेत्। ... प्राग्वदप्यययुक्त्या तु ह्यन्तर्ज्योतिर्मयात्मना। विभुना PāraS. 15. 410.

अन्तर्ज्योतिष्ट्व (antarjyotiṣ-ṭva) *n.* the state of having light or the inner light or consciousness सर्वेषामन्तर्ज्योतिष्ट्वेऽपि व्यक्तेर्विशेषः GītāBh. (Ma.) 54A.6 (*on* 5. 24)

अन्तर्ज्योतिस् (antár-jyotis) *adj.* **A** having light or consciousness within योऽयं विज्ञानमयः पुरुषः प्राणेषु हृद्यन्तर्ज्योतिः स समानः सन्नुभौ लोकौ संचरति ŚatBr. XIV. vii. 1. 7; BṛĀraU. xv. 3. 7 (*but* Śaṅ. अन्तरिति बुद्धिवृत्तिव्यतिरेकप्रदर्शनार्थम्। ज्योतिः अवभासात्मकत्वात् आत्मा उच्यते। तेन हि अवभासकेन आत्मना ज्योतिषा); अयमात्मा ... अन्तर्ज्योतिर्विश्वभुक् ... सर्वमभिक्षिपन्न तमश्शोति कश्चन ĀrṣeU. 9. 13; योऽन्तःसुखोऽन्तरारामस्तथान्तर्ज्योतिरेव यः। स योगी ब्रह्मनिर्वाणं ब्रह्मभूतोऽधिगच्छति MahāBhā. vi. 27. 24 = BhagGī. 5. 24; अन्तर्ज्योतिरमेयमेकममलं कृष्णाख्यमापीयतां यत् पीतं परमामृतं वितनुते निर्वाणमात्यन्तिकम् ŚatTrayī. 634; MukuMā. 18; SūktiMu. 132. 6; अन्तरा-रामोऽन्तर्ज्योतिः ... स्वाराज्ये भूम्नि स्वे महिम्न्यमृतोऽवतिष्ठते ŚvetāUBh. 114.6 (*on* 1. 11); प्राणेषु प्रेरकतया स्थितो हृदयायतने अन्तर्ज्योतिरहमिति प्रत्यक्त्वेन प्रकाशते स पुरुषः ĀtmaSi. 36. 1; परमात्मानमन्तेऽन्तर्ज्योतिः पश्येत्सनातनम् CāruCaś. 97; तस्मादग्नेः परं नास्ति ... । अन्तर्ज्योतिः स एवोक्तः परं ज्योतिः स एव BrahmP. 126. 6; **B** having inner light or flame अन्तर्ज्योतिर्हि वा अन्यद् अग्निहोत्रं बहिर्ज्योतिरन्यत् ... । तदेतदन्तर्ज्योतिरग्निहोत्रम् VādhūŚS. iii. 25. 12.

अन्तर्ज्योतिस् (antar-jyotis) *n.* light or consciousness within वैष्णवोंऽशः परः सूर्यो योऽन्तर्ज्योतिरसंप्लवम् ViṣṇuP. ii. 8. 55; तत्प्रसादजम् ... अन्तर्ज्योतिषो दर्शनं प्रज्ञानमभिसंभवति MahāvīC. 3 .4 (6); बाह्यान्तर्ज्योतिषोर्मध्ये देहो बुद्ध्यादिसंहतः। वर्तते BṛĀraUBhVā. iv. 3.287.

अन्तर्ज्वर (antar-jvara) *m.* **A** inner or internal fever त्वां परिरभ्य जाह्नवि स मे शान्तोऽयमन्तर्ज्वरः SaduktiKa. 28. 6; अन्तर्ज्वरः श्वसितमूर्जितमेव भूयां(या)न्गण्डस्थले धवलिमा दृशि बाष्पपूरः BhikṣāKā. 14. 10; नान्तर्ज्वरं मृगदृशां

शमयांबभूव यत्ने कृतेऽपि BhikṣāKā. 28. 2; अन्तर्ज्वरं शमय मे सखि BhikṣāKā. 29. 14; **B** internal fever, i.e. confusion रामानुजार्याय नमः परमयोगिने। यः श्रुतिस्मृतिसूत्राणामन्तर्ज्वरमशीशमत् ŚrutaPra. iA. 1.4 (*on* i. 1. 1)

अन्तर्ज्वलत् (antar-jvalat) *adj.* **A** burning in the mind अन्तर्ज्वलत्कोपकृशानुधूमसंकाशकृष्णाजिनबद्धकक्षः। त्रिदण्डमुद्यम्य जवेन कश्चिदभ्याद्रवन्नग्नतनुं वृषाङ्कम् DarpDa. 7. 55; **B** burning inside, cf. **अन्तर्ज्वलदौर्ववह्नि.**

अन्तर्ज्वलत्कोपवह्नि (antarjvalat-kopavahni) *m.* fire of anger burning in the mind असौ रुष्टस्ताम्रीकुर्वन् दृशोर्युगं अन्तर्ज्वलत्कोपवह्निज्वालाः प्रकटयन्निव। ... पाणौ वज्रं वज्रधरोऽधरत् MalliC. 4. 97.

अन्तर्ज्वलदौर्ववह्नि (antarjvalad-aurvavahni) *adj.* having submarine fire burning inside मुनिः पुरान्तर्ज्वलदौर्ववह्निमम्भोधिमाचामत् Rāgh. 9. 9.

अन्तर्ज्वलद्वैर (antarjvalad-vaira) *adj.* possessing (the feeling of) rivalry or enmity burning in the mind एवमन्तर्ज्वलद्वैरः शकटालो महीपतिम्। निपात्य सानुगं बुद्ध्या तपसे स ययौ वनम् BṛKathāMañ. i. 2. 218.

अन्तर्ज्वलन (antar-jvalana) *n.* internal heat, inflammation, MW.

अन्तर्ज्वलित (antar-jvalita) *adj.* [*f.* - ā] **A** burning or blazing in the body मुनिबालकाभ्यां व्यलोकि भूपः ...। ज्वलन्निवान्तर्ज्वलितेन तेजसा दहन्निवोग्रेण विलोकितेन YaśasCam. i. 148. 4 (comm. अभ्यन्तरप्रदीप्तेन तेजसा प्रतापेन ज्वलन्निव); UjjvaNīMa. 368. 5; **B** burning, i.e. shining within उर्वीपतिः ... अन्तर्ज्वलितपिङ्गलोग्रतारकेण ... नयनयुगलेन ... वेतालमद्राक्षीत् TilaMañ. 48. 7; **C** tormented or afflicted in the mind हृदये त्वदीयरागं माधव दधती शमीव सा दहनम्। अन्तर्ज्वलितापि बहिः सरसा स्फुरति क्षमागुणतः UjjvaNīMa. 368.5.

अन्तर्ज्वलितकोपाग्नि (antarjvalita-kopāgni) *m.* fire of anger burning or blazing in the mind राजति स्म तयोरङ्गं शौर्यरोमाञ्चकोरकैः। अन्तर्ज्वलितकोपाग्निनिर्यद्धूमलवैरिव PāṇḍaC. 13. 908.

अन्तर्ज्वलितमदनानला (antarjvalita-madanānalā) *adj.* (*f.*) having the fire of passion burning or blazing in the mind अन्तर्ज्वलितमदनानलाप्यन्धकारितहृदया ... अचिन्तयम् Kād. 161. 4.

अन्तर्ज्वलितमनोभवहव्यभुज् (antarjvalita-manobhavahavyabhuj) *m.* fire of love burning or blazing in the mind अन्तर्ज्वलितमनोभवहव्यभुजा दह्यमानेभ्यः। कुसुमशरजालपतिता मुहुर्मुहुर्विदधती विवृत्तानि ... सा तन्वी KuṭṭaMa. 270.

अन्तर्ज्वलितवपुस् (antarjvalita-vapus) *adj.* having the body burning inside अन्तर्ज्वलितवपुषो यत्क्षणमपि। न तृष्णामौर्वाग्नेरपनयति पुष्टेऽपि विभवे नृशंसस्याम्भोधेर्जगतु विलयं सोऽस्य महिमा Subhāṣi. 875.

अन्तर्ज्वलितेर्ष्याप्रकोपा (antarjvaliterṣyāprakopā) *adj.* (*f.*) having great wrath of jealousy burning in the mind अत्र कयाचित् खण्डितयान्तर्ज्वलितेर्ष्याप्रकोपया ... प्रियं प्रति भेदो विहितस्तत्र तस्यामेव ... नायकस्यान्यत्रानुरागातिशयः साध्यः VyaktiVi. 115. 24.

अन्तर्णश् (antar-ṇaś-) IV. P. [P. viii. 4. 36; SiddhHe. ii. 3. 78] to perish or to be destroyed in the heart परिणश्यति जीवितेऽपि मैत्री नान्तर्णश्यति नोप्रनष्टपूर्वा DvyāśraKā. 4. 14 (comm. अन्तर्मध्ये हृदये नश्यति)

अन्तर्णी (antar-ṇī-) I. P. **A** to include in, to comprise of अन्तःशब्दस्याङ्किविधिणत्वेषूपसर्गसंज्ञा वक्तव्या। ... अन्तर्णयति KāśiVṛ. *on* i. 4. 65; PadMañ. *on* KāśiVṛ. *on* P. i. 4. 65 (603. 18); **B** to include, i.e. to imply or refer to, cf. **अन्तर्णीत B**; **C** to include, i.e. to enumerate, cf. **अन्तर्णीत D**; **D** to include, i.e. to accept, cf. **अन्तर्णीत E**.

अन्तर्णीत (antar-ṇīta) *adj.* **A** included, i.e. underlying दक्षिणाशब्दो गवादीनां दक्षिणासंबन्धविधानार्थं यौगपद्येनान्तर्णीतसंबन्धमभिवदन् बहुवचनान्तः स्यात् ŚābaBh. 1894. 13 (*on* x. 3. 57); समाख्यायामन्तर्णीतसंबन्धसंबन्ध्यभिधायित्वान्न संभवतीति मन्यते TantrVā. 875. 18 (*on* iii. 3. 14); 533. 2 (*on* ii. 2. 23); **B** included, i.e. implied or referred to अन्तर्णीतं विचारमाश्रित्य ... अधिकारार्थत्वं किमिति न गृह्यते PañcPā. 53. 1 (*on* i.1.1); अन्तर्णीतमभिप्रायं दर्शयति TantrRa. 207. 16; संबन्धोऽपि तत्रार्थादन्तर्णीतो गम्यते NyāyRa. 356. 15 (*on* 5 (4). 33); जिज्ञासापदं चानुष्ठानयोग्यस्यान्तर्णीतस्य विचारस्योपलक्षणम् NyāySu. (Ja.) 21B. 13 (*on* i. 1. 1); अथातो ब्रह्मजिज्ञासेत्यत्र जिज्ञासाशब्देनान्तर्णीतं विचारमुपलक्ष्येति विवरणाचार्यैरुक्तम् VaiyāBhū. 164. 18 (*on* 31); **C** included in, comprised of, contained in सर्वस्यैवेति काक्वा मीमांसायां विशेषो योऽन्तर्णीतस्तमभिद्योतयति Kāśi. i. 5. 26 (*on* 1. 13); यत् त्वतथाभूतप्रतिज्ञायां अन्तर्णीतम् ... प्रामाण्यम् ... तत् तावत् परिहृतं भवति Kāśi. i. 144. 7 (*on* 2. 159); व्यापारमात्रेण सहकारितया प्रधानेऽन्तर्णीतं सदनुमितमस्तित्वम् TattvVai. 83. 14 (*on* 2. 18); **D** included, i.e. enumerated भविष्यद्धर्मो भविष्यत्त्वादेव न प्रत्यक्षेणानुभूयत इति यो हेतुरन्तर्णीतः Kāśi. i. 213. 25 (*on* 4. 28); भाष्यकारेण 'यत् किंचन लौकिकं वचनम्' इति दर्शयतान्तर्णीताः (हेतवः) Kāśi. iii. 213. 19 (*on* 5 (9). 1); **E** included, i.e. accepted or admitted गृहीतमात्रबाधे तु बहवः साधनदोषा भाष्यकारेणान्तर्णीताः Kāśi. ii. 43. 11 (*on* 5 (2). 34); ii. 125. 9 (*on* 5 (3). 64); यत्परैः ... अनुमानमन्तर्णीतं तस्यानेन प्रत्यक्षविरोधोऽभिधीयते NyāyRa. 616. 19 (*on* 5 (14). 11); यद्वा हेत्वर्थवादसमुच्चयेनायं पूर्वपक्षो न केवलहेतुत्वेनेत्याह अथापीति तदर्थवादत्वमन्तर्णीतं हेतुत्वमस्मिन्नित्यर्थः NyāySu. (So.) 84. 1 (*on* i. 2. 26)

अन्तर्णीतणिच्त्व (antarṇītaṇic-tva) *n.* the state of being (the base) that implies (the sense of) *ṇic* (the causal marker) द्रष्टुश्चक्षुष इत्यादिवदन्तर्णीतणिच्त्वेनोपपत्तेः TattvPrakā. 61A. 13 (*on* i. 3. 40)

अन्तर्णीतणिजर्थ (antarṇīta-ṇijartha) *adj.* which implies the sense of *ṇic* (the causal marker) अन्तर्णीतणिजर्थस्य ह्यधीहीति भवेत् TaiUBhāVā. 195. 22 (3)

अन्तर्णीतणिजर्थ (antarṇīta-ṇijartha) *m.* sense of *ṇic* (the causal marker) which is implied भवनक्रियासंबन्धे ... अन्तर्णीतणिजर्थकल्पनया वा भवतेः पुरुषव्यापारपरत्वम् MīmāKau. iii (1). 42. 16 (*on* i. 2. 19)

अन्तर्णीतण्यर्थ (antarṇīta-ṇyartha) *adj.* which implies the sense of *ṇic* (the causal marker) भुवः। भवतेरेवान्तर्णीतण्यर्थस्य कप्रत्यये रूपम् NyāySu. (Ja.) 15A. 4 (*on* i. 1. 1); यातेरन्तर्णीतण्यर्थादातोऽनुपसर्गे क इति कप्रत्यये कृते ... सत्यमिति भवति NyāySu. (Ja.) 134B. 5 (*on* i.1. 6); 204A. 12 (*on* i. 4.6)

अन्तर्णीतता (antarṇīta-tā) *f.* the state of being what is implied न च वैपरीत्येनानन्तर्यमेवान्तर्णीततया सिध्यत्विति वाच्यम् VivaPraSaṁ. 199. 23.

अन्तर्णीतत्व (antarṇīta-tva) *n.* the state of being what is implied अधीहीति। अधीह्यध्यापय। ण्यर्थस्यान्तर्णीतत्वात् NyāySu. (Ja.) 142A. 5 (*on* i. 1. 6)

अन्तर्णीतद्व्याकार (antarṇīta-dvyākāra) *adj.* which includes, i.e. contains two forms within कर्माण्यपि जैमिनिरित्यादिभिरन्तर्णीतद्व्याकारमेव शेषत्वं प्रतिपादितम् TantrVā. 673. 23 (*on* iii. 1. 6)

अन्तर्णीतपूर्वपक्ष (antarṇīta-pūrvapakṣa) *m.* prima facie view which is implied अन्तर्णीतपूर्वपक्षनिरसनसमर्थं पदद्वयं मन्वानो भाष्यकार आह Bṛha.5.1 (*on* i. 1.1)

अन्तर्णीतफल (antarṇīta-phala) *adj.* which includes, i.e. contains (potentially) the effect समाप्तिः कर्मणो नापि लोकत्रयफलाद्दते। अन्तर्णीतफलं तस्मादिह साधनमुच्यते BṛĀraUBhVā. i. 4. 1832.

अन्तर्णीतमत्वर्थ (antarṇīta-matvartha) *adj.* having, i.e. referring to the implied sense of *mat* (the possessive suffix) अग्नये होत्रमस्मिन्निति सिद्धान्तेऽप्यभ्युपगमादन्यसमासार्थानुपलब्धेश्चान्तर्णीतमत्वर्थो बहुव्रीहिः TantrVā. 295. 7 (*on* i. 4. 4)

अन्तर्णीतविचार (antarṇīta-vicāra) *m.* implied deliberation कथमन्यथासिद्धत्वम्। अन्तर्णीतविचारार्थत्वाज्जिज्ञासाशब्दस्य PañcPā. 52. 20 (*on* i. 1. 1); ब्रह्मणो जिज्ञासा ब्रह्मजिज्ञासेति। अन्तर्णीतविचारान्वये हि चतुर्थीसमासः स्यात् PañcPā. 64. 12 (*on* i. 1. 1); 66. 24 (*on* i. 1. 1); (धर्मजिज्ञासापदे) अन्तर्णीतविचारार्थप्राधान्यमाश्रित्य प्रयोजनविवक्षया 'धर्माय' इति चतुर्थीसमासः आश्रितः VivaPraSaṁ. 221. 9; 247. 3; अन्तर्णीतविचारजिज्ञासापदसामर्थ्याद्वेदाध्ययनानन्तरं तद्धेतुको धर्मविचारः कर्तव्यः YuktiSneha. 14. 26 (*on* i. 1. 1)

अन्तर्णीतसामान्य (antarṇīta-sāmānya) *adj.* including, i.e. containing generality विशेषं तु साधयच्छास्त्रम् अन्तर्णीतसामान्यमेव साधयति NyāyRa. 167. 19 (*on* 4. 109)

अन्तर्णीतस्वात्मविशेषण (antarṇīta-svātmaviśeṣaṇa) *adj.* having the attribute of the soul included, i.e. understood in itself अन्तर्णीतस्वात्मविशेषणे मूर्तामूर्ते द्वे एवेत्यवधार्येते BṛĀraUBh. 281. 4 (*on* ii. 3. 1)

अन्तर्णीताखिलानन्तदेवत (antarṇītākhilānantadevata) *adj.* which includes entire (world) and innumerable deities त्रैलोक्यात्मशरीरोऽयं विश्वरूपः प्रजापतिः। अन्तर्णीताखिलानन्तदेवतः प्राणविग्रहः BṛĀraUBhVā. ii. 1. 14.

अन्तर्णीताभिसंबन्ध (antarṇītābhisambandha) *m.* implied connection पश्वादीनामङ्गं विवक्षितं तथापीत्यन्तर्णीताभिसंबन्धे सकृदुच्चरिताभिप्रायः परिचोदयति ṬupṬ. 7. 18 (*on* iv. 1. 11)

अन्तर्णीतार्थ (antarṇītārtha) *adj.* having, i.e. referring to the implied meaning धर्मशब्दोऽनुषज्यमानोऽन्तर्णीतार्थ एव चोदनालक्षणसूत्रेऽनुषज्यते NyāyRa. 129.15 (*on* 2. 279)

अन्तर्णीतावृत्तिकत्व (antarṇītāvṛttika-tva) *n.* the state of having implied

repetition ध्यानोपासनयोश्चान्तर्णीतावृत्तिकत्वेन लोकतः प्रतीतेरावृत्तिरेव Bhām. 703. 2 (*on* iv. 1. 1)

अन्तर्णीतावृत्तिगुणा (antarṇītāvṛttiguṇā) *adj. (f.)* having implied quality of repetition उपासनं निदिध्यासनं च इत्यन्तर्णीतावृत्तिगुणैव क्रिया अभिधीयते BrahmSūBh. (Śaṅ.) 766. 14 (*on* iv. 1. 1)

अन्तर्णीतैकत्व (antarṇītaikatva) *adj.* whose oneness is implied अन्तर्णीतैकत्वस्य पशोः क्रियासंबन्धादेकत्वविशिष्टपशुविशिष्टो यागः TantrRa. 51. 18.

अन्तर्णीतोपमानगौणवृत्ति (antarṇītopamānagauṇavṛtti) *f.* secondary power of analogy which is included, i.e. implied तदेतत् ... अन्तर्णीतोपमानगौणवृत्त्याश्रयणेन ... व्याख्यातॄणां चान्यत्रापि वेदविषयम् TantrVā. 717.17 (*on* iii. 1. 13)

अन्तर्णीय (antarṇī-ya) *ger.* **A** having implied यांस्तु संभविनो धर्मानन्तर्नीय (v.l. अन्तर्णीय) प्रयुज्यते। शब्दस्तेषां न सांनिध्यं नियमेन व्यपेक्षते VākyaPa. 2. 163; **B** having included, i.e. understood अर्थात्मकफलस्यापि यत्साधनं सोऽप्यर्थ इति अन्तर्णीयैतत् प्रदर्शितम् 'कोऽर्थः ... ' इति Kāśi. i. 176. 26 (*on* 2. 221)

अन्तर्णेतुम् (antarṇetum) *inf.* to include तद्धि स्कन्धेषूच्यमानं न तावदेतेष्वेवान्तर्णेतुं शक्यते AbhidhKoBh. 14. 24 (*on* 1. 22)

अन्तर्णेय (antarṇeya) *adj.* fit to be included 'तिरोऽन्तर्द्धौ'। इति ज्ञापकादन्तःशब्दस्य गिसंज्ञापि। अङ्किविधिणत्वेषु प्रयोगदर्शनात् ... अन्तर्णेयः JaineVyā. 43. 15 (*on* i. 2. 135)

अन्तर्दग्ध (antar-dagdha) *adj.* burnt, i.e. heated inside (the wrapper full of smoke) खुरचर्मास्थिबालं च दन्तशृङ्गनखं तथा। ... गृहीत्वा कारयेद्भस्म अन्तर्दग्धं विचक्षणः AśvaVai. 36. 15 (comm. अन्तर्धूमे भस्मीकृत्य)

अन्तर्दग्धकुठारक (antardagdha-kuṭhāraka) *m.* pick-axe burnt, i.e. heated inside (the wrapper full of smoke) अन्तर्दग्धकुठारको दहनजं लेपान्निहन्ति व्रणम् SiddhYo. 45. 21 (comm. पिठरजठरेऽन्तर्धूमं दग्धव्यः कुठारकः कुन्हाडिच्छिन्नः)

अन्तर्दग्धागुरुशुचि (antardagdhāguru-śuci) *adj.* pure because of the Aloe wood which is burnt inside अन्तर्दग्धागुरुशुचावाप यस्य जगत्पतेः। नारीणां संहतिश्चारुवेषा कारागृहे रतिम् TilaMañ. 16. 10.

अन्तर्दण्ड (antar-daṇḍa) *m.* inner bolt or latch अर्गला त्रिषु कल्लोलेऽन्तर्दण्डवारयोर्न ना MediK. 161. 58.

अन्तर्दत्तमनोजरुज् (antar-dattamanojaruj) *adj.* which has given, i.e. caused love-sickness in the mind (of others) विन्ध्याटवी। अन्तर्दत्तमनोजरुञ्जि ... लतागृहाणि दधती कांचिन्मुदं यच्छति SaduktiKa. 283. 29.

अन्तर्दधत् (antar-dadhat) *adj. [f. –ī]* **1A** hiding or concealing सैषान्तर्दधती तमोविघटनादानन्दमात्मप्रभम्। ... मुक्तावली जाह्नवी PraboCan. 4.29; **1B** keeping in, bearing inside असौ ...। अन्तर्दधेऽन्तर्दधती विषादम् Surath. 13. 91; **2** being invisible, disappearing तत्रान्तर्दधदभिचारघोरकर्मप्रारम्भी स खलु निकुम्भिलामयासीत् Rāgh. 18. 71.

अन्तर्दधन (antar-dadhana) *n.* distillation of spirituous liquor, PW.

अन्तर्दधान (antar-dádhāna) *adj. [f. –ā]* **1A** avoiding or warding off त्रयः सुपर्णास्त्रिवृता यदायन्नेकाक्षरमभिसंभूय शक्राः। प्रत्यौहन्मृत्युममृतेन साकमन्तर्दधाना दुरितानि विश्वा AV. v. 28. 8; **1B** hiding or concealing तां पराजयमानां स प्रीते रक्ष्यां दशाननात्। अन्तर्दधानां रक्षोभ्यः ... अपश्यत् कपिकुञ्जरः Bhaṭṭi. 8.71; **2** keeping in, i.e. bearing inside धामैकधाम गङ्गाया गङ्गाया इव भास्करम्। गर्भमन्तर्दधानाया दुरालोकमभूद्वपुः PāṇḍaC. 1. 55; वाडवाग्निच्छलादन्तर्दधाना दुःखपावकम्। दत्वा रत्नौघमुद्घोषैः स्तुवन्तीव तमब्धयः Surath.3.57.

अन्तर्दन्तक (antar-dantaka) *m.* [Inst.] from inside the teeth, i.e. in low voice तमेव तथाधीयानमपर आह किमन्तर्दन्तकेनाधीष उच्चैर्वर्ततामिति। एवमुच्चनीचमनवस्थितपदार्थकम् MahāBh. i. 207. 3 (*on* i. 2. 30)

अन्तर्दयोपरक्त (antardayoparakta) *adj.* overwhelmed with or overtaken by compassion in the mind अन्तर्दयोपरक्ताश्च राजराजेश्वरोपमाः। द्विरष्टवर्षवद्विद्धि चत्वारो धर्मपूर्वकाः PauṣkS. 24. 34; धर्मज्ञानादयश्चतुः। ... अन्तर्दयोपरक्ताश्च ... द्विरष्टवर्षवद्विद्धि चत्वारोऽधर्मपूर्वकाः PāraS. 5. 66.

अन्तर्दर्शिततारक (antardarśita-tāraka) *adj.* with pupils shown, i.e. rolled in between निमेषोन्मेषविकृतमन्तर्दर्शिततारकम्। अधोऽवलोकनं चक्षुरधमे तु मदे भवेत् BhāvPra. (Śā.) 18. 5 (1)

अन्तर्दलाग्रकम् (antardalāgrakam) *adv.* up to the tip of the inner petal मध्याम्बुजे तु पत्राणाम् ... त्रिधा न्यसेत्। पूर्वपत्रात् समारभ्य पुनरन्तर्दलाग्रकम् PauṣkS. 7. 155.

अन्तर्दलावरूढा (antardalāvarūḍhā) *adj. (f.)* descending, i.e. alighting from the inner petal हस्ते दधाना निजकेशहस्तं विस्रस्तमाल्यं विपुलेक्षणान्या। नखश्रिया नातिकैतवान्तर्दलावरूढा द्रवति स्म काचित् Acyutarā. 12. 27.

अन्तर्वेद्यन्तरगत (antarvedyantara-gata) *adj.* gone to another sacrificial ground or altar अन्तर्वेद्यन्तरगतो दक्षो वै महतो भयात् SkandP. i (1). 5. 4.

अन्तर्वेद्यप्राप्ति (antarvedy-aprāpti) *f.* absence of occurrance within the sacrificial ground or altar न च नियमेन कृत्स्नमानस्यान्तर्वेद्यप्राप्तेः कथं परिसंख्येति वाच्यम् MayūMāli. 319. 16 (*on* iii. 7. 6)

अन्तर्वेद्यवस्थापन (antarvedy-avasthāpana) *n.* act of keeping within the sacrificial ground or altar व्युद्धृत्यसादनं कपालेभ्यः पुरोडाशं पृथक्कृत्यान्तर्वेद्यवस्थापनम् NyāyMāVi. 492. 6 (*on* x. 1. 11)

अन्तर्वेद्यादिदेश (antarvedyādi-deśa) *m.* land or region between the rivers Gaṅgā and Yamunā and so on (निवेश्य कालम् ... प्रदेशं विषयम् ... पक्षं संकीर्त्य कल्पयेत्) विषयोऽन्तर्वेद्यादिदेशः SmṛtiCan.iii.81.9; VīraMi. (Vyavahāra.) 46. 28.

अन्तर्वेद्येकदेश (antarvedy-ekadeśa) *m.* part of the region within the sacrificial ground or altar किमन्तर्वेद्येकदेशो यूपाङ्गत्वेन विधीयते अथ बहिर्वेदिदेशमिश्रसंधिदेशमात्रं लक्षयति TantrVā. 1134. 9 (*on* iii. 7. 13); ŚāstrDī. 319. 17 (*on* iii. 7. 6); ŚivārkaMaDī. ii. 216. 4 (*on* iii. 1. 23)

अन्तर्वेध (antarvedha) *m.* name of a particular locality, PW.; pw.

अन्तर्वेपधुत (antarvepa-dhuta) *adj.* shaken due to the trembling of the heart अन्तर्वेपधुतौ तस्याश्चकम्पाते पयोधरौ SkandP. i (3(2)). 18. 13.

अन्तर्वेलाधारिन् (antarvelā-dhārin) *adj.* who holds, i.e. controls the inner wave नागकुमारकाः। अन्तर्वेलाधारिणोऽस्मिन्नायुक्ता इव सर्वदा TriṣaŚaPuC. ii. 3. 629.

अन्तर्वेशिक (antarveś-ika) *m.* guard or superintendent of the inner apartment or harem, chamberlain अन्तःपुरे त्वधिकृतः स्यादन्तर्वेशिको जनः AmaK. 1483; ŚabdaRa. (Vā.) 2595; स्यातामन्तःपुराध्यक्षेऽन्तर्वेशिकावरोधिकौ KalpaK. 90. 18; ŚabdaRaSaK. 46. 3.

अन्तर्वेश्मन् (antar-veśman) *n.* **Ai** inner apartment, harem एतावदुक्त्वा धृतराष्ट्रोऽन्वपद्यदन्तर्वेश्म सहसोत्थाय राजन् MahāBhā. iii. 5. 20; भो भोः ... यथाप्रधानमन्तर्वेश्मनि दौवारिकाश्च VeṇīSaṁ. 6. 159; प्रष्टुं तां च तदा प्रायादन्तर्वेश्म स चन्द्रमाः BrahmP. 152. 5; **Aii** inner apartment, i.e. secret place संध्यां चोपास्य शृणुयादन्तर्वेश्मनि शस्त्रभृत्। रहस्याख्यायिनां चैव प्रणिधीनां च चेष्टितम् ManuSm. 7. 223 = SūktiRa. 158. 15; ManuBh. ii. 68. 18 (*on* 7. 223); अन्तर्वेश्मनि रात्रौ वा दिवारण्ये विशोधिते। मन्त्रयेन्मन्त्रिभिः सार्धं भाविकृत्यं तु निर्जने ŚukraNī. 1. 353; **B** interior or inside of the house अनुभावी तु यः कश्चित्कुर्यात्साक्ष्यं विवादिनाम्। अन्तर्वेश्मन्यरण्ये वा ManuSm. 8. 69; स्त्रीषु रात्रौ बहिर्ग्रामादन्तर्वेश्मन्यरातिषु। व्यवहारः कृतोऽप्येषु पुनः कर्तव्यतामियात् NāraSm. 17. 43; अरण्ये निर्जने रात्रावन्तर्वेश्मनि साहसे। न्यासस्यापह्नवे चैव दिव्या संभवति क्रिया NāraSm. 33. 30; SaraKaṇṭhā. 196.2; अन्तर्वेश्मनि यत्कार्यमतर्कितोपनतं वाग्दण्डपारुष्यसंग्रहस्तेयसाहसादिरूपम् ManuBh. ii. 106. 1 (*on* 8. 69); पुण्याहवाचनं वृत्तमन्तर्वेश्मनि BrahmP. 72. 15; मानुषं साधनं न स्यात्तत्र दिव्यं प्रदापयेत्। अन्तर्वेश्मनि साहसे ... प्रदुष्टेषु प्रमाणेषु दिव्यैः कार्यं विशोधनम् ŚukraNī. 4 (5). 255.

अन्तर्वेश्मनिवेशितैकनयन (antarveśmaniveśitaikanayana) *adj.* which keeps an eye on, i.e. watches the inside of the house अन्तर्वेश्मनिवेशितैकनयनम् ... श्वा ... मार्जारमास्कन्दति SubhāRaK. 35. 16; SaduktiKa. 280.22.

अन्तर्वेश्मम् (antarveśmam) *adv.* inside the house वेश्मनि इति अन्तर्वेश्मम् तत्र भवम् आन्तर्वेश्मिकम् SiddhāKau. 260A.1 (*on* iv. 3. 60)

अन्तर्वेश्मादि (antarveśmādi) *adj.* interior or inside of the house etc. अन्तर्वेश्मादावुक्तसाक्ष्यभावे सति स्त्रीबालवृद्धशिष्यबन्धुदासकर्मकरा अपि साक्षिणः स्युः ManvaMu. 301. 32 (*on* 8. 70)

अन्तर्वेश्मिक (antarveśm-ika) *m.* superintendent of the inner apartment or harem, chamberlain भो भोः ... यथाप्रधानमन्तर्वेश्मनि (v.l. °र्वेश्मिकाः) दौवारिकाश्च VeṇīSaṁ. 6. 159 (comm. अन्तःपुरचारिणः) [KośaKaTa. 1. 587 gives *antarveśmika* as the synonym of *antarvaṁśika* and *avarodhika*]

अन्तर्वैराग्य (antar-vairāgya) *n.* detachment from within, internal detachment अन्तःसंगपरित्यागी बहिःसंभारवानिव। अन्तर्वैराग्यमादाय बहिराशोन्मुखे हितः MahāU[2]. 6. 70.

अन्तर्वैरिगण (antarvairi-gaṇa) *m.* host of internal enemies गुणैरेव त्वया देव ...। अन्तर्वैरिगणो वीरधर्ममर्मविदा मुदा PārśvC. 2. 422.

अन्तर्वैशिक (antarvaiś-ika) *m.* superintendent of the inner apartment or harem, chamberlain समुद्रमुपकरणमन्तर्वैशिक (v.l. °र्वैशिक APTE) हस्तादादाय परिचरेयुः ArthŚā. i. 106. 4 (1. 21); cf. **अन्तर्वंशिक, अन्तर्वासिक.**

अन्तर्व्यतिकर (antar-vyatikara) *m.* internal or mental anguish कियान् कोऽयं कीदृक् कियदवधिरन्तर्व्यतिकरः PratāYaBhū. 261. 2.

अन्तर्व्यथा (antar-vyathā) *f.* **A** mental agony यत्र ... प्रणयिनः ...। जायन्ते प्रविशंकितस्मरशरप्रोत्थापितान्तर्व्यथा[:] EI. iii. 352. 6; iii. 356. 6; असौ कुमारी ... अत्यर्थमन्तर्व्यथामनुभवन्ती क्वापि कालं क्षपयति UdaySuKa. 71. 13; **B** pain inside बाह्यतो लग्नः कुर्यादन्तर्व्यथां शरः KathāKau. 3. 2.

अन्तर्व्यवधान (antar-vyavadhāna) *n.* intervention or interruption between व्यस्तसंबन्धता ... संबन्धान्तरनिर्भासात्संबन्धान्तरजन्मनः। स(?अ)भावेऽपि तयोरन्तर्व्यवधानात्त्रिधैव सा AgniP. 346. 20.

अन्तर्व्यवस्थित (antar-vyavasthita) *adj.* [*f.*-ā] **Ai** existing inside अन्तर्व्यवस्थितस्य वा द्रव्यस्य वाय्वुह्यमानावयवद्रव्यस्य बहिरवस्थितद्रव्यप्राप्तिः। दृष्टं कलशे निषक्तानामपां बहिः शीतस्पर्शग्रहणम् NyāyVār. 386. 11 (*on* iii. 1. 47); **Aii** existing inside the body द्विसप्ततिसहस्राणि नाड्योऽन्तर्व्यवस्थिताः PāraS. 3.91; बाह्यादुगुदमण्डलादन्तर्व्यवस्थितं मण्डलद्वयमुत्तरौ गुदौ। एष कोष्ठ्यो जाठरो विस्तारः Aparā. 983. 1 (*on* 3. 94); **Aiii** situated in the inner region द्वात्रिंशत्तु बहिः प्रोक्ताश्चत्वारोऽन्तर्व्यवस्थिताः (देवताः) Mānaso. iii. 1. 81; **B** established internally विशेषेऽन्तर्निगूढे च प्रायः षष्ठी नियुज्यते। ... तथा च राज्ञः पुरुषः ... तरोः शाखेति सर्वत्र विशेषोऽन्तर्व्यवस्थितः NyāyMañ. ii. 141. 15; **C** present in the heart or mind दुःखे ... अन्तर्व्यवस्थितं हि यत् तद्दयितसुतसुखादिवीर्यात्मकं तदेव ... क्षोभात्मकं विकासमापन्नम् ParāTri. 49.8.

अन्तर्व्याकुलविद्युत् (antar-vyākulavidyut) *adj.* having tremulous (flashes of) lightening inside खड्गच्छिन्नजटायुपक्षतिरितः सीतां ज्वलन्तीं वहन् अन्तर्व्याकुलविद्युदम्बुद इव द्यामभ्युदस्थादरिः UttaRāC. 3. 44.

अन्तर्व्याज (antar-vyāja) *m., n.* **1** one of the six types of fruit (*lit.* having pretext inside) अन्तर्व्याजं बहिर्व्याजं बाह्यान्तर्व्याजमेव च। सर्वव्याजं बहुव्याजं निर्व्याजं च तथा फलम् KāvyMī. 111. 24; लकुचाद्यन्तर्व्याजं तथा बहिर्व्याजमत्र मोचादि। आम्राद्युभयव्याजम् KāvyMī. 112. 1; **2** variety of pretext अन्तर्व्याजबहिर्व्याजनिर्व्याजा व्याजभक्तयः SaraKaṇṭhā. 569. 5; गूढव्यलीकमन्तर्व्याजं यथा SaraKaṇṭhā. 702. 1.

अन्तर्व्यापार (antar-vyāpāra) *m.* inner activity or operation करणानां च हृदय एकीभावः। तत्र हृदये उपसंहृतेषु करणेषु योऽन्तर्व्यापारः स कथ्यते BṛĀraUBh. 604. 13 (*on* iv. 4. 2)

अन्तर्व्यापार (antar-vyāpāra) *adj.* having inner activity or operation ननु चान्तर्व्यापारपुरुषाभावे धर्ममात्रं पुरुष इत्यतो धर्मकार इति प्राप्नोति। न पुरुषकारः Sphuṭā. ii. 153. 25 (*on* 2. 56)

अन्तर्व्यापारवत् (antarvyāpāra-va(n)t) *adj.* possessing inner activity or operation आत्मशब्दः ...। न तु योऽन्तर्व्यापारवति पुरुषे भोक्तरि वर्तते Nyās. i. 496. 15 (*on* iii. 1. 8)

अन्तर्व्यापृतविद्युत् (antar-vyāpṛtavidyut) *adj.* having pervading (flashes of) lightening inside सीतां ज्वलन्तीं वहन्नन्तर्व्यापृतविद्युदम्बुद इव द्यामभ्युदस्थादरिः UttaRāC. 3. 43 (KANE Ed.)

अन्तर्व्याप्त (antar-vyāpta) *adj.* pervading internally, full inside दुर्गन्धीत्यादिविशेषणं पूर्णं मूत्रपुरीषयोः मूत्रेण पुरीषेण चान्तर्व्याप्तमित्यर्थः ManvaVi. 739. 15 (*on* 6. 76)

अन्तर्व्याप्तचरणकत्व (antarvyāptacaraṇaka-tva) *n.* the state of having the step or stride (of Vāmana) pervading nether region गम्यं चान्तर्व्याप्तचरणकत्वमन्तर्व्याप्ताङ्गकत्वं च RasGaṅ. 557. 2.

अन्तर्व्याप्तव्य (antar-vyāptavya) *adj.* to be pervaded internally, to be filled inside उदकादिना द्रव्येणान्तर्व्याप्तव्यः पूरयितव्य इत्युच्यते Nyās. ii. 458. 7 (*on* vi. 3. 59); Prasā. i. 655. 19.

अन्तर्व्याप्ताङ्गकत्व (antarvyāptāṅgaka-tva) *n.* the state of having the limb of the body (of Vāmana) pervading the inside (of the universe) गम्यं चान्तर्व्याप्तचरणकत्वमन्तर्व्याप्ताङ्गकत्वं च RasGaṅ. 557. 2.

अन्तर्व्याप्ति (antar-vyāpti) *f.* **1** invariable concomitance between probans and probandum existing in the subject, inner or internal invariable

concomitance अन्तर्व्याप्त्यैव साध्यस्य सिद्धेर्बहिरुदाहृतिः। व्यर्था स्यात् Nyāyāva. 20; अनुमानं (न) परंपरा। अविनाभावसंबन्धेऽप्यन्तर्व्याप्त्यावतिष्ठते PramāSam. 3. 32; अन्तर्व्याप्तावसिद्धायां बहिरङ्गमनर्थकम् PramāSam. 3. 50; यदि त्वनलमुत्सृज्य घटादावन्वयग्रहः। नान्तर्व्याप्तिर्गृहीता स्यात्साध्यसाधनधर्मयोः NyāyMañ. i. 101. 32; सामान्येन च व्याप्तिर्गृहीता सती सिषाधयिषितधर्म्यपेक्षायां सैवान्तर्व्याप्तिरुच्यते NyāyMañ. i. 102.23; स्वभावहेतोः सत्त्वलक्षणस्य क्षणिकत्वेन व्याप्तिः साध्यधर्मिण्येव ग्रहीतव्येति केचित्। तेषामन्तर्व्याप्तिपक्षोऽभिमतः TarkBhā. (Mo.) 26.5; न च दृष्टान्तमन्तरेण न गमकत्वम्, अन्तर्व्याप्त्यैव साध्यसिद्धेः, 'सात्मकं जीवच्छरीरम्, प्राणादिमत्त्वात्' इत्यादिवदिति दर्शयिष्यते PramāMī. 2. 25 (*on* i. 1. 2); सन्ति परमाणवः स्थूलावयविनिष्पत्त्यन्यथानुपपत्तेः इत्यन्तर्व्याप्तिः SyādvāMañ. 16 (254); अन्तर्व्याप्त्यैव साध्यस्य सिद्धत्वाद् दृष्टान्तादिभिर्न प्रयोजनम् SyādvāMañ. 22 (14); **2** pervasion, i.e. critical appreciation (of fine arts) in the mind यदपि क्वचित्क्वचित्कलासु पयसि पतितस्य तैलबिन्दोरिवान्तर्व्याप्तिशून्यस्याप्यस्योपन्याससाहसम् YaśasCam. i. 433. 7 (comm. अभ्यन्तरे कलानुभवनरहितस्य)

अन्तर्व्याप्तिप्रतिपत्ति (antarvyāpti-pratipatti) *f.* knowledge of inner or internal invariable concomitance प्रमातुरपि कस्यचित् दृष्टान्तदृष्टबहिर्व्याप्तिबलेनान्तर्व्याप्तिप्रतिपत्तिर्भवति PramāMī. 48. 15 (*on* i. 2. 20)

अन्तर्व्यामग्ना (antar-vyāmagnā) *adj. (f.)* sunk into or plunged inside भासा यस्य त्रिलोकी लसति परिलसत्फेनबिन्दुर्णवान्तर्व्यामग्नेवातिगौरस्तुलितसुरसरिद्वारिपूरप्रसारः ŚivaKePāSt. 12.

अन्तर्व्यासङ्ग (antar-vyāsaṅga) *m.* attachment to self, i.e. self-worship (अन्तर्बहिश्च यत्किंचिन्मनोव्यासङ्गकारकम्) अन्तर्व्यासङ्गः अहं ज्ञाता दाता कर्ता हर्ता इत्यादिरात्मपूजा, बहिर्व्यासङ्गः पुत्रपश्वादिपूजा BhārBhāDī. *on* xii. 12. 35.

अन्तर्व्यूह (antar-vyūha) *m.* **1** inner military array रामोऽपि ... अन्तर्व्यूहविहितरक्षाय विरूपाक्षाय ... प्रतिनिधीन् विधाय ... बलैरुपरुरोध RāmāCam. 6. 31 (5) (comm. मध्यगुल्मे ... कृतसंरक्षणाय); **2** inner structure or diagram अन्तर्व्यूहचतुष्कस्थकुम्भान्कुङ्कुमवारिभिः। सहिरण्यैः समापूर्य ĪśānŚiPa. ii. 50. 307.

अन्तर्व्योमन् (antar-vyoman) *n.* space within मनोऽन्तर्व्योम विज्ञेयं गर्वो ब्रह्मशिलागतः PāraS. 10. 18.

अन्तर्व्रण (antar-vraṇa) *m.* internal injury or wound शराग्रान्तर्व्रणौ शल्ये प्राण्योषधिनृपेषु ना AnekāK. 609.

अन्तर्व्रणविलुठन (antarvraṇa-viluṭhana) *n.* excessive striking, i.e. aching of internal injury or wound अन्तर्व्रणविलुठनादुत्कलिकया परीतां भूयस्या सततमपरागव्यतिकराम्। ... पादस्पर्शादपि सुखय राधाकुमुदिनीम् HaṁsDū.(Ru.)93.

अन्तर्व्रणित (antar-vraṇita) *adj.* injured or wounded in the heart हतोऽयमिति ... तत्तापाशङ्कनेवान्तर्व्रणितः स द्रुतं ततः। ... वसुधामगात् RājTa. (Ka.) 3. 32.

अन्तर्हणन (antar-haṇana) *n.* [retroflexion, P. viii. 4. 24; JaineVyā. 415. 18 (*on* v. 4. 106); KāśiVṛ. *on* viii. 4. 24; Nyās. ii. 1121. 8 (*on* viii. 4. 24); SiddhHe. ii. 3. 87; Prasā. i. 679. 21; SiddhāKau. 576B. 17 (*on* viii. 4.24)] **1** (apprehension of) destruction in the mind भूपरिहणनैर्बृविन्निहाशङ्कैतान्तर्हणनं हि दुर्हनोऽपि DvyāśraKā. 4. 21 (comm. स्वचित्ते विनाशमाशङ्केत संभावयेत्); **2** striking or killing in the middle अन्तरयनतां जहौ सुराष्ट्रा येनान्तरयणवारिणा जनानाम्। सोऽन्तर्हणनात्कथं ह्युपेक्षः DvyāśraKā. 4. 31 (comm. सुराष्ट्रामध्ये वध्य एव) [abolishing, MW.]

अन्तर्हत्य (antarhat-ya) *ger.* [MahāBh. i. 344. 14 (*on* i. 4. 65); CāndraVṛ. *on* ii. 2. 28; KātanVṛ. *on* iv. 6. 55; SaraKaṇṭhā. (Gr.) i. 1. 144; SiddhaHe. iii. 1. 1] **1** having struck or killed in the middle अन्तर्हत्य। मध्ये हत्वेत्यर्थः JaineVyā. 43. 13 (*on* i. 2. 135); Nyās. i. 311. 8 (*on* i. 4. 65); SiddhāKau. 181A. 11 (*on* i. 4. 65); Prasā. i. 517.17; अदःकृत्य अन्तर्हत्यैकः कणेहत्य पयः पपौ DvyāśraKā. 5. 20 (comm. अरिं मध्ये हिंसित्वा); **2** having struck or killed by not taking hold of or by not capturing अन्तःशब्दोऽपरिग्रहेऽर्थे गतिसंज्ञो भवति। ... अन्तर्हत्य KāśiVṛ. *on* i. 4. 65; Prasā. i. 517. 17.

अन्तर्हत्वा (antar-hatvā) *ger.* having struck or killed by taking hold of or by capturing अपरिग्रह इति किम्। अन्तर्हत्वा मूषिकां श्येनो गतः। परिगृह्य गत इत्यर्थः KāśiVṛ. *on* i.4. 65; PadMañ. *on* KāśiVṛ. *on* P. i. 4. 65 (603. 16).

अन्तर्हन् (antar-han-) II. P. [MahāBh. i. 344. 14 (*on* i. 4. 65); KāśiVṛ. *on* viii. 4. 24; SiddhaHe. ii. 3. 82] **1** to strike or kill in the middle अन्तर्हण्मोऽन्तर्हन्मो भृशं प्रहण्वः। परिहन्व इति क्रुधा जिघांसौ नृपचक्रेऽत्र वदन् सुसौष्ठवोऽसि DvyāśraKā. 4. 22; (pass.) to be struck or killed in the middle अन्तर्हण्यन्ते प्राणिनोऽत्रेत्यधिकरणेऽप् Nyās. ii. 704. 16 (*on* iii. 3.78); **2** to strick or kill by not taking hold of or by not capturing, cf. **अन्तर्हत्य2; 3** to strick or kill by taking hold of, cf. **अन्तर्हत्वा**.

अन्तर्हनन (antar-hanana) *m.* [P. viii. 4. 24] name of a region (*lit.* where the people are struck or killed in the middle) उत्तरत्र वेति व्यवस्थितविभाषावलोकनात् देशविषये न भवति। अन्तर्हननो देशः JaineVyā. 415. 19 (*on* v. 4. 106); आदेश इति किम्। अन्तर्हननो देशः KāśiVṛ. *on* viii. 4. 24; अदेशे किम्। अन्तर्हननो देशः Prasā. i. 679. 22; देशे तु अन्तर्हननो देशः SiddhāKau. 576B. 17 (*on* viii. 4. 24) [name of a village, MW.; name of a country, Bāhīka, APTE]

अन्तर्हननत्व (antarhanana-tva) *n.* the state of being the region where the people are struck or killed in the middle अमुना परिवेपनेन भग्नः परिपावनपरिभापनः प्रभासः। दुष्प्रख्याणप्रकामनेनान्तर्हननत्वं सुप्रगम्यमानः DvyāśraKā. 4. 30 (comm. अन्तर्हन्यतेऽस्मिन्नित्यन्तर्हननो देशो यत्र मध्यभागे लोको हन्यते तद्भावम्)

अन्तर्हन्तृ (antar-hantṛ) *adj.* who strikes or kills in the middle कथमन्तर्हन्ता। णत्वेऽनुस्वारपरसवर्णस्यासिद्धत्वात् कुर्वन्तिवत् BhāṣāVṛ. *on* viii.4.24.

अन्तर्हस् (antar-has-) I. P. to smile inwardly, i.e. to smile in a suppressed manner स्वयमप्यन्तर्हसन्तीति तानाक्षिपन्ति सन्तः ŚatDū. 142. 15.

अन्तर्हसत् (antar-hasat) *adj.* smiling inwardly, smiling in a suppressed manner ब्राह्मणेन च यथार्थमन्तर्हसन्नेव संभाषेत BaudhŚS. iii. 5. 11; iii. 15. 2; अन्तर्हसता तेन ते सर्वेऽप्यन्नपानप्रेषणेन संतोषिताः Bharaṭ. 23B. 4; आकर्णयन्वृत्तमिदं स सर्वमन्तर्हसन्तं च तमीक्षमाणः। आवर्त्य वेत्रेण तमाजघान पाण्ड्यः क्रुधा ŚivLī. 21. 77.

अन्तर्हसितभुग्नौष्ठी (antarhasita-bhugnauṣṭhī) *adj. (f.)* whose lips are bent due to smiling in a suppressed manner सा तु ...। अन्तर्हसितभुग्नौष्ठी वृद्धाज्ञां समपादयत् BṛKathāŚloSam. 21. 102.

अन्तर्हस्त (antar-hasta) *adj.* contained in the hand, which is within the reach तेषां यान्यन्तर्हस्तानि वसून्यासंस्तान्यादाय समुद्रं प्रारूप्यन्त। तेषां वै देवा अनुहायैतैनैव छन्दसान्तर्हस्तानि वसून्याददत GopBr. ii. 6. 11 (260. 4)

अन्तर्हस्त (antar-hasta) *m.* inner side of the (elephant's) trunk गजः। अन्तर्हस्तेन वाप्यन्यां प्रहरेत पुनः पुनः ... अन्तर्हस्तेन तत्रैकां बाह्यहस्तेन चापराम्। प्रहारयेत् तमारूढो भस्त्रिकास्ता यथाक्रमम् Mānaso. ii. 3. 312.

अन्तर्हस्तम् (antarhastám) *adv.* in the hand, within the reach of hand तुराणामतुराणां विशामवर्जुषीणाम्। सुमैतु विश्वतो भगो अन्तर्हस्तं कृतं मम AV. 7. 50. 2.

अन्तर्हस्तीन (antarhastīna) *adj.* **1** belonging to, i.e. kept on the elephant's back तेषां यान्यन्तर्हस्तीनानि वसून्यासंस्तान्यादाय समुद्रं प्रौप्यन्त AitBr. 22. 6 (583) (Sāy. हस्तिनां गजानामुपरि भारवहनाय स्थापितानि); **2** contained in the hand, which is within the reach स्वकीयस्य हस्तस्यान्तर्मध्ये गोप्यत्वेन स्थापितान्यन्तर्हस्तीनानि Sāy. *on* AitBr. 22. 6 (583)

अन्तर्हस्त्यम् (antarhastyam) *adv.* in the hand, within the reach of hand समैतु विश्वतो भगोऽन्तर्हस्त्यं कृतं मनः AV. (P.) xix. 9. 9.

अन्तर्हार (antar-hāra) *n.* (Arch.) second internal court मठभुक्तिनिकेतनं चापि। नान्तर्मण्डलमथवा चान्तर्हारं तथैकसालं चेत् MayaMa. 23. 93; अन्तर्हारे बाह्यतो मण्डपस्य प्राच्यां याम्ये पश्चिमे चोत्तरे वा। स्वर्णाकाराः कल्पवृक्षास्तु पूज्याः ĪśānŚiPa. i. 15. 78; अन्तर्हाराद्बहिर्मूलादल्पलिङ्गालयादिकं कुर्वीत ĪśānŚiPa. ii. 35. 18.

अन्तर्हारा (antar-hārā) *f.* (Arch.) second internal court नान्तर्मण्डलमथ वा चान्तर्हारं तथैकसालं चेत्। अन्तर्हारा मध्यमहारा मर्यादिभित्तिश्च MayaMa. 23. 93; वप्राणि क्रमशः कुर्यात् ...। तत्रान्तर्मण्डलं त्वाद्यमन्तर्हाराथ तद्बहिः ĪśānŚiPa. ii. 35. 45.

अन्तर्हारादिक (antarhārādi-ka) *adj.* second internal court etc. द्वारशालादयः कार्या अन्तर्हारादिकेष्वपि ŚilpaRa. i. 41. 6.

अन्तर्हास (antar-hāsa) *m.* suppressed, i.e. secret smile गुहसेनोऽनुमेने च सान्तर्हासस्तथैव तत्। विवाहो मम पुत्रस्य तावदस्त्विति KathāSaSāg. iii. 3.85.

अन्तर्हासचलत् (antarhāsa-calat) *adj.* moving due to suppressed, i.e. secret smile दृष्ट्वैकासनसंस्थिते प्रियतमे ... एकस्या नयने निमील्य ... अन्तर्हासचलत्कपोलफलकां धूर्तोऽपरां चुम्बति SubhāRaK. 19. 45.

अन्तर्हासनिरोध (antarhāsa-nirodha) *m.* stopping of suppressed smile अन्तर्हासनिरोधसंभृतरसोद्भेदस्फुरद्गण्डया स्वैरं सारिविसारणाय निहितः स्वेदाम्बुगर्भः करः ŚārṅgaPa. 3664.

अन्तर्हासम् (antarhāsam) *adv.* with a suppressed, i.e. secret smile निद्रां गत्वा किमपि रुदती सस्वरं विप्रबुद्धा। सान्तर्हासं कथितमसकृत्पृच्छतश्च त्वया मे MeghDū. 108.

अन्तर्हासलसत् (antarhāsa-lasat) *adj.* radiant due to suppressed smile अन्तर्हासलसत्कपोलफलकं धूर्तोऽपरां चुम्बति AmaŚ. 19; KāvyālaṅSū. iii. 2. 4; SaraKaṇṭhā. 73. 7; SubhāRaK. 19. 45 (v.l.); SāhiDa. 115. 14; ŚārṅgaPa. 3575; Subhāṣi. 2069; SaduktiKa. 122.14.

अन्तर्हासविकाशमुख (antarhāsa-vikāśamukha) *adj.* having glowing face due to suppressed, i.e. secret smile ततोऽन्तर्हासविकाशमुखः स तदुचितमाचचार PañcT. (Kos.) 3.206 (187.1); Pañcā. 212. 1.

अन्तर्हासहृष्यत्कपोलम् (antarhāsahṛṣyatkapolam) *adv.* with cheeks pleased due to suppressed, i.e. secret smile लक्ष्मीम् ... आलोक्यान्तर्हासहृष्यत्कपोलम्। ... कान्तोऽपश्यत्कौस्तुभार्कोदयाद्रिम् Acyutarā. 7. 31.

अन्तर्हित (antár-hita) *adj.*[*f.*-ā] **1Ai** who or which is hidden or concealed (used as noun) (that) which is hidden (pred.) hidden or concealed, i.e. implicit **ii** concealed, i.e. disguised **B** who or which is covered or veiled (pred.) covered, veiled **Ci** obscured **ii** supressed or overshadowed **D** which is absorbed or merged (pred.) absorbed, merged **2Ai** which is placed or kept inside **ii** which is placed or kept within (pred.) placed or kept within **B** which is held in between, intervened or interposed (pred.) held in between **C** which is placed in the mind or soul **3A** separated, kept apart from **B** obstructed **C** who is placed at a distance **D** which is kept away, i.e. secluded **E** kept aside or held back, i.e. neglected or withdrawn (used as noun) (one) who is neglected **4Ai** ceased to exist, vanished, lost **ii** dispelled **iii** died down **iv** changed **v** interrupted, discontinued **Bi** who or which has disappeared, i.e. become invisible (pred.) disappeared, become invisible **ii** (pred.) set in **iii** elapsed **5** accepted or admitted **1Ai** who or which is hidden or concealed य उदारा अन्तर्हिताः ...। सर्पा इतरजना रक्षांसि AV. xi. 9. 16; यर्हि वा एतद्दोहनात्पर्याक्रियते तर्हि स्कन्नमन्तर्हितं ह्यस्यां वनस्पतया इति MaiS. i. 8. 3 (i. 119. 1); अस्माल्लोकाद्घोऽमुं लोकं गच्छत्यन्तर्हित इव वा इतोऽसौ लोकः KāṭhS. 22. 13 (ii 68. 8); अथो खल्वाहुरन्तर्हितमिव वा एतद्यत्पयः KāṭhS. 35. 16 (iii. 61. 13); KapiKaS. 48. 14 (305. 3); PañcBr. ix. 9. 3; अन्तर्हिता वै मिथुनं चरन्ति GopBr. ii. 2. 6 (171. 7); व्यापन्नमाज्यमव्यापन्नमन्तर्हितमनाज्ञातप्रायश्चित्तं यज्ञसमृद्धीर्जुहोति BaudhGS. iv. 9. 6; अत्राह गोरमन्वत नाम त्वष्टुरपीच्यम्। ... अपीच्यमपचितम्। ... अन्तर्हितं वा Nir. 4. 25 (87.2); निण्यम्। अपीच्यम्। सस्वः। ... अन्तर्हितस्य AVPari. 48. 107; अन्तर्हितानां भूतानां निस्वनस्तुमुलोऽभवत् MahāBhā. i. 1. 76; यानि भूतानि सन्तीह ... अन्तर्हितानि वा यानि तानि शृण्वन्तु मे वचः MahāBhā. i. 42. 11; वाक्किलान्तर्हिताब्रवीत् MahāBhā. i. 112. 29; i. App. I. 79 (109); iii. 38. 118; ततो विनशनं गच्छेत् ... गच्छत्यन्तर्हिता यत्र मरुपृष्ठे सरस्वती MahāBhā. iii. 80.18; PadmP. i. 25. 18; अन्तर्हितः प्रकाशो वा दिव्यैर्दत्तवरैः शरैः MahāBhā. iii. 272. 4; iv. 14. 20; अन्तर्हिता महानादाः श्रूयन्ते ... रक्षसाम् MahāBhā. vi. 95. 49; अन्तर्हितौ चेरतुस्तौ भृशं विस्मयकारिणौ MahāBhā. vii. 13. 42; vii. 131. 67; एते हि देवा वसवः ... अन्तर्हितास्त्वां प्रतिपालयन्ति MahāBhā. xii. 51. 15; ददर्शान्तर्हितं वीरं वरदानाद्विभीषणः Rāmā. vi. 36. 10; अन्तर्हितैश्चापि तथान्तरिक्षे ब्रह्मर्षिभिश्चैव सुरर्षिभिश्च। शब्दः कृतः Rāmā. vi. 244* (9); ननादान्तर्हितो भूमौ वृषदंशः HariVaṁ. 106. 41; एते खलु लोके सुघ्निनो नाम। ये ... अन्तर्हिताश्च विवृताश्च सुखं भ्रमन्ति Avimā. 4. 13; पादपान्तरितो (v.l. °न्तर्हितो) विश्वस्तां तावदेनां पश्यामि Śāk. 1. 17 (1); अन्तर्हितः ... नारदो जलदे स्थितः ViṣṇuP. v. 16. 18; वेश्म दिव्यमन्तर्हितं च यत्। ... अयुक्तास्तु न पश्यन्ति MatsyaP. 182. 6; देवाश्च पितरश्चैव तमेवान्तर्हिता द्विजम्। आविश्य ... मोक्ष्यन्ति BrahmāṇḍP. ii. 15. 14; अनिलात्मजः। आयातेन दशास्यस्य संस्थितोऽन्तर्हितश्चिरम् Bhaṭṭi. 8. 102; नात्र ... अन्तर्हितमिवार्थरूपम् ... मन्त्रयोरस्ति BṛĀraUBh. 75. 9 (*on* i. 3. 28); नाक्रमेत्र गच्छेदचक्षुर्विषयं सर्पचौरादेरन्तर्हितस्य भावाशङ्कया ManuBh. i. 358. 17 (*on* 4. 77); प्रीत्या भुज्यमान उपनिधिस्तु शास्त्रान्तरवदन्तर्हितो न्यासः ManuBh. ii. 135. 19 (*on* 8. 145); ii. 140. 28 (*on* 8. 149); (अन्वाहितं हृतं न्यस्तम् ... एतान्यागमं विना) अन्वाहितं यत्प्रकटमन्यथा प्रदर्श्यान्तर्हितमन्यदवस्थाप्यते ManuBh. ii. 139. 10 (*on* 8. 148); वितस्ता ... अन्तर्हिता गता शीघ्रं विशोका यत्र निम्नगा NīlaP. 1295; हरिः ...। तस्मात्स्थानादपाक्रम्य कुब्जाग्रेऽन्तर्हितः स्थितः VāmaP. 5. 1; 55. 9; मेघनादः ... जगामान्तर्हितो युद्धमहीम् RāmāMañ. 365. 13; सा ततोऽन्तर्हिताभ्येत्य स्थिता चान्तःपुरे मम BṛKathāMañ. iii. 1. 395; गृहमध्ये तु यः पश्येत्क्षीणामन्तर्हितां स्त्रियम्। अकस्मान्मालतीपुष्पं जातं स्यात्तस्य वा गृहे BhaviP. 408B. 34 (ii(3) 20. 50); तौ तत्रान्तर्हितौ भूत्वा ... रिपोर्बलम्। अयुतं जघ्नतुः BhaviP. 526B. 1 (iii (3). 30. 88); असौ ...। अन्तर्हित उवाचेदम् PadmP. v. 14. 104; भयादन्तर्हिता शिवा। आविरासीज्जगन्माता हिमाचलगुहामुखात् GaṇeP. i.48. 9; इतोऽन्तर्हितौ शृणुवस्तावदस्याः विश्रम्भजल्पितानि CaṇḍKau. 1. 15 (2); विलोभ्य सौभाग्यमदाद्धटोऽनया सलीलमन्तर्हितया प्रतारितः VikraDeC. 17. 62; तत्स्थिरं यत्तु विषये दूरेऽप्यन्तर्हिते स्थिरम् BhāvPra. (Śā.) 120. 14 (5); एवं निश्चित्य राजा तत्रैव रात्रावन्तर्हित एवातिष्ठत् BhojPra. 68.7; यतन्ते संततं ते मां हन्तुमन्तर्हिता अपि HariC. (Pa.) 49; अरण्यादिदेशं दुर्गं नाक्रामेत्। सर्पचौरादेरन्तर्हितस्य संभवात् ManvaMu. 158. 25 (*on* 4. 77); रामो वालिनमन्तर्हितः ... सख्युर्जघान शत्रुम् UpadeŚ. 68; (used as noun) (that) which is hidden दुर्विभक्तमन्योन्यापहृतमन्तर्हितमविज्ञातोत्पन्नं वा पुनर्विभजेरन् ArthŚā. ii. 34. 5 (3. 5); (pred.) hidden or concealed, i.e. implicit यथा त्वममृतोर्मर्त्येभ्योऽन्तर्हितोऽस्येवं त्वमस्मानघायुभ्योऽन्तर्धेहि JaimiUBr. iv. 4. 2; एतस्यामिदं सर्वमन्तर्हितम् MaiU. 6. 6; अन्तर्हिते ह्यातोद्ये स्वनतोऽनुमानं भवति NyāyBh. 83. 6 (*on* ii. 1. 15); पश्यामि तावदेतस्याश्चेष्टामन्तर्हितोऽभवन् PadmP. (Ra.) 36. 31; कथमेषा ... अन्तर्हिता तरुसङ्कटे KaumuMa. 1. 25 (2); अन्तर्हिता तरुषु रोषवतीव सीता RāmāCam. 3. 36; प्रभावती तस्य चक्रे ... अतर्क्यं रूपमात्मीयं स्वयमन्तर्हिता सती KathāSaSāg. xiv. 2. 121; कोऽपि जन्तुर्नटित्वा नो जानीमो भवजवनिकान्तर्हितः क्व प्रयाति RājTa. (Ka.) 7. 1731; तद्वक्त्रशोभाविजितैः सरोजैरन्तर्हितं नूनम् अवाप्तलज्जैः Yādavā. 8. 105; तदेहि कंचित्कालमन्तर्हिता एव क्वचिदावसाम इति ... शिष्यमन्तर्धाप्य ... तिरोदधे ... देशिको देवतानाम् NīlaVi. 27. 13; **1Aii** concealed, i.e. disguised सुष्ठु खल्वद्य गीतं भाव रेभिलेन। ... अन्तर्हिता(v.l. °तो) यदि भवेद्वनितेति मन्ये Mṛcch. 3. 5; **1B** who or which is covered or veiled पात्रेषु ... दर्भान्तर्हितेष्वपः आसिच्य शंनो देवीरभिष्टय इत्यनुमन्त्रितासु तिलानावपति ĀśvaGS. iv. 7. 8; अशोकपुष्पस्तबकैर्मनोज्ञैः अन्तर्हिताभाति वराङ्गनैषा BhagAjju. 64. 22; उदयतटान्तर्हितस्याहिमांशोराभा ... वोऽवतु SūryaŚ. 37; (सः) तामन्तर्हितां दवशिखाभिरिव द्रुमालिम्। ... नारीम् ... ददर्श RāmC. 19. 46; (विक्रयमर्हति ... न तिरोहितम्) तिरोहितं स्थगितं वस्त्रादिनान्तर्हितं यस्य वा स्वरूपं केनचिद्द्रव्यरागेणान्तर्धीयते ManuBh. ii. 169. 1 (*on* 8. 203); मन्त्रेणान्तर्हितः प्रायाद्गुणशर्मा तदन्तिकम् BṛKathāMañ. vi. 1. 197; न प्राकारेण कुड्येन न विटङ्केन वा पुनः। अन्तर्हितानि दुष्यन्ति द्वारमर्माणि कुत्रचित् SamarāSū. 39. 51; (pred.) covered or veiled रात्रिभिर्ह्येवान्तर्हितौ भवतः ŚatBr. II. ii. 3. 13; ŚatBr. (K.) I. ii. 3. 12; तमसा वाऽसौ लोकोऽन्तर्हितः ŚatBr. IV. iii. 4. 8; ŚatBr. (K.) V. iv. 1. 7; नमो गन्धर्वायेत्यादित्यम्। देशेनैवान्तर्हितश्चेत् LāṭyāŚS. i. 12. 17; DrāhyŚS. iii. 4. 31; अयमिदानीं कुड्येनान्तर्हितः। शीघ्रमनुगम्यताम् MattaVi. 19. 34; **1Ci** obscured निर्णीतान्तर्हितनामधेयान्युत्तराणि षट् Nir. 3. 19 (70. 13); अन्तर्हितविप्रकीर्णानुमेयप्रायश्रुतिमूलस्मृतिबन्धनेभ्यो महानेव कल्पसूत्राणां विशेषोऽस्ति TantrVā. 162. 1 (*on* i. 3. 10); **1Cii** supressed or overshadowed शङ्खस्वना दुन्दुभिनिस्वनाश्च। अन्तर्हिता गाण्डिवनिस्वनेन। बभूवुः MahāBhā. vi. 55. 114; **1D** which is absorbed or merged यथा सुरादिसंपृक्तासु सक्तुपिण्डीष्वन्तर्हितेऽपि सुरादिरूपे रसे तत्प्रत्ययात् अस्त्येव सुरापानप्रायश्चित्तम् ManuBh. i. 360. 18 (*on* 4. 80); (सर्वं संसृष्टेदं मां च ... आत्मन्यन्तर्दधे) प्रलयकाल आत्मन्यन्तर्दधे अन्तर्हितान्यकरोत् ManvaVi. 48. 19 (*on* 1. 51); (pred.) absorbed, merged भावाश्चान्तर्हिता रसे KulārT. 7. 85; **2Ai** which is placed or kept inside ब्रह्मणोऽन्तर्हितं हविः AV. xix. 42. 1; AV. (P.) viii. 9. 5; BṛĀraUBhVā. i. 5. 70; **2Aii** which is placed or kept within मनोऽन्तर्हितेषु विज्ञानस्रोतस्सु तमसा स्मृतिं नोपजनयति BhelaS. 91. 1 (4. 6); भूतेषु चान्तर्हित आत्मतन्त्रः षाड्गुणिकं जिघ्रति षड्गुणेशः BhāgP. i. 3. 36; अन्तर्हितश्च स्थिरजङ्गमेषु ... आत्मनो मुनिर्नभस्त्वम् ... भावयेत् BhāgP. xi. 7. 42; (pred.) placed or kept within अन्तर्हितं मे बृहदन्तरिक्षम् अन्तर्हिताः पर्वता अग्नयो मे AV. (P.) xiii. 12. 1; xiii. 12. 3-13; अन्तर्हिता गिरयोऽन्तर्हिता पृथिवी मही मे ... अन्तर्हिताम ऋतवः ŚāṅkhāGS. iii. 13. 5; KauṣīGS. iii. 15. 5; वैश्वदेविकब्राह्मणस्यैकस्य हस्ते दक्षिणे अर्घ्यपवित्रेणान्तर्हिते एकपात्रस्थमुदकं कृत्स्नं दद्यात् SmṛtiCan. v. 293. 4; **2B** which is held in between, intervened or interposed अन्तर्हिते प्रतिप्रस्थाता वेदे पत्नीं वाचयति BaudhŚS. i. 276. 18; VaikhāŚS. 13. 10; पृथिवी देवयजनीति तृणेऽन्तर्हिते (स्फ्येन) प्रहरति KātyŚS. ii. 6. 16; पवित्रान्तर्हितेऽप आनीय ... श्रपयति MānGS. ii. 2. 3; उदात्तपूर्वं नियतं विवृन्या ...। स्वर्यतेऽन्तर्हितम् ṚPrāti. 3. 9; विष्णुमूर्तिं समानयेत्। तुलसीनिकटे सा तु स्थाप्या चान्तर्हिता पटैः SkandP. ii (4). 31. 16; (pred.) held in between तत्तथा त्रिभिरन्तर्हितमवमिनत्ति BaudhŚS. ii. 268. 6; **2C** which is placed in the mind or soul, i.e. inner or mental नाज्ञाहुतिमन्तर्हितां दद्यात् AVPrāyaścitta. 4. 2; **3A** separated, kept apart from अन्तर्हितो हि देवलोको मनुष्यलोकात् TaiS. VI. i. 1. 1; अन्तर्हिता वा अमुष्मादादित्यात् पितरोऽथो अन्तर्हिता हि देवेभ्यश्च मनुष्येभ्यश्च पितरः MaiS. i. 10. 17 (i. 157. 11); KāṭhakaBrsaṅkalana. 58. 6; अन्तर्हितो वै दैवात् क्षयान्मानुषः क्षयः MaiS. iii. 6. 1 (iii. 60. 4); iii.

6. 6 (iii. 67. 16); य॑द्बहि॑र्लो॑मं कृष्णाजि॑नं॑ कु॒र्या॑दन्त॑र्हितो य॑जमानो यज्ञा॑च्च देव॑ताभ्यश्च स्याद्य॑दन्त॑र्लोममन्त॑र्हितो यज्ञो॑ देव॑ताभ्यः KāṭhS. 23. 3 (ii. 77. 16); अन्तर्हिता ह्यमुष्मादादित्यात् पितरोऽथो अन्तर्हिता हि देवेभ्यश्च मनुष्येभ्यश्च पितरः KāṭhS. 36. 12 (iii. 78. 17); TaiBr. I. vi. 8. 6; नेदस्या अन्तर्हितोऽसंदिति ŚatBr. XIII. viii. 1. 20; या आसुर्यः प्राच्यास्त्वद्ये त्वदन्तर्हितानि ते चम्वां त्वद्यस्मिंस्त्वत् ŚatBr. XIII. viii. 2. 1; अप्येकेऽन्तर्हितेष्वपि ĀśvaŚS. I. vi. 6. 12; अन्तर्हिता हिं वीक्षया मनुष्यस्यैवमिव हिं तेऽन्तर्हिता भवन्ति KāṭhakaBrsaṅkalana. 59. 2; यूनि चान्तर्हितेऽप्राप्तिः Vār. 5 *on* P. iv. 1. 93; MahāBh. ii. 247. 18 (*on* iv. 1. 93); विभीषणः ... अन्तर्हितो दुष्टात् MugdhaBo. 5. 20 (50.9): **3B** obstructed ता यद् अन्तर्हिता अन्येन साम्ना स्युः अन्तर्हितं पयः पशुभ्य स्यात् JaimiBr. 3. 145; **3C** who is placed at a distance संतापिताश्च ये केचित् ... अन्तर्हिताः सोपहिताः सर्वे ते परसाधनाः MahāBhā. xii. 112. 75; SūktiRa.104.14; **3D** which is kept away, i.e. secluded तटाके निर्मितं तासामस्मिन्नन्तर्हितं गृहम् Rāmā. iii. 10. 16; अन्तर्हितश्च शुद्धात्मा संध्यावन्दनमाचरेत् BrahmāṇḍP. iii.38.22; **3E** kept aside or held back, i.e. neglected or withdrawn कुल्यैरन्तर्हितः ... इति क्रुद्धवर्गः ArthŚā. i. 67. 6 (1. 14); ManuBh. ii. 34. 13 (*on* 7. 104); आत्मसंपन्नतरस्त्वं पुत्रः तथाप्यन्तर्हितः ArthŚā. iii. 166. 1 (12. 3); आर्यवचनादन्तरिता(v.l. °र्हिता) न्यस्त्राणि MahāvīC. 1. 50 (1); (used as noun) (one) who is neglected तुल्यैरन्तर्हिताः। ... स्वधर्मान्न चलन्ति Tantrākhyā. 12. 11; PañcT. 1. 52 (33) (40. 6); **4Ai** ceased to exist, vanished, lost वास्तु वा एतदथो अन्तर्हितमिव KāṭhS. 8. 5 (i. 88. 18); KapiKaS. 7. 1 (71. 10); तदन्तर्हितमिव मनुष्येभ्य आस ŚatBr. I. ix. 1. 24; ŚatBr. (K.) II. viii. 2. 10; सर्वेणैवैनं तद्ब्राह्मण उद्धरेत् येनान्तर्हितं हिरण्यमग्रतो हरेत् AVPrāyaścitta. 5.1; तव चान्तर्हितो योगः ततः संस्मारितो मया HariVaṁ. 19. 26; आकाराणामनन्तानां क्षितौ क्षेत्रेषु वर्तिनाम्। कालेनान्तर्हितानां च तेषां भूयो निवेशनम्। कुर्वन्ति विबुधाः PauṣkS. 38. 1; धर्मशास्त्राणि ...। तेषु चान्तर्हितेष्वेवं युगान्तेषु महर्षयः। ... तानि करिष्यन्ति युगे युगे KūrmaP. 138. 9 (1. 12); अन्तर्हिता वेदशाखाः पुरुषाणां ग्रहणावधारणशक्तिवैकल्यात् ManuBh. i. 40. 24 (*on* 1. 82); **4Aii** dispelled अकल्माषाणां काण्डानामष्टाङ्गुलीं तेजनीमन्तर्हितमघमिति ग्रामदेशादुच्छ्रयति KauśiSū. 86. 14; अन्तर्हिताश्च ते विघ्नाः श्रुतायां नभसो गिरि GaṇeP. i. 14.18; नारदः ... अन्तर्हितायां मायायां पूर्ववन्मतिमानभूत् ŚivaP. ii (1). 4. 20 (41A.1); शश्वत् पश्यति शान्तसंततमःप्रत्यूहमन्तर्हितम् SiddhāSi. i. 2. 18; **4Aiii** died down तस्मिन्नुपरते(v.l. °न्नन्तर्हिते) शब्दे ... निस्वनस्तुमुलोऽभवत् MahāBhā. i. 1. 76; अन्तर्हिते शब्दे स्मरणादर्थप्रतिपत्तिश्चेन्न ŚābaBh. 45. 13 (*on* i. 1. 5); श्रूयमाणेन हि पदेन योऽर्थो नावबोधितः स कथमन्तर्हिते तस्मिन्नवभासेत PrakaPañ. 402.17; **4Aiv** changed मया तेऽन्तर्हितं रूपं न त्वा विद्युर्जना इति MahāBhā. iii. 63. 13; **4Av** interrupted, discontinued अन्तर्हितेभ्योऽनन्तर्हितेभ्यो वा प्रेतेभ्यस्त्रिभ्यः क्रमेण श्राद्धं कर्तव्यम् CaturCin. iii (1). 129. 17; VīraMi. (Śrāddha.) 15. 27; **4Bi** who or which has disappeared, i.e. become invisible अन्तर्हितं ततो भूतमुवाचेदं पुनर्वचः MahāBhā. ii. 40. 8; इदमम्भः कुबेरस्ते महाराजः प्रयच्छति। अन्तर्हितानां भूतानां दर्शनार्थं परंतप। अनेन स्पृष्टनयनो भूतान्यन्तर्हितान्युत MahāBhā. iii. 273. 10; vii. 154. 21; ततो मुनिवरं भूयो जैगीषव्यमथासितः। नान्वपश्यत योगस्थमन्तर्हितमरिंदम MahāBhā. ix. 49. 42; इत्युक्त्वान्तर्हितं तद्वै (तेजः) शक्रं चान्वविशत्प्रभो MahāBhā. xii. 124. 47; अन्तर्हितास्त्वृषिगणाः सिद्धाश्च परमर्षयः। तौ भ्रातरौ महात्मानौ काकुत्स्थौ प्रशशंसिरे Rāmā. ii. 104. 2; vi. App. I. 10 (61); अपृच्छं तमहं तात तत्रान्तर्हितमेव च। गतं सुकृतिनां लोकम् HariVaṁ. 11. 31; Avimā. 4. 16 (2); अन्तर्हितं क्षणात्कृष्णं प्रणिपत्य जगद्गुरुम्। ... तवान्तिकमिह प्राप्तः (अहम्) AhirbuS. 1. 64; हरेर्धरित्रि। अन्तर्हितस्य स्मरती विसृष्टा कर्माणि ... ममाचक्ष्व BhāgP. i. 16. 23; महेश्वरः ... इत्युक्त्वान्तर्हितः क्वापि देवो ब्रह्मा न जग्मिवान् SkandP. v(1). 2. 9; स भूयोऽपि भूत्वा सकरुणः ... नभस्यन्तर्हितो वा ... निवेदयत्वेतत् TilaMañ. 194. 16; तमहं तपसा ज्ञात्वा तत्रैवान्तर्हितः स्थितः BrahmP. 34. 61; सुरान् समुद्यतान् ज्ञात्वा ...। अन्तर्हितं गुरुं चैव बभूवुश्चिन्तयान्विताः। ... ते DevīBhāP. iv. 14. 22; यत्र चान्तर्हितो ह्येष भविष्यति हरेस्तनुः। स देश कलिना त्यक्तो युष्मदिष्टो भविष्यति BṛDharmaP. i. 13.24; i. 48. 25; अप्याविरस्ति भूयोऽपि मम लोचनयोरियम् दिवसेऽन्तर्हिता नक्तं चन्द्रिकेव चकोरयोः PrasaRā. 2. 30; भूतजातयः ... तिष्ठन्त्यन्तर्हिता यथा। ... शृणु वक्ष्यामि तेऽनघ YogVā. iv. 40. 3; इत्यामन्त्र्यान्तर्हितां योगशक्त्या पश्यन्देवीं भाष्यकर्ता बभाषे ŚaṅkaDigVi. (Mā.) 10. 69; (pred.) disappeared, become invisible मुनयोऽन्तर्हितास्ततः MahāBhā. i. 1. 72; इत्युक्त्वान्तर्हिते योगात् तस्मिन्नृषिवरे प्रभो। संभ्रमाविष्टहृदय ऋषिर्मेने तदद्भुतम् MahāBhā. i. 244* (1); सिंहौ भूत्वा पुनर्व्याघ्रौ पुनश्चान्तर्हितावुभौ MahāBhā. i. 202. 21; सौभम् ... अन्तर्हितं माययाभूत् MahāBhā. iii. 23. 3; iii. 64. 1; iii. 81. 32 (v.l.); अन्तर्हितायां सावित्र्यां जगाम स्वगृहं नृपः MahāBhā. iii. 277. 20; iv. App. I. 44 (15); इत्युक्त्वान्तर्हिता राजन्सर्व एव द्विजोत्तमाः MahāBhā. v. 184. 18; शार्दूलो देवराजस्य माययान्तर्हितस्तदा MahāBhā. xii. 31. 34; xiii. 16. 9; xiii. 52. 38; व्यासः ... अन्तर्हितोऽभवत् MahāBhā. xiv. 61. 18; क्षणेनान्तर्हिताश्चैव प्रेक्षतामेव तेऽभवन् MahāBhā. xv. 41. 12; बभूवान्तर्हितस्त्रासात् ... मृगः Rāmā. iii. 42. 3; अन्तर्हिते तस्मिन् पुष्पके ... भरतः ... उवाच Rāmā. vii. 41. 16; तस्मिन्नन्तर्हिते देवे वचनात्तस्य वै विभो। चक्षुर्दिव्यं सविज्ञानं प्रादुरासीन्ममानघ HariVaṁ. 15 .1; 108. 5; चतुर्थकारपूजां तु स कृत्वान्तर्हितो भवेत् NāṭyaŚā. 5. 106; कथमन्तर्हितो भगवान् वरुणः Abhiṣe. 4. 16(3); Avimā. 4. 16(2); अथान्तर्हिता जालं गृहीत्वा पक्षिणः Tantrākhyā. 55. 11; PañcT. 2. 2 (8) (187.1); धनदः ... इत्युक्त्वान्तर्हितः Tantrākhyā. 78. 23; स पद्मोऽन्तर्हितः JayāS. 2. 51; 2. 70; तथेत्युक्त्वा भद्रकाली बभूवान्तर्हिता MārkP. 84. 33; 93.16; BrahmāṇḍP. ii. 39. 53; ते सर्वे तत्रैवान्तर्हिताभवन् VāyuP. ii. 29. 26; अन्तर्हिते भगवति ...। त्रैलोक्ये सर्वभूतानां प्रादुर्भावो न जायते BrahmāṇḍP. i. 27. 35; अन्तर्हिते जगन्नाथे रामो नत्वा तु शंकरम् ...। तीर्थस्नानेऽकरोन्मनः BrahmāṇḍP. ii. 24. 39; मूर्तिमन्ति पुराणानि भारतादीनि सर्वशः। प्रणम्य तौ मुनिश्रेष्ठौ तत्रैवान्तर्हितानि वै BṛDharmaP. i. 30. 58; प्रिये वासवदत्ते देहि मे दर्शनं, किं परिहासेनान्तरितासि (v. l. अन्तर्हितासि) VāsaDa. 258. 1; तामेव तावत्प्रसन्नसलिलमध्यवर्तिनीं प्रतिमासीतामवलोकयामि। कथं साप्यन्तर्हिता KundaMā. 4. 14 (15); तारावली ... मामुक्त्वान्तर्हिता DaśKuC. 149. 15; तस्मिंश्चान्तर्हिते तस्य पौष्करस्य मतिस्तदा। विपर्यस्ता PāraS. 10. 117; (पद्मयोनिः) आद्यः कविरसीत्युक्त्वान्तर्हितः UttaRāC. 2. 5 (5); महाभागे पुनस्त्रायस्व नः किमर्थमन्तर्हितासि MālaMā. 10.97; नराः। क्षणेऽप्यन्तर्हिते तस्मिन् शोचयन्ति हतप्रभाः KulārT. 8. 90; अन्तर्हिते भगवति ब्रह्मा लोकपितामहः। प्रजाः ससर्ज BhāgP. iii. 10. 1; iv. 19. 17; लज्जाढ्या ... तिरोधानादिना अन्तर्हिता सती वरादि प्रयच्छति LalitāTriBh. 284. 10 (*on* 16); वनान्तरेषु अन्तर्हितस्तपस्विजनः ĀścaCū. 3. 32 (19); कश्चिदन्तर्हिता देव्यः ... भूषां चास्यै समर्पयन् MahāP. 12. 181; HariVi. 2. 15; त्यक्त्वा युद्धं रावणिः प्राणशेषो निर्वादार्हस्तर्हि सोऽन्तर्हितोऽभूत् RāmC. 30. 39; इत्युक्त्वा भगवान्सोमस्तत्रैवान्तर्हितोऽभवत् KūrmaP. 741. 5 (2. 38); वितस्तान्तर्हिता तत्र प्रविश्य ध्यानधारिणीम् NīlaP. 1295; निबोध तं च त्वरितमित्युक्त्वा अन्तर्हितो हरः SkandP. v(1). 3. 39; इत्युक्त्वान्तर्हिते देवेऽदितिर्गर्भं समादधे VāmaP. 28 .14; सोऽपि तं दक्षः शशापान्तर्हितो भव VarāP. 35. 4; 96. 55; इत्युक्त्वान्तर्हिते देवे प्रतिबुद्धा ददर्श सा। ... पितरम् BṛKathāŚloSaṁ. 4. 114; 12. 20; तत्रान्तर्हितायां (तस्याम्) ... उल्ललास नभसि ... दिव्यभेरीरवः TilaMañ.402.19; अन्तरिक्षादन्तर्हितं किल पाकशासनशरासनम् RāmāCam. 4. 31 (3) (comm. अदृश्यतां गतम्); इत्युक्त्वान्तर्हिते क्षिप्रं प्रजासृजि मुनीश्वरः। कर्तुं प्रचक्रमे रामचरितम् RāmāMañ. 3. 7; 504. 5; अन्तर्हितोऽभवन् क्षिप्रम् ... मारीचः प्रययौ RāmāMañ. 138. 5; इत्युक्त्वान्तर्हिते तस्मिन्कलौ ... महीमवततार सः NarmaMā. 1. 18; यौगन्धरायणः ... योगेनान्तर्हितोऽभवत् BṛKathāMañ. ii. 2. 72; स किंचित्प्राप्यान्तर्हितः ItihāU. 10. 4; सः ... मह्यमष्टादशार्णं स्वरूपं सृष्टये दत्त्वान्तर्हितः GopāPūTāU. 1. 5; भास्करः ... तत्रैवान्तर्हितोऽभवत् BhaviP. 191B. 3 (i. 128. 13); 429B. 26 (iii (2). 3. 22); 471A. 29 (iii (3). 7. 4); 473A. 10 (iii (3). 8. 4); इत्युक्त्वान्तर्हिता देवी दुर्गा DevīBhāP. iii. 24. 23; अन्तर्हिते रामभद्रे सर्वे प्रापुः सुविस्मयम् PadmP. iv. 46. 31; v. 17. 77; v. 32. 29; अन्तर्हिते भगवति जाता विकलिता भृशम्। रुरोद ... बाला ĀdiP. 13.30; गिरिजापतिः। ... क्षणादन्तर्हितोऽभवत् SaurP. 2. 61; 5. 26; एवं ब्रह्माणमाभाष्य ... अन्तर्हितो महादेवः SaurP. 23. 57; 32. 50; एवं दत्त्वा वरं शंभुर्विष्णवे ... अन्तर्हितः SaurP. 41. 157; द्विजस्य हुंकृतिं श्रुत्वा द्विजाश्चान्तर्हितास्तदा GaṇeP. i. 8. 41; i. 16. 2; तस्मिन् (विप्रे) अन्तर्हिते दक्षो रुरोद GaṇeP. i. 20. 54; i. 61. 56; ii. 20. 52; ii. 61. 35; तस्यामन्तर्हितायां तु काशीराजः पुपूज तम् (विनायकम्) GaṇeP. ii. 61. 37; ii. 106. 27; मामालक्ष्यान्तर्हितः सः KalkiP. ii. 4. 28; सरस्वती। त्वद्दुःखं नोत्सहे द्रष्टुमित्युक्त्वान्तर्हिताभवत् KathāSaSāg. i. 4. 11; i. 5. 48; इत्युक्त्वान्तर्हिते विष्णौ प्रबुद्धोऽहमचिन्तयम् KathāSaSāg. vii. 4. 62; vii. 8. 120; इत्युक्त्वान्तर्हिते देवे सः ... अगच्छद् अश्वपादम् RājTa. (Ka.) 3. 280; 4.241; उक्त्वेत्यन्तर्हिते तत्र सूरयः प्रमदोद्धुराः व्याकुर्वन्ति स्म संघस्य निशावृत्तम् PrabhāC.165.26; व्रज सुखमायाहीनश्रीरित्यन्तर्हितः शमायाहीनः Nalo. 3. 21; देवोऽपि सप्रसादातिशयमवलोक्यान्तर्हितोऽभूत् PratāYaBhū. 154. 9; लक्ष्मीः ... अन्तर्हिता बभूव VetāPañ. (Jam.) 44. 6; चक्रेशेऽन्तर्हिते भूमौ मुगलाः ... विचेरुः RājTa. (Prā.) 410; अन्तर्हिते तस्मिन्देवदूते ... तोमरम् ... ददौ तस्मै महीपतिः KathāKau. 9. 22; 10.36; त्वमथदमनमक्षणा क्षिप्रमन्तर्हितासि UjjvaNīMa. 205. 3; अन्तर्हिते पुरे तस्मिन् पुरी तु वसते पुनः। इत्यस्य स्वर्णादिमयपुराधिष्ठातृदेवतायामन्तर्हितायां वाराणसी पुरी यथापूर्वं फलदात्री तिष्ठत्येवेत्यर्थः VīraMi. (Tīrtha.) 174. 7; शचीपतिः ... अनुज्ञया बृहस्पतेरन्तर्हितः NīlaVi. 31. 10;

59.1; अन्तर्हितायां जनकात्मजायां कार्यार्थमर्थित्रिदशेश्वराणाम्। मायामयी काचिदली-करूपा सीता हृता तत्र च रावणेन Vidvanmo. 8. 34; महावरं दत्त्वा वराय शिवसूनवे। अन्तर्हिता समभवन्महाकाली ParamāKā. 167. 86; श्रितजनसुरसालस्तत्र सोऽन्तर्हितोऽभूत् ĀnandRa. 5. 68; इति ... एकान्तभङ्गं कृतवति लक्ष्मणेऽन्तर्हिते च मुनिरूपे काले ... लक्ष्मणेन स्ववधे प्रतिज्ञापूरणार्थं याचिते रामवृत्तान्तः MahāN. 9. 141 (1); **4Bii** (pred.) set in किंचिदन्तर्हिते भानौ पद्मिनी वीतरागिणी। आलिङ्ग्य मधुपं शेते ŚatTrayī. 453; अन्तर्हिते शशिनि सैव कुमुद्वती मे दृष्टिं न नन्दयति Śāk. 4. 3; संदिश्य वचनीयांशमादित्येऽन्तर्हिते द्विजाः आजग्मुः ŚaṅkaDigVi. (Mā.) 1. 86; **4Biii** elapsed अन्तर्हितायां संध्यायां सार्धं कृतयुगेन वै। ... वर्णाश्रमव्यवस्थानं कृतवन्तश्च वै पुनः VāyuP. i. 57. 87; BrahmāṇḍP. i. 30. 2; i. 30. 6; **5** accepted or admitted इत्येवमर्थमयं प्रागुक्तः सांध्यो विधिरन्तर्हितः ManuBh. i. 365. 18 (*on* 4. 93) [Kośas give *antarhita* as the synonym of the following words : *antardhi*, AbhidhāCin. 1477; *apavāraṇa*, AbhidhāCin. 1477; *apavāhita*, ŚabdaRa. (Vā.) 3204; KalpaK. 233. 170; *apihita*, KośaKaTa. 2. 501; *tirohita*, AbhidhāCin. 1477; *pihita*, KośaKaTa. 2. 501; KalpaK. 233. 170; *prorṇuta*, ŚabdaRa. (Vā.) 3204; *ruddha*, ŚabdaRa. (Vā.) 3204; *saṁvīta*, ŚabdaRa. (Vā.) 3204; *sthagita*, ŚabdaRa. (Vā.) 3204; KośaKaTa. 2. 501; KalpaK. 233. 170]

अन्तर्हित (antar-hita) *m.* epithet of Śiva (*lit.* existing within) नमोऽस्तु ... अन्तर्हिताय शर्वाय VāyuP. ii. 35. 175; BrahmāṇḍP. ii. 72. 176.

अन्तर्हित (antar-hita) *n.* **A** disappearance, invisibility महाविष्णुर्ययावन्तर्हितम् SkandP. ii (3). 3. 65; **B** loss, absence ततः कोऽप्येकोऽन्तः अन्तर्हितं वा SaṁgīRa. iii. 103. 7 (5. 178)

अन्तर्हितकरणशक्ति (antarhita-karaṇaśakti) *adj.* having the powers of senses vanished or lost अन्यथा सस्थानेषु भेदायोगादन्तर्हितकरणशक्तयोऽपि स्युरेव (वर्णाः) ParāTri. 186. 3.

अन्तर्हिततदाभोग (antarhita-tadābhoga) *adj.* having covered its expanse सः ... सैन्यैस्संख्यातिलङ्घिभिः ...। अन्तर्हिततदाभोगमत्यगाद् गृहगोपुरम् MadhuVi. 4. 30.

अन्तर्हिततनु (antarhita-tanu) *adj.* having invisible body कृतान्तः ...। उत्पपात रवेर्मार्गमन्तर्हिततनुः क्षणात् PadmP. (Ra.) 8. 481.

अन्तर्हितता (antarhita-tā) *f.* the state of being hidden, i.e. implicit युवां मामेव द्वावधिकविवृतान्तर्हिततया विभिन्नौ संद्रष्टुं स्वयमहमहार्षं द्विजसुतान् Nārāy. x. 88. 9; cf. **अधिकविवृतान्तर्हितता.**

अन्तर्हिततीरलेख (antarhita-tīralekha) *adj.* shore-line of which has disappeared or submerged वणिजः ...। समन्ततोऽन्तर्हिततीरलेखमगाधमम्भोनिधिमध्यमीयुः JātaMā. 89. 8 (14. 3)

अन्तर्हिततीव्रघोष (antarhita-tīvraghoṣa) *adj.* whose loud noise has died down महीयसा सैन्यरवेण सद्यः पयोधिरन्तर्हिततीव्रघोषः। प्रकम्पमानो भृशमाबभासे Yādavā. 11. 20 (comm. तिरोहितमहारवः)

अन्तर्हितत्व (antarhita-tva) *n.* **A** the state of being vanished or lost दैत्याः ... तदवनिवनितालोकवक्त्रे तु चित्रं तास्ता लीला विनश्यद्घनघुसृणपटे प्रापुरन्तर्हितत्वम् ŚrīKaC. 23. 52 (comm. अन्तर्हितत्वं प्रापुर्विनष्टाः); **B** the state of being invisible, i.e. invisibility गुणाः ... कन्दर्पस्य मनःक्षोभकत्वान्तर्हितत्वसौन्दर्यादयः SetuBa. 14. 4.

अन्तर्हितदिव्यभाव (antarhita-divyabhāva) *adj.* whose celestial (or divine) nature is concealed भवन्तमन्तर्हितदिव्यभावम् ... धर्मं परं वेदविदो विदुस्त्वाम् Yādavā. 20. 84 (comm. तिरोहिताप्राकृतस्वभावम्)

अन्तर्हितदेवेश (antarhita-deveśa) *m.* lord of gods who is covered असौ ... चकार तामसीं मायाम् ...। तयान्तर्हितदेवेशो जगाम दिशमुत्तराम् SkandP. v(1). 36. 34.

अन्तर्हितधर्मन् (antarhita-dharman) *adj.* from whom righteous act has vanished, i.e. who has abandoned righteous act ततस्तेऽन्तर्हितधर्माणो देवताभिरपि त्यज्यन्ते, तेषां तथान्तर्हितधर्मणाम् ... ऋतवो व्यापद्यन्ते CaraS. iii. 3. 20 (1941 Ed.)

अन्तर्हितनभस्तल (antarhita-nabhastala) *adj.* which has covered the lower region of sky राक्षससैन्यस्य मुखभङ्गः सुरैः कृतः। मुञ्चद्भिः शा(?श)स्त्रसंघातमन्तर्हितनभस्तलम् PadmP. (Ra.) 12. 194.

अन्तर्हितपूतनात्मन् (antarhita-pūtanātman) *adj.* who has concealed (her) own form or nature as Pūtanā कदाचिदन्तर्हितपूतनात्मा ... कापि माया। ... व्रजम् ... यशोदाकृतिराविवेश Yādavā. 4. 3.

अन्तर्हितप्रार्थितार्थ (antarhita-prārthitārtha) *adj.* whose desired aim or purpose is suppressed, i.e. not expressed पङ्क्तिर्मुनिः ...। अन्तर्हितप्रार्थितार्थः ... शोणनद्यास्तटं गतः SkandP. i (3). 6. 64.

अन्तर्हितब्रह्मकपालजाल (antarhita-brahmakapālajāla) *adj.* in which the collection of the skulls of the Lord Brahmā is placed अन्तर्हितब्रह्मकपालजालमाबध्य ... कपर्दम्। ... अवातरत् तत्र तदा नटेशः ŚivLī. 12. 38.

अन्तर्हितभास् (antarhita-bhās) *adj.* whose lustre is concealed ऋबीसमपगतभासम् ... अन्तर्हितभासम्। ... वा Nir. 6. 35 (131. 3)

अन्तर्हितमन्युवेगा (antarhita-manyuvegā) *adj.* (*f.*) having the force of grief or sorrow suppressed तम् ...। कथंचिदन्तर्हितमन्युवेगा मन्दोदरी सान्त्वयितुं प्रपेदे RāmC. App. I. 38. 21.

अन्तर्हितमूर्ति (antarhita-mūrti) *adj.* having the form concealed देवोऽप्यथान्तर्हितमूर्तिरास ViṣṇuDhaP. i. 54. 52.

अन्तर्हितरथ (antarhita-ratha) *adj.* having the chariot hidden मायिनं क्षुद्रमन्तर्हितरथम् .... राक्षसं निहनिष्यन्ति ... वानरयूथपाः Rāmā. vi. 67. 40.

अन्तर्हितविग्रह (antarhita-vigraha) *adj.* having the body concealed or hidden अन्तर्हितविग्रहं नलम्। न च व्यलोकन्त ... जनाः Nalābhyu. 4. 25.

अन्तर्हितविशेष (antarhita-viśeṣa) *adj.* whose particulars are concealed or hidden अन्तर्हितविशेषेण यथा रूपेण रूपवान्। प्रख्यायते न शुक्लादिभेदो रूपस्य गम्यते PadMañ. *on* KāśiVṛ. *on* P. vi. 3. 2 (193. 26)

अन्तर्हितशिरस् (antarhita-śiras) *adj.* (used as noun) (one) who has the head covered अन्तर्हितायां भूमौ तु अन्तर्हितशिरास्तथा। असमाप्ते तथा शौचे न वाचं किंचिदीरयेत् MahāBhā. xiii. App. I. 10 (70)

अन्तर्हितसिद्धसंघ (antarhita-siddhasaṅgha) *m.* multitude of Siddhas who are invisible विशुश्रुवेऽन्तर्हितसिद्धसंघजं जयेति जीवेति च वीप्सितं वचः RāmC. 5. 46.

अन्तर्हितसौधभाज् (antarhitasaudha-bhāj) *adj.* who stays in the mansion placed inside, i.e. built under (water) तस्यायमन्तर्हितसौधभाजः प्रसक्तसंगीतमृदङ्गघोषः ... पुष्पकचन्द्रशालाः क्षणं प्रतिश्रुन्मुखराः करोति RaghuVa. 13. 40 (comm. जलान्तर्गतप्रासादगतस्य)

अन्तर्हितस्थित (antarhita-sthita) *adj.* remained concealed जगतोऽनुग्रहार्थाय वासुदेवो जगद्गुरुः। दिवमास्थाय दिव्येन वपुषान्तर्हितस्थितः MahāBhā. xviii. 25* (2)

अन्तर्हितस्पृष्ट (antarhita-spṛṣṭa) *adj.* touched by the invisible अन्तर्हितश्चान्तर्हितस्पृष्टश्च तत्स्पृष्टश्चान्तर्हिता भवन्तीति निश्चयः Avimā. 4. 16 (2)

अन्तर्हितहिमशिला (antarhita-himaśilā) *f.* concealed slab of ice विशत एवास्य ... अतिशिशिरमन्तर्हितहिमशिलेव विलीयमाना व्यलिम्पदङ्गानि HarṣaC. 293. 11 (*but* S. D. Gajendragadkar अन्तर्हितं स्थापितं हिमं यस्यां सा शिला करका)

अन्तर्हिताकाश (antarhitākāśa) *m.* space existing within the mind or soul यदा नासीद्यत्तत्सदसदात्मकम्। योगिनोऽन्तर्हिताकाशे यत्पश्यन्ति निरन्तरम् ŚivaP. ii (1). 6 .8 (43A. 13)

अन्तर्हितात्मन् (antarhitātman) *m.* name of Śiva (*lit.* having the nature concealed अन्तर्हितात्मा ... भगवानिति भक्त्या स्तुतो मया MahāBhā. xiii. 17. 35 (Nīl. अविद्याकल्पितेन अहंकारादिना तिरोहिताखण्डैकरसस्वभावः); हरस्य ... अष्टोत्तरसहस्रं तु नाम्नां शृणुत सुव्रताः। ... अन्तर्हितात्मा LiṅgaP. i. 65. 59; SaurP. 41. 44; ŚivaP. iv. 35. 34 (391B. 8) [of concealed mind, PW.; pw.; MW.]

अन्तर्हितात्मीयशक्ति (antarhitātmīyaśakti) *adj.* who has concealed his own power कर्मणाष्टप्रकारेण ... बद्धेनान्तर्हितात्मीयशक्तिर्भ्राम्यति चेतनः PadmP. (Ra.) 14. 18.

अन्तर्हितान्यरूपा (antarhitānyarūpā) *adj.* (*f.*) who has concealed or hidden the other form अन्तर्हितान्यरूपा सा रुद्राणी समराजत BṛDharmaP. i. 5. 94.

अन्तर्हितार्क (antarhitārka) *adj.* which has covered the Sun अन्तर्हितार्कैः परितः पतद्भिश्छायाः समाचिक्षिपिरे वनानाम् Kirātā. 16. 47 (comm. आच्छादितोऽर्को यैः)

अन्तर्हितावस्थित (antarhitāvasthita) *adj.* staying as merged within अन्तर्हितावस्थितमत्र लिङ्गे तमारराधुस्तरवः प्रसूनैः (शिवम्) ŚivLī. 2. 59.

अन्तर्हिताशापथ (antarhitāśāpatha) *adj.* **A** having the course of quarters (of heaven) which is covered अन्तर्हिताशापथो जलदकाल इव प्रत्यूहकारी वैशम्पायनवृत्तान्तो विलोमप्रकृतिना विधात्रान्तरा पातितः Kād. 293. 2; **B** having the way of hopes which is suppressed, Kād. 293. 2.

अन्तर्हिति (antár-hiti) *f.* **A** concealment, hiding अप्रतीक्षम् आ यन्ति निर्ऋत्या: अन्तर्हित्यै TaiS. V. ii. 4. 4; TaiBr. I. vi. 1. 4; ĀpaŚS. xvi. 16. 2; xviii. 8. 20; अप्रतीक्षमा यन्ति वरुणस्यान्तर्हित्यै TaiS. VI. vi. 3. 5; TaiBr. I. vi. 5. 6; BaudhŚS. i. 126. 10; i. 140. 14; i. 261. 19; ii. 316. 10; अमावास्यां वै रात्रीं निशिं रक्षांसि प्रेरते पूर्णान्येवैनान्यपवपति परिश्रिते यजेत रक्षसामन्तर्हित्यै KāṭhS. 10. 5 (i. 130. 2); 23. 1 (ii. 73. 10); TaiBr. I. vii. 1. 9; III. ii. 8. 6; अप: परिषिञ्चति। रुद्रस्यान्तर्हित्यै TaiBr. I. vi. 10. 5; **B** keeping away or separation कार्ष्मर्यमयीर्दक्षिणत उपदधाति रक्षसामन्तर्हित्यै KāṭhS. 20. 5 (ii. 24. 1); KapiKaS. 31. 7 (154. 24) [KośaKaTa. 2. 6566 gives *antarhiti* as the meaning of *āyodhana*]

अन्तर्हितेन्द्रिय (antarhitendriya) *adj.* who has merged (his) senses within निद्रेवान्तर्हितेन्द्रिय: शुद्धतमया धिया स्वप्न इव य: पश्यति ...। सोऽपि प्रणवाख्य: प्रणेता ... भवति MaiU. 6. 25.

अन्तर्हितेन्द्रियार्थ (antarhitendriyārtha) *adj.* who has the object of senses, i.e. bodily form concealed अन्तर्हितेन्द्रियार्थाय हरये विहिताञ्जलि:। ... ससर्जेदं स: BhāgP. ii. 9. 38.

अन्तर्हितैश्वर्य (antarhitaiśvarya) *adj.* having the lordship concealed परमेश्वर:। माययान्तर्हितैश्वर्य ईयते गुणसर्गया BhāgP. vii. 6. 23.

अन्तर्हित्य (antarhit-ya) *ger.* having disappeared अन्तर्हित्य च संक्रुद्धा समुत्पत्य त्वरावती। याता चन्द्रनखा धाम निजं शोकसमाकुला PadmP. (Ra.) 43. 113.

अन्तर्हिमाम्भस् (antarhimāmbhas) *adv.* inside snow-water यस्यां रक्तं किल कलयसि क्लान्तिमत्यर्थमेवं नूनं वृन्तादिव सरसिजं मज्जदन्तर्हिमाम्भ: KarṇaSu. 2. 6.

अन्तर्हिरण्या (antar-hiraṇyā) *adj. (f.)* (used as noun) (offering) made on the piece of gold which is (kept) inside (the foot-print) सावित्रं जुहोत्यन्तर्हिरण्याः होष्यन्सावित्रं जुहोति BaudhŚS. ii. 64. 9; iii. 268. 13.

अन्तर्हृत (antar-hṛta) *adj.* (used as noun) (that) which is brought or carried forth in between अन्तर्हृते प्रायश्चित्तं चतुर्होतारं चानुख्यां च जुहोति BaudhGS. iv. 9. 8.

अन्तर्हृद् (antar-hṛd) *n.* [Loc.] in the heart, within the heart सा सुन्दरी ... शोकाग्निनान्तर्हृदि दह्यमाना विभ्रान्तचित्तेव तदा बभूव Saund. 6. 33; 7. 12; सर्वेषां भूतानामाशये अन्तर्हृदि स्थित: अहम् आत्मा GītāBh. (Śaṅ.) 288. 18 (*on* 10. 20); (सनकसनन्दनौ) पश्यत: स्म ... मूर्तिं स्फुटां वैनायकीम् ... अन्तर्हृदि GaṇeP. ii. 54. 46; अहम् ...। तस्या (पद्मावत्या:) वचोऽन्तर्हृदि दु:खिताया: श्रोतुं स्थित: KalkiP. i. 5. 27; वन्दे देवं विष्णुमशेषस्थितिहेतुं त्वामध्यात्मज्ञानिभिरन्तर्हृदि भाव्यम् AdhyāRā. vi. 13. 10.

अन्तर्हृदय (antar-hṛdaya) *n.* inside or interior of the heart विकर्षतोऽन्तर्हृदयाद्दासीपतिमजामिलम्। यमप्रेष्यान्विष्णुदूता वारयामासु: BhāgP. vi. 1. 31; [Loc.] in the heart, within the heart स य एषोऽन्तर्हृदय आकाश: TaiU. 1. 6 (Śaṅ. य एष अन्तर्हृदये हृदयस्यान्त:। ... तस्यान्त: य एष आकाश: प्रसिद्ध एव करकाकाशवत्, तस्मिन् सोऽयं पुरुष:) ; TaiUBhāVā. 26. 21 (1); तावानेष अन्तर्हृदय आकाश: Chāndo U. viii. 1. 3; ChāndoUBh. 475. 1 (*on* viii. 1. 3); स वा एष महानज आत्मा योऽयं विज्ञानमय: प्राणेषु य एषोऽन्तर्हृदय आकाशस्तस्मिञ्छेते BṛĀraU. iv. 4. 22; BṛĀraUBh. 642. 15 (*on* iv. 4. 22); रागाग्निनान्तर्हृदये प्रदीप्त:। ... कृताञ्जलिर्वाक्यमुवाच नन्द: Saund. 10. 49; मनसि क्रियाप्रबन्धादन्तर्हृदये निरिन्द्रिये आत्मप्रदेशे निश्चलं मनस्तिष्ठति PadārthSaṁ. 183. 18; तस्मिन्नन्तर्हृदये तस्य विवरणं निरिन्द्रियात्मप्रदेशे Kiraṇā. 272. 12; स्वयं तदन्तर्हृदयेऽवभातमपश्यत BhāgP. iii. 8. 22 iv. 30. 29; ix. 11. 6; वेदस्पर्शपूतमिवात्मानं मन्यन्ते तेषामप्यन्तर्हृदये ज्वलतीव प्रामाण्यम् NyāyMañ. i. 243. 32; ii. 48. 14; सात्वतै: तवाङ्घ्रि: ... सद्योऽन्तर्हृदये नित्यं मुनिभि: सात्वतैर्वृत: AdhyāRā. i. 2. 17; जीवस्यैवारग्रमात्रस्यान्तर्हृदये प्रतिपादकमिदं वचनम् AṇuBh. 55. 8 (*on* i. 2. 5)

अन्तर्हृदय (antar-hṛdaya) *adj.* having the heart or the mind fixed on the soul एतदुक्त्वान्तर्हृदय: शाकायन्यस्तस्मै नमस्कृत्वानया ब्रह्मविद्यया राजन् ब्रह्मण: पन्थानमारूढा: पुत्रा: प्रजापतेरिति MaiU. 6. 29.

अन्तर्हृदयकीर्तन (antarhṛdaya-kīrtana) *n.* mention or statement (that the Brahman is) within the heart अनन्यबोधप्रत्यक्षो य एष इति भण्यते। तस्य संप्रतिपत्त्यर्थमन्तर्हृदयकीर्तनम् BṛĀraUBhVā. iii. 1. 233 (comm. हृदयेऽन्तर्ब्रह्मेति ब्रह्मणो हृदयस्थानत्वोक्ति:)

अन्तर्हृदयपरिच्छेदकरण (antarhṛdayapariccheda-karaṇa) *n.* act of delimiting by the inside of the heart 'य एषोऽन्तर्हृदय आकाशस्तस्मिञ्शेते' इति अन्तर्हृदयपरिच्छेदकरणे सुतरां स्वयंज्योतिष्ट्वं बाध्येत PraśnaUBh. 274. 18 (*on* 4. 5)

अन्तर्हृदयम् (antarhṛdayam) *adv.* within the heart उपनिषत्सु हि 'अन्तर्हृदयमात्मानं पश्येत्' इति कथ्यते ManuBh. i. 106. 22 (*on* 2.60)

अन्तर्हृदयवर्तिन् (antarhṛdaya-vartin) *adj.* being within the heart एषा हि स्थिति:। अन्तर्हृदयवर्तीनि बुद्ध्यादितत्त्वानि ManuBh. i. 52. 22 (*on* 2.1)

अन्तर्हृदयाकाश (antarhṛdayākāśa) *m.* space in or within the heart ऐकाग्र्येणैवमन्तर्हृदयाकाशं विनुदन्ति MaiU. 6.27; तः हत्वोंकारप्लवेनान्तर्हृदयाकाशस्य पारं तीर्त्वाविर्भूतेऽन्तराकाशे ... ब्रह्मशालां विशेत् MaiU. 6.28; मनसो वान्तर्हृदयाकाशे ब्रह्मचिन्तापरतया निश्चलता धारणा ManuBh. i. 520. 27 (*on* 6. 72)

अन्तर्हृदयाकाशशब्द (antarhṛdyākāśa-śabda) *m.* sound of the space in or within the heart परे शब्दवादिन: श्रवणाङ्गुष्ठयोगेनान्तर्हृदयाकाशशब्दमाकर्णयन्ति MaiU. 6. 22.

अन्तर्हृदयाकाशशरीर (antarhṛdayākāśa-śarīra) *adj.* having the space in or within the heart as the body विशुद्धसत्त्वस्यान्तर्हृदयाकाशशरीरे ब्रह्मणि ... भक्तिरनुदिनमेधमानरयाजायत BhāgP. v. 7. 7.

अन्तःशरीरवर्तित्व (antaśśarīravarti-tva) *n.* the state of being one who is within the body, i.e. existence within the body (आत्मनः) व्यापित्वं एव किं प्रमाणमिति चेत्सर्वत्र कार्योपलम्भः प्रमाणम् ... न प्राणादिवदन्तशरीरवर्तित्वाभावात् NyāyMañ. ii. 40. 15.

अन्तःशरीरवृत्ति (antaśśarīra-vṛtti) *adj.* being or existing within the body नान्तःशरीरवृत्ति मनः NyāyVār. 428.1 (*on* iii.2.26); वैशेषिकाणामपि आत्मन्यभेदेन समवायि संवेदनं परगतं मनसा कथं गृह्येत अन्तःशरीरवृत्तिना PratyabhiVi. i. 174. 5 (*on* i. 4. 5)

अन्तःशरीरवृत्ति (antaśśarīra-vṛtti) *f.* existence within the body अन्तःशरीरवृत्तेश्चेददोषोऽयं न तादृशः NyāyVi. 2. 47.

अन्तःशरीरवृत्तित्व (antaśśarīravṛtti-tva) *n.* the state of being or existing within the body ज्ञानसमवेतात्मप्रदेशसंनिकर्षान्मनसः स्मृत्युत्पत्तेर्न युगपदुत्पत्तिः। न, अन्तःशरीरवृत्तित्वान्मनसः NyāySū.iii.2.26; विपच्यमानकर्माशयमात्रं जीवनम्। एवं च सति साध्यमन्तःशरीरवृत्तित्वं मनसः NyāyBh.208.5 (*on* iii.2.27); आत्मनश्च ... प्राणादिवदन्तःशरीरवर्तित्वाभावात् अन्तःशरीरवृत्तित्वे हि द्वयी गतिः NyāyMañ.ii.40.15.

अन्तःशरीरस्थ (antaśśarīra-stha) *adj.* **i** being or existing within the body अग्निरुवाच। अहमन्तःशरीरस्थो भूतानाम् MahāBhā.iii.275.27; कर्शयन्तः शरीरस्थं भूतग्राममचेतसः। मां चैवान्तःशरीरस्थं तान् विद्ध्यासुरनिश्चयान् Mahā-Bhā.vi.39.6 = BhagGī.17.6; **ii** present or existing inside the body विदुषान्तःशरीरस्थान् नित्यं संनिहितानरीन्। जित्वा वर्ज्यानि AṣṭāSaṁ.i.64.1 (1.9)

अन्तःशरीराकाश (antaśśarīrākāśa) *m., n.* ether existing within the body अन्तःशरीराकाशे बाह्यवदेवात्मनोऽनभ्युपगमात् नैव गर्भशरीरेण मातृक्षेत्रज्ञस्य प्राप्तिरस्ति TantrVā.381.15 (*on* ii.1.5)

अन्तःशरीरोत्थ (antaśśarīrottha) *adj.* arising inside the body क्रियातिशयजन्मान्तःशरीरोत्थक्लमः श्रमः AgniP.338.24.

अन्तःशर्करम् (antaśśarkaram) *adv.* inside the pebbles or sands (स्वयंचितिम्) श्वेतमश्वमभिमृश्यान्तःशर्करमिमामुपदधाति BaudhŚS.ii.18.13; ii.22.4; BaudhPiMe. i. 18. 11; ĀgniveGS. iii. 8. 2 (161. 17); सः ... दक्षिणस्य पक्षस्य दक्षिणे पक्षोपप्लव आयत्यान्तःशर्करमिषुं निहन्ति BaudhŚS. ii.22.11; ii.416.8; सः ... बहिःशर्कराल्लोष्टमादत्ते। तमन्तःशर्करं न्यस्यति BaudhŚS.ii. 24.16; ii.25.2; ii.25.6; यावानग्निः सारत्निप्रादेशस्तावतीं भूमिं परिमण्डलां कृत्वानुशर्करमन्तःशर्करमिष्टकाः परिचिनोति BaudhŚS.ii.307.15; इष्टका उपदधाति। (स्वयंचितिम्) ... आयत्यान्तःशर्करमिषुं निहन्ति ... दक्षिणे पक्षान्तेऽन्तःशर्करमिषुं निहत्य ... अश्मानमुपदधाति VaikhāŚS. 18. 14.

अन्तःशर्कराम् (antaśśarkarām) [w.r. for *antaśśarkaram*], BaudhPiMe. i.18.11; ĀgniveGS. iii.8.2 (161.17)

अन्तःशल्य (antáś-śalya) *adj.* [*f.*-ā] **A** having secret pain or pang in the mind (पत्नी) अथो नेन्मेऽन्तःशल्या जुहवदिति तस्मात् पृच्छति ŚatBr. II.v.2.20; ŚatBr. (K.) I.v.1.17; **B** having inner dart or thorn, i.e. having internal enemy बलव्यसनानि ... कलत्रगर्हि अन्तःशल्यम् ... अन्धमिति ArthŚā iii. 35. 4 (8. 5); NītiSā. 14. 69; कलत्रगर्ह्यन्तःशल्ययोः कलत्रगर्ह्युन्मुच्य कलत्रं युध्येत, नान्तःशल्यमन्तरमित्रम् ArthŚā.iii.36.9 (8.5) (comm. अन्तर्गतशत्रुकम्): अन्तर्गतामित्रशल्यमन्तःशल्यं हि न क्षमम् NītiSā.14.81 (comm. अमित्र एव शल्यम्); कलत्रगर्भं निक्षिप्तमन्तःशस्यं(?°शल्यं) तथैव च।... बलव्यसनमुच्यते AgniP. 240. 32; सैन्यं तु भिन्नकूटं तन्नष्टावान्तरनायकम्। शून्यमूलं तदस्थानमन्तःशल्यं सदोषकम् NāmaMāli.447; Vaija.108.56; **C** having a dart or a pricking inside (the body) शल्यप्रोतं प्रेक्ष्य सकुम्भं मुनिपुत्रं तापादन्तःशल्य एवासीत् क्षितिपोऽपि RaghuVa. 9.75; (अग्निकर्मविधिमध्यायं व्याख्यास्यामः) न तु दहेत् ... अन्तःशोणितमन्तःशल्यम् ... क्षारानर्हं च AṣṭāSaṁ.i.193.12 (1.40); तदन्तःशल्यं मां व्रणमिव विरूढं ग्लपयति CaṇḍaKau. 4.3.

अन्तःशल्य (antaś-śalya) *n.* (*fig.*) internal torment, mental anguish मारो च पापीमां दुःखी ... अन्तःशल्यपरिदाघजातो अभूषि MaVastuAva.i.42.3; i.230.11; i.240.20; ii.163.2; ii. 268.12; चिरादन्तःशल्यं दहनकृतमुन्मूलितवता। तुलाकोटिक्वाणैः किलिकिलितमीशानरिपुणा SaundL.86; सरोजानां कर्णञ्जलिमयमयस्कान्तमणिवत् क्षणादन्तःशल्यं तपति पतिरद्यापि न रुचाम् AnargharRā.2.1; SubhāRaK.30.2; स्वान्यचक्रभवेनान्तःशल्येनेवापगच्छता। सद्यः प्रीतैर्जनपदैः क्रियमाणागमोत्सवः (ऋषभध्वजः) TriṣaŚaPuC. i.6.58; SthānṬ.266B.13; अपि वैमानिका देवाः स्वामिसेवकभावतः। परतन्त्रा विषादाद्यैरन्तःशल्यैश्च दुःखिताः ŚāliC.3.108; किं किंचिदन्तःशल्यं ते मन्त्रिन्दोदूयते हृदि KumāDeC.(So.) 26.11; अन्तःशल्यं शिरस्सु स्थपुटगिरिनदी दुस्सहा क्षुदृतृषार्तिः PurāPraSaṁ.19.10.

अन्तःशल्यगर्भ (antaśśalya-garbha) *adj.* filled with inner dart, i.e. full of mental anguish अन्तःशल्यगर्भं स्फुटितमिव हृदयमासीत् Kād. 274.9.

अन्तःशल्यदुःसह (antaśśalya-dussaha) *adj.* unbearable due to the inner dart, i.e. mental anguish एतदेव महद्दुःखं ममान्तःशल्यदुःसहम् RāmāMañ.196.23.

अन्तःशल्याहत (antaśśalyāhata) *adj.* hit or struck with inner dart, i.e. mental anguish अन्तःशल्याहतमना धीरः प्रोवाच लक्ष्मणः RāmāMañ.161.4.

अन्तःशल्यित (antaś-śalyita) *adj.* having a dart inside, i.e. pierced inside मारदत्तः ... पुरा स्वयं दुर्वासनया च कृतेषु निरवधिषु दुश्चरित्रेष्वतीवबीभत्सयान्तः-

शाल्यित(?°शल्यित) इव कृतशरीरविधूननस्तन्मुनिकुमारमिथुनकथाकर्णनात्... अभाषत YaśasCam.ii.265.18.

अन्तःशव (antaś-śava) *adj.* **i** having a dead body inside (the house or village) यस्य कुले म्रियेत न तत्रानिर्दशे भोक्तव्यम्।... अन्तःशवे च HirŚS. xxvi. 5. 19 (72. 19); ĀpaDS. i(5). 16. 20; अथोपरमम्।... अन्तःशवे ग्रामे ŚāṅkhāGS. iv.7.24; KauṣīGS. iii. 9.22; अनध्यायः।... अन्तःशवे ग्रामेऽन्तर्दिवाकीर्त्ये PāraGS.ii.11.4; शिष्टं नाधीयीत।... अन्तःशवे रथ्यायां ग्रामे चाण्डालसंयुते KauśiSū.141.38; ग्रामेऽन्तःशवे सति ... नाधीयीत VaikhāDS.ii.12.3; ViṣṇuSm.30.10; अन्तःशवे अशौचानधिकारिणोऽपि यस्य गृहमध्ये शवस्तद्गृहे तदन्नं शवो यावद् ग्रामान्न निह्रियते तावत् अभोज्यम् VīraMi.(Āhnika.) 506.4; **ii** (sacrifice performed) having a dead body (in the village) अनूद्देश्येन न याजयेद्, यत्र त्वन्तःशवो ग्रामो भवति। अन्तःशव एष यज्ञो योऽनूद्देश्यः इति JaimiŚS.1.

अन्तःशवगत (antaś-śavagata) *adj.* having a dead body inside (in the village) अन्तःशवगते ग्रामे वृषलस्य च संनिधौ। अनध्यायः KūrmaP.544.5(2.14)

अन्तःशवदिवाकीर्त्य (antaś-śavadivākīrtya) *adj.* having a dead body and a Cāṇḍāla inside (the city) तस्यानध्यायाः ... अन्तःशवदिवाकी-र्त्येषु नगरेषु VāsiDS.13.11; (नाधीयीत) पूतिगन्धान्तःशवदिवाकीर्त्यशूद्रसंनिधाने GautDS.ii.7.19 (comm. अन्तःशवेऽन्तर्दिवाकीर्त्ये च ग्रामे)

अन्तःशवम् (antaśśavam) *adv.* with a dead body inside (the village) अन्तःशवम्।... अनध्यायः HirŚS.xxvi.3.14 (43. 8) (comm. अन्तःशवे ग्रामे नाध्येतव्यम्); ĀpaDS. i(3).9.14.

अन्तःशस्त्रम् (antaśśastram) *adv.* in the middle of the (recitation of) Śastra (type of Sāman-chant) एष आहावः प्रातःसवने शस्त्रादिषु। पर्यायप्रभृतीनां च। सर्वत्र चान्तःशस्त्रम् ĀśvaŚS. I.v.9.2; ŚāṅkhāŚS. vii.19.7; viii.3.6; यत्र यत्र चान्तःशस्त्रं प्रणवेनावस्यति। प्रणवान्त एव तत्र प्रतिगरः ĀśvaŚS.I.v.9.10.

अन्तःशस्य (antaśśasya) [w.r. for *antaśśīlya*], AgniP.240.32.

अन्तःशाक्त (antaś-śākta) *adj.* devoted to Śakti (energy) in the mind or internally अन्तःशाक्ता बहिः शैवाः ...। नानारूपधराः कौला विचरन्ति महीतले KālīViT.7.12.

अन्तःशाखासंकीर्ण (antaśśākhā-saṅkīrṇa) *adj.* full of branches within जन(अन्तः)शाखासंकीर्णं [च] छत्रवन्निश्चयं यदि। सुशीतलं तु सुच्छायं छायावृक्षमिति स्मृतम् MānaSā.15.156.

अन्तःशान्त (antaś-śānta) *adj.* **A** quenched within अन्तःशान्तसमस्तेहो भव YogVā. iv. 57. 21; **B** inwardly calm, i.e. sullen within तावन्तो जन्तवस्तत्र व्यपद्यन्त ...। अन्तःशान्तेषु सर्वेषु बहिःशान्तेषु हन्तृषु। क्षणादेव प्रदेशः स निःशब्दः समजायत RājTa.(Ka.) 8.988.

अन्तःशान्ति (antaś-śānti) *f.* inner or mental peace अन्तःशान्त्यै मुनिशत-मतानल्पचिन्तां भजन्ति। ... पारमारोढुकामाः BhāmiVi. 4. 15 (comm. चित्तशान्त्यर्थम्); RasGaṅ. 608. 20.

अन्तःशालम् (antaśśālam) *adv.* inside the (sacrificial) hall अथान्तःशालं पृषदाज्यवन्त्याज्यानि गृहीत्वा परिकर्मिभ्य उत्प्रदाय ब्रह्मणे राजानमुत्प्रयच्छति BaudhŚS.i.194.11; दशान्तःशालमहौषीत् BaudhŚS.ii.65.1; ते यत्रान्तःशालं प्रचरिष्यन्तो भवन्ति तदाह ब्रह्मन् प्रचरिष्यामो होतर्घर्ममभिष्टुहीति BaudhŚS.ii. 167.15.

अन्तःशाला (antaś-śālā) *f.* inner hall or mansion (स्यात्) अन्तःशाला यथाद्वारं दण्डकस्योक्तवत्कुरु MānaSā. 35. 141.

अन्तःशालिका (antaś-śālikā) *adj.* (*f.*) which is offered inside the (sacrificial) hall या अहान्तःशालीका(v.l. °लिका) आहुतयः स्युर्जुहुयादेव ताः BaudhŚS. iii. 312. 3.

अन्तःशालीका (antaś-śālīkā) *adj.* (*f.*) which is offered inside the (sacrificial) hall या अहान्तःशालीका आहुतयः स्युर्जुहुयादेव ताः BaudhŚS. iii. 312. 3.

अन्तःशिख (antaś-śikha) *adj.* having top-heap included inside शुष्क-सारदारुमयं समं चतुर्भागशिखं मानं कारयेत्। अन्तश्शि(:शि)खं वा ArthŚā.i. 260.7 (2.19)

अन्तःशिखिन् (antaś-śikhin) *adj.* having fire within मधुरन्तर्भव-त्कोपोऽन्तःशिखीव शमीतरुः।... नारदं प्रत्यभाषत TriṣaŚaPuC. iv. 4. 124.

अन्तःशिखोपवीत (antaś-śikhopavīta) *n.* inner sacrificial cord and lock of hair मुमुक्षोरन्तःशिखोपवीतधारणम्। बहिर्लक्ष्यमाणशिखायज्ञोपवीतधारणं कर्मिणो गृहस्थस्य Parabrahmopaniṣad 1 (528.2)

अन्तःशिखोपवीत (antaśśikhopavīta) *adj.* possessing the inner sacrificial cord and the lock of hair सत्त्वमथास्य पुरुषस्यान्तःशिखोपवीतत्वं ब्राह्मणस्य Parabrahmopaniṣad 1 (528.1)

अन्तःशिखोपवीतित्व (antaśśikhopavīti-tva) *n.* the state of having the inner sacrificial cord and the lock of hair हंसेति वर्णद्वयेनान्तःशिखोपवीतित्वं निश्चित्य ब्राह्मणत्वं ब्रह्मध्यानार्हत्वं यतित्वमलक्षितान्तःशिखोपवीतित्वमेवम् ... कल्पयन्ति Parabrahmopaniṣad 1 (528.17)

अन्तःशिबिरम् (antaśśibiram) *adv.* in the tent, inside the camp प्रवृत्ते वातुमन्तःशिबिरमुद्र(?द्व)त्तसैनिकोपद्रवप्रकुपिताद्रिनिश्वास इव ... अनिले ... गगनमार्गमाजगाम ... दिव्यमङ्गलगीतनिनदः TilaMañ.141.11.

अन्तःशिरस् (antaś-śiras) *n.* inside of the head प्रोथतेऽन्तःशिरो यस्य ... दृश्यन्ते कृमयश्चापि कृमिजं तस्य निर्दिशेत् AśvaVai.31.28.

अन्तःशिरा (antaśśirā) *f.* name of a river सरित्श्रेष्ठा यास्ताः सम्यङ्निबोध मे ... दुर्गा चान्तःशिरा तथा। विन्ध्यपादप्रसूतास्ता नद्यः MārkP.57.25.

अन्तःशिला (antaś-śilā) *f.* name of a river (*lit.* having boulders inside) नदीः पिबन्ति ... दुर्गामन्तःशिलां चैव ब्रह्ममेध्यां बृहद्वतीम् MahāBhā.vi.10.29; KūrmaP. 404.9 (1.47); BrahmP.27.34; PadmP.i.6.25.

अन्तःशीतला (antaś-śītalā) *adj.* (*f.*) **i** cool within, i.e. pacified or satisfied प्रज्ञया ... इमं गुणसमाहारमनात्मत्वेन पश्यतः। अन्तःशीतलया यासौ समाधिरिति कथ्यते AnnaU.1.28; अन्तःशीतलया बुद्ध्या कुर्वतो लीलया क्रियाम्। यो नूनं वासनात्यागो ध्येयो ब्रह्मन्प्रकीर्तितः MahāU².6.43; YogVā.v.16.9; योऽन्तःशीतलया बुद्ध्या रागद्वेषविमुक्तया। साक्षिवत्पश्यतीदं हि जीवितं तस्य शोभते SaṁnyāU.2.40; उत्तस्थुर्मिहिकारम्भसमता वनभूमिषु। विज्ञानश्रवणाद् अन्तःशीतलाः शान्तता इव YogVā.iii.4.7; परं पदमुपारूढो भङ्गुरां जागतीं स्थितिम्। अन्तःशीतलया बुद्ध्या हसन्निव निरीक्षते YogVā.v.18.11; **ii** cool inside, internally cool, YogVā. iii. 4. 7.

अन्तःशीतलता (antaśśītala-tā) *f.* the state of being cool within, i.e. pacification or satisfaction अन्तःशीतलतायां तु लब्धायां शीतलं जगत्। अन्तस्तृष्णोपतप्तानां दावदाहमयं जगत् AnnaU. 1.35; JīvanVi.139. 9; इमं गुणसमाहारमनात्मत्वेन पश्यतः। अन्तःशीतलता यासौ समाधिरिति कथ्यते YogVā.v.56.7; iii.82.2.

अन्तःशीतलत्व (antaśśītala-tva) *n.* the state of being cool within, i.e. pacification or satisfaction वासनाक्षयरूपमन्तःशीतलत्वमवश्यं संपादनीयम् ... शीतलत्वं तृष्णायाः प्रशमनम् JīvanVi.139.10.

अन्तःशीतलात्मन् (antaśśītalātman) *adj.* of the nature of being cool within तत्र ते पेततुर्देव्यौ ग्रामेऽन्तःशीतलात्मनि। भोगमोक्षश्रियौ शान्ते पुंसीव विदितात्मनि YogVā.iii.29.1.

अन्तःशीर्ण (antaś-śīrṇa) *adj.* broken inside अन्तःशीर्णकरङ्ककर्करपयःसंरोध-कूलंकषस्रोतोनिर्गमघोरघर्घररवा पारेश्मशानं सरित् MālaMā.5.115; SubhāRaK. 44. 7.

अन्तःशुच् (antaś-śuc) *adj.* (used as noun) (one) who has inner or internal grief लक्ष्मणोऽत्रान्तरे प्राप्तो जगादान्तःशुचं स्पृशन् PadmP. (Ra.) 99.84.

अन्तःशुच् (antaś-śuc) *f.* inner or internal grief पार्थस्य ... अन्तःशुचा मुह्यतः ... हा वत्सेति गिरः स्फुरन्ति न पुनर्निर्यान्ति कण्ठाद् बहिः Sara-Kaṇṭhā.586.10; कुत्रोड्डीय गतो ममेत्यनुदिनं निद्राति नान्तःशुचा KāvyPra.621.4; Subhāṣi.1014.

अन्तःशुचि (antaś-śuci) *adj.* **A** clear inside अन्तश्शु(न्तःशु)चिमा(से?नस)-प्रवेशमार्गान्वेषि(णा?ण्या)कृतपरिक्षेप(रिक्षेप?)या हंसमालये(द्?)व ब्रह्मसूत्रेल(?त्रले)खया पवित्रीकृतशरीरम् ... वामदेव इति ... तपोराशिं ददर्श AvantiKa.143.6; **B** pure within, AvantiKa.143.6.

अन्तःशुद्ध (antaś-śuddha) *adj.* **A** internally pure, pure within अतः शुद्धः (v.l. अन्तःशुद्धः) पूतः शून्यः शान्तोऽप्राणो निरात्मानन्तः MaiU.7.4; हित्वा हालाम् ... बन्धुप्रीत्या समरविमुखो लाङ्गली याः सिषेवे। कृत्वा तासामभिगममपां सौम्य सारस्वतीनामन्तःशुद्धस्त्वमसि भविता वर्णमात्रेण कृष्णः MeghDū.49; अन्तःशुद्धस्वभावस्त्वम् AdhyāRā.ii.4.43; तदन्तःशुद्धानां बहिःशरीरसंस्कारमण्डना-डम्बरपरिहारो मुनिमतल्लिकानामलंकारः MudriKu.3.7(1); **B** clear inside अन्तःशुद्धोद-वारिभिः। कलशैः स्नपनम् PāraS.14.173; 14. 179.

अन्तःशुद्धान्तम् (antaśśuddhāntam) *adv.* in the inner apartment or harem अन्तःशुद्धान्तमास्ते नृपतिरविरतं नैव निध्याति दैवान्निर्गच्छन्तं कदाचित्तिरयति तरसा खेटकूटैर्भटौघः YātrāPra. 8. 26.

अन्तःशुद्धि (antaś-śuddhi) *f.* **1A** inner or internal purification बाह्यशुद्धिरनेन स्यादन्तःशुद्धिरथोच्यते LaghvāśvaSm.1.25; KulārT.14.79; शुद्धता मृद्वारिभ्यां प्रायश्चित्तेनान्तःशुद्धया वा ManuBh.i.288.28 (*on* 3.182); LakṣmīT. 34.109;

अन्तःशुद्धिं बहिःशुद्धिं विदध्याद्देवतार्चनम्। आद्या दौश्चित्यनिर्मोक्षादन्या स्नानाद्यथाविधि YaśasCam.ii.372.8; **1B** inner or internal purity अन्तःशुद्धिविहीनैस्तु याः क्रिया विविधाः कृताः। न फलन्ति मुनिश्रेष्ठ BṛNāraP.31.102; **2** inward healing प्रसादस्य महीभुजः। अन्तःशुद्धिविहीनस्य व्रणस्येव न निश्चयः RājTa.(Ka.)8.613.

अन्तःशुद्धिव्यपेक्षा (antaśśuddhi-vyapekṣā) *f.* expectation or desire for inner or internal purification (कन्याम्) नातिबालां वहन्त्यन्ये अनित्यत्वात्प्रजार्थिनः। वहन्ति कर्मिणस्तस्यामन्तःशुद्धिव्यपेक्षया MahāBhā. xiii. 305*(2)

अन्तःशुद्धिसुन्दरत्व (antaśśuddhisundara-tva) *n.* the state of being charming due to inner or internal purity अरसापेक्ष एवाहारो युक्ताहारस्तस्यैवान्तःशुद्धिसुन्दरत्वात् TattvPradī.(A.) 312.7 (*on* 3.29)

अन्तःशुद्धिहीन (antaśśuddhi-hīna) *adj.* devoid of inner or internal purity (न दुष्टाय) यद्वा अयतः अन्तःशुद्धिहीनः। (शिष्यः) स चेह दुष्टपदेन संगृहीतः LalitāSaBh. 8.30 (*on* 15)

अन्तःशुषिर (antaś-śuṣira) *adj.* hollow inside अथान्तःशुषिरं व्यतिभेदः एतदपि नास्ति सर्वतो व्यवहितस्य यस्य मध्येऽवयवा न सन्ति तच्छुषिरम् NyāyVār.517.5 (*on* iv.2.20)

अन्तःशुषिरप्राय (antaśśuṣira-prāya) *adj.* almost hollow inside यदन्तः-शुषिरप्रायं हेयं नालीनलादि तद् YaśasCam.ii.335.1.

अन्तःशुषिरविलसत् (antaśśuṣira-vilasat) *adj.* shining in the hollow inside आगारेषु ... कुम्भैरन्तःशुषिरविलसद्दीपकलिकैः। विनिद्राणां कान्ताविरह-विधुराणामुडुगणभ्रमः प्रावृट्तम्यामतितिमिरमय्यां भवति ManoDū.146.

अन्तःशुषिरिणी (antaś-śuṣiriṇī) *adj.* (*f.*) being hollow inside न्यञ्चयन्क्ष्मामंह्रिपातैरन्तःशुषिरिणीमिव। ... वनसिन्धुरः ... तं पुरुषं प्रत्यधावत PariPar.2.195.

अन्तःशुष्क (antaś-śuṣka) *adj.* dried up inside कामकोपात्मका यस्य स्फूर्जन्त्यजगरास्तनौ। अन्तःशुष्कद्रुमस्येव मरणं तस्य राजते YogVā.v.39.44.

अन्तःशुष्यत् (antaś-śuṣyat) *adj.* drying up inside अन्तःशुष्यदुशीर-चन्दनरसस्रस्तैः ... पर्यन्ते च मृणालहारवलयैः ... वृतः ... प्रवालास्तरः JānaPa. 3. 38.

अन्तःशून्य (antaś-śūnya) *adj.* [*f.*-ā] **1** being void or empty inside अन्तःशून्यो बहिःशून्यः शून्यकुम्भ इवाम्बरे। ... स जीवन्मुक्तः SarvaVeSāSaṁ.966; MaitreU.2.27; VarāU.4.18: अन्तःशून्यादपि हि सुमुखे वेधसि स्यात्फलश्रीः Kapphiṇā.15.7; अन्तःशून्यः कदलीगर्भवदसारः संसारः EI. ii.219.52; आहारमस्मानमुतो देहि भद्र घटादिति। अन्तःशून्यं स तं दृष्ट्वा घटम् ... विलम्बते KathāSaSāg.x.1.32; अन्तःशून्य न कश्चिदेव भवतस्स्वार्थोऽमुना सेत्स्यति ... तुम्बक SūktiMu.36.29; वासना ... चारुवंशलतेवान्तःशून्या निस्सारकोटरा YogVā. iii. 113. 13; अन्तःशून्यां लघुप्रज्ञां तुम्बीमेतां वहन्नहम्। पारं राजतरङ्गिण्या गन्तुं हन्तोद्यमं श्रितः RājTa.(Jo.)14; क्वान्तःशून्यो नडः क्वेक्षुस्तथापि सदृशाकृती Subhāṣi.952; **2** detatched internally, SarvaVeSāSaṁ.966; MaitreU.2.27; VarāU.4.18; तिलकैर्मुद्रया मन्त्रैः ... अन्तःशून्या बहिःसारा वञ्चयन्ति द्विजा जनम् TriṣaŚaPuC.iv.5.284; अन्तःशून्या बहीरम्या नारी वारीव देहिनाम् ... निर्मिमीत गलग्रहम् MalliC.7.342; गृहीतं ताम्बूलम् ... स्मरत्यन्तःशून्या सुभग विरतायामपि निशि। तथैवास्ते हस्तः ŚārṅgaPa.3475; **3** devoid of inner or internal parts अन्तःशून्यमसारात्म बहुरागोपरञ्जितम्। ... जगत् YogVā. vi(2). 12. 20 (comm. आन्तरावयवशून्यम्); **4** false or unreal (entity), YogVā. vi(2). 12. 20 (comm. अवस्तु)

अन्तःशून्यकर (antaśśūnya-kara) *adj.* **1** whose trunk is hollow or empty inside भ्रमर हे यद्वारणोऽद्याप्यसावन्तःशून्यकरो निषेव्यते BhallaŚ.18; KāvyPra. 627.5 (comm. अस्थिमांसादिशून्यमध्यशुण्डादण्डः); Subhāṣi.751; Kuval.128(23); **2** whose hands are empty, i.e. devoid of money, BhallaŚ.18; KāvyPra.627.5 (comm. धनशून्यहस्तः); Subhāṣi.751; Kuval.128(23)

अन्तःशून्यकरत्व (antaśśūnyakara-tva) *n.* **1** the state of having a trunk hollow or empty inside अप्रस्तुते वारणस्य भ्रमरासेव्यत्वे कर्णचापलमात्रस्य भ्रमरनिरासकरणस्य हेतुत्वसंभवेऽपि रसनाविपर्ययान्तःशून्यकरत्वयोर्हेतुत्वासंभवेन ... वारणपदस्य दुष्प्रभुरूपविषयक्रोडीकारेणैव प्रवृत्तेर्वक्तव्यत्वात् Kuval. 128(26) (comm. वारणो गजः ... शून्यः सरन्धः ... करः शुण्डा); **2** the state of having hands which are empty, i.e. devoid of money, Kuval.128 (26) (comm. वारणः ... वारकः ... धनरहितः ... हस्तः)

अन्तःशून्यता (antaśśūnya-tā) *f.* **1** the state of being void or empty inside मित्रमुज्झितवतातिनिराशम् ... नभसा महतान्तःशून्यता प्रकटितातिशयेन Subhāṣi.1896; **2** internal detachment, Subhāṣi.1896.

अन्तःशून्यार्थपाटव (antaśśūnyārtha-pāṭava) *adj.* skilled in the functions or operations that are void, i.e. worthless inside अन्तःशून्यार्थपाटवैः सचिवैः। मुग्धमृगाः प्रतिदिवसं वञ्च्यन्ते YaśasCam.i.419.1 (comm. अन्तर्मध्ये शून्यार्थे फल्गुकार्ये पाटवं पटुत्वं येषाम्)

अन्तःशूल (antaś-śūla) *n.* (acute) internal pain (देवानां दौत्यम्) तदिदम्, अनुच्छ्वासविरामं मरणम् ... अशल्यप्रवेशमन्तःशूलम् NalaCam.5.54 (45)

अन्तःशैल (antaś-śaila) *m.* **1** mountain (situated) in the interior समुद्रोऽन्तःशैलैः ...। कृतस्तोयोच्छित्त्या सपदि सुतरां येन रुचिरः BṛSaṁ.12.1; **2** inside of a mountain मेकलकिरातविटका बहिरन्तःशैलजाः पुलिन्दाश्च। ... (एतेषाम्) भास्करः स्वामी BṛSaṁ.16.2.

अन्तःशोकशङ्कु (antaśśoka-śaṅku) *m.* sting in the form of internal pain or sorrow अहमप्यन्तःशोकशङ्कुना कीलितोऽस्मि KaumuMi. 2.6(24)

अन्तःशोणित (antaś-śoṇita) *adj.* suffering from internal blood-disorder (i.e. having internal haemorrhage) अथेमानग्निना परिहरेत् – पित्तप्रकृतिमन्तःशोणितम् SuśruS.i.12.14; अग्निकर्मविधिम् ... व्याख्यास्यामः ... न तु दहेद्भिन्नकोष्ठमन्तःशोणितम् Aṣ.āSaṁ.i.193.12 (1.40)

अन्तःशोभिदशारक (antaśśobhidaśāra-ka) *adj.* consisting of ten spokes shining inside अन्तःशोभिदशारके ... मालिन्या ... विरचितावासे स्थितम् ... सर्वज्ञादिकशक्तिवृन्दमनिशं वन्दे TripuMāPūSt. (Śaṅ.) 94.

अन्तःशौच (antaś-śauca) *n.* inner or internal purity मनः सत्येन शुद्ध्यति ... मनःशुद्धिरन्तःशौचम् BaudhDS. i.5.3 (comm. तत्र ज्ञानेन सत्येन या शुद्धिरुक्ता तदन्तःशौचम्); CaturCin.iii(1).791.9; अन्तःशौचे स्थिते सम्यक् बाह्यं नावश्यकं नृणाम् SarvaVeSāSaṁ.115; अन्तःशौचं रागद्वेषादित्यागः ManvaMu. 125.19 (*on* 3.192)

अन्तःशौचविमुक्तात्मन् (antaśśaucavimuktātman) *adj.* whose mind is devoid of inner or internal purity शौचमाभ्यन्तरं विद्यात् ...। अन्तःशौचविमुक्तात्मा शुचिरप्यशुचिर्यतः ŚivaP.vii (2).10.57 (555B.14)

अन्तःशौचविवर्जित (antaśśauca-vivarjita) *adj.* devoid of inner or internal purity तीर्थतोयेषु सर्वदा। अवगाह्यापि मलिनः ह्यन्तःशौचविवर्जितः LiṅgaP. i.8.34.

अन्तःश्यामत्व (antaś-śyāmatva) *n.* blackness inside उपलभ्यते च घटे ... भग्ने तस्मिन्नन्तःश्यामत्वम् PadārthaTaNi. 32.4-6.

अन्तःश्याव (antaś-śyāva) *adj.* blackish inwards परुषाण्यरुणवर्णानि बहिरन्तःश्यावानि नीलपीतताम्रावभासानि (कुष्ठानि) CaraS. ii.5.7(4) (1941 Ed.); (कुष्ठम्) कर्कशं रक्तपर्यन्तमन्तःश्यावं सवेदनम् ... ऋष्यजिह्वं तदुच्यते CaraS.vi.7.17 (1941Ed.); RugVi. 49.13.

अन्तःश्रि (antáś-śri) *adj.* [AltGr. III.187; Debru.44;305] tending inwards षड्ढ वाऽआश्राविताानि न्यक्तिर्युगूर्ध्वं कृपणं बहिःश्र्यन्तःश्रि ŚatBr. XI. iv.2.5; एतदन्तःश्रि। योऽयं संधायौष्ठाऽउच्चैः स्वरवदाश्रावयति श्रीर्वै स्वरोऽन्तरत एव तच्छ्रियं धत्ते ŚatBr. XI.iv.2.11 [*but* MW. *ind.* said of particular pronunciation]

अन्तःश्रित (antaś-śrita) *adj.* [*f.*-ā] **1** connected or attached with the mind अन्तःश्रितानन्तदुरन्तवासनाधूलीविलिप्ता परमात्मवासना। प्रज्ञातिसंघर्षणतो विशुद्धा प्रतीयते ViveCū.276; **2** located inside (the body) यथोत्तरमिति बहिःश्रितात् अन्तःश्रितादुभयाश्रितश्च गुरुरित्यर्थः comm. *on* CaraS. vi.21.23 (1921 Ed.)

अन्तःश्रुतिविवर्तिनी (antaśśruti-vivartinī) *adj.* (*f.*) revolving or whirling around the intermediary microtonal intervals अन्तःश्रुतिविवर्तिन्यो ह्यन्तरश्रुतयो मताः BṛDeśī.4.15.

अन्तःश्रुतिसाम्य (antaśśruti-sāmya) *n.* similarity with the Vedic statement about the inner controller स एवान्तरादित्य इत्यन्तःश्रुतिसाम्येन प्रत्यभिज्ञायमानो भवितुमर्हति Bhām.143.3 (*on* i.1.20)

अन्तःश्रूयमाण (antaś-śrūyamāṇa) *adj.* being mentioned as the inner controller विष्णुलिङ्गानामन्तःप्रविष्टनिष्ठतयोपदेशादन्तः प्रविष्टं कर्तारमित्यन्तःश्रूयमाणो विष्णुरेव TattvPrakā.22A.1 (*on* i.1.20)

अन्तःश्लथा (antaś-ślathā) *adj.* (*f.*) loose from inside, internally loose तुभ्यं नमो भवतु वासरलोपसंध्ये नान्तःश्लथामनुकरोषि जटां शिवस्य BhikṣāKā.31.3.

अन्तःश्लेष (antaś-śleṣá) *m.* internal bond or link, internal junction तपश्च तपस्यश्च शैशिरावृतू अग्नेरन्तःश्लेषोऽसि TaiS.IV.iv.11.1; MaiS.ii.8.12 (ii.116.3);iii.3.3(iii.35.16); KāṭhS. 17.10 (i.252.22); KapiKaS. 26.6 (111.7); VājaS.13.25; 15.57; VājaS. (K.) 14.2; 15.1; 16.7; अग्नेरन्तःश्लेषोऽसि ŚatBr. VIII. vii. 1. 6; MānŚS.151.7; VārāŚS.II.i.6.34; VaikhāŚS.18.17 [internal support, MW.]

अन्तःश्लेषण (antaś-śléṣaṇa) *n.* **1** internal bond or link अन्तःश्लेषणं वा एताश्चितीनां यद्दूर्त्व्याः ... उपदधाति TaiS. V.iv. 2.1; अन्तःश्लेषणमेवान्यै ग्रहाः

MaiS.iv.6.5 (iv.85.8); अन्तश्श्लेषणाय त्वा इतरे ग्रहा गृह्यन्ते KāṭhS.27.10 (ii.150.10); एतानि वै वेदानामन्तःश्लेषणानि यदेता व्याहृतयः AitBr. 25.7 (670); **ii** internal fastening for support एतावान् वै यज्ञः। यावान्पवमानाः। अन्तश्श्लेषणं त्वा अन्यत् TaiBr.I.viii.7.2 (BhaṭṭaBhā. यद्दाढर्यार्थं भित्त्यादावन्तर्निधीयते तदन्तःश्लेषणम्)

अन्तःश्वसत् (antaś-śvasat) *adj.* breathing inwards, i.e. silently तत्रालुलोके सः ... वनम् ... अन्तःश्वसन्निश्चलदुष्टसत्त्वैः कम्पप्रदं पिप्पलपल्लवानाम् DaśāvaC.7.81.

अन्तःश्वसन्मलिनित (antaśśvasan-malinita) *adj.* stained or sullied while breathing inwards कस्याश्चिदक्षियुगलाधरयोर्वियोगे जातः प्रसाधनविधेर्विपरीतभावः। बाष्पैस्तयोः प्रथम आहितराग आसीदन्तःश्वसन्मलिनितः श्वसितोष्णयैव BhikṣāKā.24.2.

अन्तःश्वास (antaś-śvāsa) *m.* act of breathing less, i.e. difficulty in breathing शमं नयाशु गोविन्द ...। अन्तःश्वासमतिश्वासम् AgniP.31.20.

अन्तःश्वास (antaś-śvāsa) *adj.* who has his breath checked inwards कृष्ण एवं भगवति ...। आत्मन्यात्मानमावेश्य सोऽन्तःश्वास उपारमत् BhāgP.i.9.43 (Viśvanātha अन्तरेव लीनः श्वासो यस्य सः)

अन्तःश्वेतशिखा (antaśśveta-śikhā) *f.* internally white crest or tip अन्तःश्वेतशिखाकणाङ्कितसटैरापाण्डुभिः केसरैः ... विकसति क्रीडातडागेऽम्बुजम् UdaySuKa. 28. 1.

अन्तषड्वाक्य (anta-ṣaḍvākya) *n.* last six statements सामध्वनौ श्रूयमाणे। वेदस्यान्तषड्वाक्यमधीत्य सर्ववेदानध्यायः ManvaVi. 517.1 (*on* 4.123)

अन्तष्कोश (antaṣ-kośa) *m.* inner case अन्तष्कोश इव कोशेभ्यस् स्त्रीषु अप्याकृतश्च नः AV.(P.) xx.29.4 [*but* MW. interior of a store-room]

अन्तष्कोष (antaṣ-koṣa) *m.* inner case अन्तष्कोश (v.l. °ष Viśva.) इव कोशेभ्यस् स्त्रीषु अप्याकृतश्च नः AV.(P.) xx.29.4.

अन्तष्टभाग (antaṣṭa-bhāga) *adj.* (class of buildings) having internal pillars श्रीवत्समन्तष्टभागं स्याच्चतुःषष्टिः सुमध्यगाः। तस्य स्तम्भाः प्रयोक्तव्या भद्रेष्टादशसंख्यया। ... एवम् ... गेहानि धरणीभुजाम् Mānaso. iii.1.41 (better **अन्तस्थभाग**)

अन्तष्पातिन् (antaṣ-pātin) *adj.* AltGr. I.336.

अन्तःषडन्तराल (antaṣṣaḍ-antarāla) *n.* intermediate space of the inner hexagon अन्तःषडन्तरालेषु पर्यायदिनसंभवे। नित्ये लिखेदग्रतस्तु प्रादक्षिण्येन सर्वतः TantrRā.19.41 (comm. अन्तर्गतषट्कोणषडन्तरालेषु)

अन्तसंयोगपक्ष (antasaṁyoga-pakṣa) *m.* view that contact (with action) extends upto the salvation अन्तसंयोगपक्षमाहैकदेशित्वज्ञापनाय AṇuBh. 175.15 (*on* iii.1.11)

अन्तसंश्लेष (anta-saṁśleṣa) *m.* joint, union सुखदुःखान्तसंक्लेशं (v.l. संश्लेषम् Apte) ... कालचक्रं प्रवर्तते MahāBhā. xvi. 45. 3.

अन्तसंस्था (anta-saṁsthā) *adj.* (*f.*) which deals with the concluding rites (of a sacrifice) उदयनीया ... अन्तसंस्था VaitāSū.24.9 (comm. इयम् उदयनीयाख्येष्टिरन्तसंस्था व्रतविसर्जनान्ता शंय्वन्ता)

अन्तसंस्थित (anta-saṁsthita) *adj.* (answer) which comes at the end (of question) यत्पृष्टं प्रश्नवाक्ये स्यादादिमध्यान्तसंस्थितम् VidaMuMa. 2.22.

अन्तसक्ता (anta-saktā) *adj.* (*f.*) attached or related to death ददर्श वृद्धं पथि जीर्णकायम्। तं वीक्ष्य ...। सोऽचिन्तयन्निश्चितमन्तसक्ता कायस्य निर्वेदमयी दशेयम् DaśāvaC.9.11.

अन्तसंचारिन् (anta-sañcārin) *adj.* moving, i.e. pervading inside नित्याय ... सकलाम्नायान्तसंचारिणे ... नतिः शंभवे ŚivāL.56.

अन्तसत्क्रिया (anta-satkriyā) *f.* funeral rite, obsequies स श्मशानभुवं प्रायात् ...। कर्तुं विनयिनस्तस्य स्वोचितामन्तसत्क्रियाम् RājTa.(Ka.) 2.84; क्षितीशः ...। आदिदेश रिपोः ... अन्तसत्क्रियाम् RājTa.(Ka.) 8.1787; 5.225; 7.1726.

अन्तसत्त्व (anta-sattva) *n.* last, i.e. highest strength मृदुमध्यान्तसत्त्वाद्य स्थूलसूक्ष्मानुभावतः। त्रिविधं प्राणसंरोधं विदुस्तत्तत्त्ववेदिनः BṛParāSm.12(2).71.

अन्तसद् (anta-sad) *m.* disciple, student, pupil (*lit.* who is near the Guru) (अर्जुनम्) मृगास्तमुपासते गुरुमिवान्तसदः Kirātā.6.34; गुरवोऽन्तसदामधोऽभवन् RāmC.12.4; (ग्रीष्मे) अस्मिन् शिरीषैर्दद्भुः स्रजो दण्डमाणवा अन्तसदश्च DvyāśraKā.16.82; अवतेरुश्चत्वारः ... इह कुशिकगार्ग्यकौरुषमैत्रेया इति तदन्तसदः EI. i. 281. 17.

अन्तसंतान (anta-santāna) *adj.* causing destruction and continuance प्रणतोऽस्म्यन्तसंतानं सर्वकारणकारणम् ViṣṇuP.i.17.15.

अन्तसंधि (anta-sandhi) *m.* juncture (of time) at the end (of aeon) मनुरेकसप्ततियुगः कल्पो मनवश्चतुर्दश मनूनाम्। आद्यन्तरान्तसंधिषु कृतकालोऽस्मा-द्युगसहस्रम् BrāhmSphuSi.1.10.

अन्तसमय (anta-samaya) *m.* **A** time of final dissolution यस्मिंस्तिष्ठति याति चान्तसमये कल्पानुकल्पे पुनः ... तं वन्दे ... विभुम् BrahmP.1.1; कर्ता त्वमीश ... तेजोभुगन्तसमये लयकर्तृकत्वात् ŚaṅkaVi. (Ā.) 8.4; **B** time of death (भीष्मेः) सस्मार स्मरणीयमन्तसमये ... चित्तेऽच्युतम् DaśāvaC. 8.687; 8.817; यः पञ्चास(श)दहानि चान्तसमये त्यक्त्वास(श)नम् ... प्राणविमुक्तिमाप EI. xxii.165.17; अन्तसमयं प्राप्य ... सूरयो दिवं ययुः PurāPraSaṁ.16.32.

अन्तसमयाशंसा (antasamayāśaṁsā) *f.* will (expressed) at the time of death लब्धा लिखिततत्कृत्यकारणात्पत्रिका करात्। तस्यान्तसमयाशंसा RājTa.(Ka.) 8.2257.

अन्तसमाधि (anta-samādhi) *m.* accomplishment of the concluding rite or ceremony तत्र यज्ञायज्ञीयमन्तसमाधये NidāSū.115.20 (7.2)

अन्तसमीप (anta-samīpa) *adj.* penultimate अन्तसमीपस्य ऋकारस्येदादेशो भवति CāndraVṛ. *on* v.4.8.

अन्तसमीपवर्तिन् (antasamīpa-vartin) *adj.* being penultimate अनन्त्यस्य यो विकारः सोऽन्त्यसदेशस्यान्तसमीपवर्तिनः स्थाने भवति PariVṛ. (Sī.) 178.3.

अन्तसमुच्छ्रय (anta-samucchraya) *m.* height at the top स्यात्... मेखलान्तरपत्रं (चार्ध सार्धं?) हीरकं पदम्। त्रिपदा कर्णशृङ्गास्य कलशान्तसमुच्छ्रयान्(?) SamarāSū.ii.106.6 (57)

अन्तसमुदाहार (anta-samudāhāra) *m.* last mutual talk or conversation ब्राह्मणगृहपतीनां कुतूहलशालायां संनिषण्णानां संनिपतितानामयमेवंरूपोऽभूत् अन्तसमुदाहारः GiMs.iii (1).221.8.

अन्तसंभव (anta-sambhava) *adj.* arising at the termination (of an eclipse) विधिर्ग्रहणमध्यस्य भानोः ...। आलिखेत्तद्ग्रहे व्यक्तं ग्राससमध्यान्तसंभवैः MaBhāsk.5.58 (comm. तद्ग्रहणेऽपि स्पर्शमध्यमोक्षसंभवैर्बिन्दुभिर्ग्रासप्रमाणमालिखेत्)

अन्तसामन् (anta-sāman) *n.* concluding chant तत्र वारवन्तीयमन्तसाम अन्तच्छन्दसि NidāSū.126.9(7.9); 145.24 (8.9)

अन्तसामान्त (antasāmānta) *m.* end (-portion) of the concluding chant अथ खलु दीर्घतमसोऽर्कमष्टमेऽहनि करिष्यन् भवति। अन्तसामान्त इति। तन्त्रस्थः स्वाशिरामर्कः NidāSū.155.11 (9.2); 155.21 (9.3)

अन्तसीमा (anta-sīmā) *f.* limit or boundary at the end सुपरीक्षितरक्षितान्तसीमाम्... मृगाटवीमुपेयात् NītiSā. 7. 36.

अन्तसूत्र (anta-sūtra) *n.* last thread or line अन्तराद्यन्तसूत्राभ्यामशान्तानाममत्यशीम्? । सिद्धस्य शर्णोपत्रस्य त्वग्रांशार्धस्य चान्तरे। कृत्वा सूत्रं समानीय प्राग्दत्तांशस्य संनिधिम् PauṣkS. 6.40.

अन्तस्तण्डुलसंयुक्त (antastaṇḍula-saṁyukta) *adj.* containing raw, i.e. half cooked rice-grains inside अन्तस्तण्डुलसंयुक्तं भिन्नभाण्डगतं तथा। ... एवं दुष्टं हविर्बुद्ध्वा प्रक्षिपेज्जलमध्यतः PāraS.18.286.

अन्तस्तत्त्व (antas-tattva) *n.* **A** inner principle or reality योऽन्तस्तत्त्वपरार्थसिद्धिविधनं जानात्यसौ पण्डितः ŚatTrayī.701; प्रवचनसारव्याख्यायाम् ... अन्तस्तत्त्वबहिस्तत्त्वप्ररूपणसमर्थायां प्रथमतः ... ज्ञानाधिकारः TātpaVṛ.17.15 (*on* 1.15); अन्तस्तत्त्वरसोर्मिधौतमतयोऽप्येतां तु कान्ताधिया श्लिष्यन्ति स्तुवते ... कस्यात्र पूत्कुर्महे PrabaK.38.23; **Bi** inner essence प्रतिभाति न संदेहो न तत्त्वं न विपर्ययः।... इति तदिदमप्यन्तस्तत्त्वशून्यं न विमर्दक्षममित्युपाध्यायाः AbhinBhā. i. 274. 1 (*on* 6.31); Kāvyānu. (He.) 70.27; **Bii** inner nature अन्तस्तत्त्वममीषामवगन्तुमिच्छामि (वक्षोजानाम्) MohaRāPa. 5.42 (1); **C** inner truthfulness or honesty स्त्रीणां च न भवेद्दिव्यम् ... धटकोशादिभिस्तासामन्तस्तत्त्वं विचारयेत् VīraMi. (Vyavahāra.) 179.10.

अन्तस्तत्त्वप्रणिहितधी (antastattvapraṇihita-dhī) *adj.* whose thought is directed towards the inner reality अन्तस्तत्त्वप्रणिहितधियामप्यतिबलस् तदीयोऽनाख्येयः स्फुरति हृदये कोऽपि महिमा ŚatTrayī.83.

अन्तस्तत्त्वमेलन (antastattva-melana) *n.* union with inner principle or reality अन्तरुपवीतलक्षणं तु बहिस्तन्तुवदव्यक्तमन्तस्तत्त्वमेलनम् Parabrahmopaniṣad 1 (528)

अन्तस्तत्त्वविहीन (antastattva-vihīna) *adj.* devoid of inner truthfulness or honesty शौचं मज्जनमाचामः पितृपूजानलार्चनम्। अन्तस्तत्त्वविहीनानां प्रक्रियेयं विराजते YaśasCam.ii.296.12.

अन्तस्तद्धर्माधिकरण (antastaddharmādhikaraṇa) *n.* section dealing with the aphorism *'antastaddharmopadeśāt'* (BrahmSū.i.1.20) (*lit.* 'the one within; on account of his qualities being declared') अधिकरणरचना अन्तस्तद्धर्माधिकरणेन गतार्थत्वादयुक्तैव AṇuBh. 64.3 (*on* i.2.18)

अन्तस्तनू (antas-tanū) *adj.* [DEBRU.495] included among the Tanū-offerings अन्तस्तनूरेष पुरोडाशः VādhūŚS. i.12.35 (CHAUBE Ed.)

अन्तस्तन्त्रम् (antastantram) *adv.* within or during the procedure 'यूपे विरूढे प्रायश्चित्तकरणम्' इति। सूत्रं बौधायनस्यान्तस्तन्त्रमेव ... प्रायश्चित्तं कुर्यादिति शालीकिः BaudhŚS. iii.161.13; तस्मात्क्रत्वर्थं सदन्तस्तन्त्रमुत्पाद्यं स्यात् ṬupṬ.3.12 (*on* iv.1.2); TantrRa.24.11.

अन्तस्तन्द्रा (antas-tandrā) *f.* inner sluggishness, i.e. ignorance स्मृतिं याता पुंसाम् ... या (गङ्गा) ... हरत्यन्तस्तन्द्राम् ...। इयं सा ते मूर्तिः GaṅgāL. 5.

अन्तस्तपस्तेजस् (antastapas-tejas) *n.* fire of the inner penance ज्वालेवोर्ध्वविसर्पिणी परिणतस्यान्तस्तपस्तेजसः ... पायाद्वः ... शंभोर्जटासंहतिः SaduktiKa.10.17.

अन्तस्तम (antas-tama) *adj.* having (the quality of) inner darkness, i.e., ignorance अन्तस्तमो बहिस्सत्त्वस्त्रिजगत्पालको हरिः ŚivaP.ii(1).9.59 (48B.15)

अन्तस्तमश्छेदिन् (antastamaś-chedin) *adj.* destroyer of inner darkness, i.e. ignorance बहिरन्तस्तमश्छेदि ज्योतिर्वन्दे सुदर्शनम् ŚrutaPra. iA. 1.6 (*on* i. 1. 0)

अन्तस्तमःशान्ति (antastamaś-śānti) *f.* removal of inner darkness, i.e. ignorance जगतामन्तस्तमःशान्तये ... व्यातेने किरणावलीमुदयनः Kiraṇā.2.3.

अन्तस्तमस् (antas-tamas) *n.* inner darkness, i.e. ignorance (हरिः) अन्तस्तमः प्रणुदति भास्वद्रूपेण भावितः SkandP. ii(2).47.12; त[त्त्वे] (Read तत्त्वे) परस्मिन्निव योगभाजां नितान्तमन्तस्तमसा प्रलीनां (Read प्रलीना) EI. xi.143.17; जिनानां बिम्बम् ...। चित्तादर्शे स्थितं स्वच्छे हरत्यन्तस्तमो नृणाम् PārśvC. 1. 793.

अन्तस्तमस्तोमविध्वंसिन् (antastamastoma-vidhvaṁsin) *adj.* destroyer of the mass of inner darkness, i.e. ignorance यम् ... अन्तस्तमस्तोमविध्वंसिकारुण्यमालोकयामास ... जनश्रेणिः ... स श्रीभवान्पातु माम् StavMā. 226. 21.

अन्तस्तमःसंभेद (antastamas-sambheda) *m.* destruction of inner darkness, i.e. ignorance जडीकृतजगत्यन्तस्तमःसंभेदमर्मणे। रामभद्रयतीन्द्राय ... नमः SiddhāSi. i. 1. 6.

अन्तस्तमा (antas-tamā) *adj.* (*f.*) innermost यदि तु तत्रापि अन्तस्तमामनुप्रविश्यते तत्तद्वारेणैव तन्मूलवर्तिनि परमानन्दधाम्नि भवेदेव सततमुदयः ParāTri.68.4; क्रमात् विकल्पसंविद आयान्त्य आ चरमनिकटभागात् अन्तस्तरामन्तस्तमां च अनुप्रविशन्ति ParāTri. 137.6.

अन्तस्तमाल (antas-tamāla) *adj.* having *Xanthochymus pictorius* trees in between उच्चैः प्रभावलयम् ऊर्जितकान्ति हैमं प्रादत्त रंगपतये नरपालसूर्यः। आभाति यत्तदुपकण्ठगतं प्रफुल्त(Read प्रफुल्ल) मन्तस्तमालमिव रम्यमशोकषण्डम् EI.iii.13.14.

अन्तस्तमिस्रापहा (antastamisrāpahā) *adj.* (*f.*) destroyer of inner darkness, i.e. ignorance कालिन्दीसुरनिम्नगे ... तनुभृतामन्तस्तमिस्रापहे YātrāPra. 8. 101.

अन्तस्तमोदर्शन (antastamo-darśana) *n.* perception of inner darkness, i.e. ignorance रूपदर्शनाभावस्तम इत्यप्ययुक्तम्, बहलान्धकारसंवृतापवरकमध्यस्थितस्य बाह्यरूपदर्शनान्तस्तमोदर्शनयोर्युगपदेव भावात् VivaPraSaṁ.13. 20.

अन्तस्तमोपह (antastamopaha) *adj.* destroyer of inner darkness, i.e. ignorance अंतस्तमोपहो वोस्तु गोतमो मुनिसत्तमः EI.ii.237.8; दयासंप्लुतमाहुस्त्वां दीपमन्तस्तमोपहम् Yādavā.10.70.

अन्तस्तमोराशि (antastamo-rāśi) *m.* heap or mass of inner darkness, i.e. ignorance ज्ञानालोकव्यपास्तान्तस्तमोराशिः पुमानतः। श्रुत्यर्थानां विविक्तानामुपदेशकृदिष्यताम् TattvSaṁ. 2810.

अन्तस्तमोहन्तृ (antastamo-hantṛ) *adj.* destroyer of inner darkness, i.e. ignorance अन्तस्तमोहन्तारं जगताम् ... ऐक्षिषि परं ब्रह्माच्युतं शाश्वतम् NīlaVi.54.21.

अन्तस्तरणक (antastaraṇa-ka) *n.* layer (of Kuśa grass spread out) at death, i.e. death bed द्विजाः ... अन्वास्तरणिकं (v.l. अन्तस्तरणकं) राज्ञः समन्तात्परिचिक्षिपुः Rāmā.ii.1812*(72)

अन्तस्तरलता (antastarala-tā) *f.* **1** the state of having a sparkling jewel at the centre उज्जयिनी नाम नगरी ...। यस्याम् ... अन्तस्तरलता हाराणाम् Kād.53.11 (comm. अन्तस्तरलो मध्यमणिर्येषाम् ... तरलम् ...। हारमध्यमणौ पुंसि); **2** fickleness of mind, Kād. 53. 11 (comm. अन्तश्चित्ते ... चञ्चलता)

अन्तस्तरा (antas-tarā) *adj.* (*f.*) more inner or interior अविकल्पा संवित् झगिति चरमभागे एव निपतति, ततस्तु क्रमाद्विकल्पसंविद आयन्त्या आ चरमनिकटभागादन्तस्तरामन्तस्तमां चानुप्रविशन्ति ParāTri.137.6.

अन्तस्तरुश्रेणि (antastaruśreṇi) *adv.* on the row of trees अन्यदान्तस्तरुश्रेणि दिशत्सु किशलश्रियम्। रवेः करेषु भूपालः प्रभातस्थानमभ्यगात् PāṇḍaC.8.41.

अन्तस्तस् (antas-tas) *adv.* from the inner part, from inside बहिस्तः ... मध्यतः ... अन्तस्त आधारमेतदाकारं चक्रं नारायणस्य PārāSū.38.29.

अन्तस्ताप (antas-tāpa) *m.* **Ai** internal fever तत्र माहेश्वरं धाम संचक्राम हविर्भुजः। गङ्गायामुत्तरङ्गायामन्तस्तापविपद्धृति KumāSaṁ. 10.37 (comm. अन्तर्मध्ये ताप एव विपत्तां धरति); **Aii** inner fire, inner heat (of grief or pangs of love) अशिशिरतरैरन्तस्तापैर्विवर्णमणीकृतम् ... मणिबन्धनात् कनकवलयं स्रस्तं स्रस्तं मया प्रतिसार्यते Śāk.3.15; तच्च श्रुत्वा प्लुष्ट इवान्तस्तापेन सद्यो विवर्णतामगात् HarṣaC.223.11; 232.16; व्यनक्त्यन्तस्तापं तदयमतिधीरोऽपि विषमम् MālaMā. 3. 92; अन्तस्तापं तुहिनपयसामप्युनुच्छिद्यमाप्य त्वत्तो बाला...। धत्ते निन्दां कुसुमविशिखे PavaDū.(Dh.) 71; अन्तस्तापान्मृदुभुजयुगं ते मृणालस्य दैन्यं म्लानिम् ... धत्ते NemiDū.103; **Aiii** inner heat (of meditation) शरीरम् ... ध्यानाग्निना च संताप्यं ह्यन्तस्तापोऽयमीरितः BṛBrahmaS.iv.1.8; **B** mental grief or agnoy देवशर्मा ... मे यथावृत्तं न्यवेदयत्। आत्मनश्चेष्टितं पूर्वमन्तस्तापेन पीडितः PadmP.iv.88.32; (युधिष्ठिराद्याः) अनलमिवाधायान्तस्तापं पार्थाः ...। निदधुर्देवरहस्ते जननीम् YudhiVi. 3. 96.

अन्तस्तापातिसंतप्त (antastāpātisantapta) *adj.* much distressed by mental agony कथं नु तत्पापफलानि भोक्ष्ये ...। एवं विनिन्द्य चात्मानमात्मना लुब्धकस्तदा। अन्तस्तापातिसंतप्तः सद्यः पञ्चत्वमागतः BṛNāraP. 35.58.

अन्तस्तापादिक (antastāpādi-ka) *adj.* mental agony etc. मृगलोचनाम्... तां दृष्ट्वा अन्तस्तापादिकं मयाप्तम् SaraKaṇṭhā.341.22.

अन्तस्तापाभिसंतप्त (antastāpābhisantapta) *adj.* totally distressed by mental agony कथं नु तत्पापफलानि भोक्ष्ये ...। एवं विनिन्द्य चात्मानमात्मना लुब्धकस्तदा। अन्तस्तापातिसंतप्तः (v.l. °भिसंतप्तः) सद्यः पञ्चत्वमागतः BṛNāraP.35.58.

अन्तस्ताप्यमान (antas-tāpyamāna) *adj.* being scorched in the heart पूषा ... भूपालाभावशोकशिखिनेव चान्तस्ताप्यमानस्ताम्रतां प्रपेदे HarṣaC.234.3.

अन्तस्तारम् (antastāram) *adv.* **1** with the Om inside अपराङ्गं महामन्त्रैः सर्वतः समलंकृतम्। अन्तस्तारं समारभ्य यदि वा विष्णुपञ्जरम्। पूर्वोक्तं तद्विना मूर्तेस्तत्तन्मन्त्रसमुच्चयम्। यथास्थानं स्मरेत् AhirbuS.36.19: **2** inside the pupil, i.e. up on lash अन्तस्तारं तरलतरलाः ... निर्यान्त्यस्याः कुवलयदृशो बाष्पवाराम्प्रवाहाः ViddhaŚā.3.24; SubhāRaK.22.47.

अन्तस्तारा (antas-tārā) *adj.* (*f.*) having the pupil drawn inside, i.e. hidden दिशति कथमप्यन्तस्तारां दृशम् ... नृपः DaśāvaC.5.162.

अन्तस्तिमिर (antas-timira) *n.* inner darkness, i.e. ignorance अविद्यानामन्तस्तिमिरमिहिरद्वीपनगरी ... दंष्ट्रा मुररिपुवराहस्य भवति SaundL.3.

अन्तस्तिमिरहर (antastimira-hara) *adj.* remover or destroyer of inner darkness, i.e. ignorance अप्यन्तस्तिमिरहरं शरीरभाजाम् ...। सौरभ्यं हविषि हुते समुज्झिहानं व्याजिघ्रन् सदसि विपश्चितः ŚivLī.6.58.

अन्तस्तीर्थ (antas-tīrtha) *n.* **A** holy place within बहिस्तीर्थात् परं तीर्थमन्तस्तीर्थं महामुने। आत्मतीर्थं महातीर्थमन्यत्तीर्थं निरर्थकम् JābālaDaU.4.53; **B** holy place in the body शृणु वक्ष्यामि तीर्थानीन्द्रियदेहतः।... दातृणां च करौ तीर्थम् ... अन्तस्तीर्थं भूतशुद्ध्या प्राणायामाद्य नासिके BṛDharmaP.i.15.6.

अन्तस्तुच्छा (antas-tucchā) *adj.* (*f.*) **A** useless or essenceless from inside बहिरुपपादितशोभा अन्तस्तुच्छाः स्वभावतः कठिनाः। वेश्याः KuṭṭaMa. 323 (comm. तुच्छाः निःसाराः); **B** empty from inside, KuṭṭaMa. 323 (comm. रिक्ताः)

अन्तस्तुषार (antas-tuṣāra) *adj.* having dew-drops inside, i.e. full of dew-drops रूपम् ...। भ्रमर इव निशान्ते कुन्दमन्तस्तुषारं न खलु सपदि भोक्तुं नापि शक्नोमि मोक्तुम् Śāk.5.19.

अन्तस्तृष्णा (antas-tṛṣṇā) *f.* **i** inner thirst, i.e. desire अन्तस्तृष्णा स्नेहो रागः ... राजसानि एतैः ... परिपूर्णः ... भूतात्मा MaiU.3.5; प्रशान्तोऽन्तस्तृष्णाविषमपरितापः शमजलैः DarpDa.7.73; **ii** inner thirst, i.e. greed अशान्तान्तस्तृष्णा धनलवणवारिव्यतिकरैः DarpDa. 2. 10; Subhāṣi. 491.

अन्तस्तृष्णोपतप्त (antastṛṣṇopatapta) *adj.* (used as noun) (one) who is afflicted with or tormented by the inner thirst, i.e. desire अन्तःशीतलतायां तु लब्धायां शीतलं जगत्। अन्तस्तृष्णोपतप्तानां दावदाहमयं जगत् AnnaU.1.35.

अन्तस्तेजस् (antas-tejas) *n.* inner light or lustre अन्तस्तेजो बहिस्तेज एकीकृत्यामितप्रभान्। ... कुलदीपान् निवेदयेत् KulārT.7.35; NityoNi.56.18.

अन्तस्तोभ (anta-stobha) *m.* chanted interjection in a Sāman employed at the end (of Gāyatra) हुम् आ वेत्यन्तस्तोभो वृद्धो वा ĀrṣeBr. i.1.17

(Sāy. गायत्रसाम्नोऽन्ते प्रयुज्यमानः स्तोभः)

अन्तस्तोमभागम् (antastomabhāgám) *adv.* within the bricks known as Stomabhāga (the fifth layer of the altar of Soma-sacrifice) एता इ॒ष्टका अपश्यन्नाकस॒दस्ताः ... स्व॒र्गोऽएवैना ए॒तल्लो॒के सादयत्यन्तस्तोमभागमेष वै स ना॒कः स्व॒र्गो लोकः ŚatBr. VIII.vi.1.4.

अन्तस्तोय (antas-toya) *adj.* full of water inside अन्तस्तोयं मणिमयभुवः ... प्रासादास्त्वां तुलयितुमलं यत्र (अलकायाम्) तैस्तैर्विशेषैः MeghDū. 64; अन्तस्तोयममी विशन्ति शफराः शीतं सरः ŚṛṅgāSar. 90.

अन्तस्तोष (antas-toṣa) *m.* inner delight or satisfaction कदा अन्तस्तोषमेष्यामि स्वप्रकाशपदे स्थितः SaṁnyāU.2.52; नारायणः। अन्तस्तोषतुषारसौरभमयश्वासानिलापूरणप्राणोत्तुङ्गभुजंगतल्पमधुना भद्रेण निद्रायते AnargharRā.1.27; कमप्यन्तस्तोषं दधति मुरलीकेलिनिनदाः KṛṣṇaKa.1.26.

अन्तस्तोषव्यतिकरवश (antastoṣavyatikara-vaśa) *m.* [Abl.] on account of the association with inner delight समायाते नाथे ... वधूरन्तस्तोषव्यतिकरवशान्नोपचरितुं पुरस्तादालीनां प्रचलति तथा नो विरमति PratāYaBhū. 252.4.

अन्तस्त्य (antas-tya) *n.* [AltGr. I.336; DEBRU. 699] intestine, entrails, inner part of abdomen (सूक्तम्) नव विच्छन्दसस्तदेतद्यज्ञस्यान्तस्त्यं विष्टुद्रमिव वा अन्तस्त्यमणीय इव च स्थवीय इव च AitBr.4.4 (88) (Sāy. उदरगतावयवस्वरूपम्); AitĀ.I.v.1.4; यथोपपादमिव वा अन्तस्त्यं ह्रसीय इव च द्राघीय इव च AitĀ.I.v.1.6.

अन्तस्त्याग (antas-tyāga) *m.* internal, i.e. mental renunciation अन्तस्त्यागो बहिस्त्यागो विरक्तस्यैव युज्यते ViveCū. 374.

अन्तस्त्रय (antas-traya) *n.* internal triad स्वं रक्षा राज्यस्य प्रभवोऽन्तस्त्रयमिदं विभो कर्म (भवति) HariC.(Pa.) 27.

अन्तस्त्रिकोणाग्रगा (antastrikoṇāgra-gā) *adj.* (*f.*) pertaining to, i.e. presiding over the top of internal triangle कामेश्वरीवज्रेश्वरीभगमालिन्योऽन्तस्त्रिकोणाग्रगा देवताः BhāvU. 549. 8.

अन्तस्त्रुटित (antas-truṭita) *adj.* torn or broken internally बलाधिकतयान्तस्त्रुटितात्तस्माद्गजात्कर्णाङ्गजमुत्तार्य स्वयं यावदवरोहति तावत्स गजः पृथिव्यां पपात PrabaCin.59.8; तदीयातुलेन बलेनान्तस्त्रुटितस्य करटिन उत्तारिते हस्तिपके भूपतितः सोऽसुभिर्व्ययुज्यत PrabaCin.72.22.

अन्तस्त्व (antas-tva) *n.* the state of being the inside अर्धस्यान्तस्त्वे सत्यर्धस्य बहिष्ट्वेनान्तरालानुमानम् AdvaiSi.699.10.

अन्तस्थ (anta-sthá) *adj.* [also written as *antasstha*, enumerated in the *gahādigaṇa*, GaṇPā. 74. 9; JaineVyā. 191. 23 (*on* iii. 2. 114); CāndraVyā. iii. 2. 58; GaṇRa. 5. 318 (357)] **1A** inner, internal **Bi** contained within **ii** abiding within **iii** present or being inside (used as noun) (one) who remains inside, insider **iv** being in the middle **C** present in the mind **D** hidden or concealed inside **E** coming under (the jurisdiction of) **2A** standing close by **B** remaining at the end, i.e. last **C** placed or fixed at the end **3** belonging to lower or inferior caste **4** (used as noun) (one) who is back biting or wicked **1A** inner, internal सा॒ है॒षान्तस्था॒ प्राणा॒नाम् ŚatBr. I. iv. 3. 8; भावयन्बहिरन्तस्थानर्थान्भाव उदाहृतः BhāvPra. (Śā.) 8. 10 (1);**1Bi** contained within मत्प्रवाहवदन्तस्थो भावयेदन्नपात्रगौ ... दर्भौ PauṣkS. 27. 93; दहर एवाकाशो ... सहान्तस्थैः समाहितैः पृथिव्यादिभिः ... विज्ञेयः BrahmSūBh. (Śaṅ.) 169. 6 (*on* i. 3. 14); सोऽब्रवीत्सितदन्तांशुपुष्पिताधरपल्लवः। समस्तमौक्तिकच्छायामन्तस्थां दर्शयन्निव RāmāMañ. 308. 10; यत्तुल्यकालमखिलं तन्मात्रवेदनं परे। अन्तस्थं तदिदं भाति जगदित्यहमित्यपि YogVā. iii. 61. 7; **1Bii** abiding within देशिकः। मामतिप्रतिपन्नं च अन्तस्था वेत्ति यद्यपि। कृतार्थमतिभक्तत्वादमुं मन्ये तदा गुरुम् PauṣkS. 30. 199; 30. 226; तत्त्वं सनातनम् ... मुख्येऽन्तस्थं परं ध्यात्वा न भूयो भवभाक्भवेत् JayāS. 33. 52; यस्यान्तस्थानि भूतानि PāraS. 5.39; अन्तस्थः सर्वभूतानामात्मा योगेश्वरो हरिः BhāgP. i. 8. 14; रूपादिदर्शनान्तस्थ आगमापायसाक्ष्यसौ BṛĀraUBhVā. iii. 7. 51; iv. 3. 142; चक्षुरन्तस्थो विष्णुरेव BrahmSūBh. (Mā.) 93A. 9 (*on* ii. 2. 1); 7A. 11 (*on* i. 1. 20); सोऽन्तस्थो निर्णेयो भवति TattvPrakā. 21B. 4 (*on* i. 1. 20); जीवाकाशस्य यान्तस्था प्रतिभा कुरुते स्वयम्। सा बहिश्च चिदादर्शे प्रतिबिम्बादियं स्थिता YogVā. iii. 44. 51; **1Biii** present or being inside सप्तलोकाश्च येऽन्तस्थाः ब्रह्माण्डस्यास्य ViṣṇuP. iii. 7. 2; बहिरन्तस्थमुभयमवेष्टिसवव्रत् BhaktiSū. (Śā.) ii. 2. 18; पाषाणे सहजोऽन्तस्थः सर्पः BṛĀraUBh. 98. 9 (*on* i. 4. 7); सकलं निष्कलं शून्यम् ... क्षयमन्तस्थं कण्ठोष्ठं चाष्टमं शिवम् AgniP. 316. 1; कायस्य त्वचि कठिनस्य कर्कशायां निर्यातुम् ... कराग्रैरन्तस्थं ववमुरिव द्विपाः श्रमाम्भः RāghPāṇ. (Dha.) 14. 19; वत्सेशो गोपालगृहम् ...। प्रविवेश ... अन्तस्थदेवीगोपालमन्त्रिद्वयवसन्तकम् KathāSaSāg. iii. 2. 104; स्योनाकबीजैरन्तस्थैस्तद्दारुकृतपादुके। आक्रम्य पर्यटेत् ĪśānŚiPa. i.51.32; समुद्रेणान्तस्थस्तटभुवि तरङ्गैरकरुणैः समुत्क्षिप्तोऽस्मि SaduktiKa. 237. 13; तैलकन्दाद्यथान्तस्थादिला स्नेहाबिला बहिः। तथास्माद्दानधीकन्दादम्बाभूद्दानदोहदा ŚāliC. 2. 56; अन्तस्थैर्वडवामुखानलशिखाजालैः विशुष्कः अम्बुधिरयं पूर्णः समुद्योतते EI. xiv. 316. 92; iii. 154.78; xiv. 219. 53; ix. 14. 68; ix. 334. 61; मुनिजनमनश्चिन्मयमहापयोधेरन्तस्थं तव चरणरत्नं विजयते MūkaPañ. 3. 25; (used as noun) (one) who remains inside, insider करिदशना इव नृपतेर्बाह्याः क्लेशाय खादनेऽन्तस्थाः YaśasCam. i. 472. 4; **1Biv** being in the middle अन्तस्थाधिकृतप्राणिनामप्रणवगर्भितम्। ... यन्त्रम् ... परिन्यस्येत् YogŚā. 5. 208; **1C** present in the mind नामादयश्चातिग्रहा वासनारूपा अन्तस्थाः ... उत्क्रामन्ति BṛĀraUBh. 379. 4 (*on* iii. 2. 11); बुद्ध्यारूढेन बुद्धिपरिकल्पितेनान्तस्थ एवैष प्रमाणप्रमेयफलव्यवहारः Bhām. 437. 19 (*on* ii. 2. 28); कुम्भोद्भवो मुनिः। उवाच सत्यमन्तस्थं यत्त्वयोक्तम् RāmāMañ. 462. 20; **1D** hidden or concealed inside भानौ ... पिबत्यन्धकारोत्कराम्भः ... यान्त्यन्तस्थाः कुलशिखरिणो व्यक्तिवर्त्मक्रमेण SubhāRaK. 30. 20; 161. 32; **1E** coming under (the jurisdiction of) शेङ्काट्टकोटकान्तस्थम् ... ग्रामम् EI. iv. 16. 132; iv. 18. 188; iv. 18. 196; iv. 19. 212; iv. 19. 218; **2A** standing close by अश्वौ सुवलयग्रीवावन्तस्थौ तस्य पार्श्वयोः MatsyaP. 261. 7; **2B** remaining at the end, i.e. last आद्यन्तस्थौ सकारौ द्वौ PārāŚi. 47; तारभुवनाधिनाथान्तस्थं निजनाम ङेनमोऽन्तमिह TantrSa. 12. 64; तासामाद्यास्तु नाड्यः षड् दक्षिणं पादमाश्रिताः। अन्तस्थाः षट् तथा वामपादमेव समाश्रिताः ŚilpRa. ii. 18. 26; (शेव इति सुखनाम। शिष्यते:। वकारो नामकरणः। अन्तस्थान्तरोपलिङ्गी) अन्ते तिष्ठति धातोर्यो वर्णः सोऽन्तस्थः। ... तस्यान्तरमवकाशस्थानमुपलिङ्गयति ... यः स भवत्यन्तस्थान्तरोपलिङ्गी Durga *on* Nir. 10. 17 [NānārthāSaṁ. ii. 49. 25]; **2C** placed or fixed at the end कर्परम् ...। तं दधद्रन्ध्रमध्येऽथ तन्त्रीप्रान्ते निवेश्य तौ। संवेष्ट्य कीलकेऽन्तस्थे कीलकं भ्रामयेन्मुहुः SaṁgīRa. iii. 236. 6 (6. 45); **3** belonging to lower or inferior caste अन्तस्थान् म्लेच्छजातीयान् ... पासि त्वम् BhaviP. 189B. 24 (i. 127. 16); **4** (used as noun) (one) who is back biting or wicked, YaśasCam. i. 472. 4 (comm. पिशुनाः)

अन्तस्थ (anta-stha) *m.* **1** that which is inside the womb, i.e. embryo or progeny **2** semivowel **3A** epithet of Śiva **B** epithet of Viṣṇu **4** lower or inferior caste **1** that which is inside the womb, i.e. embryo or progeny यदा वै क्षत्रेण ब्रह्म परिगृणात्यथ स तस्यान्तस्थान् तिष्ठति JaimiBr. 2. 105; **2** semivowel (*lit.* being in the middle, i.e. between the stops and sibilants so far as articulation is concerned) तद् यत्र स्वरादनन्तरान्तस्थान्तर्धातुर्भवति तद् द्विप्रकृतीनां स्थानम् Nir. 2. 2 (44. 16); आद्याः पञ्चविंशतिः स्पर्शाः। पराश्चतस्रोऽन्तस्थाः TaiPrāti. 1. 8; ऊष्मान्तस्थाभ्यश्च स्पर्शः VājaPrāti. 4. 103; 4. 106; 8. 14; स्वरद्विरष्टकं वर्गा अन्तस्था ऊष्मभिः सह पत्राष्टकमिदं प्रोक्तम् AhirbuS. 17. 40; प्रयत्नः ... ईषत्स्पृष्टकरणा अन्तस्थाः ĀpiŚi. 3. 5; 6. 11; स्पर्शानां करणं स्पृष्टमन्तस्थानामतोऽन्यथा MāṇḍūŚi. 6. 9; वर्गाणां पञ्चमा वैश्या अन्तस्थाश्च तथैव च YājñaŚi. 87; 86; 178; 202; 209; 210; 214; भवन्ति प्रत्यये येषामन्तस्थाः संयुतास्तथा। ... ते नादसंज्ञकाः PārāŚi. 40; 49; 145; अन्तस्थायवकारोऽपि इत्येतैः संयुतो मतः। अर्बुदन्यर्बुदं बभ्रुः शुल्बं चोल्बं जहाति च AmoghŚi. 10; स्वरपूर्वाः शषसहा अन्तस्थाश्च तथा यदि। निमित्तभूता द्वित्वस्य स्पर्श एव न संशयः MādhyaŚi. 1. 3; NāraŚi. ii. 2. 9; अनुस्वारपराः शषसा न क्रमन्ति कदाचन। तत्र क्रामन्ति शषसा अन्तस्थैः परतो यदि LomŚi. 8. 6; 5. 9; 5. 11; त्रयस्त्रिंशद् व्यञ्जनानि भवन्ति। स्पर्शान्तस्थोष्माणश्चेति GautŚi. 1. 1 (450); अन्तस्थान् मरुदग्निनिर्ऋतिशिवेष्वालिख्य वर्णावृतम् ŚāraTi. 24. 48 (comm. यरलवान्); ऊष्माणमिन्द्रियाण्याहुरन्तस्था बलमात्मतः BhāgP. iii. 12. 47; वर्णरिफसमायुक्तं विद्रुमेनैव भूषितम्। अन्तस्थानां हि अन्त्यं वै ब्रह्मदेवत्यमुच्यते BhaviP. 298A. 24 (i. 206. 3); दशमेऽहनि ... कवर्गादीनां तृतीयादयो वर्णा यरलवहाश्च घोषवन्तः। तेषां मध्ये यकारादयश्चतस्रोऽन्तस्थाः। ते नाम्नोऽन्तर्मध्ये कार्याः Aparā. 27. 12 (*on* 1. 12); यरलवा अन्तस्थाः SiddhaHe. i. 1. 15; ii. 1. 81; अन्तस्था यरलवास्ते मध्ये कर्तव्याः SmṛtiCan. i. 54. 19; ईषत्स्पृष्टमन्तस्थानाम् PrakriKau. i. 28. 1; i. 29. 1; वर्गाणां प्रथमतृतीया अन्तस्थाश्चाल्पप्राणाः Prasā. i. 29. 13; अन्तस्थैश्च घटिता ... रचना ... माधुर्यस्य व्यञ्जिका RasGaṅ. 80. 7; प्रयतनम् ... ईषत्स्पृष्टमन्तस्थानाम् SiddhāKau. 5A. 15 (*on* i. 1. 9); आद्योऽन्तस्थोऽप्यनन्तं दिशति फलमसौ ... राम त्वन्नामवर्णाः PadyāTa. 19; अन्तस्था यरलवा इति पञ्चभूत बीजोद्धारः LalitāSaBh. 173. 22 (*on* 211); **3A** epithet of Śiva (*lit.* abiding within) अन्तस्थाय नमस्तुभ्यम् SkandP. iv. 73. 113; **3B** epithet of Viṣṇu (*lit.* abiding within) अन्तस्थः ... नाम्नां सहस्रं नामेदं विष्णोरतुलतेजसः SkandP. v (1). 63. 152; **4** lower or inferior caste अन्तस्थाशीर्षवर्गान्त्यानपि पूज्यपदं नयन्।

वर्धमानमहावीरनामभ्यां पातु वो जिनः SamarāSaṁ. 1. 6.

अन्तस्थजीव (antastha-jīva) *adj.* having life or vital breath within अन्तस्थजीवं वदनं तस्य (माधवस्य) तत्कान्तिमाययौ YogVā. iii. 58. 37.

अन्तस्थत्व (antastha-tva) *n.* A the state of being inner or internal अन्तस्थत्वं बहिस्थत्वं निष्पत्तौ द्वयमिष्यते। अन्तस्थत्वं पुरस्कृत्य बहिस्थत्वं प्रकाशते ŚṛṅgāPra. 136. 2; B the state of being what is contained within विश्वस्यान्तस्थत्वे बहिरसत्त्वे-नार्थक्रियाकारित्वासंभवात् ... बाह्यमाभ्यन्तरं चास्त्येव विश्वम् SarvaMaSaṁ.20.15.

अन्तस्थपङ्क्ति (antastha-paṅkti) *f.* row or line which is at the end, last line आद्यन्तस्थपङ्क्तिभ्यां त्रीणि त्रीणि दिगन्तरात् ... लेपयेत् PauṣkS. 5. 244.

अन्तस्थबाह्यपद्म (antasthabāhya-padma) *n.* inner and outer lotuses अन्तस्थबाह्यपद्मानां दलसंख्यां निबोध मे PauṣkS. 7. 18.

अन्तस्थभूषिता (antastha-bhūṣitā) *adj. (f.)* embellished with the semi-vowels प्रभुः ... स्वरोष्मान्तस्थभूषितां बृहतीं सृजति BhāgP. xi. 21. 39.

अन्तस्थयमसंयोग (antasthayama-saṁyoga) *m.* conjunction of semivowels and twin letters (between a nasal and corresponding consonant) अन्तस्थयमसंयोगे विशेषो नोपलभ्यते YājñaŚi. 203.

अन्तस्थयोजना (antastha-yojanā) *f.* connection, i.e. installation with (the formula) present within प्रेतादिपितृक्लृप्तस्य कार्या चान्तस्थयोजना PauṣkS. 27. 538.

अन्तस्थरत्ना (antastha-ratnā) *adj. (f.)* bearing jewel inside ताम् (देवीम्) अन्तस्थरत्नामिव शुक्तिरेखामापन्नसत्त्वां प्रभुरभ्यनन्दत् MadhuVi. 2. 12.

अन्तस्थरन्ध्रसंलग्न (antastharandhra-saṁlagna) *adj.* attached to the inner hole तुम्बकं मध्यरन्ध्रं स्यात्कर्परं नालिकेरजम्। अन्तस्थरन्ध्रसंलग्नं पृष्ठमध्येन रन्ध्रिणा SaṁgīRa. iii. 236. 4 (6. 44)

अन्तस्थल (anta-sthala) *n.* region inside (the border), inner region प्राच्यं नायरुसीमान्तात् सिरुपाकाद्य दक्षिणम्। पश्चिमं वेलुधलम्मेट(डु)सीमान्तस्थलहृदादपि ... श्री पूदेरिविलाः आख्यं ग्रामम् EI. iv. 19. 210.

अन्तस्थलोलदण्डा (antastha-loladaṇḍā) *adj. (f.)* having moving (vertical) clapper inside उच्चैरेकदण्डा अन्तस्थलोलदण्डा करव्यापारेण नादकरी एतदाकारा घण्टा PārāSū. 39. 8.

अन्तस्थवर्णकार (antasthavarṇa-kāra) *adj.* producing letters of the class of semivowels स्थानममिपीडयति। अन्तस्थवर्णकारो वायुर्दारुपिण्डवत् ĀpiŚi.5.2.

अन्तस्थवृक्षत्व (antasthavṛkṣa-tva) *n.* the state of being that which contains a tree within बीजमन्तस्थवृक्षत्वं नानानाना यथैकदृक्। तथासंख्यजगद्ब्रह्म शान्तमाकाशकोशवत् YogVā. iii. 80. 60.

अन्तस्थशवदूषित (antasthaśava-dūṣita) *adj.* contaminated or polluted by a dead body (corpse) remaining inside गृहशुद्धिं प्रवक्ष्यामि अत्यश्वशव-दूषिता(तम्)(v.l. अन्तस्थशवदूषितम्) AtriS. 77.

अन्तस्थशेषफणमण्डल (antasthaśeṣa-phaṇamaṇḍala) *n.* rounded hood of the Śeṣa serpent staying inside अन्तस्थशेषफणमण्डलफूत्कृतोत्थनिःश्वास-वातवशतोऽनु सरत्तरागाः। सिन्धोरवर्धिषत ... तरसा तुरङ्गाः HarVi. 22.55.

अन्तस्थसज्जीवभट (antasthasajjīva-bhaṭa) *m.* warrior having life-breath existing within, soldier yet alive अन्तस्थसज्जीवभटस्पन्दिस्पन्दनभीतिदम् ... रणोद्यानम् ... अभवत् YogVā. iii. 38. 56.

अन्तस्थसंधिसंस्थान (antasthasandhi-saṁsthāna) *adj.* furnished with euphonic combinations involving semivowels प्रादुरासंस्ततो वेदाश्चत्वारः ... अन्तस्थसंधिसंस्थानाः VāyuP. ii. 42. 74.

अन्तस्थसर्गौघ (antastha-sargaugha) *m.* group of creations existing within each other (सर्गेषु) तेष्वप्यन्तस्थसर्गौघाः कदलीदलपीठवत् (सन्ति) YogVā.iv. 18. 17.

अन्तस्थसुरासुरगण (antastha-surāsuragaṇa) *m.* group of gods and demons remaining inside धरागोलकमन्तस्थसुरासुरगणास्पदम्। वेष्टयते धिष्ण्यचक्रेण पक्वाक्षोटमिव त्वचा YogVā. i. 26. 34.

अन्तस्थस्थानीय (antastha-sthānīya) *adj.* (Jain.) belonging to the lower or inferior caste (such as Caṇḍāla) किल्विषाः अन्तस्थस्थानीयाः TattvāBh. *on* 4. 4 (Ṭīkā चण्डालादयः)

अन्तस्था (anta-sthā) *f.* **1** that which is inside the womb, i.e. progeny or embryo **2** inner strength, internal force **3** intermediate, i.e. neutral position **4** semivowel **5** type of a metre **6** the word *antasthā* **1** that which is inside the womb, i.e. progeny or embryo प्रतिष्ठाय प्रजायते नो चान्तस्थायां जीयते य एवं वेद PañcBr. xii. 13. 21 (Sāy. अन्तर्मध्ये अवस्थितायां प्रजायाम्) (*but* MW. interium, meantime); यात्यन्तस्थान्तस्थायां जीयते JaimiBr. 1. 266; 1. 204; 2.105 [NānārthāSaṁ. ii. 48. 23]; **2** inner strength, internal force सा हैषान्तस्था प्राणानाम् ... अन्तस्था ह भवत्यन्तस्थामेनं मन्यन्ते यऽएवमेतामन्तस्थां प्राणानां वेद ŚatBr. I. iv. 3. 8; **3** intermediate, i.e. neutral position अथ ह कलयो गन्धर्वा अन्तस्थां चेरुर्नेतरान् नेतरानाद्रियमाणाः JaimiBr. 1. 154; **4** semivowel अन्तस्थासु तां तामनुनासिकाम् (मकार आपद्यते) ĀśvaŚS. I. i. 2. 17; अन्तस्थामन्तस्थास्वनुनासिकां परसस्थानाम् VājaPrāti. 4. 10; 4. 119; अन्तस्थाम् ṚTPrāti. 109 (comm. अन्तस्थामापद्यते। अस्वे ह्रस्वमेक इत्यधिकारः); चतस्रो यादयोऽन्तस्था नासिक्या अप्यरेफिकाः ŚaiśiŚi. 27; 45; 67; यद्यूष्मानुपधो युक्तः स चेदन्तस्थया पुनः। तस्यैव क्रमणं कार्यम् ŚaiśiŚi. 94; 261; 280; 338; प्रथमाश्च तथान्तस्था स्त्रीलिङ्गाः परिकीर्तिताः YājñaŚi. 92; 177; मन्त्राक्षराणि ... लिखेत् ...। चतुर्दलाग्रे ...। तदन्तरालेष्वन्तस्था बिन्दुना चान्तराननाः PāraS. 23. 56; 23. 63; व्यञ्जनात्पञ्चमान्तस्थायाः सरूपे वा SiddhaHe. i. 3. 47; ii. 3. 15; iv. 1. 60 [Vaija. 86. 36; NānārthāSaṁ. ii. 48. 23; ŚabdaRa. (Vā.) 2490]; **5** type of a metre अन्तस्था तु स्त्रियां प्रोक्ता ...। तथा छन्दोविचित्यां च द्व्यक्षरप्रभृतिष्वपि। षड्विंशतौ च छन्दस्सु चतुर्वृद्धेषु दृश्यते NānārthāSaṁ. ii. 48. 23; **6** the word *antasthā* अनुनासिकमुपधा प्रागन्तस्थायाः VājaPrāti. 3. 130; LaŚabdeŚe. i. 36. 9.

अन्तस्थाकाम (antasthā-kāma) *adj.* desirous of what is in the womb, i.e. progeny अन्तस्थाकाम एवैनेन यजेत यद् विनुत्तिरिति JaimiBr. 2. 105.

अन्तस्थाङ्गुष्ठयुग्मा (antasthāṅguṣṭhayugmā) *adj. (f.)* having the pair of thumbs bent or folded inside (the fist) अन्तस्थाङ्गुष्ठयुग्मा तु मुद्रा समयसंज्ञिता ĪśānŚiPa. i. 26. 31.

अन्तस्थाच्छन्दस् (antasthā-cchandas) *n.* name of a type of a metre, viz. Rāj (*lit.* existing within the Gāyatrī with twenty-two syllables) एतासामन्तरेष्वन्तस्थाच्छन्दांसि NidāSū. 8. 11 (1.5) (comm. एतासां गायत्रीणामन्तरेषु मध्यदेशेषु द्वाविंशत्य-क्षरादिष्वन्तस्था अन्तस्तिष्ठन्ति [इति] अन्तस्था राड्विराडित्यादयः)

अन्तस्थाञ्जनवत् (antasthāñjana-vat) *adv.* like the collyrium present inside क्वचिदङ्गचतुष्कस्य अन्तस्थाज(?ञ्ज)नवत्प्रभा। वर्तते PauṣkS. 33. 44.

अन्तस्थातस् (antasthā-tas) *adv.* after the semivowel अञ्वर्गस्यान्तस्थातः SinddhaHe. i.3. 33.

अन्तस्थातीन्द्रियत्वतस् (antasthātīndriyatva-tas) *adv.* due to the state of being internal and transcendental ननु देहासजातीयमन्तस्थातीन्द्रियत्वतः यद्यद्देहसजातीयं ज्योतिर्दृष्टं तदिन्द्रियैः BṛĀraUBhVā. iv. 3. 141.

अन्तस्थादि (antasthādi) *adj.* beginning with semivowels स्थूल° ... अन्तस्थादेर्गुणश्च नामिनः SiddhaHe. vii. 4. 42; अयमन्तस्थादिरिति उज्ज्वलदत्तो बभ्राम SiddhāKau. 397B. 17 (*on* vii. 1. 4)

अन्तस्थादित्यरश्मि (antasthāditya-raśmi) *m.* ray of the inner Sun निशि बाह्यादित्याभावेऽप्यन्तस्थादित्यरश्मीनां सर्वदा नाडीसंबन्धादिति भावः TattvPrakā. 211B. 11 (*on* iv. 2. 14)

अन्तस्थाद्य (antasthādya) *adj.* semivowel etc. हकारो यत्र पूर्वस्थ अन्तस्थाद्य (v.l. अन्तस्थाद्यः Viśva.) भवेत्परः। पदकाले वियुज्येत YājñaŚi. 177.

अन्तस्थाद्यक्षर (antasthādyakṣara) *n.* first letter of semivowels (i.e. *ya*) अन्तस्थाद्यक्षरं किम् ĪśvaŚ. 100 (comm. अन्तस्थानाम् आद्यक्षरम्)

अन्तस्थान (anta-sthāna) *n.* **1** last or final position (of sacrifice) अन्तस्थान एष भाग इति शौचिवृक्षिः NidāSū. 48. 12(3.4); **2** location inside (the village) (अन्तर्गतशवे ग्रामे ... अनध्यायः) अन्तःस्थितेऽन्तस्थानगते भूम्युपरिभागसंयुक्ते ग्रामे ManvaVi. 509. 27 (*on* 4. 108)

अन्तस्थान्तरोपलिङ्गिन् (antasthāntaropaliṅgin) *adj.* replacing the letter next to the penultimate शेव इति सुखनाम। शिष्यतेः। वकारो नामकरणः। अन्तस्थान्तरोपलिङ्गी Nir. 10. 17 (179. 6) (Durga अन्ते तिष्ठति धातोर्यो वर्णः सोऽन्तस्थः ... तस्यान्तरमवकाशस्थानमुपलिङ्गयति उपगच्छति यः सः)

अन्तस्थापर (antasthā-para) *adj.* followed by a semivowel अन्तस्थापरः च सवर्णमनुनासिकम् TaiPrāti. 5. 28; नान्तस्थापरमसवर्णम् TaiPrāti. 21. 7.

अन्तस्थापित (anta-sthāpita) *adj.* placed or kept inside विश्रुतम्। ... अन्तस्था[पि]तोपलात्। ... प्राचीमुत्तरावाहिन्यास्ताम्रपर्ण्या[:*] श्रीतं दिशम् EI. xvi. 314. 125.

अन्तस्थायिन् (anta-sthāyin) *adj.* A situated on the border मित्रामित्रसंघस्य वा योऽन्तस्थायी तं लभेत। अन्तस्थायिनि लब्धे मध्यस्थायिनो भिद्यन्ते ArthŚā. iii. 80. 8 (3. 6); B standing at the centre or middle परिकल्पितमण्डलबन्धः ... रासे ... अन्तस्थायी ... वनमाली ... जयति StavMā. 242. 28.

अन्तस्थारूप (antasthā-rūpa) *adj.* of the form of semivowel तस्यैतस्यात्मनः प्राण ऊष्मरूपमस्थीनि स्पर्शरूपं मज्जानः स्वररूपं मांसं लोहितमित्येतदन्य-

द्यतुर्थमन्तस्थारूपमिति ह स्माह ह्रस्वो माण्डूकेयः AitĀ. iii. 2. 1.

अन्तस्थित (anta-sthita) *adj.* **1Ai** placed or kept inside सूत्रमन्तस्थितं कृत्वा ... मध्यमापञ्चकं यावल्लाञ्छ्यमानं नयेत्ततः PauṣkS. 16. 15; **1Aii** present or existing in अन्तस्थितानेकसुरारिसंघम् ... भीमं बलं वलितचारुविचित्रयोधं विनिर्ययौ सिन्धुजलाद्विशालम् PadmP. v. 26. 66; **1B** (used as noun) (one) who inhabits therein सचन्द्रसूर्यग्रहसप्तलोकानन्तस्थितांस्तत्र ... पश्यति सा ... क्षितिः VarāP. 1. 17; **2A** remaining within तेषां कमलसंभूत कालाद्यमखिलं हि यत्। सर्वमन्तस्थितं भाति तत्प्रभाववशात् स्फुटम् PauṣkS. 27. 177; **2Bi** being the inner (ruler) or inner (controller) गवादिषु चान्तस्थितो भगवान् भाव्यः PāñcRāRa. 126. 16; (used as noun) inner ruler or controller अन्तस्थितस्य बाह्यानुरोधेन तथात्वम् AṇuBh. 38. 21 (*on* i. 1. 18); **3** present in the mind शब्दः स परमो द्विज। संकल्पपदवीरूढः स्फुरत्यन्तस्थितः स्फुटम् JayāS. 20. 236; PāraS. 15. 463; तृष्णातन्तुः ... सहजोऽन्तस्थितस्तस्य चिरादामूलमुद्धृतिः BṛKathāMañ. xviii. 1. 74; **4** being at the end (of a sentence) or the last वाक्यानि 'इह' इत्यन्तस्थितेन ... द्रव्यदीपकेन दीप्यन्ते SaraKaṇṭhā. 529. 7; **5** present in between or in the middle अन्तस्थितस्वरैस्तैश्च स्पर्शवामाक्षपल्लवैः। ... मन्त्रास्ते प्रभवन्ति हि ĪśānŚiPa. i. 17. 97.

अन्तस्थितबीज (antasthita-bīja) *n.* seed existing inside (the abdomen) भूमिष्ठजानुको मन्त्री हृदात्मसंमुखं क्षिपेत्। ततोऽन्तस्थितबीजस्य नाभिदेशे समूहनम् AgniP. 75. 12.

अन्तस्थिति (anta-sthiti) *f.* final stage (of life), i.e. death तारकान्तस्थितिस्पष्टदृष्टदृष्टतरौजसा। स शक्त्या दीप्रया हारलतयेवं श्रियं दधौ HarVi. 43. 54 (comm. मरणम्)

अन्तस्थीभाव (antasthī-bhāva) *m.* the becoming (of acute vowel) into a semivowel, semivowelization उदात्तस्यान्तस्थीभावे स्वरितं परमनुदात्तम् VājaPrāti. 4. 49 [Viśva. **अन्तःस्थीभाव**]

अन्तस्थीय (antasth-īya) *adj.* [GaṇPā. 74. 2] pertaining to what stands at the end अन्ते तिष्ठतीत्यन्तस्थः। अन्तस्थीयः GaṇRa. 5. 318 (357)

अन्तस्थोत्तर (antasthottara) *n.* internal ceiling दण्डान्तो द्विविधः ...। ज्वालासीमनि दीपधामनि तथान्तस्थोत्तरेऽन्तर्गते प्राकारेऽथ बहिष्ठितोत्तरबहिः साले महीयस्यपि TantrSa. 2. 77 (comm. प्राकारस्यान्तस्थितोत्तरे)

अन्तस्थोष्मरूप (antasthoṣma-rūpa) *adj.* of the nature of semivowel and aspirant मङ्गलबुधगुरुशुक्रशनैश्चराः कादिवर्गपञ्चकरूपाः चन्द्राहू अन्तस्थोष्मरूपौ SetuBa. 8. 30.

अन्तस्पथ (ántas-patha) *adj.* travelling through the inner way अन्तस्पथा अनुपथाः। एतेभिर्मह्यं नामभिर्यज्ञं विष्टार ओहते RV. v. 52. 10 (Sāy. दरीसुषिरादिमार्गाः ... ये मरुतः); रजसस्पात्यन्तस्पथाः कस्काव्या चतुरस्कर। स्वादुष्किल निदस्पातु द्यौष्पितर्वसतिष्कृता RPrāti. 4. 23.

अन्तस्पाद (antas-pāda) *adj.* having the distance in between उपरवान् विमिमीते प्रादेशमुखान् प्रादेशान्तस्पादान्। अथोन्नेतारमाह ... इमानुपरवान् खन प्रादेशमुखान्प्रादेशान्तस्पादान् BaudhŚS. i. 187. 15.

अन्तस्फुरज्ज्योतिस् (antasphuraj-jyotis) *adj.* possessing light (of wisdom) manifasting within रागद्वेषमदादिदोषविरहादन्तस्फुरज्ज्योतिषाम्। तेषामेव शिरोमणिर्विजयते विश्वाभिधानो मुनिः CaturCin. ii (1). 1. 4.

अन्तस्मित (anta-smita) *adj.* smiling inwardly किंचिदन्तस्मितश्चिन्तितवान् (अहम्) TilaMañ. 380. 4.

अन्तस्वगुच्छक (antasvaguccha-ka) *adj.* **A** having one's own body (shining) like a cluster of blossoms in the midst चकारासनमम्लानैः पत्रैरन्तस्वगुच्छकम्। मृदुमेघविधिर्वृन्दमम्भोदमिव तत्र सः YogVā. v. 52. 3 (comm. अन्ते मध्ये स्वं शरीरं गुच्छमिव यस्मिन् भासते तथाविधम्); **Bi** having a cluster of blossoms (arranged) on the edges, YogVā. v. 52. 3 (comm. अन्तेषु स्वानि तत्तत्पत्रसंबद्धानि पुष्पगुच्छानि वा यस्मिन् तथाविधमासनम्); **Bii** (clouds) having a cluster of blossoms (of lightnings) extended at the borders, YogVā. v. 52. 3 (comm. मेघविधिरिन्द्रोऽम्भोदं मेघवृन्दं कदम्बितमिव। तत्पक्षे अन्तेषु प्रसृतानि स्वगुच्छानीव विद्युतो यस्मिन्)

अन्तस्वर (anta-svara) *adj.* having the accent of the last vowel व्यञ्जनं पूर्वस्यान्तस्वरम् RTPrāti. 20 (comm. व्यञ्जनं खलु पूर्वस्य स्वरस्यान्तस्वरं भवति)

अन्तस्वरषट्क (anta-svaraṣaṭka) *n.* group of six vowels which are at the end युगमान्तैरादिभिः षड्भिराद्यन्तस्वरषट्कयोः। अङ्गक्लृप्तिः समुद्दिष्टा AhirbuS. 18.7; युग्मिः स्वरैः सबिन्द्वन्तैराद्यन्तस्वरषट्कयोः। ... अङ्गक्लृप्तिः LakṣmīT. 24.22.

अन्तस्वरित (anta-svarita) *adj.* having circumflex accent on the last vowel बिल्वभक्ष्यवीर्याणि छन्दसि। अन्तस्वरितानि PhiṭSū. 627B. 16 (*on* 4. 77); चत्वारो भेदाः भवन्ति। तद्यथा - आदिस्वरितमध्यस्वरितान्तस्वरितसर्वस्वरितानि पदानि भवन्ति ... अन्तस्वरितं यथा वैष्णव्यौ Uvaṭa *on* VājaPrāti. 2. 1; पदं ण्यति सति अन्तस्वरितम् Pradī. iii. 145B. 8 (*on* iii. 1. 109); ब्राह्मणकर्तव्यमिति ... कृदुत्तरपदप्रकृतिस्वरेणान्तस्वरितमेतत् PadMañ. *on* KāśiVṛ. *on* P. ii. 2. 11 (112. 24); गतिकारकोपपदात् कृत् इति प्रकृतिस्वरकृत्स्वरेणान्तस्वरितमुत्तरपदं स्यात् Prasā. i. 504. 10; i. 836. 16; भोज्येति ण्यदन्तोऽन्तस्वरितः Prasā. ii. 758. 18; ii. 765. 4; आर्यो ण्यदन्तत्वादन्तस्वरितः SiddhāKau. 640B.16 (*on* vi. 2. 58)

अन्तस्वरितत्व (antasvarita-tva) *n.* the state of having circumflex accent on the last vowel तित्य°...°राजन्यमनुष्याणामन्त इत्यन्तस्वरितत्वम् Nyās. i. 171. 4 (*on* i. 2. 31); कृदुत्तरपदप्रकृतिस्वरेण 'यतोऽनाव' इति ... अन्तस्वरितत्वं चेष्यते Pradī. vi. 59. 15 (*on* vii. 1. 66); ण्यति तु 'गतिकारकोपपदात् कृत्' इति अन्तस्वरितत्वं स्यात् PadMañ. *on* KāśiVṛ. *on* P. iii. 1. 109 (504. 21); Prasā. ii. 475. 18; तित्त्वात् 'तित्स्वरितम्' इति अन्तस्वरितत्वम् Prasā. ii. 488. 14.

अन्तस्वरितपाठ (antasvarita-pāṭha) *m.* mention of circumflex accent on the last vowel (निपातनादेतत्सिद्धम्।) निपातनादिति। अन्तस्वरितपाठाद्य यदन्तत्वं विज्ञास्यते Pradī. iv. 245A. 18 (*on* v. 1. 3)

अन्तस्वरितासंगति (antasvaritāsaṅgati) *f.* inappropriateness or untenability of the circumflex accent on the last vowel श्रुतौ तु कप्रत्ययान्तं ङस्स्थानिकस्वन्तं तु न, अन्तस्वरितसंगतेरिति दिक् LaŚabdeŚe. ii. 174. 9.

अन्तस्वरूपा (anta-svarūpā) *adj.* (*f.*) of the nature of, i.e. identical with the last vowel स्वरे चान्तस्वरूपां च सर्वगां ब्रह्मलक्षणाम्। ततस्तु भागपद्मस्थां मन्त्रमूर्तिज्वलप्रभाम्। संस्मरेत् कर्णिकोर्ध्वे PauṣkS. 7. 166.

अन्तस्वरोपलक्षणार्थम् (antasvaropalakṣaṇārtham) *adv.* for the sake of indicating the last vowel अकारश्चास्य नाम्नोऽन्ते वाच्यः ... नाम्नस्सर्वत्राकारान्तत्वनियमाभावात् SmṛtiCan. i. 98. 4.

अन्तःसंयम (antas-saṁyama) *m.* inner or mental restraint (दानमेकं कलौ युगे) दाने तु न शरीरक्लेशो नान्तःसंयमो न चातीव विद्वत्तोपयुज्यते ManuBh. i. 42. 16 (*on* 1. 86)

अन्तःसंयमन (antas-saṁyamana) *n.* inner or mental restraint अतिचपलानामिन्द्रियाश्वानामन्तःसंयमनरज्जुभिरिवातताभिः कण्ठनाडीभिर्निरन्तरसंबद्धकंधरम् ... जाबालिमपश्यम् Kād. 42. 12.

अन्तःसंरम्भयोग (antassaṁrambha-yoga) *m.* association with internal vibration (of knowledge or consciousness) तत्र च जानामि - इत्यन्तःसंरम्भयोगोऽपि भाति PratyabhiVi. i. 73. 1 (*on* i. 1. 4) (*but* Bhāsk. तत्र च सति जानामीत्यन्तः ... संरम्भयोगोऽपि भाति)

अन्तःसंलीनता (antassaṁlīna-tā) *f.* the state of being merged within योगो ध्यानं समाधिश्च ...। अन्तःसंलीनता चेति तत्पर्याया स्मृता बुधैः MahāP. 21. 12.

अन्तःसंलीना (antas-saṁlīnā) *adj.* (*f.*) clung or stuck to, i.e. deep-rooted in the mind अभजत्क्रोधं तेषां कुसुहृदुक्तिभिः। सा वासनान्तःसंलीना सदाचारानपेक्षिणाम् RājTa. (Ka.) 8. 262.

अन्तःसंवर्धित (antas-saṁvardhita) *adj.* **A** brought up inside (the palace) नरवाहनदत्तचरितमिवान्तःसंवर्धितप्रियदर्शनराजदारिकागन्धर्वदत्तोत्कण्ठम् ... राजकुलं विवेश Kād. 91. 1; **B** cherished in the heart, Kād. 91.1.

अन्तःसंविन्मय (antassaṁvin-maya) *adj.* consisting of the inner consciousness सर्व एवायं वाग्रूपः परामर्शः क्रमिक एव, अन्तःसंवित्म(?न्म)यस्त्वक्रम एव ParāTri. 167. 2.

अन्तःसंवृति (antas-saṁvṛti) *f.* internal periodic concealment अह्नि रविर्दहति शुचिर्वृद्धः पुष्पधनुर्दहति प्रबलोढम्। रात्रिदिनं पुनरन्तरमन्तःसंवृतिरस्ति रवेर्न तु कन्तोः SubhāRaSaṁ. 584.

अन्तःसंशय (antas-saṁśaya) *m.* internal or inner doubt ज्ञातृधर्मनिमित्तकोऽन्तःसंशयो ज्ञेयधर्मनिमित्तको बहिरिति विभागः Kiraṇā. 261. 19.

अन्तःसंश्रय (antas-saṁśraya) *adj.* abiding or residing in the inner circle मध्ये महाद्युतिर्ब्रह्मा ... ईशदिग्गतौ। इत्यन्तःसंश्रया देवाः प्रोक्ताः SamarāSū. 11. 6.

अन्तःसंसदम् (antassaṁsadam) *adv.* inside the assembly अन्तःसंसदमागत्य धर्मलाभं नृपं ददौ PrabhāC. 116. 34.

अन्तःसंस्काररूपता (antassaṁskārarūpa-tā) *f.* the state of having the form of internal impression शान्तरसे गतिर्वक्तव्या। ... अन्तःसंस्काररूपता येषां वणिक्प्रभृतीनामस्ति ... तेषाम् ... गतिमाह AbhinBhā. ii. 148. 17 (*on* 12.74)

अन्तःसंस्थ (antas-saṁstha) *adj.* existing in the mind जल्पत्यङ्गैः सप्तभिः शोभमाना साम्राज्यश्रीस्तावकीनं विवेकम्। अन्तःसंस्थम् NemiNir. 11. 45.

अन्तःसंस्थित (antas-saṁsthita) *adj.* **A** being or existing within तवान्तःसंस्थितं सर्वं सर्वस्यान्तर्भवान् स्थितः JayāS. 2. 21; **B** being or present in the mind शुद्धे च तासां मनसि शुद्धेऽन्तःसंस्थिते हरौ। शुद्धज्ञानं प्रपश्यन्ति ViṣṇuP. i. 6. 13; उपासीत महेश्वरम्। तथान्तःसंस्थितं देवम् LiṅgaP. i. 88. 79.

अन्तःसंस्थिति (antas-saṁsthiti) *f.* presence or existence within धातूनां शुक्लधात्वन्तं स्मृत्वान्तः सं(?ऽन्तःसं)स्थितिं क्रमात्। स्मृत्वा हृदयपद्मे तु सोमसूर्याग्निमण्डलान् ... कुर्यात् सम्यङ्निवेशनम् PāraS. 15. 496.

अन्तःसकोप (antas-sakopa) *adj.* angry in the mind देवी सोत्रासमेवं धृतमहिषतनुं दृप्तमन्तःसकोपं देवारिं पातु युष्मानतिपरुषपदा निघ्नति भद्रकाली CaṇḍīŚ. 76.

अन्तःसंकल्प (antas-saṅkalpa) *m.* **A** mental thought or imagination अन्तःसंकल्परचितरतसमागमसुखरसनिमीलितलोचने समुन्मीलय लोचनयुगलम् Kād. 85. 11; (भगवान्) मुनिकुमारयुगलम् ... अन्तःसंकल्पकृशानुकृतप्रबोधेनावधिबोधप्रदीपेन प्रत्यवमृश्य तत्रैव पुरे तदर्थमादिक्षत् YaśasCam. i. 136. 2; **B** inner or mental resolve अन्तःसंकल्पो वर्ण्यते मध्यमा वाक् NyāyMañ. i. 355. 19; ii. 60. 30.

अन्तःसंकल्पमूलात्मन् (antassaṅkalpamūlātman) *adj.* of the nature of the cause of the mental resolve or determination अन्यथानागतोत्पाद्यभावप्रेरणवारिका। अन्तःसंकल्पमूलात्मा वृत्तिर्विधिनिषेधयोः ŚlokaVār. 7. 317 (935. 3) (NyāyRa. सत्त्वे न वायुदकादिवद्वृत्तिः किंत्वन्तःसंकल्पमूलात्मा); मया प्रवर्तितव्यमित्यन्तःसंकल्पमूलात्मा लिङ्प्रवृत्तिविशेष उन्नीयते Kāśi. ii. 14. 26 (*on* 5 (1). 15)

अन्तःसंकल्परूप (antassaṅkalpa-rūpa) *n.* [Inst.] in the form of mental resolve न च तदानीमन्तःसंकल्परूपेणापि शब्दोल्लेखः NyāyMañ. i. 85. 14.

अन्तःसंकल्पात्मन् (antassaṅkalpātman) *adj.* of the nature of mental resolve मया प्रवर्तितव्यम् इत्यन्तः सं(?ऽन्तःसं)कल्पात्मा लिङ्वृत्तिविशेष उन्नीयते YuktiSneha. 47. 38 (*on* i. 1. 5)

अन्तःसंकुचिताकारता (antassaṅkucitākāra-tā) *f.* the state of having the shape contracted in the middle स्तनयोरन्तः सं(?ऽन्तःसं)कुचिताकारतया तदुत्सेधयोस्तेषां (जलबिन्दूनाम्) पतनं न स्यात् CitraMī. 1. 19.

अन्तःसंक्रान्त (antas-saṅkrānta) *adj.* **A** expanding inwards नैतत् ... अन्तःसंक्रान्तसीमकुचकोरकचक्रमस्याः। संकेतिताङ्गनवयौवननाटकस्य कश्मीरजच्छुरितनूतनकांस्यतालम् SubhāRaK. 15. 7; **B** entered inside अन्तर्वत्नी विशां पत्युः पत्नी भृशमधारयत्। अन्तःसंक्रान्तशीतांशुपीयूषसरसीश्रियम् PāṇḍaC. 2. 21.

अन्तःसङ्ग (antas-saṅga) *m.* **A** internal attachment or association अन्तःसङ्गं बहिःसङ्गमात्मसङ्गं च यस्त्यजेत्। सर्वसङ्गनिवृत्तात्मा स मामेति न संशयः VarāU. 2. 36; YogVā. v. 67. 19-20; **B** entrance inside, cf. **अन्तःसङ्गविहीन B**.

अन्तःसङ्गपरित्यागिन् (antassaṅga-parityāgin) *adj.* who has abandoned internal attachment or association अन्तःसङ्गपरित्यागी लोके विहर नारद NāraPaU. 6.37; लोके विहर शुद्धधीः। ... अन्तःसङ्गपरित्यागी बहिःसंभारवानिव MahāU. 6.70.

अन्तःसङ्गविहीन (antassaṅga-vihīna) *adj.* **A** devoid of internal attachment or association अन्तःसङ्गविहीनास्तु यथा स्नेहा दृषञ्जले। तथासक्तमनोवृत्तौ बाह्यभोगानुभूतयः YogVā. v. 67. 18; **B** devoid of entrance inside, YogVā. v. 67. 18 (comm. अन्तःसङ्गः ... अन्तरनुप्रवेशः)

अन्तःसंचरण (antas-sañcaraṇa) *n.* act of moving inside the body अन्तःसंचरणक्रियालक्षणत्वेनोपन्यस्तं जननं प्रसिद्धतरं जीवगतमेव ग्राह्यम् ŚivārkaMaDī. i. 405. 24 (*on* i. 3. 5)

अन्तःसंजल्प (antas-sañjalpa) *adj.* having inner expression, i.e. signification 'गौरयम्' इत्यत्र बहिरर्थः प्रतीयतेऽन्तःसंजल्पश्च शब्दः TātpaṬ. (U.) 172. 21 (*on* 4. 215)

अन्तःसंजल्प (antas-sañjalpa) *m.* internal expression, i.e. sound पश्यन्ती ...। सैव हृत्पङ्कजं प्राप्य मध्यमा नादरूपिणी। अन्तःसंजल्पमात्रा स्यादविभक्तोर्ध्वगामिनी ĪśānŚiPa. i. 1. 36; ii. 1. 117.

अन्तःसंजल्परूप (antassañjalpa-rūpa) *n.* [Inst.] in the form of being that which has internal expression, i.e. signification श्रुतावगतवाक्यार्थस्य सृजति संहरति शास्ति स्तूयते इति शब्दानामन्तःसंजल्परूपेण सूक्ष्मतया सूक्ष्मत्वम् SaraKaṇṭhā. 64. 5.

अन्तःसंजल्परूपत्व (antassañjalparūpa-tva) *n.* the state of being that which has the form of internal expression, i.e. signification अन्तःसंजल्परूपत्वं शब्दानां सौक्ष्म्यमुच्यते SaraKaṇṭhā. 63. 27; PratāYaBhū. 331. 15 (comm. समीचीनो जल्पः संजल्पः विवक्षितार्थः सोऽन्तःकृतो गर्भितो यत्र)

अन्तःसंजल्परूपा (antassañjalpa-rūpā) *adj.* (*f.*) of the form of internal expression, i.e. sound (स्मितापहासिनी ... सिद्धिर्ह्रीयाथ वाङ्मयी) प्रोत्साहनं वचसा वा ...। वचनं सप्तधा। तद्यथा मध्यमारूप°...°वैखरीस्वभावम्। ... स्मितं ह्यन्तःसंजल्परूपा(?पां) मध्यमां सूचयति AbhinBhā. iii. 307. 17 (*on* 27.4)

अन्तःसंजल्पविवक्षा (antassañjalpa-vivakṣā) *f.* [Inst.] with the intention of having inner expression, i.e. signification अन्तःसंजल्पविवक्षया च भेदेनाभेदेन वा धर्माभ्यां धर्मिणि उपादानम्, न तु स्वार्थानुमाने शब्दप्रयोगोऽस्तीत्युक्तम् TātpaṬ. (U.) 311. 19 (*on* 5 (4). 26)

अन्तःसंज्ञ (antas-sañjña) *adj.* [*f.*-ā] having consciousness within, i.e. internally conscious तयोः ... अन्तःसंज्ञानां चलनपतनसर्पणानामायत्तं जीवनम् GautDS. i. 8. 2 (comm. अन्तःसंज्ञा वृक्षादयः); अन्तःसंज्ञा भवन्त्येते (वृक्षादयः) सुखदुःखसमन्विताः ManuSm. 1. 49 (ManvaMu. वृक्षादयः ... अन्तश्चैतन्याः); वृक्षगुल्मलतावल्यस्त्वक्सारतृणजातयः। अन्तःसंज्ञा भवन्त्येता घोरेण तमसावृताः ViṣṇuDhaP. i. 128. 22; अन्तःसंज्ञानां मोक्षमाणानां च काम्येषु कर्मस्वधिकारं निषेधति Bhām. 230. 17 (*on* i. 3. 25); पुरुषः सुषुप्तोऽन्तःसंज्ञ इत्युच्यते TattvVai. 16. 12 (*on* 1. 10); अन्तःसंज्ञानां स्थावराणाम् ... कर्मण्यनधिकारः VedāntKa. 166. 14 (*on* i. 3. 25); वृक्षादीनामन्तःसंज्ञानामपि भोक्तृभोगायतनत्वं शरीरत्वं मन्तव्यम् SāṁkhyaPraBh. 145. 9 (*on* 5. 121)

अन्तःसंज्ञा (antas-sañjñā) *f.* inner consciousness or intellect उभयेन भज्यत इति भक्तिः यथा वाहीकस्य मन्दामन्तःसंज्ञामुपादाय वाहीको गौरिति NyāyVār. 245. 11 (*on* ii. 1. 34)

अन्तःसत् (antas-sat) *adj.* internally good, i.e. noble by disposition अयुध्यमानान् ... अन्तःसतः साध्वसिनोऽतिवृद्धात्। तव घ्नतो मांसभुजोऽपि भानोः कुलावलेपी भविता कलङ्कः RāmC. App. (2) 38. 50.

अन्तःसत्त्व (antas-sattva) *n.* **A** inner soul or consciousness **धीरोदात्तः** ... महासत्त्वः शोकक्रोधाद्यनभिभूतान्तःसत्त्वः Avalo. 37. 11 (*on* 2. 4); **B** inner substance हे माणिक्य तवैतदेव कुशलं यद्वानरेणाग्रहादन्तःसत्त्वनिरूहणाय सहसा चूर्णीकृतं नाश्मना ŚārṅgaPa. 1106; **C** existence within **गुञ्जापुञ्जादौ दहनादिसमारोपे** तस्यान्तःसत्त्वे देहदाहादिप्रसङ्गः NyāySu. (Ja.) 54B. 11 (*on* i. 1. 1)

अन्तःसत्त्व (antas-sattva) *adj.* having the quality of goodness within अन्तःसत्त्वस्तमोबाह्यस्त्रिजगल्लयकृद्धरः ŚivaP. ii (1). 9. 60 (48B. 15)

अन्तःसत्त्वा (antas-sattvā) *f.* **1** carrying embryo within, pregnant woman, Śabdakalpadruma, Vācaspatya; **2** marking-nut-plant (*bhallātaka*), Śabdakalpadruma [*Semecarpus Anacardium*, pw.; **MW**.]

अन्तःसद् (antas-sad) *adj.* **1** dwelling inside अस्य नाभीसरसिजे जायतेऽन्तःसदामिव। भिन्नः स्वनैर्मधुलिहां ब्रह्मणोऽध्ययनध्वनिः RāmC. 9. 23; **2** present in the assembly, RāmC. 9. 23.

अन्तःसदन (antas-sadana) *n.* inner apartment, harem (**अणहिल्लपाटकम्** ... **पुरम्**) स्त्रैणैर्यदन्तःसदनानि भान्ति बहिर्नदीनां पुलिनानि वातैः VasaViKā. 2. 36.

अन्तःसदर्पविकसत्कुमुद (antassadarpavikasat-kumuda) *adj.* **1** having white water-lily blossomed proudly inside अन्तःसदर्पविकसत्कुमुदैस्तदानीमुत्केसरैः परिवृतं हरिवीरपद्मैः ... अशोभत सिन्धुकूलम् RāmC. 25. 48; **2** having exciting joy expanding proudly in the heart, RāmC. 25.48.

अन्तःसदस् (antassadas) *adv.* inside the assembly or hall चतुरो दुन्दुभीनध्वर्युः सहननानुपकल्पयति ... अपरस्यै द्वार्या अभितो द्वारबाहू अन्तःसदः संधौ सहननावासञ्जयति ŚāṅkhāŚS. xvii. 4. 3.

अन्तःसदस् (antas-sadas) *n.* inner hall or assembly एवं धिष्ण्यान्निवपति षडन्तःसदसः MānŚS. 68. 19; [Loc.] in the hall or assembly अन्तःसदस्यासीनेभ्यः ऋत्विग्भ्यो दद्यात् ĀpaŚS. xiii. 6. 15; मुनिगणनृपवर्यसंकुलेऽन्तःसदसि BhāgP. i. 9. 41.

अन्तःसदस (antas-sadasá) *n.* [Abl.] from inside the hall ये बाह्या दृशीकवः स्युस्ते वि ब्रूयुर्यदि तत्र न विन्देयुरन्तस्सदसादव्युच्यम् TaiS. VII. iii. 1. 3; ĀpaŚS. xxi. 9. 4; HirŚS. xvi. 4. 5 (367. 18)

अन्तःसदसम् (antassadasám) *adv.* inside the hall येऽन्तःसदसं तैर्मध्यतः अग्निं प्रणयन्ति KauṣīBr. 9. 1 (41. 3); पुरुषो वै यज्ञः। तस्य ... या इमा अन्तर्देवतास्तेऽन्तःसदसं धिष्ण्याः KauṣīBr. 17. 7 (77. 7); (देवान्) तान् दक्षिणतोऽसुररक्षसान्यासेजुः तेषामेतान्धिष्ण्यानुद्यापयां चक्रुर्य एतेऽन्तःसदसम् ŚatBr. III. vi. 1. 27; यदाज्यान्यन्तस्सदसं स्तुवन्ति तस्माद् ग्राम्याः पशवोऽन्तर् ग्रामे न्योकसः JaimiBr. 1. 106; अङ्गिरसां षड्विंशत्यक्षरणिधनेनान्तस्सदसं स्तुवते JaimiBr. 2. 402; या इमा देवतास्तेऽन्तःसदसं धिष्ण्याः GopBr. ii. 5. 4 (229. 11); अथान्तःसदसं धिष्णियान्निवपति BaudhŚS. i. 193. 7; अन्तःसदसमितरान् (धिष्णियान्) HirŚS. vii. 7. 29 (724. 17); होत्रकाः श्रोत्रं वो ददामि तदनेन निष्क्रीणामीति होत्रकेभ्योऽन्तःसदसं यथाधिष्णि-यमासीनेभ्यः HirŚS. x. 4. 57 (1084. 15); x. 4. 62 (1085. 15); ततो विवेश बीभत्सुर्गिरान्तःसदसं गुरोः PāṇḍaC. 3. 387; (जरासन्धदूतः) सोऽन्तःसदसमद्राक्षीत् समुप्रविजयं नृपम् PāṇḍaC. 10. 9.

अन्तःसद्मन् (antas-sadman) *n.* inner chamber अन्तःसद्मसु कामिनां प्रियतमाक्रीडानुषक्तात्मनां दीपानेकविचित्ररत्ननिचयप्रोद्यत्प्रथेषु स्फुटम्। भेदम् ... शंसन्ति मन्दानिलाः ĀnandRa. 3. 29.

अन्तःसंतप्यमान (antas-santapyamāna) *adj.* who is being agitated in the mind चिन्तयन्तोऽन्तःसंतप्यमानस्य (मे) प्रयान्ति रजन्यः Kād. 63. 13.

अन्तःसंताप (antas-santāpa) *m.* **A** inner or mental pain मन्ये चास्य महिमानमालोक्य संजातमत्सरा वडवानलच्छलेनान्तःसंतापमुद्वहन्तो भुवः प्रान्तेषु प्रतिवसन्ति जलधयः TilaMañ. 206. 7; इयं सा ते मूर्तिः सकलसुरसंसेव्यसलिला ममान्तःसंतापं त्रिविधमपि पापं च हरताम् GangāL. 5; **B** internal heat अरातीनामभून्मुखं। अंतस्संतापसप्तार्चिर्धूमेनेव मलीमसम् EI. vi. 151. 83.

अन्तःसंतापवश (antassantāpa-vaśa) *m.* [Inst.] on account of inner agony अन्तःसंतापवं(?व)शेन (आक्रान्तो दुःखशैलेन महता कैकयीसुतः) Rāma. ii. 1931* (2)

अन्तःसंतापसंतति (antassantāpa-santati) *f.* series of inner pains अनङ्गमङ्गलभुवस्तदपाङ्गस्य भङ्गयः। जनयन्ति मुहुर्यूनामन्तःसंतापसंततिम् SāhiDa. 453. 8.

अन्तःसंतोषबाष्प (antassantoṣa-bāṣpa) *m.* tear of inner joy अन्तसंतोषबाष्पैः स्थगयति न दृशः ... उरगपतिः NaiṣC. 12. 39; SūktiMu. 97. 24.

अन्तःसंत्यक्तसर्वाश (antassantyakta-sarvāśa) *adj.* who has aban-doned all the desires within अन्तःसंत्यक्तसर्वाशो वीतरागो विवासनः। बहिःसर्व-समाचारो लोके विहर विज्वरः MahāU. 6. 67.

अन्तःसंदंश (antas-sandaṁśa) *m.* act of pressing or sucking the inside तत्र कर्माष्टविधम् ...। निमितम् ... बहिःसंदंशोऽन्तःसंदंशः ... संगर इति KāmSū. 167.22 (2.9); तस्मिन्नेवाभ्यर्थनया किंचिदधिकं प्रवेशयेत्। सापि चाग्रमोष्ठाभ्यां निष्पीड्य निष्ठीवेत् इत्यन्तःसंदंशः KāmSū. 169. 11 (2.9); अन्तःसंदंशो निष्कोशितस्य संदंशनात् JayaMa. 169. 15 (*on* 2. 9)

अन्तःसंदंशक (antassandaṁśa-ka) *n.* act of pressing or sucking the inside ओष्ठाभ्यां तद्य निष्पीड्य निष्ठीवनकमाचरेत्। अन्तस्संदंशनादेतदन्तःस्संदंशकम् ... भवेत् RatiPra. 6. 31.

अन्तःसंधानीय (antas-sandhānīya) *adj.* to be applied from inside बहिर्निर्वापणैरन्तःसंधानीयैरुपाचरेत् AṣṭāSaṁ. ii. 303. 15 (6. 32)

अन्तःसंधिमार्ग (antassandhi-mārga) *adj.* (faults) existing in the inner (and) physical canal वयोबलशरीरादिभेदा हि बहवो मताः। तथान्तःसंधिमार्गाणां दोषाणां गूढचारिणाम् CaraS. vi. 30. 321 (1941 Ed.)

अन्तःसंन्यासा (antas-sannyāsā) *adj. (f.)* renunciating (the world) from within भूमिप्रोदितमात्रोऽन्तरमृताङ्कुरिकेव सा। एषा हि परिमृष्टान्तःसंन्यासा प्रसवैकभूः। द्वितीयां च तृतीयां च भूमिकां प्राप्नुयात्ततः AkṣU. 28.

अन्तःसपत्न (antas-sapatna) *m.* adversary or enemy within, internal enemy अन्तःसपत्नः कोपोऽयं तदेवं विदितं मम। तस्यावलेपप्रसरं कः पुमान्मर्षयिष्यति JātaMā. 127. 5 (21. 33)

अन्तःसभम् (antassabham) *adv.* inside the assembly or court अन्तःसभं नृत्यति माधवस्य सेयं लता नैव तरुप्रकाण्डे AlaṅkāMañ. 54. 6 (14)

अन्तःसभय (antas-sabhaya) *adj.* having fright inwards, inwardly frightened विज्ञप्तिमन्तःसभयः स भैम्या मध्येसभं वासवसंभलीयाम्। संभालयामास NaiṣC. 6. 76.

अन्तःसभा (antas-sabhā) *f.* [Loc.] inside the assembly or court महासुरः ... सः ...। अन्तःसभायां न ददर्श तत्पदम् BhāgP. vii. 8. 17.

अन्तःसभास्थिता (antassabhā-sthitā) *adj. (f.)* present inside the assembly or court नृपात्मजा ... अन्तःसभास्थिता कस्मिन्नर्पयामास न स्रजम् ŚivaP. ii (1). 3. 48 (40A. 9)

अन्तःसमवसरणम् (antassamavasaraṇam) *adv.* inside the Samava-saraṇa-assembly चैत्यद्रुर्विचक्रे व्यन्तरामरैः। अन्तःसमवसरणं पोतान्तरिव कूपकः TriṣaŚaPuC. i. 6. 124; कामदेवः श्रेष्ठी ...। श्लाघितश्च भगवतान्तःसमवसरणम् ViviTīKa. 66. 5.

अन्तःसमाधान (antas-samādhāna) *n.* inclusion within न च ... आकाशैकदेशे द्यावापृथिव्यादीनामन्तःसमाधानमुपपद्यते BrahmSūBh. (Śaṅ.) 167.3 (*on* i. 3. 14)

अन्तःसमाधिस्वाधीन (antassamādhi-svādhīna) *adj.* fully engrossed, i.e. absorbed in the meditation on the self ततो राजा ... मुनिपुङ्गवमेकाकिनमन्तः-समाधिस्वाधीनमन्तःप्रयोगम् ... विलोक्य चिन्तयति स्म KumāPraPra. 55. 10.

अन्तःसमारूढ (antas-samārūḍha) *adj.* arisen within यदिमाम् ... अस्याकृतिमन्तःसमारूढप्रीतिरसनिस्यन्दविस्तारितेन ... लोचनयुगलेन नानिवारिताः पश्यामः Kād. 82. 20.

अन्तःसमारोपित (antas-samāropita) *adj.* placed or established in the mind अन्तःसमारोपितपावकानां भासा लसन्त्येव विलासमानाः। ज्योतिर्विचिन्वन्ति मुमुक्षवोऽमी Surath. 13. 40.

अन्तःसमीहित (antas-samīhita) *n.* desire in the mind सौधर्मेन्द्रस्ततोऽबोधि गुरोरन्तःसमीहितम्। प्रयुक्तावधिरीशस्य बोधिर्जातेति तत्क्षणम् MahāP. 17. 46.

अन्तःसमुत्थकलि (antassamuttha-kali) *m.* strife or discord arising internally पृथ्व्याः स वै गुरुभरं क्षपयन्कुरूणामन्तःसमुत्थकलिना युधि ...। दृष्ट्या विधूय ... समगात्स्वधाम BhāgP. ix. 24. 67.

अन्तःसमुत्थित (antas-samutthita) *adj.* arisen in the mind उवाच त्रिशिरा दुःखं नियम्यान्तःसमुत्थितम् RāmāMañ. 360. 4; अन्तःसमुत्थिते क्षोभे बाह्यमण्ड-पवर्तिभिः। टिक्ककाद्यैः कृता लुण्ठिः RājTa. (Ka.) 8. 1319; अन्तःसमुत्थविरहानलती-व्रतापसंतापिताङ्ग करिपुङ्गव मुञ्च शोकम् Subhāṣi. 626.

अन्तःसमुद्भव (antas-samudbhava) *adj.* arising or originating inside the body क्रिमयः ... सप्तविधो भवेद्बाह्यः षड्विधोऽन्तःसमुद्भवः HārīS. iii. 5.2.

अन्तःसमुद्र (antas-samudra) *m.* inside or interior of the ocean अन्तःसमुद्रेऽनुपचन्स्वधातून् प्रसीदतां नः सः महाविभूतिः BhāgP. viii. 5. 35; रेवतः ...। सोऽन्तःसमुद्रे नगरीं विनिर्माय कुशस्थलीम् आस्थितोऽभुङ्क्त विषयान् BhāgP. ix. 3. 28; तच्छब्देन विष्णुरिति कुत इति चेत्। यमन्तःसमुद्रे स्थितम् जानन्ति TattvPrakā. 7A. 3 (*on* i. 1. 1)

अन्तःसमुद्रग (antassamudra-ga) *adj.* going into, i.e. present inside the ocean अन्तःसमुद्रगं विश्वप्रसूतेः कारणं तु यत् AnuVyā. 4B. 5 (*on* i. 1. 2); समुद्रस्यान्तरन्तःसमुद्रं तद् गच्छतीत्यन्तःसमुद्रगम् NyāySu. (Ja.) 96A. 5 (*on* i. 1.2)

अन्तःसमुद्रगत्व (antassamudraga-tva) *n.* the state of being present inside the ocean अन्तःसमुद्रगत्वादिना यत् सूक्ताद्युक्तं तत् ... लक्ष्यते NyāySu. (Ja.) 96A. 7 (*on* i. 1. 2)

अन्तःसमुद्रम् (antassamudram) *adv.* inside the ocean राजाप्यर्णवमासाद्य यथोक्तं परिलक्ष्य च। विवेशान्तःसमुद्रं च नगरीमाससाद ताम् SkandP. iv. 82. 68; अन्तःसमुद्रमाविश्य संनिवेशमकुर्वत PadmP. v. 22. 5; गच्छन्नन्तःसमुद्रं च ... प्रेयसीमिति सप्रेम व्याजहार युधिष्ठिरः PāṇḍaC. 17. 177; समुद्रस्यान्तरन्तःसमुद्रं तद् गच्छतीत्यन्तःसमुद्रगम् NyāySu. (Ja.) 96A. 5 (*on* i. 1. 2)

अन्तःसंपुट (antas-sampuṭa) *adj.* (palms) with cavity inside प्रागग्रे द्वे पवित्रे तु धृत्वान्तःसंपुटौ करौ। संन्यसेद्दक्षिणे जानौ ब्रह्मयज्ञं समाचरेत् LaghvāśvaSm. 1. 86.

अन्तःसंप्रविष्ट (antas-sampraviṣṭa) *adj.* who has entered inside विज्ञाप्यो भगवान् ... येनान्तःसंप्रविष्टेन ईषत्कालवशात्तु वै। जन्मान्तरसहस्रोत्थात् मोक्षमायान्ति किल्बिषात् PāraS. 15. 371.

अन्तःसंप्राप्तवीरस्थिति (antassamprāpta-vīrasthiti) *adj.* **1** which has inherently attained the position of a hero अन्तःसंप्राप्तवीरस्थितिरपि विवृतोद्रेक-सेका ... विस्मयाय प्रायः सैन्यद्वयी सा समजनि ŚrīKaC. 23. 55 (comm. अन्तः संप्राप्ता वीरस्थितिर्यया सा तथा); **2** which has obtained the running of the birds in the middle, ŚrīKaC. 23. 55 (comm. अन्तः संप्राप्ता वीनां पक्षिणामीरस्थितिः पलायनं यया सा)

अन्तःसंभृतमत्सर (antassambhṛta-matsara) *adj.* who has jealousy arisen in the heart किंनरगणोद्गीतैर्भवद्विक्रमैरन्तःसंभृतमत्सरोऽपि ... विलोचनैरभिनयत्यानन्द-माखण्डलः AnarghaRā. 1. 29 (comm. अन्तरभ्यन्तरे संभृत उद्भिन्नो मत्सरो मात्सर्यम् ... यस्य सः)

अन्तःसंभृतहर्ष (antassambhṛta-harṣa) *adj.* who has happiness arisen in the heart अन्तःसंभृतहर्षवर्धितमदोदग्रं किमुन्माद्यसि ... मातङ्ग ŚārṅgaPa. 930.

अन्तःसंभोगसंकल्प (antas-sambhogasaṅkalpa) *m.* resolve for sexual intercourse in the heart अन्तःसंभोगसंकल्पः तत्कथाशाविलोकनम् ... उत्कण्ठानुभवा भावाः कथ्यन्ते BhāvPra. (Śā.) 88. 10 (4)

अन्तःसंमार्जन (antas-sammārjana) *n.* act of cleansing of the interior of the body (भेषजग्रहणसंकेतमाह) अन्तःसंमार्जने ज्ञेया ह्यजमोदा यवानिका BhāvPra. (Bhā.) 6 (1). 136.

अन्तःसरल (antas-sarala) *adj.* **1** straightforward in the mind हिमगिरिकान-नेनेवान्तःसरलेन ... विलासिजनेनाधिष्ठिता ... उज्जयिनी Kād. 51. 17; बृहन्नलानुभावोऽप्यन्तःसरलः ... महानायको राजा चिन्तामणिर्नाम VāsaDa. 16. 1; **2** having pine trees inside, Kād. 51. 17; **3** straight, i.e. having no joints inside, VāsaDa. 16. 1.

अन्तःसरस् (antas-saras) *n.* **1** inside of the lake अन्तःसरस्युरुबलेन पदे। गृहीतो ग्राहेण यूथपतिरम्बुजहस्त आर्तः BhāgP. ii. 7. 15; **2** interior of the water

सान्तःसरसि वेश्मस्थाः शतानि दश कन्यकाः ... ददर्श BhāgP. iii. 23. 26; PadmP. iv. 15. 40.

अन्तःसरुज (antas-saruja) *adj.* painful inside अन्तःसरुजेऽक्ष्णि सैव प्रयोज्या AṣṭāSaṁ. i. 164. 15 (1. 32)

अन्तःसर्गगत (antassarga-gata) *adj.* present inside the creation, i.e. hall अन्तःसर्गगतः क्रूरः स्वर्भानुरसुरो हरन् BrahmāṇḍP. i. 1. 163.

अन्तःसर्वचैतन्यशून्य (antassarvacaitanya-śūnya) *adj.* devoid of all the vitality in the body या (कामिनीयामिनी) ... जनयति जनमन्तःसर्वचैतन्यशून्यम् ŚṛṅgāVaiTa. 40.

अन्तःसर्वशक्ति (antassarva-śakti) *adj.* possessed of the all (compassing) mystic power within अच्युतः ... युक्तश्चान्तःसर्वशक्तिः षाड्गुण्यमहिमान्वितः JayāS. 4. 101.

अन्तःसलिल (antas-salila) *adj.* [*f.*-ā] **1** having (stream of) water (hidden) inside नदीमिवान्तःसलिलां सरस्वतीं नृपः ससत्त्वां महिषीममन्यत RaghuVa. 3. 9; आत्मनः करान्तःसलिलेषु जलमुचां कुक्षिषु निचिक्षेप चण्डभानुः TilaMañ. 180. 2; अन्तःसलिला सरिदिव यन्निवससि बहिरदृश्यापि ĀryāSaŚa. 525; अन्तर्गतम्, अन्तःसलिलसरस्वतीवदन्तःप्रविष्टमित्यर्थः VīraMi.(Tīrtha.) 412. 3; **2** having water, i.e. honey (hidden) inside (चरणैः परागसैकतमफलमिदं लिखसि मधुप केतक्याः) इह वसति कान्तिसारे नान्तःसलिलापि मधुसिन्धुः ĀryāSaŚa. 227.

अन्तःसलिल (antas-salila) *n.* [Loc.] **1** inside the water मत्स्या यथा अन्तःसलिले चरन्तो ज्ञातुं न शक्याः सलिलं पिबन्तः ArthŚā. i. 165. 5 (2. 9); **2** in the middle of the water शयानमन्तःसलिले तवैव ... प्रणतोऽस्मि रूपम् KūrmaP. 134. 2 (1. 12); **3** under the water भो दुष्ट नरपते। राक्षसेनान्तःसलिलस्थेन भक्षितस्ते परिजनः Pañcā. 281. 19.

अन्तःसलिलप्रवेश (antalssalila-praveśa) *m.* act of entering (deep) into the water दुर्वारमन्तःसलिलप्रवेशात्तत्याज काचिद्भ्रमरीसमूहम् JānaHa. 3. 45.

अन्तःसलिलम् (antassalilam) *adv.* **1** under the water वासुदेवकिरीटिभ्यां द्वावप्यन्तःसलिलं निषिद्धसमरसमारम्भौ स्थलमुत्तारितौ भीमसुयोधनौ VeṇīSaṁ. 6. 123; **2** in the water मज्जन्तमन्तःसलिलं गम्भीरिमगुरुं जङ्घाकाण्डेऽथ जग्राह ग्राहः PāṇḍaC. 3. 337.

अन्तःसलिलसंयुक्ता (antassalila-saṁyuktā) *adj.* (*f.*) containing (pools of) water within (the precincts) ततोऽपश्यत ... हिरण्यकशिपोः सभाम्। ... अन्तःसलिलसंयुक्तां विहितां विश्वकर्मणा MatsyaP. 161. 41.

अन्तःसलिला (antas-salilā) *f.* river Sarasvatī (*lit.* having (stream of) water (hidden) inside) शोणोदकान्तःसलिला तथैव सरस्वती धातृसुता मता सा KośaKaTa. 1. 2310.

अन्तःसविद्रधि (antas-savidradhi) *adj.* accompanied by abscess inside वरणादिः ... नियच्छति। शिरःशूलं गुल्मं चान्तःसविद्रधिम् AṣṭāSaṁ. i. 90. 12 (1. 16)

अन्तःसाक्षिन् (antas-sākṣin) *m.* one of the thousand epithets of Viṣṇu (*lit.* inner witness) अन्तःसाक्षी ... इति ... विष्णोर्नामसहस्रकम् PañcRā. (Nā.) iv. 3. 28.

अन्तःसानु (antassānu) *adv.* on the top नानारत्नज्योतिषां संनिपातैश्छन्नेष्वन्तःसानु वप्रान्तरेषु। बद्धांबद्धां भित्तिशङ्काम् ... मातरिश्वा निहन्ति Kirātā. 5. 36.

अन्तःसान्द्रवसत् (antas-sāndravasat) *adj.* dwelling firmly in the heart अन्तःसान्द्रवसन्महेश्वरशिरःशीतांशुलेखोल्लसत्पीयूषद्रवशीकरव्यतिकरप्राग्भारभाजामिव। छिन्नानामपि ... निशाचरेन्द्रशिरसां कान्तिः समुज्जृम्भते PrasaRā. 7. 48.

अन्तःसान्द्रवहत् (antas-sāndravahat) *adj.* held firmly in the heart अन्तः-सान्द्रवसन्(v.l. वहन्)महेश्वरशिरःशीतांशुलेखोल्लसत्पीयूषद्रवशीकरव्यतिकरप्राग्भारभाजामिव छिन्नानामपि ... निशाचरेन्द्रशिरसां कान्तिः समुज्जृम्भते PrasaRā. 7. 48.

अन्तःसामनिधन (antassāma-nidhana) *n.* concluding portion in the middle of Sāman chant इहकारइडाथकारौ गीतं च निधनस्वरः२ होषोस्वरं च द्व्यक्षरं देवताश्चारण्ये गेयेषु तान्यन्तःसामनिधनानि LāṭyāŚS. vii. 8. 5 (comm. अन्तरित्येतदव्ययं मध्याभिधायि)

अन्तःसामर्थ्य (antas-sāmarthya) *n.* internal strength ज्ञानैश्वर्ययोः शक्तिरन्तः-सामर्थ्यम् PrakaVi. 577. 20.

अन्तःसामिक (antas-sāmika) *adj.* being in a Sāman, i.e. pertaining to a Sāman अन्ततो निधनसामान्यादन्तःसामिकानि निधनानि संप्रसारयन्ति SaṁhiUBr. 3. 1 (comm. सामान्तर्वर्तीनि)

अन्तःसाम्य (antas-sāmya) *n.* internal equality अन्तःसाम्यसुधाह्रदप्रसृमराः किं प्रोद्यद्वीचीचयाः ... एवं स्मोदयते विकल्पनिकरो यद्देशनागीर्व्हो Gurvā. 328.

अन्तःसार (antas-sāra) *adj.* **1A** having inner excellence or perfection **B** having inner essence **2A** having inner strength or firmness **B** having internal firmness or hardness **C** having inherent intensity **3** having essence, i.e. water inside **4** having potency, i.e. fire inside **5** having pith or substance inside **1A** having inner excellence or perfection अन्तःसारैरकुटिलैरच्छिद्रैः सुनिरूपितैः। सहायैर्धार्यते राज्यं सुस्तम्भैरिव मन्दिरम् Rāmā. vi. 1110*; PañcT. (Kos.) 1. 142 (25. 16); Pañcā. 16. 16; ŚārṅgaPa. 1352; भवद्भिर्वर्णसंपन्नैरन्तः-सारैरिदं गृहम्। शातकुम्भमयैः पूतं गङ्गाम्भःकलशैरिव BṛKathāŚloSaṁ. 17. 83; स्फुरल्लक्ष्म्युपभोगपरिमलादिगम्योऽन्तःसारो रञ्जकतया वशीकर्ता सहृदयसंवेद्यधर्मभेदश्च सौभाग्यम् SahṛLī. 184. 9; अन्तःसारोऽपि निर्याति नूनमर्थितया सह। अन्यथा तदवस्थस्य महिमा केन देहिनाम् SūktiRa. 174. 10; **1B** having inner essence अन्तःसारं भवेद्रत्नम् YaśasCam. i. 10. 1; अन्तःसारो मधुरसैर्मधुको मधुभाण्डवत् TriṣaŚaPuC. i. 2. 995; **2A** having inner strength or firmness, Rāmā. vi. 1110*; PañcT. (Kos.) 1. 142; Pañcā. 16. 16; SārṅgaPa. 1352; अन्तःसारान् जनयति रविर्दुर्भगान् सूर्यसूनुः JātaPā. 3. 9; जगत् ... निःसारमप्यतीवान्तःसारं स्वप्नाचलोपमम् YogVā. iv. 1. 8; **2B** having internal firmness or hardness निःसारे सति वै पीठे अन्तःसारे स्मरेद्धिया JayāS. 20. 368; **2C** having inherent intensity (स्वरः) अन्तःसारो घनत्वस्य यथार्थः शिथिलो मतः SaṁgīRa. ii. 185. 3 (3. 167); **3** having essence, i.e. water inside अन्तःसारं घन तुलयितुं नानिलः शक्ष्यति त्वाम् MeghDū. 20; **4** having potency, i.e. fire inside इन्धनान्यन्तः-साराण्यम्भसा समभ्युक्ष्य प्रशमिताग्नीनि कृष्णाङ्गारीकृत्य तदर्थिभ्यः प्राहिणोत् DaśKuC. 111. 20; **5** having pith or substance inside (ध्वजस्तम्भः) अन्तस्सारो बहिस्सारो निस्सारश्च त्रिधा भवेत् PāraS. 16. 385; 16. 386; अन्तःसारान् वृक्षान् भानुर्दुर्गान् करोति Bṛhajjā. 3. 7; VāstuVi.5. 16; ŚilpaRa. i. 3. 24½.

अन्तःसार (antas-sāra) *n.* **1A** inner essence अन्तःसारमयस्येन्दोः पक्षयोः शुक्लकृष्णयोः। ह्रासवृद्धी ... प्रवक्ष्यामि BrahmāṇḍP. i. 28. 3; नान्तस्सारविचारण-प्रणयिनो लोका बहिर्बुद्धयः SūktiMu. 36. 60; **1B** inner excellence, i.e. inner meaning एवं निरलंकारेषूत्तानतायां तुच्छतयैव भासमानामुमुनान्तःसारेण काव्यं पवित्रीकृतम् Loc. 206. 27 (*on* 3. 36); **2** inner strength or firmness अन्तःसार-विहीनानामुपदेशो न जायते। मलयाचलसंसर्गान्न वेणुश्चन्दनायते CāṇaNīDa. 10. 8; ध्वनतः पटहस्येव तस्यापश्यत्क्रमादसौ। अन्तःसारविहीनत्वं परीक्षायां विचक्षणः RājTa. (Jo.) 1116; अन्तःसारविहीनानां सहायः किं करिष्यति IndSpr. 3491; **3** inner substance or inner content अन्तःसारपराङ्मुखेण धिगहो ते मारुतेनामुना पश्यात्यन्तचलेन सद्य महतामाकाशमारोपिताः BhallaŚ. 59; Subhāṣi. 1010; अन्तःसारमिव मेरोश्चारुचामीकरोत्करम् TriṣaŚaPuC. i. 4. 449; हे सद्रत्न तवैतदेव कुशलं यद्वानरेणादरादन्तःसारविलोकनव्यसनिना चूर्णीकृतं नाश्मना Kuval. 135 (27)

अन्तःसार (antas-sāra) *m.* internal treasure, inner store or contents, MW.; Apte.

अन्तःसारज्ञा (antassāra-jñā) *adj.* (*f.*) **i** knower of inner essence, i.e. pleasure मक्षिकेवान्तःसारज्ञा दुःखादुःखप्रदायिनी। न निवारयितुं शक्या न च मारयितुं मतिः YogVā. vi. (2). 199. 35; **ii** knower of inner essence, i.e. honey, YogVā. 199. 35.

अन्तःसारतर (antassāra-tara) *adj.* having greater inner strength अन्तःसारतरोऽरिकुंजरकरव्याघातदक्षोऽभवद्वंशः EI. xii. 13. 4.

अन्तःसारता (antassāra-tā) *f.* **1A** the state of having inner strength मन्त्रिपुरोहितसेनापतिप्रतिबद्धाप्तजनोपचारविस्रम्भाभ्यां शत्रोरिति कर्तव्यतामन्तःसारतां च विन्द्यात् NītiVā. 13. 9; **1B** the state of having inner firmness or hardness अर्थिजनस्याविधाय कमप्युपकारमरे खदिर, किं तवान्तःसारतया YaśasCam. ii. 177. 1; **2** the state of having inner essence, i.e. nature किमिदमस्य जगतो महान्ध्यं यदनिशमस्यान्तःसारतामवबुध्यमानमपि भण्डैरिव वाह्यते YaśasCam. ii. 65. 9; **3** the state of having inherent intensity (शब्दगुणाः) दूरश्रवणयोग्यस्तु घनोऽन्तःसारतायुतः SaṁgīRa. ii. 165. 6 (3. 75)

अन्तःसारधन (antassāra-dhana) *n.* wealth of inner excellence अन्तःसारधनमिव स्वधर्मो न प्रकाशनीयः NītiVā. 27. 27.

अन्तःसारबल (antassāra-bala) *n.* army having inner strength पण्यं विप्रकारं वापदिश्य हिरण्यमन्तस्सारबलं प्रेषयस्व ArthŚā. iii. 176. 1 (12.5)

अन्तःसाररहित (antassāra-rahita) *adj.* devoid of inner strength कदलीस्तम्भवदन्तःसाररहिते जलबुद्बुदवदचिरविनश्वरे संसारे सारस्य स्थिरस्य मार्गण-मन्वेषणं यः करोति Mitā. 329. 11 (*on* 3. 8)

अन्तःसारविशेष (antassāra-viśeṣa) *m.* particular type of inner strength दर्पः अन्तःसारविशेषः VīraMi. (Rājanīti.) 465. 24.

अन्तःसारशरीर (antassāra-śarīra) *n.* body having potency, i.e. fire inside अन्तःसारशरीरेषु हितायैवाहिते हितम्। किं न स्यादग्निसंयोगः स्वर्णत्वाय

तदस्मनि YaśasCam. ii. 311. 8.

अन्तःसारसा (antas-sārasā) *adj. (f.)* having cranes inside समरकेतुरेकदा ... अन्तःसारसाभिः ... वनराजिभिरन्वकारितया भुजङ्गराजमूर्त्येव मथनायास-मण्डलीभूतया ... पाल्या परितः परिक्षिप्तम् ... अदृष्टपाराभिधानं सरो दृष्टवान् TilaMañ. 202. 22.

अन्तःसाल (antas-sāla) *n.* innermost boundary wall भृशे यानालयं कुर्याच्छेषं प्रागुक्तवद् भवेत्। अन्तःसालमिति प्रोक्तम् MānaSā. 40. 57.

अन्तःसालपद (antassāla-pada) *n.* region of the innermost boundary wall अन्तःसालपदे रोगे नित्यान्त(र्चन)मण्डपं न्यसेत्। मुख्ये(ख्यं) वासं तु सर्वेषां चोक्तवत्कारयेत्सुधीः MānaSā. 36. 40.

अन्तःसास्थिक (antas-sāsthika) *adj.* having bones, i.e. hard substance inside ऐड्रूकम् अन्तःसास्थिकं कुशम् Liṅgānu. (Ha.) 49. 16.

अन्तःसिद्धा (antas-siddhā) *adj. (f.)* established, i.e. existing within स्वस्याविद्याबन्धसंबन्धमोक्षात् सत्यज्ञानानन्दरूपात्मलब्धौ ... अन्तःसिद्धा स्वानुभूतिः प्रमाणम् ViveCū. 476.

अन्तःसीत्कृत (antas-sītkṛta) *n.* inarticulate sound made by drawing breath inside पाणिपल्लवविधूननमन्तःसीत्कृतानि ...। योषितां रहसि गद्गदवाचामस्त्रता-मुपययुर्मदनस्य SaraKaṇṭhā. 619. 2.

अन्तःसीदत् (antas-sīdat) *adj.* dwelling or existing within मोहादन्तःसीद-त्सरसविषयास्वादसंवादसङ्गात्। ... नैषां मुक्तिर्भवति तपसा कायसंशोषणेन DarpDa. 7. 69.

अन्तःसीमा (antas-sīmā) *f.* inside of the boundary भगवानाह। अन्तःसीमा-यामन्तःसीमासंज्ञिनो मृतपरिष्कारं भाजयन्ति GiMs. iii (2). 147. 1.

अन्तःसुकृतानुभूति (antas-sukṛtānubhūti) *f.* experience of virtuous act or favour within एष्टव्योऽहमनीहैः अन्तःसुकृतानुभूतिरहितोऽहम् SvātmNi. 112.

अन्तःसुख (antas-sukha) *adj. [f.-ā]* **A** who has the bliss within योऽन्तःसुखोऽन्तरारामः ...। स योगी ब्रह्मनिर्वाणं ब्रह्मभूतोऽधिगच्छति MahāBhā. vi. 27. 24 = BhagGī. 5. 24; GītāBh. (Śaṅ.) 173. 13 (*on* 5. 24); ŚvetāUBh. 114. 5 (*on* 1. 11); (used as noun) (one) who has bliss within अन्तःसुखोऽन्तोरतिर्लभेत् ... ब्रह्म GaṇeP. ii. 141. 23; **B** who has the self as the bliss यो बाह्यविषयानुभवं सर्वं विहायान्तःसुख आत्मानुभवैकसुखः ... सः ... आत्मानुभवसुखं प्राप्नोति GītāBh. (Rā.) 315. 1 (*on* 5. 24); **C** producing joy in the heart महाभाग्येन केनापि गतासि मम दृक्पथम्। नित्यमन्तःसुखा दृष्टिस्तव देवि विभाव्यते PadmP. iv. 71. 49.

अन्तःसुख (antas-sukha) *n.* **A** internal happiness न्यूनाधिकत्वशमनादत इन्द्रियाणि पञ्चैव बाह्यविषयाधिगमक्षमाणि। अन्तःसुखादिविषयग्रहणोपयोगि षष्ठं मनः NyāyMañ. ii. 55. 15: **B** bliss within ततोऽमरा ऊचुरनेन चैव रूपेण ... प्रशान्तमन्तःसुखहेतुबन्धि चतुर्भुजत्वं वरमीप्सितं नः SkandP. ii (3). 4. 42.

अन्तःसुखिन् (antas-sukhin) *adj.* happy in mind or heart सोमप्रभो राजा ... उग्रं तपः कृत्वा अन्तःसुखी जातः SamyaKau. 65. 23.

अन्तःसुखोदय (antas-sukhodaya) *m.* rise of happiness in the mind ते मुखमण्डलम्। व्यनक्ति परमाश्चर्यं कमप्यन्तःसुखोदयम् PadmP. iv. 71. 51.

अन्तःसुचिर (antas-sucira) *adj.* long inside अव्यङ्गम्, एकवर्णः शोभन-कार्पाससूत्रनिर्मितसर्पनिर्मोकाकृतिरन्तःसुचिरो द्वाविंशत्यधिकशताङ्गुलपरिमितमध्यमः ... इति बोद्धव्यम् CaturCin. ii (1). 742. 9.

अन्तःसुप्त (antas-supta) *adj.* sleeping inside (अहम्) अन्तःसुप्तषट्पद-मम्बुजमिव जातनिद्रं सरसमामीलितलोचनेन्दीवरमाननं दधानाम् ... कामपि तरुणीमवालोकयम् DaśKuC. 92. 18; किं क्षिप्तम् ... अन्तःसुप्तशिवाशतम्। निर्देशपुरुषेणेव कङ्कालं दुन्दुभेर्मया RāmC. 1. 98.

अन्तःसुरङ्गा (antas-suraṅgā) *f.* hole within (the wall) राजगृहस्यान्तर्भित्ति-सुरङ्गामेत्य(v.l. नरपतिगृहस्यान्तःसुरङ्गामेत्य) प्रथममेव निवसतां बीभत्सकादीनां को वृत्तान्तः MudrāRā. 2. 15 (79)

अन्तःसुरात्मन् (antassurātman) *m.* nature of internal sound or tune आयत्तैः सकलैर्जीवैः प्रणौत्यन्तःस्वरात्मना(v.l. सुरात्मना) AhirbuS. 54. 26.

अन्तःसुषिर (antas-suṣira) *n.* **1** inner hole (in the nose or nostril) प्राणोऽन्तःसुषिराज्ञातः ViṣṇuP. i. 12. 63; PadmP. v. 4. 121; **2** inner hollow अनङ्गमुक्तः स च तीक्ष्णबाणः ...। ददाह तस्यास्तनुमन्तरन्तो वह्निर्यथान्तःसुषिरं द्रुमस्य VarāṅgaC. 19. 41; अन्तरिक्षमुदरमन्तःसुषिरं यस्य सोऽयम् अन्तरिक्षोदरः कोशः ChāndoUBh. 179. 11 (*on* iii. 15. 1)

अन्तःसुषिर (antas-suṣira) *adj.* having a hollow inside तत्कुर्वतेऽन्तःसुषिरा गूढं येनातनुक्षयम्। दह्यन्ते जीर्णतरवः कोटरस्थानला इव RājTa. (Ka.) 4. 317; (used as noun) (one) whose mind is hollow, i.e. weak or vacant, RājTa. (Ka.) 4. 317.

अन्तःसुषिररूपक (antas-suṣirarūpaka) *adj.* forming the hollow inside विचिन्तयेत् ... खं यत्तु तत्र कालस्तत्तमोऽन्तःसुषिररूपकम् (? अन्तःसुषिररूपकम्) LakṣmīT. 43. 8.

अन्तःसुषिरिणी (antas-suṣiriṇī) *adj. (f.)* having hollow inside न्यञ्चयन्क्ष्मामंह्रिपातैरन्तःशुषिरिणीमिव (?अन्तःसुषिरिणीमिव) PariPar. 2. 195.

अन्तःसुस्थितपान्थ (antas-susthitapāntha) *adj.* having travellers seated at ease inside अन्तःसुस्थितपान्थमन्थरमरुल्लोलल्लतामण्डपाः कस्यैता न हरन्ति हन्त हृदयं विन्ध्यस्थलीभूमयः NalaCam. 5. 34.

अन्तःसूच्चारुतारक (antassūccāru-tāraka) *adj.* consisting of beautiful pupils indicative of what is in the heart or mind अन्तःसूच्चारुतारकयोः ... ईक्षणमहानदीप्रवाहयोः ... अच्छमुक्ताफलस्तम्बम् ... बिभ्राणाम् ... कन्यकामद्राक्षम् TilaMañ. 160. 22.

अन्तःसूतक (antas-sūtaka) *n.* [Loc.] within (the period of) impurity अन्तःसूतके जननाद्दशरात्राभ्यन्तरे चेद्बालकमरणं भवति HārLa. 41. 1.

अन्तःसूतिकागृहम् (antassūtikāgṛham) *adv.* in the lying-in chamber धारिण्या सूनुरन्यूनलक्षणः सुषुवेऽन्यदा। कान्त्या दीप इवातैलपूरोऽन्तःसूतिकागृहम् PariPar. 1. 117.

अन्तःसूत्र (antas-sūtra) *n.* **A** inner thread or cord राजापि परिहासेनान्तःसूत्रं दर्शयन् ... दमयन्तीम् ... हृन्मध्यवर्तिनीं तामकरोत् NalaCam. 5. 13 (1); **B** string inside, i.e. gone through the garland इह ज्ञानमालाया अन्तःसूत्रकल्पः स्वसंवेदनात्मा प्रमाता जीवितभूतः PratyabhiVi. ii. 42. 1 (*on* ii. 2. 3)

अन्तःसेनम् (antassenam) *adv.* into the army अन्तःसेनं विद्विषामाविशन्तो युक्तं चक्रुः सायका वाजितायाः ŚiśuVa. 18. 13.

अन्तःसौध (antas-saudha) *n.* interior of the mansion तं गृहीत्वा यया-वन्तःसौधम् PrabhāC. 110. 14.

अन्तःसौहार्द (antas-sauhārda) *n.* inner friendliness अन्तःसौहार्दमनुरुध्य-मानया... निवर्तितो गमनादेतया ... भृत्यपरमाणुः TilaMañ. 283. 5.

अन्तःस्खलितगति (antasskhalita-gati) *adj.* which has its movement checked or blocked inside तमिस्रैरप्यन्तःस्खलितगतिभिर्मेचकरुचिः। प्रभातश्रीरेषा विलसति KaṁVa. 4. 2.

अन्तःस्खलितमुखर (antasskhalita-mukhara) *m.* sounding bit (of the bridle) sliding into the mouth अन्तःस्खलितमुखरखलीनखरशिखरक्षोभ-जन्मनो लालाजलभुवः फेनपल्लवान् ... उद्गिरन्तम् ... इन्द्रायुधमद्राक्षीत् Kād. 79. 2.

अन्तःस्तनितनिर्घोष (antas-stanitanirghoṣa) *adj.* containing the thunder of clouds inside कशाभिरिव हैमीभिर्विद्युद्भिरिव ताडितम्। अन्तःस्तनितनिर्घोषं सवेदनमिवाम्बरम् Rāmā. iv. 27. 11; SūktiRa. 186. 2; SūktiMu. 61. 6.

अन्तःस्तम्भ (antas-stambha) *m.* inner or internal pillar अन्तःस्तम्भ(म्भं) विना वापि कुर्याद् बाह्यस्तु (?बाह्यं तु) पादकम् MānaSā. 19. 66; तस्मात्परिहरेच्छिल्पी चान्तस्तम्भं (?अन्तःस्तम्भं) प्रयोजयेत् MānaSā. 19. 79.

अन्तःस्तम्भ (antas-stambha) *adj.* containing inner or internal pillar अन्तःस्तम्भं बहिःस्तम्भमाजुसूत्रं यथा भवेत् MayaMa. 15. 57; पुरस्तान्मण्डपं तुल्यमन्तःस्तम्भं तु तद्बहिः ĪśānŚiPa. ii. 29. 86.

अन्तःस्तम्भवृत्ति (antasstambha-vṛtti) *adj.* which has the activity (of breathing) suspended inside अन्तःस्तम्भवृत्तिः कुम्भकः SarvaDaSaṁ. 15. 477 (comm. कुम्भके तु यथा तप्त उपले न्यस्तं जलं सर्वतः संकोचमा-पद्यते तथा बाह्याभ्यन्तरयो द्वयोरपि युगपद्वृत्त्यभावेन संकोचरूपः स्तम्भो भवतीति विशेषः)

अन्तःस्तम्भितरोदन (antasstambhita-rodana) *n.* crying which is suspended inside अपाङ्गविगलद्बाष्पमन्तःस्तम्भितरोदनम् एते ... स्वप्नापराधे स्युर्मनोहराः BhāvPra. (Śā.) 142. 15 (6)

अन्तःस्थ (antas-stha) [also written as *antastha*] *m.* semivowel (*lit.* being in the middle, i.e. between the stops and sibilants) तेऽष्टाक्षराः संपद्यन्ते ... अन्तःस्थास्तदुपसृष्टाः NidāSū. 39. 15 (2 .12); समानसंध्यक्षराणि स्पर्शा अन्तःस्था ऊष्माणः ... एतावान्वर्णसंचयः AVPari. 47 (1). 3; चत्वारो यादयोऽन्तःस्थाः AVPari. 47 (1). 9; 47 (3). 6; युग्मान्तःस्थादन्तमूलीयपूर्वैरन्तःपदं नम्यतेऽन्तःपदस्थैः ṚPrāti. 5. 10; अभिनिधानं कृतसंहितानां स्पर्शान्तःस्थानामपवाद्य रेफम् ṚPrāti. 6. 5; 14. 5; ईषत्स्पृष्टमन्तःस्थानाम् CaturA. (Śau.) 1. 30; MahāBh. i. 64. 8 (*on* i. 1. 10); स्वरे नामिनोऽन्तःस्थाः CaturA. (Śau.) 3. 39; किमर्थमन्तःस्थानामणुपदेशः क्रियते MahāBh. i. 33. 5 (*on* i. 1. 0); अन्तःस्थाः यरलवाः Kātan. i. 1. 14; CāndraVaSū. 37; 34; अन्तःस्थाः संवृतजाः ... यवरलवर्णास्तथैव चान्तःस्थाः

NāṭyaŚā. 14. 18: अन्तःस्था इति च प्रोक्ता अन्तःस्थपुरुषेशया: AhirbuS. 16.87; ईषत्स्पृष्टत्वमन्तःस्थानाम् CāndraVaSū. 29; अन्तःस्थाश्चाल्पप्राणा: CāndraVaSū. 32; अन्तःस्था: द्विप्रभेदा रेफवर्जिता: सानुनासिका निरनुनासिकाश्चेति CāndraVaSū.48; तयोरन्तःस्थापवर्गाभ्याम् ... पाठेऽर्थभेदो जायते SaraKaṇṭhā. 194. 19; अन्तःस्था यरलवा इति पञ्चभूतबीजोद्धार: LalitāSaBh. 173. 22 (*on* 211)

अन्तःस्थ (antas-stha) *adj.* [*f.*-ā] [CāndraVyā. iii. 4. 63; GaṇRa. 5. 318 (357); Prasā. i. 797. 19] **1Ai** abiding within **ii** containing within **B** being inside **2A** being in the mind, present in the heart, i.e. internal or inner **B** being inside the body **3** staying in the interior **4** residing within the limit **1Ai** abiding within यावन्तीह वै भूतान्यन्नमदन्ति तावत्स्वन्तःस्थोऽन्नमत्ति MaiU. 6. 13; पुरुषः स परः ...। यस्यान्तःस्थानि भूतानि येन सर्वमिदं ततम् MahāBhā. vi. 30. 22 = BhagGī. 8. 22; GītāBh. (Śaṅ.) 246. 15 (*on* 8. 22); सर्वेऽन्तःस्था इमे लोका बाह्यमेषां न किंचन MahāBhā. xii. 231. 27; AhirbuS. 16. 87; मनुष्या: पशवश्चान्ये ये च जीवा: ... तैरन्तःस्थैरनन्तोऽसौ ViṣṇuP. v. 2. 18; KūrmaP. 663. 13 (2. 31); हृद्यन्तःस्थो ह्यभद्राणि विधुनोति सुहृत्सताम् BhāgP. i. 2. 17; (तदेवानुप्राविशत्) बहिष्ठस्य प्रवेशोपपत्तेः। न हि यो यस्यान्तःस्थः स एव तत्प्रविष्ट उच्यते TaiUBh. 259. 17 (*on* 2. 6); हृद्यन्तःस्थम् ... आत्मज्योतिश्छायां करोति BṛĀraUBh. 527. 14 (*on* iv. 3. 7); 520. 18 (*on* iv. 3. 6); बुद्धं बुद्धेरन्तःस्थम् ... प्रणमत गोविन्दम् GovindA. 6; नैवान्तःस्थं बुध्यति यं बोधयितारम्। तं संसारध्वान्तविनाशं हरिमीडे Haristu. 32; नमस्ते ...। सर्वज्ञे सर्वभूतानामन्तःस्थे सर्वसाक्षिणि LakṣmīT. 15. 2; अनात्मतां परित्यज्य निर्विकारो जगत्स्थितौ। एकनिष्ठतयान्तःस्थः संविन्मात्रपरो भव MahāU. 4. 83; अन्तःस्थं मां परित्यज्य बहिष्ठं यस्तु सेवते । हस्तस्थं पिण्डमुत्सृज्य लिहेत्कूर्परमात्मन: JābālaDaU. 4. 58; प्रकाशयन्तमन्तःस्थं ध्यायेत् कूटस्थमव्ययम् PaiṅgU. 424. 14 (3. 2); YogKuU. 3. 26; योगी ... शृणुयाद्दक्षिणे कर्णे नादमन्तःस्थमेकधी: HaṭPra. 4. 67; समुद्रस्थत्वादिलिङ्गादन्तःस्थो विष्णुस्तर्हि: तेनान्तःस्थेन विष्णुनेन्द्रादीनामभेदोऽत्रास्तु TattvPrakā. 22A. 5 (*on* i. 1. 21); 28A. 13 (*on* i. 1. 31); कौसल्या ... अन्तःस्थमेकम् ... विष्णुं सदानन्दमयं हृदब्जे सा भावयन्ती न ददर्श रामम् AdhyāRā. ii. 3. 80; तद्व्योमकर्णिकान्तःस्थं रसेन्द्रं परमेश्वरि। स्मरन् विमुच्यते पापै: RaseCin. 1. 15 (5. 24); सर्वत्राहं बहिरन्तस्थ: ŚaṅkaVi. (Ā.) 104. 2; अन्तःस्थायां त्वयि च न हि मे तन्वि धैर्यावलम्ब: HaṁsDū. (Vā.) 113; यस्यान्तःस्थानीत्यनेन परस्य (अक्षरस्य) लक्षणमुक्तम् AṇuBh. 242. 10 (*on* iii. 3. 33); **1Aii** containing within यस्मिन्नण्डे इमे लोका: सप्त वै संप्रतिष्ठिता:। ... अन्तःस्थस्य त्विमे लोका अन्तर्विश्वमिदं जगत् ... तस्मिन्प्रतिष्ठितम् BrahmāṇḍP. i. 3. 30; **1B** being inside गायन्ति त्रीणि सामानि सामगा:। ... सामभिस्त्रिभि: अन्तःस्थैरनुशंसन्ति चापरे MahāBhā. xi. 23. 41; स ददर्शोदरेऽदित्या: प्रह्लादो वामनाकृतिम्। अन्तःस्थान्बिभ्रतं सप्त लोकानादिप्रजापतिम् MatsyaP. 245. 10; शुद्धमात्मानमालिङ्ग्य नित्यमन्तःस्थया धिया। य: स्थितस्तं क आत्मेह भोगो बाधयितुं क्षम: AnnaU. 2. 42; अन्तःस्थानीन्द्रियाण्यन्तर्बहिष्ठान्विषयान्बहि:। शक्नोति य: सदा कर्तुं स कैवल्याश्रमे वसेत् NāraPaU. 3. 26; गर्भोऽपवरकेऽन्तःस्थे सूते नग्ने च कन्दरे NānārthMa. 1144; **2A** being in the mind, present in the heart, i.e. internal or inner अन्तःस्थं पूजयित्वादौ बहिस्तदनु पूजयेत् JayāS. 24. 24; अन्तःस्था शाम्भवी मेऽस्तु KulārT. 8. 48; अन्तःस्थेन हि चैतन्यज्योतिषावभासितस्य मनसो मननसामर्थ्यम् KenUBh. 38. 19 (*on* 1. 6); परोक्ष: अन्तःस्थो व्यवहार: - अयमिदानीमदोमय: (आत्मा) इति BṛĀraUBh. 613. 18 (*on* iv. 4. 5); शृणु कारणमन्तःस्थमार्यपुत्रस्य वेद्म्यहम् RāmC. App. (1) 40. 34; तारिकामुद्धरन् कुर्यान्मां चान्तःस्थां विभावयेत् LakṣmīT. 40. 96; अन्तःस्थं हि ज्ञानं बहिरर्थ: Kāśi. ii. 115. 20 (*on* 5 (3). 55); लक्ष्मण: ... आह राम ममान्तःस्थ: संशयोऽयं त्वया हत: AdhyāRā. ii.4.51; वृक्षाणामुपलानां या नामान्तःस्था: स्वसंविद:। ... अन्याभिधानास्थानार्था: संकेतैरपरै: स्थिता: YogVā. iii. 55. 58; **2B** being inside the body अन्तःस्थेऽङ्गे स्वजन उदित: ... एवं चौरमादिशेत् BṛSaṁ. 51. 25; मुञ्चेत् पिङ्गलया वायुमन्तःस्थं रेचको भवेत् KulārT. 15. 35; (अन्तरात्मानम्) तं स्वात् ... शरीरात् ... पृथक् कुर्यात् ... मुञ्जादिवेषीकामन्तःस्थां धैर्येण KāṭhUBh. 180. 8 (*on* 6. 17); यथा मुञ्जादिषीकामन्तःस्थां निर्हरन्ति, एवं (आत्मानम्) कोशपञ्चकेभ्यो निष्कृष्य सर्वात्मानं प्रतिपद्यन्ते SanatBh. 276. 16 (*on* 3. 6); अन्तःस्थेनाविरुद्धेन ... अन्तर्भेदेन संप्राप्तं मौक्तिकेनापि बन्धनम् Pañcā. 253. 15; अद: सुदुःसहं शल्यमन्तःस्थं सोढुमक्षमाम्। रक्ष माम् ParamāKā. 58. 33; **3** staying in the interior यान्त्यन्तस्था: कुलशिखरिणो दृष्टिवर्त्म क्रमेण Kapphiṇā. 15. 32; अन्तःस्थमुन्नतं वामाङ्गुष्ठं सुरोत्तम। संमुखं हृदि हार्दैषा मुद्रा बुद्धिविवर्धनी LakṣmīT. 34. 18; स्मारयसि रुद्रम् ... तुषानल इवान्तःस्थो वह्निर्मे येन वर्द्धते BṛDharmaP. i. 37. 51; योऽयं मरकतस्तम्भ: सभायां मे पुरःस्थित:। अस्यान्तःस्थं न पश्यामि दुष्पुत्र तव दैवतम् DaśāvaC. 4. 70; चञ्च्वा विदार्येतद्रजचर्म विलोक्य च। अन्तःस्थं मानुषं पक्षी पलाय्य स ततो ययौ KathāSaSāg. ii. 4. 114; ix. 4. 128; समुद्रेणान्तःस्थतटभुवि तरङ्गैरकरुणै: समुत्क्षिप्तोऽस्मीति त्वमिह परितापं त्यज मणे SubhāRaK. 33. 55; अन्तःस्थान् बन्धयेन्नागान् ... वारिबन्ध: स उच्यते Mānaso. ii. 2. 194; ii. 5. 547; असेर्विकोशस्यान्तःस्थां श्रियमश्रेन वल्गता। ... भिक्षु: प्राविशन्नगरम् RājTa. (Ka.) 8. 847; श्रीवीरनाथाय नम: ...। अन्तःस्थम् ... य: कामादिचक्रं युगपज्जिगाय NemiNir. 1. 24; आदित्याक्ष्णोरन्तःस्थो मुमुक्षुध्येयो हि परमात्मैव, न तु जीवविशेष: VedāntPāSau. 34. 18 (*on* i. 1. 21); सर्वेऽन्तःस्था: कटाहान्तर्जीवन्मत्स्योपमां दधु: RājTa. (Śrī.) 3. 387; अन्तःस्थान् रिपून् प्राग्वत्क्षोभेनाग्निमदापयत् RājTa. (Śrī.) 4. 59; (used as noun) (one) staying in the interior शवस्य हि। उदरं पाटयित्वा त्वमन्तःस्थं दर्शयिष्यसि KathāSaSāg. xii. 6. 316; द्वात्रिंशद्बाह्यत: पूज्यास्तत्रान्तःस्थास्त्रयोदश NāraS. 32 (0). 3; **4** residing within the limit उपस्थाय विवस्वन्तमन्तःस्थं पुरुषोत्तमम्। कुर्यादग्निविधिम् LakṣmīT. 28. 23; अन्तःस्थे हि विधौ कुटिले शूरा: क्व प्रभवन्ति Subhāṣi. 3117; अन्तःस्थानां च नारीणाम्। निष्ठौपरिष्टके स्यात् KandaCū. ii. 5. 19.

अन्तःस्थकृष्णा (antasstha-kṛṣṇā) *adj.* (*f.*) **1** bearing (the child) Kṛṣṇa in the womb अन्तःस्थकृष्णामवलोकयन्त: (जना:) दर्शान्तदीप्तामिव चन्द्रलेखाम् (देवकीम्) चक्रुश्चकोरायितमात्मनेत्रै: Yādavā. 2. 30 (comm. अन्तस्थकृष्णाम् अन्तर्गतदामोदराम्); **2** having the (shape of) black-antelope inside (the orb), Yādavā. 2. 30 (comm. चन्द्रलेखापक्षेऽन्तर्गतकृष्णमृगाम्)

अन्तःस्थकोण (antasstha-koṇa) *m.* inner corner or angle अन्तःस्थकोणार्धपदेषु चाष्टौ वक्ष्ये चतस्रश्च दिशासु योज्या: VāstuVi. 4. 40.

अन्तःस्थकोष्ठ (antasstha-koṣṭha) *m.* inner or internal square विकृतिकृतिपुटे षट्त्रिंशतान्तःस्थकोष्ठै: ... पीठिका ... मुद्रिका भद्रके स्यात् ŚilpaRa. ii. 28. 31.

अन्तःस्थगन्धतन्मात्रा (antasstha-gandhatanmātrā) *adj.* (*f.*) possessing the inner subtle element of smell तदेदा(?वा)वनितां वेत्ति ... अन्तःस्थगन्धतन्मात्रामुर्वीं स्थैर्यकलामिव YogVā. iii. 61. 16.

अन्तःस्थगितरविबिम्ब (antassthagita-ravibimba) *adj.* which has concealed the disc or orb of the Sun inside तव श्रान्तस्यान्तःस्थगितरविबिम्ब: किसलयै: कदम्ब: कादम्ब त्वरितमवलम्ब: स भविता HaṁsDū. (Rā.) 16 (comm. पल्लवै: अन्त: अभ्यन्तरे स्थगितं तिरोहितं रविबिम्बं सूर्यरश्मिरितिभाव:)

अन्तःस्थचञ्चरीकप्रचालित (antassthacañcarīka-pracālita) *adj.* shaken by the bees remaining inside तस्याश्चकम्पाते पयोधरौ। पद्मकोशाविवान्तःस्थचञ्चरीकप्रचालितौ SkandP. i (3). 18. 13.

अन्तःस्थचतुरस्र (antasstha-caturasra) *adj.* being in the inner or internal quadrangular construction (कोटचक्रस्य) अन्तःस्थचतुरस्रा ये रेखाया मध्यत: स्थिता:। स्तम्भतारा: समाख्याता: Mānaso. ii. 20. 1054.

अन्तःस्थचतुष्कोणव्यूह (antasstha-catuṣkoṇavyūha) *m.* inner quadrangular manifestation or form (of Puruṣottama as Vāsudeva etc.) अथान्तःस्थचतुष्कोणव्यूहान्तर्व्यूहसिद्धये। त्यक्त्वा पङ्क्तित्रयं बाह्ये पङ्क्तिमेकां विलोपयेत् ĪśānŚiPa. ii. 50. 94.

अन्तःस्थचिद्गुण (antasstha-cidguṇa) *adj.* having the quality of consciousness abiding within तदेतत् सकलं स्वच्छं सुखमासीदनाकुलम्। अन्तःस्थमनुकं सत्त्वमन्तःस्था(?स्थ)चिद्गुणं मुने AhirbuS. 6. 55.

अन्तःस्थतोय (antasstha-toya) *n.* element of water present inside (the womb, stone etc.) दृश्यतेऽन्तःस्थतोयानां बहिष्ठ: परिपाकत:। परिणाम: पदार्थानाम् BṛĀraUBhVā. i. 4. 533 (comm. अस्मदुदरेषु पाषाणादिषु चान्तःस्थानि यानि तोयोपलक्षितानि भूतानि)

अन्तःस्थत्व (antasstha-tva) *n.* **A** the state of being inner or internal (ज्योतिरान्तरम्) यत्पुन: अन्तःस्थत्वादप्रत्यक्षत्वाच्च वैलक्षण्यमुच्यते तत् चक्षुरादिज्योतिर्भि: अनैकान्तिकम् BṛĀraUBh. 520. 16 (*on* iv. 3. 6); **B** the state of abiding within आदित्येऽक्षिणि च अन्तःस्थत्वेन श्रूयमाण: पुरुषो जीवविशेष: किं वा परमेश्वर इति VedāntKau. 35. 10 (*on* i. 1. 21)

अन्तःस्थत्वलिङ्ग (antassthatva-liṅga) *n.* supporting proof (of the form) of the state of abiding within (the self) अन्तःस्थत्वलिङ्गसमन्वयप्रतिपादनात्प्रायेणेति TattvPrakā. 15B. 10 (*on* i. 1. 12)

अन्तःस्थधारणारूप (antassthadhāraṇā-rūpa) *adj.* of the form of, i.e. representing the retention of semivowel अन्तःस्थधारणारूपं यादिवान्तचतुष्टयम्। उदग्गतं लिखेत् पत्रमरं वा पूर्ववत् बुध: LakṣmīT. 23. 14.

अन्तःस्थनन्दतनय (antasstha-nandatanaya) *m.* son of Nanda, i.e. Kṛṣṇa present in the heart द्वावेव पूर्णकरुणौ ... अन्तःस्थनन्दतनयोऽन्तरवर्तिदारुब्रह्मेति CaitaCan. 144. 5 (6)

अन्तःस्थपङ्क्तिषट्क (antasstha-paṅktiṣaṭka) *n.* group of six rows (of the squares) which are inside बाह्यवीथ्यास्त्वथान्तःस्थपङ्क्तिषट्कादनन्तरम्। अन्तस्त्रिपङ्क्तीः परितो महावीथीस्तु मार्जयेत् ĪśānŚiPa. ii. 50. 90.

अन्तःस्थपीठनाल (antassthapīṭha-nāla) *m.* channel or canal in the internal ground plan प्रासादस्योत्तरे मध्ये नालमेवं प्रकल्पयेत्। अन्तःस्थपीठनालस्य समं वा बाह्यनालकम् ĪśānŚiPa. ii. 32. 95.

अन्तःस्थपुरुष (antasstha-puruṣa) *m.* individual soul abiding within (महाविष्णुः) पुष्करं कालरूपेण धत्ते नाभिसमुद्भवम्। अन्तःस्थपुरुषं चैव प्रधानं तद्गतं दधत् AhirbuS. 55. 45.

अन्तःस्थपुरुषा (antasstha-puruṣā) *adj.* (*f.*) having individual soul abiding within अन्तःस्थपुरुषां शक्तिं तामादाय ...। संवर्धयति योगेन अनिरुद्धः AhirbuS. 6. 14.

अन्तःस्थपुरुषेशय (antassthapuruṣe-śaya) *adj.* lying, i.e. existing in the individual soul abiding within याद्याः ... अन्तःस्था इति च प्रोक्ता अन्तःस्थपुरुषेशयाः AhirbuS. 16. 87.

अन्तःस्थप्राणमुख्य (antassthaprāṇa-mukhya) *m.* chief of the vital breaths abiding within जगदखिलमिदम् ... अन्तःस्थप्राणमुख्यात्प्रचलति ŚatŚlo. 13.

अन्तःस्थबाह्यविस्तार (antassthabāhya-vistāra) *m.* internal and external expansion or evolution बीजान्मूलं मूलात्क्षेत्रस्यान्तःस्थबाह्यविस्तारौ VarivaRaha. 164.

अन्तःस्थभाग (antasstha-bhāga) *m.* part which is inside, inner part वक्त्रादन्तस्स्थभागस्य वर्तिमुल्लिख्य मानतः। तद्भागात्तुर्यभागेषु तन्तुना नेत्र सिद्धयेत् PauṣkS. 16. 36.

अन्तःस्थभावभोक्तृ (antassthabhāva-bhoktṛ) *adj.* who experiences the inner emotion or feeling अन्तःस्थभावभोक्ता ततोऽन्तरात्मा महामेघः PraboSu. 253.

अन्तःस्थमनुक (antassthamanu-ka) *adj.* having the spell (i.e. Mantra) in the mind अन्तःस्थमनुकं सत्त्वमन्तःस्थाचिद्गुणम् AhirbuS. 6. 55.

अन्तःस्थमुद्गर (antasstha-mudgara) *m.* (in anatomy) the malleus of the ear, MW.

अन्तःस्थल (antas-sthala) *n.* inner part of the apartment पान्थ ... अन्तःस्थलमतिरम्यं द्वाराद्बहिरत्र मा स्वाप्सीः ŚṛṅgāMañ. (A.) 10. 24.

अन्तःस्थशीधु (antasstha-śīdhu) *n.* liquor which is contained inside बभूव ... तनुर्मृगदृशः पुलकोपरुद्धा। अन्तःस्थशीधुसमकालनिपीतकांस्यबिम्बागतेन्दुकृतशीतविजृम्भितेव HarVi. 26. 76.

अन्तःस्थशूल (antasstha-śūla) *m.*, *n.* spear drawn inside (the circle) पुनरन्तःस्थशूलानां पार्श्वकोष्ठाष्टकेषु वै। यमाष्टाक्षरमालिख्य ... लिखेत् ĪśānŚiPa. i. 47. 19.

अन्तःस्थशेष (antasstha-śeṣa) *m.* serpent Śeṣa dwelling inside करसंपुटपेषजन्मा। अन्तःस्थशेषफणरत्ननिधानभूमिपीठे पपात शरभस्य कृशानुवर्तिः HarVi. 34. 26.

अन्तःस्थषट्कोष्ठग (antassthaṣaṭkoṣṭha-ga) *adj.* placed in internal six squares or walls अष्टादशकोष्ठवत्स्वरपदेष्वन्तःस्थषट्कोष्ठगान्यन्तर्वृत्तगतैककोच्छुरितपार्श्वद्वन्द्वतुन्दीनि च। इत्यष्टाष्टपदैरराण्यपदिशं कुर्यात् ŚilpaRa. ii. 28.39.

अन्तःस्थसंविद् (antasstha-saṁvid) *f.* consciousness abiding within अनात्मतां परित्यज्य निर्विकारो जगत्स्थितौ। एकनिष्ठतयान्तःस्थसंविन्मात्रपरो भव VarāU. 2. 50.

अन्तःस्थसत्सत्त्व (antasstha-satsattva) *n.* real quality of goodness existing within संस्मरेत् ... शान्तमन्तःस्थसत्सत्त्वं भस्मीभूतरजस्तमम् LakṣmīT. 34. 106.

अन्तःस्थसप्तजलशेवधि (antasstha-saptajalaśevadhi) *m.* seven treasures of water (i.e. oceans) which are inside अन्तःस्थसप्तजलशेवधिवारिपूर्णम्। ब्रह्माण्डम् HarVi. 47. 20.

अन्तःस्थसाध्य (antasstha-sādhya) *adj.* to be furnished (with the name of the person against whom the spell is to be employed) in the middle मध्ये तारे बीजमन्तःस्थसाध्यम् ... विलिख्य। ... यन्त्रं दौर्गम् ... विदध्यात् ŚāraTi. 11. 19 (comm. मध्यस्थितसाध्यसाधकनामकर्मसहितं विलिख्येति संबन्धः)

अन्तःस्थसुरतारम्भाभिलाष (antasstha-suratārambhābhilāṣa) *m.* internal or mental desire for starting, i.e. practising sexual intercourse अन्तःस्थसुरतारम्भाभिलाषमपि गोपयत्। अन्योऽन्यं मिथुनं वेत्ति नेत्रे दृष्ट्वैव चञ्चले Subhāṣi. 2044.

अन्तःस्थस्फुरदुरुमन्यु (antassthasphurad-urumanyu) *m.* huge, i.e. great anger blazing in the mind अन्तःस्थस्फुरदुरुमन्युवह्निसृष्टस्पष्टोष्मक्कथनविशोषशङ्कयेव। भीमस्य ... स्वेदाम्भः ... बहिरानशे शरीरम् Kapphiṇā. 3. 19.

अन्तःस्था (antas-sthā-) I. P. **Ai** to stand in the way, to stand in between मा प्र गा॑म प॒थो व॒यं मा य॒ज्ञादि॑न्द्र सो॒मिनः॑। मान्तः स्थु॑र्नो अरा॑तयः ṚV. x. 57. 1; AV. xiii. 1. 59; AV. (P.) xvii. 25. 2; JaimiBr. 3. 168; य॒था द्यां च॑ पृथि॒वीं चा॒न्तस्ति॒ष्ठ॑ति तेज॑नम्। ए॒वा रोगं॑ चा॒स्रावं॑ चा॒न्तस्ति॑ष्ठतु मुञ्ज॒ इत् AV. i. 2. 4; **Aii** to stand in the way, i.e. to stop वै॒श्वा॒न॒रो नो॒ अद॑ब्धस्तनूपा अ॒न्तस्ति॑ष्ठाति दु॒रि॒तानि॒ विश्वा॑ AV. vi. 53. 2; AV. (P.) xix. 8. 2; MantrBr. i. 6. 35; **B** to stay inside, to be in the proper place वै॒श्वा॒न॒रो र॒श्मिभि॑र्वावृधा॒नः। अ॒न्तस्ति॑ष्ठ॒त्वमृ॑तस्य गो॒पाः TaiBr. III. x. 8. 10 (comm. वैश्वानरो जाठरश्चाग्निः रश्मिभिः वावृधानः ... शरीरस्यान्तस्तिष्ठतु)

अन्तःस्था (antas-sthā) *f.* **1** semivowel (*lit.* being in the middle, i.e. between the stops and vowels) व्यञ्जनं घोषवत्संज्ञमन्तःस्था हः परौ यमौ। त्रयस्त्रयश्च वर्गान्त्या अघोषः शेष उच्यते AVPari. xvii. 1. 16; (य् र् ल् व्)चतस्रोऽन्तःस्थाः ṚPrāti. 1. 12; 2. 8; 4. 3; 4. 39; 5. 10; 6. 5; 6. 6; 11. 1; 12. 3; 14. 5; 20. 1; 23. 1; अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा। ... हकारं पञ्चमैर्युक्तमन्तःस्थाभिश्च संयुतम्। औरस्यं तं विजानीयात् PāṇiŚi. 16; सपरस्वरायाः संप्रसारणमन्तःस्थायाः Kātan. iii. 4. 1; (Vṛ. अन्तःस्थाग्रहणमभ्यासविकारबाधनार्थम्। तेन विव्यथे। विव्याधे) अन्तःस्थाभ्यः पवर्गाद्यं स्वरेभ्यः पूर्वतः स्थितौ BhārŚi. 31; AgniP. 342. 8; **2** name of a type of a metre, viz. Rāj, Virāj etc. (*lit.* existing within twenty-two syllables) एतासामन्तरेष्वन्तस्था(v.l. °न्तःस्थाः) छन्दांसि NidāSū. 8. 11 (1. 5) (comm. एतासां गायत्रीणामन्तरेषु मध्यदेशेषु द्वाविंशत्यक्षरादिष्वन्तस्था अन्तस्तिष्ठन्ति [इति] अन्तस्था राड्विराडित्यादयः)

अन्तःस्थात्व (antassthā-tva) *n.* the state of being a semivowel पृथक्प्रयत्ननिर्वर्त्यं वर्णमिच्छन्तीति। अन्तःस्थात्वेनेषत्स्पृष्टकरणत्वादितरस्य च स्पर्शत्वेन स्पृष्टकरणत्वात् Nyās. i. 20. 14 (*on* i. 1. 0)

अन्तःस्थादि (antassthādi) *adj.* semivowel etc. सान्तःस्थादौ धारयन्तः परक्रमं शर्मन्स्यामास्मिन्सु जनान् श्रुधीयतः ṚPrāti. 14. 23.

अन्तःस्थादिसंयोग (antassthādi-saṁyoga) *m.* euphonic combination with semivowel etc. (परुषावृत्तिः) सैषा प्रायेणोष्मणामन्तःस्थादिसंयोगैरवस्थाप्यते SaraKaṇṭhā. 242. 9.

अन्तःस्थान (antas-sthāna) *n.* **A** location within, internal position वैतथ्यं सर्वभावानां स्वप्न आहुर्मनीषिणः। अन्तःस्थानात्तु भावानां संवृतत्वेन हेतुना GauḍKā. 2. 1; 2. 4; **B** inner apartment प्रविशतां पात्राणां चान्तःस्थानम् AbhinBhā. i. 56. 18 (*on* 2. 34)

अन्तःस्थानिमित्त (antassthā-nimitta) *adj.* caused by semivowel संप्रसारणं य्वृतोऽन्तःस्थानिमित्ताः Kātan. iii. 8. 33 (Vṛ. अन्तःस्थैव निमित्तमुत्पत्तिर्येषां तेऽन्तःस्थानिमित्ताः य्वृतः संप्रसारणमिति संज्ञिताः)

अन्तःस्थानुनासिकवर्ज (antassthānunāsika-varja) *adj.* (consonants) excluding semivowels and nasals व्यञ्जनम् ... अन्तःस्थानुनासिकवर्जमिति किम् KātanVṛ. *on* ii. 1. 13.

अन्तःस्थानुनासिकवर्जित (antassthānunāsika-varjita) *adj.* (consonants) excluding semivowels and nasals अन्तःस्थानुनासिकवर्जितं व्यञ्जनं धुट्संज्ञं भवति KātanVṛ. *on* ii. 1. 13.

अन्तःस्थानुप्रासवती (antassthānuprāsa-vatī) *adj.* (*f.*) having alliteration of semivowels अन्तःस्थानुप्रासवती द्राविडी (वृत्तिः) यथा - प्रियालललवलीतालतमालैलावनावली SaraKaṇṭhā. 237. 2.

अन्तःस्थानुभवोल्लास (antassthānubhavollāsa) *m.* bliss produced from internal experience अन्तःस्थानुभवोल्लासो मनोवाचामगोचरः। कुलद्रव्योपभोगेन जायते KulārT. 5. 73.

अन्तःस्थान्तप्रकरण (antassthānta-prakaraṇa) *n.* topic of roots ending with semivowels धावु गतिशुद्ध्योः। ... हिक्कादिषूभयपदिष्वयं न पठ्यते। तेषां कवर्गान्तप्रकरणानुरोधेन। अस्य चान्तःस्थान्तप्रकरणानुरोधात् DhātuPra. 1. 601 (45. 9)

अन्तःस्थापत्ति (antassthāpatti) *f.* conversion into semivowel, semivowelization अन्तःस्थापत्तावुदात्तस्यानुदात्ते क्षैप्रः CaturA. (Śau.) 3. 58.

अन्तःस्थापित (antas-sthāpita) *adj.* kept or placed inside (चन्द्रापीडः) अन्तःस्थापितमणिकमण्डलुमण्डलाम् ... संनिहितभस्मालाबुकां गुहामद्राक्षीत् Kād. 133.12.

अन्तःस्थाप्रत्यय (antassthā-pratyaya) *adj.* followed by a semivowel मेधातिथौ वरुणान्तव्रतान्तौ स्पर्शान्तःस्थाप्रत्ययौ निर्हसेते ṚPrāti. 4. 39; 14. 13.

अन्तःस्थाप्रदेश (antassthā-pradeśa) *adj.* having the place or point of articulation in between (the stops and sibilants) यरलव। इत्येते वर्णा अन्तःस्थासंज्ञा भवन्ति। अन्तःस्थाप्रदेशाः KātanVṛ. *on* i. 1. 14.

अन्तःस्थायिनी (antas-sthāyinī) *adj. (f.)* remaining internally, i.e. pertaining to the mind स तत्र तीव्रतपसे निनाय नियतः समाः। एकादशीं दशामन्तःस्थायिनीं मान्मथीं दधत् BṛKathāMañ. ix. 1 631.

अन्तःस्थासंयुक्त (antasstha-saṁyukta) *adj.* joined or connected with semivowel आतोऽन्तःस्थासंयुक्तात् Kātan. iv. 6. 103; अन्तःस्थासंयुक्तादाकारात्परस्य निष्ठातकारस्य नकारो भवति KātanVṛ. *on* iv. 6. 103.

अन्तःस्थासंज्ञ (antasstha-sañjña) *adj.* having the term 'antassthā' यरलव। इत्येते वर्णा अन्तःस्थासंज्ञा भवन्ति KātanVṛ. *on* i. 1. 14.

अन्तःस्थित (antas-sthita) *adj.* [*f.*-ā] **A** present in the heart or mind **Bi** present inside the body **ii** present in the interior (of the circle) **iii** present inside (the room etc.) **iv** (used as noun) (one) seated inside **C** dwelling or residing in the interior (region or country) **Di** abiding within **ii** merged within (the self or soul) **Ei** inner or internal **ii** inner or internal, i.e. inherent **F** situated in between **A** present in the heart or mind अन्तःस्थितं मे यदि वारयन्ति कामं भवेत् विस्मयनीयमेतत् Avimā. 4. 6: (राजा) अन्तःस्थितां दमयन्तीं दर्शयितुमिव हृन्मध्यवर्तिनीं तामकरोत् NalaCam. 5. 14 (2): अन्तःस्थितेऽप्यात्मनि यैः क्रियन्ते सेवाप्रवृत्तैः पुरुषैः प्रणामाः SevyaSev. 30; **Bi** present inside the body गुणान्वितानीति तदङ्गसङ्गादन्तःस्थितं सारमिवोद्गिरन्ति BhāvŚ. 49: अन्तःस्थितः प्राणरूपो बहिश्चान्नप्रदो हि यः। यो यज्ञसाधनं यामि शरणं तं धनंजयम् BrahmP. 125. 17; विष्ठामूत्रकफादिभिः। हृणीयन्ते प्राणिनोऽमी कायस्यान्तःस्थितैर्न किम् TriṣaŚaPuC. i. 1. 253; यावान्वा अयमाकाशः इति व्यापकत्वमन्तःस्थितस्य प्रतीतम् AṇuBh. 87. 2 (*on* i. 3. 24); दूरादन्तःस्थितमणिमहोमञ्जरीमञ्जुगर्भाः। यत्रासीनाः सुरयुवतयः ... उत्पश्यन्ति BhramDū. 80; गां दोग्धीति। अन्तःस्थितद्रवद्द्रव्यनिष्ठ-विभागानुकूलव्यापारो दुहेरर्थः LaŚabdeŚe. i. 459. 13; **Bii** present in the interior (of the circle) (कोटचक्रस्य) अन्तःस्थिते ग्रहे पापे कोटनाशं प्रपद्यते Mānaso. ii. 20. 1057; **Biii** present inside (the room etc.) अन्तःस्थितेन सा तेन ... कन्दरा। तिरश्चीनत्वमापन्ना लोकनालिरिवाभवत् TriṣaŚaPuC. i. 4. 315: यत् त्वया एकस्मिन्पण्डितेऽन्तःस्थिते द्वितीयपण्डितप्रवेशो न देयः PurāPraSaṁ. 77. 15: पीठम् ... परिपूज्यान्तःस्थितः संस्मरन्। देवम् ... अष्टेष्टकाश्चिन्वीत TantrSa. 1. 91; **Biv** (used as noun) (one) seated inside उपांशु भण्यतामन्तःस्थिताः श्रोष्यन्ति RasSa. 181 (3); **C** dwelling or residing in the interior (region or country) योजनानां सहस्रं वै द्वीपोऽयम् ...। पूर्वे किराता यस्यान्ते ...। ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चान्तःस्थिता द्विज MārkP. 57. 8; सव्वान (Read सर्व्वान्) सपशतविषयातः (Read सप्तशतविषयान्तः)स्थितमहास्थानब्राह्म (Read °ब्राह्म) णांश्च वोध (Read बोध) यत्यस्तु वः संविदित (Read संविरितं) यथा EI. xi. 310. 15; अन्तःस्थितेऽन्तःस्थानगते भूम्युपरिभागसंयुक्ते ग्रामे ManvaVi. 509. 27 (*on* 4. 108); अन्तःस्थिता मूषकमुख्यजीवा ...। जीवन्ति जीवाः सकलोपजीव्यस्तस्मादगृही सर्ववरो मतो मे ŚaṅkaDigVi. (Mā.) 14. 102; इदमन्तःस्थितानल्पकल्पनाम्भोरुहालयम्। ब्रह्माण्डमण्डपापीडक्रीडामण्डपमण्डलम् YogVā. vi (1). 45. 25; **Di** abiding within रजःशश्वत्प्रवृत्तिमत्। लोलीभूतमिदं तच्च विश्वमन्तःस्थितं तदा AhirbuS. 6. 58; चिदात्मैव हि देवोऽन्तःस्थितमिच्छावशाद्बहिः। योगीव निरुपादानमर्थजातं प्रकाशयेत् ĪśvaPraSū. i. 5. 7; PratyabhiVi. i. 228. 2 (*on* i. 5. 7); पृथिवीं च या। अन्तःस्थिता यमयति वन्दे तामीश्वरीं पराम् DevīBhāP. v. 9. 25; देवेश ... अन्तःस्थितः ... त्राहि विष्णो KalkiP. iii. 19. 10; आत्मानममृतोदन्वदन्तःस्थितममन्यत Yādavā. 16. 138; अन्तःस्थितायाः शक्तिरूपायाः स्वरूपाविरोधिन्याः न स्वरूपविभेदकत्वम् AṇuBh. 81. 17 (*on* i. 3. 15); **Dii** merged within (the self or soul) किमन्तःस्थित एवाश्नुते। उत पुनर्जन्म प्राप्नोति AṇuBh. 346. 10 (*on* iv. 4. 1); अन्तस्स्थितमनभि-व्यक्तनामरूपतया स्वात्मनि स्थितं बहिरभिव्यक्तनामरूपतया प्रकाशयेत् ŚivārkaMaDī. i. 341. 14 (*on* i. 2. 9); **Ei** inner or internal अवबोधं विदुर्ज्ञानं तदिदं साप्तभूमिकम्। ... आसामन्तःस्थिता मुक्तिः MahāU. 5. 26; यस्मादन्तःस्थितः सर्वः स्पष्टमर्थोऽवभासते। ... स प्रसाद इति स्मृतः Candrā. 4. 3; रराज लावण्यतरङ्गरम्या वलित्रयी मध्यगता मृगाक्ष्याः। अन्तःस्थितानामिव दर्शयन्ती निवेशसीमान्तमनुश्रवाणाम् Yādavā. 12. 49; **Eii** inner or internal, i.e. inherent योनावन्तःस्थितमेव फलं बहिर्निर्गतं वेति AṇuBh. 182. 9 (*on* iii. 1. 27); **F** situated in between अन्तःस्थितो मन्दगतिस्तु पश्येद्दीप्तांशकैर्द्वावथ शीघ्रतस्तु TājiNī. 1 (2). 28 (106)

अन्तःस्थितकामिगृह (antassthitakāmi-gṛha) *m., n.* house where the lover is present inside अन्तःस्थितकामिगृहद्वारगतं लुप्तवित्तनरमन्या। समुवाच कुट्टनी व्रज कल्लोलाकल्पदेहेति KuṭṭaMa. 334.

अन्तःस्थितत्व (antassthita-tva) *n.* **A** the state of abiding within अहम् इति उचिते परामर्शे योऽयम् इदंतापरामर्शः सैव बाह्यता, तद्देहान्तःस्थितत्वं अहमित्येतावता चित्समुचितेनैव वपुषा परामर्शनमेव PratyabhiVi. i. 237. 2 (*on* i. 5. 10); **B** the state of present inside the body कामोऽन्तःस्थितत्वात्प्राणस्थानीयः ... भवति SetuBa. 150. 15.

अन्तःस्थितत्वधर्म (antassthitatva-dharma) *m.* property of being the internal (entity) (पञ्चजनाः) नानाभावादेव स्वीकर्तव्याः। यद्यपि भूततन्मात्राकृति-चित्यन्तःस्थितत्वधर्मा वक्तुं शक्यन्ते AṇuBh. 107. 9 (*on* i. 4. 11)

अन्तःस्थितवत् (antas-sthitava(n)t) *adj.* existing or abiding within वर्तमानावभासानां भावानामवभासनम्। अन्तःस्थितवतामेव घटते बहिरात्मना ĪśvaPraSū. i. 5. 1 (PratyabhiVi. तेन सह ऐकात्म्यम् अनुज्झितवताम्)

अन्तःस्थितवाचिन् (antassthita-vācin) *adj.* denoting or expressing that which is abiding within यस्यान्तरे यदन्तर्गते ते नामरूपे इत्यस्मिन्नर्थे अन्तरशब्दादन्तःस्थितवाचिनः प्रथमाद्विवचनस्य ... तयोरपि ग्रहणार्थमादिशब्दः कृतः ŚivārkaMaDī. i. 504. 8 (*on* i. 3. 42)

अन्तःस्थिताङ्गुलि (antassthitāṅguli) *adj.* whose fingers are turned inside कर्कटः सोऽभिधीयते। अन्तःस्थिताङ्गुलिः कार्यश्चिन्तायाम् SaṁgīRa. iv. 53. 1 (7. 189)

अन्तःस्थितानल्पकल्पना (antassthitānalpakalpanā) *f.* not less, i.e. many assumptions present in mind इदमन्तःस्थितानल्पकल्पनाम्भोरुहालयम्। ब्रह्माण्ड-मण्डपापीडक्रीडामण्डपमण्डलम् YogVā. vi (1). 45. 25.

अन्तःस्थितानेकसुरारिसंघ (antassthitānekasurārisaṅgha) *adj.* having many groups of enemies of gods, i.e. demons residing inside अन्तःस्थितानेकसुरारिसङ्घाद्विचित्रवर्मायुधचित्रशोभम्। भीमं बलम् ... विनिर्ययौ सिन्धुजलाद् विशालात् VārāP. 96. 8.

अन्तःस्थितापरिमाणशृङ्गिहेमकूट (antassthitāparimāṇaśṛṅgihemakūṭa) *adj.* **1** having countless towering heaps of gold inside वर्षपर्वतसमूहमिवान्तः-स्थितापरिमाणशृङ्गिहेमकूटम् ... राजकुलं विवेश Kād. 92. 3; **2** having many (mountains like) Śṛṅgin and Hemakūṭa within (itself) Kād. 92. 3.

अन्तःस्थिताष्टकोण (antassthitāṣṭakoṇa) *m.* octagon situated inside, inner octagon नित्यानित्यावदुदितमर्चनं चतुरस्रके। अन्तस्थिताष्टकोणेषु पूजयेदुक्त-विग्रहाः TantrRā. 18. 18.

अन्तःस्थितास्वादलवा (antassthitāsvādalavā) *adj. (f.)* having or containing a bit of taste within तदेवं जलतां याति निजसत्तात्मिकां स्वयम्। अन्तःस्थितास्वादलवं सलिलं द्रवतामिव। तदेदावनितां वेत्ति YogVā. iii. 61. 15.

अन्तःस्थिति (antas-sthiti) *f.* **A** inner condition कन्यान्तःपुरमक्रमात् प्रविशता संदूषिता नः स्थितिः (v.l. संदूषितान्तःस्थितिः) MahāvīC. 2. 50; **B** existence inside the body अन्तःस्थितेर्न दृष्टिश्चेत्पाटितेऽप्यनुपग्रहात् ŚlokaVār. 5 (17). 99 (714. 4); **C** abidance within अन्तःस्थित्याद्युपयुक्तात्मशरीरभावप्रश्नः यन्मयमिति ŚrutaPra. iA. 231. 19 (*on* i. 1. 1); **D** act of dwelling or residence at the interior (of the city) अनाहते देवि भजन्ति ये त्वामन्तःस्थितिस्त्वन्नगरे तु तेषाम् ŚaṅkaDigVi. (Mā.) 12. 35.

अन्तःस्थिति (antas-sthiti) *adj.* abiding within गतिरन्तःस्थितिरागमैकगम्यः। ... गुरुराद्यो मयि गौरवं विधाता Yadavā. 15. 5 (*but* comm. अन्तर्यामी)

अन्तःस्थितौर्वानल (antassthitaurvānala) *m.* submarine fire situated inside सा ... अमृतार्णवमालुलोके। ... अन्तःस्थितौर्वानलजातदाहदुःखा-दिवाक्रन्दनमुत्सृजन्तम् ĀnandRa. 1. 11.

अन्तःस्थीय (antassth-īya) *adj.* pertaining to what is situated inside (the country) अन्तःस्थीयः। देशाधिकारेऽपि संभवापेक्षं विशेषणं न सर्वेषाम् KāśiVṛ. *on* iv. 2. 138.

अन्तःस्थूलाशय (antas-sthūlāśaya) *m.* container of large intestine inside, i.e. abdomen or stomach अन्नं पिण्डकवलैर्ग्रासैर्भुक्तं च देहिभिः। अन्तःस्थूलाशये सर्वप्राणान् स्थापयति क्रमात् PadmP. ii. 66. 16.

अन्तःस्थोग्रसिंह (antassthograsiṁha) *adj.* having ferocious lion inside अन्तर्गूढभुजङ्गं गृहम् इव व्यालाकुलं वा (v.l. अन्तर्लीनभुजंगममिवान्तःस्थोग्रसिंह) वनम् PañcT. 1. 129 (142. 1)

अन्तःस्थोत्तर (antassthottara) *adj.* whose end-part is inside ज्वालासीमनि दीपधामनि तथान्तःस्थोत्तरेऽन्तर्गते। प्राकारे ...। कुड्याभ्यन्तरबाह्ये वा कुड्यमध्येऽपि नीप्रकम्। ... नतं भवेत् ŚilpaRa. i. 40. 28.

अन्तःस्थोष्मन् (antassthoṣman) *m.* semivowel and aspirant अन्तःस्थोष्मसु लोपः CaturA. (Śau.) 2. 32.

अन्तःस्निग्ध (āntas-snigdha) *adj.* moist inside परुषारुणानि विशीर्णबहिस्त-नून्यन्तःस्निग्धानि शुक्लरक्तावभासानि ... सिध्मकुष्ठानीति विद्यात् CaraS. ii. 5. 8 (6) (1941 Ed.)

अन्तःस्नेहधारण (antas-snehadhāraṇa) *n.* act of containing oil inside बहिर्मुक्तोऽप्यमुक्तोऽन्तर्बद्धपक्षीव वल्गितः। निस्तुषोऽपि तिलस्तापकरोऽन्तःस्नेहधारणात्

PārśvC. 6. 367.

अन्तःस्नेहफला (antassnehaphalā) *f.* the plant *Solanum Diffusum*, pw.

अन्तःस्पन्द्य (antas-spandya) *adj.* enclosed on the border अन्तःस्पन्द्यमपच्छिद्य तत्पुरस्तात्प्राञ्चं दध्यात् BaudhŚuS. 4. 21.

अन्तःस्पर्श (antas-sparśa) *adj.* having internal (sense of) touch द्रुमाः। उत्स्रोतसस्तमःप्राया अन्तःस्पर्शा विशेषिणः BhāgP. iii. 10. 19.

अन्तःस्पर्शसुख (antassparśa-sukha) *n.* bliss experienced by internal touch तन्मध्यनाडीरूपस्य उभयलिङ्गात्मनोऽपि तद्वीर्योत्साहबललब्धावष्टम्भस्य कम्पकाले सकलवीर्यक्षोभोज्झिगमिषात्मकं अन्तःस्पर्शसुखं स्वसंवित्साक्षिकमेव ParāTri. 50. 8.

अन्तःस्पष्टदृष्टसकलवृत्तान्तता (antasspaṣṭadṛṣṭasakalavṛttānta-tā) *f.* [Inst.] on account of being that in which all the happenings are clearly seen (from outside) प्रविश्य च ... अन्तःस्पष्टदृष्टसकलवृत्तान्ततया रिक्तम् ... अच्छोदं नाम सरो दृष्टवान् Kād. 123. 1.

अन्तःस्पृश् (antas-spṛś) *adj.* touching the heart or mind अन्तःस्पृशं रुषमभीक्ष्णमभिव्यनक्ति Jīvān . 409. 7.

अन्तःस्प्रष्टव्यविशेष (antasspraṣṭavya-viśeṣa) *m.* peculiarity which is to be touched, i.e. experienced by the mind अन्तःस्प्रष्टव्यविशेषो हि न दूरं भाति। तेनासावात्मैकदेशतयान्तःशरीरस्य स्थितेर्न बाह्यवृक्षवदनुभूयते PramāVāBh. 126. 8.

अन्तःस्प्रष्टव्यविशेषरूपत्व (antasspraṣṭavyaviśeṣarūpa-tva) *n.* the state of being the peculiar form which is to be touched, i.e. experienced by the mind अन्तःस्प्रष्टव्यविशेषरूपत्वात्परोपलब्धिर्न भवतीति चेत्। न। बहिःस्प्रष्टव्यस्यापि व्रणादेरनुपलम्भात् PramāVāBh. 88. 1.

अन्तःस्फीता (antas-sphītā) *adj. (f.)* increased in the mind नान्तःस्यूता (v.l. अन्तःस्फीता) चलति रिपुता किं च संकोचभाजः प्रायेणैते स्वजनविमुखाः श्रीमदान्धा भवन्ति DaśāvaC. 8. 520.

अन्तःस्फुटक्रमायोग (antassphuṭa-kramāyoga) *m.* untenability of the succession which appears clear(cut) inwardly अन्तःस्फुटक्रमायोगे मध्यायां तद्विभेदभाक् ParāTri. 15. 16.

अन्तःस्फुटावर्तविवर्तिका (antassphuṭāvartavivartikā) *adj. (f.)* having eddies of waves forming whirlpools clear inside वहन्तीमाः पराः सन्ताः शान्ताः सर्गपरंपराः। सलिलद्रवतेवान्तःस्फुटावर्तविवर्तिका YogVā. iii. 62. 3 (comm. अन्तःस्फुटा आवर्तानां विवर्तिकाः परिवृत्तयो यस्याम्)

अन्तःस्फुटैकशिवरूप (antassphuṭaikaśivarūpa) *adj.* having the only form of Śiva manifest within अर्पितं तद् अन्तःस्फुटैकशिवरूपमहीश्वरेण NavaSāC. 18. 53.

अन्तःस्फुरच्चमत्कारा (antassphurac-camatkārā) *adj. (f.)* **i** having consciousness manifesting within शक्तिः कुण्डलिनी वह्नेर्धूमलेखेव निर्गता। ... अन्तःस्फुरच्चमत्कारा धूमलेखेव नागरी YogVā. vi (1). 82. 8; **ii** having flash of light shining inside. YogVā. vi (1). 82. 8.

अन्तःस्फुरण (antas-sphuraṇa) *n.* act of manifesting within तस्य संक्रमणम् सिद्धत्वेनान्तःस्फुरणम् Bhāsk. i. 44. 8 (*on* i. 1. 1)

अन्तःस्फुरणात्मता (antassphuraṇātma-tā) *f.* the state of being of the nature of manifesting within अवस्तुरूपत्वे न किंचित्कथितं भवेत्। एतावान्वाच्यसंबन्धो यदन्तःस्फुरणात्मता ŚivDṛ. 6. 81.

अन्तःस्फुरत् (antas-sphurat) *adj.* [*f.* - ntī] **Ai** shining inwardly आजगाम च ... अन्तःस्फुरता मत्तमदनकरिकर्णशङ्खायमानेन प्रतिमेन्दुना ... धवलीक्रियमाणैककपोलोदरः ... दधीचः HarṣaC. 59. 7; दमितस्य येन शल्यायते शिरसि कालियपन्नगस्य। ... अन्तःस्फुरत्पृथुफणामणिचक्रवालम् HarVi. 10. 31; अन्तःस्फुरत् तदिह नूनमनूनमर्चिः PārśvC. 7. 362; **Aii** shining or appearing inside अन्तःस्फुरद्विकटविद्रुमदण्डनिर्यच्छायानुविद्धमुदधेः ...। आवर्तमण्डलमराजत HarVi. 22. 8; तेन च ... रत्नाकरतरङ्गमालेवान्तःस्फुरन्माणिक्यकान्तिकलापेनोद्भासमाना ... व्यराजत राजमहिषी NalaCam. 3. 22 (17); मुखेन शशाङ्कमन्तःस्फुरत्कलङ्कमुपहसन्ती ... प्रियङ्गुमञ्जरी बभूव NalaCam. 3. 22 (36); अन्तःस्फुरद्गर्भानुरूपदोहदसुखमनुभवन्ती ... नरपालप्रिया ... पुत्रमजीजनत् NalaCam. 4. 9 (59); तदिदं वीरसूकर्णनिवेशोचितमित्यसौ। अन्तःस्फुरन्ती रत्नानां वर्णमालेव शंसति PrasaRā. 2. 1; **Aiii** shining inside, i.e. flickering inwardly अन्तःस्फुरत्केसरगन्धलुब्धैर्द्विरेफवृन्दैरुपरि भ्रमद्भिः। चकार ... निर्भर्त्सनानीव मुहुर्मनोभूः Surath. 13. 19; **B** appearing or flashing in the mind एतदाकर्ण्य राजा रञ्जितस्तत्कथया ... तत्कालमेवान्तःस्फुरन्मन्मथमनोरथभरभज्यमानमानसस्तं हंसमपृच्छत् NalaCam. 3. 32 (2); आभाति धूसरतरं तिमिरं पुरस्तादन्तःस्फुरद्विरलतारकभारमेतत् SūktiMu. 69. 14; सोमेश्वरः ... रणेषु येन स्वकराम्बुजेन प्रोल्लास्यमानासिलता चकासे। अन्तःस्फुरत्क्रोधकृशानुजातधूम्येव साक्षाद्बहिरुल्लसन्ती HammīMaKā. 2. 68; (शकेशः) अन्तःस्फुरत्क्रोधकृशानुकीलानुकारिरागारुणदारुणाक्षः HammīMaKā. 3. 40; **C** manifesting within अन्तःस्फुरच्चतुर्वेदसुधाम्भोधिरिवोर्मयः। रेजिरेऽङ्गेषु विप्राणां गोपीचन्दनभङ्गयः HammīMaKā. 9. 80.

अन्तःस्फुरत्तर (antassphurat-tara) *adj.* flashing intensively in the mind विशालकमलाकेलिचितुःशालस्य शालते। अयमन्तर्मुखः प्रश्नस्तवैवान्तःस्फुरत्तरः ŚāliC. 5. 29.

अन्तःस्फुरत्प्रकोपाग्नि (antassphurat-prakopāgni) *m.* fire of fury flashing in the mind निर्ययौ नरकेसरी। सुवर्णशुक्तिद्वन्द्वाभं बिभ्राणः श्रवणद्वयम्। अन्तःस्फुरत्प्रकोपाग्निनिर्यज्ज्वालायुगोपमम् DaśāvaC. 4. 72.

अन्तःस्फुरत्प्रतापाग्नि (antassphurat-pratāpāgni) *m.* fire of heroism manifesting within निर्ययौ नरकेसरी। सुवर्णशुक्तिद्वन्द्वाभं बिभ्राणः श्रवणद्वयम्। अन्तःस्फुरत्प्रकोपाग्नि(v.l. °प्रतापाग्नि)निर्यज्ज्वालायुगोपम् DaśāvaC. 4.72.

अन्तःस्फुरित (antas-sphurita) *adj.* [*f.*-ā] **A** manifesting within सत्त्वान्तःस्फुरिताय ... तस्मै ... मा स्वस्ति भूत् BhallaŚ. 15; **B** appearing or flashing in the mind श्रियं जलनिधेरर्धोत्थितां पश्यतो वाचोऽन्तःस्फुरिता बहिर्विकृतिभिर्व्यक्ता हरेः पान्तु वः SubhāRaK. 6. 12; **C** reflected in मधु। आरक्तसुरसस्वच्छमन्तःस्फुरिततन्मुखम्। उपनिन्ये द्वयोर्मध्ये स स्वचित्तमिवासवम् KathāSaSāg. iv. 1.8.

अन्तःस्फुरित (antas-sphurita) *n.* manifestation within अन्तःस्फुरितं हि स्वात्मैव विषयीकर्तुं शक्तः Bhāsk. i. 22. 14 (*on* i. 1. 1)

अन्तःस्फुरितहसित (antassphurita-hasita) *n.* smile which has appeared in the mind or heart ये वर्धन्ते धनपतिपुरःप्रार्थनादुःखदीर्घा ...। तेषामन्तःस्फुरितहसितं वासराणां स्मरेयं ध्यानच्छेदे ŚatTrayī. 174.

अन्तःस्फुरितेच्छा (antassphuritecchā) *f.* desire that has appeared or flashed in the mind अन्तःस्फुरितेच्छैव हि बाह्यस्पन्दभावेन स्फुरति Bhāsk. i. 419. 10 (*on* i. 8. 9)

अन्तःस्फुलिङ्ग (antas-sphuliṅga) *m.* inner spark पिशङ्गीभूतसर्वाङ्गैः स्फुरद्भिरन्तःस्फुलिङ्गैरिव लताभृङ्गनिकुरम्बैः करम्बिताभोगम् ... आलोकमीक्षितवान् TilaMañ. 246. 1.

अन्तःस्फूर्जत् (antas-sphūrjat) *adj.* **i** appearing in the mind अन्तःस्फूर्जदपारमोहतिमिरप्राग्भारमुच्छेदयन् ... विजयते ज्ञानप्रदीपो हरः ŚatTrayī. 1; **ii** appearing or flasing in between or in the middle कुङ्कुमस्रोतसान्तःस्फूर्जत्कह्लारकोटिप्रकटितगतयः ... पान्तु कृष्णाङ्घ्रिभासः PadyaVe. 1.

अन्तःस्फूर्ति (antas-sphūrti) *f.* manifestation or realization within सालोक्यादिकं तु तस्यैव प्रकारः ... तत्राप्यन्तःस्फूर्त्या महिमसंयोगेन च तत्सत्त्वात् GoviBh. 316. 4 (*on* iv. 4. 4)

अन्तःस्फोट (antas-sphoṭa) *m.* act of bursting forth from inside दुन्दुभिर्ध्वनिभरैर्भृतमन्तःस्फोटनिम्नमिव दिक्कुलमासीत् Kapphiṇā. 17. 4.

अन्तःस्मित (antas-smita) *adj.* [*f.*-ā] **A** having suppressed smile, smiling inwardly आलीजल्पितविस्मिता क्षणमथो सान्तःस्मितान्तर्हिता BhāvŚ. 83; इत्युक्ता सा तदा देवी गम्भीरान्तःस्मिता जगौ MārkP. 85. 66; शनैः शनैर्व्यजृम्भत च ... क्वचिदन्तःस्मितक्षितिपालापेक्षितक्षीबक्षुद्रदासीसमाकृष्यमाणराजवल्लभः ... उत्सवामोदः HarṣaC. 186. 14; अद्यापि ... अन्तःस्मितोच्छ्वसितपाण्डुरगण्डभित्तिं ताम् ... स्मरामि CauraPañ. 14; क्षत्रपतिः ... अन्तःस्मितः सोपहासं चिन्तयति स्म PrabhāC. 30. 23; वप्रेषु ... द्वाराभिमानाद्गुतमापतन्तः। अवापुरागन्तुजनाः सलीलैः अन्तःस्मितैः नागरिकैर्निरोधम् Yādavā. 11. 65; **B** pleased in the mind or heart पटप्रान्ते ... अक्षराणि निरीक्ष्य सा। वाचयामास सानन्दं दध्यौ चान्तःस्मिताशया PāṇḍaC. 6. 529.

अन्तःस्मित (antas-smita) *n.* **1** inward illumination, i.e. fire अन्तःस्मितोल्लसितमिन्दुकलावतंसम् ... नवेन्दुमौलेरन्तःपुरं विशतु मङ्गलम् ... वः ŚāraTi. 1. 2 (comm. अन्तःस्मितं प्रकाशो यस्यासावन्तःस्मितोऽग्निः तेन उल्लसितं युतम्); **2** inward or suppressed smile भाषसे ... मार्गणहान्तःस्मितं कृत्वा गुरुः शिष्यमिव LiṅgaP. i. 17. 20; अन्तःस्मितालसविलोकनवन्दनीया ... रम्या दशा ... मदिरेक्षणायाः RasGaṅ. 81. 3.

अन्तःस्मितम् (antassmitam) *adv.* with an inward or suppressed smile (दूताः ... त्रिधा प्रेष्यन्ते) क्रमात्तेनान्तःस्मितमुत्तरं विदधता धाराधिपो रञ्जितः PrabaCin. 31. 2.

अन्तःस्मितमात्रक (antassmitamātra-ka) *n.* mere inward or suppressed smile प्राणा येन समर्पितास्तव ... तस्यान्तःस्मितमात्रकेण जनयञ्जीवापहारं क्षणात् भ्रातः ... वेताल लीलायसे BhallaŚ. 102.

अन्तःस्मितललितमुख (antassmita-lalitamukha) *adj.* having a face charming due to inward or suppressed smile वीक्षितः शैलपुत्र्या ... अन्तःस्मितललितमुखो भूतभर्ता PadyaVe. 20.

अन्तःस्मितशोभिवक्त्र (antassmitaśobhi-vaktra) *adj.* having a face charming due to inward or suppressed smile शेषविशेषतल्पे शयानमन्तःस्मितशोभिवक्त्रम् ... स्मरामि ŚāraTi. 17. 161.

अन्तःस्मेर (antas-smera) *adj.* having inward or suppressed smile कृष्णे ... सतृष्णे नमयति मुखमन्तःस्मेरमावृत्य राधा UjjvaNīMa. 114. 9; अन्तःस्मेरस्तबकितमुखाम्भोरुहरुचः। कथंकारं शक्याः परिगदितुमिन्दीवरदृशः ... भणितयः BhāmiVi. 2. 61.

अन्तःस्यूता (antas-syūtā) *adj. (f.)* sewn internally or in the mind नान्तःस्यूता चलति रिपुता DaśāvaC. 8. 520.

अन्तःस्रक्ति (antas-srakti) *f.* inner edge or corner पुरोडाशानश्मोत्तरानन्तःस्रक्तिषु निदधाति KauśiSū. 38. 13; 34. 23.

अन्तःस्रवन्ती (antas-sravantī) *f.* inner region of a river वेदीक्षेत्रगजोक्षशृङ्गगिरिवल्मीकोद्भवाः स्युर्मृदस्तुल्याः कोलनदीतटद्वयतटाकान्तःस्रवन्त्युद्भवाः (शार्ङ्गीशादिषु) TantrSa. 8. 84 (comm. अन्तःस्रवन्तीति नद्यन्तर्भागाभिधानम्)

अन्तःस्रोतस् (antas-srotas) *n.* **A** inner or internal stream मत्स्यबन्धैरन्तःस्रोतो निरुध्य प्रक्षिप्तं संवर्तजालम् Tantrākhyā. 38. 1; PañcT. 1. 127 (20) (133. 4); Pañcā. 87. 14; **B** inner or internal channel दोषाः ... अन्तःस्रोतोमुखपिधानात्तम्भमादधानाः ... ज्वरमभिनिर्वर्तयन्ति AṣṭāSaṁ. i. 261. 5 (3. 2)

अन्तःस्वच्छ (antas-svaccha) *adj.* **A** pure in the mind कृत्वा तासामभिगममपां सौम्य सारस्वतीनामन्तःशुद्ध(v.l. °स्वच्छ)स्त्वमसि भविता MeghDū. 49; अन्तःस्वच्छोऽपि स्मरति न हरिर्गोकुलभुवम् UjjvaNīMa. 306. 11; **B** clear in thought अधिगतनयोऽप्यन्तःस्वस्थो(v.l.स्वच्छो)ऽप्युदीरितधीरपि। त्यजति सहजं धैर्यं स्त्रीभिः प्रतारितमानसः PraboCan. 1. 25.

अन्तःस्वनवत् (antassvana-va(n)t) *adj.* having, i.e. producing sound in the abdomen स वायुः। प्रपीडितोऽन्तःस्वनवान् प्रयाति प्रध्मापयन्नेति पुनश्च मुक्तः BhāvPra. (Bhā.) viii. 43. 10.

अन्तःस्वप्ना (antas-svápnā) *adj. (f.)* (heaven and earth) having sentient and non-sentient beings in between शुम्भंनी द्यावांपृथिवी अन्तिसुम्ने(v.l. अन्तःस्वप्ने) महिंव्रते AV. vii. 112. 1 (Sāy. स्वप्नाः अचेतनाश्चेतनाश्च ययोरन्तः मध्ये वर्तन्ते तादृश्यौ द्यावापृथिव्यौ)

अन्तःस्वभाव (antas-svabhāva) *adj.* of concealed nature or intention अशक्यः सहसा राजन्भावो वेत्तुं परस्य वै। अन्तःस्वभावैर्गीतैस्तैः Rāmā. vi.11.52.

अन्तःस्वभाव (antas-svabhāva) *m.* innate or inner nature अयं रागो जीवस्यान्तःस्वभावभूत एव Bhāsk. ii. 238. 17 (*on* iii. 1. 9)

अन्तःस्वयंवरम् (antassvayaṁvaram) *adv.* inside the (pandal for) self-choiced marriage वैदर्भी विवेशान्तःस्वयंवरम् PāṇḍaC. 6. 257.

अन्तःस्वरात्मन् (antassvarātman) *m.* [Inst.] in the form of the sound within (देवः) आयत्तैः सकलैर्जीवैः प्रणौत्यन्तःस्वरात्मना AhirbuS. 54. 26.

अन्तःस्वरूपा (antas-svarūpā) *adj. (f.)* characterised by inwardness क्रममुद्रया अन्तःस्वरूपया बहिर्मुखः समाविष्टो भवति साधकः PratyabhiHṛ. 46. 12 (19)

अन्तःस्वस्थ (antas-svastha) *adj.* inwardly stable or steady, calm in mind अधिगतनयोऽप्यन्तःस्वस्थोऽप्युदीरितधीरपि। त्यजति सहजं धैर्यं स्त्रीभिः प्रतारितमानसः PraboCan. 1. 25.

अन्तःस्वानुभव (antas-svānubhava) *adj.* having experience of self within जीवः ... अन्तःस्वानुभवः ... जगत्स्वप्नं प्रपश्यति YogVā. iv. 18. 37.

अन्तःस्वान्तम् (antassvāntam) *adv.* **i** in one's own mind अन्तःस्वान्तमालोच्य कथयन्तु सभासदाः। हारितः स्वात्मना भर्ता भवेयं यदि हारिता PāṇḍaC. 6. 981; तं तपोधनमालोक्य ... तेऽन्तःस्वान्तमचिन्तयन् PāṇḍaC. 9. 365; **ii** within one's own self अन्तःस्वान्तमनन्तनन्दथुनिधिर्भेदोद्दशां यादृशामाविर्भावयतु स्वयं स भगवानात्मानमात्मेश्वरः NyāyPari. 515. 3.

अन्तःस्वाहाकार (antas-svāhākāra) *adj.* together with utterance of the word or formula of *svāhā* at the end होतॄणां व्याख्याने ... ऋते ग्रहानन्तःस्वाहाकारानित्येकम् BaudhŚS. iii. 15. 5; iii. 173. 9.

अन्तःस्वीकृतजाह्नवीजल (antassvīkṛta-jāhnavījala) *adj.* which has accepted, i.e. absorbed the water of the river Ganges inside अन्तःस्वीकृतजाह्नवीजलम् ... भूयादभ्युदयाय ... °पूर्णकलशप्रायं शिरो धूर्जटेः SaduktiKa. 8. 32.

अन्तःस्वेद (antas-sveda) *adj.* having sweat inside, sweating internally हस्तिनो हि अन्तःस्वेदाः कुष्ठिनो भवति ArthŚā. iii. 49. 4 (9. 1); अन्तःस्वेदा मूढमुष्काः ... निसर्गेण न समाना मृगैर्गजाः Hastyāyur.453.22 (3. 9); 170.2(2.8)

अन्तःस्वेद (antas-sveda) *m.* elephant (in rut) हस्ती ...। विलोमजिह्वान्तःस्वेदपिण्डपादलतालुकाः TrikāŚe.ii.8.34 (comm. अन्तःस्वेदो मदस्यन्दनं घर्मजलं यस्य)

अन्तःस्वेदक (antassveda-ka) *m.* elephant (in rut) हस्तीभः ... अन्तःस्वेदकः KośaKaTa. 1. 5958.

अन्तःस्वेदता (antassveda-tā) *f.* the state of having sweat inside, the state of sweating internally जिह्वायाः परिवृत्तिः ... वरुणतो अन्तःस्वेदता शापतः MātaLī. 1. 35.

अन्तःस्वेदत्व (antassveda-tva) *n.* the state of having sweat inside, the state of sweating internally सुरशापाद्गजेन्द्राणामन्तःस्वेदत्वमाहितम् Hastyāyur. 517. 17 (3. 24)

अन्तःस्वेदितुम् (antas-sveditum) *inf.* to sweat internally सुरशापाद्गजेन्द्राणामन्तःस्वेदितुमाहितुम्(v.l. मादिवाम्) Hastyāyur. 75. 4 (1.9)

अन्तहल्लोप (antahal-lopa) *m.* elision of the last consonant भृशादिभ्यश्च्व्यर्थे भवत्यर्थे क्यङ् स्यात् ... अन्तहल्लोपश्च PrakriKau. ii. 377. 3.

अन्तहारा (anta-hārā) *f.* internal enclosure in a house (divided into five courts), second inner court आदिशालां ततः कुर्यादन्तमण्डलमीरितम्। द्वितीयमन्तहारा च MānaSā. 31. 6; दण्डेऽर्धेऽन्तर्गतं मण्डलमवनिमितेऽर्धान्विते वान्तहारा TantrSa. 2. 73; 2. 78.

अन्तहाराबहिर्मूल (antahārā-bahirmūla) *n.* root of the external part of the second inner court अन्तहाराबहिर्मूलादल्पलिङ्गालयादिकम्। कुर्वीत वान्तः सालस्य ŚilpaRa. ii. 29. 27.

अन्तहाराविशाल (antahārā-viśāla) *n.* extension or dimention of the second inner court अन्तहाराविशालं तु तद्बाह्ये द्विगुणं हि तत् ŚilpaRa. i. 40. 20.

अन्तहीन (anta-hīna) *adj.* **1A** devoid of end, i.e. endless or eternal नमः ... ब्रह्मणे ...। आदिमध्यान्तहीनाय नित्यायाव्यक्तमूर्तये BrahmaṇḍP. ii. 25. 17; अचिन्त्यरूपमन्तहीनम् ... तमेकदन्तमेव तं विचिन्तयामि संततम् GaṇePañ. 5; **1B** devoid of end (in one's reign) परपवनाकम्पितो नान्तहीनः ... प्रकृतिरतिघनः ... वंशः EI. iii. 298. 5; **2** devoid of end or bottom, i.e. very deep दशास्यम् ...। ददर्श पातालमिवान्तहीनं खातं प्रजातं भुवनव्रणाभम् DaśāvaC. 7. 88.

अन्तहेतु (anta-hetu) *m.* **Ai** cause of end or destruction अमरगिरेः ... ध्वान्तस्यैवान्तहेतुर्न भवति मलिनैकात्मनः पाप्मनोऽपि SūryaŚ. 84; **Aii** cause of death (मातलिः रामं जगाद) त्वमादिदेवो भगवाननन्तस्त्वमन्तहेतोरिह रावणस्य RāmC. (App. I) 39. 3; **B** cause of dissolution (शिवाय) नमः सर्वप्रपञ्चस्य सृष्टिस्थित्यन्तहेतवे SkandP. iii (1). 49. 15; नमस्ते ... सृष्टिस्थित्यन्तहेतवे (भास्कराय) GaṇeP. ii. 74. 37.

अन्तहेतुक (antahetu-ka) *adj.* [*f.*-ā] causing dissolution चण्डत्वं बहुरूपस्य मुक्तिस्थित्यन्तहेतुकम् MṛgendraT. ii. 3.43; किमर्थं शोचसे ... सृष्टिस्थित्यन्तहेतुके ... महेश्वरि GaṇeP. i. 48. 26.

अन्तहेतुत्व (antahetu-tva) *n.* the state of being the cause of end or destruction भवतो मित्रम् ... वसतेरन्तहेतुत्वाद्वसन्ताख्यो भवत्वयम् ŚivaP. ii (2). 8. 47 (76B. 16)

अन्तहोम (anta-homa) *m.* final or concluding offering हविषापूपलाजसमायुतेन मिन्दाहुती हुत्वान्तहोमो हूयते VaikhāGS. 2. 8; 3. 17; 5. 15; VaikhāDS. iii. 10. 7.

अन्तहोमान्त (antahomānta) *m.* end of the concluding rite or offering पितृभुक्तं पितृजीर्णमित्यन्तहोमान्तेऽग्निमालये प्रतिष्ठाप्य पञ्च महायज्ञान्करोति VaikhāGS. 4. 4.

अन्ताकार (antākāra) *m.* syllable *a* at the end (of the word) किं च वर्णा इति बहुत्वस्य विवक्षितत्वे अहमित्यादेरपदत्वप्रसङ्गः। अविवक्षितत्वे देवदत्त इत्यन्ताकारस्य पदत्वापातः KhaṇḍanKhā. 772. 6.

अन्ताक्षर (antākṣara) *n.* last syllable अन्ताक्षराद्य परो गम्यते ṚTPrāti. 278 (1)

अन्ताक्षरसमीप (antākṣara-samīpa) *m.* [Loc.] in the vicinity of the final syllable, before the last syllable वरणकाले वरयिता वर्जयेत्। ... लकाररेफोपान्तां चेति। लकाररेफावन्ताक्षरसमीपे नाम्नि यस्याः JayaMa. 194. 18 (*on* 3. 1)

अन्ताक्षी (antākṣī) *f.* Antioch, PW.; cf. **अन्ताखी.**

अन्ताखी (antākhī) *f.* name of a city, capital of ancient Syria अन्ताखीं चैव रोमां च ... दूतैरेव वशे चक्रे MahāBhā. ii. 28. 49.

अन्ताख्य (antākhya) *adj.* said to be the last one अपि चान्ताख्यानि कर्माणि NidāSū. 34. 5 (2. 8)

अन्ताख्या (antākhyā) *f.* name or appelation for *anta* (end) पर्यास इति च अन्ताख्या MīmāSū. v. 3. 8.

अन्तागमन (antāgamana) *n.* absence of reaching the end, i.e. non-completion कारकमपि प्रारब्धस्यान्तागमनात्प्रतिबन्धसद्भावात् अकृत्स्नं स्यात् Pradī. v. 220A. 28 (*on* vi. 3. 14)

अन्तात्मन् (antātman) *m.* epithet of Śiva (*lit.* of the nature of destruction or dissolution) काव्य: ... तुष्टुवे नीललोहितम्। ... वषट्कारतमायैव तुभ्यमन्तात्मने नम: VāyuP. ii. 35. 194.

अन्तादि (antādi) *m.* **1A** end and beginning आद्यन्तौ अन्तादी MahāBh. i. 437. 7 (*on* ii. 2. 34); JaineVyā. 63. 33 (*on* i. 3. 96); GaṇRa. 2. 86 (127); Prasā. i. 627. 5; [Loc.] at the end and beginning लाटीयोऽनुप्रास: ... सोऽपि द्विधा - प्रतिपादमन्ताद्योर्गर्भ इवानुप्रासविन्यासात् SaraKaṇṭhā. 261. 3; **1B** final (syllable) and initial (syllable) अकारश्च इकारश्च उकारश्च तथा त्रयम्। अन्तादिभावयोगेन सवर्णे तु चतुर्विधम् LaṚkTanSaṁ. 56; संदष्टयमकस्थानमन्तादी पादयोर्द्वयो: Kāvyāda. 3. 51; **2** destraction and creation ब्रह्मादीनां त्वमन्तादी तवाद्यन्तौ न कश्चन DvyāśraKā. 5. 137; **3** the word *antādi* शकहूष्वित्याद्यर्थं पदान्तपदाद्योरेकादेशस्य असिद्धत्वव्यवस्थापनेऽपि 'एक: पूर्वपरयो:' इत्यत: पूर्वपरग्रहणम् 'अन्तादिवच्च' इत्यन्तादिग्रहणं चानुवर्त्य PāṇiTaVāNaMā. 36. 10.

अन्तादि (antādi) *adj.* **1** the word *anta* etc. पदाध्ययनमन्तादिशब्दस्वरार्थज्ञानार्थम् CaturA. (Śau.) 4. 107; **2** moulding of entablature etc. तदूर्ध्वे द्व्यंशकेनैव-मालिङ्गा(ङ्गम)न्तादि योजयेत् MānaSā. 14. 135.

अन्तादिक (antādi-ka) *n.* variety of alliteration अन्तादिकमिति यमकं व्यस्तसमस्ते त्रिधा कुरुत: Kāvyālaṅ. (Ru.) 3. 23; वंशश्च चक्रकाख्यं षष्ठं चान्तादिकं यमकम् Kāvyālaṅ. (Ru.) 3. 30; 3. 50; अन्तर्थतानुस्मरणेनानेकभेदमन्तादिकम् Kāvyānu. (He.) 255. 2; 256. 2.

अन्तादिकवत् (antādika-vat) *adv.* like a variety of alliteration इदमप्यन्तादिकवत्क्रमेण षोढैव भिद्यते भूय: Kāvyālaṅ. (Ru.) 3. 33.

अन्तादिघटितसमुदाय (antādighaṭita-samudāya) *m.* group or collection consisting of (the syllables at) the end and (at) the beginning आनुमानिकादेशकल्पकवाक्यमन्तादिघटितसमुदायस्यैकादेशघटित आदेश: इत्येव LaŚabdeŚe. i. 103. 3.

अन्तादिवत् (antādi-vat) *adv.* (single substitute treated) as the final (of the preceding word) and the initial (of the succeeding word) अन्तादिवच्च P. vi. 1. 85; कथं ब्रह्मबन्ध्वा ब्रह्मबन्ध्वै। उभयत आश्रये नान्तादिवत् MahāBh. i. 152. 1 (*on* i. 1. 58); i. 224. 18 (*on* i. 2. 48); ii. 227. 11 (*on* iv. 1. 66); iii. 60. 1 (*on* vi. 1. 85); iii. 269. 12 (*on* vii. 1. 80); iii. 292. 10 (*on* vii. 2. 36); PariVṛ. (Sī.) 114. 22; PariVṛ. (Nī.) 45. 15; अन्तादिवदित्युच्यत आमिश्रस्यादेशवचनात् MahāBh. iii. 59. 12 (*on* vi. 1. 85); अभ्यासादीनां ह्रस्वत्वे नान्तादिवद्भवति MahāBh. iii. 64. 10 (*on* vi. 1. 85)

अन्तादिवत्त्व (antādivat-tva) *n.* the state of being (single substitute treated) as the final (of the preceding word) and the initial (of the succeeding word) परग्रहणे कृते एकदेशविकारद्वारेण टकारान्तं पदम्। नैतत्। अन्तादिवत्त्व एकदेशविकाराभावात् PariVṛ. (Sī.) 155. 23.

अन्तादिवत्त्वाभाव (antādivattvābhāva) *m.* absence of the state of being (single substitute treated) as the final (of the preceding word) and the initial (of the succeeding word) उपसर्गात् एतेरित्युभयाश्रयणादन्तादिवत्त्वाभावात् Prasā. ii. 189. 18; LaŚabdeŚe. i. 269. 3; i. 332. 27.

अन्तादिवत्सूत्र (antādivat-sūtra) *n.* aphorism containing the expression *antādivat* (the aphorism P. vi. 1. 85) मरुदादिभिरिन्द्रस्य द्वन्द्वे इन्द्रस्यैव पूर्वनिपात इति चेन्न। अनेनैव निषेधेन पूर्वोत्तरपदनिमित्तकार्यात् पूर्वमेकादेशाभावज्ञापनादित्यन्तादिवत्सूत्रे ... भाष्ये स्पष्टम् LaŚabdeŚe. ii. 244. 15.

अन्तादिवद्भाव (antādivad-bhāva) *m.* condition or state attributed (to a single substitute treated) as the final (of the preceding word) and the initial (of the succeeding word) एकादेशे कृते द्विवचनपरोऽयमन्तादिवद्भावेन MahāBh. i. 89. 20 (*on* i. 1. 27); ननु ... खट्वापाद: मालापाद इति। एकादेशे कृतेऽन्तादिवद्भावात् प्राप्नोति MahāBh. i. 224. 16 (*on* i. 2. 48); एकादेशे कृतेऽन्तादिवद्भावात् प्रातिपदिकसंज्ञा भविष्यति MahāBh. ii. 191. 12 (*on* iv. 1. 1); iii. 48. 17 (*on* vi. 1. 69); यस्यान्तादिवद्भाव इष्यते तन्निर्देश: कर्तव्य: MahāBh. iii. 59. 18 (*on* vi. 1. 85); अन्तादिवद्भावेन व्यपवर्ग: MahāBh. iii. 269. 12 (*on* vii. 1. 80); iii. 292. 9 (*on* vii. 2. 36); iii. 324. 15 (*on* vii. 3. 44); iii. 399. 10 (*on* viii. 2. 19); यावेव पूर्वपरौ वर्णावाश्रित्यैकादेश: प्रवर्तते तद्वर्णाश्रयेऽन्तादिवद्भावो नेष्यते PariVṛ. (Sī.) 116. 9; ननु च प्रातिपदिकाप्रातिपदिकयोरेकादेशोऽन्तादिवद्भावात्प्रातिपदिकग्रहणेन गृह्यते Prasā. i. 199. 11; उभयत आश्रये नान्तादिवदित्यन्तादिवद्भावो नास्ति Prasā. i. 297. 9; i. 373. 18; नितान्तपीन्वो जघनस्थलस्य स्थूलस्य चास्या: स्तनमण्डलस्य। एकोऽपि पूर्वोत्तरयो: क्रशीयानन्तादिवद्भावमुपैति मध्य: Ragh. 9. 25.

अन्तादिवद्भावनिषेध (antādivadbhāva-niṣedha) *m.* negation of the condition or state attributed (to a single substitute treated) as the final (of the preceding word) and the initial (of the succeeding word) नित्यत्वादेकादेशे कृते व्यपवर्गाभावादुभयत आश्रये अन्तादिवद्भावनिषेधात् च निघातो न प्राप्नोति Pradī. vii. 59. 11 (*on* viii. 1. 56)

अन्तादिवद्भावप्रतिषेध (antādivadbhāva-pratiṣedha) *m.* negation of the condition or the state attributed (to a single substitute treated) as the final (of the preceding word) and the initial (of the succeeding word) षष्ठे 'अन्तादिवच्च' इत्यत्रापि उपेयाज उपोवापेत्यादावेकादेशे कृते ... अन्तादिवद्भावप्रतिषेधं चोदयित्वा 'न वा बहिरङ्गलक्षणत्वात्' इति समाधानानुपपत्तिश्च PāṇiTaVāNaMā. 31. 19.

अन्तादिवद्भावविधि (antādivadbhāva-vidhi) *m.* rule for the state or condition attributed (to a single substitute treated) as the final (of the preceding word) and the initial (of the succeeding word) (यतिर्विच्छेद:) स्वरूपस्य परादिवद्भावे व्यञ्जनमपि तद्भक्तत्वात्तदादिवद्भवति। 'यदि पूर्वापरौ भागौ न स्यातामेकवर्णकौ' इत्यन्तादिवद्भावविधावपि संबध्यते MṛtaSaṁ. 151. 10 (*on* 6. 1); ChandaśCū. i. 16. 60.

अन्तादिवद्भावाभाव (antādivadbhāvābhāva) *m.* absence of the state or condition attributed (to a single substitute treated) as the final (of the preceding word) and the initial (of the succeeding word) तस्मिन् कृतेऽदन्तत्वाभावाद्वर्णविधावन्तादिवद्भावाभावात्ताद्रूप्यानतिदेशात् स्मायाद्यसिद्धिरिति भाव: Pradī. vi. 21. 21 (*on* vii. 1. 14); उपसर्गात् परस्योहतेर्ह्रस्वो विधीयमान एकादेशे कृते भेदाभावाद्भेदनिबन्धनपौर्वापर्यानुपपत्तेरुभयत आश्रयेऽन्तादिवद्भावाभावाच्च ह्रस्वत्वाभाव: Pradī. vi. 245. 23 (*on* vii. 4. 23); परत्वात्पूर्वरूपे उभयत आश्रयणेऽन्तादिवद्भावाभावात् ... मलोपो न स्यात् LaŚabdeŚe. i. 187. 5; i. 355. 15.

अन्तादिवद्वचन (antādivad-vacana) *n.* statement *antādivat* (as the final and the initial (to the preceding and the succeeding words respectively)) अन्तादिवद्वचनमामिश्रस्यादेशवचनात् Vār. 1 *on* P. vi. 1. 85; तद्यान्तरेण यत्नं न सिध्यतीत्यन्तादिवद्वचनम् MahāBh. iii. 59. 15 (*on* vi. 1. 85)

अन्तादिवर्जित (antādi-varjita) *adj.* devoid of destruction and creation एवं ब्रह्म महाजीवो विद्यतेऽन्तादिवर्जित: YogVā. iii. 14. 35; योऽयं सर्वगतो देव: ... स्वानुभवानन्दस्वरूपोऽन्तादिवर्जित:। एतस्मात् ...। जीव: संजायते YogVā. iii. 64. 1.

अन्तादिवर्ण (antādi-varṇa) *m.* letter at the end and at the beginning 'वर्णाश्रये चान्तादिवत्त्वप्रतिषेधो वक्तव्यो न वा ताद्रूप्यातिदेशात्' इति। अन्तादिवर्णमात्रवृत्तिधर्मानतिदेशात् LaŚabdeŚe. i. 102. 10.

अन्तादिशून्य (antādi-śūnya) *adj.* devoid of the end and the beginning लक्ष्मीकान्तम् ... अन्तादिशून्यं दृष्ट्वा देवं संतुतोष (श्रीपद्मपादाचार्य:) ŚaṅkaDigVi. (Mā.) 14. 61.

अन्तादिसंदंश (antādi-sandaṁśa) *m.* joining of the end and the beginning (of Pādas) उपोढरागाप्यबला मदेन सा मदेनसा मन्युरसेन योजिता। न योजितात्मानमनङ्गतापितां गतापि तापाय ममास नेयते। अत्रान्तादिसंदंशादव्यपेतं (यमकम्) प्रवर्तते SaraKaṇṭhā. 211. 18.

अन्त्यक्षणानुपपत्ति (antyakṣaṇānupapatti) *f.* untenability of the last moment संततेः अनादित्वात् संसारस्य अवस्तुत्वाच्च नोत्पादः नोच्छेदः, अवस्तुत्वात् अन्त्यक्षणानुपपत्तेश्च BrahmSi. 15. 5; उत्पन्नस्यानुत्पादो न शक्यः, नापि संताननिवृत्तिः शक्या कर्तुमन्त्यक्षणानुपपत्तेः TātpaṬ. (Vā.) 242. 19 (*on* i. 1. 22)

अन्त्यक्षणावच्छिन्न (antyakṣaṇāvacchinna) *adj.* delimited by the last moment अन्त्यक्षणावच्छिन्नस्यैव तादृशस्वोपादाननाशकताया वाच्यत्वात् ... तादृशोपादाननाशत्वावच्छिन्नस्यान्त्यज्ञानोत्पत्तिद्वितीयक्षण एव संभवादन्त्यज्ञानस्य न क्षणिकता LaCandr. 887. 11.

अन्त्यक्षणोपपत्ति (antyakṣaṇopapatti) *f.* tenability of the last, i.e. efficacious moment अनागतानुत्पादलक्षणार्थक्रियाकारित्वादन्त्यक्षणोपपत्तिरिति भावः TātpaṬ. (Vā.) 242. 24 (*on* i. 1. 22)

अन्त्यक्षीरा (antya-kṣīrā) *adj.* (*f.*) (used as noun) (offering) which has milk at the end द्रव्याणां कथितमिह षोडशकम्। लाजान्तेऽन्त्यक्षीरा प्राक् समर्प्य सितोपलापुञ्जम् PañcRā. (Nā.) iii. 13. 12.

अन्त्यखण्ड (antya-khaṇḍa) *n.* last part or division (भारतस्यापि मध्ये नव खण्डानि) नागं च सौम्यमिह वारुणमन्त्यखण्डं गान्धर्वसंज्ञमिति भारतवर्षमध्ये Golā. 185. 13 (3. 41)

अन्त्यखण्डहृद् (antyakhaṇḍa-hr̥d) *adj.* divided by the last part शरावशेषकं खनागवेदतश्च्युतम्। नवघ्नमन्त्यखण्डहृद्दलीकृतं स्थितिस्तदा KaraṇaKu. 9. 14 (33)

अन्त्यखेट (antya-kheṭa) *m.* planet occupying the last, i.e. the twelfth house in the horoscope ज्ञोद्यब्ध्यर्यष्टखायेषु जन्मतश्च न विध्यते। धीत्र्यंङ्गाद्याष्टान्त्य-खेटैर्जन्मतो व्यब्जकैः शुभः NāraS. 12. 4.

अन्त्यग (antya-ga) *m.* final long syllable गाथाद्यर्धेऽन्त्यगात्प्राक् चो वृद्धौ जातीफलम् Chandonu. 4. 18.

अन्त्यग (antya-ga) *adj.* occupying the last, i.e. the twelfth house in the horoscope षष्ठाष्टमान्त्यगश्चन्द्रो भोक्तुश्च निधनप्रदः VasiS. 27. 10; तन्वन्त्यगेषु सौम्येषु परेष्वरिभवेषु च। जीमूतयोगः VasiS. 37. 209; भौमेऽन्त्यगे धने सूर्ये वादात्क्लेशं विनिर्दिशेत् TājiNī. 2(5)(8) 10 (251)

अन्त्यगत (antya-gata) *adj.* **1** occurring in the final position आदिगतं तुर्यगतं पञ्चमकं चान्त्यगतम्। स्याद्गुरु चेत्तत्कथितं माणवकाक्रीडमिदम् ŚrutaBo. 12; **2A** occupying the last, i.e. the twelfth house in the horoscope भवदश-माद्यकलत्रत्रिषट्सु निशाकरोऽत्र बली। नैधनजलधीष्वर्थनवान्त्यगतैर्विबुधखेचरैर्न हतः VasiS. 18. 3; 33. 6; **2B** occupying the last portion (of a zodiac sign) अन्त्यगतौ शनिशशिनौ सदैव फलदः शशाङ्कसुतः VasiS. 18. 15; **3** highest or greatest (equation of conjunction) शुक्रारयोश्चलभवोऽन्त्यगतो यदाङ्कः शेषांशकाश्च पतिताः पृथगक्षभूम्यः GrahaLā. 3. 13 (comm. सर्वान्तिमः)

अन्त्यगमन (antya-gamana) *n.* intercourse by a woman of the higher caste with a man of the lowest caste, Apte.

अन्त्यगामिनी (antya-gāminī) *adj.* (*f.*) who approaches a man of the lowest caste 'हीनामि'त्यस्य व्याख्या अन्त्येति। अन्त्यगामिनीं न त्वन्त्यामित्यर्थः BālamBha. ii. 338. 22 (*on* 2. 289)

अन्त्यगुणव्रत (antya-guṇavrata) *n.* last vow or duty of secondary importance पापोपदेशोऽपध्यानं हिंस्रोपकरणार्पणम्। प्रमादाचरणं चापि त्यज्यतेऽ-न्त्यगुणव्रते PārśvaC. 6. 761.

अन्त्यगुणानुभव (antyaguṇānubhava) *m.* experience of the last quality क्रमभाविनां संस्काराणामन्त्यगुणानुभवानन्तरं शतव्यवहारसंवर्तकादृष्टाद्युगपदभिव्यक्तौ ... अनुभवस्मरणाभ्यामपेक्षाबुद्धिभ्यां स्वाश्रयेषु शतसंख्या जन्यते NyāyKa. 119.1.

अन्त्यगृहाधिप (antyagr̥hādhipa) *m.* lord of the last, i.e. the twelfth house in the horoscope लग्नादन्त्यगृहाधिपे बलवति स्वर्क्षे चिरायुः सुखी लग्नेशो यदि रन्ध्रपश्च बलिनौ केन्द्रस्थितौ चेत्तथा JātaPāri. 14. 53.

अन्त्यगोदान (antya-godāna) *n.* gift of a cow as the concluding rite विष्णुश्राद्धम् ...। ततोऽग्निस्थापनादिपूर्ववदष्टाविंशतीर्व्याहृतीर्जुहुयात्। एवं प्रायश्चित्तं कृत्वा अन्त्यगोदानं कुर्यात् BālamBha. iii. 213. 14 (*on* 3. 327)

अन्त्यग्रहण (antya-grahaṇa) *n.* **1** mention of the word *antya* अन्त्यग्रहणात् समुदायस्यैव अन्त्योऽल् भवति Nyās. i (1). 123. 4 (*on* i. 1. 65); अन्त्यग्रहणं तु आदिनिवृत्त्यर्थं स्यात् Pradī. ii. 129A. 12 (*on*. i. 3. 3); PadMañ. *on* KāsiVr̥. *on* P. i. 3. 3 (395. 12); **2** acceptance of the latter (option or alternative) अश्विन्यादयः केवलनक्षत्रवाचकास्तद्युक्तचन्द्रवाचकाश्च। तत्राद्येऽप्राप्तिपूर्वकप्राप्तिरूपयोग-स्यासंभवात् अत्रान्त्यग्रहणम् LaŚabdeŚe. ii. 235. 9.

अन्त्यग्रहणसामर्थ्य (antyagrahaṇa-sāmarthya) *n.* [Inst.] on the strength of the mention of the word *antya* समुदायद्वारावयवस्याप्युपदेशकरणत्वात्तदन्त्यस्यापि लोपापत्तिरित्याशयात्। भाष्यकृता चान्त्यग्रहणसामर्थ्येन प्रत्याख्यातम् LaŚabdeŚe. i. 20. 20.

अन्त्यग्रैवेयक (antya-graiveyaka) *m.* [Jain.] last of the nine deities called Graiveyaka समाचारी पालकानामन्त्यग्रैवेयकावधि TriṣaŚaPuC. ii. 3. 791.

अन्त्यग्रैवेयकत्रिक (antya-graiveyakatrika) *n.* last triad of the nine deities called Graiveyaka विमानानां शतं त्वेकमन्त्यग्रैवेयकत्रिके। अनुत्तरविमानानि पञ्चैव हि भवन्ति तु TriṣaŚaPuC. ii. 3. 779.

अन्त्यघटक्षण (antya-ghaṭakṣaṇa) *m.* last moment of a jar अन्त्यघटक्षण-सत्त्वात्पूर्वघटक्षणसत्त्वानि विनाशीनि घटक्षणसत्त्वात् अन्त्यघटक्षणसत्त्ववदिति BrahmSūBh. (Rā.) 490. 6 (*on* ii. 2. 24)

अन्त्यघन (antya-ghana) *m.* (Math.) cube of the last, i.e. the first digit (in the cube of addition of two digits) स्थाप्योऽन्त्यघनोऽन्यकृतिस्त्रिगुणोत्तरसंगुणा च यत् प्रथमा BrāhmSphuSi. 12. 6; अन्त्यघनादपहृतघनमूलकृतित्रिहतिभाजिते भाज्ये। प्राक्त्रिहताप्तस्य कृतिः शोध्या GaṇiSāSaṁ. 1. 53.

अन्त्यघात (antya-ghāta) *m.* (Math.) highest value in the operation of self-multiplication (i.e. squaring or cubing of the same bracket) आद्यवधो गुणकगुणः सहान्त्यघातेन कृतमन्त्यम् BrāhmSphuSi. 18. 64.

अन्त्यच (antya-ca) *m.* final syllabic unit of four (Mātrās) त्रिष्वप्यन्त्यचस्य ते तरङ्गकम् Chandonu. 4. 74 (ChandaśCū. अन्त्यस्य चतुर्मात्रस्य)

अन्त्यचकार (antya-cakāra) *m.* last particle *ca* आद्यचकारेण नदीतीरभूमेः समुच्चयः। मध्यमान्त्यचकारौ मृत्तोययोः परस्परसाहित्यं सूचयतः VīraMi. 813. 25 (*on* 3. 32)

अन्त्यचुम्बन (antya-cumbana) *n.* last, i.e. parting kiss अन्त्यचुम्बन-संक्रान्तात्कस्तूरीतिलकान्निजान् (त्) ।प्रत्यभ्यजानात् कान्तस्य काप्यास्यं न पुनर्वपुः PāṇḍaC. 13. 1063.

अन्त्यचुम्बनव्याज (antyacumbana-vyāja) *m.* [Abl.] under the pretext of a last, i.e. parting kiss काप्यन्त(v.l. न्त्य Bhāvanagara Ed.)चुम्बनव्याजादभिज्ञानं प्रियानने। निजौष्ठयावकैः क्लृप्तं नापश्यत् रुधिरैस्तदा PāṇḍaC. 13. 1064.

अन्त्यचेतस् (antya-cetas) *n.* last consciousness चित्तान्तरस्य संधाने को विरोधोऽन्त्यचेतसः। तद्वदप्यर्हतश्चित्तं असंधानं कुतो मतम् PramāVār. 2. 45.

अन्त्यज (antya-ja) *m.* **1** tribesman staying or living on the border or outskirts **2Ai** Cāṇḍāla **ii** Sūdra **iii** man born in the lowest caste **iv** variety of Śūdra **B** man of any of seven inferior tribes such as washerman, currier, mimic, cane-splitter, fisherman, mixed caste and forester **Ci** out-caste **ii** man born of a Śūdra father and mother belonging to one of the three higher Varṇas **D** one born in the immediately lower class **3A** lowest type of ruby **B** type or variety of dog **1** tribesman staying or living on the border or outskrits अथर्त्विजां वरणं विज्ञायते ... न परिखातिक्रान्ता नान्तगा नान्त्यजा नाननूचानाः BaudhŚS. i. 36. 8; न परिखातिक्रान्तं याजयेन्नान्तगं याजयेन्नान्त्यजं याजयेत् BaudhŚS. iii. 198. 1; त्यक्तात्मानः सर्व एते अन्त्यजा ह्यनिवर्तिनः। पुरस्कार्याः सदा सैन्ये हन्यन्ते घ्नन्ति चापि ते MahāBhā. xii. 102. 19 (BhārBhāDī. अन्त्यजाः प्रान्तदेशोद्भवाः कैवर्तभिल्लादयः); **2Ai** Cāṇḍāla संसृष्टं यस्तु पक्वान्नमन्त्यजैर्वाप्युदक्यया। अज्ञानाद् ब्राह्मणोऽश्नीयात् प्राजापत्यार्धमाचरेत् AtriS. 175; उदक्यां सूतिकां वापि संस्पृशेदन्त्यजो यदि। त्रिरात्रेण विशुद्धिः स्यादिति YamaSm. 1. 11; अद्भिः ... असंस्पृष्टाभिरन्त्यजैः। यः स्नानमाचरेन्नित्यं तं प्रशंसन्ति देवताः BṛParāSm. 2. 115; उदक्या ब्राह्मणी स्पृष्टा मातङ्गपतितेन च (v.l. पतितेनान्त्यजेन वा)। चान्द्रायणेन शुध्येत द्विजानां भोजनेन च BṛParāSm. 8. 174; उन्मत्तं शवमन्त्यजं शुध्यति VṛŚātāSm. 22; अन्त्यजम्। ... स्पृष्ट्वा सवासा जलमाविशेत् LaghvāśvaSm. 22. 13; (वैष्णवेन) यदि ... अज्ञात्वा भक्षितं पुरा ... अन्नादिकम् ... संस्पृष्टमन्त्यजेनापि ... भुक्त्वा ... पञ्चगव्यं समाचरेत् JayāS. 25. 14; अन्त्यजातपादजाद्वैश्यात्क्षत्रियाद्ब्राह्मणादपि। दशोत्तरगुणैः पापैर्लिप्यते धनहारकः BrahmāṇḍP. iii. 7. 8; काषायवाससश्चैव क्रव्यादांश्चाधिरोहति। अन्त्यजैर्गर्दभैरुष्ट्रैः सहैकत्रावतिष्ठते YājñaSm. 1. 273; Mitā. 98. 12 (*on* 1. 273); VīraMi. 331.14 (*on* 1. 273); संपर्क यदि गच्छेत्तु उदक्या चान्त्यजैस्तथा ... प्रायश्चित्तं कथं भवेत् ĀpaSm. 4.6; अन्त्यजः पतितो वापि निगूढो यत्र तिष्ठति LaHāriSm. 14; (संवर्तः-अन्त्यज्यः ... निगूढो यत्र तिष्ठति) अन्त्यजोऽत्र चण्डालः Aparā. 1199. 9 (*on* 3. 292); रविरश्मिरत्नपावकमाहेयीवायवोऽन्त्यजैः स्पृष्टाः। न हि दुष्टाः YaśasCam. i. 457. 1; उच्छिष्टः स्वयमुच्छिष्टमन्त्यजं स्पृशेद्यदि त्रिरात्रोपोषितः स्नातः स्वजातीश्चरायुतं जपेत् ĪśānŚiPa. ii. 20. 33(8); वध्यस्तेन निदेशितः। अन्त्यजानां वधादेशकारिणामर्पितो भटैः SamarāSaṁ. 6. 120; अस्मिन्सति मत्सूनो राज्यं न भविष्यतीत्याशङ्क्यान्त्यजेभ्यो वधाय तं समर्पयामास PrabaCin. 22. 8; संस्कारो जायते लेके स्पृष्टाता(ना)मन्त्यजैरपि। स्वर्गादिसाधनं सर्वं सूर्यरूपस्य ते नृणाम् BṛBrahmaS. i. 2. 77; **2Aii** Śūdra येन केनचिदङ्गेन हिंस्याच्चेच्छ्रेष्ठमन्त्यजः ManuSm. 8. 279; विप्रादितः शुक्रगुरू कुजार्कौ शशी बुधश्चेत्यसितोऽन्त्यजानाम् Brhajjā. 2. 7; ब्राह्मणी क्षत्रिया वैश्या शूद्रा नीता यदान्त्यजैः। ब्राह्मण्याः कीदृशं न्याय्यं प्रायश्चित्तं विधीयते DevaSm. 37; ब्राह्मणो वान्त्यजो वापि ... पराप्रासादजापी यः स मुक्तो नात्र संशयः KulārT. 3. 84; ब्राह्मणे जातिमात्रेऽपि धार्मिके चान्त्यजेऽपि वा। धर्मोन्निनीषया धीमान् न वधं दण्डमादिशेत् NītiSā. 18. 13; वृत्तिः संकरजातीनां तत्तत्कुलकृता भवेत्। अचौराणामपापानामन्त्यजान्तेवसायिनाम् BhāgP. vii. 11. 30 चतुर्वर्णान् ... विप्रश्शुक्लो नृपो रक्तः पीतो वैश्योऽन्त्यजोऽसितः SarvaSiSaṁ. 11. 48; अन्त्यजः शूद्रश्चण्डालपर्यन्तः ManuBh. ii. 194. 8 (*on* 8. 279); ii. 229. 7 (*on* 8. 385); विप्रश्चतस्रो विन्देत भार्यास्तिस्रस्तु भूमिपः। द्वे च वैश्यो यथाकामं भार्यैकामपि चान्त्यजः AgniP. 154. 1; जातिहीनाश्च चण्डाला श्वपचा ह्यन्त्यजा ह्यमी। शिवभक्तिपरा नित्यं ते यान्ति परमां गतिम् SkandP. i(1). 19. 67; अन्त्यजः परिज्ञेयो मातृविक्रयकारकः SkandP. vi. 167. 44; कीनाशश्च स्मृतो वैश्यः शूद्रश्चान्त्यज उच्यते ViṣṇuDhaP. iii. 10. 3; अन्त्यजाः प्रतिलोमाः ĪśānŚiPa. ii. 20. 34; अन्त्यजः शूद्रः ManvaVi. 1043. 3 (*on* 8. 279); ManvaMu. 339. 19 (*on* 8. 279); DaṇḍaVi. 255. 6; यत्राम्बु निन्दत्यमृतमन्त्यजाश्च सुरेश्वरान्। चिन्तामणिं च पाषाणास्तत्र नो वसतिः प्रभो BhojPra. 61. 6; पातालमभूत्। ... सुरार्भकपराभूतं भूतैराक्रान्तमन्त्यजैः YogVā. v. 37. 17; अन्ते भवोऽन्त्यजः, यस्मादधमो नास्ति चाण्डालादिस्तस्य स्त्रियं गच्छन् सहस्रं दण्ड्यः ManvaMu. 358. 4 (*on* 8. 385); BālamBha. ii. 335. 5 (*on* 2. 286); **2Aiii** man born in the lowest caste स्वसुः सख्याः सगोत्राया उत्तमवर्णायाः कुमार्या अन्त्यजाया रजस्वलायाः शरणागतायाः प्रव्रजिताया निक्षिप्तायाश्च ViṣṇuSm. 36. 7; न म्लेच्छान्त्यजपतितैः सह संभाषणं कुर्यात् ViṣṇuSm. 64. 15; 71. 59; स्वामिन् इह विसंवादयत्यात्मानमन्त्यजोऽहमिति Avimā. 1.5 (42); तस्य पुरुषस्य प्रवृत्तिमन्वयं च ज्ञातुमन्यापदेशेन गतवानस्मि।... श्रुतमस्माभिरन्त्यज इति Avimā. 1. 6 (17); स्नानम् ...। नाभिं यावत् विशस्तद्विलिङ्गशौचोऽन्त्यजः शुचिः BṛParāSm. 8. 277; रजस्वला यदा स्पृष्टा चाण्डालान्त्यजवायसैः। तावत्तिष्ठेन्निराहारा स्नात्वा कालेन शुध्यति VṛŚātāŚm. 19; तथा शस्त्रभयं विन्द्यादन्त्यजस्य गृहेण तु MatsyaP. 255. 14; अन्त्यजोऽपि यदा साक्षी विवादे संप्रजायते। न तत्र युज्यते दिव्यम् PañcT. (Kos.) 1. 452 (97. 8); Pañcā. 111. 3; PañcT. (Kos.) 5. 84 (261. 25); रजस्वलान्त्यजैः स्पृष्टा शुना च श्वपचेन च। त्रिरात्रोपोषिता भूत्वा पञ्चगव्येन शुध्यति ĀpaSm. 7.7; अन्त्यजं त्वनन्त्यजातिनम्। अन्त्यजानां स्वार्थानिवेदकत्वमाज्ञाकर्तृत्वं च Bārhas. 1. 82; नियतिबलाल्लूनबन्धनस्तमसिमाच्छिद्यान्त्यजं तम् ... प्रहृत्यापसरम् DaśKuC. 82. 8; राष्ट्रान्तपालाटविकानतानां (v.l. °कान्त्यजानां) बाह्यप्रकोपोऽन्यतमप्रकोपः NītiSā. 16. 21; कर्मब्रह्मोभयभ्रष्टं तं त्यजेदन्त्यजं यथा KulārT. 1. 78; 2. 18; रजस्वलान्त्यजम्लेच्छपतिताव्रतिकैस्तथा। द्विजद्विड्वेदबाह्यैश्च न वदेत्सर्वदा व्रती SkandP. ii (4). 6. 51; iv. 98. 52; चण्डालादन्त्यजाद्वापि प्रतिगृह्णाति दक्षिणाम्। याजको यजमानश्च स स्यादश्मनि कीटकः VāmaP. 12. 36; अन्त्यजानन्त्यजातींश्च सोऽपश्यत्तस्य चोदरे BrahmP. 54. 13; श्रोत्रिये चान्त्यजे वापि समं चन्द्रः प्रकाशते BrahmP. 159. 34; (ततोपसृष्टः) अन्त्यजैर्गर्दभैरुष्ट्रैः सहैकत्रावतिष्ठते BhaviP. 53A. 19 (i. 23. 7); ViṣṇuDhaP. ii. 105. 4; (सप्तमीव्रतम्) पाषण्डिनो विकर्मस्थान्बैडालव्रतिकान्त्यजान्। सप्तम्यां पालयेत् प्राज्ञः BhaviP. 152A. 29 (i. 101. 8); 328A. 15 (ii (1). 7. 99); अन्त्यजा पुल्कसा म्लेच्छा ये चान्ये पापयोनयः ĀdiP. 28. 52; शूद्रः स्त्री चान्त्यजोऽपि च। पराङ्मुखः शिवार्चायां योऽर्चयेद्देवतागणम्। विफलं तस्य तत्सर्वम् BṛDharmaP. i. 57. 62; सामनाम्नाभवत्पूर्वं तत्रैव नगरेऽन्त्यजः GaṇeP. i. 59. 9; क्रमाद्यानशनेनोभौ विपन्नौ तौ द्विजान्त्यजौ KathāSaSāg. vi. 1. 128; शुध्यति ... आचम्याद्भिश्चान्त्यज शूद्राद्यवलोके ĪśānŚiPa. i. 7. 34; तथा नेक्षेत पाषण्डिपातकिश्चान्त्यजाशुचीन् ĪśānŚiPa. i. 9. 38; ii. 3. 33; कारवश्चान्त्यजाश्चैव स्वकर्मफलजीविनः। माययालीकशपथैः कुर्वते साधुवञ्चनम् TriṣaŚaPuC. iv. 5. 291; संन्यासिश्रावकान्त्यजाः। कर्णनासादिभिर्हीना विकेशाः कृष्णवाससः। ... एतेषां दर्शने जाते न गन्तव्यं कदाचन Mānaso. ii. 13. 815; iv. 2. 142 (?342); नवमे समरादित्यो गिरिसेनः परोऽन्त्यजः SamarāSaṁ. 1. 35; 6. 74; धर्मे प्राणवधो यद्वद् वेदोद्धारे यथान्त्यजः ... तथात्र त्वं न चित्तहृत् PrabhāC. 92. 18; वन्दन्ते द्विजमन्त्यजे निवसति व्रीडाविहीना जनाः Hāsyārṇa. 1. 11; शुद्धो विप्र इवान्त्यजम् ... तृणतुल्यमेव गणिका निःस्वं जनं पश्यति Mugdhopa. 13; सोऽन्त्यजं पथि निरीक्ष्य चतुर्भिर्भीषणैः श्वभिरनुद्रुतमारात्। गच्छ दूरमिति तं निजगाद ŚaṅkaDigVi. (Mā.). 6. 25; सः वर्तनाय भार्यामादाय एकमन्त्यजं च सहायं कृत्वा देशान्तरं चलितः PurāPraSaṁ. 101. 26; इत्याकर्ण्य श्रीमुञ्जेनान्त्यजेभ्यः। तैः सानुकम्पैरभीष्टदेवं स्म PurāPraSaṁ. 129. 3; अन्त्योऽन्त्यजः ManvaVi. 915. 12 (*on* 8. 66); VīraMi. (Lakṣaṇa.) 120. 13; सीरभेदैः कृषिः प्रोक्तामन्वाद्यैर्ब्राह्मणादिषु। ... द्विगवं वान्त्यजैः सीरं दृष्ट्वा भूमार्दवं तथा BallāC. 66. 6; चक्राङ्कितस्य नेच्छन्ति दुर्गतिं यमकिंकराः। श्मशाने मागधे देशे म्लेच्छदेशेऽन्त्यजां गणे BṛBrahmaS. i. 5. 97; **2Aiv** variety of Śūdra शूद्रः ... तद्भेदास्त्वन्त्यजाः स्मृताः AbhidhāRaMā. 2. 237; **2B** man of any of the seven inferior tribes such as washerman (Rajaka), currier (Carmakāra), mimic (Naṭa), cane-splitter (Varuḍa), fisherman (Kaivarta), mixed caste (Meda) and forester (Bhilla) रजकश्चर्मकारश्च नटो बुरुड एव च। कैवर्तमेदभिल्लाश्च सप्तैते चान्त्यजाः स्मृताः AtriS. 199; YamaSm. 1. 33; DaṇḍaVi. 177. 16; ManvaMu. 159. 7 (*on* 4. 79); भाण्डस्थमन्त्यजानां तु जलं दधि पयः पिबेत् ParāSm. 6. 30; एतेऽन्त्यजाः समाख्याता ये चान्ये च गवाशनाः। एषां संभाषणात्स्नानं दर्शनादर्कवीक्षणम् VedavyāSm. 1. 13; अग्राह्याः मनुना प्रोक्ताः कर्मणा सप्त चान्त्यजाः DevīBhāP. vii. 13. 19; अन्त्यजः प्रसिद्धश्चर्मकरादिः SmṛtiCan. iv. 745. 19; **2Ci** out-caste धीवरादपि शूद्रायां मल्लजातिर्बभूव ह। इत्यादयोऽन्त्यजाः प्रोक्ता वर्णाश्रमबहिष्कृताः BṛDharmaP. ii. 13. 48; अन्त्यजा वर्णबाह्याः TattvPrakā. 5B .8 (*on* i. 1. 1); **2Cii** man born of a Śūdra father and mother belonging to one of the three higher Varṇas अन्त्यः शूद्रः तेन पूर्ववर्णेषु त्रिषु जाता अन्त्यजाः ... गृह्यन्ते BālaKrī. ii. 91. 15 (*on* 3. 226 (?232)); अन्त्यज इति।... अन्ते भवोऽन्त्यः शूद्रवर्णस्तस्माज्जात इति वा। अन्त्यः सन् जात इति वा BālamBha. ii. 306. 24 (*on* 2. 215); **2D** one born in the immediately lower class, cf. **अन्त्यजत्व 2**; **3A** lowest type of ruby माणिक्यस्य प्रवक्ष्यामि यथाजाति ... चतुष्टयम्। रक्तश्वेतो भवेद्विप्रः ... रक्तनीलस्तथान्त्यजः YuktiKa. 88. 17; 88. 19; 89. 4; **3B** type or variety of dog प्रवृद्धपुच्छा लघुसूक्ष्मदन्तास्ते चान्त्यजाः कुक्कुरजातयः स्युः YuktiKa. 214. 4 [Kośas give *antyaja* as the synonym of *tya*, DvyakṣaNā. 2. 13; they also give *antyaja* as the meaning of the follwoing words: *adhama*, NānārthSaṁ. 7. 63; *antevāsin*, AnekāSaṁ. 4. 158; *antya*, Vaija. 228. 1; *ugra*, TrikāŚe. iii. 3. 333; *mātaṅga*, ŚabdaRaSaK. 65. 14; *śaka*, ParaNā. 3315; AnekāTi. 2. 303]

अन्त्यज (antya-ja) *adj.*[*f.*-ā] **1** of or belonging to the lowest caste न शूद्रराज्ये निवसेत् ... नोपसृष्टेऽन्त्यजैर्नृभिः ManuSm. 4. 61; शुद्ध्येतार्कावलोकनात्। अवलोक्य तथोदक्यामन्त्यजं पतितं शवम्।... एतदेव हि कर्तव्यम् MārkP. 35. 34; नृणामन्त्यजानामपि स्वार्थदाने। गुहाद्देवमन्यं न जाने न जाने Subrahma.

27; वासयेदथ। प्रान्ते म्लेच्छान्त्यजक्रूरवीरसैनिककर्कशान् YuktiKa. 24.9; अन्त्यजां स्त्रीं गां च गच्छतो मध्यमसाहसो दण्ड: Aparā. 859. 24 (*on* 2. 289); धनोऽथ कुपितैर्नीत: श्मशानं राजपुरुषै:। समर्पितोऽन्त्यजस्यैष वधकस्य वधाय च SamarāSaṁ. 4. 130; चाण्डालादिभिश्चान्त्यजैरुपद्रुते न वसेत् ManvaMu. 155. 31 (*on* 4.61); **1B** of or belonging to the lowest type सर्वदा जलमिच्छन्ति येऽल्पसत्त्वा महौजस:। भारसहा: कुशृङ्गा तेऽन्त्यजा महिषा मता: YuktiKa. 211. 2; **2** lowest (condition) नरके ... यातना घोरा ... भुक्त्वा समागता ह्यत्र ते यास्यन्त्यन्त्यजां गतिम् SkandP. v(3). 155. 85; **3** effected from the twelfth house in the horoscope फलम्। ... व्यापारलाभान्त्यजम् ... निगदितम् JātaPā. 18. 176.

अन्त्यज (antya-ja) *n.* (the state of being the) man of one of the seven inferior tribes अन्त्यजं पक्षिभावं स्थावरतां च मनोवचनकर्मकृतैर्दोषैरुपभुक्तशेषैरयं जीवो याति DīpKa. 87. 5 (*on* 3. 131)

अन्त्यजकलि (antyaja-kali) *m.* quarrel among persons born in the lowest caste कुटुम्बमेलिकलकलोदर्गलश्चान्त्यजकलि: (इत्याद्यनेकधा ... जानपद: कलि:) UdaySuKa. 79. 9.

अन्त्यजगमन (antyaja-gamana) *n.* intercourse (between a woman of the higher caste) with a man of the lowest caste, MW.

अन्त्यजगृह (antyaja-gṛha) *n.* house of a person born in the lowest caste राज्ञा अन्त्यजात् (v.l.अन्त्यजगृहेषु) निमन्त्रापित: KumāPraPra. 90. 17.

अन्त्यजग्रहिन् (antyajagrah-in) *adj.* possessed of, i.e. haunted by the evil spirit of the lowest caste विट्पङ्कलेपो रक्ताक्षस्तर्जयन् रक्तलोचन:। बह्वाशी दीनवाग् लुब्ध: साङ्कम्पोऽन्त्यजग्रही ĪśānŚiPa. i. 42.21.

अन्त्यजग्रामसंनिधि (antyajagrāma-sannidhi) *m.* vicinity of the village of the Śūdras अर्द्धक्रोशान्नदीकूलं वर्जयित्वा द्विजोत्तम:। नान्यत्र निवसेत्पुण्यां नान्त्यजग्रामसंनिधौ KūrmaP. 556. 15 (2. 16); PadmP. i. 55. 23 (v.l.)

अन्त्यजङ्घादिपरिधि (antyajaṅghādi-paridhi) *m.* circumference of the hindleg, i.e. hock at the ankle-joint etc. मणिबन्धमणेर्ज्ञेय: परिधिश्च नवाङ्गुल: अन्त्यजङ्घादिपरिधिर्विज्ञेय: पूर्ववद् बुधै: ŚukraNī. 4 (7). 58.

अन्त्यजजन (antyaja-jana) *m.* **Ai** Cāṇḍāla person अन्त्यजजनमिवागम्यविषयाभिलाषम् ... राजकुलं विवेश Kād. 91. 21; **Aii** Śūdra person पृष्टश्च किमिदं कर्म तवान्त्यजजनोचितम् SkandP. vi. 31. 87; **B** people of one of the seven inferior tribes वर्णव्यवस्थितिरिहैव कुमारिकाख्ये शेषेषु चान्त्यजजना निवसन्ति सर्वे Golā. 185. 14 (3. 42)

अन्त्यजजनदूषित (antyajajana-dūṣita) *adj.* defiled by the persons of one of the seven inferior tribes साधकान्तरसेवितं मानुषप्रतिष्ठितं पूजारहितं म्लेच्छान्त्यजजनदूषितं चलितभिन्नादिदोषदुष्टमनेकलिङ्गं च वर्ज्यम् ĪśānŚiPa. ii. 19. 23 (2)

अन्त्यजजाति (antyaja-jāti) *adj.* **A** (used as noun) (people) born of one of the seven inferior tribes चण्डालान्त्यजजातीनां संसर्गात् पतितो भवेत् Mānaso. i.5.55; **B** born in the lowest caste स्त्रियो वैश्यास्तथा शूद्रा म्लेच्छा वान्त्यजजातय: ... सर्वे नमस्या: BṛBrahmS. i. 13. 57.

अन्त्यजजाति (antyaja-jāti) *f.* **A** class of the Cāṇḍāla वर्धमाने पुरे पूर्वमासीदन्त्यजजातिज:। चण्डाल: कुंभको नाम निर्दय: पापकर्मकृत् SkandP. vi. 199. 113; **B** class of the Śūdra ब्राह्मण: क्षत्रियो वैश्य: शूद्रो वाऽन्त्यजजातिज:। शिवभक्तो सदा पूज्यो सर्वावस्थां गतोऽपि SaurP. 64. 41; **C** class of people born in the lowest caste किरात: स्यात् ... अन्त्यजजातिभेदे KośaKaTa. 2. 5480.

अन्त्यजजातीय (antyajajātīya) *adj.* belonging to the class of people born in the lowest caste मन्यमानश्च तत्सत्यं दु:खेन महतान्वित:। नूनमन्त्यजजातीयो भविष्यति सुतापति: SkandP. vi. 199. 151.

अन्त्यजजात्यादि (antyajajāty-ādi) *adj.* class of people born in the lowest caste etc. तथान्त्यजजात्यादिपरिहारेण स्वानुरूपजातियोगित्वमपीत्यादि सर्वं द्रव्यगुणकर्मादि सक्तिकारणमनुक्तं स्यात् NyāyMañ. ii. 56. 10.

अन्त्यजतस् (antyaja-tas) *adv.* compared to the Śūdra अन्त्यजोऽपि वर: काश्यां नान्यत्रश्रुतिपारग:। संसारपारग: पूर्वस्त्वन्त्यश्चान्त्यजतोऽप्यध: SkandP. iv. 97. 276.

अन्त्यजत्व (antyaja-tva) *n.* **1A** the state of being a Śūdra दैवं रूपम् ... यद्येवं स्यात् सत्यमस्यान्त्यजत्वं व्यर्थोऽस्माकं शास्त्रमार्गेषु खेद: Avimā. 1. 7; क्रुद्धत्वाद्दु:खितत्वाद्य सीताया अपमाननात्। अन्त्यजत्वं परं प्राप्तो रजक: क्रोधनाभिध: PadmP. iv. 57. 65; **1B** the state of being a Cāṇḍāla अन्त्यजत्वं गतस्यापि त्रिशंकों: पृथिवीपते:। यज्ञभागभुजो देवा: प्रत्यक्षेण विनिर्मिता: SkandP. vi. 212. 5; **2A** the state of being one born in the lowest caste ते वयं राजशार्दूल परित्यज्य गृहादिकम्। अन्त्यजत्वं गमिष्यामस्त्वया सार्धमसंशयम् SkandP. vi. 3. 31; दरिद्रोऽसावन्त्यजत्वमुपेष्यति SkandP. vi. 216. 100; अन्त्यजत्वं स्वकर्मणा ... लभते नात्र संशय: BrahmVaiP. ii. 24. 22; तामसा: ... अन्त्यजत्वं ततस्तिर्यक्त्वं तत: कृमिकीटादिजन्म ... गच्छन्ति GītāBh. (Rā.) 594. 10 (*on* 14. 18); पापानि पूर्वाणि तैर्यथासख्यमन्त्यजत्वं पक्षित्वं स्थावरत्वं च भवशतेषु कुत्सितयोनिशतेषु च याति Aparā. 996. 6 (*on* 3. 130); **2B** the state of being one born in the (immediately) lower class वैश्यस्य क्षत्रियानन्तरभावित्वेन न्यूनत्वेनान्त्यजत्वात्क्षत्रियस्य तदपेक्षया ज्यायस्त्वेनोत्कृष्टत्वाच्छूद्रतुल्यत्वेनायमेवाङ्गच्छेदनरूपो दण्ड इत्यर्थ: BālamBha. ii. 306. 29 (*on* 2. 215); Subodhi. 92. 19 (2. 215)

अन्त्यजदर्शन (antyaja-darśana) *n.* sight of one born in the lowest caste अनेन विधिना ... नान्त्यजदर्शने ... व्यायामं कुर्वीत MānŚS. 239. 17; देवाग्निगुरु(विद्या?वृद्धा)नां समीपेऽन्त्यजदर्शने। अशुद्धभूमौ मार्गे वा स्थितो नोद्धुलयेद् बुध: ĪśānŚiPa. i. 9. 62; ii. 3. 98.

अन्त्यजन (antya-jana) *m.* **1** person of the lowest caste सौरे मरुभवपुष्करसौराष्ट्रा धातवोऽर्बुदान्त्यजना:। गोमन्तपारियात्राश्रिताश्च नाशं व्रजन्त्याशु BṛSaṁ. 5. 68; श्रुतिरपि तस्मान्न जनमियान्नान्तमियादिति। जनमन्त्यजनम् VīraMi. (Paribhāṣā.) 60. 11; **2** people living on the border region or outskirts श्रौतविज्ञानवञ्चनावधिनिमित्तकल्पितत्वाद्दिशां तद्विरोधिजनाध्युषित एव देशो दिशामन्त:, देशान्तोऽरण्यमिति यद्वत् BṛĀraUBh. 55. 12 (*on* 1. 3)

अन्त्यजनपदवाच् (antyajanapada-vāc) *f.* language or dialect (spoken) in the region of the outcaste, i.e. Mleccha किमक्षिनिकोचादीनामन्त्यजनपदवाचां नास्ति शक्ति: NyāyMañ. i. 388. 4.

अन्त्यजनपदवासिन् (antyajanapada-vāsin) *adj.* **A** inhabiting the land of the outcaste, i.e. Mleccha वेदश्च यदि निष्प्रयोजन: स्वस्ति प्रजाभ्य: समाप्तानि दृष्टादृष्टफलानि सर्वकर्माणि जितं चातुर्वर्ण्यबाह्यैरन्त्यजनपदवासिभि: म्लेच्छै: NyāyMañ. i. 390. 32; आर्यावर्तनिवासिनां शब्दार्थोपायेष्वभियुक्तानामभिव्याहरतां कर्माणि चानुतिष्ठतामन्त्यजनपदवासिभ्यो म्लेच्छेभ्य: ŚābaBh. 581. 10 (*on* ii. 3. 3); **B** (used as noun) (tribe) who inhabits the border region or outskrits तुल्यश्चान्त्यजनपदवासिनामपि दृष्टार्थत्वात् शाब्दव्यवहारे प्रमाणभाव इत्युक्तं चोदितं तु प्रतीयेतेति TantrVā. 593. 20 (*on* ii. 3. 3)

अन्त्यजनवत् (antyajana-vat) *adv.* like the person of the lowest caste न दृष्टा चेदहं तत् किं वार्त्तयापि हि न श्रुता। यदेवमन्त्यजनवन्ममाधिक्षेपमिच्छसि RatnaCūKa. 434.

अन्त्यजनाग (antyaja-nāga) *m.* serpent belonging to Śūdra class विप्रराजवणिगन्त्यजनागै: कर्णबाहुकटिपादविभूषा:। बिभ्रतीं वनजमाल्यविशेषैर्भूषितां ĪśānŚiPa. i. 22. 15.

अन्त्यजन्मन् (antya-janman) *adj.* **1** born in the lowest caste याजनाध्यापने नित्यं क्रियेते संस्कृतात्मनाम्। प्रतिग्रहस्तु क्रियते शूद्रादप्यन्त्यजन्मन: ManuSm. 10. 110 (*but* ManvaVi. चण्डालात्); (used as noun) (man) born in the lowest caste काञ्चनाभेन वैश्यस्य कृष्णेनाप्यन्त्यजन्मन:। यस्य प्रागायते शृङ्गे भूमुखाभिमुखे सदा MatsyaP. 207. 19; नामधेयं च कर्तव्यं वर्णानां च समाक्षरम्। ... धनान्तं चैव वैश्यस्य दासान्तं चान्त्यजन्मन: ŚaṅkhaSm. 2.4; वासम् ... स्वस्तिकम् ...। देवभूसुरभूपेषु योग्यं नैवान्त्यजन्मनाम् MayaMa. 26. 40; कुत्राहमन्त्यजन्मायं कुत्र सा राजकन्यका KathāSaSāg. xvi. 2. 96; एकजाति: शूद्र:। दारुणया अवचनीयया। जघन्यप्रभवोऽन्त्यजन्मा ManvaVi. 1038. 13 (*on* 8. 270); ब्राह्मणानां क्षत्रियाणां वैश्यानाश्चान्त्यजन्मनाम्। भेदान् ब्रूहि महाप्राज्ञ BallāC. 85. 3; **2** being in his last birth तत्रान्त्यजन्मा बोधिसत्त्वश्चरमभविक: AbhidhKoBh. 271. 3; चरमभविकस्येति। अन्त्यजन्मन:। येन तस्मिन्नेवजन्मन्यर्हत्वं साक्षात् कर्तव्यम् Sphutā. iii. 97. 2 (*on* 3. 84)

अन्त्यजन्मादि (antyajanmādi) *adj.* last, i.e. twelfth and the first houses in the horoscope etc. यत्रार्कगुर्वोरपि नैधनान्त्यजन्मादिदुस्थानगयोर्द्वयोर्वा। एकस्य पूजामपि तत्र कृत्वा पाणिग्रहं कार्यमत: सुसम्यक् VasiS. 32. 133.

अन्त्यजपक्कण (antyaja-pakvaṇa) *m., n.* hut of Cāṇḍāla प्रतिश्रुतं कृतं श्लाघ्या दासतान्त्यजपक्कणे। हरिश्चंद्रस्येव नृणां न श्लाघ्या सत्यसंधता SkandP. i (2). 8. 9.

अन्त्यजपर्यन्त (antyaja-paryanta) *adj.* extending up to the Śūdra विप्राद्यन्त्यजपर्यन्ता द्विपदा येऽत्र भूतले। ते सर्वेऽस्मिन् कुलाचारे भवेयुरधिकारिण: MahNirvāT. 14. 184; (used as noun) (one) extending up to the Śūdra ननु भवन्तोऽप्यन्त्यपर्यन्तान् भगवद्भक्ता इति धावन्त: ŚatDū. 241.7.

अन्त्यजपूर्वक (antyaja-pūrvaka) *adj.* man born in the lowest caste etc. पाखण्डपतितोदक्यासूतकान्त्यजपूर्वकान्। वर्जयेत्सर्वयत्नेन मनसा कर्मणा गिरा

ŚivaP. vii. 33. 66 (540B. 14)

अन्त्यजप्रोक्त (antyaja-prokta) *adj.* clearly uttered by the Śūdra तदा रामोऽन्त्यजप्रोक्तं वाक्यं लोकविगर्हितम्। तं प्रत्युवाच रामोऽसौ शत्रुघ्नं पदसेवकम् PadmP. iv. 58. 4.

अन्त्यजमय (antyaja-maya) *adj.* made or composed of the Cāṇḍāla ततस्तु प्रातरुत्थाय कृत्वान्त्यजमयं वपुः। शोधयामास कृच्छ्रेण मलोत्सर्गनिकेतनम् SkandP. vi. 31. 73.

अन्त्यजमुख्य (antyaja-mukhya) *m.* chief of the Cāṇḍālas ययुस्तेऽन्त्यजमुख्योऽथ, प्राह रे कस्य वारकः। वधेऽद्य SamarāSaṁ. 6.121.

अन्त्यजरूपाढ्य (antyaja-rūpāḍhya) *adj.* endowed with the form of the Cāṇḍāla अथ तद्वचनान्ते स तत्क्षणात्पृथिवीपतिः। बभूवान्त्यजरूपाढ्यो विकृताकारदेहभृत् SkandP. vi. 3. 8.

अन्त्यजवर्जिता (antyaja-varjitā) *adj.* (*f.*) devoid of, i.e. not occupied by the Cāṇḍālas (भूमिः) अगर्हानुषरा सर्पवल्मीकान्त्यजवर्जिता। श्मशानाङ्गाररहिता सुस्वादुसलिलान्विता ĪśānŚiPa. ii. 23. 28.

अन्त्यजवृत्ति (antyaja-vṛtti) *adj.* taking recourse to the livelihood of the Śūdras श्राद्धादौ नैव संपूज्या विप्राश्चान्त्यजवृत्तयः BṛBrahmaS. iv. 4. 64.

अन्त्यजसंज्ञक (antyaja-sañjñaka) *adj.* **A** known as Antyaja स्त्रीसंपर्कादिकं सर्वं जातमन्त्यजसंज्ञकम् BṛYamaSm. 5. 2; **B** named as Antyaja चर्मकारेण संजज्ञे नटश्चांत्यजसंज्ञकः SkandP. vi. 27. 49.

अन्त्यजसम (antyaja-sama) *adj.* equal to the Śūdra मार्जारश्च गृहे यस्य सोऽप्यन्त्यजसमो नरः LiṅgaP. i. 85. 154.

अन्त्यजसंभवा (antyaja-sambhavā) *adj.* (*f.*) produced from the lowest caste अन्त्यजानाम् ... एतेषामष्टधा सृष्टिर्जायतेऽन्त्यजसंभवा। योनिदोषात्सुरश्रेष्ठ जातेर्वक्ष्याम्यहं स्फुटम् SkandP. vi. 27. 47.

अन्त्यजसेवक (antyaja-sevaka) *m.* servant of a Śūdra उपनीतस्तदा बालः क्षिप्रादन्त्यजसेवकः VasiS. 29. 12.

अन्त्यजस्त्री (antyaja-strī) *f.* **A** woman of the Śūdra class एतासां चान्त्यजस्त्रीणां मध्ये यदेकस्यां व्यवाये प्रायश्चित्तमभिहितं तत्सर्वासु भवति Mitā. 463. 29 (*on* 3. 265); **B** woman of any one of the seven inferior tribes इहान्त्यजस्त्रियं रजकादिस्त्रियमिति रत्नाकरः DaṇḍaVi. 176. 2; **C** woman of the Cāṇḍāla class अगुप्ते क्षत्रियावैश्ये शूद्रां वा ब्राह्मणो व्रजन्। शतानि पञ्च दण्ड्यः स्यात् सहस्रं त्वन्त्यजस्त्रियम् ManuSm. 8. 385; अन्त्यजस्त्रियम् ... चाण्डालीमिति मिताक्षराकारः DaṇḍaVi. 176. 3.

अन्त्यजस्त्रीनिषेवण (antyajastrī-niṣevaṇa) *n.* act of enjoying, i.e. approaching the woman of the Śūdra class कुमारीसाहसं घोरमन्त्यजस्त्रीनिषेवणम्। सवर्णायाश्च गमनं गुरुतल्पसमं स्मृतम् SkandP. i (2). 41. 44; BhaviP. 283A. 18 (i. 190. 8); PadmP. ii. 67. 60.

अन्त्यजा (antya-jā) *f.* **A** woman of the Cāṇḍāla class, Cāṇḍālī उदक्यां सूतिकां वापि अन्त्यजां स्पृशते यदि। त्रिरात्रेणैव शुद्धिः स्यात् AtriS. 273; रेतःसेकः स्वयोनीषु कुमारीष्वन्त्यजासु च। ... गुरुतल्पसमं विदुः ManuSm. 11. 58 (comm. °चण्डाली); YājñaSm. 3. 231; AgniP. 168. 28; ViṣṇuDhaP. ii. 73. 56; ii. 73. 148; अन्त्यजा स्पृशति द्विजम्। त्रिरात्रेणैव शुध्येत VṛŚātāSm. 18; अन्त्यजासु चण्डाल्यादिषु ManvaVi. 1372. 6 (*on* 11. 58); DīpKa. 95. 10 (*on* 3. 231); VīraMi. 925. 14 (*on* 3. 231); **B** woman of the lowest caste गुरुदारगमनसमम्। ... स्वसुः सख्याः सगोत्राया उत्तमवर्णायाः कुमार्या अन्त्यजाया रजस्वलायाः (अभिगमनम्) ViṣṇuSm. 36. 7; वैश्या प्रतोदमादद्यात् दशां वै चान्त्यजा तथा AgniP. 154. 3; मुनिः ... शिवं नत्वा ययौ ततः। तद्वीक्ष्य सान्त्यजा मत्वा मुनेरप्युत्तमं शिवम् ... तत्रैव शिश्रिये KathāSaSāg. x. 5. 204; त्यजन्त्याऽन्त्यजया पुञ्जं कयापि स्थगितं च तत् SamarāSaṁ. 4. 421; **C** woman of the Śūdra class अन्त्यजां ब्राह्मणो गत्वा प्रमादादब्दतः शुचिः BrahmāṇḍP. iii. 8. 10; अन्त्यजा प्रतिलोमोत्पन्ना Aparā. 1048. 14 (*on* 3. 231); अन्त्यजासु चाण्डालीतरविलोमजशूद्रादिस्त्रीषु ManvaVi. 1428. 25 (*on* 11. 170); **D** woman of the outcaste, i.e. Mleccha अन्त्यजा बर्बरचण्डालस्त्रियः ManuBh. ii. 386. 12 (*on* 11. 57); अन्त्यजाश्चाण्डालम्लेच्छादिस्त्रियः ManuBh. ii. 421. 27 (*on* 11. 169)

अन्त्यजाकृति (antyajākṛti) *adj.* of the form of a Cāṇḍāla कोऽयं तवानुगो रौद्रो दृश्यते चान्त्यजाकृतिः SkandP. vi. 4. 45.

अन्त्यजागम (antyajā-gama) *m.* sexual intercourse with the woman of the Śūdra class वैश्यागमे च विप्रस्य क्षत्रियस्यान्त्यजागमे। मध्यमं प्रथमं वैश्यो दण्ड्यः शूद्रागमाद्भवेत् MatsyaP. 227. 136; AgniP. 226. 43; ViṣṇuDhaP. ii. 72. 121.

अन्त्यजागमन (antyajā-gamana) *n.* sexual intercourse with the woman of the Śūdra-class अन्त्यजागमनं मातृत्यागः पितृविवर्जनम्। पित्रोरभक्तिर्वादश्च पुराणस्मृतिवर्जनम् BhaviP. 824B. 22 (iv. 146. 13); अन्त्यजागमनेऽपि प्रायश्चित्तं बृहत्संवर्तेनोक्तम् Mitā. 463. 21. (*on* 3. 265).

अन्त्यजात (antya-jāta) *adj.* born in the lowest caste द्विजातिः पतितान्त्यजातान् न स्पृशेत् VaikhāDS. iii. 1. 13; अन्त्योऽधमेऽन्त्यजाते ParNā. 2599.

अन्त्यजाति (antya-jāti) *adj.* **A** belonging to the lowest caste ब्राह्मणक्षत्रियविशां शूद्राणां चान्त्यजाति(?ती)नाम्। तारतम्येन दातव्यम् BṛYamaSm. 4. 34; (used as noun) (person) belonging to the lowest caste अन्त्यजात्यमेध्यवायसादिस्पर्शनेऽरण्योर्नाशः VaikhāŚS. 20. 32; पित्रादिबान्धवालाभे अन्यं ब्राह्मणम् उपनयनार्थं भजेत्। व्याधिदुर्भिक्षाद्यैः अन्त्यजातौ न्यूने समाश्रिते सुवर्णपशुभूम्यादीन् दत्त्वा VaikhāGS. 6. 7 (94. 6); अन्त्यजातिरविज्ञातो निवसेद्यस्य वेश्मनि। सम्यग्ज्ञात्वा तु कालेन द्विजाः कुर्वन्त्यनुग्रहम् ĀpaSm. 3. 1; स्नापयित्वा विशेषेण शान्तिहोमं समाचरेत्। एवमेवान्त्यजातीनां शवस्पृष्टौ समाचरेत् PāraS. 19. 407; अन्त्यजाताश्च ये तेषां पुरः काशी न वर्ण्यताम् SkandP. iv. 46. 66; तैलेन्मृष्टे मनाक्स्नेहो वदने न तु चक्षुषि। वेश्यायाः क्षीणवित्तेषु संकोचो नान्त्यजातिषु NarmaMā. 3. 57; पार्वतीयान्किरातांश्च कर्णप्रावरणान् मरून्। अन्त्यजानन्त्यजातींश्च सोऽपश्यत्तस्य चोदरे BrahmP. 54. 13; तथा क्रव्यादान्व्याघ्रादीनधिरोहत्यन्त्यजातिभिः सहैकत्र देशेऽवतिष्ठते Aparā. 562. 18 (*on* 1. 271); **B** belonging to the Śūdra class अन्त्यजातिश्वपाकेन संस्पृष्टा वै रजस्वला ĀpaSm. 7. 5; AgniP. 170. 41; ViṣṇuDhaP. ii. 73. 217; (used as noun) (person) belonging to the Śūdra-class शृणुध्वं मुनिपुंगवाः। सर्वेषामन्त्यजातीनां वर्णादीनां यथाक्रमम् BṛYamaSm. 5. 1; **C** (used as noun) (person) belonging to the out-caste अन्तरजातिः सौम्यो वृषलो मन्दोऽन्त्यजातिरिन्दुरिपुः HorāSā. 2. 17; उपवर्णास्तु संकीर्णा विवर्णास्त्वन्त्यजातयः। एकवर्णाः स्ववर्णाः स्युः NāmaMāli. 330.

अन्त्यजाति (antya-jāti) *f.* **A** Cāṇḍāla class शरीरजैः कर्मदोषैर्याति स्थावरतां नरः। वाचिकैः पक्षिमृगतां मानसैरन्त्यजातिताम् ManuSm. 12. 9; SūktiRa. 9. 12; ŚārṅgaPa. 717; Subhāṣi. 2965; SāṁkhyaPraBh. 145. 19 (*on* 5. 122); अन्त्यजातितां चाण्डालत्वादिम् ManvaVi. 1482. 19 (*on* 12. 9); **Bi** woman of the lowest caste अस्ते ... प्रवदेत्सौरेऽन्त्यजातीनाम् HorāṢaṭPañ. 7.10; सौरेऽन्त्यजातिरितरैरपि चिन्तिता स्यात् DaivaVa. 10. 2; **Bii** lowest caste हीनजातावन्त्यजातौ DīpKa. 93. 25 (*on* 3. 213); **C** Śūdra class इदं च प्रतिलोम्येनान्त्यजातिप्रसूतानां ब्राह्मण्यादीनामकामतो वधविषयम् Mitā. 467. 29 (*on* 3. 268)

अन्त्यजातिज (antyajāti-ja) *adj.* born in the lowest caste विश्वस्य हत्या पापिष्ठं शूद्रं वाप्यन्त्यजातिजम्। ब्रह्महत्याधिकं पापं तस्मान्नास्त्यस्य निष्कृतिः BrahmāṇḍP. iii. 7. 3; चातुर्वर्ण्यासु नारीषु स्थेयं चेद्राजवल्लभा ... अन्त्यजातिजे। लक्ष्मीर्न तिष्ठति चिरम् BrahmāṇḍP. iii. 7. 19.

अन्त्यजातिविलय (antyajāti-vilaya) *m.* destruction of the Śūdra class वृश्चिकराशौ जीवे सर्वे सुखिनोऽन्त्यजातिविलयः स्यात् VasiS. 6. 96.

अन्त्यजातिस्त्री (antyajāti-strī) *f.* woman of the Śūdra-class हीनयोनिनिषेवणशब्दो व्याख्येयः। यद्वान्त्यजातिस्त्रीगमनविषयः। तत्र संवर्तेनोक्तो वेश्यागमने प्रायश्चित्तविशेषः Aparā. 1156. 21 (*on* 3. 289); तुशब्देनाऽन्त्यजातिस्त्रीव्यवच्छेदः VīraMi. 1011. 22 (*on* 3. 266-268)

अन्त्यजातीय (antyajātīya) *adj.* of the lowest caste, MW; one belonging to the lowest caste, Apte.

अन्त्यजात्य (antyajāt-ya) *adj.* (used as noun) **A** (one) who is an outcaste पुरभवनग्रामाणां ये कोणास्तेषु निवसतां दोषाः। श्वपचादयोऽन्त्यजात्यास्तेष्वेव विवृद्धिमायान्ति BṛSaṁ. 53. 84; **B** (one) who belongs to one of the seven inferior tribes अन्त्यजात्यः। रजकचर्मकृन्नटबुरुडकैवर्तमेदभिल्लाः ManvaVi. 1098. 16 (*on* 8. 385)

अन्त्यजात्यनुपहत (antyajāty-anupahata) *adj.* not touched by a lowest caste person शमीगर्भमश्वत्थं यद्यशमीगर्भं शुक्लाङ्कुरमशनिवाय्वनुपहतमग्न्यदग्धं बहुपक्ष्यनावासमशुष्कमशीर्णमन्त्यजात्यनुपहतं गत्वा वैश्वानरसूक्तेन प्रदक्षिणं कृत्वा प्रणमेत् VaikhāŚS. 1. 1.

अन्त्यजादि (antyajādi) *adj.* **A** born of the Śūdra class etc. अवशिष्टक्रियां कुर्यात् स्नायात् स्पृष्टोऽन्त्यजादिभिः (नरः) BṛDharmaP. ii. 6. 30; **B** (used as noun) (woman) who is born of the lowest caste etc. अस्ते ... प्रवदेत् सौरेऽन्त्यजादीनाम् TājiNī. 3 (2) (1) 35 (431); **C** (used as noun) (one) who is born of the out-caste etc. पतितानन्त्यजादीन् ... न वासयेत् बहिरेव वासयेत् ManvaVi. 1230. 5 (*on* 9. 225)

अन्त्यजादिकुत्सितदेह (antyajādi-kutsitadeha) *m.* contemptible or vile body of the Cāṇḍāla class etc. नैवेश्वरो निरुपाधिः सन्नातिस्विकेनैव रूपेणान्त्य-

जादिकुत्सितदेहपरिग्रहं करोति Aparā. 996. 4 (*on* 3. 130)

अन्त्यजादिखात (antyajādi-khāta) *adj.* (well etc.) dug up by the Cāṇḍāla etc. अन्त्यजादिखाते तु न स्नातव्यम् VīraMi. (Āhnika.) 173.17.

अन्त्यजादिगमन (antyajādi-gamana) *n.* act of appoaching the man of Cāṇḍāla class etc. अन्त्यजादिगमनेऽपि स्त्रीणां स्मृत्यन्तरे प्रायश्चितं दर्शितम् Mitā. 465. 10 (*on* 3. 265)

अन्त्यजादिसमुद्भव (antyajādi-samudbhava) *adj.* produced from the Śūdra etc. चेद्यदि केनचिज्जन्मान्तरीयेण बलीयसा कर्मणा वैदिकाचारविरोधिनान्त्यजादिसमुद्भवं शरीरं प्रापित: VedāntRaMañ. 4. 10 (145. 25)

अन्त्यजाद्य (antyajādya) *adj.* person of the lowest caste etc. एकभुक्तं ब्रह्मचर्यमन्त्यजाद्यैरभाषणम् PadmP. iv. 101. 94.

अन्त्यजाद्यखात (antyajādy-akhāta) *adj.* (well) not dug up by the Cāṇḍāla class etc. अविज्ञाते विशेषतोऽन्त्यजाद्यखातत्वादिनाज्ञाते ManvaVi. 520. 11 (*on* 4. 129)

अन्त्यजालय (antyajālaya) *m.* house of a person of lowest caste घोष आभिरपल्ली स्यात् पक्कणोऽस्त्र्यन्त्यजातय:(?न्त्यजालय:) NāmaMāli. 6. 22; Vaija. 138. 32.

अन्त्यजिनवप्तृ (antyajinavaptṛ) *m.* name of Śiddhārtha (*lit.* father of last Jina) सिद्धार्थ: सर्षपे शाक्यसिंहेऽन्त्यजिनवप्तरि AnekāSaṁ. 3. 316.

अन्त्यजिनेन्द्र (antya-jinendra) *m.* last lord of Jinas मूलनायक इहान्त्यजिनेन्द्र: ViviTīKa. 84. 8.

अन्त्यजीवा (antya-jīvā) *f.* Rsine difference (corresponding to the first, i.e. elementary arc occupied by a planet) अन्त्यजीवाऽथवा भुक्त्या गुणिता धनुषा हृता। स्वपरिध्याहताशीत्या लब्धहीनाधिका स्फुटा MaBhāsk.4.14.

अन्त्यजीवाधनु:खण्ड (antyajīvā-dhanuḥkhaṇḍa) *m.* first, i.e. elementary arc (i.e. 24th division of a circle according to Hindu Trignometry) corresponding to the Rsine difference अन्त्यजीवाधनु:खण्डं केन्द्रभोगाद्विशोधयेत् MaBhāsk. 4. 15.

अन्त्यजेष्टार्थ (antyajeṣṭārtha) *m.* goal desired by a Śūdra धन: प्राहान्त्यजेष्टार्थाधिकदानात्र किं? कृतम् (देवेन नृपति: प्रोचे) SamarāSaṁ. 4. 174.

अन्त्यजोचितभाषा (antyajocita-bhāṣā) *f.* language or word worthy of a Śūdra एतादृशो मुनिरसौ ...। अन्त्यजोचितभाषाभिर्वृषपर्वाणमभ्यगात् PadmP. iv. 110. 113.

अन्त्यजोच्छिष्टभोजन (antyajocchiṣṭa-bhojana) *n.* act of eating the left over by a Śūdra अन्त्यजोच्छिष्टभोजने प्रायश्चित्ताभावात्पतत्येव ĪśānŚiPa. ii. 20. 35 (25)

अन्त्यजोपम (antyajopama) *adj.* resembling or similar to the person of lowest caste किल्बिषाश्चान्त्यजोपमा:। ज्योतिष्कव्यन्तराह्नायस्त्रिंशलोकपवर्जिता: TriṣaŚaPuC. ii. 3. 774.

अन्त्यज्ञान (antya-jñāna) *n.* **A** last cognition or knowledge अविकलजननावस्थं बीजमङ्कुरं प्रति अविकलजननावस्थं चान्त्यज्ञानमिति प्रमाणमस्तीति चेत् न NyāyKa. 82. 17; गोचरान्तरग्राहिज्ञानात् प्राग्भावि गोचरान्तरग्रहिज्ञानप्रबन्धस्यान्त्यज्ञानम् PramāMī. 4. 6 (*on* i. 1. 3); SyādvāMañ.12 (100); अन्त्यज्ञानस्य निवर्तकं स्वयमेव वाऽन्यद्वा Nyāyāmṛ. 635A. 8 (*on* 4. 2); **B** ultimate or supreme knowledge अन्त्यज्ञानस्य जीव: स्थितिपदमथवा केवलं ब्रह्म ते स्यात् TattvMu. 2. 53.

अन्त्यज्ञानतस् (antyajñāna-tas) *adv.* after the knowledge of the final syllable सा च वर्णद्वयज्ञानेऽतीतेऽन्त्यज्ञानत: परा। भवतीदृगेवास्या निमित्तमवकल्पते ŚlokaVār. 534. 5 (*on* 5(11). 96)

अन्त्यज्ञाननाश (antyajñāna-nāśa) *m.* loss of the last knowledge अन्त्यज्ञाननाशे मनोनाशस्यापि हेतुत्वात् ... अन्त्यज्ञानोत्पत्तितृतीयक्षण एव तन्नाश इति भाव: LaCandr. 887. 15.

अन्त्यज्ञाननिवर्त्यत्व (antyajñānanivartya-tva) *n.* the state of being what is to be destroyed by the ultimate or supreme knowledge निवर्त्यत्वात् अन्त्यज्ञाननिवर्त्यत्वात् LaCandr. 887. 6.

अन्त्यज्ञानोत्पत्ति (antyajñānotpatti) *f.* origination or production of the last knowledge तादृशोपादाननाशत्वावच्छिन्नस्यान्त्यज्ञानोत्पत्तिद्वितीयक्षण एव संभवादन्त्याज्ञानस्य न क्षणिकतेति भाव: LaCandr. 887. 13; 887. 15.

अन्त्यज्या (antya-jyā) *f.* Rsine of the epicycle (इदानीं शीघ्रकर्णानयनमाह) परिधिगुणाऽगज्या। चक्रांशाप्तान्त्यज्या तत्कोटिज्यैक्यमन्तरं केन्द्रे ĀryaSi. 3. 24(61)

अन्त्यज्वालाक्षण (antyajvālā-kṣaṇa) *m.* moment of last flame स्नेहवर्तिक्षयादीनामन्त्यज्वालाक्षणस्य कारणावस्थावैकल्यादविकलत्वं नास्ति NyāyKa. 82. 18.

अन्त्यतत्त्वज्ञान (antya-tattvajñāna) *n.* ultimate or supreme knowledge of reality दृष्टो गुणानां निमित्तकारणादपि विनाशो यथा मोक्षप्राप्त्यवस्थायामन्त्यतत्त्वज्ञानस्य शरीरविनाशात् NyāyKa. 118. 8.

अन्त्यतन्तु (antya-tantu) *m.* last thread or yarn अनाशङ्क्यमानविनाशेऽन्त्यतन्तौ जातया क्रियया पटनिष्पत्त्यनुमाने क्रियमाणे पटप्रत्यक्षताकाले व्यवधानसम्भवात् NyāyMañ. i. 117. 26.

अन्त्यतन्तुसंयोग (antya-tantusaṁyoga) *m.* last conjunction of thread or yarn कर्मणो विभागेऽन्त्यतन्तुसंयोगस्य पट: KhaṇḍanKhā. 1213. 6; अपि चान्त्यतन्तुसंयोगानन्तरं यत्र पटो जायते तत्रापि शक्यं कारणात्कार्यानुमानम् TātpaṬ. (Vā.) 175. 2 (*on* i. 1. 5); अन्त्यतन्तुसंयोगेभ्योऽपि कदाचित् पटो न जायेत NyāyKuA. i. 150. 5; अन्त्यतन्तुसंयोगे यावन्न पट: उत्पन्ने कर्मणि यावन्न विभागस्तावत् काल: क्षण: Kiraṇā. 118. 13; 302. 15; एवं कर्मणो विभागेऽन्त्यतन्तुसंयोगस्य च पटे तत्त्वप्रसङ्गाच्च TattvPradī. (Ci.) 325. 9; अन्त्यतन्तुसंयोगपर्यन्तं कारणकलापमुपादाय पटोऽपि नाङ्गीकरणीय: NyāySu. (Ja.) 49B.1 (*on* i. 1. 1); सा च (प्रमा) ग्रन्थादौ चरमवाक्यलिखने ... पटादावन्त्यतन्तुसंयोगे ... एवं तत्र तत्रोहनीयमिति ... वैजात्यकल्पनेऽपि नोभयथा व्यभिचार: Upask. 5. 13 (*on* i. 1. 1)

अन्त्यतमा (antya-tamā) *adj.* (*f.*) very much last निरस्य वर्णद्वयमत्र मध्यमं तव द्विषां कान्त्यतमातिथिश्च का VidaMuMa. 3. 28.

अन्त्यतल (antya-tala) *n.* top floor सर्वेषामपि देवानां कोणे कोणे स्ववाहनम्। कण्ठादधश्चान्त्यतले प्राकारादौ च विन्यसेत् ĪśānŚiPa. ii. 32. 29; ŚilpaRa. i. 35. 35½.

अन्त्यतस् (antya-tas) *adv.* **A** up to the concluding one तद्बिम्बम् ... विधिवत्प्रतिपत्तौ तु जातायामादितोऽन्त्यत:। अङ्गभङ्गादिदोषेषु ...। सति संधानयोग्यत्वे न कदाचित्परित्यजेत् PāraS. 15. 940; **B** at the end निद्राज्ञानयोश्चान्त्यतो लय: संपद्यते PārāSū. 85. 29; **C** at last, lastly कुर्यात् ... संस्कारानन्त्यतस्त्रीन् TantrSa. 4. 49.

अन्त्यता (antya-tā) *f.* the state of being the concluding one प्रकृतौ द्वितीयतया पत्नीसंयाजान्तस्यापीहान्त्यतया सकलानुष्ठानमिति प्रयोगविकारादूह: MayūMāli. 589. 6 (*on* ix. 1. 8)

अन्त्यतारका (antya-tārakā) *f.* last constellation, Revatī गुरुवारेऽदितीज्यार्कत्रयमित्रान्त्यतारका:। श्रवणत्रयमित्येते योगाश्चामृतसंज्ञका: VasiS. 41.15.

अन्त्यतृच (antya-tṛca) *m., n.* last strophe consisting of three verses बहिष्पवमानस्यान्त(v.l. °न्त्य° ASS. Ed. of ŚābaBh.)तृचात् पूर्वमागन्तव: स्यु: ṬupṬ. 72. 3 (*on* v. 3. 7); न आवापस्य ... गायत्र्यादिषु प्राप्ति:। किं त्वन्त्यतृच एव VidhiRa. 20 (115. 23)

अन्त्यत्रय (antya-traya) *n.* **A** last triad अज्ञातत्वरूपापूर्वत्वं फलम् अबाधितत्वरूपोपपत्तिश्चेति षट्सु लिङ्गेषु अन्त्यत्रयमर्थनिष्ठम् GuruCandr. i. 313. 21; **B** latter triad अङ्गिनामङ्गयोश्च विभागे सत्याद्यत्रयस्याद्यमन्त्यत्रयस्यान्त्यमङ्गमिति स्वस्थानविवृद्धि: BhāṭṭCan. 9. 14 (*on* xiii. 2. 3)

अन्त्यत्रिक (antya-trika) *n.* last triad शिष्टाश्च तिथय: सर्वा: कृष्णे चान्त्यत्रिकं विना BṛhaspaSm. 245. 90; 256. 176.

अन्त्यत्रिभाग (antya-tribhāga) *m.* last third division (consisting of five days each) अन्त्यत्रिभागे शस्तं स्यात्कृष्णपक्षे सपिण्डनम् BṛhaspaSm. 334. 55; अन्त्यत्रिभागं परिहृत्य कृष्णे पक्षोऽपि शस्त: VasiS. 40. 4.

अन्त्यत्रिस्थितखेचर (antyatristhita-khecara) *m.* planet occupying the twelfth and the third houses in the horoscope पञ्चमनवमायधनस्मरग: शुभदो गुरुर्न विद्धश्चेत्। गृहकर्माष्टान्त्यत्रिस्थितखेचरैर्नास्तमितै: VasiS. 18. 6.

अन्त्यत्र्यवस्था (antya-tryavasthā) *adj.* (*f.*) having the last three conditions अन्त्यत्र्यवस्था परस्त्री। परस्त्रियौ तु कन्योढे। संकेतात्पूर्वं विरहोत्कण्ठिते, पश्चाद्विदूषकादिना सहाभिसरन्त्यावभिसारिके, कुतोऽपिकारणात् संकेतस्थानमप्राप्ते नायके विप्रलब्धे इति त्र्यवस्थैवानयो: Kāvyānu. (He.) 370. 2.

अन्त्यत्र्यह (antya-tryaha) *n.* last three days प्राप्तभोजनानुवादेन पाणिपूरान्नविधानादन्त्यत्र्यहेऽतिदेशप्राप्त उपवासोऽप्रतिपक्ष एव Mitā. 518. 25 (*on* 3. 319)

अन्त्यत्व (antya-tva) *n.* **1A** the condition of being the last अभ्रमस्तु न जीवतीति प्रत्ययो जीवतिप्रत्ययान् सुतरां बाधेत, अबाध्यत्वात् तस्य चान्त्यत्वात्पुनर्जीवतिप्रत्ययाभावात् IṣṭaSi. 98. 20; **1B** the state of being the highest or the topmost (note) स्वरसमुदायरूपत्वाविशेषेऽपि स्वराणां पर्यायत: प्राथम्यप्राधान्याल्पत्वभूयस्त्वपूर्णत्वापूर्णत्वारोहान्त्यत्वमध्यत्वादिप्रविभागभेदै: ... रूपकं रूपकान्तरात् भिद्यते AbhinBhā. ii. 409. 18 (*on* 18. 6); **2** the state of being a Cāṇḍāla अयं जीव: ... दोषैर्योनिषु भवं तदनन्तरं चान्त्यत्वं चाण्डालत्वं पक्षित्वम् ... प्रयाति VīraMi. 872. 18 (*on* 3. 131); **3** the state of being the final, finality

लोपस्यासिद्धत्वाद्य नान्त्यत्वमिति बोध्यम् LaŚabdeŚe. i. 185. 7; 4 final distinction, cf. **अन्त्यत्वानुपपत्ति.**

अन्त्यत्वमात्र (antyatva-mātra) *n.* mere (conveying of) the state of being the highest degree आतिशायनिकश्चतुःप्रभृतीनामन्त्यमाह। ... अन्त्यत्वमात्रेण सदृशार्थत्वमिति भावः Pradī. iv. 87B. 17 (*on* iv. 1. 78)

अन्त्यत्वादि (antyatvādi) *adj.* the state of being a Cāṇḍāla etc. यथा अन्त्यत्वादयः शरीरेषु शरीरिणां भावाः अनन्ताः तथा देहिनां सर्वयोनिषु इह संसारे तत्तदविद्यावच्छिन्नानि रूपाण्यनन्तानि परमात्मन एव VīraMi. 872. 20 (*on* 3. 132)

अन्त्यत्वानुपपत्ति (antyatvānupapatti) *f.* untenability of the state of being final distinction नित्यद्रव्यव्यावर्तकत्वविशेषवत्त्वाद्य अन्त्यत्वानुपपत्तिः, अनवस्था च TarkSaṁ. (Ā.) 124. 16.

अन्त्यत्वाभाव (antyatvābhāva) *m.* absense of the state of being the final syllable अन्त्यत्वाभावादिशादेः शस्येत्वानापत्तिः LaŚabdeŚe. i. 18. 3; परस्य सत्त्वेन कादेरन्त्यत्वाभावात् LaŚabdeŚe. i. 20. 13.

अन्त्यत्वासिद्धि (antyatvāsiddhi) *f.* non-proving of being the final आद्यादिशब्दवत् ...। तेषां शब्दान्तरारम्भं प्रत्युपयोगः। अन्त्यस्य तथेति चेत्, न अन्त्यत्वासिद्धेः NyāyKuA. i. 93. 5.

अन्त्यदर्शनानुगुण्य (antyadarśanānuguṇya) *n.* conformity, i.e. conduciveness to the last indication तादर्थ्यात्पूर्वदर्शनानामन्त्यदर्शनानुगुण्यं न तु तद्विरोधिता Bhām. 135. 23 (*on* i. 1. 12)

अन्त्यदर्शपूर्णमासप्रयोग (antya-darśapūrṇamāsaprayoga) *m.* last performance of New Moon and Full Moon sacrifices अन्त्यदर्शपूर्णमासप्रयोगं यावदेतन्नन्योपकारावस्थानप्रतीतेः BhāṭṭDī. iv. 249. 8 (*on* xii. 2. 6)

अन्त्यदल (antya-dala) *n.* last, i.e. eighth petal शिष्टं चान्त्यदले विलिख्य मतिमान् वृत्तेन संवेष्टयेत् ŚāraTi. 7. 53.

अन्त्यदशाप्राप्त (antyadaśā-prāpta) *adj.* which has obtained the last, i.e. efficacious condition अन्त्यदशाप्राप्तमेव कारणं कार्यं जनयति न सर्वम् TarkBhā. (Mo.) 17. 5.

अन्त्यदशावर्तिन् (antyadaśā-vartin) *adj.* which is in the last, i.e. efficacious condition यदि त्वन्त्यदशावर्ति कारणं लिङ्गमिष्यते। व्याप्तिस्मरणवेलायां कार्यप्रत्यक्षता भवेत् NyāyMañ. i. 116. 26.

अन्त्यदिन (antya-dina) *m., n.* A last day, i.e. day of death बन्धुभिर्ये यान्त्यन्त्यदिने क्षणाश्रुपतनप्रत्यायनापात्रताम्। ... एते सतां बान्धवाः DaśāvaC. 9. 64; B last day ज्योतिष्टोमे प्रायणीयेष्टिरुदयनीयेष्टिश्च दर्शपूर्णमासविकारौ द्वितीयान्त्यदिनयोराम्नातौ BhāṭṭDī. iv. 172. 13 (*on* xi. 2. 15); C last, i.e. tenth day of impurity (*aśauca*) ब्राह्मे तु अन्त्यदिने एव वस्त्रशुद्धिरुक्ता BālamBha. iii. 28. 24 (*on* 3.16)

अन्त्यदिनत्रय (antya-dinatraya) *n.* last three days कार्त्तिके मासि विप्रेन्द्र सर्वमन्त्यदिनत्रये। पुण्यम् SkandP. ii (4). 36. 15.

अन्त्यदिनपर (antyadina-para) *adj.* meant to convey the last day (of impurity) नवमदशमशब्दौ चोपान्त्यान्त्यदिनपरौ NirṇaSi. 380. 24.

अन्त्यदिनातिरिक्तम् (antyadinātiriktam) *adv.* in excess of or beyond the last, i.e. third day अहोरात्रावशिष्टेऽशौचेऽशौचान्तरपातेऽन्त्यदिनातिरिक्तं दिनद्वयेन शुद्धिः VīraMi. 786. 12 (*on* 3. 21)

अन्त्यदिवस (antya-divasa) *adj.* which consists of, i.e. includes the last day मध्ये दशदिने चापि त्र्यङ्गुलं तत् परित्यजेत्। व्यङ्गुलं चान्त्यदिवसे दशके समुदाहृतम् MānaSā. 6. 29.

अन्त्यदुःखसंविज्ञान (antyaduḥkha-saṁvijñāna) *n.* valid congnition of the last pain or sorrow अधर्मोऽप्यात्मगुणः ... अतीन्द्रियोऽन्त्यदुःखसंविज्ञानविरोधी PadārthaSaṁ. 280. 5.

अन्त्यदृष्टि (antya-dṛṣṭi) *f.* ultimate or supreme realization तत्त्वप्रच्युतिविभ्रमक्षतिकरी तत्रान्त्यदृष्टिर्मता SaṁkṣeŚā. 2. 83 (ii. 53. 20)

अन्त्यदेवता (antya-devatā) *f.* deity which is at the end (प्रतिकर्मसोमेषु) अन्त्यदेवतानूबन्धाद्या सवनीया KātyaŚS.xxii.8.3(comm.अन्ते भवा अन्त्या देवता)

अन्त्यदेह (antya-deha) *adj.* having the last body, i.e. wordly existence चरमदेहा मनुष्या एव भवन्ति नान्ये। चरमदेहा अन्त्यदेहाः TattvāBh. 221. 24 (*on* 2. 52); भीमश्चैवं तमब्रवीत्। हारोऽयं तेऽन्त्यदेहस्य युगश्रेष्ठस्य चोदितः PadmP. (Ra.) 5. 162.

अन्त्यद्रव्यसंयुक्त (antyadravya-saṁyukta) *adj.* connected with the minutest substance सा च (शतसंख्या) सर्वद्रव्यसंस्कारसचिवा अन्त्यद्रव्यसंयुक्तेन्द्रियजज्ञानविषयत्वात् प्रत्यक्षैव NyāyKa. 119. 4.

अन्त्यद्वय (antya-dvaya) *n.* A last pair (of verses) द्वितीयाद्यैस्त्रिभिर्बीजैः षष्ठेन च समीरितम्। निग्रहार्थमथान्यैस्तु त्रिभिरन्त्यद्वयेन च TantrRā. 10. 24; B concluding pair (of rites) यद्यप्युभयोः प्रयाजकार्यता तुल्या तथापि नास्ति विकल्पो भिन्नविषयत्वात्। जौहवस्याद्यत्रयविषयत्वात्। औपभृतस्यान्त्यद्वयविषयत्वात् TantrRa. 104. 13.

अन्त्यद्वादशांशक (antyadvādaśāṁśa-ka) *adj.* occupying the last part of the twelve-degreed division दुष्टस्थानगते भानौ सिंहान्त्यद्वादशांशके। जातश्चेज्जननात्पूर्वं पितृमृत्युं प्रयच्छति JātaPā. 13. 63.

अन्त्यद्विर्वचन (antya-dvirvacana) *n.* reduplication of the final letter नित्यादिरर्थोऽन्त्यद्विर्वचनेन न द्योतयितुं शक्यते Pradī. vii. 2. 15 (*on* viii. 1.1)

अन्त्यधन (antya-dhana) *n.* (Math.) final product of an arithmetical summation पदमेकहीनमुत्तरगुणितं संयुक्तमादिनान्त्यधनम्। आदियुतान्त्यधनार्धं मध्यधनं पदगुणं गणितम् BrāhmSphuSi. 1217; पदहतमुखमादिधनम् ...। उत्तरधनं तयोर्योगो धनमूनोत्तरं मुखेऽन्त्यधने GaṇiSāSaṁ. 1. 63; व्येकपदघ्नचयो मुखयुक् स्यादन्त्यधनं मुखयुग्दलितं तत् Līlā. 119.

अन्त्यधनसंख्या (antya-dhanasaṅkhyā) *f.* (Math.) final figure of the output of an arithmetical summation आदिः सप्त चयः पञ्च गच्छोऽष्टौ यत्र तत्र मे। मध्यान्त्यधनसंख्येके वद सर्वधनं च किम् Līlā. 121.

अन्त्यधनिष्ठार्ध (antya-dhaniṣṭhārdha) *m.* latter half of the constellation Dhaniṣṭhā कुम्भोऽन्त्यधनिष्ठार्धं शतभिषगंशत्रयं च पूर्वायाः। भद्रपदायाः शेषं तथोत्तरा रेवती च झषः BṛSaṁ. 102. 6.

अन्त्यधर्म (antya-dharma) *m.* lowest type of duty अन्त्यधर्मस्य विधिविहितत्वायोग इति चेन्न LalitāSaBh. 212. 32 (*on* 263)

अन्त्यधातुक (antyadhātu-ka) *m.* semen (*lit.* last, i.e. efficacious humour) शुक्लं तेजो बीजपूर्वी रेतो वीर्यान्त्यधातुकः AṣṭāNi. 35. 13.

अन्त्यधातुक्षय (antyadhātu-kṣaya) *m.* loss of semen अन्त्यधारा(तु)क्षयाद्देही क्षिप्रमेव हि नश्यति Mānaso. iv. 3. 503.

अन्त्यधारा (antya-dhārā) *f.* end-portion of the stream (of urine) प्रथमाम्बुधारां विहाय निःसारतयान्त्यधारा(राम्)। निषेव्यते शीतलमध्यधारा ... अमरोली HaṭPra. 3. 96.

अन्त्यधी (antya-dhī) *adj.* having the ultimate or supreme knowledge ऋषिर्ब्रह्मविदां श्रेष्ठो मैत्रावरुणिरन्त्यधीः MahāBhā. i. 1787* (BhārBhāDī. अन्ते सिद्धान्ते साध्वी अन्त्या धीर्यस्य सः)

अन्त्यधीयुत (antyadhī-yuta) *adj.* occupying the last, i.e. the twelfth house and the fifth house (connected with education) उपचयगोऽर्कश्चंद्रादुपचयनवमान्त्यधीयुतः सौम्यात्। लग्नादुपचयबन्धुव्यवस्थितः शोभनः प्रोक्तः LaJāta. ix (0). 2.

अन्त्यनकारलोप (antyanakāra-lopa) *m.* elision of final *na*-letter अनादेशे कृतेऽन्त्यनकारलोपात् ... सर्वादेशविज्ञानं सिद्धम् PariVṛ. (Sī.) 179. 18.

अन्त्यनकारापेक्षा (antyanakārāpekṣā) *f.* [Inst.] in comparision to the final *na*-letter अन्त्यनकारापेक्षया हि पूर्वत्वे सत्यन्त्यनकारात् पूर्वो वर्ण उपधा भवति Nyās. ii (1). 502. 12 (*on* vi. 4. 10)

अन्त्यनामिका (antya-nāmikā) *adj.* (*f.*) named after the lowest caste (नोद्वहेत् ... कन्याम् ... अन्त्यपर्वतनामिकाम्) अन्त्यनामिका 'बर्बरी' 'शबरी' इत्यादि ManuBh. i. 211. 16 (*on* 3. 9)

अन्त्यनाम्नी (antya-nāmnī) *adj.* (*f.*) named after the lowest caste त्यजेत् ... अन्त्यनाम्नीम् (कन्याम्) BṛParāSm. 6. 32; BālamBha. i. 170. 1 (*on* 1.52)

अन्त्यनाश (antya-nāśa) *m.* destruction of the last (sound) उपान्त्यनाशादेवान्त्यनाशः TarkBhā. (Ke.) 73. 3.

अन्त्यनाशजनन (antyanāśa-janana) *n.* production of the destruction of the last (sound) अन्त्यस्तूपान्त्ये(न्ते)न उपान्तस्त्वन्तेन ... विनश्येते। इदं चायुक्तम्। ... अन्त्यस्य तृतीयक्षणे चासतान्त्यनाशजननासंभवात् TarkBhā. (Ke.) 73. 2.

अन्त्यनिर्देश (antya-nirdeśa) *m.* mention of the word *antya* उपधासंज्ञायामल्ग्रहणमन्त्यनिर्देशश्चेत् संघातप्रतिषेधः Vār. 1 *on* P. i. 1. 65; MahāBh. i. 169. 18 (*on* i. 1. 65)

अन्त्यनिवृत्ति (antya-nivṛtti) *f.* disappearance, i.e. elision of the final syllable यद्यपि गणरूपाभ्यासान्त्यस्य णस्य ई इत्यर्थाद्धलादिःशेषेणान्त्यनिवृत्तावस्याप्राप्त्यानवकाशत्वेनेदं तद्बाधकं प्राप्नोति LaŚabdeŚe. ii. 604. 1.

अन्त्यनिवृत्तिपूर्वक (antyanivṛttipūrva-ka) *adj.* preceded by the disappearance, i.e. elision of the final letter हन इति षष्ठीनिर्देशादन्त्यनिवृत्तिपूर्वको

ब्रह्महत्येत्यत्र प्रत्ययत्वात्तकारो विकारः प्रकृतेः परः स्यात् PariVṛ.(Si.) 187.10.

अन्त्यनिवृत्त्यर्थम् (antyanivṛttyartham) *adv*. for the sake of disappearance, i.e. elision of the final letter अकिद्वचनमन्यत्र किदन्तस्या-लोऽन्त्यनिवृत्त्यर्थम् Vār. 1 *on* P. vii. 4. 83.

अन्त्यनिष्ठ (antya-niṣṭha) *adj*. [*f*. - ā] present in the last one अन्त्यनिष्ठ-तद्धीरूपविषयता संसर्गता LaCandr. 347. 5; अन्त्यनिष्ठा सा विशेषणता LaCandr. 347. 6.

अन्त्यप (antya-pa) *m*. **A** lord of the last, i.e. the twelfth house जीवितमरणप्रश्ने बालानामन्त्यपे शुभैर्दृष्टे। ... जीवेत् TājiNī. 3(1). (5). 34 (338) (comm. अन्त्यपे व्ययेशे); **B** lord of the eighth house (i.e. the house of death) TājiNī. 3(1). (5). 34 (338) (comm. अन्त्यपे ... अष्टमेशे)

अन्त्यपक्ष (antya-pakṣa) *m*. **A** last view परिणामविशेष आत्मनोऽसौ भ्रम इत्येष न युज्यतेऽन्त्यपक्षः ŚaṅkaDigVi. (Mā.) 15. 130; दृष्टान्तस्योभयसंमत्यपेक्षणे मन्मते अन्त्यपक्षस्यासंभवात् उभयमतेऽपि मध्यपक्षासंभवात् प्रथमपक्षेणैव तत्र साध्यसिद्धिः GuruCandr. i. 436. 6; अज्ञानं भानविरोधीत्यपक्षः LaCandr. 487. 36; **B** last option or alternative न चैवमन्त्यपक्षद्वये प्रवृत्त्यनुपपत्तिः, अपुरुषार्थ-त्वादिति वाच्यम् MīmāKau. iii (1). 5. 6 (*on* i. 2. 1); अन्त्यपक्षद्वये च वैश्याभावे साप्तदश्याननुष्ठानान्निमित्तत्वं तस्यार्थिकम् BhāṭṭDī. ii. 22. 23 (*on* iii. 6. 3)

अन्त्यपक्षपरिग्रह (antyapakṣa-parigraha) *m*. acceptance of the last view पूर्वपक्षप्रतिक्षेपेणान्त्यपक्षपरिग्रहेण सिद्धान्तो भविष्यति Kāśi. i. 79. 28 (*on* 2. 33)

अन्त्यपक्षरूप (antyapakṣa-rūpa) *adj*. of the form of the last view अन्त्यपक्षरूपं सहत्वमेव 'एकधा' इत्यस्य शब्दस्यार्थः NyāyMāVi. 495. 17 (*on* x. 2. 4)

अन्त्यपक्षातिरिक्त (antyapakṣātirikta) *adj*. different from the last alternative अन्त्यपक्षातिरिक्तान् सपूर्वपक्षानपाकरोति NyāySu.(Ja.) 376A. 6 (*on* ii. 2. 6)

अन्त्यपक्षाभ्युपगम (antyapakṣābhyupagama) *m*. acceptance of the last alternative ययोरैक्यं श्रुत्या बोध्यते तयोर्भेदः प्रसक्तो न वा, नान्त्यः अप्रसक्तप्रतिषेधापातात्, नाद्यः ... इति चेन्न, अन्त्यपक्षाभ्युपगमे दोषाभावात् AdvaiSi. 516. 8; 541. 26.

अन्त्यपक्षिस्थावरता (antyapakṣisthāvara-tā) *f*. the state of being the Cāṇḍāla, the bird and the immovable object अन्त्यपक्षिस्थावरतां मनोवाक्काय-कर्मजैः। दोषैः प्रयाति जीवोऽयं भवम् YājñaSm. 3. 131. (BālaKrī. जातिभेदेषु च शतशो भवन्नुत्पद्यमानो याति; Mitā. चण्डालादयः ... काकादयः ... वृक्षादयः तेषां भावः)

अन्त्यपङ्क्ति (antya-paṅkti) *f*. **A** last ten (days) मिथुने ... मध्ये दशदिने वह्निं(ह्निं) चान्त्यपङ्क्ति(ङ्क्तौ) चतुस्त्यजेत् MānaSā. 6. 28; **B** (Math.) last term (of the arithmetical equation) सावयवाङ्कस्य वर्गार्थमधोऽधः पङ्क्तिविन्यासेन खण्डगुण-नरीत्या गुणनेऽन्त्यपङ्क्तावन्त्याङ्कस्य वर्गो यदि षष्टिभक्तः शुध्यति तर्हि तदन्त्यावयवहानिस्तादृशोऽत्र षष्ट्यन्तर्गतत्रिंशन्न तदरिक्तः SiddhāTaVi. 53. 24.

अन्त्यपङ्क्तिगा (antyapaṅkti-gā) *adj*. (*f*.) reaching the last line इष्टविकल्पानां संख्या स्यादन्त्यपङ्क्तिगा SamarāSū. 26. 63.

अन्त्यपङ्क्तिदिन (antya-paṅktidina) *m*., *n*. last ten days धनूराशौ ...। अन्त्यपङ्क्तिदिने त्याज्यं वसुमात्रमिति स्मृतम् MānaSā. 6. 35.

अन्त्यपङ्क्तिद्वय (antya-paṅktidvaya) *n*. last two lines or rows चतुरश्रीकृते क्षेत्रे त्रयस्त्रिंशद्विभाजिते। अन्त्यपङ्क्तिद्वयं सार्धं चरक्यार्धमुत्सृजेत् SamarāSū.12.8.

अन्त्यपत् (antya-pat-) I.P. to stretch, *nt*.

अन्त्यपति (antya-pati) *m*. lord of the last, i.e. the twelfth house क्रूरश्चेदन्त्य-पतिर्दग्धश्चापोक्लिमेऽयुक्तः। ... जातमात्रो म्रियते बालोऽथवा गर्भे TājiNī. 3(4). 35 (338); 3(4). 57 (345)

अन्त्यपद (antya-pada) *n*. **1** (Math.) last or greatest root or solution (of quadratic equation) अन्त्यपदे स्वगुणहते क्षिपेदुपान्त्यं च तस्यान्तम् GaṇiSāSaṁ. 5. 111½; **1B** lowest term (in quadratic equation), cf. **अन्त्यपदवधगुण**; **1C** greatest degrees, cf. **अन्त्यपदस्थ**; **2** final word (of a sentence) अन्त्यपदस्यान्यत्र चरितार्थत्वाभावात्, अन्त्यपदमेव, पूर्वपदस्मरणोपकृतं वाक्यमुच्यते NyāyMañ. i. 357. 23; न ह्येवं भूतमप्यन्त्यपदं विशेषप्रतिपत्तिहेतुरित्याशयवान् NyāyVārPari. 311. 2; पूर्वपूर्वपदस्मरणानुगृहीतमन्त्यपदं स्मर्यमाणं वाक्यम् Kiraṇā. 333. 15; यद्यपि पदपदार्थविभागो वास्तवः तथापि व्युत्पत्तिर्यत्नोपपाद्या। ... वाक्यार्थव्युत्पत्तिरपि। अन्त्यपदस्य वाक्यत्वाभावात् TantrRaha. 27. 15; वाक्यस्य टिरन्त्यपदस्यैव संभवति LaŚabdeŚe. i. 112. 9; **3** the word *antya* विनाशारम्भरहितेष्वित्यन्त्यपदस्य विवरणम् NyāyKa. 323. 4; अन्त्यपदोपदेशपदाभ्याम् ... अन्त्य इह गृह्यते LaŚabdeŚe. i. 16. 1.

अन्त्यपदकृति (antyapada-kṛti) *f*. square of the greatest root or solution (of quadratic equation) चतुरधिकेऽन्त्यपदकृतिस्त्र्यूना दलितान्त्यपदगुणान्यपदम्। अन्त्यपदकृतिर्व्येका द्विहताद्यपदाहताद्यपदम् BrāhmSphuSi. 18. 67; 18. 68.

अन्त्यपदगुणा (antyapada-guṇā) *adj*. (*f*.) multiplied by the greatest root (of quadratic equation) चतुरधिकेऽन्त्यपदकृतिस्त्र्यूना दलितान्त्यपदगुणान्यपदम् BrāhmSphuSi. 18. 67.

अन्त्यपदज्ञान (antyapada-jñāna) *n*. knowledge of the final word तर्हि चरमपदज्ञानप्रत्यस्तमयादन्त्यपदरहितं वाक्यं स्यादन्त्यपदज्ञानस्य हि संकेतस्मृतिवेलायां विनश्यत्ता पदार्थज्ञानवेलायां विनाश एव NyāyMañ. i. 360. 18; i. 362. 3.

अन्त्यपदज्ञानानन्तरम् (antyapadajñānānantaram) *adv*. after the knowledge of the final word स्मरणमुखेनोपकारिकत्वात्तस्मादन्त्यपदज्ञानानन्तरं पूर्वपदसमय-स्मरणयोर्युगपदुत्पादात् ज्ञानयौगपद्यम् NyāyMañ. i. 360. 12.

अन्त्यपदप्रतिसंधान (antyapada-pratisandhāna) *n*. recollection of the final word पूर्ववर्णानामनुभूतत्वेन पदत्वानुसंधानसंभवेऽपि अन्त्यवर्णस्याननुभूततया नान्त्यपदप्रतिसंधानसंभवः NyāyVārPari. 308. 7.

अन्त्यपदप्रतीति (antyapada-pratīti) *f*. cognition of the final word न श्रोत्रं तावत्कारणम् अन्त्यपदप्रतीत्यनन्तरमेव तद्व्यापारस्य विरतत्वात् NyāyMañ. i. 361. 15.

अन्त्यपदभेद (antyapada-bheda) *m*. division or syntactic split of the final word श्लोकधेनुः ... एषान्त्यपदभेदेन संभ्रमादिद्विरुक्तिभिः। यावद्बोधं पुनः सूते प्रयतश्लोकतर्णकान् SaraKaṇṭhā. 292.3.

अन्त्यपदरहित (antyapada-rahita) *adj*. devoid of the final word एवं तर्हि चरमपदज्ञानप्रत्यस्तमयादन्त्यपदरहितं वाक्यम् NyāyMañ. i. 360. 18.

अन्त्यपदलक्षित (antyapada-lakṣita) *adj*. indicated by the final word नापि ये यजमाना इत्यादिवदन्त्यपदलक्षिततत्कार्ये पूर्वपदार्थविधिः BhāṭṭCin. ii. 71. 26 (*on* i. 4. 12)

अन्त्यपदवधगुण (antyapadavadha-guṇa) *adj*. (Math.) (term) multiplied by the product or value of the lowest term (lessened by one) (to obtain higher value of equation) वधदलं पृथग्व्येकम्। व्येकाद्याहतमन्त्यपदवधगुणमाद्य-मन्त्यपदम् BrāhmSphuSi. 18. 68.

अन्त्यपदवाक्यत्व (antyapadavākya-tva) *n*. the state of being the sentence of the form of the final word अन्त्यपदवाक्यत्वं परैरनुपन्यस्तमपि संभवादुपन्यस्यते NyāyRa. 860. 13 (*on* 7. 50)

अन्त्यपदविषय (antyapada-viṣaya) *adj*. having the final word as its object, i.e. perceiving the final word पूर्वपूर्वपदानुभवजनितसंस्कारसहकृतेनान्त्यपद-विषयेण श्रोत्रेन्द्रियेण पदार्थप्रत्ययानुगृहीतेनानेकपदावगाहिनी वाक्यप्रतीतिः क्रियते TarkBhā. (Ke.) 49. 14.

अन्त्यपदसामर्थ्य (antyapada-sāmarthya) *n*. competency of the final word अन्त्यपदसामर्थ्येनैव तल्लाभात् LaŚabdeŚe. i. 20. 14.

अन्त्यपदस्थ (antyapada-stha) *adj*. (planet) occurring at the maximum degrees of an ecliptic (ग्रहः) अन्त्यपदस्थ आद्यपदे स्यात्। परस्परं द्वितीयतृतीययोरप्येवं स्थितिः SiddhāTaVi. (ŚeṣaVā.) 30. 21.

अन्त्यपदानुभव (antyapadānubhava) *m*. experience, i.e. perception of the final word अपि च पूर्वपदैरर्थशून्यतया शुष्कनीरसतनुभिरन्त्यपदानुभवसमनन्तरं स्मृतैरपि को गुणः NyāyMañ. i. 360. 25.

अन्त्यपदार्थ (antyapadārtha) *m*. **1** meaning of the final word बहुव्रीहि-कर्मधारययोरसंभवात् षष्ठीसमासपरिग्रहे निग्रहस्थानस्यान्त्यपदार्थस्य प्राधान्ये विवक्षितार्थहानिप्रसङ्ग इत्यर्थः TātpaṬ. (Vā.) 35. 21(*on* i. 1. 1); अन्ये तु ... उभयप्रधानमनुजानते। तद्यान्त्यपदार्थेन विरुद्धम् AbhinBhā. i. 210. 21(*on* 5. 13); **2** (antya-padārtha) final rite एतद्वाक्यपर्यालोचनया प्रातःकाले समाप्तिवर्जं सर्वं कृत्वा विरम्य प्रतिपदि प्रविष्टायां ब्राह्मणभोजनमन्त्यपदार्थसमाप्तिश्च कर्तव्या CaturCin. iii (2). 369. 9.

अन्त्यपदार्थज्ञान (antyapadārtha-jñāna) *n*. knowledge of the meaning of the final word तस्मिन्स्मरणे तथान्त्यपदार्थज्ञानेऽवच्छेदकत्वेन प्रस्फुरत्पदसमूहो वाक्यमवच्छेद्यत्वेन प्रकाशमानोऽर्थसमूहो वाक्यार्थः NyāyMañ. i. 361. 8; तादृशि संस्कारे स्थितेऽन्त्यपदार्थज्ञानानन्तरं पदसंस्कारात्सर्वपदविषयस्मृतिः पदार्थसंस्काराच्च पदार्थविषया स्मृतिः NyāyMañ. i. 363. 24; i. 364. 1; i. 364. 17.

अन्त्यपदार्थप्रतीति (antyapadārtha-pratīti) *f*. cognition of the meaning of the final word अन्त्यपदार्थप्रतीतिसमये तदवच्छेदकतया प्रतिभासमानं पदं तत्प्रतीतौ तावत्कारणमिति नात्र विमतिः NyāyMañ. i. 361. 12.

अन्त्यपदावगम (antyapadāvagama) *m*. knowledge of the final word फलमन्त्यपदावगमसमये सकलपूर्वपदोपस्थानम् NyāyMañ. i. 362. 1.

अन्त्यपदाव्याप्ति (antyapadāvyāpti) *f.* non-pervasion or non-inclusion of the final word सामान्यलक्षणं तावदनुपपन्नम्। संशयविपर्ययोर्यथार्थ्येन आद्यपदद्वय-व्यावर्त्याभावात्। धारावाहिकप्रामाण्येनान्त्यपदाव्याप्तेः TantrRaha. 7. 3.

अन्त्यपदोच्चारण (antyapadoccāraṇa) *n.* utterance of the final word अन्त्यपदोच्चारणानन्तरं च युगपत्सर्वपदानि स्मर्यमाणानि संभूय स्वार्थान् ... प्रतिपादयन्ति VivaPraSaṃ. 332. 22.

अन्त्यपद्य (antya-padya) *n.* last verse अन्त्यपद्यमादौ व्याचष्टे। कृत्तिकेति BālamBha. i. 600. 19 (*on* 1. 265-268)

अन्त्यपरिणाम (antya-pariṇāma) *m.* last, i.e. efficacious modification प्रलयकालस्य प्रकृतिपरिणामरूपत्वादन्त्यपरिणामस्य नित्यं प्रसङ्गाभावात् ŚrutaPra. ii. 275. 9 (*on* ii. 1. 36); ii. 275. 16 (*on* ii. 1. 36)

अन्त्यपरिमाण (antya-parimāṇa) *n.* **A** minutest measure नाद्यमध्यम्-परिमाणयोर्नित्यत्वमापाद्यते किं त्वाद्यमध्यमयोः कालयोरन्त्यपरिमाणस्यानुवृत्तिरित्यर्थः VedāntKa. 301. 4 (*on* ii. 2. 33); **B** measure at the last (stage), final measure परिमाणाभावे स्वरूपाभावप्राप्त्यान्त्यपरिमाणस्थितेः BrahmSūBh. (Ma.) 31A. 2 (*on* ii. 2. 36)

अन्त्यपरिमाणदृष्टान्त (antyaparimāṇa-dṛṣṭānta) *m.* example of the minutest measure आद्यव्याख्यायामुभयपरिमाणनित्यत्वस्यान्त्यपरिमाणदृष्टान्तेनापाद्य-त्वादुभयनित्यत्वादिति सिद्धवत्सूत्रे हेतुनिर्देशायोगमाशङ्क्याह अत्र चोभयोरिति VedāntKa. 301. 11 (*on* ii. 2. 33)

अन्त्यपरिमाणवत् (antyaparimāṇa-vat) *adv.* like the minutest measure देहान्तराप्रवेशान् मोक्षावस्थं परिमाणमन्त्यं तस्य नित्यत्वात् आद्यमध्यमयोर्नित्यत्वानुमाने ... आत्मगताद्यमध्यमपरिमाणे नित्ये आत्मपरिमाणत्वादन्त्यपरिमाणवत् VedāntKa. 301. 8 (*on* ii. 2. 33)

अन्त्यपर्याय (antya-paryāya) *m.* synonym of the word *antya* (last) अन्त्यपर्याय उत्तमशब्दः अहः सर्वैकदेशसंख्यातपुण्याह्न इत्यत्रान्ते वर्तमानं पुण्यशब्दं ब्रूते इत्यर्थः Prasā. i. 555. 8.

अन्त्यपर्वतनामिका (antyaparvata-nāmikā) *adj. (f).* named after the lowest caste and mountain नोद्वहेत् कपिलां कन्याम् ...। नान्त्यपर्वतनामिकाम् ManuSm. 3. 9.

अन्त्यपर्वन् (antya-parvan) *n.* last finger joint ओं गों ओं नम इति इत्येवं दशाक्षराणि दक्षिणाङ्गुष्ठप्रभृतिवामाङ्गुष्ठान्तकराङ्गुलीनामन्त्यपर्वसु विन्यस्य ... वामाङ्गुष्ठादिवामकनिष्ठान्तासु च तथैव न्यसेत् VīraMi. (Bhakti.) 91. 22.

अन्त्यपाठ (antya-pāṭha) *m.* latter reading or mention अत्र विशेषोपपादनेऽ-न्त्यपाठ एव युक्तः LaŚabdeŚe. i. 226. 2; ii. 608. 4.

अन्त्यपाद (antya-pāda) *m.* **A** last foot or quarter (of a verse) अत्रान्त्यपादे धुरा धुरेति सूक्ष्मव्यपेतं वर्तते SaraKaṇṭhā. 216. 16; तत् ग्रहीत्रर्थेन सह प्रध्वंसनं कूटकारितं न चेदित्यन्त्यपादस्यार्थः SmṛtiCan. iv. 418. 1; iv. 433. 14; iv. 519. 5; iv. 525. 13; अवशिष्टाक्षराः ककुभामाद्यपादा अन्त्यपादाश्च मिलित्वा-ष्टाविंशतिः NyāyMāVi. 444. 25 (*on* ix. 2. 6); 'पादं पुनरारभत' इति वचनावगतस्य चाद्यामृचं सकृत् पठित्वा तस्यामन्त्यपादेन सह द्वितीयाद्यर्धर्चं पठित्वा MīmāKau. iii. 88. 4 (*on* ii. 1. 14); BhāṭṭDī. iii. 105. 3 (*on* ix. 2. 6); **B** last division or part (of a zodiac sign) अतोऽन्त्यपादमादिगो द्वितीयगस्तृतीयगम्। तृतीयगो द्वितीयकं चतुर्थगस्तु चादिमम्। भिनत्ति वेधकृद्ग्रहो न चान्यपादमादरात् VasiS. 32. 73; सव्ये ... अभिधीयते। जीवः सर्वेष्वन्त्यपादो विलोममपसव्यके JātaPā. 17. 14.

अन्त्यपादक (antyapāda-ka) *m.* last division or part (of a zodiac sign) तृतीयं त्र्युत्तराहर्य्योर्वाक्षित्रिदोरन्त्यपादकः। दिवायोगा इति ख्याताः शोभने रोगदाः सदा VasiS. 42. 51.

अन्त्यपादक्रमतस् (antyapādakrama-tas) *adv.* in the order of the last division of ecliptic स्यादिन्दुविम्बीयसुगोलसंधिः केन्द्रं तदूनो हि विवृत्तचन्द्रः। राहौ तु कर्क्यादिमृगादिचिह्ने आद्यान्त्यपादक्रमतोऽस्ति केन्द्रम् SiddhāTaVi. 384. 12.

अन्त्यपादत्रय (antya-pādatraya) *n.* last triad of feet or quarters (of a verse) प्रचेतसा त्वन्त्यपादत्रयस्यार्थः स्पष्टमुक्तः SmṛtiCan. v. 291. 2.

अन्त्यपादान्तिम (antyapādāntima) *adj.* pertaining to the final (element) of the last foot (of a verse) प्राक्पदस्यान्तिमं प्रत्यक् पादादौ प्रतिलोम्यतः अन्त्यपादान्तिमं चाद्यपादादावक्षरद्वयम् AgniP. 342. 43.

अन्त्यपुंस् (antya-puṁs) *m.* man of the Cāṇḍāla class परस्यानिष्टानि चिन्तयित्वा ... सत्यत्वव्यवस्थापनार्थमभिनिवेशशीलो वा मृतो जन्मान्तरे अन्त्यासु अन्त्यपुंसा युक्तासु योनिषु चाण्डालयोनिषु जायते VīraMi. 874. 22 (*on* 3. 134)

अन्त्यपुच्छा (antya-pucchā) *adj. (f).* having tail at the end चक्रा ...। धिष्ण्यान्त्यपुच्छा पतति ज्वलिताङ्गारसंनिभा NāraS. 43 (0). 6.

अन्त्यपुरोडाश (antya-puroḍāśa) *m.* last sacrificial cake अन्त्यपुरोडाश-रूपोपलक्षणाभावेऽपि कालोपलक्षणसिद्धेः MīmāKau. 92. 14 (*on* iii (2). 192. 13); BhāṭṭDī. iv. 128. 22 (*on* x. 8. 17)

अन्त्यपूर्वसुखित (antyapūrva-sukhita) *adj.* happy in the concluding and early part (of life) वज्रेऽन्त्यपूर्वसुखिनः (v.l. अन्त्यपूर्वसुखितः) सुभगोऽतिशूरः Bṛhajjā. 12. 14; JātaPā. 7. 176.

अन्त्यप्रणव (antya-praṇava) *m.* mystic syllable *om* at the final position गायत्रीमात्रश्रवणेऽपि वचनान्तरैकवाक्यतया प्रथमप्रणवव्याहृतिप्राप्तिवदन्त्य-प्रणवप्राप्तिरप्यप्रत्यूहैव VīraMi. (Āhnika.) 292. 19.

अन्त्यप्रणवविधायक (antyapraṇava-vidhāyaka) *adj.* which prescribes the mystic syllable *om* at the final position अन्त्यप्रणवविधायकं योगियाज्ञवल्क्यं च संध्यातिरिक्तजपपरमित्याहुः VīraMi. (Āhnika.) 292. 10.

अन्त्यप्रतिषेधार्थम् (antyapratiṣedhārtham) *adv.* for the negation of the last syllable ऊठ्युपधाग्रहणमन्त्यप्रतिषेधार्थम् Vār. 1. *on* P. vi. 1. 171; MahāBh. iii. 107. 10 (*on* vi. 1. 171); दाद्ग्रहणमन्त्यप्रतिषेधार्थम् Vār. 4. *on* P. viii. 2. 80; MahāBh. iii. 415. 3 (*on* viii. 2. 80)

अन्त्यप्रतीक (antya-pratīka) *n.* last part or portion (of the phrase for identification) दव्यदिरकरणत्वादचोदनेत्यन्त्यप्रतीकेनावतात्पर्यान्यथा व्याचष्टे NyāySu. (So.) 89. 14 (*on* i. 2. 27)

अन्त्यप्रतीकग्रहण (antyapratīka-grahaṇa) *n.* mention of the last part or portion (of the phrase for identification) पदचतुष्टयस्यापि ... क्वचिदन्त्य-प्रतीकग्रहणेन चेत्येवमुभयत्र विनियोगात् MayūMāli. 117. 30 (*on* ii. 1. 15)

अन्त्यप्रतीकोपादान (antyapratīkopādāna) *n.* mention of the last part or portion (of the phrase for identification) उपप्रेष्य होतर्हव्या देवेभ्य इत्यादिश्रुतेरुपप्रैषविषयकप्रैषविधौ तावन्मात्रस्य मन्त्रस्यादर्शनादजैदग्निरित्यास्यैवान्त्य-प्रतीकोपादानेन विनियोगविधिः SaṅkarKā. 56. 16 (*on* xiv. 3. 9)

अन्त्यप्रत्यक्षवेद्य (antyapratyakṣa-vedya) *adj.* knowable from the ultimate realization अन्त्यप्रत्यक्षवेद्यं तु ब्रह्म चेदधिकान्वितम् ŚatDū. 131.26.

अन्त्यप्रत्यय (antya-pratyaya) *m.* knowledge at the time of death or realization स्मर्तुः स्वविषयसजातीयाकारतापादनमन्त्यप्रत्ययस्य स्वभावः GītāBh. (Rā.) 413. 6 (*on* 8. 6)

अन्त्यप्रत्ययतस् (antyapratyaya-tas) *adv.* from the knowledge or realization at the time of death अन्त्यप्रत्ययतो नूनं भावि जन्म PañcDa. 9. 138.

अन्त्यप्रत्ययनियम (antyapratyaya-niyama) *m.* rule or law of the knowledge or realization at the time of death अदृष्टफलेष्वन्त्यप्रत्ययनियमो नास्ति PrakaVi. 1023. 23.

अन्त्यप्रत्ययप्रकार (antyapratyaya-prakāra) *m.* form of the knowledge or realization at the time of death अन्त्यप्रत्ययप्रकारं चाह GītāBh. (Rā.) 415. 6 (*on* 8. 8)

अन्त्यप्रत्ययवश (antyapratyaya-vaśa) *m.* [Abl.] on account of the knowledge or realization at the time of death आ प्रायणादेव आवर्तयेत्प्रत्ययम्, अन्त्यप्रत्ययवशात् अदृष्टफलप्राप्तेः BrahmSūBh. (Śaṅ.) 785. 15 (*on* iv. 1. 12)

अन्त्यप्रत्ययाधीना (antyapratyayādhīnā) *adj. (f.)* dependant on the knowledge or realization at the time of death एवं सामान्येन सर्वत्र स्वप्राप्त्यावाप्तिरन्त्यप्रत्ययाधीनेत्युक्त्वा तदर्थं त्रयाणामुपासनप्रकारभेदं वक्तुमुपक्रमते GītāBh. (Rā.) 415. 4 (*on* 8. 7)

अन्त्यप्रत्ययावश्यंभाव (antyapratyayāvaśyambhāva) *m.* necessity of the knowledge or realization at the time of death न त्वत्र आ प्रायणादुपासीन-स्यान्त्यप्रत्ययावश्यंभावात् VedāntKa. 538. 24 (*on* iv. 3. 1)

अन्त्यप्रथम (antya-prathama) *adj.* (used as noun) (letter) first of the last (group) अन्त्यप्रथमे मध्यचतुर्थे मन्त्रेऽपि तौ व्यक्तौ VarivaRaha. 73.

अन्त्यप्रयाज (antya-prayāja) *m.* last fore-offering or fore-sacrifice एवम् अन्त्यप्रयाजपशुपुरोडाशावप्युदाहार्यौ NyāyMāVi. 224. 8 (*on* iv. 1. 7)

अन्त्यप्रयाजवत् (antyaprayāja-vat) *adv.* like the last fore-offering or fore-sacrifice दृष्टार्थत्वाच्च संस्कारो भवेदन्त्यप्रयाजवत् NyāyMāVi. 544. 18. (*on* x. 4. 21)

अन्त्यप्रश्नपरिपठिता (antyapraśna-paripaṭhitā) *adj.(f.)* read, i.e. mentioned in the last section कलाः ... पञ्चदश पञ्चदशसंख्याका या अन्त्यप्रश्नपरिपठिताः प्रसिद्धाः MuṇḍUBh. 358. 7 (*on* iii. 2. 7)

अन्त्यप्राप्ति (antya-prāpti) *f.* **1** attainment of the ultimate or supreme reality अन्त्येषु रेमिरे धीरा न ते मध्येषु रेमिरे। अन्त्यप्राप्तिं सुखामाहुर्दुःख-मन्तरमन्तयोः MahāBhā. xii. 168. 25; **2** obtainment, i.e. reference to the lowest

caste शूद्रवचनादेव दण्डापूपवदन्त्यप्राप्तौ तद्वचनमाश्रितशूद्रनिवृत्त्यर्थम् BālaKrī. i. 112. 15 (*on* 1. 147)

अन्त्यफल (antya-phala) *n*. **A** highest fruit or goal नवाप्तिरन्त्यफलयोः AbhidhK. 2. 16; **B** maximum or greatest equation of the centre or the difference between the mean and true position of a planet कोट्याः पदवशाद्धित्वा युक्त्या वान्त्यफलं पुनः। तद्वर्गबाहुवर्गस्य योगात् कर्णः पदं भवेत् MaBhāsk. 4. 19; त्रिज्योद्भवं फलमिहान्त्यफलस्य जीवा GrahaGa. 47. 13 (8. 26); त्रिज्या तथा कोटिफलेन युक्ता हीना च तद्दोः फलवर्गयोगात्। मूलं श्रुतिर्वान्त्यफल-त्रिमौर्व्योर्वर्गैक्यराशेश्च तथा युतोनात् GrahaGa. 47. 25 (8. 28); मध्यस्थरेखे किल वृत्तयोर्ये तदन्तरालेऽन्त्यफलस्य जीवा Golā. 200. 28 (23. 15); व्यस्तं त्रिभेऽस्य प्रतिमण्डलेऽन्त्यफलम् SiddhāTaVi. 131. 7.

अन्त्यफलजज्यका (antyaphalaja-jyakā) *f*. chord or radius of epicycle connected with, i.e. useful for maximum or greatest equation of the centre द्वयं नृपाः पंचवेदा। ... मान्दान्त्यफलजज्यका SiddhāTaVi. 108. 18.

अन्त्यफलज्यका (antyaphala-jyakā) *f*. chord or radius of epicycle pertaining to, i.e. yielding maximum or greatest equation of the centre उद्योन्मुखीमन्त्यफलज्यकां च दत्त्वा कुमध्याद्विलिखेत् तदग्रे। त्रिभज्ययैव प्रतिमण्डलाख्यम् Golā. 200. 9 (5. 12); मध्यकक्षाव्यासदलं त्रिज्या यन्मानतः किल। तन्मानात् परिधेर्व्यासदलं चान्त्यफलज्यका SiddhāTaVi. 108. 17; शनेरष्टौ शरा ... मान्दा ... अन्त्यफलज्यका SiddhāTaVi. 108. 22; बिम्बात्तथैवान्त्यफलन्य-काख्यश्रुतावपि स्वीयफलाय जात्यम् Siddhā TaVi. 116. 5.

अन्त्यफलज्यकाग्र (antyaphalajyakāgra) *n*. starting point of the radius of epicycle pertaining to, i.e. yielding maximum or greatest equation of the centre तद्वृत्तकेन्द्रं क्षितिगर्भगं नो किन्त्वन्तरेतोऽन्त्यफलज्यकाग्रे SiddhāTaVi. 114. 16; कुगर्भतश्चान्त्यफलज्यकाग्रे सदा सुगन्धद्वयवद्धसूत्रे SiddhāTaVi. 123. 6.

अन्त्यफलज्यकाघ्नी (antyaphalajyakāghnī) *adj*. multiplied by the chord of epicycle pertaining to, i.e. yielding maximum or greatest equation of the centre भुजकोटिफलाह्वये ... त्रिज्योद्धृते च यदि वान्त्यफलज्यकाघ्नौ GrahaGa. 47. 12 (8. 26)

अन्त्यफलज्या (antyaphala-jyā) *f*. sine of epicycle for the greatest equation of the centre स्वरद्दग्घ्नं स्वद्दगंशैर्गुणयान्त्यफलज्यया भक्तम् BrāhmSphuSi. 9. 3; कोटिज्यया द्विगुणयान्त्यफलज्यया गुणितया युतोनायाः। ... त्रिज्याफलज्या ... पदं कर्णः BrāhmSphuSi. 14. 8; (इदानीं कर्णानयनं प्रकारचतुष्टयेनाह) स्वकोटिजीवान्त्यफलज्ययोर्यो योगो मृगादावथ कर्कटादौ GrahaGa. 47. 22 (8. 27); 50. 30 (8. 32); कक्षास्थमध्यग्रहचिह्नतोऽथ वृत्तं लिखेदन्त्यफलज्यया तत् Golā. 202. 4 (5. 24); योजनाद्यान्त्यफलज्या SiddhāTaVi. 41. 2; केन्द्रे स्वकोटिजीवान्त्यफलज्ययोश्च। योगोऽन्तरं कोटिः SiddhāTaVi. 109. 17; 109. 22; अन्त्यफलज्या त्रिज्यायां युतोना SiddhāTaVi. (Śeṣavā.) 10. 7; 11. 12.

अन्त्यफलज्यागुणिता (antyaphalajyā-guṇitā) *adj*. *(f.)* multiplied by the sine pertaining to, i.e. yielding maximum or greatest equation of the centre केन्द्रज्यान्त्यफलज्यागुणिता फलजीवया हता कर्णः KhaṇḍanKhā. 6. 1.

अन्त्यफलज्याग्र (antyaphalajyāgra) *n*. centre of chord of epicycle pertaining to, i.e. yielding maximum or greatest equation of the centre इत्थं शिल्पज्ञ बुद्ध्वेमां वासनां शृणु तत्त्वतः। बिम्बादन्त्यफलज्याग्रतुल्यकर्णे तु दोर्ज्यका SiddhāTaVi. 119. 24; अन्त्यफलज्याग्रात्स्यात् पदयोराद्यन्तयोरुपरिकोटिः Brāhm-SphuSi. 14. 13.

अन्त्यफलज्याभुज (antyaphalajyā-bhuja) *m*. adjacent side of the anomaly pertaining to, i.e. yielding maximum or greatest equation of the centre अन्त्यफलज्याभुजे त्रिज्याकोटौ कर्ण एव भवेदोजान्तकर्णः SiddhāTaVi. (Śeṣavā.) 11. 12.

अन्त्यफलज्यार्ध (antyaphalajyārdha) *m*. half of the sine pertaining to, i.e. yielding maximum equation of the centre त्रिज्यान्त्यफलज्यार्धेन युतोनिता ज्यारूपकर्णौ देवर्षिमते SiddhāTaVi. (Śeṣavā.) 10. 14.

अन्त्यफलज्योना (antyaphalajyonā) *adj*. *(f)* lessened by the sine of difference between the mean and the true position of a planet केन्द्रज्यान्त्यफलज्यागुणिता फलजीवया हता कर्णः। त्रिज्यान्त्यफलज्योना चक्रार्धे संयुता चक्रे KhaṇḍanKhā. 6. 1.

अन्त्यफलद्विनिघ्नी (antyaphala-dvinighnī) *adj*. *(f)* multiplied by the two and the maximum or greatest equation of the centre कोटिज्यया वान्त्यफलद्विनिघ्न्या। मूलं श्रुतिर्वा मृदुदोःफलस्य चापं बुधा मन्दफलं वदन्ति GrahaGa. 47. 26 (8. 29)

अन्त्यफलधनुस् (antyaphala-dhanus) *n*. arc of epicycle pertaining to the maximum or greatest equation of the centre त्रिभमन्त्यफलधनुर्युतमाद्यं नवमं तृतीयपदमूनम् BrāhmSphuSi. 14. 16.

अन्त्यफलस्फुटत्व (antyaphala-sphuṭatva) *n*. correction or perfection of the greatest equation of centre नीचोच्चवत्स्वान्त्यफलस्फुटत्वे यथोक्तमेवेत्यविशेषः SiddhāTaVi. 128. 24.

अन्त्यफलाहत (antyaphalāhata) *adj*. multiplied by the greatest equation of the centre चतुर्थांशेन शेषस्य द्विष्ठमन्त्यफलाहतम् MaBhāsk. 7. 18.

अन्त्यबहिस् (antyabahis) *adv*. excepting the last, i.e. the twelfth house of the horoscope पाणिग्रहः। सप्ताष्टान्त्यबहिः शुभैरुडुपतौ BṛSaṁ. 100. 1.

अन्त्यबाण (antya-bāṇa) *m*. celestial latitude at the end (of moon's eclipse) युग्मे विधोर्वा प्रथमान्त्यबाणौ चन्द्रग्रहे व्यस्तदिशः शराः स्युः KaraṇaKu. 4. 17 (22)

अन्त्यबिन्दु (antya-bindu) *m*. dot (marking nasality) at the end, final dot गणानां त्वा गणपतिम् ... सीद सादनम्। इत्येवमाद्यमक्षरं तदन्त्यबिन्दुपूर्णम् ... गं गणपतये नमः TripuTāU. 538. 25.

अन्त्यबीज (antya-bīja) *n*. **1** last mystic letter or syllable आद्यबीजद्वयं न्यस्य ह्यन्त्यबीजं न्यसेदिति BrahmāṇḍP. iii. 44. 15; **2** last seed आह्वानस्य सकृत्करणेऽपि तदुपलक्षितस्य मुसलदानकालस्यान्त्यबीजावघातसमयेऽपि सत्त्वात् तदवधिकवाग्यमोपपत्तेः BhāṭṭDī. iv. 180. 5 (*on* xi. 3. 7)

अन्त्यबुद्धिनिर्ग्राह्य (antyabuddhi-nirgrāhya) *adj*. to be grasped by the comprehension of the final letter व्यक्तशब्दानां तथा श्रूयमाणा ये वर्णा नादशब्दवाच्या अन्त्यबुद्धिनिर्ग्राह्याः स्फोटाभिव्यञ्जकास्ते ध्वनिशब्देनोक्ताः Loc. 47. 13 (*on* 1. 16); डित्थादिशब्दानामन्त्यबुद्धिनिर्ग्राह्यं संहतक्रमं स्वरूपं वक्त्रा यदृच्छया डित्थादिष्वर्थेषूपाधित्वेन संनिवेश्यत इति सोऽयं संज्ञारूपो यदृच्छात्मक इति KāvyPra. 35. 2; डित्थादीनां शब्दानामन्त्यबुद्धिनिर्ग्राह्यं संहतक्रमं स्वरूपम् Kāvyānu. (He.) 27. 13.

अन्त्यभ (antya-bha) *n*. **A** last zodiac sign, i.e. Pisces तौक्षिक आकोकेरो हृद्रोगश्चान्त्यभं चेत्यम् Bṛhajjā. 1. 8; HorāSā. 1. 25; JātaPā. 17. 27; **B** last lunar mansion or constellation, i.e. Revatī जलेशसार्पमाहेन्द्रनक्षत्रेषु सुभिक्षकृत्। क्षुच्छस्त्रावृष्टिदो मूलेहिर्बुध्न्यान्त्यभयोर्भयम् NāraS. 2 (7). 2; प्रवेशवस्त्रसीमन्तक्षौर-भेषजमन्त्यभे NāraS. 6. 25; ब्रह्मेज्यार्यमवैशाखहरिवस्वंत्यभेषु च VasiS. 42. 3; चतुर्थांशेऽन्त्यभस्य च। जातस्तु पितरं हन्ति जाता चेन्मातरं तथा JātaPā. 9. 63; **C** last, i.e. twelfth house in the horoscope एकादशोपांत्यभवायलाभाः रिःफव्ययद्वादशकांत्यभानि JātaPā. 1. 52.

अन्त्यभव (antya-bhava) *adj*. (last two types) coming at the end इभग्रहः पञ्चधा। ... वर्ज्यावन्त्यभवावुभावपि विशेषादेतयोश्चान्तिमः MātaLī. 10. 1 [AnekāTi. 2. 5 gives *antyabhava* as the meaning of *antya*]

अन्त्यभाग (antya-bhāga) *m*. **Ai** final portion (of a sentence) अस्यैव वाक्यस्यान्त्यभागे प्राङ्मुखान् वैश्वदेवान् उपवेशयेत् ... इत्यभिधानात् CaturCin. iii(1). 1143. 15; **Aii** last portion (of a text) क्रमेण नत्वन्त्यभागस्य पूर्वमध्ययनेन ManvaVi. 226. 9 (*on* 2. 173); **Aiii** final part (i.e. *y*) व्येजोऽन्त्यभागस्य किति लिटि संप्रसारणं वेति केचित्। विव्युतुः विव्ययतुः PrakriKau. ii. 174. 3 (*on* vi. 1. 46); **B** last portion वारस्याहः प्रमाणमष्टधा विभज्य तत्र प्रथमान्त्यभागौ वाराधिपत्यंशौ ज्ञेयौ VīraMi. (Saṁskāra.) 791. 12.

अन्त्यभाण्डस्थित (antyabhāṇḍa-sthita) *adj*. kept in the vessel of a Śūdra अन्त्यभाण्डस्थिताः एते AtriS. 251; स्नेहाश्च फलसंभवाः। अन्त्यभाण्डस्थिताः LikhiSm. 93.

अन्त्यभावविकार (antya-bhāvavikāra) *m*. last modification of beings, i.e. destruction वेद विजानाति अविनाशिनम् अन्त्यभावविकाररहितं नित्यं विपरिणामरहितं यो वेद इति संबन्धः GītāBh. (Śaṅ.) 34. 16 (*on* 2. 21); अन्त्यभावविकाराभावानुवादेन पूर्वभाविनः सर्वे भावविकाराः प्रतिषिद्धाः GītāBh. (Śaṅ.) 401. 12 (*on* 13. 27)

अन्त्यभाविन् (antya-bhāvin) *adj*. existing in the minutest or finest entity ये पुनः कल्पिता एते विशेषा अन्त्यभाविनः। नित्यद्रव्यव्यपोहेन तेऽप्यसंभविताः क्षणाः TattvSaṁ. 813.

अन्त्यभिन्न (antya-bhinna) *adj*. different from the last बाधस्त्रिविधः अर्थलोपात् प्रत्याम्नानात्प्रतिषेधाच्चेति। तत्रान्त्यभिन्नबाधोपोद्घातत्वेनेदं प्रतिपादनीयम् BhāṭṭDī. iii. 187. 23 (*on* x. 1. 1)

अन्त्यभूमिक (antyabhūmi-ka) *n*. (pillers of the) top storey तत्तद्वितस्तिहीनेन त्रिकरं चान्त्यभूमिके MayaMa. 15. 3.

अन्त्यभूमिद्वय (antya-bhūmidvaya) *n*. last pair of fields (of mind) अन्त्यभूमिद्वयमेव लक्ष्यमित्याह YogVār. *on* 1. 1.

अन्त्यभूषा (antya-bhūṣā) *f.* final embelishment or decoration त्वमन्त्यभूषां कुरुषे जनानां जटाकलापैरुरगेन्द्र हारैः SkandP. iv. 5. 36; त्वमन्त्यभूषां कुरु काशिवासिनां गले सुनीलां भुजगेन्द्रकङ्कणाम् SkandP. iv. 32. 153.

अन्त्यभेद (antya-bheda) *m.* last variety or type अन्त्यभेदविपर्ययस्तु चारुत्वात्समाख्योऽलंकारः AlaṅkāSa. 132. 9; षट्पञ्चाशदधिकं शतद्वयं भेदाः। तेषां मध्यात् ... अन्त्यभेदं यावद्वर्जनीयः ChandaśCū. 8. 2 (29)

अन्त्यमणि (antya-maṇi) *m.* excellent jewel मुख्यं भूपालान्त्यमण्योरयः पुंसि गतावपि NānārthMa. 1299.

अन्त्यमणिद्वय (antya-maṇidvaya) *n.* last two jewels सुवर्ण ... ग्रीवामण्डनेऽन्त्यमणिद्वये। प्रभोर्यस्याङ्कितं नाम स्तुमहे परमेश्वरम् PurāPraSaṁ.76.13.

अन्त्यमण्डन (antya-maṇḍana) *n.* last, i.e. funeral decoration क्रियतां कथमन्त्यमण्डनं परलोकान्तरितस्य ते मया KumāSaṁ. 4. 22; अथ तस्य कथंचिदङ्कतः स्वजनस्तामपनीय सुन्दरीम्। विससर्ज तदन्त्यमण्डनामनलायागुरुचन्दनैधसे RaghuVa. 8. 71.

अन्त्यमध्यमदशावयव (antyamadhyama-daśāvayava) *m.* last and middle part of a wick अन्त्यमध्यमदशावयववाग्निसंयोगोपादाना दीपज्वाला आदिदशावयववाग्निसंयोगोपादानज्वालाप्रतियोगिकभेदवती SiddhāSi. ii. 6. 24.

अन्त्यमध्यमशब्द (antyamadhyama-śabda) *m.* last and middle sound अन्त्यमध्यमशब्दास्तु शब्दासमवायिकारणकाः TarkBhā. (Ke.) 72. 10.

अन्त्यमनु (antya-manu) *m.* last Manu नाभिः आद्यक्षत्रियभेदेऽन्त्यमनौ NānārthāSaṁ. i. 101. 685.

अन्त्यमनुष्य (antya-manuṣya) *m.* person of the lowest caste, i.e. Śūdra धिक्तस्य जीवितं राज्ञो राष्ट्रे यस्यावसीदति। अवृत्त्यान्त्यमनुष्योऽपि यो वै वेद शिबेर्वचः MahāBhā. xii. 128. 34.

अन्त्यमनोवृत्ति (antya-manovṛtti) *f.* last mental function, i.e. psychosis विनाशिध्वंसानां धारात्वे तु गौरवं, व्यर्थता च, अन्त्यमनोवृत्तेः मुक्तित्वसंभवात् LaCandr.885.37.

अन्त्यमात्रवचन (antyamātra-vacana) *adj.* expressive of the mere sense of excellent or highest उत्तमशब्दम् अव्युत्पन्नम् अन्त्यमात्रवचनम् आश्रित्य प्रश्नः Pradī. iv. 86A. 13. (*on* iv. 1. 78)

अन्त्यमात्रा (antya-mātrā) *f.* lowest measure or quantity नासिकारन्ध्रयोरष्टौ षट् चत्वारश्च बिन्दवः। प्रत्येकं रेचने योज्या मुख्यमध्यान्त्यमात्रया ŚārṅgaS. iii. 8. 9 (comm. अन्त्या कनिष्ठा मात्रा)

अन्त्यमान (antya-māna) *n.* highest measure (of purity) वारत्रयगृहीताधिकानां तु मानापेक्षायामन्त्यमानस्य प्रसृत्यर्धार्धस्य ग्रहणम् ManvaVi. 679. 10 (*on* 5. 137)

अन्त्यमाया (antya-māyā) *f.* last line of heart हंसाद्ययाद्या मध्या (१) स्यादादिमध्यस्थहंसया। तृतीया प्रकृतिः सैव तुर्या तैरन्त्यमायया TantrRā. 3.4.

अन्त्यमासत्रय (antya-māsatraya) *n.* last three months गौतमोक्तपक्षद्वयस्य ... अन्त्यमासत्रयविषयत्वेन व्यवस्थायुक्तत्वात् BālamBha. iii. 63. 23 (*on* 3. 20)

अन्त्यमित्र (ánty-amitra) *adj.* having the foes within सुषेणश्चान्त्यमित्रश्च दूरे अमित्रश्च ... उ षु णः ... एतंन TaiS. IV. vi. 5. 6.

अन्त्यमुक्त (antya-mukta) *adj.* last liberated (soul) स्यामन्त्यमुक्तः किमहमिति TattvMu. 2. 27.

अन्त्यमुक्ति (antya-mukti) *f.* last (path of) liberation अकोप्यस्य दशभावना। तत्संचारेऽन्त्यमुक्तौ च AbhidhK. 7. 25

अन्त्यमुनि (antya-muni) *m.* last sage नाभिः ... आद्यक्षत्रियभेदेऽन्त्यभ-(v.l. मु)नौ NānārthāSaṁ. i. 101. 685.

अन्त्यमूल (antya-mūla) *n.* (Math.) highest valued solution or root (of a quadratic equation) प्रथमोऽन्त्यमूलमन्यो गुणकारपदोद्धृतः BrāhmSphuSi. 18. 69; यद्याद्यन्त्यमूलयोर्घातो द्विघ्नो मध्यखण्डं स्यात् तर्हि तन्मूललाभो नेतरथा SiddhāTaVi. (Śeṣavā.) 51. 4 [(in Arith.) last or greatest root (in the square), MW.]

अन्त्यमूल्यघ्न (antyamūlya-ghna) *adj.* multiplied by the last denominator (of the remnant price) पुनरपि अन्त्यार्धे भिन्ने सति समधनानयनसूत्रम्, ज्येष्ठांशद्विहरहतिः सान्त्यहरा विक्रयोऽन्त्यमूल्यघ्नः GaṇiSāSaṁ. 5. 109 ½.

अन्त्यमृत्युलग्नग (antyamṛtyulagna-ga) *adj.* (planet) occupying the last, i.e. the twelfth, the eighth and the first house in the horoscope क्रूरेण संयुतः शशी स्मरान्त्यमृत्युलग्नगः। कण्टकाद्बहिः शुभैरनीक्षितश्च मृत्युदः JātaPāri.4.34.

अन्त्यमौर्वीहता (antyamaurvī-hatā) *adj.* (*f.*) multiplied by the last sine of arc अन्त्यमौर्वीहतां भुक्तिं मध्यमां धनुषा हरेत् LaBhāska. 2. 9.

अन्त्ययति (antya-yati) *adj.* having pause or caesura at the end आद्यान्त्ययतिश्चतुस्त्रिकयुता ज्ञेयापरा सप्तभिः ... तज्ज्ञेयं खलु वृत्तजातीनिपुणैः शार्दूलविक्रीडितम् NāṭyaŚā. 15. 121.

अन्त्ययति (antya-yati) *f.* last caesura मन्दाक्रान्तान्त्ययतिरहिता सालंकारे भवति यदि सा। ... ज्ञेया हंसी ŚrutaBo. 19.

अन्त्ययमक (antya-yamaka) *n.* type of rhyme wherein the last part of a foot has alliteration तदेवमन्त्ययमकं यथा-व्यथितसिन्धुमनीरशनैः शनैः ... । फणवतामभितो विततं ततं दयितरम्यलताबकुलैः कुलैः SaraKaṇṭhā. 199. 6.

अन्त्ययागाभ्यास (antya-yāgābhyāsa) *m.* last repetition of the (Jyotiṣṭoma) sacrifice संस्था नामान्त्ययागाभ्यासानन्तरं या क्रियोपरतिः साभिधीयते TantrVā. 1118. 2 (*on* iii. 6. 43)

अन्त्ययात्रा (antya-yātrā) *f.* last journey अन्त्ययात्रायां महं वस्तुपालस्य आकेवालीयसरसःपाल्यां आकली समेता PurāPraSaṁ. 78. 1.

अन्त्ययाम (antya-yāma) *m.* last watch, i.e. a period of three hours of the night रात्रौ वसोऽन्त्ययामास्वापेऽद्यः ŚākaṭāVyā. iv. 3. 206; SiddhaHe. v. 2. 6; शुद्धेरपवादमाह ...'रात्रिशेषे सति द्वाभ्यां, प्रभाते तिसृभिः' इति। प्रभाते - अन्त्ययामे NirṇaSi. 380. 18; अतीतरात्रेरन्त्ययामेनागामिन्याः पूर्वयामेन च सहितः कालः अद्यतनः LaŚabdeŚe. ii. 434. 9; ii. 252. 20.

अन्त्ययामार्ध (antyayāmārdha) *m.* half of the last watch अहिवासवपौष्णानामन्त्ययामार्धमृक्षसंधिः स्यात् VasiS. 32. 65.

अन्त्ययुग (antya-yuga) *n.* **1** pair of final syllables विदर्भितं स्वनाम्नैव परितोऽन्त्ययुगं न्यसेत् AhirbuS. 26. 31; PāraS. 23. 65; **2** last age, i.e. Kali-age कलिः ... अन्त्ययुगम् Liṅgānu. (Ha.) 24. 8; Liṅgānu. (He.) 26. 15; AnekāSa. 732; Vaija. 215. 17; AnekāSaṁ. 2. 466; ViśvaPra. 152. 48; DharK. 2328; AnekāK. 791; NānārthaMa. 1625; ŚabdaRa. (Vā.) 3760; ViśvaLoK. 330.6.

अन्त्ययुज् (antya-yuj) *adj.* (Math.) adding the successively last number (of series) अधउपरिगुणितमन्त्ययुगूनाग्रच्छेदभाजिते शेषम् अधिकाग्रच्छेदगुणं द्विच्छेदाग्रमधिकाग्रयुतम् Āryabh. 2. 33(47)

अन्त्ययोज्यत्व (antyayojya-tva) *n.* the state of being what is to be supplied or added at the end व्यञ्जनं चेद्यथावस्थं सहाद्येन स्वरेण तु। आवर्त्यतेऽन्त्ययोज्यत्वादन्त्यानुप्रास एव तत् SāhiDa. 477. 2.

अन्त्ययोनि (antya-yoni) *adj.* (used as noun) **A** (one) having the lowest origin, Caṇḍāla स्त्रीणां साक्षिणः स्त्रियः कुर्यात् ... अन्त्यानामन्त्ययोनयः VāsiDS. 16. 30; ManuSm. 8. 68; KātySm. 351 (46. 9); ManuBh. ii. 105. 18 (*on* 8. 68) [*but* MW. *f.* of the lowest origin]; **B** (one) having the lowest origin, Śūdra ब्राह्मणस्यान्त्ययोनिर्न दासः VyavaNi. 311. 16.

अन्त्यराजि (antya-rāji) *f.* last line (of a mystical diagram) बाह्यविंशतिकोष्ठेऽन्त्यराजिष्वन्तर्भुवोऽक्षरम्। ... रेखाग्रेषु ... यन्त्रं लिखित्वा संपूज्य ... बलिम् बध्येत् ĪśānŚiPa. i. 45. 61.

अन्त्यरात्रिजनित (antyarātri-janita) *adj.* produced during the last night अन्त्यरात्रिजनितान् कथयामि भूमन् पश्चात् दिनावतरणे च भवद्विलासान् Nārāy. iii. 8. 4.

अन्त्यराशि (antya-rāśi) *m.* last zodiac sign, i.e. Pisces अभिभवति सपत्नान् स्त्रीजितश्चारुदृष्टिः द्युतिनिधिधनभोगी पण्डितश्चान्त्यराशौ Bṛhajjā. 17.12; कर्कटकन्यान्त्यराशयः शुभदाः VasiS. 23. 18.

अन्त्यर्क्ष (antyarkṣa) *n.* **1** last constellation, i.e. Revatī भगवासवमाषाढे श्रावणे हरिविश्वभम्। नभस्ये वारुणान्त्यर्क्षमजपादश्वयुज्यपि VasiS. 42. 75; **2** last, i.e. twelfth house in the horoscope वृषवृश्चिककर्कटैर्नृणामनुकूलैरपि लग्नमाश्रितैः। गमनं च वदन्त्यशोभनं मुनयोऽन्त्यर्क्षसमाश्रितैरपि DaivaVa.15.18.

अन्त्यर्च् (antyarc) *f.* last hymn अन्तर्चा (v.l. अन्त्यर्चा) पौरुषस्यास्य सूक्तस्य सुरसत्तमान्। विष्वर्पितं चतुर्भागं क्रमाद्द्रव्यस्य चार्पयेत् BṛBrahmaS. iv.2.171.

अन्त्यर्ण (antyarṇa) *n.* the last of the three debts, the debt towords ancestors, which every one has to pay, i.e. begetting children परिचर्य वसिष्ठकामधेनुं धनमन्त्यर्णविशुद्धये सुताख्यम्। स नृपः सुचिरादथोपलेभे RāmC. 8. 41.

अन्त्यलकाररेफ (antya-lakārarepha) *m.* last *la*-and *ra*-letters द्व्यक्षरं वा चतुरक्षरं वा विवर्जयेद्यान्त्यलकाररेफम् VasiS. 25. 17; अन्त्यलकाररेफं परहल् इत्यादि ViraMi. (Saṁskāra.) 242. 2.

अन्त्यलक्षणार्थत्व (antyalakṣaṇārtha-tva) *n.* the state of having the purpose of indicating the lowest caste मनुवचनस्यान्त्यलक्षणार्थत्वादविरुद्धं स्वर्णकारजातेर्वात्यन्तनिकृष्टत्वप्रतिपत्त्यर्थम् BālaKrī. ii. 76. 11 (*on* 3. 204)

अन्त्यलग्नरहित (antyalagna-rahita) *adj.* not occupying the twelfth or

the first house in the horoscope लग्नरिकर्महिबुकेषु शुभेक्षिते ज्ञे द्यूनान्त्यलग्नरहितेष्वशुभग्रहेषु यातुर्भयं न भवति YogYā. 4. 21.

अन्त्यलघु (antya-laghu) *m.* final short syllable यदि तु गुरोः सन्निधानादन्त्यो गुरुरेव समुच्चीयेत तदाऽन्त्यलघुमति अनन्त्यगुरावेतस्य, अन्त्यलघौ 'दूराद्धूते च' इत्यादीनां दुर्वारत्वेन प्लुतसमावेशापत्तिः LaŚabdeŚe. i. 114. 17.

अन्त्यलघु (antya-laghu) *adj.* having a short syllable at the end मध्ये गुरुर्जकारः स्याद्रकारो लघुमध्यकः। आदौ लघुर्यकारः स्यात्तकारोऽन्त्यलघुर्मतः Mānaso. iv. 2. 223.

अन्त्यलघुमत् (antyalaghu-ma(n)t) *adj.* having a short syllable at the end यदि तु गुरोः सन्निधानादन्त्यो गुरुरेव समुच्चीयेत तदान्त्यलघुमति अनन्त्यगुरावेतस्य, अन्त्यलघौ 'दूराद्धूते च' इत्यादीनां दुर्वारत्वेन प्लुतसमावेशापत्तिः LaŚabdeŚe. i. 114. 17.

अन्त्यलिङ्ग (antya-liṅga) *n.* last of the grammatical genders, neuter gender अन्त्यलिङ्गेऽथ वर्तन्ते ये शब्दा नृपसत्तम। तानहं संप्रवक्ष्यामि ViṣṇuDhaP. iii. 13. 1.

अन्त्यलोन (antyalona) *adj.* devoid of short syllable at the end सोन्त्यलोनः कुङ्कुमः ChandaśCū. 7. 3 (Chandonu. स एव कर्पूरः अन्त्यलघुना ऊनः कुङ्कुमः)

अन्त्यलोप (antya-lopa) *m.* **A** act of leaving out, i.e. selection of the last item (in a series) आनुपूर्व्यतामेकदेशग्रहणेष्वागमवदन्त्यलोपः स्यात् MīmāSū. x. 5. 1; तदत्र संशयः। किं सर्वेष्वेवाद्योपादानम्, अन्त्यलोपश्च, उत विकल्पः ŚābaBh. 1947. 12 (*on* x. 5. 1): समो ह्यन्त्यलोप आद्यलोपेन ŚābaBh. 1948. 5(*on* x. 5. 3); प्राकृतानां बहूनामेकदेशग्रहणे सत्याद्योपादानमन्त्यलोप इति स्थितम् ŚāstrDī. 720. 5 (*on* x. 5. 5); न च मुख्यस्यानुग्रहे सत्यन्त्यलोपस्यैव न्याय्यत्वम् BhāṭṭDī. iv. 1. 14. (*on* x. 5. 1); प्राकृतानाम् एकदेशग्रहणे आद्योपादानमन्त्यलोपश्चेति स्थितम् BhāṭṭDī. iv. 7. 5 (*on* x. 5. 5); यत्र प्राथमिकपदार्थनिवेशो निश्चितस्तत्रागन्तुन्यायादन्त्यलोपः MayūMāli. 717. 13 (*on* x. 5. 1); **B** elision of the final syllable सं तुम् मनःकामेऽवश्यं त्येऽन्त्यलोपं संमांसौ तु हिततते पाकपचने वा MugdhaBo. 6. 72 (62. 20); अन्त्यलोपे कृते द्विशतिकेति न स्यात् PariVṛ. (Sī.)110. 12; इह शेषे लोपोऽन्त्यलोप इति पक्षे जसः शी प्राप्तः SiddhāKau. 91B. 1 (*on* vii. 2. 93); ढकि लोपः। पितृष्वसुरन्त्यलोपः स्याड्ढकि ... पैतृष्वसेयः SiddhāKau. 233A.16(*on* iv. 1. 133); अन्त्यलोपे द्वयोरकारयोः पररूपे 'एकादेश उदात्तेन' इत्यभ्यम आद्याकार उदात्तः LaŚabdeŚe. i. 329. 12; च्विश्चेति। ... अनेनान्त्यलोपे यथायथमीत्यादि LaŚabdeŚe. ii. 403. 4.

अन्त्यलोपत्व (antyalopa-tva) *n.* the state of being the elision of the final syllable भ्यसो भ्यम् अभ्यम् वा आदेशः स्यात्। आद्यः शेषे लोपस्यान्त्यलोपत्व एव SiddhāKau. 92A. 8(*on* vii. 1. 30)

अन्त्यलोपवचन (antyalopa-vacana) *n.* statement of the elision of the final syllable तस्माद् अन्त्यलोपवचने प्रयोजनं नास्ति Nyās. ii. 601. 19 (*on* vi. 4. 154)

अन्त्यलोपापत्ति (antyalopāpatti) *f.* undesired contingency of the elision of the final syllable एषु विधिषु कृतेषु स्थानिवद्भावाण्णित्त्वेन लोपो भविष्यति। ... इयङादेशेऽन्त्यलोपापत्तेः इत्युक्तं भाष्ये LaŚabdeŚe. ii. 509. 12.

अन्त्यलौकिक (antya-laukika) *adj.* (first two kinds of egoism) ordinary or conventionally established like the last, i.e. vulgar वर्जनं महतां मतम् प्रथमं द्वावहंकारावङ्गीकृत्यान्त्यलौकिकौ YogVā. iv. 33. 58 (comm. अन्त्यो देहात्मभावाहंकार इव लौकिकौ निरूढतमौ)

अन्त्यवचन (antya-vacana) *adj.* expressive of the sense of the highest or excellent उत्तमशब्दोऽन्त्यवचनः Nyās. ii. 175. 2 (*on* v. 4. 90)

अन्त्यवत् (antya-vat) *adv.* **1** as final letter एकवर्णः पदम्। सोऽपृक्तसंज्ञः। आद्यन्तवच्च TaiPrāti. 1. 56; **2** like the Śūdra मानवः। तीर्थातिक्रमदोषैः स बहिष्कार्योऽन्त्यवद्द्विजैः SkandP. iii(1). 27. 24.

अन्त्यवत् (antya-va(n)t) *adj.* possessing destruction, i.e. perishable अन्त(v.l. न्त्य)वन्त्यसुधर्मेऽस्मिन्धात्रा किं नु प्रमादतः MahāBhā. ii. App. I. 42(3)

अन्त्यवप्र (antya-vapra) *m., n.* last rampart अन्त्यवप्रे प्रतिद्वारं तस्थौ द्वास्थस्तु तुम्बुरुः TriṣaŚaPuC. i. 3. 450.

अन्त्यवर्ग (antya-varga) *m.* square of the greatest digit or number समत्रिघातश्च घनः प्रदिष्टः स्थाप्यो घनोऽन्त्यस्य ततोऽन्त्यवर्गः Līlā. 23; 18.

अन्त्यवर्ज (antya-varja) *adj.* excluding, i.e. devoid of the Śūdras सर्वं चापि चरेद्ग्रामं पूर्वोक्तानामसंभवे। अन्त्यवर्जं महाबाहो इत्याह भगवान्विभुः BhaviP. 18A. 27 (i. 4. 155)

अन्त्यवर्जम् (antyavarjam) *adv.* **1** with the exception of the last, i.e. the twelfth day (of the Dvādaśāha-sacrifice) पत्नीसंयाजान्तान्यहान्यन्त्यवर्जम् KātyŚS. xii. 3. 21; **2** by way of excluding the concluding rite तथापि वाक्यशेषवशादेवान्त्यवर्जं पत्नीसंयाजान्तता व्यवस्थाप्यते ŚāstrDī. 588. 10 (*on* ix. 1. 8)(MayūMāli. अन्त्यं वर्जयित्वा)

अन्त्यवर्जित (antya-varjita) *adj.* not occupying the last, i.e. the twelfth house in the horoscope त्रिषडायगतैः पापैः षडष्टान्त्यविवर्जितैः। शुभैः षष्ठाष्टलग्नान्त्यवर्जितेन हिमांशुना NāraS. 24. 29.

अन्त्यवर्ण (antya-varṇa) *m., n.* **1** final letter or syllable अन्त्यवर्णे हि विज्ञाते सर्वसंस्कारकारितम् TattvSaṁ. 2721; ŚlokaVār. 5 (11). 112 (538. 7); 7. 193 (899. 4); पूर्ववर्णजनितसंस्कारविशिष्टस्यान्त्यवर्णस्यार्थप्रतिपादकत्वम् TātpaṬ. (U.) 353. 22 (*on* 5 (5). 16); BrahmSūBh. (Śaṅ.)193. 5 (*on* i. 3. 28); NyāyMañ. i. 337. 25; स च पूर्वपूर्ववर्णोपलम्भसापेक्षत्वादन्त्यवर्णस्य ... संस्कार एवाश्रीयते PrakaPañ. 232. 5; अन्त्यवर्णे तु गृह्यमाणे स्मर्यमाणे वा किं शब्दव्यापारो विशिष्यते NyāyMañ. i. 81. 12; न च भावनाख्यसंस्कारसहितोऽन्त्यवर्णः प्रत्यायकोऽर्थस्य TātpaṬ. (Vā.) 469. 24(*on* ii. 2. 56); भूयः कार्यः कुट्टकोऽत्रान्त्यवर्णं तेनोत्थाप्योत्थापयेद् व्यस्तमाद्यात् BījGa. 9. 134; अन्त्यवर्णतद्वर्णयोरितरा व्यवधाने भवति LaŚabdeŚe. i. 342.1; संस्कारापेक्षिणश्चान्त्यवर्णस्य प्रत्यायकत्वान्न शब्दस्याप्रत्यायकत्वम् SphoṭSi. 88. 2; सिद्धे शब्दार्थसम्बन्धे इति च शास्त्रप्रतीतिः ... अन्त्यवर्णस्य चाप्रत्यायकत्वात् SphoṭSi. 100. 1; TantrRā. 3. 95; यद्यपि पदपदार्थविभागो वास्तवः तथापि व्युत्पत्तिर्यत्नोपपाद्या। अन्त्यवर्णस्य पदत्वाभावात् TantrRaha. 27. 14; भाष्यपर्यालोचनया अन्त्यवर्णस्यैव प्रत्यायकत्वम् YuktiSneha. 95. 29 (*on* i. 1. 5); BhāṭṭCin. i. 109. 21 (*on* i. 1. 4); **2A** the lowest caste, i.e. Śūdra हीना चतुर्थगदितायतपङ्क्तिकाख्या ... एवं द्विधा ... ग्राहे च ते कनकसूत्रमिवान्त्यवर्णात् ŚilpaRa. i. 40. 69; **2B** lowest caste अतिवृद्धो महाभीमो नाम्ना भीमोऽन्त्यवर्णजः GaṇeP. i. 76. 16 [Kośas give *antyavarṇa* as the synonym of the following words: *aṅghribhava*, PañcTaPra. 6. 12; *avaravarṇaka*, KośaKaTa. 1. 6983; *jaghanyaja*, NāmaMāli. 579; Vaija. 136. 1; AbhidhāCin. 894; KośaKaTa. 1. 6983; ŚabdaRa. (Vā.) 3020; *dvijapota*, Vaija. 136. 1; *pajja*, Abhidhā-RaMā. 2. 431; Vaija. 136. 1; AbhidhāCin. 894; KośaKaTa. 1. 6983; ŚabdaRa. (Vā.) 3020; *padya*, AbhidhāRaMā. 2. 431; Vaija. 136. 1; AbhidhāCin. 894; KośaKaTa. 1. 6983; ŚabdaRa. (Vā.) 3020; *vṛṣala*, AbhidhāRaMā. 2. 431; Vaija. 136. 1; AbhidhāCin. 894; KośaKaTa. 1. 6983; ParaNā. 2476; ŚabdaRa. (Vā.) 3020; *śūdra*, AbhidhāRaMā. 2. 431, NāmaMāli. 579; Vaija. 136. 1; AbhidhāCin. 894; KośaKaTa. 1. 6983; ParaNā. 2476; PañcTaPra. 6. 12; ŚabdaRa. (Vā.) 3020; *śyāma*, PañcTaPra. 6. 12; *saṅkarasambhava*, NāmaMāli. 579; *sevanejīvana*, PañcTaPra. 6. 12; and AnekāSaṁ. 2. 361 gives *antyavarṇa* as the meaning of *padya*]

अन्त्यवर्णकलना (antyavarṇa-kalanā) *f.* act of understanding the final letter or syllable वर्णानां श्रवणं क्रमेण समयस्मृत्या पदार्थग्रहस्तत्संस्कारजमन्त्यवर्णकलनाकाले तदालोचनम् NyāyMañ. ii. 15. 10.

अन्त्यवर्णगोचर (antyavarṇa-gocara) *adj.* referring to the final letter or syllable स चैष प्रत्ययः ... सदसद्वर्णरूपावभास्यन्त्यगोचर इष्यते SphoṭSi. 60. 2.

अन्त्यवर्णग्रहण (antyavarṇa-grahaṇa) *n.* comprehension of the final letter or syllable तां च बुद्धिम् ... सदसद्वर्णगोचरां केचिद्विचित्रामिच्छन्ति यया पदे पदेऽन्त्यवर्णग्रहणम् TātpaṬ. (U.) 468. 16 (*on* 5 (11). 111); समुदायश्च तेषां (वर्णानां) न संभवति अन्त्यवर्णग्रहणसमये पूर्वेषामसंभवात् NyāyKa. 269. 2.

अन्त्यवर्णचतुष्टय (antya-varṇacatuṣṭaya) *n.* final four letters or syllables स्वागतायां सप्ताक्षराणि यावद् रथोद्धतावत् अन्त्यवर्णचतुष्टयं यथा स्फुटलक्ष्मीः ... परिसर्पत् ... वरवल्गात् KāvyKaVṛ. 17. 13 (1. 42)

अन्त्यवर्णज्ञान (antyavarṇa-jñāna) *n.* knowledge of the final letter or syllable न तावत् पूर्ववोरन्त्यं प्रति विज्ञानयोरनुग्राहकत्वम्, अन्त्यवर्णज्ञानवेलायां तिरोहितत्वात् TātpaṬ. (U.) 465. 21 (*on* 5 (11). 101); तेन क्रमेण ... तथापि तदानीमन्त्यवर्णज्ञानमुपरतमिति कस्य साहायकं पूर्ववर्णस्मृतिर्विदधाति NyāyMañ. i. 337. 31.

अन्त्यवर्णज्ञानानन्तरम् (antyavarṇajñānānantaram) *adv.* after the knowledge of the final letter or syllable ज्ञानयौगपद्यप्रसङ्गादन्त्यवर्णज्ञानानन्तरं हि पूर्ववर्णस्मरणमिव समयस्मरणमपि तदैवापतति NyāyMañ. i. 337. 28; i. 359. 26.

अन्त्यवर्णद्वय (antya-varṇadvaya) *n.* final pair of syllables विदुष्यामन्त्यवर्णद्वयात् प्राक् लघुना मोटकम् KāvyKaVṛ. 11. 7 (1. 2)

अन्त्यवर्णपरिसमाप्ति (antyavarṇa-parisamāpti) *f.* end of the final letter or syllable आधिक्ये विभागवतः पर्यवसानायोगात्। अनेकाणुव्यत्ययनिमेषतुल्यकालत्वादन्त्यवर्णपरिसमाप्तेः PramāVāSvopVṛ. 80. 4.

अन्त्यवर्णपर्यन्त (antyavarṇa-paryanta) *adj.* ending with the final letter or syllable विवक्षात आरभ्यान्त्यवर्णपर्यन्तानि वर्णान्येकार्थप्रतिपत्तावधिकृतानि TātpaṬ. (U.) 461. 13 (*on* 5(11). 80); अन्त्यवर्णपर्यन्ता वर्णा एकार्थप्रतिपत्तये विवक्षिताः YuktiSneha. 95. 11 (*on* i. 1. 5)

अन्त्यवर्णप्रतिपत्ति (antyavarṇa-pratipatti) *f.* knowledge of the final letter or syllable न चान्त्यवर्णप्रतिपत्तेरूर्ध्वमन्य(म)स(श)कलं शब्दात्मानमुपलक्षयामः PramāVāSvopVṛ. 86. 16.

अन्त्यवर्णप्रतीति (antyavarṇa-pratīti) *f.* knowledge of the final letter or syllable अन्त्यवर्णप्रतीतिकाले पूर्ववर्णानां विनष्टानामपि स्मृत्युपनीतत्वादर्थप्रतीतौ निमित्तकारणत्वमस्त्येव NyāyKa. 119. 15.

अन्त्यवर्णप्रत्यक्ष (antyavarṇa-pratyakṣa) *m.* perceptual knowledge of the final letter or syllable पदे हि वर्णानां विजातीयाव्यवधानाद्युज्यतेऽतीतानामन्त्यवर्णप्रत्यक्षवेलायां सर्वेषां स्मरणम् NyāyRa. 878. 20 (*on* 7. 116); प्रत्येकवर्णानुभवजनितसंस्कारसहकृतेनान्त्यवर्णप्रत्यक्षसमये सदसदनेकविषया पदप्रतीतिः VaiyāBhū. 248. 17 (*on* 65)

अन्त्यवर्णप्रत्यय (antyavarṇa-pratyaya) *m.* **1** knowledge of the final letter or syllable तदेकं पदम् ... बौद्धमन्त्यवर्णप्रत्ययव्यापारोपस्थापितम् ... प्रतीयते YogBh. 143. 4 (*on* 3. 17); अन्त्यवर्णप्रत्ययात् पूर्ववर्णप्रतिसंधानप्रत्ययापेक्षादर्थप्रत्ययः NyāyVār. 314. 6 (*on* ii. 2. 60); तेऽपि ... अन्त्यवर्णप्रत्ययेन सहैकार्थक्रियामुपगन्तुं क्षमन्ते SphoṭSi. 44. 2; तस्मात्स्फोट एव शब्दः। स चैकैकवर्णप्रत्ययाहितसंस्कारबीजेऽन्त्यवर्णप्रत्ययजनितपरिपाके ... प्रत्यवभासते BrahmSūBh. (Śaṅ.) 198. 8 (*on* i. 3. 28); नापि ... अन्त्यवर्णप्रत्ययोऽर्थप्रत्ययहेतुः TātpaṬ. (Vā.) 469. 14 (*on* ii. 2. 57); नाप्यन्त्य एव कश्चित्पूर्ववर्णानुभवजनितः संस्कारः ... अन्त्यवर्णप्रत्ययसहकारीति युक्तम् TātpaṬ. (Vā.). 469. 25 (*on* ii. 2. 57); तथान्त्यवर्णप्रत्ययेन जनितः परिपाकः पौष्कल्यम् PrakaVi. 278. 13; तस्य च स्फोटस्य व्यञ्जक आनुपूर्वीविशेषविशिष्टतयान्त्यवर्णप्रत्ययः YogSā. 69. 5(4); (antya-varṇapratyaya); **2** final knowledge of letter अन्त्यश्चासौ वर्णप्रत्ययश्चेति अन्त्यवर्णप्रत्ययः सकलवर्णावगाहिनी स्मृतिः TātpaṬ. (Vā.) 472. 7 (*on* ii. 2. 57)

अन्त्यवर्णबुद्धि (antyavarṇa-buddhi) *f.* cognition of the final letter or syllable अन्त्यवर्णबुद्धावपि वर्णानुक्रमप्रतीतेः, तदभावे वाक्यभेदप्रतीत्यभावात् SphoṭSi. 218. 2.

अन्त्यवर्णबोधित (antyavarṇa-bodhita) *adj.* made known by the final letter or syllable न चान्त्यवर्णबोधितसंस्कारा स्मृतिरनुभवेन सह युगपदुत्पत्तुमर्हति TattvBi. 80. 2.

अन्त्यवर्णमात्र (antyavarṇa-mātra) *n.* mere final letter or syllable न चान्त्यवर्णमात्रस्य पुरःसंबन्धवेदनम् SphoṭSi. 105. 1; न चान्त्यवर्णमात्रमर्थसंबन्धितया प्रतिपद्यन्ते पुरस्तात् SphoṭSi. 105. 4.

अन्त्यवर्णवस्तु (antyavarṇa-vastu) *n.* object in the form of the final letter or syllable यथा च पूर्ववर्णानुस्मृतिनिचयसहितान्त्यवर्णानुभवस्योपान्त्यान्त्यवर्णवस्तुस्मृत्यनुभवयोर्निरन्तरम् ... ज्ञानकारणत्वं न संभवति तत् सर्वं समानतन्त्रसिद्धत्वात् Kiraṇā. 333. 18.

अन्त्यवर्णविज्ञान (antyavarṇa-vijñāna) *n.* knowledge of the final letter or syllable पारमार्थिकपूर्वपूर्वपदपदार्थानुभवजनितसंस्कारसहितमन्त्यवर्णविज्ञानमित्येके TattvBi. 6. 4; पदार्थज्ञानान्यथानुपपत्त्या पूर्वपूर्ववर्णसंस्कारसहितमन्त्यवर्णविज्ञानमेकमेव हेतुत्वेन त्वया कल्प्यते, तद्वत् VivaPraSaṁ. 43.4.

अन्त्यवर्णवेला (antyavarṇa-velā) *f.* time (of the utterance) of the final letter or syllable न चान्त्यवर्णवेलायां तेष्वालोचनसंभवः ŚlokaVār. 7. 116 (878. 6); घटमानमन्त्यवर्णवेलायामनुसंधानं वाक्येषु NyāyMañ. i. 356. 14.

अन्त्यवर्णश्रवण (antyavarṇa-śravaṇa) *n.* act of hearing, i.e. comprehending the final letter or syllable अन्त्यवर्णश्रवणकाले पूर्वपूर्ववर्णानुभवजनितसंस्कारसहकृतेनान्त्यवर्णसंबन्धेन पदव्युत्पादनसमयग्रहानुगृहीतेन श्रोत्रेणैकदैव ... पदप्रतीतिर्जन्यते TarkBhā. (Ke.) 49. 10.

अन्त्यवर्णश्रुति (antyavarṇa-śruti) *f.* act of hearing, i.e. comprehending the final letter or syllable नान्त्यवर्णश्रुतिः स्मृत्या नीता वाक्यार्थबोधिनी TattvBi. 76. 4; अपि चेयमन्त्यवर्णश्रुतिः स्वार्थसंकेतस्मृत्यपेक्षा वार्थप्रत्ययमादधीत TātpaṬ. (Vā.) 469. 17 (*on* ii. 2. 57); अन्त्यवर्णश्रुतिसमये च संकेतस्मृतिरनागता TātpaṬ. (Vā.) 469. 20 (*on* ii. 2. 57)

अन्त्यवर्णसंबद्ध (antyavarṇa-sambaddha) *adj.* connected with the final letter or syllable अन्त्यवर्णसंबन्धेन (v.l. °संबद्धेन) पदव्युत्पादनसमयग्रहानुगृहीतेन श्रोत्रेण ... पदप्रतीतिर्जन्यते TarkBhā. (Ke.) 49. 11.

अन्त्यवर्णसंबंध (antyavarṇa-sambandha) *m.* connection with the final letter or syllable अन्त्यवर्णसंबन्धेन पदव्युत्पादनसमयग्रहानुगृहीतेन श्रोत्रेण ... पदप्रतीतिर्जन्यते TarkBhā. (Ke.) 49. 11.

अन्त्यवर्णसहकारिन् (antyavarṇa-sahakārin) *adj.* associate of the final letter or syllable वासनापरनामा संस्कारः स्मृतिबीजमन्त्यवर्णसहकारी, तस्य च स्मरणफलप्रसवोन्नीतसद्भावस्यार्थधीजन्मनि सहकारितामात्रं कल्पनीयम् TattvBi.26.14.

अन्त्यवर्णसाचिव्य (antyavarṇa-sācivya) *n.* association with the final letter or syllable संस्काराः, तेषां च स्थेम्ना संभवत्यन्त्यवर्णसाचिव्यमभिधेयप्रत्ययजननाय TattvBi. 26. 2.

अन्त्यवर्णा (antya-varṇā) *f.* a woman of the lowest caste, a Śūdra female. APTE.

अन्त्यवर्णांश (antyavarṇāṁśa) *m.* part or aspect of the final letter or syllable भ्रान्तौ चेयमेव चित्रा बुद्धिर्निमित्तम्, एकैकज्ञानाद्विलक्षणेयमन्त्यवर्णांशे च प्रत्यक्षा, तावतैव प्रत्यक्षः स्फोट इति विभ्रमः NyāyRa. 539. 20 (*on* 5 (11). 117)

अन्त्यवर्णानुभव (antyavarṇānubhava) *m.* knowledge of the final letter or syllable अन्यत्र तु युगपदुपलब्धेष्वपि वर्णेषु युगपदन्त्यवर्णानुभवसमनन्तरं स्मरणम् NyāyMañ. i. 50. 13; अन्त्यवर्णानुभवः श्रोत्रजः इति युक्तम् TātpaṬ. (Vā.) 55. 6 (*on* i. 1. 1); प्रक्रिया तु अन्त्यवर्णानुभवस्योत्पादः NyāyVārPari. 307. 3; अन्त्यवर्णानुभवस्योत्पादः उत्पन्नेन संस्कारेणान्त्यवर्णानुभवसहकारिणा Kiraṇā. 334. 4.

अन्त्यवर्णाभिप्राय (antyavarṇābhiprāya) *adj.* meant to refer to the final letter or syllable धवखदिरम् ... । अपि तु धवखदिरं वृक्षौ इति समूहसमूहिनोरभेदोपचारात् । नापि अन्त्यवर्णाभिप्रायम् SphoṭSi. 82. 3.

अन्त्यवर्णाभिव्यक्त (antyavarṇābhivyakta) *adj.* manifest, i.e. conveyed by the final letter or syllable स च यद्यप्येकोऽखण्ड एकैकवर्णेनाप्यभिव्यज्यते तथाप्यन्त्यवर्णाभिव्यक्तो बोधहेतुः VaiyāSiMañ. 180. 3.

अन्त्यवर्णावसायिन् (antyavarṇāvasāyin) *adj.* (used as noun) (person) belonging to the lowest caste, i.e. Cāṇḍāla etc. अन्त्यवर्णावसायिनामार्द्रचर्मरोहणम् NītiVā. 28. 37 (comm. चाण्डालाः)

अन्त्यवर्णोपलब्धि (antyavarṇopalabdhi) *f.* obtainment of the final letter or syllable उत्तरोत्तरवर्णोपलब्धिवेलायामपि पूर्वपूर्ववर्णाः स्मृत्याऽनुसंधीयन्ते, तेनान्त्यवर्णोपलब्धावपि पूर्वे स्मर्यन्ते NyāyRa. 538. 17 (*on* 5 (11). 112)

अन्त्यवर्णोपलम्भ (antyavarṇopalambha) *m.* obtainment of the final letter or syllable पूर्वपूर्ववर्णोपलम्भाहितसंस्कारसहितः अन्त्यवर्णोपलम्भः समुदायं गोचरयति TarkSaṁ. (Ā.) 105. 19.

अन्त्यवर्णोपलम्भानन्तरम् (antyavarṇopalambhānantaram) *adv.* after the obtainment of the final letter or syllable अन्त्यवर्णोपलम्भानन्तरं सर्वे संस्काराः सम्भूय स्मृतिं एकां उत्पादयन्ति TarkSaṁ. (Ā.) 105. 22.

अन्त्यवर्तिन् (antya-vartin) *adj.* existing at the end कभ१४मनवस्ते कल्पे कृताब्दतुल्यैः क्मसन्धिभिः सहिताः। आद्यन्तरान्त्यवर्तिभिरेवं कल्पोऽर्कभगणतुल्याब्दः ĀryaSi. 1. 16. (8) (comm. °अवसानसंस्थितैः)

अन्त्यवस्तु (antya-vastu) *n.* (Mus.) last composition शाखायाः प्रतिशाखायाः कलाषट्केऽन्त्यवस्तुनः अन्त्ये पदावृत्तियुक्तः पञ्चपाणिर्यथाक्षरः SaṁgīRa. iii. 47. 2 (5. 93); अन्त्यसंनिपातवर्जिताभिः कनिष्ठासारितस्य कलाभिरन्विता अन्त्यवस्तुनः षष्ठीमात्रा संहरणं कार्यम् SaṁgīRa. iii. 87. 3 (5. 142)

अन्त्यवादिन् (antya-vādin) *m.* (Mus.) principal note as one of the three types of Vṛttis मूर्च्छनास्वादिमध्यान्ते वादिसंवाद्यन्त्यवादिसंज्ञास्तिस्रो वृत्तयः। पूर्वोक्ताश्च नवरसाः तत्र हास्यशृङ्गारयोर्मध्यमपञ्चमौ ViṣṇuDhaP. iii.18. 18.

अन्त्यवासिन् (antya-vāsin) *m.* **A** Śūdra सर्वे ब्रह्म वदिष्यन्ति ... ब्राह्मणाश्चान्त्यवासिनः BrahmP. 230. 12; **B** Cāṇḍāla दर्शने चान्त्यवासिनाम् ... आचान्तोऽप्यशुचिर्भवेत् VāyuP. ii. 17. 40; **C** lowest caste येऽर्चयन्ति शिवं नित्यं ... अन्त्यवासिनः ... तं शिवं प्राप्नुवन्त्येव SkandP. i (1). 8. 116.

अन्त्यविकार (antya-vikāra) *m.* change or modification of the final letter व्यवधानोऽन्त्यविकारे ṚTPrāti. 185; सिद्धमलोऽन्त्यविकारात् Vār. 6 *on* P. ii. 4. 85; MahāBh. i. 501. 10 (*on* ii. 4. 85)

अन्धकारभार (andhakāra-bhāra) *m.* mass or heap of darkness अन्धकार-(v.l. अन्धकारभार) इव दोषानुबन्धचतुरो विश्वकर्मावलेपनोद्यतः ... अनुगतमपि यवसं ततं नानुमोदते VāsaDa. 72. 2; आसीच्च तस्य महीपतेः ... बिम्बाधरराग-बालातपभीतकुण्डलितान्धकारभारनिभेन ... हस्तेन पत्यभिसारदुर्दिनमिव दर्शयन्ती ... वल्लभा देवी वसुमती नाम AvantiKa. 23. 5; (*fig.*) mass or heap of darkness (of misery) मम हि ... दुःखान्धकारभाराक्रान्तेन उच्छ्वसितमिव चेतसा ... गतः शोकः Kād. 181. 21.

अन्धकारभिद् (andhakāra-bhid) *adj.* which destroys, i.e. dispels darkness तदा कृतजगन्नेत्रचमत्कारोऽन्धकारभित्। बभूव विद्युदुद्योतः TriṣaŚaPuC. i. 2. 268.

अन्धकारभिन्न (andhakāra-bhinna) *adj.* which is other than darkness त्वं लोचनान्धकारे द्रष्टुं वस्त्वन्धकारभिन्नं किम्। वाञ्छसि ĀryāŚ. 68.

अन्धकारमग्न (andhakāra-magna) *adj.* **A** *(fig.)* sunk or immersed in darkness, i.e. calamity प्राग्वाटवंशाभरणं बभूव ... थि(वि)मलाभिधानः। यस्तेजसा दुसमयाधकार (Read दुस्समयांधकार)मग्नोऽपि धर्म्मः सहसाविरासीत (Read °सीत्) EI. ix. 156. 5; **B** sunk or immersed in (physical) darkness वयमन्धकारमग्नाः परितो विलोकयामः Rāgh. 15. 30.

अन्धकारमध्यवर्तिनी (andhakāramadhya-vartinī) *adj. (f.)* being in the middle of darkness विघटितकवचसहस्रान्धकारमध्यवर्तिनी ... अभिसारिकेव ... समीपमसकृदाजगाम राजलक्ष्मीः Kād. 6. 7.

अन्धकारमध्यस्थ (andhakāramadhya-stha) *adj.* (used as noun) **i** (one) who is present in the middle of darkness एतद्यान्धकारमध्यस्थस्यालोकमध्यवर्ति-विषयोपलब्धेः NyāyVārPari. 499. 4; **ii** (that) which is present in the middle of darkness एतद्य ... आलोकमध्यवर्तिनापि चान्धकारमध्यस्थानुपलब्धेरुन्नेयम् NyāyVārPari. 499. 5.

अन्धकारमय (adhakāra-maya) *adj.* [*f.*-ī] **A** full of darkness, dark बाह्याभ्यन्तरमन्धकारमयमाकाशम् MaṇḍBrāU. 351. 28; पुरा ब्रह्मा ... अन्धकारमयं सर्वं बुबुधे परमाद्भुतम् BṛDharmP. i. 25. 4; स तन्मूढश्चेटिकाभिः प्रवेशितः। अभ्यन्तरगृहं गुप्तमन्धकारमयं ततः KathāSaSāg. i. 4. 51; बहलधूलीभिरन्धकारमयं जगत्। ... यक्षश्चकार TriṣaŚaPuC. iv. 7. 197; **B** having the nature of darkness, dark in nature अन्धकारमयी ... तनुत्वमेति ... क्षया YogVā. iv. 22. 12.

अन्धकारमलकज्जल (andhakāra-malakajjala) *n.* collyrium of dust in the form of darkness अन्धकारमलकज्जलेपत्यक्तमम्बरभूदतिशुभ्रम् UdaySuKa. 73.27.

अन्धकारमलिनानन (andhakāramalinānana) *adj.* whose face is black with darkness स गोहत्याकार इवान्धकारमलिनाननः। ... समागच्छन् सागरेण व्यलोक्यत TriṣaŚaPuC. i. 2. 76.

अन्धकारमहार्णव (andhakāra-mahārṇava) *n.* great ocean of darkness तद्घनीभूतदैत्येन्द्रमन्धकारमिवार्णवम्(v.l. अन्धकारमहार्णवम्)। दानवं देवसदनं तमोभूतमिवाबभौ HariVaṁ. 35. 17.

अन्धकारमात्रा (andhakāra-mātrā) *f.* (small) measure or bit of darkness दृश्यते तावत् काचिदन्धकारमात्रा निकटस्थितेनाप्यालोकेनानिवर्तिता DharmoPra. 202.15.

अन्धकारमिष (andhakāra-miṣa) *adj.* being in the guise of darkness दष्टे जगद्वपुषि कालभुजंगमेन तत्रान्धकारमिषमाविरभूद्विषं यत्। ... पयसि तं क्षिपति स्म धाता Mukundā. 248.

अन्धकारमुख (andhkāra-mukha) *n.* [Inst.] by means of darkness, i.e. through darkness अन्धकारमुखेनाहं गोमुखेनेति भाषितः BṛKathāŚloSaṁ. 28.19.

[1]**अन्धकारय** (andhakāraya-) *denom.* **A** to darken, to spread darkness हृदयमन्धकारयति मे दिवसमिव पयोधरोन्नतिरस्याः HarṣaC. 199. 15; आर्याः पश्यत ... अन्धकारयति धरणिरप्यनाराधनयते ... युष्मादृशां च वचनमन्यथा भवति AvantiKa. 122. 7; दिशोऽन्धकारयन्त्येते विद्युद्वन्तो बलाहकाः PadmP. (Ra.) 42. 96; YaśasCam. ii. 52. 5; मृगाङ्कमूर्तिरिवास्तमुपयान्ती जगदप्येतदन्धकारयिष्यसि UdaySuKa. 137. 7; अभ्रसिन्धुरखिलानपि लोकानन्धकारयति YātrāPra. 7.148; **Bi** to darken, i.e. to cause anxiety, HarṣaC. 199. 15; **Bii** to darken, i.e. to render hopeless मनोऽपि घनदिनमिव बाढमन्धकारयत्याशाम् YaśasCam. ii. 52.5.

[2]**अन्धकारय** (andhakāraya-) *denom.* to transform into (the form of) Śiva (*lit.* to make enemy of the demon Andhaka), YātrāPra. 7. 148 (better **अन्धकारीय**)

अन्धकारयात (andhakāra-yāta) *adj.* gone, or lost in spiritual darkness, i.e. ignorance मार्गोऽयं जिनदेशितः। ममान्धकारयातस्य यो भास्कर इवोदितः PadmP. (Ra.) 26. 36.

अन्धकाररजनी (andhakāra-rajanī) *f.* dark night निद्राति दैत्यद्रुहि प्राप्य प्रावृषमन्धकाररजनीम् ... जाग्रति यामिका इव ... धनाः SaduktiKa. 174.26.

अन्धकाररात्रि (andhakāra-rārti) *f.* dark night जाने निशासिंहिकया विदारिततनुः शशी। ... निशान्धकाररात्रिः AlaṅkāMañ. 235.7.

अन्धकारराशि (andhakāra-rāśi) *m.* mass or heap of darkness नैनमन्धकार-राशिरन्तरयति Kād. 243. 11; (अवनिपः) °नीलांशुकावगुण्ठनस्यान्धकारराशेरुप-क्रियायामुपन्यस्तायामात्मनि पुरुषाभिमानमारोपयन् ... सुस्तलास्यम् ... बबन्ध AvantiKa.31.6.

अन्धकाररिपु (andhakāra-ripu) *m.* name of the Sun (*lit.* enemy of the darkness) स्युर्द्वादशात्मनि ... विभावसुविरोचनकर्मसाक्षिवास्यन्धकाररिपवः KośaKaTa. 1. 656.

अन्धकाररूप (andhakāra-rūpa) *adj.* of the form of darkness अन्धकाररूपे वस्तुनि ... तादृशकटाहस्खलत्कज्जलरूपवस्त्वन्तरात्मना संभावना स्वरूपोत्प्रेक्षा AlaṅkāMañ. 42. 1.

अन्धकारलेशप्रसङ्ग (andhakāraleśa-prasaṅga) *m.* undesired occasion of the small bit of darkness मखे सवितरि च दुर्भिक्षान्धकारलेशप्रसङ्गात् NyāySu. (Ja.) 131A. 10 (*on* i. 1. 6)

अन्धकारवत् (andhakāra-va(n)t) *adj.* [*f.*-ī] full of darkness, possessing darkness निशाप्यन्धकारवती UdaySuKa. 31. 27; (नरकः) तामिस्रोऽन्धकारवान् BālamBha. iii. 121. 30 (*on* 3. 222)

अन्धकारवत् (andhakāra-vat) *adv.* like darkness अज्ञानस्यान्धकारवत् ... सविषयत्वस्य स्वीकृतत्वाच्च Nyāyāmṛ. 195B. 5; तमसा अन्धकारवद्भावरूपेणात्म-संबन्धिस्वरूपावारकेणाज्ञानेन ... स्ववशीकृतम्। ... जगत् ... आसीत् GuruCandr. iii. 155. 17; LaCandr. 543. 32.

अन्धकारवर्णनपद्धति (andhakāravarṇana-paddhati) *f.* name of a section in the Sūktimuktāvali (*lit.* course of the description of darkness) इति ... सूक्तिमुक्तावल्याम् अन्धकारवर्णनपद्धतिः SūktiMu. 69. 14 (Colophon)

अन्धकारविजय (andhakāra-vijaya) *m.* victory over darkness अन्धकार-विजयादमृतांशोर्निस्सृतं नवयशोनिकुरम्बम् Acyutarā. 8. 68.

अन्धकारविध्वंसन (andhakāra-vidhvaṁsana) *n.* destruction, i.e. removal of spiritual darkness or ignorance यत्सकललोकालोकावलोकनप्रतिबन्ध-कान्धकारविध्वंसनम् ... तस्य ... सम्यक्चारित्ररत्नस्याष्टतयीमिष्टं करोमि YaśasCam. ii. 377. 12.

अन्धकारविनाश (andhakāra-vināśa) *m.* **A** destruction, i.e. removal of spiritual darkness or ignorance अन्धकारविनाशश्च दीपस्येव प्रकाशनम्। ... भविष्यति LingaP. i. 85. 227; **B** destruction of the (physical) darkness, LiṅgaP. i. 85. 227.

अन्धकारविनाशक (andhakāravināśa-ka) *adj.* which destroys or dispels darkness सूर्यांशसंभवा दीपा अन्धकारविनाशकाः। त्रिकाले मां दीपयन्तु SkanP. ii (4). 9. 10.

अन्धकारविपिन (andhakāra-vipina) *n.* forest full of darkness कलाकेलि-भिर्बद्धो बन्धुभिरन्धकारिणि वनाभ्यर्णे (v.l. अन्धकारविपिनेऽभ्यर्णे)किमुद्भ्राम्यति। कान्तः GītGo. vii. 13. 9.

अन्धकारविरोधित्व (andhakāravirodhi-tva) *n.* the state of being what is contradictory to darkness दीपगतभास्वररूपस्य ... दीपेऽप्यन्धकारविरोधित्वेन तत्र व्यभिचारात् Nyāyāmṛ. 527B. 7.

अन्धकारविरोधिन् (andhakāra-virodhin) *adj.* opposing to or dispelling darkness (वायोरपि विकुर्वाणात् ... तमोनुदम्। ज्योतिरुत्पद्यते) तमोनुदमन्ध-कारविरोधि ManvaVi. 64. 1 (*on* 1. 77)

अन्धकारविरोध्यादि (andhakāravirodhy-ādi) *adj.* what is opposite to darkness etc. अपिना अन्धकारविरोध्यादिसमुच्चयः LaCandr. 780. 27.

अन्धकारविशेषाभाव (andhakāraviśeṣābhāva) *m.* absence of the particular type of darkness अन्धकारविशेषाभावस्य तत्सामान्याभावत्वेनाध्यवसाने सति ... दिवसावसानानुमितिः RasGaṅ. 640. 14.

अन्धकारविस्तृति (andhakāra-vistṛti) *f.* spread or expansion of darkness चन्द्रकलाशाट्याः श्यामत्वादन्धकारे विस्तृते वा(v.l. श्यामत्वात्तद्विस्तृतिकरणा-दन्धकारविस्तृतौ सत्यां) संकेतः AlaṅkāMañ. 204. 6.

अन्धकारवृत (andhakāra-vṛta) *adj.* covered with darkness मार्गः ... सुदुस्तरः। अन्धकारवृते दुर्गे गर्भवासोपमस्तथा ViṣṇuDhaP. ii. 116. 21.

अन्धकारव्यवस्थित (andhakāra-vyavasthita) *adj.* present or existing in darkness तस्मात् शक्तिरूपेण विद्यमानमेव वृक्षबीजे वृक्षसंस्थानमाविर्भवति। यथान्धकारव्यवस्थितो बालदारकः प्रदीपात्। तथा मृत्पिण्डादपि संस्थानमाविर्भवति PramāVāBh. 38. 21.

अन्धकारव्यवहार (andhakāra-vyavahāra) *m.* expression or usage of darkness यत्रालोको नास्ति तत्रैवान्धकारव्यवहारात् TarkKau. 21. 9.

अन्धकारशङ्काकृत् (andhakāraśaṅkā-kṛt) *adj.* raising doubt regarding darkness चूडेन्दुना मुकुलिताम्बुजमन्धकारशङ्काकृता गलरुचासमशोककोकम्। ... तस्याग्रतो बत सरो विधुरीबभूव ŚrīKaC. 9. 46

अन्धकारशत (andhakāra-śata) *n.* hundreds of darknesses, i.e. large quantity of darkness अन्धकारशतैरप्यचिन्त्योऽयमिति सौख्यार्थिभिरिवाशेषते-जोभिराश्रितम् ... (राजा) मणिमपश्यत् UdaySuKa. 131. 20.

अन्धकारशर्वरी (andhakāra-śarvarī) *f.* night having the nature of darkness (क्षणिकं साधनं चास्य ...। मेघान्धकारशर्वर्यां विद्युज्जनितदृष्टिवत्)

किमिदमन्धकारशर्वर्यामिति तमउच्छ्रितायां यामिन्यामित्यर्थः NyāyRa.740.11 (*on* 6. 41)

अन्धकारशातन (andhakāra-śātana) *n.* act of destroying, i.e. removing ignorance जगज्जडतांधकारशातनशरच्चंद्रिकायाः सारदादेव्याः सद्मनि ... विजयश्रीर्नाम नाटिका नाटयितव्या EI. viii. 101. 3.

अन्धकारसंघ (andhakāra-saṅgha) *m.* mass or heap of darkness ध्वजिनीजनितं रजोऽन्धकारम् ...। परिरब्धुमिवान्धकारसंघः परमार्थो रणचत्वरं जगाहे BhārCam. 6. 96 (comm. अन्धकारसंघः तमोराशिः)

अन्धकारसंचय (andhakāra-sañcaya) *m.* intensity of darkness, MW.

अन्धकारसंधान (andhakāra-sandhāna) *n.* accumulation, i.e. mass or heap of darkness जज्ञे जगत्तत्क्षणमन्धकारसंधाननिर्धूतदिगन्तकान्ति HarVi. 48.108.

अन्धकारसंध्याराग (andhakāra-sandhyārāga) *m.* dark red glow of twilight तस्य ... उन्मिषत्तारकागणकरालितान्धकारसंध्यारागैरम्बरैकदेशैरिव मण्डलीकृतैः ... सरोभिरुद्भ्राजमानम् ... नगरमभवत् AvantiKa. 19. 15.

अन्धकारसमाच्छन्ना (andhakāra-samācchannā) *adj.* (*f.*) completely covered with darkness अन्धकारसमाच्छन्ना धरित्री रविणा विना ĀdiP. 2.28.

अन्धकारसमायुक्त (andhakāra-samāyukta) *adj.* completely covered with darkness दक्षिणं द्वारमीदृशम्। अन्धकारसमायुक्तम् BrahmP. 214. 120.

अन्धकारसमृद्धता (andhakārasamṛddha-tā) *f.* the state of abounding in darkness अयमन्धकारसमृद्धतया दृष्टिसंचारस्य न दृश्यते KundaMā. 1. 26(6)

अन्धकारसंपर्क (andhakāra-samparka) *m.* connection or contact with darkness प्रधानदन्ती ... अनवबुध्यमानः ... अन्धकारसंपर्कादध्वन्यतर्ज्यमाणगतिः ... महत्कान्तारं प्रविष्टः TilaMañ. 184. 8.

अन्धकारसंपादन (andhakāra-sampādana) *n.* obtainment, i.e. appearance of darkness सूर्यास्तेन त्वन्धकारसंपादनेन कृष्णाभिसारिकायास्तस्या अभिसरणे सौकर्यमात्रं संपादितम् AlaṅkāMañ. 161. 2.

अन्धकारसंबन्ध (andhakāra-sambandha) *m.* connection with spiritual darkness, i.e. ignorance कस्यचिदासन्नभव्यस्य ... विधूतैतत्प्रतिबन्धकान्धकारसंबन्धस्य ... यदा जीवादिषु पदार्थेषु ... श्रद्धानं भवति YaśasCam. ii. 322. 7.

अन्धकारसंभव (andhakāra-sambhava) *m.* occurrence of darkness, i.e. blindness आलोके सत्युलूकादीनामन्धकारसंभवात् ŚrutaPra. iB. 11. 25 (*on* i. 1. 1)

अन्धकारसहोदर (andhakāra-sahodara) *m.* co-uterine, i.e. equal to darkness छादयन्तो रजोभिर्द्यामन्धकारसहोदरैः। ... अग्रसैन्यैरग्रसैन्या अमिलन् TriṣaŚaPuC. i. 5. 426.

अन्धकारसिन्धुर (andhakāra-sindhura) *m.* elephant in the form of darkness अयमन्धकारसिन्धुरभाराक्रान्तावनीभराक्रान्तः। ... कूर्मः संध्यास्रमुद्वमति ĀryāSaŚa. 65.

अन्धकारसुभट (andhakāra-subhaṭa) *m.* great warrior in the form of darkness अन्धकारसुभटैरुपरुद्धा। ... ऐक्ष्यत संध्या Acyutarā. 8. 11.

अन्धकारस्थ (andhakāra-stha) *adj.* (used as noun) (object) existing in darkness प्रकाशस्थेन चक्षुषान्धकारस्थस्याग्रहणात् TattvCin. i. 720. 4.

अन्धकारस्थघटवत् (andhakārasthaghaṭa-vat) *adv.* like a pot existing in darkness इन्द्रियालोकादिप्रत्यासन्नं महदवयविवायूपनीतसुरभिशीतोष्मचक्षुरादिकं साक्षात्कारकारणकिंचित्समवधानशून्यम् अप्रत्यक्षत्वादन्धकारस्थघटवत् TattvCin. i. 723. 12; न च गकारादेर्विना व्यञ्जकमननुभवेऽन्धकारस्थघटवत् संदेहापत्तिः VaiyāBhū. 256. 24 (*on* 68)

अन्धकारस्थप्रमातृविषय (andhakārasthapramātṛ-viṣaya) *adj.* referring to the knower staying in darkness अन्धविषयः अन्धकारस्थप्रमातृविषयः पुनः योऽन्यो व्यवहारः PratyabhiVi. i. 402. 9 (*on* i. 8. 1)

अन्धकारस्थल (andhakāra-sthala) *n.* place full of darkness अन्धकारस्थले घटानुपलम्भवत् VedāntPari. 229. 8.

अन्धकारस्थायिन् (andhakāra-sthāyin) *m.* one who stays in darkness यथा प्रकाशस्थितमन्धकारस्थायीक्षतेऽसौ न तथा तमःस्थम् Viṣāpahā. 21.

अन्धकारस्थिति (andhakāra-sthiti) *f.* existence of darkness ऊष्मोपलम्भयोग्यरश्मिसद्भावे सत्यप्यन्धकारस्थितिरुपपद्यते ŚrutaPra. ii. 609. 23 (*on* iv. 2. 17)

अन्धकारस्वरूपिणी (andhakāra-svarūpiṇī) *adj.* (*f.*) having the form of darkness महाकाली स्वयं मूर्तिरन्धकारस्वरूपिणी। एका बभूव BhaviP. 567A. 24 (iv. 12. 64)

अन्धकारहर (andhakāra-hara) *adj.* [*f.*-ā] **A** dispelling or removing darkness अन्धकारहरं वज्रं विज्ञेयम् YuktiKa. 100. 9; **B** removing, i.e. piercing through darkness नक्तंचरजनस्य दृष्टिः तिमिरहरा अन्धकारहरा भवति TātpaVṛ. 86. 17 (*on* 1. 67)

अन्धकारहस्त (andhakāra-hasta) *m.* hand, i.e. column or staff of (smoke of) darkness (ज्योत्स्नावती नगरी) यस्यां सलीलमसितागुरुधूपधूमदण्डागवाक्षविवरोदरतः प्रसस्रुः। आसन्नचन्द्रकरभङ्गभियान्धकारहस्ता इव स्फुरितदीर्घशिखाङ्गुलीकाः HarVi. 1. 17 (comm. तिमिरस्य धूमदण्डाः)

अन्धकारहेतु (andhakāra-hetu) *m.* cause of darkness कः कालो विदितः इहान्धकारहेतुः SūktiMu. 98. 16.

अन्धकारांशुक (andhakārāṁśuka) *n.* garment in the form of darkness वासरश्रीः ...। स्वतनुम् ... संवृणोतीव साक्षादसितजलदनीलेनान्धकारांशुकेन SubhaDha. 1. 20.

अन्धकाराकुल (andhakārākula) *adj.* (place) filled or covered with darkness (पुमान् संग्रहणे ग्राह्यः) अदेशे निर्जने जनताकीर्णे वान्धकाराकुले अकाले संलापनं करोति। परभार्यया Mitā. 311. 1 (*on* 2. 284)

अन्धकाराकृति (andhakārākṛti) *f.* dark form, i.e. mass of darkness (हि)मकरपराभवदर्शनप्रविष्टा इवान्धकाराकृतयो ननृतुर्नतभ्रुवां भ्रुवः AvantiKa. 33.7.

अन्धकाराकृति (andhakārākṛti) *adj.* having dark form, i.e. very black (हि)मकरपराभवदर्शनप्रविष्टा इवान्धकाराकृतयो ननृतुर्नतभ्रुवां भ्रुवः AvantiKa. 33.7.

अन्धकाराक्रान्त (andhakārākrānta) *adj.* filled or covered with darkness तमसावृतत्वादिति अन्धकाराक्रान्तस्य श्वभ्रादेः Pradī. iv. 20B. 14 (*on* iv. 1. 3); PadMañ. *on* KāśiVṛ. *on* P. iv. 1. 3 (267. 24)

अन्धकारागम (andhakārāgama) *m.* appearance, i.e. overspreading of darkness पोतो दुस्तरवारिराशितरणे दीपोऽन्धकारागमे निर्वाते व्यजनम् ...। इत्थं तद्भुवि नास्ति यस्य विधिना नोपायचिन्ता कृता मन्ये दुर्जनचित्तवृत्तिहरणे धातापि भग्नोद्यमः Hitopa. 2. 151; SubhāRaK. 38. 4.

अन्धकारागमन (andhakārāgamana) *n.* appearance, i.e. overspreading of darkness उत्कण्ठैव प्रियाभिसरणे पुष्कलं कारणं नान्धकारागमनमपेक्षते Kuval. 118 (9)

अन्धकाराङ्कुर (andhakārāṅkura) *m.* sprout in the form of darkness अन्धकाराङ्कुरो जज्ञे ववृधे चाविलम्बितम् PadyaVe. 562.

अन्धकाराञ्जन (andhakārāñjana) *n.* collyrium in the form of darkness इन्दुमहोभिः ...। सिषेत्त सोच्छ्वासमुखी शतक्रतोर्दिगन्धकराञ्जनदिग्धमम्बरम् RāmC. 18. 25.

अन्धकाराति (andhakārāti) *m.* Lord Śiva (*lit.* enemy of the demon Andhaka) अन्धकारातिः ... महाकालाभिधानः स्वयं निवसति Kād. 53. 18; अन्धकारातिमभ्यर्च्य ... यस्तेऽनुयाता ... स ते भर्तेति DaśKuC. App. 151.1 [DvyakṣaNā. 2. 83]

अन्धकारातिकंधरा (andhakārāti-kandharā) *f.* neck of Lord Śiva अन्धकारातिकंधराकान्तिकालीभिः ... निम्नगाभिसारिकाभिर्गाढमुपगूढम् ... अम्भोनिधिमपश्यम् TilaMañ. 120. 14.

अन्धकारातिगहन (andhakārāti-gahana) *n.* forest of Lord Śiva अन्धकारातिगहनमेतत्प्रविश्य यस्तेऽनुयाता ... स ते भर्ता DaśKuC. App. 151.2.

अन्धकारातिदीधिति (andhakārāti-dīdhiti) *f.* the word *andhakārātidīdhiti* (splendour of Lord Śiva) श्लोकोत्तीर्णाः शब्दाः। ... अन्धकारातिदीधितिः KāvyKaVṛ. 68. 35 (3. 3)

अन्धकारातिरोचिष्णु (andhakārāti-rociṣṇu) *adj.* (used as noun) the word *andhakārātirociṣṇu* (shining like Lord Śiva) सदृग्गुणशब्दा यथा ... अन्धकारातिरोचिष्णुर्बिभ्रत्कुवलयस्थितिम्। इति श्यामवर्णः KāvyaKaVṛ.63.35 (3.2)

[1]**अन्धकारातिविघातहेतु** (andhakārātivighāta-hetu) *m.* cause of total destruction of darkness, i.e. the Moon etc. (नगर्ययोध्यासमहास्तिनाख्यया) अनन्यसाधारणरूपकान्तिषु स्मरोऽन्धकारातिविघातहेतुषु। धनुः समारोप्य गृहीतरोपणः पुरि भ्रमन्यत्र करोत्युपप्लवम् RāghPāṇ. (Dha.) 1. 39 (comm. अन्धकारस्यात्यन्तविघातकारणेषु चन्द्रादिषु सत्सु)

[2]**अन्धकारातिविघातहेतु** (andhakārātivighāta-hetu) *m.* cause of interruption in, i.e. deviation (from the penance) of Śiva, i.e. woman, RāghPāṇ. (Dhā.) 1. 39 (comm. अन्धकस्यारातेर्विघातस्य तपश्चर्यातश्च्यवनस्य हेतुषु ... कामिनीषु)

अन्धकारातिसुत (andhakārāti-suta) *m.* son of Lord Śiva, i.e. Kārttikeya अन्धकारातिसुतस्य ... सर्वम् ... गीर्वाणवृन्दं वचसा ननन्द KumāSaṁ. 13.17.

अन्धकारादर्शन (andhakārādarśana) *n.* non-perception of darkness प्रदीपकिरणानां मेलनेऽपि न विरलसंयोगः। मध्येऽन्धकारादर्शनात् ŚivārkaMaDī. ii. 182. 3 (*on* ii. 4. 15)

अन्धकारादि (andhakārādi) *adj.* **i** darkness etc. अकामेन चान्धकारादौ गौरित्येवमजानतो मृगव्याद्यधिकृतस्यास्त्येवं वधप्रसङ्गः BālaKrī. ii. 150. 18 (*on* 3. 262 (?268)); अन्धकारादिषु संभवात्प्रयोगसांकर्यम् JayaMa. 98. 23 (*on* 2. 2); बाह्यस्यान्धकारादेरिवान्तस्य किल्बिषादेरप्यहंकारनिवर्त्यत्वाभावात् ŚatDū. 126. 10; 139. 5; अन्धकारादौ च यथासुखमुखत्वविधानेऽपि स्वच्छायायामवमेहनस्यासंभवात् VīraMi. (Āhnika.) 36. 13; 390. 3; **ii** darkness as one of the substances etc. अनुपपत्तेर्न नियम इति चेत् - मैवं भाषिष्ठाः। सप्तमतया प्रमितेऽन्धकारादौ भावत्वस्य भावतया प्रमिते शक्तिदृश्यादौ सप्तमत्वस्य च निषेधात् SarvaDaSaṁ. 10. 45; 10. 144.

अन्धकारादिक (andhakārādi-ka) *adj.* darkness etc. अन्धकारादिकानां च घोराणां नाशकारकः। दिवि सूर्यः PadmP. ii. 39. 4.

अन्धकारादिदोष (andhakārādi-doṣa) *m.* defect such as darkness यत्रापि चान्धकारादिदोषात्क्रमविनिश्चयः। तत्रापि ... नैव संभूयमानता BṛĀraUBhVā. (Sambandha.) 819.

अन्धकारादिनिवर्तन (andhakārādi-nivartana) *n.* act of removing darkness etc. अङ्गणारोपितदीपः बाह्याभ्यन्तरवस्तुजातं प्रकाशयन् तत्रत्यलोकानामन्धकारादिनिवर्तनपूर्वकमभीष्टव्यवहारहेतुतया सर्वान् श्लाघयति LalitāTriBh. 325. 2 (*on* 41)

अन्धकारादिरूप (andhakārādi-rūpa) *adj.* of the form of darkness etc. प्रारब्धं कर्म सुखदुःखहेतून् कांश्चिद्विषयांश्चन्द्रोदयान्धकारादिरूपान्स्वयमेव संपादयति JīvanVi. 22. 9.

अन्धकारादिवत् (andhakārādi-vat) *adv.* like darkness etc. भावरूपाज्ञानमन्धकारादिवत् सर्वलोकप्रत्यक्षसिद्धम् NyāyPari. 179. 13.

अन्धकारादिवश (andhakārādi-vaśa) *m.* [Abl.] on account of darkness etc. दूरान्धकारादिवशादसाधारणधर्मावमर्शरहितः प्रत्ययः अनिश्चयात्मकत्वात् PramāMī. 5. 14 (*on* i. 1. 6)

अन्धकाराद्यनुभूत (andhakārādy-anubhūta) *adj.* experienced or known in darkness etc. वैशद्यमन्तरेणाप्यन्धकाराद्यनुभूतवस्तुमात्रादिषु स्मृतिदर्शनात् ŚatDū. 113. 25.

अन्धकाराद्यावृत (andhakārādy-āvṛta) *adj.* covered with darkness etc. पाणयो ध्मायन्तेऽस्मिन्निति पाणिंधमोऽध्वा। अन्धकाराद्यावृत इत्यर्थः SiddhāKau. 494B. 19 (*on* ii. 2. 37)

अन्धकारानिवर्तकप्रभा (andhakārānivartaka-prabhā) *f.* light which does not remove darkness घटादावन्धकारानिवर्तकप्रभाया इवाज्ञानविरोधिज्ञानस्यानुभवात् Nyāyāmṛ. 62B. 5.

अन्धकारानुत्पन्नत्व (andhakārānutpanna-tva) *n.* the state of not being produced in darkness द्वितीयादिप्रभायाः अन्धकारानुत्पन्नत्वेन प्रथमपदं व्यर्थम् Nyāyāmṛ. 325A. 6.

अन्धकारान्तर (andhakārāntara) *n.* variety of darkness अन्धकारान्तरे कर्णपूरा? वरदुरोदरा: ParaNā. 3745.

अन्धकारान्तरित (andhakārāntarita) *adj.* (used as noun) (that) which is covered with darkness योजनशतव्यवहितमन्धकारान्तरितं वा नास्मदादिलोचनगोचरतामुपयाति NyāyMañ. i. 96. 13.

अन्धकारान्तर्भुवन (andhakārāntarbhuvana) *n.* dark inner world विचक्षणः ... प्रविशेदन्धकारान्तर्भुवनम् MālinīT. 22. 9.

अन्धकारान्धपटावृत (andhakārāndhapaṭāvṛta) *adj.* covered by black blind fold, i.e. black dark cloth अन्धकारान्धपटावृतो जनो विचित्रचित्रं न विलोकितुं क्षमः SubhāRaSaṁ. 136 (F. N. कृष्णपटावृत)

अन्धकारापदेशतस् (andhakārāpadeśa-tas) *adv.* on the guise or pretext of darkness स्वप्नमये ...। पातकेनैव संरुद्धानन्धकारापदेशतः। ... दर्शयामास नरकान्स सुरः PariPar. 6. 111.

अन्धकारापनय (andhakārāpanaya) *m.* removal of darkness न हि प्रदीपेनान्धकारापनये कृते घटः कृतो भवति BrahmSūBh. (Bhā.) 83.19 (*on* i. 4.21)

अन्धकारापनुत्ति (andhakārāpnutti) *f.* removal of darkness (by carving the eye of idol) किं सृजेन्नयनोन्मेषमन्धकारानुप(?पनु)त्तये MānSā. 70. 4.

अन्धकारापनोदकृत् (andhakārāpanodakṛt) *adj.* who dispels or removes darkness काश्यपस्य मुनेरासीदात्मजो भानुमान् रविव्वि (Read विः। वि)श्वेशान्छ- (Read विश्वेशामेव) लोकानामन्धकारापनोदकृत् EI. iii. 80. 5.

अन्धकारापितत्व (andhakārāpita-tva) *n.* the state of being darkened, DBHS.

अन्धकाराभाव (andhakārābhāva) *m.* absence of darkness महानसम् ... स्यात् ... दर्शनीयं चान्धकार(?रा)भावात् JayaMa. 236. 5 (*on* 4. 1)

अन्धकाराम्बर (andhakārāmbara) *n.* **A** sky full of darkness अन्धकाराम्बरोन्मुक्ता विरेजुरमला दिशः। भूपतेः ... कान्ता इव YogVā. iii. 48. 45; **B** dark garment, YogVā. iii. 48. 45 (comm. अन्धकारलक्षणेनाम्बरेण वस्त्रेण)

अन्धकाराय (andhakārāya-) *denom.* to become or to function as darkness अङ्घ्रिणाक्रान्तवान्सो चेदत्युग्रां त्वमपस्मृतिम्। तयाक्रान्तमिदं कृत्स्नमन्धकारायते जगत् SkandP. i(3B). 16. 12.

अन्धकारायित (andhakārāyita) *adj.* which has become darkness जातं वाथ जगत्त्रयं मम हृतस्यैवान्धकारायितम् BhartṛNi. 2. 4.

अन्धकारार्णव (andharkārārṇava) *m.* ocean in the form of darkness (existing during universal dissolution) ब्रह्मा ... वायुर्भूत्वा तदाचरत्। अन्धकारार्णवे तस्मिन्नष्टे स्थावरजंगमे BrahmāṇḍP. i. 7. 2.

अन्धकारार्पिता (andhakārārpitā) *adj.* (*f.*) given to darkness, i.e. darkened या च ता लोके लोकान्तरिका अन्धकारा अन्धकारार्पिता तमिस्रा ... तेनावभासेन स्फुटा अभुन्सुः MaVastuAva. i. 41. 5; ii. 162. 9; iii. 334. 7.

अन्धकारावतार (andhakārāvatāra) *m.* advent of darkness बाणोऽपि ... खण्डपरशुकण्ठकाले कवलयति बाले ज्योतिःशेषं सांध्यमन्धकारावतारे ... निवासस्थानमगात् HarṣaC. 125. 12.

अन्धकाराविलतस् (andhakārāvila-tas) *adv.* from that which is obscure due to darkness बिलतस्तस्मान्निर्गत्य तेऽन्धकाराविलतः। ... गङ्गां तेरुः YudhiVi. 1. 37.

अन्धकारावृत (andhakārāvṛta) *adj.* **A** covered with or enveloped in darkness अन्धकारीकृते(v.l. अन्धकारावृते) लोके शरीभूते महीतले। दिशः सर्वा महाराज तावकाः प्राद्रवन्भयात् MahāBhā. ix. App. I. 1 (83); जगत्त्रयम्। अन्धकारावृतमभूत् BrahmāṇḍP. ii. 40. 11; **B** (*fig.*) full of darkness आशापिशाची ... सर्वग्रासमियं ग्रसिष्यति महालोभान्धकारावृतम् PraboCan. 4. 21.

अन्धकारावृतत्व (andhakārāvṛta-tva) *n.* the state of being covered with darkness सतामपि हि भावानाम् ... अनुपलब्धिः ...। अन्धकारावृतत्वात्, यथा अन्धकाराक्रान्तस्य घटादेः PadMañ. *on* KāśiVṛ. *on* P. iv. 1. 3 (267. 24)

अन्धकारावृतवत् (andhakārāvṛta-vat) *adv.* like that which is covered with darkness अन्धकारावृतवत् ... अप्रकाशेन साक्षिवेद्यतायोगात् Nyāyāmṛ. 367A. 7; AdvaiSi. 590. 31.

अन्धकारावृत्ति (andhakārāvṛtti) *f.* **A** concealment of (physical) darkness लोकालोकाचल इव प्रकाशान्धकारावृत्तिमन्थरितमनःप्रसरे ... मयि सति ... मदभिमतसाधुकारवादेनेव ध्वनितं शङ्खेन YaśasCam. ii. 79. 1 (comm. तमः ... आवृत्तिरावरणम्); **B** concealment of mental darkness, YāśasCam. ii. 79. 1. (वैराग्योद्वेगद्वयसहिते इत्यर्थः)

अन्धकाराव्यवहितोत्पत्तिकत्व (andhakārāvyavahitotpattika-tva) *n.* the state of having originated at the same time as that of darkness अन्धकाराव्यवहितोत्पत्तिकत्त्वं विशेषणम् AdvaiSi. 565. 13.

अन्धकारि (andhakāri) *m.* **1A** Lord Śiva (*lit.* enemy of the demon Andhaka) प्रपेदे ...। पुलोमपुत्रीदयितोऽन्धकारिं पत्रीव तृष्णातुरितः पयोदम् KumāSaṁ. 12. 1; नृसिंहमूर्तेः पूजां विधत्ते त्रिपुरान्धकारिः MatsyaP. 179. 90; आदध्यादन्धकारे रतिमतिशयिनीमावहन्वीक्षणानाम् SūryaŚ. 25; VyaktiVi. 54. 27; हसता किंचित्तस्थे तत्रान्धकारिणा Kirātā. 15. 29 (comm. हरेण); SaraKaṇṭhā. 326. 3; दर्पसारः ... समाराधयन्नन्धकारिमध्यास्ते शैलं कालम् AvantiKa. 209. 20; अखण्डितप्रभावोऽथ प्रदोषेणान्धकारिणा। तस्याश्रित्ते स्थितः शंभुरुदयाद्रौ च चन्द्रमाः NalaCam. 2. 31; जालंधरमिति स्थानमन्धकारेस्त्वया श्रुतम् SkandP. i (3B). 2. 63; ददौ च तस्मै वरदोऽन्धकारिः वरत्रयम् SkandP. vii (1). 290. 36; SaurP. 47. 74; केयं मूर्ध्न्यन्धकारे तिमिरमिह कुतः सुभ्रु कान्तेन्दुयुक्ते SaraKaṇṭhā. 297. 5; किमेतदन्धकारिमाराधयन्त्याः संवृत्तमत्राद्य मे UdaySuKa. 105. 10; अन्धकारिं तमपश्यदन्तकानलः SaurP. 57. 22; अन्धकारिणा तेन जगदेतत् प्रकाश्यते Candrā. 5. 75; त्रिशूललीलायितमन्धकारेर्ध्यायत्सु चक्राक्रमणं मुरारेः TripuḌi. 1. 8; ज्योतिः किमन्धकारे यदन्धकारेरनुस्मरणम् KṛṣṇaKa. 2. 80; अन्धकारे। धृतं त्वया विश्वम् ĪśvaS. 4; सर्वागमान्तप्रमितान्धकारे ... मयि ... प्रसीद RasiRañ. 59; शिश्ये शौरिः पयोधौ तुहिनगिरिदरीष्वन्धकारिर्निलिल्ये KaṁVa. 1. 31; **1B** i epithet of Śiva (*lit.* enemy of the demon Andhaka) अन्धकारिर्मखद्वेषी ...। एवं नाम्नां सहस्रेण तुष्टाव वृषभध्वजम्। ... विभुः LiṅgaP. i. 98. 125; ŚivaP. iv. 35. 99 (393A. 8); SaurP. 41. 110 [comm. *on* AbhidhāCin. 200 gives *andhakāri* as the synonym of the following words : *kāmadhvaṁsin, gajāsuradveṣin, tripurāntaka, dakṣādhvaradhvaṁsaka, pūṣadantahara* and *yamajit*]; **2** enemy in the form of the demon Andhaka नतोऽस्मि ... नीलकण्ठम् ... अन्धकारिनिषूदनम् VarāP. 144. 21.

अन्धकारिक (andhakāri-ka) *m.* name of a war between gods and demons having demon Andhaka as enemy अथ दैत्याः सुराश्चैव राक्षसास्त्वन्धकारिके। (संग्रामे) जिता देवमनुष्यैः BrahmāṇḍP. ii. 72. 82.

अन्धकारिका (andha-kārikā) *f.* outer wall surrounding the inner adytum or chamber ब्रह्मकोष्ठगतो गर्भः शेषं भित्त्यन्धकारिका SamrāSū. 55. 17; 55. 49; जठरं बाह्यसीमा च भित्तयो ह्यन्धकारिकाः SamarāSū. 55. 24; ii. 100. 20 (57); गर्भपादेन भित्तिः स्यात् तद्वदेवान्धकारिका SamarāSū. 56. 129; 56. 141; 56.280: सपादपादिका ...। बाह्यभित्तिश्च तद्वत्स्यात् तद्वद्याप्यन्धकारिका SamarāSū. 56. 149; 56. 245; 57. 18; 57. 177; ii. 77. 9 (57); 60. 12; स्याद्गर्भभित्तिर्भागेन भागेनैवान्धकारिकाः SamarāSū. 56. 270; अन्तराले तु सर्वत्र विदध्यादन्धकारिकाम् SamaraSū. ii. 92. 8 (57); ii. 111. 1 (57)

अन्धकारित (andhakār-ita) *adj.* [*f.*-ā] [P. v. 2. 36; enumerated in the *tārakādigaṇa*, GaṇPā. 101. 49; GaṇRa. 7. 389 (414); AltGr. II. 2. 324] **1A** made dark, darkened एलालतावनेन मदगन्धिनान्धकारिता ... विन्ध्याटवी नाम Kād. 19. 12; 22. 13; अतिबहरजः संभा(रस?रा)न्धकारितम् ... गणतलमनुकरोति स्म मूलरसातलस्य AvantiKa. 103. 2; 25. 13; दिशोऽन्धकारिताः सर्वा जीमूतपटलैः PadmP. (Ra.) 11. 360; 35. 38; अस्त्रं तामसमक्षिपत्। तेनान्धकारितं सैन्यं सर्वं जनकजन्मनः PadmP. (Ra.) 60. 100; 105. 14; (सेनापतिः) करिघटाभिरन्धकारितैराज्ञाकृष्टानां दुष्टसामन्तानामनीकैरापूर्यमाणकटकविनिवेशः काञ्चिद्देशमविशत् TilaMañ. 82. 11; अस्ति ... स्निग्धहरिताभिः सर्वत एवान्धकारितो वनलेखाभिरनुमेखलम् ... एकशृङ्गो नाम शिखरी TilaMañ. 202. 11; निर्मितार्ककिरणप्रतिबन्धैरन्धकारितमहीन्द्रसहस्रैः। तत्फणामणिगणैः कृतदीपालोकमोक इव पुष्करमासीत् Surath. 11. 22; बहुलधूलीभिरन्धकारितमम्बरम् PārśvC. 6. 1093; *(fig.)* made dark, darkened द्युलोकः ...। विगमात् पुण्यदीपस्य समन्तादन्धकारितः MahāP. 6. 12; अहम् ... सर्वतश्चान्धकारिते जगति ... निस्सङ्गभावमव्रजम् UdaySuKa. 70. 28; **1B** *(fig.)* **i** made gloomy, i.e. depressed मलयवती ...। मुमोहापूर्वशोकाग्निधूमेनेवान्धकारिता BṛKathāMañ. ix. 2. 921; बहिरन्तश्च सा दुःखेनान्धकारिता KarthāSaSāg. xii. 26. 12; पूष्णि चास्तं गते कर्णे नितरामन्धकारिताः। कौरवाः शिबिरं जग्मुः PāṇḍaC. 13. 769; **ii** made gloomy, i.e. not able to grasp anything तद्विच्छेदरुजान्धकारितमिदं दग्धं दिनं कल्पितम् KāvyPra. 275. 5 (comm. विषयाग्राहकम्); **1C** blackened, i.e. pale अस्या मुखमन्धकारितमभूत्रिःश्वासवातोर्मिभिः SaduktiKa. 87. 33; **2** *(fig.)* made blind, blinded प्रविविशुस्ते ... नराः। बद्धनेत्रपटाः मिथ्या मोहेनेवान्धकारिताः NarmaMā. 3. 46.

अन्धकारितकानन (andhakārita-kānana) *adj.* which has darkened the forest अन्धकारितकाननम् ... शबरसैन्यमद्राक्षम् Kād. 29. 17.

अन्धकारितदशाश (andhakārita-daśāśa) *adj.* which has darkened ten quarters अन्धकारितदशाशैः केशपाशैर्दिवापि प्रियजनाभिसरणाय प्रदोषमिव सूत्रयन्तीभिः ... विलासिनीभिः समाकुलम् ... तिलकमञ्जरीमन्दिरमपश्यम् TilaMañ. 371. 8.

अन्धकारितदिङ्मुख (andhakārita-diṅmukha) *adj.* which has darkened quarters म्लेच्छमेघे स्थिते तस्मिन्नन्धकारितदिङ्मुखे। विप्रा देशान्तरं जग्मुः RājTa. (Prā.) 889.

अन्धकारितदिङ्मुख (andhakārita-diṅmukha) *n.* quarter which has been darkened चन्द्रापीडः ... कुञ्जरघटाभिरन्धकारितदिङ्मुखतया जलधरदिवसायमानम् ... राजद्वारमासाद्य तुरंगमादवततार Kād. 86.16.

अन्धकारितनय (andhakārita-naya) *adj.* who has darkened, i.e. violated the law अन्धकारितनयो न योऽभवत्। ... तस्य तत्र वदतो वचस्तदा निर्गता HarVi. 14. 2 (comm. अन्धकारितो मलिनितो नयो येन)

अन्धकारितनय (andhakāri-tanaya) *m.* son of Lord Śiva अन्धकारितनयो न योऽभवत्। ... तस्य तत्र वदतो वचस्तदा निर्गता HarVi. 14. 2 (comm. अन्धकारेः शंकरस्य तनयः)

अन्धकारितनिष्कुटा (andhakārita-niṣkuṭā) *adj. (f.)* pleasure garden of which is darkened मदमुखरमधुकरपटलान्धकारितनिष्कुटा ... उज्ञयिनी नाम नगरी Kād. 50. 15.

अन्धकारितपुरोभागा (andhakārita-purobhāgā) *adj. (f.)* whose front portion is darkened तमालतरुभिरन्धकारितपुरोभागाम्। ... गुहामद्राक्षीत् Kād.133.6.

अन्धकारितमुख (andhakārita-mukha) *adj.* whose mouth, i.e. opening has been darkened परिमलावकृष्टमधुरकुलान्धकारितमुखैः ... स्नानकलशैरुपशोभितां स्नानभूमिमगच्छत् Kād. 15. 15.

अन्धकारितललाटाष्टापदा (andhakārita-lalāṭāṣṭāpadā) *adj. (f.)* which has darkened the chessboard in the form of the forehead स मुनिः ... अन्धकारितललाटाष्टापदाम् ... भृकुटिमाबध्नन् HarṣaC. 15. 2.

अन्धकारितशाखान्तर (andhakārita-śākhāntara) *adj.* which has darkened the intermediate space between the branches अहम् ... दिवाप्यन्धकारितशाखान्तरस्य ... तमालविटपिनो मूलदेशमविशम् Kād. 34. 18.

अन्धकारिता (andhakāri-tā) *f.* the state of being dark, darkness सुरेन्द्रेण ... अन्धकारिता चक्रे ककुभां नभसा समम् PadmP. (Ra.) 12. 328; तमोघने वेश्मनि तिष्ठतोऽनिशं व्रजत्यशेषं जगदन्धकारिताम् HarVi. 12. 28; मणिदीपमिवेशं तमन्तरेणान्धकारिताम्। बिभेमि RājTa. (Ka.) 3. 298; *(fig.)* the state of being dark, darkness दिशः प्राक्प्रभवश्चक्रे क्रोधधूमोऽन्धकारिताम् Kapphiṇā. 16. 108.

अन्धकारिताग्रिमभूमि (andhakāritāgrimabhūmi) *adj.* who has darknened the ground in front (हरिवाहनः) सः ... बालजलधरव्यूहेनान्धकारिताग्रिमभूमिरग्रेसरेण सरयूतटासङ्गि मत्तकोकिलं नाम बाह्योद्यानमगच्छत् TilaMañ. 105. 14.

अन्धकारितानन (andhakāritānana) *adj.* whose face is blackened, i.e. pale युगपच्छोकामर्षाभ्यामन्धकारिताननः ... शुकनासोऽब्रवीत् Kād. 286. 19.

अन्धकारिताष्टदिगन्तराल (andhakāritāṣṭadigantarāla) *n.* intermediate space of eight quarters which is darkened नरपतिकुमारः ...। जलधारासारमन्धकारिताष्टदिगन्तरालसूत्रिताकालप्रदोषम् ... शरच्छेदैः ... स्नायुग्रन्थिष्वसंख्यमसृजत् TilaMañ. 90.13.

अन्धकारिताष्टदिङ्मुख (andhakāritāṣṭadiṅmukha) *n.* eight quarters which have been darkened उद्दण्डमायूरातपत्रसहस्रान्धकारिताष्टदिङ्मुखतया ... जलधरवृन्दम् ... इव ... अश्वसैन्यमपश्यत् Kād. 81. 18.

अन्धकारिन् (andha-kārin) *adj.* [*f.*–iṇī] **1Ai** full of darkness, dark व्याघ्रकेतुः ... अन्धकारिणीमकारणभुवा भ्रुकुटिभङ्गेन त्रिशाखेन त्रियामामिव साहससहचारिणीं ललाटस्थलीं सदा समुद्वहन्तम् ... शबरयुवानमादायाजगाम HarṣaC. 309. 8 (comm. कृष्णाम्); अन्धकारिणि वनाभ्यर्णे किमुद्भ्राम्यति GītGo. vii. 13. 3; **1Aii** which causes darkness उल्लङ्घन्तेऽतितुङ्गेषु पादपेष्वन्धकारिषु PadmP. (Ra.) 26. 89; (used as noun) (one) who causes darkness विपाटैः पाटयामासुरदृश्यैरन्धकारिणः BrahmāṇḍP. iii. 25. 62; **1B** blackened, i.e. pale ते प्रापुरीर्ष्यापदमन्धकारि वक्त्रं शशाङ्कोपममीक्षमाणाः। ... मोहमूर्छाम् DarpDa. 7. 60; **2** causing blindness अखण्डितप्रभावोऽथ प्रदोषेणान्धकारिणा। तस्याश्चित्ते स्थितः शंभुरुदयाद्रौ च चन्द्रमाः NalaCam. 2. 31 (comm. अन्धत्वविधायिना अन्धकारयुक्तेन); *(fig.)* blinding काममन्धकारिणी प्रेमबन्धकन्दली या खलु विस्पष्टमपि नानुसंधापयति VidaMā. 5. 47 (1)

अन्धकारिलीलाद्रि (andhakāri-līlādri) *m.* pleasure-mounta in of Lord Śiva सोऽयं ददर्श दशकंधरमन्धकारिलीलाद्रितोलनपरीक्षितबाहुवीर्यम् RāmāCam.5.43.

अन्धकारी (andha-kārī) *f.* one of the seven defects in mercury which blackens the skin पर्पटी ...। अन्धकारी तथा ध्वाङ्क्षी विज्ञेयाः सप्त कञ्चुकाः RasRaSa. 11. 18.

अन्धकारीकृत (andhakārī-kṛta) *adj.* **i** made or rendered dark अन्धकारीकृते लोके द्रोणशैनेययोः शरैः MahāBhā. vii. 522*; न स्म किंचिद्व्यदृश्यत। अन्ध(?न्ध)कारीकृते लोके शरभूते महीतले MahāBhā. vii. App. I. 43 (100); ix. App. I. 1 (83); अन्धकारीकृते लोके ... न रुद्रः प्रत्यदृश्यत HariVaṁ. 112. 28; अन्धकारीकृते लोके वर्षद्भिरनिशं घनैः ViṣṇuP. v. 11. 9; लोकेन्धकारीकृते(।)व्यक्तिम् ... यान्ति जयिनो यामास्त्रियामास्विव EI. xiv. 117. 14; **ii** made or rendered dark (during the universal dissolution) अन्धकारीकृते लोके नष्टे स्थावरजङ्गमे। वर्षन्ति ते महामेघाः ViṣṇuP. vi. 3. 40; BrahmP. 231. 40.

अन्धकारीकृतदिश् (andhakārīkṛta-diś) *adj.* which has made or rendered the quarters dark अन्धकारीकृतदिशामम्भोदानामभावतः। वर्षाकालः समजनि TriṣaŚaPuC. iii. 1. 21.

अन्धकारीकृतव्योमन् (andhakārīkṛta-vyoman) *adj.* who has made the sky dark अन्धकारीकृतव्योमा बाणवर्षेण रावणः। रामारूढं तिरोधत्ते शताङ्गम् AnarghRā. 6. 61.

अन्धकारीकृताकाश (andhakārīkṛtākāśa) *adj.* which has made the sky dark संप्रहारो महान् जातस्तयोः ...। अन्धकारीकृताकाशश्चिरमप्राप्तयोः श्रमम् PadmP. (Ra.) 47. 106.

अन्धकारीकृतानन (andhakārīkṛtānana) *adj.* whose face is darkened ततो नभश्चरा ऊचुरन्धकारीकृताननाः PadmP.(Ra.)28.140.

अन्धकारीकृताम्बर (andhakārīkṛtāmbara) *adj.* which has made the sky dark तामसबाणौघैरन्धकारीकृताम्बरैः। लक्ष्मीधरकुमारेण छादितो राक्षसाधिपः PadmP. (Ra.) 74. 107.

अन्धकारीभू (andhakārī-bhū-) I.P. **1** *(fig.)* to become gloomy, i.e. erroneous or invalid कुपितस्य हि प्रथममन्धकारीभवति विद्या HarṣaC. 20.1;

2 to become dark, i.e. threatening कुपितस्य ... अन्धकारीभवति ... भ्रूकुटिः HarṣaC. 20. 1.

अन्धकारीभूत (andhakārī-bhūta) *adj*. **A** which has become dark मम ... अस्तमिते महति तेजस्यन्धकारीभूतदशाशस्य प्रणष्टः प्रज्ञालोकः HarṣaC. 247.4; **B** which has become gloomy, i.e. erroneous or invalid, HarṣaC. 247. 4.

अन्धकारेन्धनाग्नि (andhakārendhanāgni) *adj. (fig.)* having fire which has fuel in the form of darkness यस्मिन् गृहे ... । अन्धकारेन्धनाग्निं च तद् गृहं वसतिस्तव MārkP. 50. 84.

अन्धकारोत्कराम्भस् (andhakārotkarāmbhas) *n. (fig.)* water in the form of the mass of darkness भानौ कुम्भोद्भव इव पिबत्यन्धकारोत्कराम्भः। ... यान्त्यन्तस्थाः कुलशिखरिणो दृष्टिवर्त्म क्रमेण Kapphiṇā. 15. 32; SubhāRaK. 30. 20; SaduktiKa. 161. 30.

अन्धकारोत्पन्नालोक (andhakārotpannāloka) *m*. light produced in darkness अन्धकारोत्पन्नालोके प्रथमक्षणे तमःसत्त्वात् साधनवैकल्यम् LaCandr.781.33.

अन्धकारोदय (andhakārodaya) *m*. appearance, i.e. spreading of darkness भागे द्वितीये तत्रासीदन्धकारोदयः DevīBhāP. viii. 4. 11; निशा का वान्धकारोदये KṛṣṇaKa. 2.60; न भ्रूभङ्गकटाक्षवीक्षणसुखं सान्द्रेऽन्धकारोदये Subhāṣi. 2380; (इन्दुचूडः) स्पृशत्यवयवान्गाढेऽन्धकारोदये ŚṛṅgāTi. (Rā.) 129.

अन्धकारोद्विग्न (andhakārodvigna) *adj*. agitated due to darkness अन्धकारोद्विग्नश्चालोकस्यैव साधकतमत्वं विवक्षति TātpaṬ. (U.) 428. 10 (*on* 5 (10). 55)

अन्धकारोपम (andhakāropama) *adj*. comparable to or resembling with darkness संसाराडम्बरं तावदन्धकारोपमं स्थितम् YogVā. iv. 22. 22.

अन्धकारोपरुद्ध (andhakāroparuddha) *adj. (fig.)* obstructed by darkness (in the form of enemies) तावत्तच्छ[त्]त्रिभङ्गे जगदखिलमरात्यन्धकारोपरुद्धम् EI. vi. 5. 7.

अन्धकारौघ (andhakāraugha) *m*. mass of darkness चौरा इवान्धकारौघे। ... तुतुपुश्चक्रवाडाद्यास्तं श्रुत्वा RājTa. (Śrī.) 3. 58.

अन्धकार्दन (andhakārdana) *m*. Lord Śiva (*lit*. enemy of the demon Andhaka) सोऽन्धकश्चान्धकार्दनम्। ... शिवमीशानमस्तुवत् LiṅgaP. i. 93.19.

अन्धकार्पण्य (andha-kārpaṇya) *n*. compassion for the blind बालवृद्धान्धकार्पण्ये यत्कर्तव्यमवश्यतः। विनियोगं नयेत्सर्वं प्रियोपग्रहपूर्वकम् BhaviP. 33A.3 (i. 12.19)

अन्धकाल (andha-kāla) *m*. a particular hell, pw.; *nt.;* MW.

अन्धकाल (andha-kāla) *m., n.* **1** time of being blind (said of a son by his parents), DBHS; **2** name of a hell, DBHS.

अन्धकास (andhakāsa) *m*. Lord Śiva (*lit*. destroyer of the demon Andhaka) कात्र समानसमानः करोष्यतस्त्यान्धकास मानसमा नः ĪśvaŚ. 93.

अन्धकासुर (andhakāsura) *m*. demon Andhaka who is slain by the Lord Śiva अन्धा(v.l. अन्धका) सुरेणेव शूलानामुपरिगतेन ... अधिष्ठितं कुसुमपुरं नाम नगरम् VāsaDa. 116.1; (दूतम्) लम्भितसत्कारं तमुवाचान्धकासुरः HarVi. 32. 60; स भगवान् स्वयमेवान्धकासुरस्य विनाशकारी त्वां सर्वदा ... पायात् Loc. 96.16 (*on* 2.22); प्राप्तो मन्दरं चान्धकासुरः SaurP. 29.15; दैत्योऽन्धकासुरः। स्ववशं कारयामास त्रैलोक्यम् ŚivaP. iv.13.3(362B.5): भिन्नान्धकासुरमहागहनातपत्र (Read °नातपत्रं)। तद्धे(द्धे)रवं हरवपु(र्)भं(भ)वतः प्रपातुः (Read °तु) EI. xx. 101.2.

अन्धकासुरनिकारविप्लुत (andhakāsuranikāra-vipluta) *adj*. distressed by the defeat handed over by the demon Andhaka तमथान्धकासुरनिकारविप्लुताः ... ऋतवः ... शरणं ययुः HarVi. 6.1 (comm. निकारः परिभवः)

अन्धकासुरपति (andhakāsurapati) *m*. Andhaka who is the lord of demons महेश्वरः ...। येनान्धकासुरपतेरेकस्यार्पयता हृदि। शूलं त्रिजगतोऽप्यस्य हृदयाच्चित्रमुद्धृतम् KathāSaSāg. i.1.19.

अन्धकासुरभिद् (andhakāsura-bhid) *m*. destroyer of the demon Andhaka विहरतीह मधूकवनेऽन्धकासुरभिदा नगजा सह सादरम् Surath. 4.24.

अन्धकासुरभेदिन् (andhakāsura-bhedin) *m*. epithet of Śiva (*lit*. destroyer of the demon Andhaka) नमः ... अन्धकासुरभेदिने। ... नाम्नां शतं महेशस्य SkandP. i (1). 17. 82.

अन्धकासुरमर्दिन् (andhakāsura-mardin) *m*. epithet of Śiva (*lit*. destroyer or slayer of the demon Andhaka) कपर्दिने नमस्तुभ्यमन्धकासुरमर्दिने BrahmāṇḍP. i. 25.12.

अन्धकासुररिपु (andhakāsura-ripu) *m*. epithet of Śiva (*lit*. enemy of the demon Andhaka) अन्धकासुररिपो ... त्वां नतोऽस्मि SkandP. iv.49.51.

अन्धकासुरवध (andhakāsura-vadha) *m*. act of slaying of the demon Andhaka अन्धकासुरवधवृत्तान्ते शंकरकृतकेलीश्वरीप्रादुर्भाववर्णनं नामैकोनपञ्चाशदुत्तरशततमोऽध्यायः SkandP. vi.149.101 (Colophon)

अन्धकासुरसंहारिन् (andhakāsura-saṁhārin) *m*. slayer of the demon Andhaka सेनान्यमिवान्धकरुचिर(कासुर?)संहारिणश्चण्डिकापरिग्रहस्य ... राक्षसं ददर्श (राजा) UdaySuKa. 76.1.

अन्धकासुरहन्तृ (andhakāsura-hantṛ) *m*. epithet of Śiva (*lit*. slayer of the demon Andhaka) नमो भवाय ... अन्धकासुरहन्त्रे ... नमः VāmaP. 47.71.

अन्धकासुरेश (andhakāsureśa) *m*. Andhaka who is the lord of demons हिरण्याक्षः ... अन्धकासुरेशस्य पिता कालान्तकोपमः LiṅgaP. i.94.3.

अन्धकासुहृत् (andhakāsu-hṛt) *m*. name of Śiva (*lit*. who takes away the life-breath of the demon Andhaka) कालासुहृन्मखानङ्गगजपूषान्धकासुहृत्। उमापतिः ParaNā. 159.

अन्धकासुहृद् (andhakāsuhṛd) *m*. name of Śiva (*lit*. enemy of the demon Andhaka) कालासुहृन्मखानङ्गगजपूषान्धकासुहृत्। उमापतिः ParaNā. 159.

अन्धकासृज् (andhakāsṛj) *n*. blood of the Andhakas (demons born from the blood of Andhakāsura) मातरः ... अन्धकासृजः सर्वाः (v.l. अन्धकासृजं पीत्वा) परं तृप्तिमुपागताः MatsyaP. 179.33.

अन्धकासृज् (andhakāsṛj) *n*. possessing or having (drunk) the blood of the demon Andhaka मातरः ... अन्धकासृजः सर्वाः परं तृप्तिमुपागताः MatsyaP. 179.33.

अन्धकास्र (andhakāsra) *n*. blood of the Andhakas (demons born from the blood of Andhakāsura) बभूवुरन्धका घोराः ...। पानार्थमन्धकास्रस्य सोऽसृजन्मातरः MatsyaP. 179.9.

अन्धकाहव (andhakāhava) *m*. name of the (eighth) war between gods and demons निहता दानवाः सर्वे त्रैलोक्ये त्र्यम्बकेण तु। असुराश्च पिशाचाश्च दानवाश्चान्धकाहवे MatsyaP. 47.50.

अन्धकी (andhakī) *f*. south-west quarter स्यान्नैर्ऋती तु दिगन्धकी Vaija. 17. 4; ŚabdaRa. (Vā.) 304.

अन्धकीकृत (andhakī-kṛta) *adj*. made or rendered blind विनायकेन स्कन्देन नन्दिना सोमनन्दिना।... गणैरुग्रैरन्धकोऽप्यन्धकीकृतः SkandP. iv.16.70; ŚivaP. iii (5). 48.35 (279A. 14)

अन्धकीटत्व (andhakīṭa-tva) *n*. the state of being the blind worm वरम् ...। अन्धकीटत्वमेकान्ते न मौर्ख्यमतिदुःखदम् YogVā. ii. 13. 18.

अन्धकुक्कुटवत् (andhakukkuṭa-vat) *adv*. like blind cock अन्धकुक्कुटवत् अनर्थकादेव धातोः कर्त्रादिकारकमात्रे प्रत्ययः PariVṛ. (Sī.) 191.15.

अन्धकुटुम्ब (andha-kuṭumba) *n*. class or a family of blind सिन्धावन्धकुटुम्बदर्दुरकुलं हर्षादिदं ध्यायति ŚārṅgaPa.1178.

अन्धकूप (andha-kūpa) *m*. **1A** blind or dark well mouth of which is hidden, i.e. a well overgrown with plants चिरतमत्र पतितं वपुरन्धकूपे पुंसो भ्रमादनुपमं सहनीयतेजः। उद्धृत्य यो जगति तद्भविता कृतार्थो मन्ये स एव समुपासितविश्वनाथः VijñāŚ. 6.55; कन्दर्पकेतुः प्रियया विनाकृतं लतागृहमवलोक्योत्थाय च तत इतो दत्तदृष्टिः ... क्षणमन्धकूपेषु क्षणं शुष्कपर्णराशिषु ... भ्रमन्ननवरतविरहानलदह्यमानहृदयो विललाप VāsaDa. 257.2; जनः ... अन्धोऽन्धकूपे पतितः BhāgP. v.13.9; इदं संकटम् '... इतो दुष्टदन्दशूक इतोऽप्यन्धकूपः' इति न्यायात् NalaCam. 5.54 (27); अन्धकूपो महांस्तत्र प्रदेशे दारुणोऽभवत् SkandP. vii (1). 257. 18; पलायमानः सः (विप्रः) परमन्धकूपेऽपतत्तदा VarāP. 167.9; राजा ...। अन्धकूपे तकं वेगान्मन्त्रिणं निदधौ रुषा BṛKathāK. 143. 13; अस्य वेगातिशयेन संजातगुरुविस्मयोऽहम् ... अन्धकूप इव निपतिताम् ... अवनिमीक्षमाणः ... आकाशप्रदेशमासादयम् TilaMañ. 242.16; अटव्यां किलान्धकूपे पतितेषु कपिसर्पसिंहाक्षशालिकसौवर्णिकेषु कृतोपकारः कंकायननामा कश्चित् पान्थः ... अक्षशालिकाद्व्यापदमवाप NītiVā. 23. 11; (अहमपि) दृष्ट्वा चान्धकूपमधोभुवनप्रवेशधिया तस्यान्तः प्राविशम् UdaySuKa. 112.21 (6); सत्यवती नाम वृद्धा ...। बिलसिद्धिधृतश्रद्धागृहीताभरणाम्बरान् । सा चिक्षेपान्धकूपेषु SamaMā. 2.100; योगनन्दः ... । बद्ध्वान्धकूपे चिक्षेप शकटालम् BṛKathāMañ. i.2.124; vii. 1.594; न च कदाचित् स्फुटतरास्मरणमात्रेणाकर्तृकत्वं तथात्वे त्वित्यादिवाक्यानामन्धकूपानां चाकर्तृत्वप्रसङ्गात् Kiraṇā. 316. 21; अहो प्रशान्तव्रतकष्टकूटस्त्वं शष्पसंछन्न इवान्धकूपः DaśāvaC. 7. 145; तत्रान्धकूपे यावत्स शवं क्षिपति तं तया। तावदागतया पश्चात्क्षिप्तः सोऽप्यत्र भार्यया KathāSaSāg. vi. 8. 186; vii. 6. 61; x. 9.80; xii. 10.72; पायसं च निवेद्यास्मै ...। तन्निर्माल्यादिकं सर्वमन्धकूपेऽथवाम्भसि। ... निक्षिपेत् ĪśānŚiPa. ii. 21.124; इह .... संसारे जनो वैषयिकैः सुखैः। अन्धकूपे तटतृणैश्छन्ने पतति गौरिव TriṣaŚaPuC.

ii.1.133; सोऽन्धकूपे क्षिपेत्पुत्रीं ससापत्ये ददीत यः PāṇḍaC. 1.182: अभूदन्धकूपोऽपि सोदकः PārśvC. 7. 574; अविवेकास्पदा भ्रष्टाः कष्टे रूढा न सत्पदे। अन्धकूपमिवापन्ना वराकाश्चक्षुरादयः YogVā. i.30.5; iii.48.42; तेन च ... सान्धकूपे पातिता VetāPañ. (Śi.) 14.44; Subhāṣi. 968; अन्धकूपात्पयः पात्रैः सुगुणैः किं न गृह्यते CampaŚreKa. 269; वृद्धभ्रात्रा लघुबान्धवो जलावलोकनायान्धकूपे मुत्कलितः KathāK. 7.7 [Kośas give *andhakūpa* as the synonym of the following words: *andhuka*, TrikāŚe. i. 10. 20; *karkara*, TrikāŚe. i.10.20; *khaṭa*, KośaKaTa. 1. 2267; also they give *andhakūpa* as the meaning of *khaṭa*, Hārāva. 229; AnekāSaṁ. 2.84; ViśvaPra. 36.2; MediK. 35.9; AnekāTi. 2.85; ViśvaLoK. 75.10]; **1B** (*fig.*) **i** blind well in the form of worldly existence (having no way out) गर्भान्न निर्जिगमिषे बहिरन्धकूपे BhāgP. iii. 31.20 (Śukadeva संसारे); v.13.9 (Viśvanātha, Śukadeva and Śrīdhara मोहे; Vijayadhvaja अन्धकूपसमानयोनिविशेषे) ; v. 14.21; न भजन्ति महादेवीं करुणारससागराम्। अन्धकूपे पतन्त्येते घोरे संसाररूपिणि ŚivaP. v.45.10 (459.15); अहो मोहो महारत्नं मुक्त्वा काचमणीच्छया। यदेष सहसा धावन्नन्धकूपेऽन्तरापतत् PārśvC. 6. 1331; भगवन् साधूद्धृतोऽहमस्मादन्धकूपात् BhartṛNi. 3.15 (9); **ii** blind or stupefying well संपन्नः ... तस्मिन्नेव मुहुः स्खलन्प्रतिपदं गत्वान्धकूपे पतति SarvaVeSāSaṁ.78; **2** (andhakūpa) **A** name of a hell सूकरमुखमन्धकूपः ... सूचीमुखमित्यष्टाविंशतिनरका विविधयातनाभूमयः BhāgP. V. 26.7; v. 26. 17; SkandP. ii (1) .12.5; iii (1).30.4; DevīBhāP. viii. 21. 23; दशमीं यः कलामात्रां मूढोऽज्ञानेन लङ्घयेत्। ... अन्ते मन्वन्तरशतमन्धकूपे वसेद्द्विजः BrahmVaiP. iv. 26.30; iv.30. 87; iv. 33.57; पितरः ... नरके पतिता मया। अन्धकूपे ... दृष्टाः SkandP. ii(7).22.71; नैव भागवतं यत्र पुराणं गीयते कलौ। अन्धकूपेषु क्षिप्यन्ते ज्वलितेषु हुताशने (पापाः) SkandP. vii(4).39.40; BhaviP. 625 B. 22 (iv.16.123); ŚivaP. v. 9. 35 (416.10); रौरवश्चान्धकूपश्च तामिस्रं च तमोमयम्। तेषु नित्यं स्मृता रात्रिः BhaviP. 580B. 20 (iii (4). 17.159); इमावन्धकूपे पतितौ दुःखदुःखितौ PadmP. iv. 30. 64; iv. 48.18; नरकाण्यतिदुःखितानि ... रौरवः कुम्भीपाकोऽवीचिश्च। ... अवीचिक्रिमिनिचयकूट°...°अन्धकूपनरालम्ब°...°वैतरणिसंज्ञान्यवीचिप्रधानानि दश ĪśānŚiPa. ii.17.19 (5) (152.2); दुर्जनाः ... कथयन्ति स्म तं कूपमन्धकूपमिवापरम् KathāKau. 10.22; **2B** name of a pit in the hell नरकाणां च कुण्डानि ... अन्धकूपम् ... एतानि सावित्रि पापिनां क्लेशदानि BrahmVaiP. ii. 29.19; DevīBhāP. ix.32.20; **3** dungeon, i.e. a strong underground prison cell especially in a castle, cf. **अन्धकूपग**.

अन्धकूपक (andhakūpa-ka) *m.* blind well mouth of which is hidden, i.e. well over-grown with plants स घटोऽन्धकूपक त्वां प्रसादमपि नेतुमक्षमः BhallaŚ. 71; विक्रीतस्येव दीनस्य मग्नस्येवान्धकूपके। तत्र कल्पसमा रात्रिर्मोहमग्नस्य मे गता YogVā.ii.106.27; एनं संनिक्षेप्यान्धकूपके। मम ज्ञाप्यम् CampaŚreKa. 227 [KalpaK. 358.130 gives *andhakūpaka* as the meaning of the following words *kārottara*, *prahi* and *vīnāhin*]

अन्धकूपकारा (andhakūpa-kārā) *f.* prison in the form of a blind well ततश्च ... कल्पको नन्दभूभुजा। सद्योऽन्धकूपकारायामक्षेप्याक्षेपपूर्वकम्। ... पयः करकमेकं च कूपकेऽक्षेपयन्नृपः PariPar. 7.98.

अन्धकूपकुहर (andhakūpa-kuhara) *n.* hollow of a blind well अन्धकूपकुहरे परिस्फुटं दीप्रदीपककरः पतत्यसौ HarVi. 14.54.

अन्धकूपकोष (andhakūpa-koṣa) *m.* case in the form of a blind well मुग्धधनानां विधिना रुद्धानामन्धकूपकोषेषु। विहितो विवृतमहास्यो गायननामा प्रणालौघः KalāVi. 7.9.

अन्धकूपग (andhakūpa-ga) *adj.* being in a dungeon अबुद्धा चित्तमप्राप्य विस्रम्भं प्रभविष्णुषु। न स्वेच्छं व्यवहर्तव्यमात्मनो भूतिमिच्छता। इति चाचिन्तयत्तत्र शकटालोऽन्धकूपगः KathāSaSāg. i.4.128.

अन्धकूपगभीराक्ष (andhakūpagabhīrākṣa) *adj.* having eyes as deep as a blind well अन्धकूपगभीराक्षम् ...। संतत्रसुः स्म तद्वीक्ष्य गोपा गोप्यः कलेवरम् BhāgP. x.6.16; ददृशुः पतितं देहं तस्याः (पूतनायाः) ...। अन्धकूपगभीराक्षं वापीवत्कर्णयुग्मकम् ĀdiP. 17.58.

अन्धकूपगर्त (andhakūpa-garta) *m.* hollow of a blind well अन्धकूपोदरादाकृष्य प्रसभमवरुद्धाम् ... यौवननिधानका(कल?)शीमिवान्धकूपगर्तोदरादुत्क्रान्ताम् ... कन्यातपस्विनीमपश्यत् UdaySuKa. 76.29.

अन्धकूपतस् (andhakūpa-tas) *adv.* from a blind well अकस्मात्तस्मादगाधरन्ध्रोदरादन्धकूपतः ... उज्जगाम हुंकारजन्मा महाध्वनिः UdaySuKa. 81.8; वरं सहायं तं शकटालं समुद्धरे ...। निश्चित्यैतन्मयाभ्यर्थ्य राजानं सोऽन्धकूपतः। उद्धृतः शकटालोऽथ मृदवो हि द्विजातयः KathāSaSāg. i.5.5.

अन्धकूपपतन (andhakūpa-patana) *n.* **1** act of falling into a blind well अधर्मात्तु तैलाभ्यञ्जनान्धकूपपतनोष्ट्रारोहणपङ्कमज्जनस्वविवाहदर्शनादि विषयकं स्वप्नज्ञानमुत्पद्यते Upask. 410.10 (*on* ix.2.7); **2** (andha-kūpapatana) act of falling of a blind man into a well, cf. **अन्धकूपपतनन्याय.**

अन्धकूपपतनन्याय (andhakūpapatana-nyāya) *m.* maxim of falling of a blind man into a well, Mīmāṁsākośa.

अन्धकूपपतित (andhakūpa-patita) *adj.* (*f.*) fallen into a blind well अन्धकूपपतिता वराटिका तदुद्धरणक्लेशस्य तल्लाभसुखादतिशायित्वात् त्यज्यते ŚrutaPra. iA. 71.24 (*on* i.1.1)

अन्धकूपयुगल (andhakūpa-yugala) *n.* pair of dark wells वयःपरिणतिवशादीषन्निमग्नं रागान्धजननिपातान्धकूपयुगलमिव लोचनद्वयं बिभ्राणा (विषमशीला नाम) ŚṛṅgāMañ (Bho.). 14.26.

अन्धकूपस्थित (andhakūpa-sthita) *adj.* **A** staying in (the prison in the form of) a blind well अन्धकूपस्थितः कोऽपि गृह्णात्यद्यापि कोद्रवान् PariPar. 7.111; **B** staying in a blind well अन्धकूपस्थितेनापि मानसैर्यज्ञसंचयैः। ऋषिणा दीर्घतपसा संप्राप्तं वैबुधं पदम् YogVā. iii. 92.22.

अन्धकूपसमासङ्ग (andhakūpa-samāsaṅga) *m.* association or connection with a blind well अत्रान्तरे कविः प्राह कुटुम्बं निजमादरात्। अन्धकूपसमासङ्गदुःखसंहतमानसः BṛKathāK. 143.15.

अन्धकूपान्तर् (andhakūpāntar) *ind.* inside a blind well तस्मान्नाशय युक्त्यैनमिति मन्त्रे मयोदिते। योगनन्दोऽन्धकूपान्तर्शकटालं तमक्षिपत् KathāSaSāg. i.4.120; xviii. 2.46.

अन्धकूपान्तर (andhakūpāntara) *n.* interior of a blind well अन्धकूपान्तरे खात्वा बिलम् ... कविः तस्थौ BṛKathāK. 143.18.

अन्धकूपोदर (andhakūpodara) *n.* interior of a blind well जिनमार्गस्मृतिं प्राप्य पद्मनाभः प्रमोदवान्। ... मन्यमानः स्वमुत्तीर्णमन्धकूपोदरादिव। भवान्तरमिव प्राप्तो मनसीदं समादधे PadmP. (Ra.) 118.102; (राजा) राक्षसं ददर्श। तेन च ... भुजदण्डमन्धकूपोदरादाकृष्य प्रसभमवरुद्धाम् अविरतं च सदीनमाक्रन्दन्तीम् ... कन्यातपस्विनीमपश्यत् UdaySuKa. 76.25.

अन्धकेश (andhakeśa) *adj.* headed by the demon Andhaka शुक्रे निगीर्णे रुद्रेण किमकार्षुश्च दानवाः। अन्धकेशा महावीरा वद तत्त्वं महामुने ŚivaP. ii(5). 48. 1 (278B. 4)

अन्धकेश (andhakeśa) *m.* **A** name of a shrine of Śiva विख्यातश्चान्धकेशस्तथैव च। यत्र वा ह्यन्धको दैत्यः शंकरेण हतः पुरा। अयं स्वरूपमंशेन धृत्वा शंभुः पुनः स्थितः ŚivaP. iv.2.24 (351B.6); **B** name of Kṛṣṇa (*lit.* lord of the descendents of the family of Andhaka) क्रियतां केशव साम स्वजनैः सार्धं यथान्धकेश वसाम। सुहृदो नाम सहाया विपदो मोक्षाय देहिनामसहायाः YudhiVi. 6. 87.

अन्धकेशसमीपतस् (andhakeśasamīpa-tas) *adv.* in the vicinity of the shrine called Andhakeśa अन्धकेशसमीपतः। यज्ञातमद्भुतं वृत्तं शिवानुग्रहकारणात्। श्रूयतां तच्च सुप्रीत्या कथयामि यथाश्रुतम् ŚivaP. iv.13.62 (364A.5)

अन्धकेश्वरलिङ्ग (andhakeśvara-liṅga) *n.* phallic image known as Andhakeśvara अन्धकेश्वरलिङ्गस्य महिमानं वद प्रभो ŚivaP. iv. 13.2 (362B.4)

अन्धकोटर (andha-koṭara) *n.* dark hollow of a tree (लक्ष्मीः) संपन्नमक्षतं सापि विप्रलम्भेन जृम्भते। अन्तः स्फुरितरत्नेहं भास्वरं वान्धकोटरम् YogVā. vi (2). 24.14.

अन्धकोद्दामबल (andhakoddāmabala) *n.* formidable army of the demon Andhaka ऐक्यं गतः श्रीपुरुषोत्तमेन कृत्वान्धकोद्दामबलप्रणाशम्। शिवप्रसादेन शिवानुभावः पृथासुतोऽयं भविता सुशक्तिः KirātāVyā. 25.

अन्धकोपरि (andhakopari) *ind.* over or with regard to the demon Andhaka समाकृष्य धनुः शार्ङ्गं मुमोच विशिखान्बहून्। अन्धकोपरि कोपेन हन्तुकामो जनार्दनः DevīBhāP. v.6.27.

अन्धगजघटा (andhagaja-ghaṭā) *f.* troop of blinded, i.e. intoxicated elephants राजहंसो नाम राजा। ... यस्माच्च सर्वस्वमर्थिनोऽभयमरयः ... अन्धगजघटाभिः कण्ठरज्जुकषणखण्डितत्वचो गण्डमदसिन्धुरंहोजर्जरितजटिलमूलसंहतयः ... मुद्रवेलावनद्रुमाः AvantiKa. 21.16.

अन्धगजन्याय (andhagaja-nyāya) *m.* maxim of the blind men and the elephant (which illustrates the divergence of views held by the ignorant people) केवलं दुर्नयप्रभावितमतिव्यामोहवशादेकमपलप्यान्यतरद्व्यवस्थापयन्ति बालिशाः। सोऽयमन्धगजन्यायः SyādvāMañ. 14 (104)

अन्धगड (andha-gaḍa) *m.* blind, i.e. inaccessible fort स रामः स एव। तस्य ह्याज्ञया ... अन्धगडाः सप्तविंशतिः स्फोटिका अष्टोत्तरं शतं, विड्वराणि

दोषाश्च सर्वे व्यनेशन् PrabaK. 83. 4.

अन्धगम्य (andha-gamya) *adj.* knowable or perceptible by a blind person अन्धोऽयं रूपज्ञानवानित्यन्धस्य रूपविषयतया कल्पितं यत् ज्ञानं तस्य रूपं नान्धगम्यमिति स्वविषयविषयकप्रत्ययबाध्यत्वदर्शनेन व्यभिचारात् AdvaiSi. 409. 7; LaCandr. 409.23.

अन्धगम्यत्व (andhagamya-tva) *n.* the state of being what is knowable or perceptible by the blind person 'रूपं नान्धगम्य'मित्यस्य च 'रूपमन्धगम्यत्वाभावव'दिति वाक्यजन्यज्ञाने तात्पर्यात् LaCandr. 409.24.

अन्धगान्धर्विक (andha-gāndharvika) *m.* blind musician भट्टारकमठाधीशः ... अन्धगान्धर्विकान्मम्मनाम्नः स्वार्चनसेवकात् । अवन्तिपुरजं हस्तग्राहकद्विजचेलकम्। परिभ्रष्टमुपादत्त RājTa. (Ka.) 7. 299.

अन्धगुणसंयोग (andhaguṇa-saṁyoga) *m.* association with the quality of blindness पितृतः प्राप्तवान् राज्यं पाण्डुरात्मगुणैः पुरा। त्वमप्यगुणसंयोगात् (v.l. त्वमन्धगुणसंयोगात्) प्राप्तं राज्यं न लब्धवान् MahāBhā. i. 129.14.

अन्धगुहाहित्व (andhaguhāhi-tva) *n.* the state of being the snake in a dark cave वरं कर्दमभेकत्वं मलकीटकता वरम्। वरमन्धगुहाहित्वं न नरस्याविचारिता YogVā. ii.14.46.

अन्धगृहव्यथा (andhagṛha-vyathā) *f.* sorrow of (staying in) the dark house सत्यासत्यविभागेन मन्दशोकां महीपतिः। तामाह मासानष्टौ त्वं सहस्वान्धगृहव्यथाम् BṛKathāMañ. xiv.1. 283.

अन्धगृहोदर (andhagṛhodara) *n.* interior of a dark house उपकोशा तमवदन्नास्नाते त्वयि मे रतिः। इति तस्या गिरा स्नातुं विवेशान्धगृहोदरम् BṛKathāMañ. i. 2.88; vii.1. 231.

